सकता। ऐसा अडिगपना ही सिद्धिका कारण होता है। किन्तु जो लोग जरासे सन्देहमें पड़कर मूल तत्त्वोंमें ही सन्देह करने लगते हैं। कभी किसीको अच्छा समझ बैठते हैं तो कभी किसीको अच्छा समझ बैठते हैं। वे बे-पेन्दीकी लोटेकी तरह सदा इधरसे उधर लुढ़का करते हैं और कोई भी उनकी प्रतीति नहीं करता। अतः सम्यग्दृष्टिको निःसन्देह होना चाहिए। उसे तत्त्वको समझनेका प्रयत्न तो करना चाहिए किन्तु यदि वह समझमें न आये या कोई समझा न सके तो उस तत्त्वकी सत्यतामें ही सन्देह नहीं कर बैठना चाहिए। यही निःशंकितपना है जो सम्यग्दर्शन का प्रथम अंग है।

## १. निःशङ्कित अंगमें प्रसिद्ध अंजनचोरकी कथा[3]

*अब निःशङ्कित अङ्गके सम्बन्धमें कथा सुनिए—*

इसी जम्बूद्वीपके जनपद नामक देशमें भूमितिलकपुर नामका नगर है। उसका स्वामी नरपाल नामका राजा था। उसकी पट्टरानीका नाम गुणमाला था। उसके राजश्रेष्ठीका नाम सुनन्द था। सुनन्दके समस्त परिवारके हृदयको आनन्दित करनेवाली सुनन्दा नामकी धर्मपत्नी थी। इन दोनोंके धनद, धनबन्धु, धनप्रिय, धनपाल, धनदत्त, धनेश्वर और धन्वन्तरि नामके पुत्र थे। छोटा पुत्र धन्वन्तरि सब जाल-फरेबकी मायामें निपुण था।

राजाका पुरोहित धर्म-कर्ममें निपुण सोमशर्मा था। उसकी पत्नीका नाम अग्निला था। उनके विश्वरूप, विश्वेश्वर, विश्वमूर्ति, विश्वामित्र, विश्वावसु, विश्वावलोक और विश्वानुलोम नामके पुत्र थे। ज्येष्ठ पुत्र विश्वानुलोम समस्त सदाचारका विद्वेषी था।

धन्वन्तरि और विश्वानुलोम दोनों साथ-साथ खेले थे तथा दोनोंका स्वभाव और आदतें भी समान थीं, इसलिए दोनोंमें दूध और पानीकी तरह घनिष्ठ मित्रता थी। जुआ, शराब, परस्त्रीगमन और चोरी वगैरह दुराचारोंमें रत रहनेके कारण दोनोंका तिरस्कार करके राजाने उन्हें अपने देशसे निकाल दिया। वहाँसे निकाले जाकर वे दोनों कुरुजांगल देशके हस्तिना-

---

१. सदाचारशत्रुः। २. सपरिभवम्। ३. यह शब्दशः अनुवाद नहीं है।

कदाचिदस्तमस्तकोत्तंसतपनातपनिचये संध्यासमये मदसं[1]खीमलिनकपोलपालीनिलीनालिकुलालिख्यमानमुखपटाभोगभङ्गीप्रसरान्नीलगिरिकुञ्जरात्स्वच्छन्दतोऽभिमुखमागच्छतो निवृत्य श्रीधर्माचार्योच्चार्यमाणधर्मश्रवणोचितं नित्यमण्डितं नाम चैत्यालयमासादयामासतुः।

तत्र च 'धन्वन्तरे, यदि सीधुपिशितोपदंशप्रमुखानि संसारसुखानि स्वेच्छयानुभवितुमिच्छसि, तदाऽवश्यममीषामम्बराम्बरावृत्तवपुषां धर्मो न श्रोतव्यः' इत्यभिधाय पिधाय च श्रवणयुगलमतिनिर्भरं[2] प्रमीलावलम्बि[3]लोचनायामो विश्वानुलोमः सुष्वाप। धन्वन्तरिस्तु 'प्राणिना हि नियमेन किमप्यचलितात्मतया व्रतमुपात्तं भवति उदर्केऽवश्यं स्वःश्रेयसनिमित्तम्' इति प्रस्तावायातमाचार्योदितमुपश्रुत्य, प्रणिपत्य च 'यद्येवं तर्हि भगवन्, अयमपि जनोऽनुगृह्यतां कस्यापि व्रतस्य प्रदानेन' इत्यवोचत्। तदनु 'ततः सूरेः खलतिविलोकनात्त्वयात्त[4]व्यम्[5]' इति व्रतेन कुलालाल्लब्धनिधानः पयःपूराविष्टपिष्टशकटपरित्यागाद्विगतोर-

---

पुर नामक नगरमें आये। वहाँके राजाका नाम वीरनरेश्वर था और उसकी पट्टरानी वीरमणी थी। तथा यमदण्ड वहाँका कोतवाल था।

एक दिन सन्ध्याके समय सूरजके डूब जानेपर वे दोनों घूमने निकले। सामनेसे नीलगिरिके समान एक मदोन्मत्त हाथीको स्वच्छन्दताके साथ सन्मुख आता हुआ देखकर दोनों एक नित्यमण्डित नामके चैत्यालयमें घुस गये। वहाँ धर्माचार्य धर्मका उपदेश कर रहे थे।

विश्वानुलोमने धन्वन्तरिसे कहा—'धन्वन्तरि! यदि संसारके मदिरा, माँस, व्यञ्जन आदि सुखोंको यथेच्छ भोगना चाहते हो तो इन दिगम्बर साधुओंका धर्म मत सुनो।' ऐसा कहकर दोनों कानोंको बन्द करके और आँखोंको मीचकर विश्वानुलोम सो गया। उधर आचार्य कह रहे थे कि यदि प्राणी दृढ़ताके साथ नियम पूर्वक किसी भी व्रतका पालन करे तो उत्तरकालमें वह व्रत अवश्य ही उसका कल्याण करता है। यह सुनकर आचार्यको नमस्कार करके धन्वन्तरि बोला—'भगवान्! यदि ऐसा है तो इस दासको भी कोई व्रत देनेकी कृपा करें।'

आचार्यने उसकी स्थितिको समझकर कहा—'तुम प्रतिदिन घुटे सिर व्यक्तिका दर्शन करके भोजन किया करो।' धन्वन्तरिने इस व्रतको सहर्ष स्वीकार कर लिया।

एक दिन जैसे ही वह भोजन करनेके लिए बैठा, उसे अपने नियमकी याद आई, उस दिन वह घुटे सिर व्यक्तिका दर्शन करना भूल गया था। अतः उसने भोजन नहीं किया और घुटे सिर व्यक्तिकी खोजमें चल दिया। उसके पड़ोसी एक कुम्हारने उसी दिन सिर घुटवाया था, किन्तु वह मिट्टी लेनेके लिए बाहर चला गया था, धन्वन्तरि उसकी खोजमें चल दिया। जब वह कुम्हारके पास पहुँचा तो कुम्हार उसे देखकर घबरा गया। कुम्हारको उस दिन मिट्टी खोदते हुए एक घड़ा मिला था उसमें धन था। जब धन्वन्तरि कुम्हारको देखकर तुरन्त ही लौट गया तो कुम्हारको सन्देह हुआ कि उसने मुझे जमीनसे घड़ा निकालते हुए देख लिया है और अब वह कहीं राजासे मेरी शिकायत न कर दे। अतः उसे धनका आधा भाग देकर राजी कर लेना चाहिए। राजा तो सब धन ले लेगा। यह सोचकर कुम्हार धनका घड़ा सिरपर रखकर धन्वन्तरिके पीछे-पीछे हो लिया। और उसके घर पहुँचकर उसने वह घड़ा उसके सामने रखकर सब हाल

---

१. मदमषी—आ०। मदपक्षी—मु०। २. निरर्भप्र—आ०। ३. निद्रा। ४. –वं सूरे त—आ०। ५. भोक्तव्यम्।

गोक्षीणगरलजनितमृत्युसंगतिरज्ञातनामानोकहपरिहारेण[1] व्यतिक्रान्तकिंपाकफलापादितापत्तिः पुनरविचार्य किमपि कार्यं नाचर्यमिति गृहीतव्रतजातिरेकदा निशि नगरनायकनिलये नटनृत्यनिरीक्षणात्कृतकालक्षेपक्षणः स्वावासमनुसृत्य शनैर्विघटितकपाटपुटसंधिबन्धः स्वकीयया सवित्र्या[2] विहितगाढावरुण्डनमात्मकलत्रं[3] जातनिद्रातन्त्रमवलोक्योपपत्तिशङ्कया[4] मुहुरुत्खातखड्गो भगवतोपपादितं व्रतमनुसस्मार। शुश्राव[5] च दैवात्तदैव 'मनागतः परतः सर, खरं,

कहा। एक छोटे-से व्रतके कारण धनकी प्राप्तिको देखकर धन्वन्तरिका हृदय गुरु महाराजके प्रति भक्तिसे गद्‌गद हो गया। और वह नया व्रत ग्रहण करनेके लिए पुनः उनकी शरणमें पहुँचा।

इस बार मुनिराजने उससे कहा—बलिदानके लिए आटेका पशु वगैरह बनाकर लोग चौराहों आदिपर रख देते हैं उसे तुम नहीं खाना।

एक दिन धन्वन्तरि अपने मित्र विश्वानुलोम तथा अन्य साथियोंके साथ चोरी करके लौट रहा था। सब लोग भूखे थे। उन्होंने मार्गमें आटेके बने बैल रखे हुए देखे। विश्वानुलोमने उसकी रोटी बनाकर खानेका प्रस्ताव किया। किन्तु धन्वन्तरिने अपने व्रतके कारण उसे स्वीकार नहीं किया। तब विश्वानुलोम उसपर बहुत नाराज हुआ। किन्तु धन्वन्तरि अपने नियमसे विचलित नहीं हुआ। उसके साथियोंने उस आटेकी रोटियाँ बनाईं किन्तु धन्वन्तरिके स्नेहवश विश्वानुलोमने नहीं खाईं। वे दोनों बच गये और उन रोटियोंको खानेवाले उनके साथी मृत्युके मुखमें चले गये, क्योंकि कोई साँप उस आटेके पुतलेको जहरीला कर गया था। व्रतके ही कारण जीवन रक्षा होनेसे धन्वन्तरि और भी अधिक प्रभावित हुआ और गुरु महाराजके पास पुनः व्रत ग्रहण करनेके लिए गया।

गुरु महाराजने कहा—जिस वृक्षका नाम अज्ञात हो, उसके फल नहीं खाना।

एक दिन धन्वन्तरि और विश्वानुलोम चोरी करके एक जंगलमें पहुँचे। सब लोग भूखे थे किन्तु खानेके लिए वहाँ कुछ भी नहीं था। खोजबीन करनेपर एक वृक्षपर फल लगे हुए मिले। उन्हें ही तोड़कर सब खानेके लिए बैठे। धन्वन्तरिने जैसे ही एक फल अपने मुखमें रखनेके लिए उठाया। उसे अपने व्रतका स्मरण हो आया। उसने तत्काल पूछा कि ये फल जिस वृक्षके हैं उसका नाम क्या है? किन्तु कोई भी उसका नाम नहीं बता सका। अतः धन्वन्तरिने उनको खाना स्वीकार नहीं किया। धन्वन्तरिके साथ विश्वानुलोमने भी उन फलोंको नहीं खाया। वे विषफल थे, अतः खाते ही उनके साथी चल बसे और वे दोनों मित्र पुनः बच गये।

व्रतके कारण दुबारा प्राणरक्षा होनेसे धन्वन्तरि गुरु महाराजका और भी दृढ़ भक्त बन गया और पुनः उनकी सेवामें उपस्थित होकर व्रतोंकी याचना करने लगा। इस बार आचार्यने उसे बिना विचारे कोई काम न करनेका व्रत दिया।

एक दिन रातमें नगरके मुखियाके मकानपर नटोंका नृत्य होता था। उसे देखकर धन्वन्तरि देरसे घर लौटा। धीरेसे द्वार खोलकर जैसे ही उसने अन्दर देखा, अपनी माता और पत्नीको गाढ़ आलिंगन पूर्वक सोते हुए पाया। परपुरुषकी आशङ्कासे उसे मारनेके लिए जैसे ही धन्वन्तरिने तलवार ऊपर उठाई वैसे ही उसे आचार्यके द्वारा दिये हुए व्रतका स्मरण हो आया।

१. परित्यागेन मु०। २. मात्रया धृतपुरुषरूपया। ३. कृतालिङ्गनम्। ४. निद्राधीनम्। ५. श्रुतवान् गृहिणीवाणीं—हे मातः परतः सर यतो मे खरं कठिनं शरीरसम्बाधा इति।

मे शरीरसंबाधः' इति गृहिणीगिरम् । ततश्च 'यद्येवं व्रतमहमद्य नाग्रहीषम्, तदेमां मातरमिदं च प्रियकलत्रमसंशयं [1]विशस्येह दुरपवादरजसामत्र च दुरन्तैनसां भागी भवेयम्' इति जातनिर्वेदः सर्वमपि ज्ञातिलोकं यथायथं मनोरथोल्लेकमवस्थाप्य 'यत्रैव देशे दुरपवादोपहतं चेतस्तत्रैव देशे समाश्रीयमाणमाचरणं न भवति निरपवादम्' इति प्रकाशितोपदेशस्य तस्य भगवतो निदेशाद्धरणिभूषणभूधरोपकण्ठे तपस्यतः कान्तारदेवताविहितसपर्याद्धरधर्माचार्यात्सुरसुन्दरीकटाक्षविपक्षां दीक्षामादाय विदितवेदितव्यसंप्रदायः सप्तम्बरे स्तम्बाडम्बरितोपान्तपलाशिमालायामेतदचलमेखलायामातापनयोगस्थितोऽनवरतप्रवर्धमानाध्यात्मध्यानावन्ध्यनिरतः 'किमयं कर्करोत्कीर्णः, किं वास्मादेव पर्वतान्निरूढः' इति वितर्काभ्यर्णो बभूव ।

संजातसुहृत्समालोकनकामो विश्वानुलोमोऽपि तत्परिजनात्परिज्ञातैतत्प्रव्रजनव्यतिकरः 'मित्रधेयस्य धन्वन्तरेर्या गतिः सा ममापि' इति प्रतिज्ञाप्रवरस्तत्रागत्य जैनजनसमयस्थितिमनवबुध्यमानः 'हंहो मनोरहस्य वयस्य, चिरान्मिलितोऽसि । किमिति न मे गाढामङ्कपालीं[2] ददासि, किमिति न काममालापयसि, किमिति न सादरं वार्तामापृच्छसे[3]' इत्यादि बहु सप्रश्रयमाभाष्य निजनियमानुष्ठानैकताममनसि[4] निरागसि धन्वन्तरियतीश्वरे प्रकुप्य सविधाशिवतातिः प्रादुर्भवदप्रीतिर्भूतरमणीयधरणिधरसमीपसमुत्पादितोटजस्य[5] सहस्रजटस्य जटिनो निकटे शतजटोऽजनिष्ट ।

भाग्यवश उसी समय उसने पत्नीकी आवाज सुनी, जो कह रही थी—माता ! 'जरा दूर हटो, मुझे कष्ट हो रहा है ।' तब धन्वन्तरि सोचने लगा—'यदि मैंने यह व्रत न लिया होता तो आज अवश्य ही माता और पत्नीको मारकर इस लोकमें निन्दाका और परलोकमें भारी पापका भागी होता ।' यह सोचते ही उसे वैराग्य हो गया । तब सब परिवारके लोगोंके मनको जैसे-तैसे सान्त्वना देकर उसने जिन दीक्षा लेनेका विचार किया । आचार्यने कहा कि जिस देशमें अपनी बदनामी हो उस देशमें धारण किया हुआ आचरण निरपवाद नहीं रहता । अतः आचार्यकी आज्ञासे धरणिभूषण नामके पर्वतके समीपमें तपस्या करनेवाले, श्रीधर्माचार्यके पास जाकर उसने जिनदीक्षा धारण कर ली । आम्नायकी जानने योग्य सब बातोंको जानकर धन्वन्तरि मुनि उसी पहाड़की उपत्यकामें आतापन योगसे स्थित होकर आत्मध्यानमें लीन हो गये । उन्हें देखकर यह सन्देह होता था क्या यह इसी पर्वतसे निकला है या पत्थरमें उकेरी गई कोई आकृति है ?

एक दिन विश्वानुलोम अपने मित्र धन्वन्तरिसे मिलनेकी उत्कण्ठाके साथ उसके घर गया । और वहाँ उसे धन्वन्तरिके कुटुम्बिजनोंसे उसके दीक्षा लेनेका सब समाचार ज्ञात हुआ । 'मेरे मित्र धन्वन्तरिकी जो दशा हुई वही मेरी भी हो' ऐसी प्रतिज्ञा करके वह धन्वन्तरिके पास आया और जैन मुनिके आचारको न जानता हुआ कहने लगा—'अरे प्रिय मित्र ! बहुत दिनोंके बाद मिले हो । क्यों नहीं मुझसे गले मिलते ? क्यों मुझसे बात नहीं करते ? क्यों आदरके साथ मेरे कुशल-समाचार नहीं पूछते ?' इस प्रकार बड़े प्रेमसे बोलनेपर भी धन्वन्तरि मुनि आत्मध्यानमें लीन रहे । इससे रुष्ट होकर, विश्वानुलोम उसी पहाड़के समीप एक कुटीमें रहनेवाले जटाधारी साधुके निकट

१. मारयित्वा । २. आलिंगनम् । ३. कुशलम् । ४. एकाग्र । ५. तृणगृहम् ।

धन्वन्तरिरप्यातापनयोगान्ते तस्य संबोधनाय समन्ते[1] समुपसद्य 'मत्प्रणयपान्थविश्रामाराम[2] विश्वानुलोम जिनधर्मस्थितिमनवबुध्यमानः किमित्यकाण्डे चण्डभावमावाय दुराचारप्रधानः समभूः। तदेहि विहायेमं कुपथकथासनाथं शमथावसथमनोरथं सहैव तपस्याव:' इति बहुशः कृतप्रयत्नप्रकाशोऽपि दुःशिक्षावशात्तमोतपोतरुतभीतपतङ्गपाकमिव[3] मुधामौनमूकतोचरक्षितचित्तोत्सेकं तितउर्पात्र[4] इव तन्मनोमत्रेऽप्रासप्तसदुपदेशपयोवस्थानः प्रतिबोधयितुमशक्नुवन्गुरुपादमूलमनुशील्य कालेन प्रवचनोचितं चरमाचरणाधिकृतं विधिं विधाय विबुधाङ्गनाजनोच्चार्यमाणमङ्गलपरम्परानल्पेऽच्युतकल्पे समस्तसुरसमाजस्तूयमानमहातपःपरायणप्रतिभोऽमितप्रभो नाम देवोऽभवत्।

विश्वानुलोमोऽपि पुरोपार्जितजीवितावसाने विपद्योत्पद्य च व्यन्तरेषु गजानीकमध्ये विजयनामधेयस्य विद्युत्प्रभाख्यया वाहनो बभूव। पुनरेकदा पुरंदरपुरःसरेण दिविजवृन्देन सह नन्दीश्वरद्वीपास्तत्रत्यचैत्यालयाश्रयामष्टाह्नीपर्वक्रियां निर्वर्त्यागच्छन्नसावमितप्रभो देवस्तं विद्युत्प्रभमिभमवेक्ष्याह्लादमानमानसः प्रयुज्यावधिमवबुद्धपूर्ववृत्तान्तः 'विद्युत्प्रभ, किं स्मरसि जन्मान्तरोदन्तम्' इत्यभाषत।

विद्युत्प्रभः—'अमितप्रभ, बाढं स्मरामि। किंतु सकलत्रचारित्राधिष्ठानादनुष्ठानान्ममैवंविधः कर्मविपाकानुरोधः। तव तु ब्रह्मचर्यवशात्कायक्लेशादीदृशः। ये च मदीये समये जमदग्नि-मतङ्ग-पिङ्गल-कपिञ्जलादयो महर्षयस्ते तपोविशेषादिहागत्य भवतोऽप्यभ्यधिका भविष्यन्ति। ततो न विस्मेतव्यम्'।

जटाधारी साधु बन गया। आतापन योगके समाप्त होनेपर धन्वन्तरि मुनि उसे समझाने गये। बोले—'मेरे प्रेमरूपी पथिकके विश्राम करनेके लिए उद्यानके तुल्य विश्वानुलोम! जैन धर्मकी मर्यादाको न जानकर, बिना कारण क्रोध करके तुम क्यों कुमार्गगामी हो गये हो? चलो इस कुमार्गको छोड़ो, दोनों साथ ही तपस्या करेंगे।' इस प्रकार बार-बार कहनेपर भी विलावके बच्चेके शब्दसे डरे हुए पक्षी शावककी तरह मूक रहकर वह मौनका ढोंग बनाये रहा और चलनीमें दूधकी तरह उसके मनमें धन्वन्तरिका सदुपदेश नहीं ठहर सका। तब धन्वन्तरि उसे समझानेमें अपनेको असमर्थ जानकर गुरुके पादमूलमें लौट आये और आगमानुसार उत्कृष्ट चारित्रका पालन करते हुए शरीर त्यागकर देवांगनाओंके मंगलगानसे मुखरित सोलहवें स्वर्गमें अमितप्रभ नामक देव हुए। वहाँ देव समाजने उनके महातपकी बड़ी प्रशंसा की।

विश्वानुलोम भी मरकर विजय नामक व्यन्तरकी गजसेनामें विद्युत्प्रभ नामसे वाहन जातिका देव हुआ। एक बार अष्टाह्निका पर्वमें अमितप्रभ देव इन्द्रादिक देवताओंके साथ नन्दीश्वरद्वीपके चैत्यालयोंकी पूजा करके लौट रहा था। मार्गमें विद्युत्प्रभ नामके हाथीको देखकर उसका मन बड़ा हर्षित हुआ और अवधिज्ञानसे पूर्व जन्मका सब वृत्तान्त जानकर वह बोला—'विद्युत्प्रभ! क्या पूर्व जन्मका वृत्तान्त याद है?'

विद्युत्प्रभ बोला—'अमितप्रभ, हाँ, खूब याद है। किन्तु सपत्नीक चारित्रका पालन करनेसे मेरा कर्मोदय ऐसा हुआ और ब्रह्मचर्यके कारण कायक्लेश उठानेसे तेरा कर्मोदय ऐसा हुआ। किन्तु मेरे समयके जो जमदग्नि, मतङ्ग, पिंगल, कपिञ्जल आदि महर्षि हैं वे तपस्याके

१. समीपे। २. तापसाश्रम। ३. मार्जारबालशब्दभीतपक्षिबालमिव।—कुशावक–ब०। ४. चालनिका।

अमितप्रभः—'विद्युत्प्रभ, संप्रत्यपि न मुञ्चसि दुराग्रहम्। तदेहि। तव मम च लोकस्य परीक्षावहे चित्तम्' इति विहितविवादौ तौ द्वावपि देवौ करहाटदेशस्य पश्चिमदिग्भागमाश्रित्य क्ष्मापीतलमवतेरतुः।

तत्र च वनेचरसैन्यसौजन्याशून्ये तन्निकटदण्डकारण्यवने समित्कुशकुशेशयप्रकामे बदरिकाश्रमे बहुलकालकृतकृच्छ्रतपसं चन्द्रचण्डमरीचिरुचिपानपरायणमनसमूर्ध्वबाहुमेकपादावस्थानाग्रहराहुमनल्पोल्लसत्पल्लवाविरलवल्लीगुल्मवल्मीकावरुद्धवपुषमतिप्रवृद्धवृद्धतासुधाधवलितशिरःश्मश्रुजटाजालत्विषमृषेः कश्यपस्य शिष्यं जमदग्निमवलोक्य पत्त्ररथमिथुनकथोचिताश्लेषं वेषं विरचय्य तत्कूर्चकुलायकुटीरकोटरे निविष्टौ 'कान्ते, काञ्चनाचलमूलमेखलायामशेषशकुन्तचक्रवर्तिनो वैनतेयस्य वातराजसुतया मदनकन्दलीनामया सह महान्विवाहोत्सवो वर्तते। तत्र मयावश्यं गन्तव्यम्। त्वं तु सखि, समासन्नप्रसवसमया सती सह न शक्यसे नेतुम्। अहं पुनस्तद्विवाहोत्सवानन्तरमकालक्षेपमागमिष्यामि। यथा चाहं तत्र चिरं नावस्थास्ये तथा मातुः पितुश्चोपरि महान्तः शपथाः। किं च बहुनोक्तेन। यद्यहमन्यथा वदामि तदास्य पापकर्मणस्तपस्विनो दुरितभागी स्याम्' इत्यालापं चक्रतुः।

तं च जमदग्निः कर्णकटुमालापमाकर्ण्य प्रवृद्धक्रोधः कराभ्यां तत्कदर्थनार्थं कूर्चं

---

प्रभावसे यहाँ आकर तुमसे भी बड़े देव होंगे। इसलिए मुझे देखकर तुम्हें आश्चर्य नहीं करना चाहिए।'

अमितप्रभ बोला—'विद्युत्प्रभ! अब भी अपने दुराग्रहको नहीं छोड़ते हो तो आओ हम दोनों अपने-अपने धर्मात्माओंके चित्तकी परीक्षा करें।'

इस प्रकार परस्परमें झगड़ते हुए वे दोनों देव करहाट देशकी पश्चिम दिशामें पृथ्वीपर उतरे। वहाँ दण्डकारण्य वनमें समिधा, कुश और कमलोंसे भरे हुए बदरिकाश्रममें उन्होंने बहुत कालसे कठोर तपस्या करते हुए कश्यप ऋषिके शिष्य जमदग्निको देखा। वे जमदग्नि ऋषि चन्द्र और सूर्य दोनोंकी किरणोंका पान करनेमें तत्पर थे। उनके दोनों हाथ ऊपर उठे हुए थे, वे एक पैरसे खड़े थे। उनके चारों ओर उगी हुई घनी लता झाड़ी और वामियोंने उनके शरीरको ढक दिया था, और बहुत वृद्ध हो जानेके कारण उनके सिर और दाढ़ी मूछोंके बाल चूनेकी तरह सफेद हो गये थे। उन्हें देखकर उन दोनों देवताओंने पक्षियोंके जोड़का रूप बनाया और उनकी जटाओंमें घोंसला बनाकर रहने लगे।

एक दिन पक्षी बोला—'प्रिये! सुवर्णगिरिकी उपत्यकामें समस्त पक्षीकुलके सम्राट् गरुड़राजका वातराजकी सुता मदनकन्दलीके साथ महान् विवाहोत्सव हो रहा है। उसमें मुझे अवश्य जाना है। तुम्हारा प्रसवकाल समीप है इसलिए तुम्हें मैं अपने साथ नहीं ले जा सकता। विवाहोत्सवके बाद तुरन्त ही मैं लौट आऊँगा। मैं अपने माता-पिताकी शपथ करता हूँ कि मैं वहाँ बहुत समय तक नहीं ठहरूँगा। अधिक क्या कहूँ, यदि झूठ बोलूँ तो इस पापी तपस्वीके पापका भागी मैं होऊँ।'

इस अप्रिय बातके सुनते ही जमदग्निका क्रोध भड़क उठा और उसने पक्षियोंको मारनेके

---

१. भूमि। २. ईंधन। ३. दर्भ। ४. जल। ५. सूर्य। ६. -तिप्रवृद्धहृदयता—आ०। ७. पक्षियुगल। ८.-चक्रचक्र—आ०। ९. नामधेयया आ०।

मलितवान्। अमरचरौ [1]विकिरावप्युड्डीय तदग्रविटपिनि संनिविश्य पुनरपि तं तापसम-वलोहलालापौ[2] निकाममुपजहसतुः। तापसः साध्वसविस्मयोपस्तृतमानसः 'नैतौ खलु पक्षिणौ भवतः। किं तु रूपान्तरावुमामहेश्वराविव कौचिद्देवविशेषौ। तदुपगम्य प्रणम्य च पृच्छामि तावदात्मनः पापकर्मत्वकारणम्।

अहो मत्पूर्वपुण्यसंपादितावलोकनदिव्यद्विजोत्तमान्वयसंभवसदनपतङ्गमिथुन, कथयतां भवन्तौ कथमहं पापकर्मा' इति।

पतत्रिणौ—'तपस्विन्, आकर्णय।

*अपुत्रस्य गतिर्नास्ति स्वर्गो नैव च नैव च।*
*तस्मात्पुत्रमुखं दृष्ट्वा पश्चाद्भवति भिक्षुकः ॥१५२॥*

तथा—

*[3]अधीत्य विधिवद्वेदान्पुत्राँश्चोत्पाद्य युक्तितः।*
*इष्ट्वा यज्ञैर्यथाकालं ततः प्रव्रजितो भवेत् ॥१५३॥*

इति स्मृतिकारकीर्तितमप्रमाणीकृत्य तपस्यसि' इति।

'कथं तर्हि मे शुभाः परलोकाः'।

'परिणयनकरणादौरसपुत्रोत्पादनेन'।

'किमत्र दुष्करम्' इत्यभिधाय मातुलस्य विजयामहादेवीपतेरिन्द्रपुरैश्वर्यभाजः काशिराजस्य भूभुजो भवनभाग्भूत्वा तद्दुहितरं रेणुकां परिणीयाविरलकलापोलपालंकृत-पुलिनासराले मन्दाकिनीकूले महदाश्रमपदं संपाद्य परशुरामपिताऽभूत्।'

---

लिए दोनों हाथोंसे अपने सिरको मसला। दोनों पक्षी भी तत्काल उड़कर उसके सामने वाले वृक्षपर जा बैठे, और मीठे शब्दोंमें उस तापसकी खूब हँसी करने लगे। यह देखकर तापसका मन भय और आश्चर्यसे भर गया। वह सोचने लगा—'ये दोनों पक्षी नहीं हैं किन्तु रूप बदले हुए शिव और पार्वतीके समान कोई देवता हैं अतः इनके पास जाकर और प्रणाम करके अपने पापी होनेका कारण पूछूँ।'

यह सोच उनके पास जाकर वह बोला—'दिव्य द्विजश्रेष्ठ कुलमें उत्पन्न पक्षियुगल! मेरे पूर्व संचित पुण्यसे ही आपका दर्शन हुआ है। बतलाइए। मैं कैसे पापी हूँ।'

पक्षी बोले—'सुनो तपस्वी—स्मृतिकारोंका कथन है कि—बिना पुत्रके मनुष्यकी गति नहीं होती और स्वर्ग तो मिलता ही नहीं है। इसलिए पुत्रका मुख देखकर पीछे भिक्षुक होना चाहिए। तथा—विधिपूर्वक वेदोंका अध्ययन करके, धर्मपूर्वक पुत्रोंको उत्पन्न करके और शक्तिके अनुसार यज्ञ करके फिर साधु होना चाहिए। ॥१५२-१५३॥

किन्तु तुम स्मृतिकारके इस कथनको प्रमाण न मानकर तपस्या करते हो।'

'तो मेरा परलोक कैसे शुभ हो सकता है?'

'विवाह करके औरस पुत्र उत्पन्न करनेसे।'

'यह क्या कठिन है'—ऐसा कहकर जमदग्नि ऋषिने विजया महादेवीके पति, इन्द्रपुरके समान ऐश्वर्यके भोगी अपने मामा काशीराजके महलमें जाकर उनकी लड़की रेणुकासे विवाह कर

---

१. पक्षिणौ। २. व्यक्तस्वरौ। ३. 'अधीत्य.......। इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत् ॥' —मनुस्मृति ६-३६।

भवति चात्र श्लोकः—

*अन्तस्तत्त्वविहीनस्य वृथा व्रतसमुद्यमः ।*
*पुंसः स्वभावभीरोः स्यान्न शौर्यायायुधग्रहः ॥१५४॥*

*इत्युपासकाध्ययने जमदग्नितपःप्रत्यवसादनो नाम पञ्चमः कल्पः ।*

पुनस्तौ त्रिदशौ मगधदेशेषु कुशाग्र[1]नगरोपान्तपातिनि पितृवने कृष्णचतुर्दशी-निशि निशाप्रतिमाशयवशमेकाकिनं जिनदत्तनामानमुपासकमवलोक्य साक्षेपम् 'अरे दुराचाराचरणमते निराकृते[2] अविदितपरमपद मनुष्यापसद, शीघ्रमिमामूर्ध्वशोषं शुष्कस्थाणुसमां प्रतिमां[3] परित्यज्य पलायस्व । न श्रेयस्करं खलु तवात्रावसरं पश्यावः । यस्मादावां ह्येतस्याः परेतपुरभूयस्या[4] भूमेः पिशाचपरमेश्वरौ । तदलमत्र कालव्यालावलोकनकरप्रस्थानेन[5] । मा हि कार्षीरन्तरायोत्कर्ष[6]भावमतुच्छस्वच्छन्द-केलिकुतूहलबहलान्तःकरणप्रसवयोरावयोः' इत्युक्तमपि प्रकामप्रणिधानो[7]द्युक्तमवेक्ष्य न्यक्षतः[8] कीनाश[9]कासर[10]निकायकायाकारघोरघनघस्मराडम्बरप्रथमप्रारम्भावहैः प्रचण्डतडिद्दण्डसंघ-ट्टोच्छलच्छब्दसंदोहदुःसहैः निःसीमसमीरासरालसूत्कारसारप्रसरप्रबलैः करालवेतालकुल-काहलकोलाहलानुकूलैरन्यसामान्यैरन्यैश्च परिगृहीतगृहदाहबान्धवधनविध्वंसानुबन्धैः प्रत्यूहप्रबन्धैः[11] सबहुमानैस्तत्तद्वरप्रदानैश्च निःशेषामप्यु[12]षामध्यात्मसमाधिनिरोधनिघ्नौ[13]

---

लिया और तृण लता वगैरहसे सुशोभित गंगाके तटपर एक बड़ा आश्रम स्थापित करके परशुरामके पिता बन गये ।

ऐसे ही लोगोंके लिए किसीने कहा है—

'आत्मज्ञानसे शून्य मनुष्यका व्रताचरणका प्रयास व्यर्थ है । ठीक ही है जो मनुष्य स्वभावसे ही डरपोक है, शस्त्र ग्रहण करनेसे उसमें शौर्य नहीं आ जाता ॥१५४॥

फिर वे दोनों देव मगध देशके कुशाग्र नगरके निकटवर्ती स्मशानमें पहुँचे । कृष्णपक्षकी चतुर्दशीकी रात्रिका समय था । जिनदत्त नामका एक जैन श्रावक अकेला रात्रिमें प्रतिमा योगसे स्थित था । उसे देखकर वे दोनों देव तिरस्कारपूर्वक बोले—'अरे दुराचारी,विरूप, परम पदसे अन-जान, नीच मनुष्य ! शीघ्र ही इस सूखे ठूँठके समान प्रतिमायोगको छोड़कर भाग जा । तेरा यहाँ ठहरना ठीक नहीं है क्योंकि हम दोनों इस स्मशान भूमिके पिशाचोंके स्वामी हैं । हम दोनोंका अन्तःकरण अति स्वच्छन्द होकर क्रीड़ा करनेके लिए आतुर है । इसमें बाधा मत डालो ।'

इस प्रकार कहनेपर भी उसे आत्मध्यानमें तल्लीन देखकर उन दोनोंने विघ्न करना प्रारम्भ किया । यमराजके समान भयंकर काले-काले मेघ उमड़ आये, बिजलीका भयंकर गर्जन-तर्जन होने लगा, जोरकी हवा सर-सर करती हुई बहने लगी, भयानक वेतालोंकी आवाजके जैसी आवाजें होने लगीं, जब इससे भी वह विचलित नहीं हुआ तो उसका गृह-दाह, बन्धु-बान्धवों और धनादिकका विनाश होता हुआ उसे दिखाया गया । जब इससे भी विचलित नहीं हुआ तो बड़े आदरके साथ उसे अनेक वरदान दिये गये । इस प्रकार उसकी समाधिको भंग करनेके

---

१. राजगृह । २. निकृष्टा आकृतिर्यस्य । ३. कायोत्सर्गम् । ४. महत्याः । ५. स्थितिकरणेन । ६.—कर्षाभाव—अ०, ज०, मु०, आ० । ७. ध्यानस्थम् । ८. सामस्त्यतः । ९. यम । १०. महिष । ११. विघ्नस्वनैः । १२. रात्रि । १३. तत्परौ ।

विहितविघ्नावपि तमेकाग्रभावाभ्यासात्मसात्कृतान्तःकरणबहिःकरणेहितं शर्महर्म्यनिर्माणकार्मणपरमाणुप्रबन्धनाद्धर्मध्यानाच्चालयितुं न शेकतुः ।

संजाते च खरकिरणविरोक[1]निकरनिराकृतान्धकारोदये प्रभातसमये समुपहृतोपसर्गवर्गौ प्रकामप्रसन्नसर्गौ[2] तैस्तैर्महाभोगाचितैः प्रणयोदितैराश्लाघ्य तस्मै जिनदत्ताय विहायोविहाराय पञ्चत्रिंशद्वर्णानवद्यां विद्यां वितेरतुः[3] । इयं हि विद्या तवास्मदनुग्रहादम्बरविहारायासंसाधितापि भविष्यति परेषां त्वस्माद्विधेरिति ।

जिनदत्तोऽपि कुलशैलशिखण्डमण्डनजिनायतनालोकनकुतूहलिताशयः समाचरितामरानुवर्तनसमयस्तां विद्यां प्रतिपद्य हृदयदर्शनोत्सवसमानीतनिखिलनिलिम्पाचल[4]चैत्यालयस्तदवलोकनकृतकौतुकाय धरसेनाय परमाप्तोपासनपटवे पुष्पवटवे प्रादात् ।

पुनरप्यमितप्रभः 'विद्युत्प्रभ, जिनदत्तोऽयमतीवार्हदभिमतवस्तुपरिणतचित्तः स्वभावादेव च स्थिरमतिरशेषोपसर्गसहनप्रकृतिश्च । तदत्र महदप्यपकृतं कुलिशे[5] घुणकीटचेष्टितमिव न भवति समर्थम् । अतोऽन्यमेव कञ्चनाभिनवजिनोपासनायतनचैतन्यं निकषाव[6]' इति विमृश्योच्चलिताभ्यामेताभ्यां[7] मगधमण्डलमण्डनसनाथो मिथिलापुरीनाथः पद्मरथो नाम नरपतिर्निजनगरनिकटतटीधरदूरावेहायां कालगुहायां निवासरसमनसो दीप्ततपसो निःशेषानिमिषपरिषन्निषेव्यमाणाचरणचातुर्यात्सुधर्माचार्यात्तदद्भुतप्रभावदर्शनो-

लिए रातभर दोनोंने विघ्न किये, किन्तु एकाग्रताके अभ्याससे अपने मनको वशमें कर लेनेवाले उस जिनदत्त श्रावकको वे सुखका महल बनानेवाले कर्म परमाणुओंके बन्धमें कारणभूत धर्मध्यानसे विचलित नहीं कर सके ।

इतनेमें प्रभात हो गया, सूरजकी किरणोंके प्रकाशसे अन्धकार दूर हो गया । तब उन्होंने अपने उपसर्गोंको समेट लिया और अपनी प्रसन्नता व्यक्त करते हुए भाग्यशालियोंके योग्य प्रेमभरे वचनोंसे जिनदत्तकी प्रशंसा करके उसे आकाशमें बिहार करनेके लिए पैंतीस अक्षरोंकी एक निर्दोष विद्या प्रदान की । और कहा—'यह विद्या बिना साधे ही हमारे प्रभावसे तुम्हें आकाशमें विहार करा सकेगी और दूसरोंको अमुक विधिसे सिद्ध करनेपर विहार करा सकेगी ।'

जिनदत्तका मन भी कुलाचलोंपर स्थित जिनालयोंके दर्शनके लिए आकुल था । अतः उसने देवताओंके कहे अनुसार उस विद्याको ग्रहण करके सब कुलाचलोंपर स्थित चैत्यालयोंका दर्शन किया और फिर वह विद्या उन चैत्यालयोंके दर्शनके लिए उत्सुक, जिनेन्द्र देवके परम भक्त धरसेनको दे दी ।

फिर अमितप्रभ विद्युत्प्रभसे बोला—'विद्युत्प्रभ ! इस जिनदत्तका चित्त अर्हन्त भगवान्‌के द्वारा कहे गये वस्तु तत्त्वके विषयमें बहुत दृढ़ है तथा यह स्वभावसे ही स्थिर बुद्धि और समस्त उपसर्गोंको सहन करनेवाला है । इसलिए जैसे घुनके कीड़े वज्रमें कुछ भी नहीं कर सकते वैसे ही कितना भी अपकार इसका कुछ भी बिगाड़नेमें समर्थ नहीं है । अतः आओ जैन धर्मके किसी नये उपासककी परीक्षा करें ।' ऐसा विचार कर दोनों वहाँसे चल दिये और मगध देशके मण्डन स्वरूप मिथिलापुरीमें पहुँचे । मिथिलापुरीका राजा पद्मरथ था । एक दिन वह राजा अपने नगरके निकटवर्ती पहाड़की भयानक गुफामें रहनेवाले, महातपस्वी, समस्त देवोंसे सेवनीय और आच-

१. रश्मि । २. अभिप्रायौ । ३. दत्तवन्तौ । ४. पंचापि मेरु । ५. वज्रे । ६. परीक्षावहे । ७. पद्मरथराजा दृष्टः ।

पशान्ताशयः सम्यग्दर्शनमणुव्रताश्रयमादाय तद्दिवस एव तदुपदेशाभिज्ञिताहर्त्परमेश्वरशरीरनिरतिशयप्रकाशमहिमः कृतनियमः सकलभुवनपतिस्तूयमानगुणगणोदन्तं[1] श्रीवासुपूज्यभगवन्तमुपासितुं प्रतिष्ठमानः प्रमदनादसुन्दरदुन्दुभिरवाकारितनिरवशेषपरिजनः समासर्जत्समस्तविष्टविशिष्टादृष्टचेष्टः[3] ।

स च दृष्टः कदाचिदपि क्षुद्रोपद्रवाविप्रलब्धः[4] प्रारब्धश्च पुरप्लोषान्तःपुरविध्वंसवरूथिनीमथनप्रसभप्रभञ्जनोर्जितपर्जन्यपरुषवर्षोपलासारादिवसतिभिर्दुर्दमशार्दूलोत्तराकृतिभिर्विकृतिभिरुपद्रोतुम् । तथाप्यविचलितचेतसमवसाय सनरवरं कुञ्जरं मायामयप्रतिघेस्तावे व्याप्ताखिलदिगारामसंगमे कर्दमे निमज्जयद्भ्यां ताभ्यां 'नमः सुरासुरोपसर्गसंगसूदनाभिधानमात्रमन्त्रमाहात्म्यसाम्राज्याय श्रीवासुपूज्याय' इति तत्र निमज्जतो भूभृतो वचनमाकर्ण्य तद्धैर्योत्कर्षोन्मिषत्तोषमनीषाप्रसराभ्यां लघुपरिमुषिताशेषविघ्नव्यतिकराभ्यामाचरितसत्काराभ्याम् 'अहो नूतनस्य सम्यक्त्वरत्नस्याच्छद्मसद्मपथ पद्मरथ, नैतच्चित्रमत्र यत्संधासत्त्वाभ्यामखिलैरपि लोकैरसदृशेषु भवादृशेषु न प्रभवन्ति प्रसभप्रसवाः क्षुद्रोपद्रवाः । यतः ।

*एकापि [14]समर्थेयं जिनभक्तिर्दुर्गतिं निवारयितुम् ।*
*पुण्यानि च पूरयितुं दातुं मुक्तिश्रियं कृतिनः ॥१५५॥*

रणमें प्रवीण श्रीसुधर्माचार्यके दर्शनोंके लिए गया । उनके शरीरकी अद्भुत प्रभा और प्रभाव देखकर उसका राग शान्त हो गया और उसने उनसे सम्यग्दर्शन पूर्वक अणुव्रत धारण कर लिये । उसी दिन उसने आचार्यके उपदेशसे अर्हन्त भगवान्‌के अतिशय युक्त शरीरकी महिमाको समझ लिया और नियम लेकर समस्त भुवनके स्वामी जिनके गुणोंका बखान करते हैं उन श्रीवासुपूज्य भगवान्‌के दर्शनोंके लिए चल दिया । दुन्दुभिके मधुर शब्दको सुनकर समस्त परिजन भी साथ हो गये ।

दोनों देवताओंने उस राजाको जाता हुआ देखा जो कभी भी क्षुद्र उपद्रवोंसे भी सताया नहीं गया था, और परीक्षा लेनेके लिए विघ्न करना प्रारम्भ कर दिया । नगर दाह, रनवासका विनाश, सेनाका नाश, जोरकी हवा चलाकर मेघोंके द्वारा घनघोर वर्षा, उल्कापात आदिके द्वारा तथा भयंकर सिंहोंकी आकृतियोंके द्वारा उपद्रव करनेपर भी जब पद्मरथ राजाका मन विचलित नहीं किया जा सका तो उन दोनोंने चारों ओर मायामयी कीचड़ बनाकर राजा सहित हाथीको उसमें डुबा दिया । डूबते हुए राजाके मुखसे निकला—'जिनके नाममात्रसे सुर और असुरोंके द्वारा किये गये उपसर्ग दूर हो जाते हैं उन वासुपूज्य भगवान्‌को नमस्कार है ।'

यह शब्द सुनते ही उन दोनों देवोंको परम हर्ष हुआ, उन्होंने तुरन्त ही सब विघ्नोंको दूर कर दिया और राजाका सत्कार करते हुए बोले—'नये सम्यक्त्व रूपी रत्नके आश्रय रूप निष्कपट पद्मरथ ! प्रतिज्ञा और साहसमें आपके समान कोई नहीं है, आप जैसे लोगोंपर बलात् किये गये क्षुद्र उपद्रवोंका कोई प्रभाव नहीं हो सकता । क्योंकि 'अकेली एक जिन-भक्ति ही ज्ञानीके दुर्गतिका निवारण करनेमें, पुण्यका संचय करनेमें और मुक्ति रूपी लक्ष्मीको देनेमें समर्थ है ॥१५५॥

१. वृत्तान्तम् । २. आनन्दभेरी । ३. सकलविष्टपनिविष्ट—आ० । ४. अपराभूतः । ५. नगरदाह । ६. सेना । ७. वायु । ८. ज्ञात्वा । ९. अगाधे । १०. विनाशन । ११. मात्रमाहा—आ० । १२. प्रतिज्ञा । १३. हठादुत्पन्नाः । —भप्रभवाः आ० । १४. एकापि शक्ता जिनदेवभक्तिर्या दुर्गतेर्वारयितुं हि जीवान् । आसीद्वितत्सौख्यपरं परार्थं पुण्यं नवं पूरयितुं समर्था ॥३८॥—वरांगचरित, २२ सर्ग ।

इति निगीर्य, वितीर्य च जिनसमयाराधनवशे भवद्वंशे सर्वरुजापहारोऽयं हारः, सकलसपत्नसंतानोच्छेदमिदमातोद्यं च प्रेषणं करिष्यतीति कृतसंकेताभ्यां तदुद्वयमभिमतावस्थानं स्थानं प्रास्थायि । त्रिदशेश्वरवदनजृम्भमाणगुणसंकथः पद्मरथोऽपि तत्तीर्थकृतो गणधरपदाधिकृतो भूत्वा कृत्वा चात्मानमनूनरत्नत्रयतन्त्रं मोक्षामृतपात्रमजायत ।

भवति चात्र श्लोकः—

*उररीकृतनिर्वाहसाहसोचितचेतसाम् ।*
*उभौ कामदुघौ लोकौ कीर्तेश्चाल्यं जगत्त्रयम् ॥१५६॥*

*इत्युपासकाध्ययने जिनदत्तस्य पद्मरथपृथ्वीनाथस्य च प्रतिज्ञानिर्वाहसाहसो नाम षष्ठः कल्पः ।*

इतश्च संगमितसकलोपकरणसेनो धरसेनोऽप्यतुच्छभूच्छायावन्ध्ये पर्वदिवसवासतेयीमध्ये सर्वतो यातुधानधावनप्रवर्धिनीषु स्मशानमेदिनीषु प्रवर्तिततदाराधनानुकूलमण्डलो न्यस्तासु दिक्षु निक्षिप्तरक्षावलोऽवगणः कृतसकलीकरणो भागधेयीविधानसमये वटविटपाग्रे पतिंवराकरकर्तितसूत्रसरसहस्रसंपादितमात्मासनसमानान्तरालोचितमन्तर्जल्पसंकल्पितमन्त्रवाक्यः सिक्यं निबध्य प्रबन्धना धस्तादूर्ध्वमुखविन्यस्तनिशिताशेषशस्त्रो यथाशास्त्रं बहिर्निवेशिताष्टविधेष्टिसिद्धिस्तद्विद्याराधनसमृद्धबुद्धिर्बभूव ।

यह कहकर उसे एक हार और वाद्य दिया तथा कहा कि यह हार जैन धर्मका पालन करनेवाले तुम्हारे वंशके सब रोगोंको हरेगा और यह वाद्य समस्त वैरियोंकी सन्तानका नाश करेगा। ऐसा कहकर वे दोनों देव अपने अभिमत स्थानको चले गये। देवोंके द्वारा प्रशंसित पद्मरथ भी वासुपूज्य स्वामीके समवशरणमें जाकर जिनदीक्षा धारण करके भगवान्‌का गणधर बन गया और अपनेको सम्पूर्ण रत्नत्रयसे अलंकृत करके मोक्षरूपी अमृतका पात्र हो गया।

किसीने ठीक ही कहा है कि—

'जो अपनी प्रतिज्ञाका निर्वाह करनेमें उचित साहस दिखलाते हैं, इस लोक और परलोकमें वे इच्छित वस्तुको पाते हैं, तथा उनके यशसे तीनों लोक चलायमान हो जाते हैं ॥१५६॥

*इस प्रकार उपासकाध्ययनमें जिनदत्त और राजा पद्मरथके प्रतिज्ञा निर्वाहके साहसको बतलानेवाला छठा कल्प समाप्त हुआ ।*

अब जिस धरसेनको जिनदत्तने देवोंके द्वारा दी गई आकाशगामिनी विद्या साधनेके लिए दी थी, उसकी कथा सुनिए।

समस्त साधन सामग्रीको एकत्र करके धरसेन भी घने अन्धकारसे पूर्ण अमावस्याकी रात्रिके समयमें राक्षसोंके संचारसे व्याप्त स्मशान भूमिमें विद्या साधनेके लिए गया। वहाँ उसने विद्याराधनके अनुकूल मण्डलकी रचना की, सब दिशाओंमें रक्षावलय स्थापित किये, फिर सकलीकरण क्रिया की, फिर बटके पेड़के नीचे, अपने आसनसे समान अन्तरालपर, कन्याके हाथसे काते गये हजार धागोंसे बने हुए छीकेको, मन-ही-मन मंत्रोच्चारण करते हुए बाँधा। फिर छीकेके नीचे सब तीक्ष्ण शस्त्रोंको स्थापित किया, जिनका मुँह ऊपरकी ओर था। फिर शास्त्रानुसार आठ प्रकारकी इष्टसिद्धिको स्थापित करके उस विद्याकी आराधनाके लिए तैयार हुआ।

१. शत्रुकुल। २. वाद्यम्। ३. प्रेक्षणं ब०। ४. हारातोद्यद्वयम्। ५. कीर्तिश्चाल्पं अ० ज० मु०। ६. एकीकृत। ७. तिमिर। ८. रात्रि। ९. राक्षस। १०. सर्वासु। ११. एकाकी। १२. बलि। १३. कन्या। १४. प्रबन्धेना—आ०।

अत्रान्तरे निष्कारणकलिकायाञ्जनसुन्दर्या निशीथ[1]पथवर्तिवीक्षणे तपाक्षणे मध्यदेशे प्रसिद्धविजयपुरस्वामिनः सुन्दरीमहादेवीविलासिनः स्वकीयप्रतापबहुल[2]वाहनाहुतीकृताराति[3]समितेररिमन्थमहीपतेर्ललितो नाम सुतः समस्तव्यसनाभिभूतत्वाद्दायादै[4]र्दक्षव्यादसंपादितसाम्राज्यपदापायः परमुपायमपश्यन्नदृश्याञ्जनावर्जनोर्जितप्रज्ञः प्रतीताञ्जनचोरापरसंज्ञः किलैवमुक्तः—'कुशाग्र[5]पुरपरमेश्वरस्याग्रमहिष्यास्ताविष्याः[6] सौभाग्यरत्नाकरं नाम कण्ठालंकारमिदानीमेव यद्यानीय प्रयच्छसि, तदा त्वं मे कान्तः, अन्यथा प्रणयान्तः' इति।

सोऽपि 'कियद्गहनमेतत्' इत्युदारमुदाहृत्य प्रियतमामनोरथमन्वर्थकं[7] चिकीर्षुर्निजच्छायादृश्यताशीलकज्जलबहललोचनयुगलं विधाय प्रयार्य[8] च तन्महीश्वरगृहं गृहीततदलंकारस्तत्प्रभाप्रसरसमुल्लक्ष्यमाणचरणसंचारः शब्दशस्त्रोत्तालाननकरैस्तलवरानुचरैरभियुक्तो[9] निस्तरीतुमशक्तः परित्यज्य तदाभरणमितस्ततो नगरबाहिरिकायां विहरमाणस्तं धरसेनं प्रदीप[10]दीप्तिवशादधस्तादस्त्रनिवेशभयावेशान्मुहुर्मुहुरारोहावरोहावहदेहदोनमव[11]लोक्योपढौक्य च तं देशमेवं निर्दिदेश—'अहो प्रलयकालान्धकाराविलायामस्यां वेलायां महासाहसिकवृष[12]न्दुष्करकर्मकारिन् को नाम भवान्?

---

इसी बीचमें एक घटना घटी। मध्य देशके विजयपुर नगरका स्वामी राजा अरिमन्थ बड़ा प्रतापी था। उसकी पट्टरानीका नाम सुन्दरी था। उनके ललित नामका एक पुत्र था। वह बड़ा व्यसनी था। इसीलिए उसे अन्य बान्धवोंने उसके राज्यपद प्राप्तिमें बाधाएँ डालीं। तब उसने दूसरा उपाय न देखकर एक ऐसा अञ्जन सिद्ध किया जिसके लगा लेनेसे वह अदृश्य हो जाता था। इससे उसकी शक्ति बहुत बढ़ गई और उसका नाम अञ्जनचोर प्रसिद्ध हो गया। जिस रात्रिमें धरसेन विद्या साधनेका उपाय करता था उसी रात्रिमें जब अञ्जनचोर अपनी प्रियतमाके पास गया तो उसने कहा—'कुशाग्रपुरके राजाकी पट्टरानीके गलेका 'सौभाग्यरत्नाकर' नामका आभूषण यदि इसी समय लाकर मुझे दोगे तो तुम मेरे पति हो, नहीं तो हमारे तुम्हारे प्रेमका अन्त है।' यह सुनकर अञ्जनचोर बोला—'यह क्या कठिन है।' इतना कहकर अपनी प्रियतमाके मनोरथको पूरा करनेके लिए वह अपनी आँखोंमें अञ्जन लगाकर अदृश्य हो गया और उस राजाके महलमें पहुँचा।

जैसे ही वह उस आभूषणको चुराकर चला वैसे ही उसकी चमकसे कोतवालके सशस्त्र सिपाहियोंने उसके पद-संचारको लक्ष्य करके हल्ला करते हुए उसका पीछा किया। निकल भागनेमें अपनेको असमर्थ देखकर अञ्जनचोरने उस आभूषणको वहीं छोड़ दिया और नगरके बाहर इधर-उधर भागता हुआ जलते हुए दीपको देखकर उस स्थानपर आया जहाँ धरसेन नीचे लगे हुए अस्त्रोंके भयसे कभी छीकेसे उतरता था और कभी चढ़ता था।

'प्रलयकालके अन्धकारसे व्याप्त इस कालमें दुष्कर कर्म करनेवाले महा साहसी पुरुष! तुम कौन हो?' अञ्जनचोरने पूछा।

---

१. मध्यरात्रि। २. अग्नि। ३. शत्रुसमूहस्य। ४. गोत्रिण एव राक्षसाः। ५. राजगृह। ६. ताविषीनामिकायाः। ७. सार्थकम्।—मन्वर्थं आ०। ८. मत्वा। ९. शब्देन उत्तालं मुखं शस्त्रेण उत्तालः करो येषाम्। १०. प्रदीप्रदीप—आ०। ११.—वय समुपढौक्य—आ०। १२. प्रधान।

धरसेनः—'कल्याणबन्धो, महाभागवृत्तस्य जिनदत्तस्य विदितपुष्पबटुनियोगसंबन्धोऽहमेतदुपदेशादाकाशविहारव्यवहारनिबद्धां विद्यां सिसाधयिषुरत्रायाशिषम्।'[1]

अञ्जनचोरः—'कथमियं साध्यते।'

धरसेनः—कथयामि। पूजोपचारनिवेक्ये[2]ऽस्मिन्निःशङ्कमुपविश्य विद्यामिमामकुण्ठकण्ठं [3]पठन्नेकैकं शरप्रवेकं स्वच्छधीश्छिन्द्यादवसाने गगनगमनेन युज्यते।

'यद्येवमपसरापसर। 'त्वं हि [4]तलोन्मुखनिखातनिशितशस्त्रसंजातभीतमतिर्न खलु भवस्यैतत्साधने यज्ञोपवीतदर्शनेनार्थार्जनकृतार्थः समर्थः। तत्कथय मे यथार्थवादहृद्यां विद्याम्। एनां साधयामि'।

ततस्तेनात्महितकटुना पुष्पबटुना साधुसमर्पितविद्यः सम्यग्विदितवेद्यः संप्रीत्याऽऽसन्नशिवागारोऽञ्जनचौरः स्वप्नेऽप्यपरवञ्चनाचारनिवृत्तचित्तो जिनदत्तः। स खलु महतामपि महान्प्रतिपन्नदेशयतिव्रततन्त्रो जन्तुमात्रस्याप्यन्यथा न चिन्तयति, किं पुनश्चिराय समाचरितोपचारस्य [5]तनूद्भवनिर्विशेषं पोषितस्यास्य धरसेनस्यान्यथा चिन्तयेत्' इति निश्चित्य निविश्य च सौत्सुक्यं सिक्ये निःशङ्कशेमुषीकः स्वकीयसाहसव्यवसायसंतोषितसुरासुरानीकः [6]सकृदेव तच्छरप्रसरं चिच्छेद, [7]आससाद च खेचरपदम्। पुनर्यत्र जिनदत्तस्तत्र मे गमनं भूयादिति विहिताशंसनः[8] काञ्चनाचलमेखलानिलयिनि[9] सौमनसवनोदयिनि

धरसेन—मेरे हितैषी मित्र! महाभाग जिनदत्तके उपदेशसे आकाशविहारिणी विद्याको सिद्ध करनेकी इच्छासे मैं यहाँ आया हूँ।

अञ्जनचोर—यह कैसे साधी जाती है?

धरसेन—पूजाके द्वारा सिञ्चित इस छीकेपर निःशङ्क बैठकर इस विद्याको मन्दस्वरसे पढ़ते हुए निर्मल मनसे छीकेकी एक-एक डोरको काटना चाहिए। ऐसा करनेसे अन्तमें आकाशगामिनी विद्या सिद्ध हो जायगी।

अञ्जनचोर—हटो हटो, छीकेके नीचे खड़े किये गये तीक्ष्ण शस्त्रोंसे तुम भयभीत हो गये हो, इसलिए जनेऊ दिखाकर ही अपना काम निकालनेवाले तुम इस विद्याको सिद्ध नहीं कर सकते। अतः इस सच्ची विद्याको मुझे बतलाओ। मैं इसको साधता हूँ।

यह सुनकर आत्महितके वैरी उस धरसेनने अञ्जनचोरको भले प्रकारसे विद्या अर्पित कर दी। सब बातोंको जानकर उसी भवसे मोक्ष जानेवाला अञ्जनचोर विचारने लगा—'जिनदत्त सेठ स्वप्नमें भी दूसरोंको ठगनेका विचार नहीं कर सकता। फिर चिरकालसे अपने पुत्रकी तरह जिसका लालन-पालन किया है उस धरसेनके विषयमें तो वह ऐसा सोच ही कैसे सकता है?' ऐसा निश्चित करके वह बड़ी उत्कण्ठाके साथ उस छीकेपर बैठ गया और निःशंक होकर अपने साहससे सुर और असुरोंके समूहको सन्तुष्ट करनेवाले उस अञ्जनचोरने एक साथ ही सब धागोंको काट दिया और विद्याधर बन गया। फिर उसने यह इच्छा की कि जहाँ जिनदत्त है

१. आगतः। २. –क्ये शिक्येऽस्मि–आ०। ३. प्रपठ–आ०। ४. ऊर्ध्वमुख। ५. –द्भवतिनि–अ०, ज०, मु०। ६. एकवारम्। ७. प्राप्तवान्। ८. –ताशासनः आ०। ९. –लयितसौमनसदयिनि–आ०।

जिनसद्मनि जिनदत्तस्य धर्मश्रवणकृतो गुरुदेवभगवतः समीपे तपो गृहीत्वावगाहितसमस्तै-तिह्यतत्त्वो[1] हिमवच्छैलचूलिकोन्मीलितकेवलज्ञानः कैलासकेसर[2]कान्तारगतो मुक्तिश्रीसमागमसक्तिभोगायतनो[3] बभूव ।

भवति चात्र श्लोकः—

राजपुत्रोऽर्क्षविक्षिप्तः[4] शिक्षिताहश्यकज्जलः ।
अन्तरिक्षगतिं प्राप निःशङ्कोऽञ्जनतस्करः ॥१५७॥

*इत्युपासकाध्ययने निःशङ्कितत्वप्रकाशनो नाम सप्तमः कल्पः ।*

स्यां[5] देवः स्यामहं यक्षः स्यां वा वसुमतीपतिः ।
यदि सम्यक्त्वमाहात्म्यमस्तीतीच्छां परित्यजेत् ॥१५८॥
उदश्वितेव[6] माणिक्यं सम्यक्त्वं भवजैः सुखैः ।
विक्रीणानः पुमान्स्वस्य वञ्चकः केवलं भवेत् ॥१५९॥
चित्ते चिन्तामणिर्यस्य यस्य हस्ते सुरद्रुमः ।
कामधेनुर्धने[7] यस्य तस्य कः प्रार्थनाक्रमः ॥१६०॥
उचिते[8] स्थानके यस्य चित्तवृत्तिरनाकुला ।
तं श्रियः स्वयमायान्ति स्रोतस्विन्य इवाम्बुधिम् ॥१६१॥

वहीं मैं पहुँचूँ। यह इच्छा करते ही वह सुमेरु पर्वतपर स्थित सौमनस वनके जिनालयमें, आचार्य गुरुदेवसे धर्मश्रवण करते हुए जिनदत्तके पास पहुँच गया और जिनदीक्षा ग्रहण करके परम्परासे चले आये हुए समस्त तत्त्वोंको जानकर हिमवान् पर्वतकी चोटीपर केवलज्ञानी बन गया फिर कैलास पर्वतसे मुक्ति-श्री को वरण करके मुक्त हो गया।

इस विषयमें एक श्लोक निम्न प्रकार है—

'अञ्जनचोर राजपुत्र था, किन्तु इन्द्रियोंकी विषयलालसाने उसे पागल कर दिया था। तब उसने अदृश्य होनेका अञ्जन बनाना सीख लिया। फिर वह निःशङ्क होकर विद्याधर बन गया। और मुक्त हो गया' ॥१५७॥

*इस प्रकार उपासकाध्ययनमें निःशंकित तत्त्वको प्रकट करनेवाला सातवाँ कल्प समाप्त हुआ।*

*[ अब निष्कांक्षित अंगको बतलाते हैं—]*

यदि सम्यग्दर्शनमें माहात्म्य है तो 'मैं देव होऊँ', यक्ष होऊँ, अथवा राजा होऊँ' इस प्रकारकी इच्छाको छोड़ देना चाहिए। जो सांसारिक सुखोंके बदलेमें सम्यक्त्वको बेच देता है वह छाछके बदलेमें माणिक्यको बेच देनेवाले मनुष्यके समान केवल अपनेको ठगता है ॥१५८-१५९॥

जिस सम्यग्दृष्टिके चित्तमें चिन्तामणि है, हाथमें कल्पवृक्ष है, धनमें कामधेनु है, उसको याचनासे क्या मतलब? जिसकी चित्तवृत्ति उचित स्थानको पाकर निराकुल हो जाती है, समुद्रमें नदियोंकी तरह लक्ष्मी उसे स्वयं प्राप्त होती है ॥१६०-१६१॥

---

१. प्रकटीकृत। २. वकुलवृक्ष। ३. आत्मा। ४. द्यूत। ५. अहं भवामि। 'देवः स्यां दानवः स्यां वा स्यामहं वसुधापतिः। यदि दर्शनमाहात्म्यमितीहा तस्य दूषिता ॥२७॥'—प्रबोधसार। ६. तक्रेण। 'उदश्विता स माणिक्यं चक्रिराज्यं किलाटकैः। विक्रीणीते स सम्यक्त्वाद्य इच्छेद् भवजं सुखम् ॥४४॥'—धर्मरत्ना० प० ६९ उ०। ७. नुर्व—ब०। हस्ते चिन्तामणिर्यस्य प्रांगणे कल्पपादपः। कामधेनुर्धने यस्य तस्य कः प्रार्थनाक्रमः ॥४३॥'—धर्मर० प० ६९। देवधेनुर्धने यस्य यस्य हस्ते सुरद्रुमः। चिन्तामणिमणिप्रायं दर्शनं सर्वसौख्यदं॥ प्रबोधसार पृ० १५। ८. धर्मलक्षणे।

तत्कुदृष्ट्यन्तरोद्भूतामिहामुत्र[1] च संभवाम् ।
सम्यग्दर्शनशुद्ध्यर्थमाकांक्षां त्रिविधां[2] त्यजेत् ॥१६२॥

श्रूयतामत्रोपाख्यानम्—अङ्गमण्डलेषु समस्तसपत्नसमरसमारम्भनिष्कम्पायां चम्पायां पुरि लक्ष्मीमतिमहादेवीदयितस्य वसुवर्धनाभिधानोचितस्य वसुधापतेर्निरवशे[3]-षवैदेहकवरिष्ठः किल प्रियदत्तश्रेष्ठी धर्मपत्न्या गृहलक्ष्मीसपत्न्या सकलस्त्रैणगुणधाम्नाङ्गवती-नाम्ना सहाह्नाय[4] प्राह्णेऽष्टाह्नीक्रियाकाण्डकरणायाभ्रंकषकूटकोटिघटित[5]पताकापटप्रतानाञ्चल-जालस्खलितनिलिम्पविमानवलयं सहस्रकूटचैत्यालयं यियासुः स्वकीयसुतावयस्यां[6]-

अतः सम्यग्दर्शनकी शुद्धिके लिए अन्य मिथ्या मतोंके सम्बन्धसे उत्पन्न होने वाली, तथा इस लोक और परलोक सम्बन्धी तीन प्रकारकी इच्छाओंको छोड़ देना चाहिए ॥१६२॥

**भावार्थ**—सम्यग्दर्शनका दूसरा अंग है निःकांक्षित। जिसका अर्थ है—'कांक्षा मत करो।' और कांक्षा कहते हैं भोगोंकी चाहको। जो विषय इन्द्रियोंको नहीं रुचते, उनसे द्वेष करना ही भागोंकी चाहकी पहचान है, क्योंकि इन्द्रियोंको रुचनेवाले विषयोंकी चाहके कारण ही न रुचनेवाले विषयोंसे द्वेष होता है। देखा जाता है कि विपक्षसे द्वेष हुए बिना पक्षमें राग नहीं होता और पक्षमें राग हुए बिना उसके विपक्षसे द्वेष नहीं होता। अतः इष्ट भोगोंकी चाहके कारण ही अनिष्ट भोगोंसे द्वेष होता है और अनिष्ट भोगोंसे द्वेष होनेसे ही इष्ट भोगोंकी चाह होती है। जिसके इस प्रकारकी चाह है वह नियमसे मिथ्यादृष्टि है; क्योंकि एक तो चाह करनेसे ही भोगोंकी प्राप्ति नहीं हो जाती। दूसरे, कर्मोंके उदयसे प्राप्त होनेवाली प्रत्येक वस्तु अनिष्ट ही मानी जाती है। इसलिए ज्ञानी पुरुष कर्म और उसके फलकी चाह बिलकुल नहीं करता। तीसरे, पदार्थोंमें जो इष्ट और अनिष्ट बुद्धि की जाती है वह सब दृष्टिका ही दोष है, क्योंकि पदार्थ न तो स्वयं इष्ट ही होते हैं और न स्वयं अनिष्ट ही होते हैं। यदि पदार्थ स्वयं इष्ट या अनिष्ट होते तो प्रत्येक पदार्थ सभीको इष्ट या अनिष्ट होना चाहिए था, किन्तु ऐसा नहीं देखा जाता। एक ही पदार्थ किसीको इष्ट और किसीको अनिष्ट प्रतीत होता है। अतः पदार्थोंमें इष्ट अनिष्ट बुद्धि भी मिथ्यात्वके उदयसे ही होती है। जिसके मिथ्यात्वका उदय नहीं होता उसकी दृष्टि वस्तुके यथार्थस्वरूपको देखती है और यथार्थमें कर्मोंके द्वारा प्राप्त होनेवाला फल अनिष्ट ही होता है क्योंकि वह दुःखका कारण है। अतः सम्यग्दृष्टि कर्मोंके द्वारा प्राप्त होने वाले भोगोंकी चाह नहीं करता।

## २. निष्कांक्षित अंगमें प्रसिद्ध अनन्तमतिकी कथा

अब इस विषयमें एक कथा कहते हैं, उसे सुनिए—

अंगदेशकी चम्पा नगरीमें वसुवर्धन नामका राजा राज्य करता था। उसकी पट्टरानीका नाम लक्ष्मीमति था। राज्य श्रेष्ठी प्रियदत्त था और उसकी पत्नी अंगवती थी। एक बार एकदम प्रातः अष्टाह्निका पर्वका क्रियाकर्म करनेके लिए प्रियदत्त सेठ स्त्रियोचित सकल गुणोंसे युक्त अपनी

१. मिथ्यादर्शनोद्भूताम्। २. देव-यक्ष-राजोद्भवाम्। ३. समग्रवणिजां मध्ये श्रेष्ठः। ४. शीघ्रम्। ५. संयोजित। ६. सखीम्।

मनङ्गमतिमेवमपृच्छत्—'वत्से, अभिनवविवाहभूषणसुभगहस्ते, क्वास्ते [1]समुल्लिखितलाञ्छनेन्दुसुन्दरमुखी प्रियसखी तवातीवकेलिशीलप्रकृतिरनन्तमतिः।'

अनङ्गमतिः—'तात, वणिग्वृन्दारक[2]दारिकोद्गीयमानमङ्गला कृत्रिमपुत्रककरव्याजेनात्मपरिणयनाचरणपरिणामपेशला पञ्जरास्थितशुकसारिकावदनवाद्यसुन्दरे वासौ[3]वास-परिसरे समास्ते।

'समाहूयतामितः'।

'यथादिशति तातः'।

प्रियदत्तश्रेष्ठी वृद्धभावात्परिहासालापनपरमेष्ठी समागतां सुतामवलोक्य 'पुत्रि, निसर्गविलासरसोत्तरङ्गापाङ्गा[4]पहसितामृतसरणि[5]विषये सदैव [6]पञ्चालिकाकेलिकिल[7]हृदये संप्रत्येव तव मन्मथपथाः परिणयनमनोरथाः। तद् गृह्यतां तावत्समस्तव्रतैश्वर्यवर्यं ब्रह्मचर्यम्। अत्रैष ते साक्षी भगवानशेषश्रुतप्रकाशनाशयभूरि[8]धर्मकीर्तिसूरिः।

अनन्तमतिः—तात, नितान्तं गृहीतवत्यस्मि। न केवलमत्र मे भगवानेव साक्षी किंतु भवानम्बा च। अन्यदा तु।

> उद्भिन्ने स्तनकुड्मले स्फुटरसे हासे विलासालसे
> किंचित्कम्पित[9]कैतवाधरभरप्राये वचःप्रक्रमे।

---

पत्नीके साथ सहकूट चैत्यालय जानेको था। उसने अपनी लड़कीकी सखी अनंगमतीसे पूछा—विवाहके नये भूषणोंसे अलंकृत पुत्री अतीव परिहासप्रिय तेरी सखी चन्द्रमुखी अनन्तमती कहाँ है?

अनंगमती बोली—'पिता जी! स्वच्छन्द विचरण करनेवाले तोता मैनाके मधुर कलरवसे गुंजित घरके निकट भागमें, वह गुड्डेके विवाहके बहानेसे अपने विवाहका स्वप्न देख रही है और श्रेष्ठीजनोंकी लड़कियाँ मंगल गान कर रही हैं।'

'उसे बुलाओ?'

'जो आज्ञा'

श्रेष्ठी प्रियदत्त वृद्ध हो जानेसे परिहास करनेमें बड़ा पटु था। कन्याको आई हुई देखकर बोला—'पुत्रि! सदैव गुड्डीसे खेलनेके लिए विकल तुम्हारे हृदयमें अभीसे विवाहका मनोरथ हो चला है, अतः समस्त व्रतोंमें श्रेष्ठ ब्रह्मचर्य व्रतको स्वीकार करो। समस्त श्रुतके ज्ञाता भगवान् धर्मकीर्ति सूरि तुम्हारे साक्षी हैं।'

अनन्तमती बोली—पिताजी! मैंने ब्रह्मचर्यव्रत ले लिया। और इसमें केवल भगवान् ही साक्षी नहीं हैं किन्तु आप और माताजी भी साक्षी हैं।

उक्त घटनाको घटे वर्षों बीत गये और अनन्तमतीमें यौवनका संचार हो चला। उसके अंग-प्रत्यंग विकसित हो उठे। जब वह हँसती थी तो उसकी हँसी अलसाई हुई होती थी। जब

---

१. निर्लाञ्छनचन्द्रवत्। २. कन्याजन। ३. निवासगृहप्राङ्गणे। ४. नेत्रप्रान्त। ५. कुल्या। ६. पुत्तलिका। ७. पटुहृदये। -विकलहृ-आ०। ८. आशय एव सुवर्णं विद्यते यस्य सः। ९. कम्पितमिषेण।

कन्दर्पाभिनवास्त्रवृत्तिचतुरे नेत्राश्रिते विभ्रमे
प्रादायेव च मध्य[1]गौरवगुणं वृद्धे नितम्बे सति ॥१६३॥

समायाते मुकुलपथप्रथमानमन्मथोन्माथ[2]मन्थरसमस्तसत्त्वस्वान्ते सद्यः प्रसू[3]तसहकाराङ्कुरकवलकषायकण्ठकोकिलकामिनीकुहारावासरालितमनोजविजये मलयाचलमेखलानिलीनकिंनरमिथुनमोहन[4]ामोदमेदुरपरिसरन्समीरसमुदये विकसत्कोशकुर[5]वकप्रसवपरिमलपानलुब्धमधुकरीनिकरझङ्कारसारप्रसरे वसन्तसमयावसरे सा प्रसरत्स्मरविकारा स्मर[6]स्खलन्मतिगतिरनङ्गमतिः सह सहचरीसमूहेन मदनोत्सवदिवसे दोलान्दोलनलालसमानसा स्वकीयरूपातिशयसंपत्ति[ति]रस्कृतसकलभवनाङ्गनाङ्गविलासा सुकेशीप्रियतमानुगतेन कृतकामचारप्रचारचेतसा पूर्वापराकूपारपालिन्ध्री[7] सुन्दरीसनाथोत्सङ्गधरस्य विजयार्धावनीधरस्य विद्याधरीविनोदपादपोत्पादक्षोण्यां दक्षिणश्रेण्यां किंनरगीतनामनगरनरेन्द्रेण कुण्डलमण्डितनाम्नाम्बरचरेण निध्यायिता[8] ।

श्रृङ्गाररसारममृतद्यु[9]तिमिन्दुकान्ति-
मिन्दीवरद्युतिमनङ्गशरांश्च सर्वान् ।
आदाय नूनमियमात्मभुवा[10] प्रयत्ना-
त्सृष्टा जगत्त्रयवशीकरणाय बाला ॥१६४॥

इति विचिन्त्याभिलषिता च । ततस्तामपजिहीर्षुधिषणेन[11] मुहुर्निवृत्य निर्वर्तितनिजनिलयसुकेशीनिवेशेन प्रत्यागत्यापहृत्य च पुनर्नभश्चरपुरं प्रत्यनुसरता गगन[12]मार्गार्द्धे

बोलती थी तो उसके ओष्ठ कुछ बनावटी कम्पनको लिये हुए होते थे। और आँखोंमें, कामदेवके नवीन अस्त्रोंके संचालनमें चतुर कटाक्षने अपना डेरा डाल दिया था। और मध्यभागकी गुरुताको मानो लेकर नितम्ब भाग विकसित हो गया था ॥१६३॥

यौवनके साथ ही वसन्त ऋतु भी आ टपकी। समस्त प्राणियोंके मनको कामदेवने सताना प्रारम्भ कर दिया। आमके वृक्षोंपर मौर आ गये और उसे खाकर कोयलने 'कुहू' 'कुहू' करके कामदेवकी विजय यात्राकी सूचना कर दी। मलय वायु बहने लगी। कमलोंपर भौंरें गुंजार करने लगे।

एक बार मदनोत्सवके दिन रूपवती युवती अनन्तमती अपनी सखियोंके साथ झूला झूलनेके लिए उद्यानमें गई। विजयार्ध पर्वतकी दक्षिण श्रेणिमें स्थित किन्नरगीत नामक नगरका स्वामी कुण्डलमण्डित विद्याधर अपनी पत्नी सुकेशीके साथ आकाशमें विहार करता था। उसने उसे देखा। और उसके लावण्यसे मोहित होकर सोचने लगा—'श्रृङ्गारसे सार, अमृतसे तरलता, चन्द्रमासे कान्ति, कमलसे शोभा और कामदेवसे बाणोंको लेकर ही स्वयंभू ब्रह्माने तीनों लोकोंको वशमें करनेके लिए इस बालाकी रचना बड़े श्रमसे की है ॥१६४॥

यह सोच उसको हरनेकी इच्छासे अपने घरकी ओर लौटा। वहाँ अपनी पत्नी सुकेशीको छोड़कर फिर उसी उद्यानमें आया और अनन्तमतीको हरकर आकाशमार्गसे अपने नगरकी

१. गौरवगुणं नितम्बेन गृहीतं तेन मध्यं क्षामं जातम्। २. पीडन। ३. उत्पन्न। ४. सुरत। ५. मोगरसदृशरक्तसुगंधपुष्पविशेष। ६. सारस्खल —आ०। ७. बेला एव स्त्रीसहित तटी। ८. दृष्टा। ९. —तद्रुति—अ० ज०। १०. ब्रह्मणा। ११. अपहर्तुमिच्छुमतिना। १२. —मार्गार्द्धनिवृत्ति—आ०।

प्रतिनिवृत्तकुपितसुकेशीदर्शनाशङ्कितांशयेन तत्कायसंक्रमितावलोकिनीपर्णलघुविद्याद्वयेन शङ्खपुराभ्यर्णभागिनि भीमवननामनि कानने मुक्ता।

तत्र च मृगयाप्रशंसनमागतेन[1] भीमनाम्ना किरातराजलक्ष्मीसीम्नावलोकिता, नीता चोपान्तप्रकीर्णेङ्गुदिफलच्छल्लिल पल्लिम्। एतद्रूपदर्शनदीप्तमदनमदेन[2] च तेन स्वतः परतश्च तैस्तैरुपायैरात्मसंभोगसहायैः प्रार्थिताप्यसंजातकामिता हठात्कृतकठोरकामोपक्रमेण तत्परिगृहीतव्रतस्थैर्याश्चर्यितकान्तारदेवताप्रातिहार्यात्पर्याप्तपक्कणप्लोषेण[3] मृत्युहेतुकातङ्कपावकपच्यमानशरीरेण च 'मातः, क्षमस्वैकमिमममपराधम्' इत्यभिधाय वनेचरोपचारोपचीयमानसहचरीचित्तोत्कण्ठे शङ्खपुरपर्यन्तपर्वतोपकण्ठे परिहृता तत्समीपसमावासितसार्थानीकेन पुष्पकनामकेन वणिक्पतिपाकेनावलोकिता सती स्वीकृता च तेन तेन चार्थेन स्वस्य वशमानेतुमसमर्थेन कोशलदेशमध्यायामयोध्यायां पुरि व्यालिकाभिधानकामपल्लवकन्दल्याः शंफल्यां[4] समर्पिता। तयापि मदनमदसंपादनावसथाभिः कथाभिः क्षोभयितुमशक्या तद्राजधानीविनिवेशस्य[5] सिंहमहीशस्योपायनीकृता[6]।

तेनाप्यलब्धतन्मनःप्रवेशेन विलक्षिताच्चित्तैदुरभिसंधिना[7] तत्कन्यापुण्यप्रभावप्रेरितपुर-

ओर चल दिया। आधे मार्गमें लौटती हुई अपनी कुपित पत्नीको देखकर उसके भयसे उसने उसे पर्णलघु नामकी दो विद्याओंको सौंप दिया और उन्होंने अनन्तमतीको शंखपुरके निकटवर्ती भीमवन नामके जंगलमें छोड़ दिया।

वहाँ शिकार खेलनेके लिए आये भिल्लराज भीमने उसे देखा और वह उसे अपनी कुटियापर ले आया, जहाँ आस-पासमें इंगुदी वृक्षके फलोंकी लताएँ फैली हुई थीं। भिल्लराज इसके रूपको देखकर कामान्ध हो गया। उसने स्वयं तथा दूसरेके द्वारा अनन्तमतीसे भोगकी बारम्बार प्रार्थना की, किन्तु वह तैयार नहीं हुई। तब उसने बलात्कार करनेका प्रयत्न किया। किन्तु उसके व्रतके माहात्म्यसे वन देवताने उसकी रक्षा की और शबरालयमें आग लगा दी। जब भिल्लराजका शरीर जलने लगा और उसने मृत्यु निकट देखी तो बोला—'माता! मेरे इस एक अपराधको क्षमा करो।'

इस प्रकार क्षमा माँगकर उसने अनन्तमतीको शंखपुरके निकटवर्ती पर्वतके समीपमें छुड़वा दिया। वहाँ पासमें व्यापारियोंका एक समूह आकर ठहरा हुआ था। वणिक् पतिके पुत्र पुष्पकने अनन्तमतीको देखा और जिस-तिस उपायोंसे उसे वशमें लानेका प्रयत्न किया। जब वह अपने प्रयत्नमें सफल नहीं हो सका तो उसने उसे कौशल देशके मध्यमें बसी हुई अयोध्या नगरीमें व्यालिका नामकी वेश्याको सौंप दिया। वेश्याने कामोन्मत्त करनेवाली कथाएँ सुना-सुनाकर उसे क्षुब्ध करना चाहा किन्तु वह भी अपने प्रयत्नमें असफल रही। तब उसने उसे अयोध्याके राजा सिंह महीपतिको भेंट कर दिया। राजा सिंह भी जब उसके हृदयमें स्थान नहीं पा सका तो उसने उसके साथ बलात्कार करना चाहा। तब उस कन्याके पुण्यके प्रतापसे नगर देवताने आकर उसकी रक्षा की।

१. क्रीडां प्रति। २. –मदमदनेन अ० ज० मु०। ३. परिपूर्णगृहदाहेन। ४. कुट्टिन्याः। ५. तद्राजधान्यां विनिवेशः स्थानं यस्य सः तस्य। ६. प्राभृतीकृता। ७. गृहीतदुष्टाभिप्रायेण।

देवतापादितान्तःपुरपुरीपरिजनापकारविधिना साधु संबोध्य नियमसमाहितहृदयचेष्टा विसृष्टा पितृस्वसुः सुदेवीनामधेयायाः पत्युः पितुश्चार्हद्दत्तस्य सुगृहीतनामवृत्तस्य[1] जिनेन्द्रदत्तस्योदवसितसमीपवर्तिनं विरतिचैत्यालयमवाप्य तत्र निवसन्ती यमनियमोपवासपूर्वकैर्विधिभिः क्षपितेन्द्रियमनोवृत्तिर्भवन्ती।

तस्मादङ्गदेशनगराज्जिनेन्द्रदत्तं चिरविरहोत्तालं [2]श्यालं विलोकितुमागतेन प्रियदत्तश्रेष्ठिना वीक्ष्य विषयाभिलाषमोषपरुषकचा सा विहितबहुशुचा पुनः प्रत्याप्य तस्मै जिनेन्द्रदत्तसुतायार्हद्दत्ताय दातुमुपक्रान्ता—'तात, तं भदन्तं भगवन्तं पितरं मातरं च तां प्रमाणीकृत्य कृतनिरवधिचतुर्थव्रतपरिग्रहा। ततः कथमहमिदानीं विवाहविधये परिकल्पनीया' इति निगीर्य कमलश्रीसकाशे विरतिविशेषवशं रत्नत्रयकोशमभजत्।

भवति चात्र श्लोकः—

हासात्पितुश्चतुर्थेऽस्मिन्व्रतेऽनन्तमतिः स्थिता।
कृत्वा तपश्च निष्काङ्क्षा कल्पं द्वादशमाविशत् ॥१६५॥

*इत्युपासकाध्ययने निष्काङ्क्षिततत्त्वावेक्षणो नामाष्टमः कल्पः।*

तपस्तीव्रं जिनेन्द्राणां नेदं संवा[3]दमन्दिरम्।
अदोऽपर्वादि[4] चेत्येवं चेतः स्याद्विचिकित्सना ॥१६६॥

---

वहाँसे निकलकर वह अपने पिताकी भगिनी सुदेवीके पति तथा अर्हद्दत्तके पिता जिनेन्द्रदत्तके निकटवर्ती चैत्यालयमें जाकर रहने लगी और यम नियम तथा उपवासके द्वारा इन्द्रियों और मनकी चंचलताको दूर करने लगी। एक दिन अनन्तमतीका पिता श्रेष्ठी प्रियदत्त अंगदेशसे अपने बहनोई जिनेन्द्रदत्तको देखनेके लिए आया। वहाँ उसने अपनी पुत्री अनन्तमतीको देख बहुत विलाप किया और बादको उसे जिनेन्द्रदत्तके पुत्र अर्हद्दत्तसे विवाहनेका प्रस्ताव किया। तब पुत्री बोली—'पिताजी! भगवान् आचार्य, आप और अपनी जननीको साक्षी करके मैंने आजन्मके लिए ब्रह्मचर्य व्रत ग्रहण किया था। अतः अब कैसे मैं विवाहकी विधिके लिए तैयार हो सकती हूँ।'

ऐसा कहकर उसने कमलश्री आर्यिकाके समीपमें व्रत धारण कर लिये।

इसके विषयमें एक श्लोक भी है—

'अनन्तमतीने पिताके परिहाससे ब्रह्मचर्य व्रत धारण किया और उसमें स्थिर रही। फिर बिना किसी प्रकारकी इच्छाके तप करके बारहवें स्वर्गमें उत्पन्न हुई ॥१६५॥

*इस प्रकार उपासकाध्ययनमें निःकांक्षित तत्त्वको बतलानेवाला आठवाँ कल्प समाप्त हुआ।*

*[ अब निर्विचिकित्सा अंगको बतलाते हैं— ]*

'जिनेन्द्र भगवानके द्वारा कहा गया यह उग्र तप प्रशंसनीय नहीं है, उसमें अनेक दोष

---

१. यथार्थनाम्नः। २. भगिनीपतिम्। ३. तीव्रं तपो जिनवरैर्विहितं मुनीनां संवादमन्दिरमिदं न भवेत्तथाहि। आचाममज्जनविवर्जननाग्न्ययोगादूर्ध्वस्थभुक्तित इति प्रवदन्त्यविज्ञाः ॥५०॥—धर्मरत्ना० प० ७० पू०। इदं किंचित् श्लाघ्यं न। ४. सदोषं अदः एतद् वस्तु। अदोषवा–, आ०। सच्छ्रुतात् सुश्रुतुं शीलमसहाः श्रयितुं नराः। निबोधितुं तदर्थं च स्वदोषाद् दूषयन्त्यतः ॥५७॥—धर्मरत्ना० ७० प०। तीव्रं तपो यतीन्द्रेषु नेदं संवादि सर्वथा। स्नानाभावादिदोषैः स्यादपवादशतैर्युतम् ॥३१॥ मन्दबुद्धिर्महामोहादित्थं विप्रतिपद्यते। विनिन्दा नाम तस्यायं दोषः स्याद्दर्शनाश्रयः ॥३२॥ –प्रबोधसार

स्वस्यैव हि स दोषोऽयं यन्न शक्तः श्रुताश्रयम् ।
शीलमाश्रयितुं जन्तुस्तदर्थं वा निबोधितुम् ॥१६७॥
स्वतःशुद्धमपि व्योम वीक्षते यन्मलीमसम् ।
नासौ दोषोऽस्य किं तु स्यात्स दोषश्चक्षुराश्रयः ॥१६८॥
दर्शनाद्देहदोषस्य यस्तत्त्वाय जुगुप्सते ।
स लोहे कालिकालोकान्नूनं मुञ्चति काञ्चनम् ॥१६९॥
स्वस्यान्यस्य च कायोऽयं बहिश्छायामनोहरः ।
अन्तर्विचार्यमाणः स्यादौदुम्बरफलोपमः ॥१७०॥
तदैतिह्ये च देहे च याथात्म्यं पश्यतां सताम् ।
उद्वेगाय कथं नाम चित्तवृत्तिः प्रवर्तताम् ॥१७१॥

श्रूयतामत्रोपाख्यानम्—मतिश्रुतावधिबोधमार्गत्रयप्रवृत्तमतिमन्दाकिनीसान्द्रः सौधर्मेन्द्रः किल सकलसुरसेवासभावसरसमये सम्यक्त्वरत्नगुणान्गीर्वाणानुग्रहायोदाहरन्निदानी-

हैं।' इस प्रकार चित्तमें सोचना विचिकित्सा कहाता है। शास्त्रमें कहे गये शीलको पालने अथवा उसका आशय समझनेमें जो जीव असमर्थ है सो यह उसीका दोष है। स्वतः शुद्ध आकाश भी जो मलिन दिखाई देता है सो यह आकाशका दोष नहीं है किन्तु देखनेवालेकी आँखोंका दोष है॥ जो मनुष्य शरीरमें दोष देखकर उसके अन्दर बसनेवाली आत्मासे ग्लानि करता है, वह लोहेकी कालिमाको देखकर निश्चय ही सोनेको छोड़ता है। अर्थात् जैसे लोहेकी कालिमाका सोनेसे कोई सम्बन्ध नहीं है वैसे ही शरीरकी गन्दगीका आत्माके साथ कोई सम्बन्ध नहीं है। अतः शरीरके गन्देपनको देखकर तपस्वी साधुकी आत्मासे घृणा नहीं करनी चाहिए॥ अपना शरीर हो या दूसरेका, वह बाहरसे ही मनोहर लगता है। उसके अन्दरकी हालतका विचार करनेपर तो वह उदुम्बरके फलके समान ही है॥ अतः इस परम्परागत उपदेश तथा इस शरीरके वास्तविक स्वरूपको जाननेवाले सज्जनोंकी चित्तवृत्ति ( शरीरकी गन्दगीको देखकर ) कैसे व्याकुल हो सकती है ? अर्थात् नहीं हो सकती ॥१६६–१७१॥

**भावार्थ**—रत्नकरण्ड श्रावकाचारमें निर्विचिकित्साका स्वरूप बतलाते हुए लिखा है कि यह शरीर स्वभावसे ही गन्दा है, किन्तु यदि उसमें रत्नत्रयसे पवित्र आत्माका वास है तो शरीरसे ग्लानि न करके उस आत्माके गुणोंसे प्रीति करनेको निर्विचिकित्सा अंग कहते हैं। प्रायः ऐसा देखा जाता है कि दुर्भाग्यसे पीड़ित मनुष्योंको देखकर सुखी मनुष्योंके चित्तमें यह भावना आ जाती है कि हम श्रीमान् हैं और यह बेचारा विपत्तिका मारा हुआ दीन-हीन प्राणी है, यह भला हमारे बराबर कैसे हो सकता है। इस प्रकारका अहंकार केवल अज्ञान मूलक है वास्तवमें कर्मोंके बन्धनमें पड़े हुए सभी प्राणी समान हैं। अतः जो कर्मोंके शुभोदयसे फूलकर कर्मोंके अशुभोदयसे पीड़ित प्राणियोंसे घृणा करते हैं और शास्त्रमें प्रतिपादित जप-तप-नियमादिकको कष्टदायक जानकर उसे वृथा समझते हैं तथा तपस्वियोंके मैले शरीरको देखकर उनकी निन्दा करते हैं वे मिथ्यादृष्टि हैं—उनकी दृष्टि ठीक नहीं है। और जो वैसा नहीं करते, वे ही सम्यग्दृष्टि हैं।

## ३ निर्विचिकित्सा अंगमें प्रसिद्ध उद्दायन राजा की कथा

इस सम्बन्धमें एक कथा है, उसे सुनिए—

१. शीलार्थं आचरणप्रयोजनं ज्ञातुमसमर्थो वा। २. नभसः। ३. नेत्रस्य संबन्धी।

मिन्द्रकच्छदेशेषु मायापुरीत्यपरनामावसरस्य रौरुकपुरस्य प्रभोः प्रभावतीमहादेवीविनोदाय-
तनादौद्दायनान्मेदिनीपतेः सद्दर्शनशरीरगदचिकित्सायामचिकित्सायामपरः कोऽपि क्षान्तमति-
प्रसरो मोक्षलक्ष्मीकटाक्षावेक्षणाक्षुण्ण[1]पात्रे मर्त्यक्षेत्रे नास्तीत्येतच्च वासवसंक्लेशस्त्रिदशः पुरन्दरो-
दितासहमानप्रश्नस्तत्र महामुनिसमूहप्रचारप्रचरे नगरेऽवतीर्य सर्वाङ्गा[2]धिनाऽप्रतिष्ठ[3]कुष्ठकोष्ठकं
निष्ठ्यूतद्रवोद्रेकोपद्रुतदेहमखिलदेहिसंदोहोद्वेजनश्र[4]वणेक्षणघ्राणगरणविनिर्गलदनर्गलदुर्गन्धपू-
यप्रवाहमूर्धस्फुटितस्फोटस्फुटचेष्टितानिष्टमक्षिकाक्षितशेषशरीरमभ्यन्तरोच्छ्रयथु[5]कोथोत्तरङ्ग-
त्वगन्तरालप्रलीनाखिलनखनासीरमविच्छिन्नोन्मूर्छ[6]दतुच्छकच्छूच्छन्नसृक्कसारिणीसर[7]न्सततला-
लास्रावमनवरतस्रोतः[8]स्रुतातीसारसंभूतबीभत्सभाव[9]मनेकशो विशिखाशिखोत्पतनिपताश्रिता-
शुचिरं[10] राशिदुर्दर्शवपुषमृषिवेषमादायाद[11]नायावनीपतिभवनमभजत् ।

भूपतिरपि सप्ततलारब्धसौधमध्यमध्यासीनस्तमसाध्यव्याधिविधुरधिषणाधीनविष्वा-
णा[12]न्वेषणाय निजनिलयमालीय[13]मानमवलोक्य सौत्सुक्यमागत्य स्वीकृत्य च कृत्रिमातङ्क[14]पाव-
कपरवशास्वनितं मुहुर्मुहुर्महीतले निपतन्तमनुद्विग्नमनश्चरित्रः प्रकामदुर्जयखर्जनाजर्ज-
रितगात्रं काश्मीरपङ्कपिञ्जरेण भुजपञ्जरेणोद्[15]नीयानीय चाशन[16]वेश्मोदरं स्वयमेव समाचारितो-
पचारै[17]स्तदभिलाषोन्मेषसारैराहारैरुपशान्ताशना[18]योत्कण्ठमाकण्ठं भोजयामास ।

---

एक बार, मति, श्रुत और अवधि ज्ञानसे युक्त सौधर्मेन्द्र देवोंकी सभामें उनके उपकारके लिए सम्यग्दर्शन रूपी रत्नके गुणोंका उदाहरण देते हुए बोला—'इस समय, मोक्ष रूपी लक्ष्मीके कटाक्षको देखनेके लिए निर्दोष पात्र स्वरूप इस मनुष्य लोकमें, इन्द्रकच्छ देशकी मायापुरी नगरीके स्वामी राजा उद्दायनके समान निर्विचिकित्सा अंगका पालन करने वाला दूसरा नहीं है।'

यह बात वासव नामके देवको सह्य नहीं हुई। वह अनेक महामुनियोंके विहारसे पवित्र उस नगरीमें आया और उसने एक कोढ़ी मुनिका रूप धारण किया। उसके समस्त अंग कोढ़से गल रहे थे, सारा शरीर बहते हुए पीब वगैरहसे सना था, आँख, नाक, कान वगैरहके छिद्रोंसे अत्यन्त दुर्गन्धवाला मल बहता था, जिसे देखकर सबको ग्लानि होती थी, शरीरके ऊपरी भागमें अनेक फोड़े उठे हुए थे जिनपर मक्खियाँ भिनभिना रही थीं। समस्त शरीरमें निरन्तर खाज उठ रही थी, ओठोंके दोनों ओरसे निरन्तर राल टपकती थी और अतीसार रोगके कारण निरन्तर मल बहता था। गन्दी नालियोंमें गिरने उठनेसे उसका शरीर गन्दगीसे भरा हुआ था।

ऐसे दुर्दर्शनीय साधुका वेष बनाकर भोजन करनेके लिए वह देव राजभवन गया। अपने सतमंजिले महलमें बैठे हुए राजाने असाध्य रोगसे व्याकुल बुद्धिवाले उस साधुको जैसे ही भोजनके लिए अपने महलकी ओर आता हुआ देखा, वह बड़ी उत्सुकताके साथ उठकर आया और उसे पड़गाहा। बनावटी रोगसे उसकी आवाज भारी हो रही थी, बार-बार वह पृथ्वीपर गिर पड़ता था तथा अत्यन्त भयानक खाजसे उसका शरीर जर्जर हो चुका था। ऐसे उस साधुको वह राजा किसी उद्वेगके बिना केशरके लेपसे पीली हुई अपनी भुजाओंमें उठाकर भोजनशालामें लाया। और स्वयं ही सब उचित उपचार करके उसे भरपेट रुचिकर आहार कराया।

---

१. –क्षूण– अ० ज० मु०। परिपूर्ण। २. व्याधिना–रोगेण। ३. अशोभित। ४. कर्ण-चक्षुर्घ्राण-गल-एतेभ्यो-विनिर्गलदनवरतपूयप्रवाहम्। ५. कोथस्तु मथने नेत्रत्वग्भेदे शाटितेऽपि च। ६. उत्पद्यमान। ७. श्रवत्। ८. मलद्वारश्रवत्। ९. –भावं ने–ब०। १०. गूथश्रेणि। ११. आहारार्थम्। १२. आहारग्रहणाय। १३. आगच्छन्तम्। १४. रोग। १५. उद्धृत्य। १६. रसवतीगृहमध्यम्। १७.–पचार–मु०। १८. उपशान्ता अशनाय उत्कण्ठा यस्य।

मायामुनिः पुनरपि तन्मनोजिज्ञासमानमानसः प्रसभमतिगम्भीरगलगुहाकुहरोज्जिहा[1]नघोरघोषाभिघातघनघूर्णितापघनमप्रतिघं चावमीत्[2]। भूमीपतिरपि 'आः, कष्टमजनिष्ट, यन्मे मन्दभाग्यस्य[3] गृहे गृहीताहारोपयोगस्यास्य मुनेर्मनः खेदपादपवितर्दिच्छर्दिः समभूत्' इत्युपेक्षुद्धानिष्टचेष्टितवर्त्मानमात्मानं विनिन्दन्मायामयमक्षिकामण्डलितकपोलरेखादेतन्मुखादसरालालाक्लिन्नमिन्दिरामन्दिरारविन्दोदरसौन्दर्यनिकटेनाञ्जलिपुटेनादायादाय मेदिन्यामुदसूजत्[6]। पुनश्चोद्गीर्णोदीर्णदुर्वर्णकूर[7]निकरे [8]भर्मिभ्रमिनिर्भरारम्भपतितशरीरं सप्रयत्नकरस्थामसीमं[9] समुत्थाप्य जलजनितक्षालनप्रसंगमुत्तरीयदुकूलाञ्चलविलुप्तसलिलसंगमक्लसंवाहनेनानुकम्पनविधानोचितवचनरचनेन च साधु समाश्वासयत्।

तदनु[10] प्रमोदामृतामन्दहृदयालवालवलयोल्लसत्प्रीतिलतावनिः सुरचरो मुनिर्यथैवायं सद्दर्शनश्रवणोत्कण्ठितहृदि[11] त्रिदिवोत्पादिपरिषदि परगुणग्रहणाग्रहनिधानेन विबुधप्रधानेन प्राज्यराज्यसमग्र्यार्जनसर्जितजगत्त्रयीनिजनामधेयप्रसिद्धिर्यथोक्तसम्यक्त्वाधिगमावधेयबुद्धिरुपवर्णितस्तथैवायं मया महाभागो निर्वर्णित[13] इति विचिन्त्य प्रकटितात्मरूपप्रसरस्तमवनीश्वरममरतरुप्रसूनवर्षानन्ददुन्दुभीनादोपघातशुचिभिः साधुकारपरव्याहारावसरशुचिभिरुदारैरुपचारैरनिमिषविषयसंभूष्णुभिर्मनोभिलषितसंपादनजिष्णुभिस्तैस्तैः पठितमात्रविधेयविद्योपदेशगर्भैर्वस्त्रसंदर्भैश्च संभाव्य सुरसेव्यं देशमाविवेश।

तब उस मायावी मुनिने राजाके मनका भाव जाननेकी इच्छासे, मेघके गर्जनको भी मात कर देने वाली गलेकी आवाजके साथ जो कुछ खाया पिया था वह सब वमन कर दिया। 'यह बड़ा बुरा हुआ जो मुझ अभागेके घर भोजन करनेसे मुनिराजको वमन हो गया।' इस प्रकार अपनेको अनिष्ट चेष्टाओंसे युक्त मानकर वह राजा अपनी निन्दा करते हुए, मायामयी मक्खियोंके झुण्डसे आक्रान्त उस साधुके मुखसे निरन्तर बहने वाली लारसे सने हुए अन्नको, लक्ष्मीके निवासस्थान कमलके समान सौन्दर्यशाली अपनी अञ्जलिसे उठा-उठाकर भूमिमें फेंकने लगा। फिर वमन किये हुए दुर्गन्धित अन्नपर मूर्छा आजानेके कारण एक दम गिर पड़े साधुके शरीरको बड़े श्रमके साथ अपने हाथोंमें उठाकर अपने दुपट्टेके कोनेको जलमें भिगोकर उससे उसे धोने लगा। तथा पगचम्पी वगैरह व दयापूर्ण शब्दोंके द्वारा वह साधुको ढाढस बधाने लगा।

राजाके इस सेवाभावको देखकर मुनि वेषधारी उस देवके प्रमोदरूपी जलसे परिपूर्ण हृदय रूपी क्यारीमें प्रीतिरूपी लता लहलहाने लगी। वह सोचने लगा—'सम्यग्दर्शनका वर्णन सुननेके लिए उत्कण्ठित देवताओंकी सभामें, दूसरोंके गुणोंको ग्रहण करनेका आग्रह रखने वाले इन्द्रने तीनों लोकोंमें अपने नामको ख्यात करनेवाले यथोक्त सम्यक्त्वके आराधक इस राजाके सम्बन्धमें जैसा कहा था वैसा ही इस महाभागको मैंने पाया। ऐसा सोचकर उसने अपना असली रूप प्रकट कर दिया। और अमर तरुके पुष्पोंकी वर्षा, दुन्दुभिके आनन्दपूर्ण नाद तथा दूसरोंके आदर-सत्कारके अवसरपर किये जाने वाले अन्य महान् उपचारोंके द्वारा राजाका बड़ा सम्मान किया और उसे पाठमात्रसे सिद्ध होनेवाली अनेक विद्याएँ तथा वस्त्र वगैरह देकर स्वर्गलोकको चला गया।

१. विवर। २. निर्विघ्नं वान्तः। ३. मन्दभागस्य– अ०, ज०। ४. इत्यपकृष्ट–ब०। निन्दनीय चेष्टा। ५. लक्ष्मी निवास। ६. त्यक्तवान्। ७. ओदनसमूहे। ८. माया भ्रमण। –र्भमिभ्रम–आ०। ९. बल। १०. तत्पश्चात्। ११. देव। १२. श्लाघितः। १३. दृष्टः। १४. देव। १५. मंत्रपाठमात्रेण स्वाधीनविद्योपदेशसहितैर्वस्त्रैः।

**भवति चात्र श्लोकः—**

**बालवृद्धगदग्लानान्मुनीनौद्दायनः स्वयम् ।**
**भजन्[1]निर्विचिकित्सात्मा स्तुतिं प्रापत्पुरन्दरात् ॥१७२॥**

*इत्युपासकाध्ययने निर्विचिकित्सासमुत्साहनो नाम नवमः कल्पः ।*

**अन्त[2]र्दुरन्तसंचारं बहिराकारसुन्दरम् ।**
**न श्रद्दध्यात्कुदृष्टीनां मतं किम्पाकसंनिभम् ॥१७३॥**
**[3]श्रुतिशाक्यशिवाम्नायः क्षौद्रमांसासवाश्रयः ।**
**यदन्ते[4] मखमोक्षाय विधिरत्रैतदन्वयः ॥१७४॥**
**धर्मिभस्मजटाबोट[5]योगपट्टकटासनम् ।**
**मेखलाप्रोक्षणं मुद्रा [6]वृषीदण्डः करण्डकः ॥१७५॥**
**शौचं मज्जनमाचामः पितृपूजानलार्चनम् ।**
**अन्तस्तत्त्वविहीनानां प्रक्रियेयं विराजते ॥१७६॥**
**को देवः किमिदं ज्ञानं किं तत्त्वं कस्तपःक्रमः ।**
**को बन्धः कश्च मोक्षो वा यत्रैतदं न विद्यते ॥१७७॥**
**आप्तागमाविशुद्धत्वे क्रिया शुद्धापि देहिषु ।**
**नाभिजातफलप्राप्त्यै विजातिष्विव जायते ॥१७८॥**

---

इसके विषयमें भी एक श्लोक है, जिसका आशय इस प्रकार है—"बाल, वृद्ध और रोगसे पीड़ित मुनियोंकी स्वयं सेवा करनेवाला, निर्विचिकित्सा अंगका पालक, राजा उद्दायन इन्द्रके द्वारा प्रशंसित हुआ।"

*इस प्रकार उपासकाध्ययनमें निर्विचिकित्सा अङ्गका वर्णन करनेवाला नौवाँ कल्प समाप्त हुआ।*

*[ अब अमूढदृष्टि अङ्गको बतलाते हैं— ]*

जिसके अन्दर बुराइयाँ भरी हैं किन्तु जो बाहरसे सुन्दर है, किम्पाकफलके समान ऐसे मिथ्यादृष्टियोंके मतपर श्रद्धा मत करो ॥१७३॥

वैदिक मतमें मधुके प्रयोगका विधान है, बौद्धमतमें मांस-भक्षणका विधान है, और शैवमतमें मद्यपानका विधान है। इन आम्नायोंमें जो यज्ञ और मोक्षकी विधियाँ हैं, उनमें भी उक्त वस्तुओंके सेवनका विधान आता है ॥१७४॥

नशा करना, भस्म रमाना, जटाजूट रखना, योगपट्ट, कटिसूत्र-धारण, यज्ञके लिए पशुवध करना, मुद्रा, कुशासन, दण्ड, पुष्प रखनेका पात्र, शौच, स्नान, आचमन, पितृतर्पण और अग्निपूजा, ये सब आत्मतत्त्वसे विमुख साधकोंकी प्रक्रिया है ॥ कौन देव है ? तत्त्व क्या है, तपस्याका क्रम क्या है ? बन्ध किसे कहते हैं ? मोक्षका क्या स्वरूप है ? ये सब बातें वहाँ नहीं हैं ॥१७५-१७७॥

यदि देव और शास्त्र निर्दोष न हों तो प्राणियोंकी शुद्ध क्रिया भी श्रेष्ठ फलको नहीं दे

---

१. भजन्निर्विचिकित्स्यात्सास्तुतिं प्राप पुरन्दरात् ॥७०॥—धर्मर: पृ० ७१उ० । २. विषवृक्षफलप्रायं बहि:शोभामनोहरम् । महामोहलतामूलं मतं मिथ्यादृशां मतम् ॥४०॥ प्रबोधसार । ३. श्रौतबुद्धशिवाम्नाया मधुमांसासवाश्रयाः । सुधिया न प्रशस्यन्ते ब्रह्मतत्त्वेऽपि संस्थिताः ॥४१॥—प्रबोधसार । वेदे क्षौद्रस्वीकारः । बौद्धमते मांसाम्नायः । शैवमते मद्यम् । ४. यज्ञेन कृत्वा मोक्षनिमित्तं विधिः क्रियते (?) ५. -जूट-ब० । ६. वृषी-व्रतिनां कुशासनम् ।

तत्संस्तवं प्रशंसां वा न कुर्वीत कुदृष्टिषु ।
ज्ञानविज्ञानयोस्तेषां विपश्चिन्न च विभ्रमेत् ॥१७६॥

श्रूयतामत्रोपाख्यानम्—मुक्ताफलमञ्जरीविराजितविलासिनीकर्णकुण्डलेषु पाण्ड्यमण्डलेषु पौरपुण्याचारविदूरितविधुरायां दक्षिणमथुरायामशेषश्रुतपारावारपारगमवधिबोधाम्बुधिमध्यसाधितसकलभुवनभागम्, अष्टाङ्गमहानिमित्तसंपत्तिसमधिकधिषणाधिकरणम्, अखिलश्रमणसंघसिंहोपास्यमानचरणम् अत्याश्चर्यतपश्चरणगोचराचारचातुरीचमत्कृतचित्तखचरेश्वरविरचितचरणार्चनोपचारं श्रीमुनिगुप्तनामव्याहारं भदन्तं भगवन्तं गगनगैमनाङ्गनापाङ्गामृतसारणीसंबन्धवीध्रस्य विजयार्धमेदिनीध्रस्य रतिकेलिविलासविगलितनिलिम्पललनामेखलामणौ दक्षिणश्रेणौ मेघकूटपट्टनाधिपत्योपान्तः सुमतिसीमन्तिनीकान्तः संसारसुखपराङ्मुखप्रतिभश्चन्द्रशेखराय सुताय निजैश्वर्यं वितीर्य पर्यवसितदेशयतिरूपः सकलाम्बरचरविद्यापरिग्रहसमीपः सप्रश्रयमभिवन्द्यानवद्यविद्यामहन् भगवन्, पौराङ्गनाशृङ्गारोत्तरङ्गापाङ्गपुनरुक्तस्मरशरायामुत्तरमथुरायां जिनेन्द्रमन्दिरवन्दारुहृदयदोहदवर्ती वर्तेऽहम् । अतस्तन्नगरीगमनाय तत्र भगवता भगवतानुज्ञातव्योऽस्मि । किं च कस्य तस्यां पुरि कथयितव्यमित्यपृच्छत् ।

सकती । जैसे विजातियोंमें कुलीन सन्तानकी प्राप्ति नहीं होती ॥ इसलिए मिथ्यादृष्टियोंकी मनसे प्रशंसा नहीं करनी चाहिए और न वचनसे स्तुति करनी चाहिए । तथा समझदार मनुष्योंको उनके ज्ञानादिकको देखकर भ्रममें नहीं पड़ना चाहिए ॥१७८-१७९॥

**भावार्थ**—अतत्त्वको तत्त्व मानना, खोटे गुरुको गुरु मानना, कुदेवको देव मानना और अधर्मको धर्म मानना मूढता है । और जो इस प्रकारकी मूढता नहीं करता वह अमूढदृष्टि अङ्गवाला कहा जाता है । कुछ लोगोंका यह भाव रहता है कि लौकिक कल्याणके लिए कुदेवोंकी आराधना करनी चाहिए । किन्तु यह सब लोकमूढ़ता है । इस प्रकारकी मूढता सम्यग्दृष्टिको शोभा नहीं देती ।

## ४ अमूढदृष्टि अंगमें प्रसिद्ध रेवती रानी की कथा

इस विषयमें एक कथा है, उसे सुनें—

पाण्ड्य देशकी दक्षिण मथुरा नगरीमें श्री मुनिगुप्ताचार्य विराजमान थे । वे समस्त श्रुत समुद्रके पारगामी थे, उनके अवधिज्ञान रूपी समुद्रके मध्यमें समस्त भुवनके भाग वर्तमान थे, वे अष्टांगमहानिमित्तके ज्ञाता थे, समस्त मुनिसंघ उनके चरणोंकी उपासना करता था । उनके आश्चर्यकारी तपश्चरणको देखकर विद्याधरोंके स्वामियोंके चित्त भी आश्चर्यचकित हो गये थे और वे उनके चरणोंकी पूजा करते थे ।

विजयार्ध पर्वतकी दक्षिण श्रेणिके मेघकूट नामक नगरका राजा संसारके सुखसे विमुख होकर, अपने पुत्र चन्द्रशेखरको अपना राज्य देकर विरक्त हो गया । और मुनि गुप्ताचार्यके समीपमें उसने देशचारित्र धारण कर लिया । साथ ही परोपकार और वन्दना वगैरहके लिए उसने कुछ विद्याएँ भी अपने पास रक्खीं ।

एक दिन मुनिगुप्ताचार्यके पास जाकर वह बोला—"भगवन्, मैं उत्तर मथुराके जिनालयोंकी

१. राक्षस । २. समुद्र । ३. अष्टाङ्गमहानिमित्तानि अन्तरिक्षभौमस्वरव्यञ्जनलक्षणछिन्नभिन्नस्वप्नाः । ४. विद्याधर । ५. देवाङ्गना ।

मुनिसत्तमः—'प्रियतम, यथा ते मनोरथस्तथाभिमतपथः समस्तु। संदेष्टव्यं पुनस्तत्रैतावदेव यदुत तत्पुरीपुरंदरस्य वरुणधरणीश्वरस्य शचीसदृशः सुदृशः पतिजिनपतिचित्तचरणोपचारपदव्या महादेव्या रेवतीतिगृहीतनामया मदीयाशीर्वाच्या, तथावश्यकविशेषवश्यचित्तः सुव्रतभगवतो वन्दना च।

देशे यतिवरः—किमपरः तत्र भगवन्, जैनो जनो नास्ति।

भगवान्—'देशव्रतिन्, अलं विकल्पेन। तत्र गतस्य भविष्यति समस्ताप्याहर्तेतरशरीरिसपंक्षा[3] समक्षा स्थितिः'।

खचरविद्याबीजप्ररोहमल्लकः क्षुल्लको 'यथादिशति दिव्यज्ञानसंगवान्भगवान्' इति निगीर्य गगनचर्ययावतीर्य चोत्तरमथुरायां परीक्षेय तावदेकादशाङ्गनिधानं भव्यसेनम्। तदनु परीक्षिष्ये सम्यक्त्वरत्नवर्ती रेवतीमिति कृतकौतुकः कलमकणिशकिशारुप्रकाशकेशपेशलासरालचूलमुत्तप्तकाञ्चनरुचिरुचिरशरीरगौरतानुकूलमरविन्दमकरन्दपरागपिङ्गलनयनमतिस्पष्टविकटवर्णवर्णनोदीर्णवदनमेकादशवर्षदेशीयमतिविस्मयनीयं कपटबटुवेषमाश्लिष्य तन्मुनिमलमुत्रवसितमयासीत्।

वेषमुनिस्तमीक्षणकमनीयं द्विजात्मजसजातीयं विलोक्य किलैवं स्नेहाधिक्यमालीलपत्—'हंहो, निखिलद्विजवंशव्यतिरिक्तसुकृतकृतकल्याणप्रकृतितया समस्तलोकलोचनानन्दोत्पादनपटो बटो कुतः खलु समागतोऽसि'।

---

वन्दना करना चाहता हूँ अतः उस नगरीको जानेकी आज्ञा प्रदान करें। तथा उस नगरीमें यदि किसीसे कुछ कहना हो तो वह भी बतला दें कि किससे क्या कहूँ। आचार्य बोले—'प्रियवर! अपने मनोरथके अनुसार मथुरा नगरीको जाओ। और वहाँके लिए मेरा इतना ही सन्देश है कि उस नगरीके स्वामी वरुण राजाकी रानी जिन भगवान्के चरणोंकी अनन्य उपासिका पतिव्रता महादेवी रेवतीको मेरा आशीर्वाद कहना और अपने आवश्यकोंमें लीन भगवान् सुव्रतमुनिसे वन्दना कहना।'

'भगवन्! क्या वहाँ अन्य जैन यति नहीं हैं?'—देशव्रतीने पूछा।

आचार्य—'देशव्रती! यह पूछनेकी आवश्यकता नहीं है। वहाँ जानेपर तुम्हें जैन और जैनेतर मनुष्योंकी स्थिति प्रत्यक्ष हो जायेगी।'

आकाशगामिनी विद्यामें पटु वह क्षुल्लक 'दिव्यज्ञानी भगवान्की जो आज्ञा' इतना कहकर आकाश मार्गसे उत्तर मथुरामें जा पहुँचा। वहाँ उसे कौतूहल हुआ कि पहले ग्यारह अङ्गके धारी भव्यसेनकी परीक्षा करनी चाहिए, फिर सम्यक्त्व रूपी रत्नसे भूषित रेवतीकी परीक्षा करूँगा। यह सोच उसने ग्यारह वर्षके बालकका अत्यन्त आश्चर्यकारक रूप बनाया। उसके धान्यकी मञ्जरीके अग्रभागकी तरह पीले केश थे, तपाये हुए सोनेके समान शरीरका रूप था, शरीरके अनुरूप ही कमलके रस और रजके समान पीले नेत्र थे और मुखसे अति स्पष्ट सुन्दर स्तुति पाठ करता था। ऐसा रूप बनाकर वह विद्याधारी क्षुल्लक भव्यसेन मुनिके वासस्थानपर गया।

उस सुन्दर ब्राह्मण बालकको देखकर वह मुनिवेषी बड़े स्नेहसे इस प्रकार बोला—

---

१. पतिश्च राजा जिनपतिर्वीतरागस्वामी तयोश्चित्तचरणौ पत्युश्चित्तं जिनपतेश्चरणौ। २. स्थानं मार्गो वा। ३. सदृशा। ४. प्रत्यक्षा। ५. भाजन। ६. अक्षरोच्चार। ७. गृहीत्वा। ८. स्थानं। ९. अधिक।

अभिनवजनमनोह्लादनवचनौषधप्रयोगचरकभट्टारक[1], सकलकलाविलासावासविद्वज्जनपवित्रात्पाटलिपुत्रात्'। 'किमर्थम्'। 'अध्ययनार्थम्'। 'काधिजिगांसाधिकरणमन्तःकरणम्'[2]। 'वाङ्मलक्षालनकरप्रकरणे व्याकरणे'। 'यद्येवं मदन्तिके स्वाध्यायध्यानसर्वस्व समास्व[3]। परवादिमदविदारणवाक्प्रक्रमासे[4] भगवन्, साधु समासे'[5]।

तदन्वतीतवतीषु कियतीषुचित्कालकलासु 'बटो, ललाटंतपो वर्तते मार्तण्डः। तद्गृहाणेमं कमण्डलुम्। पर्यट्यागच्छावः'[6]।

बटुः—'यथाज्ञापयति भगवान्'।

पुनर्नगरबाहिरिकायां निर्गते सरूपसंयते[7] स कपटबटुर्मायामयशष्पाङ्कुरनिकरनिकीर्णां विहारावतीर्णामवनिमकार्षीत्। तद्दर्शनादाकृतियतिरपि मनाग्व्यलम्बिष्ट।

बटुः—'भगवन्, किमित्यकाण्डे विलम्ब्यते'।

'बटो, प्रवचने किलैते शष्पाङ्कुराः[8] स्थावराः प्राणिनः पठ्यन्ते'।

'भगवन्, श्वासादिषु मध्ये कियतिथगुणः[9] खल्वमीषां प्राणः। केवलं रत्नाङ्कुरा इव धराविकारा ह्येते[10] शष्पाङ्कुराः।'

---

'समस्त ब्राह्मण वंशसे अधिक उपार्जित पुण्यसे मनोरम प्रकृति होनेके कारण समस्त लोगोंकी आँखोंको आनन्द देनेवाले बालक, कहाँसे आते हो ?' 'नये मनुष्योंके मनको प्रसन्न करनेवाले वचनोंके प्रयोगमें कुशल भगवन्, मैं समस्त कलाओंमें प्रवीण, विद्वानोंसे पवित्र पाटलीपुत्र नगरसे आता हूँ।'

'क्यों आये हो ?'

'पढ़नेके लिए !'

'क्या पढ़ना चाहते हो ?'

'वचनदोषको दूर करनेमें समर्थ व्याकरण पढ़ना चाहता हूँ।'

'तो स्वाध्याय और ध्यानमें लीन, तुम मेरे पास ही रहो।,

हे परवादियोंके मदको बिदारण करनेवाले वचनोंमें प्रवीण भगवान् ! जैसी आज्ञा।' आपके पास ही ठहरता हूँ।

उसके पश्चात् कुछ काल बीतनेपर मुनि बोले—

'बालक ! सूर्य मध्याह्नमें आगया है। अतः कमण्डलु लो, चलो घूम आयें।'

बालक—'भगवन् ! जो आज्ञा।'

नगरसे बाहर जानेपर उस कपटवेषी बालकने उस विहारभूमिको मायामयी घासके अंकुरोंसे ढक दिया। उसे देख कर वह मुनिवेषी भी थोड़ा सकपका गया।

बालक—'भगवन् ! व्यर्थमें क्यों देर करते हैं ?'

'बालक ! शास्त्रमें घासके इन अंकुरोंको स्थावर जीव बतलाया है।'

---

१. वचनमेव औषधं तस्य ( प्रयोगे ) चरकः—वैद्यः। २. अध्ययनकर्तुमिच्छा। ३. तिष्ठ। ४. वाक्प्रक्रम एव असि खड्गो यस्य। ५. तिष्ठामि। ६. पर्यटनं कृत्वा। ७. वेषधारिणि। ८. बालतृण। सस्या–मु०। ९. कियति गु–मु०। १०. सस्या–मु०।

वेशमुनिः 'साध्वयमभिदधाति' इति विचिन्त्य विहृत्य च निःशङ्कं निष्पादितनीहारो विरहितव्याहारः[1] करेण [2]किमप्यभिनयन्नेवमनेनोक्तः—'भगवन्, किमिदं मौनेनाभिनीयते। जिनरूपाजीव :

*अभिमानस्य रक्षार्थं मतीक्षार्थं श्रुतस्य च*
*ध्वनन्ति मुनयो मौनमदनादिषु कर्मसु ॥१८०॥*

इति मौनफलमविकल्प्य जालजल्पः 'द्विजात्मज, समन्विष्य समानीयतामावायत्कायो गोमयो भसितपटलमिष्टकाशकलं वा'।

'भगवन्, अखिललोकशौचोचितप्रवृत्तिकायां मृत्तिकायां को दोषः'।

'बटो, प्रवचनलोचननिचा[3]यिकास्तत्कायिकाः[4] किल तत्र सन्ति जीवाः'।

'भगवन्, ज्ञानदर्शनोपयोगलक्षणो जीवगणः। न च तेषु तद्द्व[5]यमुपलभ्यते'।

'यद्येवमानीयतां मृत्स्ना कृत्स्नाऽसुमत्सेव्या'। बटुस्तथाचर्य कुण्डिकामर्पयति। मुधामुनिर्जलविकलां कमण्डलुं करेणाकलय्य 'बटो, रिक्तोऽयं कमण्डलुः।

'भगवन्, इदमुदकमचिरवल्ले तल्ले समास्ते'।

'बटो, पटापूतपानीयादाने महदादीन[6]वं किमिति यतो जन्तवः सन्ति।

तदसत्यमिह स्वच्छतया विहायसीव पयसि तदनवलोकनादिति वचनात्तत्र बहिस्त-

---

भगवन्! इनके श्वासादिकर्मेसे कितने प्राण होते हैं? घासके ये अंकुर तो रत्नोंके समान पार्थिव हैं।'

'यह बालक ठीक कहता है' यह सोचकर उस मुनिवेषीने निःशङ्क हो कर उस तृणोंसे व्याप्त पृथ्वीपर विहार किया और शौचसे निवृत्त होनेपर मौनपूर्वक हाथसे संकेत किया। तब बालक बोला—'भगवन्, मौनसे आप संकेत क्यों करते हैं?' यह सुनकर वह मुनिवेषी 'अभिमानकी रक्षाके लिए तथा शास्त्रकी विनयके लिए भोजन आदि करते समय मुनिगण मौन धारण करनेको कहते हैं' मौनके इस फलका विचार किये बिना बोला—'ब्राह्मणपुत्र! कहींसे भी खोजकर सूखा गोबर राख या ईंटका टुकड़ा लाओ।'

'भगवन्! सब लोग मिट्टीसे शुद्धि करते हैं, मिट्टीमें क्या दोष है?'

'बालक! शास्त्रमें कहा है कि मिट्टीमें पृथिवीकायिक जीव रहते हैं।'

'भगवान्! जीवका लक्षण तो ज्ञानोपयोग और दर्शनोपयोग है, किन्तु मिट्टीमें ये दोनों नहीं पाये जाते।'

'तो सब जीवधारियोंसे सेवनीय मिट्टी लाओ।'

बालकने मिट्टी ला दी और कमण्डलु रख दिया। हाथसे कमण्डलुको खाली जानकर मुनिवेषी बोला—'बालक! यह कमण्डलु खाली है'

'भगवन्! सामने तालमें तो पानी है।'

'बालक! बिना छने पानीको काममें लानेमें बड़ा पाप है; क्योंकि उसमें जीव रहते हैं?'

'यह बिल्कुल झूठ है क्योंकि आकाशकी तरह स्वच्छ इस पानीमें जीव नहीं दिखाई देते।' यह सुनकर उस द्रव्य लिङ्गीने तालपर जाकर शौच क्रिया की।

यह सब देखकर वह विद्याधर सोचने लगा कि इसी लिए अतीन्द्रिय पदार्थोंको

---

१. मौनी। २. संज्ञां कुर्वन्। ३. दृष्टाः। ४. पृथ्वीकायिकाः। ५. ज्ञानदर्शनोपयोगद्वयं। ६. कर्मास्रवदोषं।

न्त्रसंयमिनि तत्स्वामिनिवेशवशिकाशयवेश्मनि तद्देशमुद्दिश्याश्रितशौचे खचरेण चिन्तितम् अत एव भगवानतीन्द्रियपदार्थप्रकाशनशेमुषी प्राप्तः श्रीमुनिगुप्त्यो[-सो]ऽस्य किमपि न वाचिकं[2] प्राहिणोत्। यस्मादस्मिन्प्रदीपवर्तिवदनमिवान्तस्तत्त्वसर्गे निसर्गमलीमसं मानसं बहिः प्रकाशनसरसं च।

भवति चात्र श्लोकः—

जले तैलमिवैतिह्यं[3] वृथा तत्र[4] बहिर्द्युति[5]।
रसवत्स्यान्न[5] यत्रान्तर्बोधो वेधाय[6] धातुषु ॥१८१॥

*इत्युपासकाध्ययने भवसेनदुर्विलसनो नाम दशमः कल्पः।*

परीक्षितस्तावत्प्रसभंविर्भविष्यद्भवसेनो भवसेनस्तदिदानीं भगवदाशीर्वादपादपोत्पादवसुमतीं रेवतीं परीक्षे, इत्याक्षिप्तान्तःकरणः पुरस्य[8] पुरंदरदिशि[9] हंसांशोत्तंसावासवेदिकान्तरालकमलकर्णिकास्तीर्णमृगाजिनासीनपर्यङ्कपर्यायम्, अमरसरः[10]संजातसरोजसूत्रवर्तितोपवीतपूतकायम्, [11]अमृतकरकुरङ्गकुलकृष्णसारकृत्तिकृतोत्तरासंगसंनिवेशम्, अनवरतहोमारम्भसंभूतभसितपाण्डुपुण्ड्र[12]कोत्कटनिटल[13]देशम्, अम्बरचरतरङ्गिणीजलक्षालितकल्पकुजवल्कलवलितोत्तरीयप्रतानपरिवेष्टितजटावलयम्, अमृतान्धसिन्धुरोधःसंजातकुत[16]पाङ्कुराक्षमालाकमण्डलुयोगमुद्राङ्कितकरचतुष्टयम्, उपासनसमायात-मतङ्ग-भृगु-भर्ग-भरत-गौतम-गर्ग-पिङ्गल-पुलह-पुलोम-पुलस्ति-पराशर-मरीचि-विरोचन-[17]चञ्चरीकानीकास्वाद्यमानवदनारवि-

---

जाननेकी बुद्धि रखनेवाले श्री मुनिगुप्ताचार्यने इससे कुछ भी नहीं कहलाया। क्योंकि दीपककी बत्तीके मुखकी तरह इसका मन तो स्वभावसे ही कलुषित है किन्तु बाहरमें प्रकाश दिखाई देता है।

इस विषयमें एक श्लोक है जिसका भाव इस प्रकार है—

जहाँ धातुमें पारदकी तरह अन्तर्बोध चित्तके अन्दर नहीं भिदता, वहाँ जलमें तेलकी तरह बाहरमें ही प्रकाशमान शास्त्रज्ञान व्यर्थ ही होता है ॥१८१॥

*इस प्रकार उपासकाध्ययनमें भव्यसेन मुनिकी दुश्चेष्टा बतलानेवाला दसवाँ कल्प समाप्त हुआ।*

भव्यसेनकी परीक्षा हो चुकी। अब भगवान् मुनि गुप्ताचार्यके द्वारा आशीर्वाद पानेवाली रेवती रानीकी परीक्षा करनी चाहिए। ऐसा सोचकर उस विद्याधरने नगरकी पूर्वदिशामें ब्रह्माका रूप बनाया।

वेदिकाके मध्यमें कमलकी कर्णिकापर बिछे हुए मृगचर्मपर वह पर्यङ्कासनसे बैठा हुआ था। मान-सरोवरमें उत्पन्न हुए कमलके धागोंसे बना हुआ यज्ञोपवीत उसके शरीरपर पड़ा हुआ था। चन्द्रमाके हिरणके वंशके कृष्णसार मृगके चर्मका बना हुआ उसका दुपट्टा था। निरन्तर होनेवाले होमकी भस्मका त्रिपुण्ड उसके मस्तकपर सुशोभित था।

गंगाके जलसे धोये गये कल्पवृक्षके वल्कलसे उसकी जटाएँ बँधी हुई थीं। गंगाके किनारोंपर उगे हुए दूर्वाङ्कुर, रुद्राक्ष माला, कमण्डलु और योगमुद्रासे उसके चारों हाथ युक्त

---

१. शून्य। २. सन्देशं। ३. शास्त्र। ४. बाह्याचार। ५. पारदवत्। ६. भेदाय। ७. हठात् प्रकटीभविष्यन्ती संसारसेना यस्य। ८. नगरस्य पूर्वदिशि। ९. अंसशब्देन अत्र पृष्ठं। तस्य पृष्ठस्य उत्तंसः मुकुटप्रायः योऽसौ आवासः। १०. मानसरोवर। ११. चन्द्रस्य लाञ्छने यो मृगो वर्तते तस्य वंशोत्पन्नस्य मृगस्य चर्मणा। १२. तिलक। १३. ललाट। १४. १५. देवगङ्गा। १६. दर्भ। १७. एते ऋषय एव भृङ्गाः।

न्वकन्दरविनिर्गलन्निखिलवेदमकरन्दसंदोहम्, उभयपार्श्वावस्थितमूर्तिमन्निखिलकलाविला-सिनीसमाजसंचार्यमाणचामरप्रवाहम्, उदारनादनारदमुनिना मन्यमानप्रतीहारव्यवहारम्, [2]अम्भोभवोद्भवाकारमासाद्य स विद्याधरः समस्तमपि नगरं क्षोभयामास।

सापि जिनेश्वरचरणप्रणयमण्डपमण्डनमाधवी वरुणधरणीश्वरमहादेवी नृपतिपुरोहितात्तमुदन्तमाकर्ण्य त्रिषष्टिशलाकोन्मेषेषु पुरुषेषु मध्ये ब्रह्मा नाम न कोऽपि श्रूयते। तथा—

आत्मनि मोक्षे ज्ञाने वृत्ते ताते च भरतराजस्य।
ब्रह्मेति गीः प्रगीता[3] न चापरो विद्यते ब्रह्मा ॥१८२॥

इति चानुस्मृत्याविस्मयमतिरतिष्ठत्।

पुनः कीनाश[4]दिशि पवनाशनेश्वर[5]शरीरशयनाश्रितापघन[6]मितरेतरतः प्रकामप्रसरत्तद्‌ङ्गोत्त[7]-रङ्गकान्तिप्रकाशपरिकल्पितामृताम्बुधिसंनिधानम्, उल्लेखोल्लसत्फणामणिमरीचिनिचयसि-चयाचरितनिरालम्बाम्बरवितानभावम्, [9]अमर्त्योद्यानप्रसूनमञ्जरीजालजटिलप्रतानवनमालाम-करन्दमण्डितकौस्तुभप्रभाभावम्, असितसितरत्नकुण्डलोद्द्योतसंपादितोभय[10]पक्षपक्षद्वयाक्षेप-म्, अनेकमाणिक्याधिका[11]घटितकिरीटकोटिविन्यस्तास्तोकस्तवकपारिजातप्रसवपरिमलपान-परिचयचटुल[12]चञ्चरीकचयरच्यमाना[13]पेन्दीवरशेखरकलापमति गम्भीरनाभी[14]नदनिर्गतोज्ज्वलन[15]-लनिलयनिलीनहिरण्यगर्भसंभाव्यमाणनामसहस्रकलमाखण्डलं जलधि[16]सुता[17]संवाह्यमानक्रमकम-

थे। उसकी उपासनाके लिए मतङ्ग, भृगु, भर्ग, भरत, गौतम, गर्ग, पिङ्गल, पुलह, पुलोम, पुलस्ति, पाराशर, मरीचि और विरोचन ऋषिरूपी भ्रमरोंकी सेना आई हुई थी, जो उसके मुखकमल-रूपी गुफासे झरनेवाले समस्त वेदरूपी पुष्पमधुके समूहका स्वाद ले रही थी। दोनों ओर खड़े होकर समस्त मूर्तिमान् कलाओंकी तरह देवांगनाएँ चामर ढारती थीं और नारद मुनि द्वारपालका काम करते थे। इस प्रकार ब्रह्माका रूप धारण करके उस विद्याधरने समस्त नगरमें हलचल मचा दी।

जिनेन्द्र भगवान्के चरणोंमें स्नेहरूपी मण्डपको सुशोभित करनेके लिए माधवीलताके समान उस वरुण राजाकी पटरानी रेवतीने जब राजपुरोहितके मुखसे उक्त वृत्तान्त सुना तो वह विचारने लगी कि तेरसठ शलाकापुरुषोंमें तो किसीका भी नाम ब्रह्मा नहीं है। तथा—

"आत्माको, मोक्षको, ज्ञानको, चारित्रको और भरतके पिता ऋषभदेवको ब्रह्मा कहते हैं। इनके सिवा और कोई ब्रह्मा नहीं है" ॥१८२॥

ऐसा विचारकर कुछ आश्चर्य करके चकित हो वह बैठी रही।

इसके पश्चात् उस विद्याधरने नगरकी दक्षिणदिशामें विष्णुका रूप धारण किया। विष्णु भगवान् शेषनाग शैय्यापर लेटे हुए थे। इधर-उधर फैली हुई उनके शरीरकी कान्तिके प्रकाशसे अमृतका समुद्र-सा बन गया था। उनके शेषनागके फणके मणिकी किरणोंके समूहरूपी वस्त्रसे निरालम्ब आकाशमें चन्दोआ-सा तना था। अनेक प्रकारके मणि-मुक्ताओंसे बने हुए उसके मुकुटकी चोटीपर पारिजात वृक्षके फूलोंके बड़े-बड़े गुच्छे रखे थे। उनकी सुगन्धका पान करनेके लिए उनपर बहुतसे भौंरे एकत्र हो गये थे। वे ऐसे मालूम होते थे मानो नीले कमलोंका बना यह

१. मूर्तिमत्यः कला इव देवस्त्रीसमूहः। २. कमलोत्पन्नस्य ब्रह्मणो रूपं प्राप्य। ३. प्रणीता आ०। कथिता। ४. यमस्य दक्षिणदिशि। ५. शेषनागशय्या। ६. शरीर। ७. नागशरीर। ८. वस्त्र। ९. देव। १०. कृष्णशुक्लपक्षौ। ११.-धिकाधिकघ-ब०। १२. चपलभ्रमर। १३. नीलोत्पल। १४. ह्रद। १५. कमल। १६. क्षीरसागर। १७ लक्ष्मी।

लमने[1]श्चरणशङ्ख[2]सारङ्ग[3]नन्दकसंकीर्णकरम्, [4]असुरवृन्दबन्दीकृतसुन्दरीसंपाद्यमानचामरोपचारव्यतिकरम्, [5]अरुणानुजविनीयमानसेवागतसुरसमाजम्, [6]अधोक्षजवेषं विशिष्य स विद्याधरः समस्तमपि नगरं क्षोभयामास। सापि जिनसमयरहस्या[7]वसायसरस्वती रेवती कर्णपरम्परया किंवदन्तीमेतामुपश्रुत्य 'सन्ति खल्वर्धचक्रवर्तिनो नव कौमोदकी[8]प्रभवः। ते तु संप्रति न विद्यन्ते। अयं पुनरपर एव कश्चिदिन्द्रजालिको लोकविप्रलम्भनायावतीर्णः' इति निर्णीयाविचलितचित्ता समासीत्।

पुनः [9]पाशभृद्दिशि शिशिरगिरिशिखराकारकायशाक्व[10]राश्रितशरीराभोगम[11]न्वग्भूतनगनन्दनानिबि[12]रीशस्तनतुङ्गिमस्तिमितपृष्ठभागम्, अनिमिषवनविसर्पिकर्पूरोद्भिद[13]गर्भसंभवपरागपाण्डुरितपिण्ड[14]परिकरम्, अचिरगोरोचनाभङ्गरागपिङ्गलाम्ब[15]कपरिकल्पितभालसरःस्वर्णसरोजाकरम्, अबालकपालदलकलापालवालवलयविलसन्मौलिमूलव्यतिकरम् अतिविकटजटाजूटकोटरपर्यटद्गगना[16]टनतटनीतरङ्गकरकेलिकुतूहलितवालप्रालेय[17]करम्, आभरणे[18]भङ्गिसंद[19]र्भितालं[20]भकभुजङ्गभोग[21]संगतानेकमाणिक्यविरोक[22]निकरातिशयसा[23]रशार्दूलाजिनविराजमानम्, उड्डमरडमरुकाज[24]कावकृपाणपरशुत्रिशूलखट्वाङ्गादिसङ्गसंकटशकोट[25]कोटिविस्तारम्, स्तम्बेर[26]मासुरचर्मप्रवद्रुधिरदुर्दिनीकृतनर्तावनीप्रतानम्, अनलोद्भव-निकुम्भ[27]-कुम्भोदर

दूसरा शिरोभूषण है। विष्णुकी गहरी नाभिसे एक ऊँची नाल निकली हुई थी उसपर ब्रह्मा विराजमान थे और वे सहस्रनामका पाठ करते थे। लक्ष्मी उनके चरण-कमलोंकी सेवा कर रही थी। उनके हाथोंमें शंख, चक्र, कमल और खड्ग थे। बन्दिनी बनाई गई दैत्योंकी सुन्दरी स्त्रियाँ चमर ढारती थीं और सेवाके लिए आये हुए देवताओंको अन्दर ले जानेके लिए गरुड़ राजद्वारपर खड़े हुए थे।

इस प्रकार विष्णुका रूप धारण करके उस विद्याधरने समस्त नगरमें हलचल मचा दी। जिन-शासनके रहस्यको जाननेमें सरस्वतीके तुल्य रेवती रानीने भी परम्परासे इस बातको सुना। सुनकर वह विचारने लगी कि विष्णु नौ होते हैं किन्तु वे आजकल नहीं है। लोगोंको ठगनेके लिए यह कोई इन्द्रजालिया आया हुआ है। ऐसा निर्णय करके वह नहीं गई।

इसके पश्चात् उसने पश्चिम-दिशामें रुद्रका रूप धारण किया। वह हिमालय पर्वतके शिखरके आकार शरीरवाले वृषभपर बैठे हुए थे। उनके वाम भागमें पार्वती बैठी थी। गोरोचना और भाँगके रागसे पीले हुए नयन ऐसे मालूम होते थे मानो मस्तक रूपी सरोवरमें स्वर्ण-कमल खिले हुए हैं। गलेमें नरमुण्डोंकी माला पड़ी हुई थी। जटाओंके अन्दर विहार करती हुई गंगा नदीकी लहरोंमें बाल-चन्द्रमा खेलता था। भूषणकी तरह धारण किये गये बृहत्काय सर्पकी फणके रत्नोंकी किरणोंसे चितकबरा हुआ सिंहचर्म धारण किये हुए थे। डमरू त्रिशूल खट्वांग आदि लिये हुए थे। गजासुरके चर्मसे टपकनेवाले रक्तने नृत्यभूमिमें वर्षाऋतुका

१. चक्र। २. धनुः। ३. खड्ग। ४. दैत्यानां स्त्रियः कारागारे धृताः। ताभिः चामराः क्षिप्यन्ते ५. गरुडो द्वारपालो जातः। ६. विष्णो रूपं प्राप्य। ७. परिज्ञान। ८. गदास्वामिनः। ९. पश्चिमायां दिशि। १०. वृषभ। ११. पश्चाद्धृतगौरी। १२. निबिड़। १३. तरवः। १४. शरीर। १५. लोचन। १६. देवनदी। १७. चन्द्र। १८. रचना। १९. मिश्रित। २०. बृहत्। २१. शरीर। २२. किरण। २३. कर्बुर गजचर्म। २४. धनुः। २५. –टकोट–ज०। शकोटा हस्ताः। २६. गजासुर। २७. निकुम्भोदर–ज०।

हेरम्ब-भिङ्गिरिटि-प्रभृति-पारिषदपरिषत्परिकल्प्यमानबलिविधानम्, अहिर्बुध्न[1]ावतरनिधान-माकारमनुकृत्य स विद्याधरः समस्तमपि नगरं क्षोभयामास।

सापि स्याद्वादसरस्वतीसुरभि[2]संभावन[3]लवी वरुणमहीशमहादेवी इमां जनश्रुतिं कुतश्चित्पश्चिमप्रतोलिस्रुता[4]द्विपश्चितो निश्चित्य, निशम्यन्ते खलु प्रवचने तपःप्रत्यवायवार्ताऽभद्रा रुद्रास्ते पुनः संप्रति स्वकीयकर्मणां विपाकात्कालिन्दी[5]सोदरोदरगर्तवर्तिनः संजाताः। तदयमपर एव कश्चिन्नरेन्द्र[6]विद्याधिनोद्याविदग्धहृदयमर्दी कपर्दीति च प्रपद्य निःसंदिग्धबोधा समासिष्ट।

पुनः स्वापतेयेशदिशि[7] विश्वंभरातलादूर्ध्वम्, अयोमुखासन[8]दशसहस्रार्धावकृष्टम्, एकेन्द्रनीलशिलावर्तुलाधिष्ठानोत्कृष्टम्, अखिलगति[9]गर्तोत्तरणमार्गैरिव[10] सोपानसर्गैश्चतुर्दिशमु-पाहितावतारम्, अनर्घद्रुघणमणिश्लाघ्योन्नतनवप्राकारान्तराचरितस्पष्टाष्टविधवसुंधरम्, अनवधिनिर्माणमाणिक्यसूत्रितत्रिमेखलालंकारकण्ठीरव[11]पीठप्रतिष्ठपरमेष्ठिप्रतिममशेषतः समा-सीनद्वादशसभान्तरालविलसन्निलिम्पान[12]काशोकानोकहप्रमुखप्रातिहार्योपशोभितम्, ईषदुन्मि-षदनिमिषोद्यानप्रसूनोपहारहरिचन्दनामोदसनाथगन्धकुटीसमेतम्, अनेकमानस्तम्भतडागतो-रणस्तूपध्वजधूप[13]निपनिधाननिर्भरमुरगनरानिमिषनायकानीकानीतमहामहोत्सवप्रसरम्, अभि-तो भवसेनप्रभृत्यार्हताभासप्रभावितयात्राधिकरणं समवशरणं विस्तार्य स विद्याधरः समस्तमपि नगरं क्षोभयामास।

---

समय उपस्थित कर दिया था। कार्तिकेय, कुम्भ, निकुम्भ, गणेश आदि उनकी पूजा करते थे। इस प्रकार रुद्रका रूप धारण करके उस विद्याधरने समस्त नगरको क्षोभित कर दिया। स्याद्वादवाणी रूपी कामधेनुको दुहनेवाली रेवती महारानीने भी पश्चिम दिशाके मार्गसे आनेवाले किसी ब्राह्मणसे उक्त समाचार सुना। वह सोचने लगी कि शास्त्रमें तपोभ्रष्ट ऋषियोंसे रुद्रोंकी उत्पत्ति सुनी जाती है। किन्तु इस समय तो वे सब अपने-अपने कर्मोंके उदयसे यमराजके उदरमें चले गये। इस लिए यह कोई इन्द्रजाल विद्याके द्वारा मूर्ख मनुष्योंके हृदयोंको फुसलानेवाला दूसरा ही रुद्र है ऐसा निर्णय करके वह रह गई।

इसके बाद उस विद्याधरने उत्तर दिशामें जिनेन्द्रदेवके समवशरणकी रचना की। धरातलसे पाँच हजार धनुषकी ऊँचाई पर एक इन्द्रनीलमणिकी गोलाकार उसकी भूमि थी। उस तक पहुँचने-के लिए चारों दिशाओंमें सीढ़ियाँ बनी हुई थीं जो ऐसी प्रतीत होती थीं कि मानो चारों गति-रूपी गड्ढोंसे निकलनेके ये मार्ग हैं। बहुमूल्य मणिसे निर्मित नौ ऊँचे प्राकार बने थे जिनके मध्यमें आठ भूमियाँ थीं। माणिक्यसे बनी हुई तीन कटनियोंसे सुशोभित सिंहासन पर वह परमेष्ठी की तरह विराजमान था। चारों ओर बारह सभाएँ लगी थीं और उनके बीचमें अशोक वृक्ष आदि प्रातिहार्य थे। अनेक गन्धकुटी थीं, जो देवोद्यानके अधखिले हुए पुष्पोंसे और हरिचन्दनकी सुगन्धसे युक्त थीं। अनेक मानस्तम्भ, तालाब, तोरण, स्तूप, ध्वजा, धूपघट और निधियाँ वहाँ विराजमान थीं। तिर्यञ्च मनुष्य और देवोंके स्वामियोंकी सेनाके द्वारा वहाँ महामहोत्सव हो रहा था। उससे प्रभावित होकर भवसेन आदि जैनाभास वहाँ यात्राके लिए आ रहे थे। ऐसे समव-शरणकी रचना करके उस विद्याधरने समस्त नगरमें हलचल मचा दी। जिनागमके उपदेशरूपी

---

१. रुद्रावतार। २. कामधेनु। ३. गोपी। ४. -श्रिता-ब०। ५. यमराज। ६. इन्द्रजाल। ७. उत्तरदिशि। ८. धनुः। ९. चतुर्गति। १०. व पसोपान-अ०, ज०। ११. सिंहासन। १२. देवदुन्दुभि। १३. धूपघट।

सापि जिनसमयोपदेशरसैरावती[1] रेवतीमं व्रतान्तोपक्रमं कुतोऽपि जैनाभासप्रतिभातोऽवबुध्य सिद्धान्ते खलु चतुर्विंशतिरेव तीर्थंकराः, ते चाधुना सिद्धिवधूसौधमध्यविहाराः, तदेषोऽपर एव कोऽपि मायाचारी तद्रूपधारी' इति चावधार्याविपर्यस्तमतिः पर्यात्मधामन्येव[2] प्रवर्तितधर्मकर्मचक्रे सुखेनासांचक्रे।

पुनर्बहुकूटकपटमतिर्दर्शयतिस्ताभिर्विविधप्रकृतिभिराकृतिभिस्तदास्वनितमक्षुभितमवगत्योपात्तमासोपवासिवेषः क्रियामात्रानुमेयनिखिलकरणोन्मेषो गोचराय[3] तदालयं प्रविष्टस्तया स्वयमेव यथाविधिप्रतिपन्नचेष्टस्तथापि विद्याबलादनलनाशवमनादिविकारप्रबलात्कृतानेकमानसोद्वेजनवैयात्यो[4] रेवत्याः क्वचिदपि मनोमूढतामपश्यन्, 'अम्ब, सर्वाम्बरचरचित्रालंकारसम्यक्त्वरत्नाकरक्षोणि दक्षिणमथुरायां प्रसिद्धावसथः सकलगुणमणिनिर्माणविदूरावनिः श्रीमुनिगुप्तमुनिर्मदर्पितरचनैर्वचनैः परिमुषिताशेषकल्मषसंबन्धैर्[5]रखिलकल्याणपरम्पराविरोचनैर्[6]भवतीं रेवतीमभिनन्दयति। रेवती भक्तिरसवशोल्लसन्नपनरागाभिरामं ससंभ्रमं च सप्तप्रचारोपसदैः पदैस्तां दिशमाश्रित्य श्रुतविधानेन विहितप्रणामा प्रमोदमानमनःपरिणामा तदर्पितान्याशीर्वचनान्यावित्ता[7]।

भवति चात्र श्लोकः—

कादम्ब[8]तार्क्ष्य[9]गोसिंहपीठाधिपतिषु स्वयम्।
आगतेष्वप्यभून्नैषा रेवती मूढतावती ॥१८३॥

*इत्युपासकाध्ययनेऽमूढताप्रौढिपरिवृढो नामैकादशः कल्पः।*

जलकी नदीके तुल्य रेवती रानी किसी जैनाभाससे इस समाचारको जानकर विचारने लगी कि आगममें चौबीस ही तीर्थङ्कर बतलाये हैं और वे सब इस समय मुक्तिरूपी वधूके महलमें विहार करते हैं। इसलिए यह कोई मायाचारी है जो उनका रूप धारण किये हुए है। ऐसा निर्णय करके वह अपने घरमें ही धर्मकर्म करती हुई सुखपूर्वक बैठी रही।

इसके बाद अनेक रूप धरनेमें चतुर वह क्षुल्लक अनेक रूपोंके द्वारा भी रेवती रानीको चञ्चल हुआ न देखकर, एक मासका उपवास करनेवाले साधुका वेष बनाकर अत्यन्त शिथिल इन्द्रियोंके साथ आहारके लिए रेवती रानीके घरपर आया। रेवतीने स्वयं ही विधिके अनुसार सब काम किया, किन्तु उस क्षुल्लकने विद्याके बलसे कभी अग्निको बुझाकर और कभी वमन आदि करके उसके मनको उद्विग्न करनेका बहुत प्रयास किया, फिर भी वह उद्विग्न नहीं हुई। यह देखकर वह बोला—'माता! दक्षिण मथुरामें विराजमान सकल गुणोंसे भूषित श्री मुनिगुप्त मुनि मेरे द्वारा समस्त पापसे रहित कल्याणकारक वचनोंसे आपका अभिनन्दन करते हैं।'

यह सुनते ही रेवती रानीका मुख भक्तिरसके रागसे रंजित हो उठा। उसने तत्काल ही दक्षिण दिशामें सात पग चलकर शास्त्रानुसार प्रणाम किया और हर्षसे गद्गद होकर मुनिके द्वारा दिये गये आशीर्वादको स्वीकार किया।

इस विषयमें एक श्लोक है जिसका भाव इस प्रकार है—

'ब्रह्मा, विष्णु, शिव और जिनके स्वयं पधारने पर भी रेवती रानी मूर्ख नहीं बनी ॥१८३॥

*इस प्रकार उपासकाध्ययनमें अमूढ़ता अंगका वर्णन करनेवाला कल्प समाप्त हुआ।*

---

१. नदी। २. परिसामस्त्येन आत्मधामनि। ३. आहारार्थं। ४. धूर्तत्व। ५. सम्बन्धैः। ६. शोभमानैः। ७. गृहीतवती।—न्यापादिता आ०। ८. हंस। ९. गरुड़। 'कादम्ब····। आगतेष्वपि नैवाभूद् रेवती···'धर्मरत्ना०–७२ पृ०।

उपगूहस्थितीकारौ यथाशक्तिप्रभावनम् ।
वात्सल्यं च भवन्त्येते गुणाः सम्यक्त्वसंपदे ॥१८४॥
तत्र—क्षान्त्या सत्येन शौचेन मार्दवेनार्जवेन च ।
तपोभिः संयमैर्दानैः कुर्यात्समयबृंहणम् ॥१८५॥
सवित्रीव तनूजानामपराधं सधर्मसु ।
दैवप्रमादसंपन्नं निगूहेद् गुणसंपदा ॥१८६॥
अशक्तस्यापराधेन किं धर्मो मलिनो भवेत् ।
न हि भेके मृते याति पयोधिः पूतिगन्धिताम् ॥१८७॥
दोषं गूहति नो जातं यस्तु धर्मं न बृंहयेत् ।
दुष्करं तत्र सम्यक्त्वं जिनागमबहिस्थिते ॥१८८॥

*[ अब उपगूहन अंगको बतलाते हैं— ]*

उपगूहन, स्थितिकरण, शक्तिके अनुसार प्रभावना और वात्सल्य ये गुण सम्यक्त्व रूपी सम्पदाके लिए होते हैं ॥१८४॥

क्षमा, सत्य, शौच, मार्दव, आर्जव, तप, संयम और दानके द्वारा धर्मकी वृद्धि करनी चाहिए ॥ तथा जैसे माता अपने पुत्रोंके अपराधको छिपाती है वैसे ही यदि साधर्मियोंमेंसे किसीसे दैववश या प्रमाद वश कोई अपराध बन गया हो तो उसे गुण सम्पदासे छिपाना चाहिए। क्या असमर्थ मनुष्यके द्वारा की गई गल्तीसे धर्म मलिन हो सकता है ? मेढ़कके मर जानेसे समुद्र दुर्गन्धित नहीं हो जाता ॥ जो न तो दोषको ढाँकता है और न धर्मकी वृद्धि करता है, वह जिनागमका पालक नहीं है और उसे सम्यक्त्वकी प्राप्ति होना भी दुष्कर है ॥१८५-१८८॥

**भावार्थ**—इस गुणके दो नाम हैं एक उपबृंहण और दूसरा उपगूहन। अपनी आत्माकी शक्तिको बढ़ाना या उसे दुर्बल न होने देना उपबृंहण कहलाता है। जनतामें धर्मका उत्कर्ष करना भी उपबृंहण गुण कहलाता है। तथा यदि किसी साधर्मी बन्धुसे कभी कोई ग़ल्ती बन गई हो तो उसे प्रकट न होने देना उपगूहन हैं। ये दोनों एक ही गुणके दो नाम दो कार्योंकी अपेक्षासे रख दिये गये हैं, वास्तवमें ये दोनों एक ही हैं, क्योंकि उपगूहनके बिना उपबृंहण नहीं होता। यदि छोटी मोटी भूलोंके लिए भी साधर्मी भाइयोंके साथ कड़ाई बरती जायेगी और उन्हें जाति और धर्मसे वंचित कर दिया जायेगा तो उससे धर्मकी हानि ही होगी, क्योंकि धार्मिक पुरुषोंके बिना धर्म कैसे ठहर सकता है। अतः सम्यग्दृष्टिको समझदार माताके समान साधर्मी भाइयोंसे व्यवहार करना चाहिए। जैसे समझदार माता एक ओर इस बातका भी ध्यान रखती है कि उसकी सन्तान कुमार्गगामी न हो जाये और दूसरी ओर उसकी गल्तियोंको ढाँककर उसकी बदनामी भी नहीं होने देती तथा एकान्तमें उसे समझा बुझाकर उसे क्षमा कर देती है, वैसा ही भव अपराधी भाइयोंके प्रति भी होना चाहिए। जो पुरुष इस तरहका व्यवहार करते हैं उनमें ही सम्यक्त्व गुण प्रकट होता है। किन्तु दोषोंका उपगूहन करनेका यह आशय नहीं है कि दोषी दोष करता रहे और धर्म प्रेमवश दूसरे उस दोषको ढाँकते ही रहें। दैव या प्रमादवश हो गये किसी

---

१. मातृवत्। 'सवित्रीव स्वपुत्रेषु योऽपराधं न बाधते। दैवात्प्रमादात् संभूतं साधूनां सोऽधमः पुमान् ॥४३॥ बालिशस्यापराधेन मलिनं स्यान्न शासनम्। न हि मीने मृते याति पयोधिः पूतिपूरिताम् ॥४४॥–प्रबोधसार।

श्रूयतामत्रोपाख्यानम्—सुराष्ट्रदेशेषु मृगेक्षणापक्ष्मलमूलावलोकितापहसितानङ्गास्त्रतन्त्रे पाटलिपुत्रे सुसीमाकामिनीमकरध्वजस्य यशोध्वजस्य भूभुजः पराक्रमाक्रमाक्रान्तसकलप्रवीरः सुवीरो नाम सूनुरनासादितविद्यावृद्धसंयोगसमयत्वाद्विटविदूषकदूषितहृदयत्वाच्च प्रायेण परद्रविणदारादानोदारक्रियः क्रीडार्थमेकदा क्रीडावने गतः कितवकिरातपश्यतोहरचोरपरिषदमिदमवादीत्—'अहो, विक्रमैकरसिकेषु महासाहसिकेषु भवत्सु मध्ये किं कोऽपि मे प्रार्थनातिथिमनोरथसारथिरस्ति, यः खलु पूर्वदेशनिवेशावासकीर्तने तामलिप्तिपत्तने पुण्यपुरुषकाराभ्यामात्मसात्कृतरत्नाकरसारस्य जिनेन्द्रभक्तनामावतारस्य वणिक्पतेः सप्ततलागाराग्रिमभूमिभागिनि जिनसद्मनि छत्रत्रयशिखण्डमण्डनीभूतमद्भुतद्योतसनीडं[2] वैडूर्यमणिमानयति, तदानेतुः पुनरभिलाषविषयनिषेकमेव पारितोषिकम्।

तत्र च सदर्पः सूर्पो नाम समस्तमलिम्लुच[1]ाग्रेसरो वीरः किलैवमलापीत्—'देव, कियद्दहनमेतद्यतो योऽहं देवप्रसादाद्वियदवसानविरचितामरावतीपुरस्य पुरंदरस्यापि चूडालंकारनूतनं रत्नं पातालमूलनिलीनभोगवतीनगरस्योरगेश्वरस्यापि फणगुम्फनाधिक्यं माणिक्यमपहरामि, तस्य मे मनुष्यमात्रपरित्राणधरणिमणिं लोचनगोचरागारविहारमपहरतः कियन्मात्रं महासाहसम्' इति शौर्यं गर्जित्वा निर्गत्यागत्य च गौडमण्डलमपरमुपायमप-

दोषके कारण किसी धर्मात्माकी अवज्ञा और निन्दा न करके उस दोषको छिपाना तो उचित ही है। किन्तु यदि धर्मका वेष धारण करके कोई ढोंगी जानबूझकर अनाचार करता हो और समझानेपर भी न मानता हो तो ऐसे ढोंगियोंके दोषोंको छिपाना उपगूहन अंग नहीं है।

## ५. उपगूहन अंगमें प्रसिद्ध जिनेन्द्र भक्तकी कथा

इस अंगके विषयमें एक कथा है उसे सुनें—

सुराष्ट्र देशके पाटलीपुत्र नगरका राजा यशोध्वज था। उसके बड़ा पराक्रमी सुवीर नामका पुत्र था। विद्यावृद्ध सज्जनोंका समागम न मिलने तथा विलासी और बदमाशोंकी संगतिमें पड़ जानेसे वह परधन और परस्त्रीका लम्पट हो गया था।

एक बार क्रीड़ा करनेके लिए वह क्रीड़ावनमें गया। वहाँ एकत्र हुए ठग, चोर और भीलोंकी परिषद्से वह बोला—'आप लोग बड़े पराक्रमी और बड़े साहसी हैं। आपमें से जो कोई तामलिप्ति नगरमें अपने पुण्य और पौरुषसे समुद्रकी सारभूत सम्पत्तिको उपार्जित करनेवाले जिनेन्द्रभक्त सेठके सतमंजिले महलके ऊपर बने हुए जिनालयमेंसे तीन छत्रोंकी चोटीमें जड़ी हुई अद्भुत कान्तिवाली वैडूर्यमणिको चुरा लायेगा उसे उसकी इच्छानुसार पारितोषिक दिया जायेगा।

यह सुनकर समस्त चोरोंका मुखिया सूर्प बड़े गर्वसे बोला—'स्वामी यह क्या कठिन है? जो मैं आपकी कृपासे आकाशके अन्तमें बनी हुई अमरावती नगरीके स्वामी इन्द्रके मुकुटमें लगे हुए रत्नको और पातालके अन्दर छिपी हुई भोगवती नगरीके स्वामी शेषनागके फणमें लगे हुए माणिक्यको हर सकता हूँ, उसके लिए आँखोंसे दिखाई देनेवाले महलके ऊपर स्थित और मनुष्य मात्रके लिए शरणभूत मन्दिरसे मणि चुराना कौन साहसका काम है?' इस प्रकार अपने शौर्यकी

१. चौरः। २. समीपम्। ३. चौरः।

श्यन्मणिमोषायाक्षितक्षुल्लकवेषश्चान्द्रायणाचरणैः पक्षपारणाकरणैर्मासोपवासप्रारम्भैरपरैरपि तपःसंरम्भैः क्षोभितनगनगरग्रामग्रामणीगणः क्रमेण जिनेन्द्रभक्तभावाधिकरणतामभजत् ।

एकान्तभक्तिशक्तः स जिनेन्द्रभक्तस्तं मायात्मसात्कृतप्रियतमाकारमपरमार्थाचारमजानन्नार्यवर्यावश्यमनेकानर्घ्यरत्नरचितजिनदेहसंदोहेऽस्मद्देवगृहे त्वया तावदासितव्यं यावदहं बहिर्यात्रां विधाय समायामि' इत्ययाचत ।

अप्रकटकूटकपटक्रमः प्रियतमः 'श्रेष्ठिन्, मैवं भाषिष्ठाः, यदङ्गनाजनसंकीर्णेषु द्रविणोदीर्णेषु देशेषु विहितौकसां प्रायेणामलिनमनसामपि सुलभोदाहाराः खलु खलजनतिरस्काराः' ।

श्रेष्ठी—'देशयतीश, न सत्यमेतत् । अपरिज्ञातपरलोकव्यवहारस्यावशेन्द्रियव्यापारस्य हि पुरुषस्य बहिःसङ्गे स्वान्तं विकुरुतां नाम, न पुनर्यथार्थदृशामनन्यसामान्यसंयमस्पृशां यमस्पृशां भवादृशां यतीशां[3]म्' इति बह्वाग्रहं देवगृहपरिग्रहाय तमयथार्थमुनिमभ्यर्थ्य कलत्रपुत्रमित्रबान्धवेष्वकृतविश्वासो मनःपरिजनदिनशकुनपवनानुकूलतया नगरबाहिरिकायां प्रस्थानमकार्षीत् ।

मायामुनिस्तस्मिन्नेवावसरे तदगारमाकुलपरिवारमवबुध्यार्धावशेषायां निशि कृतरत्नापहारस्तन्मरीचिप्रचारादारक्षिकैरनुद्रुतशरीरः पलायितुमशक्तस्तस्यैव धर्महर्म्यनिर्माणपरमेष्ठिनः श्रेष्ठिनः प्रस्थानावासनिवेशमाविवेश । श्रेष्ठ्यपि दुरालापबहलात्तत्कोलाहला-

गर्जना करके सूर्य नामका चोर वहाँसे निकलकर गौड देशमें आया । दूसरा उपाय न देख उसने मणि चुरानेके लिए क्षुल्लकका वेष बना लिया । कभी वह चान्द्रायण व्रत करता था, कभी एक पक्षमें पारणा करता था और कभी एक मासका उपवास करता था । इस प्रकारकी तपस्यासे नगर, गाँव वगैरहमें सर्वत्र हलचल मच गई । फैलते-फैलते यह चर्चा जिनेन्द्रभक्तके कानों तक भी पहुँची । वह परमभक्त उस मायावीके कपटवेषको न जानकर उससे प्रार्थना करनेके लिए गया कि—'आर्य श्रेष्ठ ! जब तक मैं देशकी यात्रा करके न लौटूँ तब तक आप अनेक अमूल्य रत्नोंसे रचित मेरे जिनालयमें ही ठहरें ।'

अपने कपट जालको छिपानेके लिए वह बोला—'सेठ जी ! ऐसा मत कहिए; क्योंकि स्त्रियोंसे व्याप्त और धनसे परिपूर्ण स्थानपर ठहरनेवाले निर्मल चित्त व्यक्तियोंका भी दुष्टजनोंके द्वारा तिरस्कार किये जानेके उदाहरण पाये जाते हैं ।'

सेठ—'क्षुल्लक महाराज ! यह बात सत्य नहीं है । जिसने परलोकको नहीं जाना और जिसकी इन्द्रियाँ वशमें नहीं हैं, बाह्य निमित्तके मिलनेपर उसका मन भले ही खराब हो जाये, किन्तु यथार्थदर्शी और असाधारण संयमके पालक आप जैसे यतिपतियोंके विषयमें यह बात लागू नहीं हो सकती ।' इस प्रकार स्त्री, पुत्र, मित्र तथा बन्धु-बान्धवोंका विश्वास न करके वह सेठ आग्रह पूर्वक उस कपटवेषीको लिवा लाया । तथा मन, कुटुम्बीजन, दिन, शकुन और वायुको अनुकूल पाकर परदेश यात्राके लिए नगरके बाहर जाकर ठहर गया ।

उसी दिन वह कपटी मुनि उस मकानको आदमियोंसे भरपूर जानकर आधी रातके बीतनेपर रत्नको चुराकर जैसे ही चला वैसे ही उस रत्नकी चमकसे द्वारपालोंने उसे जाते देख

१. चोरणार्थं । २. रचित । ३. यतीशानाम् मु० ।

[1]द्रुद्राग्विद्राणनिद्रस्तदैव मृषामुनिमुद्रमवसाय[2] स्वभावतः शुद्धासागमपदार्थसमाचारनयस्य निशेषान्यदर्शनव्यतिरिक्तान्वयस्य समयस्याविदितपरमार्थजनापेक्षया दुरपवादो माभूदिति च विचिन्त्य समस्तमप्यारक्षिकलोकमेवमभणीत्[3]—'अहो दुर्वाणीकाः, किमित्येनं संयमिनमभल्लेन[4] संभावयन्ति भवन्तः, यदेष खलु महातपस्विनामपि महातपस्वी परमनिःस्पृहाणामपि परमनिःस्पृहः प्रकृत्यैव महापुरुषो मायामोष[5]रहितचित्तवृत्तिरस्मदभिमतेन मणिमेनमानयत्कथं नाम स्तेनभावेन[6] भवद्भिः संभावनीयः। तत्प्रतूर्णमभ्यर्णीभूय प्रसन्न[7]वपुषः सदाचारकैरवा[8]र्जुनज्योतिषमेनं क्षमयत स्तुत नमस्यत वरिवस्यत[9] च।

भवति चात्र श्लोकः—

> मायासंयमनोत्सूर्पे[10] सूर्पे रत्नापहारिणि।
> दोषं निषूदयामास जिनेन्द्रो भक्तवाकपरः[11] ॥१८९॥

*इत्युपासकाध्ययने धर्मोपबृंहणार्हणो नाम द्वादशः कल्पः।*

> परीषह[12] व्रतोद्विग्नमजातागमसङ्गमम्।
> स्थापयेत्क्रस्यदात्मानं समयी समयस्थितम् ॥१९०॥

लिया और वे उसके पीछे दौड़े। अपनेको भागनेमें असमर्थ देख वह चोर उसी मकानमें घुस गया जिसमें प्रस्थानके लिए सेठ ठहरा हुआ था। कोलाहल सुनकर सेठकी नींद खुल गई और उसने उस कपटी मुनिको पहचानकर सब मामला समझ लिया। किन्तु अनजान आदमीके कारण सच्चे देव, सच्चे शास्त्र और सत्य पदार्थोंके अनुगामी जिन-शासनकी बदनामी न हो इस विचारसे वह सब रक्षकोंसे बोला—'अरे बकवादियो! इस साधुका क्यों तिरस्कार करते हो? यह महातपस्वियोंमें भी महातपस्वी और अत्यन्त निस्पृहोंमें भी अत्यन्त निस्पृह है। इसका चित्त माया और मोहसे रहित है। तथा यह प्रकृतिसे ही महापुरुष है। यह मेरे कहनेसे ही मणि लाया है। तुम्हें इसके साथ चोरका-सा बर्ताव नहीं करना चाहिए। अतः शीघ्र पास जाकर प्रसन्न मनसे सदाचाररूपी कुमुदके लिए चन्द्रमाके तुल्य उस साधुसे क्षमा माँगो, उसकी स्तुति करो, और उसे नमस्कार करो।'

इस विषयमें एक श्लोक है जिसका भाव इस प्रकार है—

'मायाके नियंत्रणमें प्रवीण रत्नको चुरानेवाले सूर्पके दोषको जिनेन्द्र भक्त सेठने छिपाया' ॥१८९॥

*इस प्रकार उपासकाध्ययनमें उपबृंहण गुणका वर्णन करनेवाला बारहवाँ कल्प समाप्त हुआ।*

*[ अब स्थितिकरण अंगको कहते हैं—]*

परीषह और व्रतसे घबराया हुआ तथा आगमके ज्ञानसे शून्य कोई साधर्मी भाई यदि

---

१. शीघ्रं। २. ज्ञात्वा। ३. अभणत्—ब०। ४. असमीचीनेन परिणामेन। ५. मायामोह—मु०। ६. चौरभावेन। ७. निर्मलान्तःकरणबहिकरणाः सन्तः। ८. कैरवं-कमलं, तस्य विकासने चन्द्रं। ९. पूजयत यूयं। १०. शीघ्रगामिनि (?)। ११. जिनेन्द्रभक्त इत्यर्थः। १२. 'परिषहाद् व्रताद् भीतमप्राप्तश्रुतसम्पदम्। धर्माद् भ्रस्यन्मतिं साधुं पुनस्तं तत्र रोपयेत् ॥४५॥ भ्रस्यन्तं तपसो दैवात् यो न पातीह संयतम्। सद्दर्शनबहिर्भूतः शासनस्थितिलोपनात् ॥४६॥ शिष्यैः संदेहनिर्वाहैरपि संवर्द्धयेन्मतम्। बहुमध्ये भवेन्नूनं रत्नत्रयधरोऽपरः ॥४७॥ यतः शासनसाध्योऽर्थो नानाशिष्यसमाश्रयः। ततः संबोध्य यो यत्र साधुस्त तत्र रोपयेत् ॥४८॥ बालः शिष्योऽन्यथा नूनं तथा दूरतरोपयेत्। ततस्तस्य भवोऽनन्तः समयोऽपि निहीयते ॥४९॥—प्रबोधसार।

तपसः प्रत्यवस्यन्तं[1] यो न रक्षति संयतम् ।
नूनं स दर्शनाद्बाह्यः समयस्थितिलङ्घनात् ॥१६१॥
नवैः[2] संदिग्धनिर्वाहैर्विदध्याद्गणवर्धनम् ।
एकदोषकृते त्याज्यः प्राप्ततत्त्वः कथं नरः[3] ॥१६२॥
यतः समयकार्यार्थो नानापञ्चजनाश्रयः ।
अतः संबोध्य यो यत्र योग्यस्तं तत्र योजयेत् ॥१६३॥
उपेक्षायां तु जायेत तत्त्वाद् दूरतरो नरः ।
ततस्तस्य भवो दीर्घः समयोऽपि च हीयते ॥१६४॥

धर्मसे भ्रष्ट होता हो तो सम्यग्दृष्टीको उसका स्थितिकरण करना चाहिए। जो तपसे भ्रष्ट होते हुए मुनिकी रक्षा नहीं करता है, आगमकी मर्यादाका उल्लंघन करनेके कारण वह मनुष्य नियमसे सम्यग्दर्शनसे रहित है ॥१९०–१९१॥ जिनके निर्वाहमें सन्देह है ऐसे नये मनुष्योंसे भी संघको बढ़ाना चाहिए। केवल एक दोषके कारण तत्त्वज्ञ मनुष्यको छोड़ा नहीं जा सकता। क्योंकि धर्मका काम अनेक मनुष्योंके आश्रयसे चलता है। इसलिए समझा-बुझाकर जो जिसके योग्य हो उसे उसमें लगा देना चाहिए। उपेक्षा करनेसे मनुष्य धर्मसे दूर होता जाता है और ऐसा होनेसे उस मनुष्यका संसार सुदीर्घ होता है और धर्मकी भी हानि होती है ॥१९२–१९४॥

**भावार्थ**—ऊपर स्थितिकरण अंगका वर्णन करते हुए पं० सोमदेव सूरिने बहुत ही उपयोगी बातें कही हैं। धर्मसे डिगते हुए मनुष्योंको धर्मके प्रेमवश धर्ममें स्थिर करना स्थितिकरण अंग कहलाता है। धर्मके दो रूप व्यावहारिक कहे जाते हैं, एक श्रद्धान और दूसरा आचरण। यदि किन्हीं कारणोंसे किसी साधर्मीका श्रद्धान शिथिल हो रहा हो या वह अपने आचरणसे भ्रष्ट होता हो तो धर्मप्रेमीका यह कर्तव्य है कि वह उन कारणोंको यथाशक्ति दूर करके उस भाईको अपने धर्ममें स्थिर रखनेकी भरसक चेष्टा करे। डिगते हुए को स्थिर करनेके बदले भला-बुरा कहकर या उसकी उपेक्षा करके उसे यदि धर्मसे च्युत होने दिया जाये तो इससे लाभ तो कुछ नहीं होता उल्टे हानि ही होती है। क्योंकि एक तो धर्मसे भ्रष्ट होकर वह मनुष्य पाप-पंकमें और लिप्त होता जाता है और इस तरह उसका भयंकर पतन हो जाता है और दूसरी ओर संघमें-से एक व्यक्तिके निकल जानेसे धर्मकी भी हानि होती है। क्योंकि कहा है कि धर्मका पालन करने वालोंके विना धर्म नहीं रह सकता। यदि हमें अपने धर्मको जीवित रखना है और उसकी उन्नति करना है तो हमें अपने साधर्मी भाइयोंके सुख-दुःखका तथा मानापमानका ध्यान रखकर ही उनके साथ सदा सद्व्यवहार करते रहना चाहिए तथा अपनी ओरसे कोई भी ऐसा दुर्व्यवहार नहीं करना चाहिए जिससे उनके हृदयको चोट पहुँचे। क्योंकि प्रायः ऐसा देखा जाता है कि झगड़ा तो परस्परमें होता है और उसका गुस्सा निकाला जाता है मन्दिरपर। लड़-झगड़कर लोग मन्दिरमें आना छोड़ देते हैं। पूजन करते समय कहा-सुनी हो जाये तो पूजन करना छोड़ देते हैं। इस तरहकी बातोंसे कषाय बढ़ जानेके कारण मनुष्य हिताहितको भूल जाता है और उससे अपना

---

१. चलन्तम्। २. 'किं च संदिग्धनिर्वाहैर्नवैः संघं विवर्धयन्। प्राप्ततत्त्वं त्यजन्नेकदोषतः समयी कथम् ॥८४॥''''संघकार्यं यतोऽनेक''''॥८६॥ अथोपेक्षेत जायेत दवीयांस्तत्त्वतो जनः। वहीयांश्च भवोऽस्येत्थमनवस्था प्रथीयसी ॥८७॥—धर्मरत्ना०, पृ० ७३ उ०। ३. मनुष्य।

श्रूयतामत्रोपाख्यानम्—मगधदेशेषु राजगृहापरनामावसरे पञ्चशैलपुरे चेलिनीमहादेवीप्रणयक्रेणिकस्य[1] श्रेणिकस्य गोत्राकलत्रस्य पुत्रः सकलवैरिपुराभिषेणो वारिषेणो नाम। स किल कुमारकाल एव संसारसुखसमागमविमुखमानसः परमवैराग्योद्गूर्णः[2] पूर्णनिर्णयरसः श्रावकधर्माराधनधन्यधिषणतया गुरूपासनसंवीणतया[3] च सम्यगवसितोपासकाध्ययनविधिराश्चर्यशौर्यनिधिरेकदा प्रेतभूमिषु भूतवासरविभावर्यां रात्रिप्रतिमास्थितो बभूव।

अत्रावसरे क्षपायाः परिणताभोगे खलु मध्यभागे मगधसुन्दरीनामया पण्याङ्गनयात्मन्यतीवासक्तचित्तवृत्तिप्रसरो मृगवेगनामा वीरः शयनतलमापन्नः सन्नेवमुक्तः—'राजश्रेष्ठिनो धनदत्तनामनिष्ठस्य कीर्तिमतीनामायाः प्रियतमायाः स्तनमण्डनो[4]दारमलङ्कारसारं हारमिदानीमेवानीय यदि विश्राणयसि[5], तदा त्वं मे रतिरामः, अन्यथा प्रणयविरामः' इति। सोऽप्यवशानङ्गवेगो[6] मृगवेगस्तद्वचनादेव तदायतनान्निःसृत्याभिसृत्य च निजकलाबला-

---

और दूसरोंका अनिष्ट कर बैठता है, अतः ऐसे प्रसंगोंपर शान्तिसे काम लेना चाहिए। इसी तरह जो पंच होते हैं उनका उत्तरदायित्व बहुत बड़ा होता है, जरा जरा-सी बातोंपर किसीको जातिच्युत कर देना, किसीका मन्दिर बन्द कर देना धर्मकी हानिका ही कारण होता है। ऐसे समयमें जब लोग धर्मसे विमुख होनेके लिए तैयार बैठे हों तब तो इस प्रकारके दण्डोंका उल्टा ही परिणाम होता है। दण्डका प्रयोग औषधकी तरह करना चाहिए। जैसे वैद्य रोगीके रोगके अनुकूल दवा देकर उसे रोगमुक्त करनेकी ही चेष्टा करता है वैसे ही पञ्चोंको भी अपराधीके अपराध और उसके निदानको देख-भाल करके ही उसे ऐसा दण्ड देना चाहिए जिससे उसका सुधार हो और आगे वह वैसा अपराध न कर सके। जाति और धर्मसे बहिष्कार तो अत्यन्त गुरुतर अपराधोंके लिए ही किया जाना चाहिए। इस तरह एक ओर तो मौजूदा साधर्मी भाइयोंको बनाये रखनेकी चेष्टा करनी चाहिए और दूसरी ओर ऐसे नये मनुष्योंको भी धर्ममें दीक्षित करके धर्मकी वृद्धि करनी चाहिए जिनसे हमें थोड़ी-सी भी आशा हो कि ये इसमें खप सकेंगे। इस प्रकार पुराने और नये साधर्मी भाइयोंका स्थितिकरण करते रहनेसे धर्मके नष्ट हो जानेका भय नहीं रहता। इस सम्बन्धमें एक कथा है, उसे सुनें—

### ६. स्थितिकरण अंगमें प्रसिद्ध वारिषेणकी कथा

मगध देशमें पञ्चशैलपुर नामका नगर है, जिसे राजगृही भी कहते हैं। उसमें राजा श्रेणिक राज्य करते थे, उनकी पट्टरानी चेलिनी थी। राजा श्रेणिकके समस्त वैरियोंके नगरोंको जीतनेवाला वारिषेण नामका पुत्र था। कुमार अवस्थासे ही वह सांसारिक सुखोंसे विमुख होकर श्रावक धर्मका पालन करता था और ऐसा करनेसे तथा गुरुओंकी उपासनामें संलग्न होनेसे उसे श्रावकाचारका अच्छा परिज्ञान हो गया था। रात्रिके समय एक दिन वह शूर-वीर श्मशान भूमिमें ध्यानमग्न था। उसी रातके मध्यमें मृगवेग नामका एक वीर जब मगधसुन्दरी नामकी वेश्याके शयन-कक्षमें पहुँचा तो वेश्याने कहा—'राजश्रेष्ठी धनदत्तकी पत्नी कीर्तिमतीके गलेका हार इसी समय लाकर यदि मुझे दोगे तो तुम मेरे प्रेमके स्वामी हो, अन्यथा हमारे तुम्हारे प्रेमका आज अन्त है।'

---

१. ग्राहकस्य। २. उद्यतः। ३. प्रवीणतया। ४. मण्डलो – ज०। ५. ददासि। ६. कामवेगः।

स्तस्य धनदत्तस्यागारमाचरितहारापहारस्तत्किरणनिकरनिश्चितचरणचारस्तलारानुचरै-रनुसृतो मृगायितुमसमर्थस्तस्य व्युत्सर्गवेषमुपेयुषो वारिषेणस्य पुरतो हारमपहाय तिरोदधे।

तदनुचरास्तत्प्रकाशविशेषवशात् 'वारिषेणोऽयं ननु राजकुमारः पलायितुमशक्तः पित्रोः श्रावकत्वादिमामर्हत्प्रतिमासमानाकृतिं प्रतिपद्य पुरो निहितहारः समास्ते' इत्यवमृश्य प्रविश्य च विश्वम्भराधीशवेश्मनिवेशमेतत्पितुः प्रतिपादितवृत्तान्ताः।

*दण्डो हि केवलो लोकं परं चेमं च रक्षति।*
*राज्ञा शत्रौ च पुत्रे च यथादोषं समं धृतः ॥१६५॥*

इति वचनात् 'नहि महीभुजां गुणदोषाभ्यामन्यत्र मित्रामित्रव्यवस्थितिः, तदस्य रत्नापहारोपहतचरित्रस्य पुत्रशत्रोर्न प्राणप्रयाणादपरश्चण्डो दण्डः समस्ति' इति न्यायनिष्ठुरतावेशात्तज्जनकादेशादागत्य तं सदाचारमहान्तं प्रहरन्तः शरविशरान्प्रसूनशेखरतां भ्रमिलमण्डलानि कर्णकुण्डलतां कृपाणनिकरान्मुक्ताहारतामेवमपराण्यप्यस्त्राणि भूषणतामनुसरन्ति, निबुध्य तद्ध्यानधैर्यप्रवृद्धप्रमोदतया स्वयमेव पुरदेवताकरविकीर्यमाणामरतरुप्रसवोपहारमम्बरचरकुमारास्फाल्यमानानकनिकरमनिमिषनिकायकीर्त्यमानानेकस्तुतिव्यतिकरमितस्ततो महामहोत्सवावतारं च निचाय्य सत्वरमतिभीतविस्मितान्तःकरणाः श्रेणिकधरणीश्वरायेदं निवेदयामासुः।

यह सुनते ही कामुक मृगवेग वेश्याके घरसे निकलकर धनदत्तके घर पहुँचा और अपनी चतुराईसे उसके घरमें घुस हारको चुरा जैसे ही चला वैसे ही उस हारकी किरणोंके प्रकाशसे नगरके सिपाहियोंने उसे देख लिया और वे उसके पीछे दौड़े। अपनेको दौड़नेमें असमर्थ जानकर मृगवेगने वह हार कायोत्सर्गसे स्थित वारिषेणके आगे डाल दिया और स्वयं छिप गया।

जब सिपाही वहाँ पहुँचे तो उन्होंने हारके प्रकाशमें वारिषेणको पहचाना। उन्होंने सोचा कि राजकुमारके माता-पिता श्रावक हैं अतः भागनेमें असमर्थता देख राजकुमारने अपने आगे हार रखकर जिनेन्द्रकी प्रतिमाके समान अपना रूप बना लिया है। यह सोच वे सब राजमहलमें आये और राजा श्रेणिकसे सब समाचार निवेदन कर दिया।

नीतिमें कहा है कि—'राजाके द्वारा शत्रु और पुत्रको अपराधके अनुसार समान रूपसे दिया गया दण्ड इस लोककी और परलोककी भी रक्षा करता है ॥१९५॥

अतः राजाओंके लिए जो गुणी है वह मित्र है और जो दोषी है वह शत्रु है। इसलिए रत्नहारको चुरानेवाला मेरा पुत्र भी मेरा शत्रु है और मृत्युके सिवा दूसरा कोई भयानक दण्ड है नहीं। यह विचारकर राजा श्रेणिकने कठोर बनकर अपने पुत्रकी मृत्युकी आज्ञा दे दी।

राजाकी आज्ञा पाकर वे सिपाही श्मशान भूमिमें आये और उस महान् सदाचारी वारिषेणके ऊपर शस्त्र-प्रहार करने लगे। शस्त्र प्रहार करते ही बाण तो फूलोंका मुकुट बन गये। चक्र कानोंके कुण्डल बन गये, तलवारें मोतियोंका हार बन गईं। इस तरह अन्य भी अस्त्र भूषणरूप हो गये। यह समाचार जानकर और वारिषेणके ध्यान और धैर्यसे प्रसन्न होकर नगर देवताने स्वयं ही पुष्पोंकी वर्षा की, विद्याधर कुमारोंने दुन्दुभि बाजे बजाये और देवताओंने वारिषेणकी बहुत स्तुति की। जब सिपाहियोंने यह सब महामहोत्सव देखा तो वे बड़े डरे और राजा श्रेणिकसे जाकर उन्होंने सब समाचार कहा।

---

१. पलायितुम्। २. त्यक्त्वा। ३. समास्–अ०। ४. चक्र। ५. अवलोक्य।

**नरवरः सपरिवारः सोत्तालं तत्रागतः सन्कुमाराचारानुरागरसोत्सारितमृतिभीतिसं-गान्मृगवेगादवगतामूलवृत्तान्तः साधुं तं कुमारं क्षमयामास। नृपनन्दनोऽपि प्रतिज्ञात-समयावसाने 'प्राणिनां सुलभसंपाताः खलु संसारे व्यसनविनिपाताः तदलमत्र कालकवलना-वलम्बेन विलम्बेन। एषोऽहमिदानीमवाप्तयथार्थमनीषोन्मेषस्तावदात्महितस्योपस्करिष्ये' इति निश्चयमुपश्लिष्याभाष्य पितरमापिष्ट्य च बाह्याभ्यन्तरपरिग्रहाग्रहमाचार्यस्य सुरदेवस्या-न्तिके तपो जग्राह।**

**भवति चात्र श्लोकः—**

**विशुद्धमनसां पुंसां परिच्छेदपरात्मनाम्।**
**किं कुर्वन्ति कृता विघ्नाः सदाचारखिलैः खलैः ॥१९६॥**

*इत्युपासकाध्ययने वारिषेणकुमारप्रव्रज्याव्रजनो नाम त्रयोदशः कल्पः।*

**पुनः 'इष्टं धर्मे नियोजयेत्, तथा आतुरस्यागदंकारोपयोग इवानिच्छतोऽपि जन्तो-र्धर्मयोगः कुशलैः क्रियमाणो भवत्यायत्यामवश्यं निःश्रेयसाय' इति जातमतिस्तपःपरिग्रहेऽपि सहपांसुक्रीडितत्वाच्चिरपरिचयरूढप्रणयत्वाच्चात्मनः प्रियसुहृदं पुष्पवतीभट्टिनीभर्तुरमा-त्यस्य शाण्डिल्यायनस्य नन्दनमभिनवविवाहविहितकङ्कणबन्धनं पुष्पदन्ताभिधानमेतदाय-**

राजा जल्दीसे परिवारके साथ वहाँ आया। वारिषेणके चारित्रका चमत्कार देखकर मृगवेग चोरको भी उससे बड़ा स्नेह उत्पन्न हुआ और वह मृत्युका भय छोड़कर वहाँ आया तथा उसने हारकी चोरीका सब हाल राजा श्रेणिकसे कहा। राजा श्रेणिकने कुमारको क्षमा कर दिया।

वारिषेणने यह सोचकर 'संसारमें प्राणियोंपर संकट आना सुलभ है अतः मृत्युकी प्रतीक्षा करनेसे क्या लाभ।' यह निश्चय कर लिया था कि चूँकि मुझे अब सच्चे ज्ञानकी प्राप्ति हुई है इसलिए अब मैं आत्माका कल्याण करूँगा। अतः उसने अपने पितापर अपना निश्चय प्रकट कर दिया और बाह्य तथा आभ्यन्तर परिग्रहको छोड़कर आचार्य सुरदेवके समीपमें जिन-दीक्षा लेली।

इस विषयमें एक श्लोक है जिसका भाव इस प्रकार है—

'सदाचारको बिगाड़नेवाले दुष्ट मनुष्योंके द्वारा किये गये विघ्न, विचारमें तत्पर विशुद्ध-मनवाले मनुष्योंका क्या कर सकते हैं? अर्थात् कुछ भी बिगाड़ नहीं कर सकते ॥१९६॥

*इस प्रकार उपासकाध्ययनमें वारिषेणकुमारका प्रव्रज्याव्रजन नामक तेरहवाँ कल्प समाप्त हुआ।*

राजा श्रेणिकका मन्त्री शांडिल्यायन था और उसकी पत्नी पुष्पवती थी। उनके पुष्पदन्त नामका पुत्र था। उसका नया विवाह हुआ था। वह वारिषेणका अत्यन्त प्रिय मित्र था, बचपनमें दोनों साथ खेले थे और चिरपरिचित होनेसे दोनोंमें गाढ़ स्नेह था। जब वारिषेण मुनि हो गये तो उनका विचार अपने मित्र पुष्पदन्तको भी मुनि बनानेका हुआ। वे सोचने लगे कि शास्त्रकारोंका कहना है कि 'अपने प्रियजनको धर्ममें लगाना चाहिए' तथा जैसे रोगीका वैद्यसे इलाज कराना आगे लाभदायक होता है वैसे ही न चाहनेवाले जीवको भी समझदार मनुष्य यदि धर्ममें लगा दें तो उत्तरकालमें वह अवश्य ही मोक्षकी प्राप्तिका कारण होता है। यह सोचकर वारिषेण मुनि अपने मित्रके घर गये और स्वामीके पुत्र होनेके कारण तथा महामुनिका रूप होनेके

१. त्वरितं। २. चूर्णीकृत्य। ३. ज्ञातात्मनाम्। ४. 'औषधम्'।

तनानुगमनेन स्वामिपुत्रत्वात्प्रतिपन्नमहामुनिरूपत्वाच्चाचरिताभ्युत्थानं हस्तेनावलम्ब्य पुनः 'अतोऽतश्च प्रदेशान्मां व्यावर्तयिष्यत्ययं भगवान्' इति सहानुसरन्तमवाप्तवन्तं च गुरूपान्तम्, 'भदन्त, एष खलु महानुभावतालतालम्बनतरुः स्वभावेनैव भवभीरुर्भोगानुभवने विरक्तचित्तः सर्वसंयतवृत्तार्थी भगवत्पादमूलमायातः' इति सूचयित्वा भगवतोऽभ्यर्णे कामकरिकदलिकावल्लीभारमिव मूर्धजनिकरमपनाय्य दीक्षां ग्राहयामास। सोऽपि तदुपरोधात्ते-पादीक्षामादाय हृदयस्याविदितवेदितव्यत्वादनङ्गग्रहग्रसितत्वाच्च पञ्जरपात्रः पतत्रीव मन्त्रशक्तिकीलितप्रतापः पृदाकुरिव गाढबन्धनालानितो व्यालशुण्डाल इव चाहर्निशं वारिषेणऋषिणा रक्ष्यमाणोऽपि।

अलकवलयरम्यं भ्रूलतानर्तकान्तं
नवनयनविलासं चारुगण्डस्थलं च।
मधुरवचनगर्भं स्मेरबिम्बाधरायाः
पुरत इव समास्ते तन्मुखं मे प्रियायाः ॥१९७॥

कर्णावतंसमुखमण्डनकण्ठभूषा-
वक्षोजपत्रजघनाभरणानि रागात्।
पादेष्वलक्तकरसेन च चर्चनानि
कुर्वन्ति ये प्रणयिनीषु त एव धन्याः ॥१९८॥

---

कारण पुष्पदन्त उन्हें देखकर खड़ा हो गया और उनके साथ यह सोचता हुआ चला कि वह मुझे अमुक स्थानसे लौटा देंगे।

उसे साथ लेकर वारिषेण मुनि अपने गुरुके पास आये और बोले—'भगवन्! यह महानुभाव स्वभावसे ही संसारभीरु है तथा भोगोंके भोगसे इसका चित्त विरक्त हो गया है। महाव्रत धारण करनेकी इच्छासे यह आपके चरणोंमें आया है।'

वारिषेणने इतना निवेदन करनेके बाद पुष्पदन्तको गुरुके सम्मुख केशलोंच कराके जिनदीक्षा धारण करा दी। किन्तु उसका हृदय तो कामसे पीड़ित था अतः पींजरेमें बन्द पक्षीकी तरह, मंत्रकी शक्तिसे जिसका प्रताप कीलित कर दिया गया है उस सर्पकी तरह तथा मजबूत बन्धनसे बँधे हुए दुष्ट हाथीकी तरह वारिषेण मुनिके द्वारा रात-दिन देखरेख रखनेपर भी कभी वह अपनी स्त्रीके मुखका विचार करता था। 'वह केशोंसे कैसा सुन्दर लगता है और उसकी भ्रुकुटियाँ तो क्या गजब की हैं, आँखें कैसी मनोहारिणी हैं, कपोल कितने सुन्दर हैं, कैसी मीठी-मीठी बात करती है। मेरी प्यारीका मुख तो मुझे ऐसा दीखता है मानो वह मेरे सामने ही मौजूद है' ॥१९७॥

कभी वह सोचता—

'जो अपनी प्रियतमाओंके कानोंको कर्णफूलसे सजाते हैं, मुखको अलंकारोंसे भूषित करते हैं, कण्ठमें कण्ठमाल पहिनाते हैं, उरोजोंपर पत्र बाँधते हैं, जघन भागमें करधौनी धारण कराते हैं तथा पैरोंमें महावर लगाते हैं, वे ही धन्य हैं ॥१९८॥

---

१ कन्दर्पगजध्वजमिव। कावली–ब०। २. पञ्जरस्थः। ३. पक्षिवत्। ४. सर्पवत्। ५. दुष्टगजः।

लीलाविलासविलसन्नयनोत्पलायाः
स्फारस्मरोत्तरलिताधरपल्लवायाः ।
उत्तुङ्गपीवरपयोधरमण्डलाया-
स्तस्या मया सह कदा ननु संगमः स्यात् ॥१९९॥

किं च ।

चित्रालेखनकर्मभिर्मनसिजव्यापारसारामृतै-
र्गाढाभ्यासपुरःस्थितप्रियतमापादप्रणामक्रमैः ।
स्वप्ने [1]संगमविप्रयोगविषयप्रीत्यप्रमोदागमै-
रित्थं वेषमुनिर्दिनानि गमयत्युत्कण्ठितः कानने ॥२००॥

इति निर्बन्धेन ध्यायन् द्वादश [2]समाः समानैषीत् ।

शूरदेवभट्टारकोऽप्याभ्यां सह तेषु-तेषु विषयेषु तीर्थकृतां पञ्चकल्याणमङ्गलानि स्थानानि वन्दित्वा पुनर्विहारवशात्तत्रैव जिनायतनोत्तंसितोपान्तशैलचूले पञ्चशैल[3]पुरे समागत्यात्मनो वारिषेण-ऋषेश्च तद्दिवसे पर्यु[4]पासितोपवासत्वात्तं पुष्पदन्तमेकाकिनमेव प्रत्यवसा[5]नायादिदेश । तदर्थमादिष्टेन च तेन[6] चिन्तितं चिरात्कालात्खल्वेकस्मादपमृत्योर्जीवितमुद्धरितोऽस्मि । संप्रति हि मे नूनमनूनानि पुण्यान्यवेक्ष्य दीक्षां मुमुक्षुणा[7] मङ्क्षु पाशपरिक्षेपक्षरितेनेव पक्षिणा पलायितुमारब्धम् । वारिषेणस्तस्य तथा प्रस्थानात्कृतोदर्कं वितर्क्य 'अवश्यमयं जिनरूपं जिहासुरिव सौत्सुक्यं विक्रमते, तदेष कषायमुष्यमाणधिषणः समयप्रतिपालनाधिकरणैर्न भवत्युपेक्षणीयः' इत्यनुध्यायाध्वा[8] तमनुरुध्यैतत्स्थापनाय जनकनिकेतनं

कभी वह सोचता—

'जिसके नेत्रकमल लीलाके विलाससे शोभित हैं, अधरपल्लव कामके वेगसे काँपते हैं, उरोज उन्नत और स्थूल हैं, उसका मेरे साथ समागम कब होगा' ॥१९९॥

कभी वह चित्र बनाता, कभी अत्यन्त अभ्यासके कारण यह अनुभव करता कि उसकी प्रियतमा सामने खड़ी है और वह उसके चरणोंमें प्रणाम कर रहा है। कभी स्वप्नमें संगमका सुख भोगता तो कभी वियोगका कष्ट उठाता। इस प्रकार वह मुनिवेषी बड़ी उत्कण्ठाके साथ जंगलमें दिन बिताता था ॥२००॥ ऐसा करते-करते बारह वर्ष बीत गये।

एक बार शूरदेव गुरु अपने शिष्य वारिषेण और पुष्पदन्तके साथ तीर्थङ्करोंके पञ्चकल्याणकोंके स्थानोंकी वन्दना करके घूमते-घूमते जिनमन्दिरोंसे सुशोभित उसी पञ्चशैलपुरमें आकर ठहरे। उस दिन वारिषेणमुनिका प्रोषधोपवास था अतः उन्होंने पुष्पदन्तको अकेले ही जाकर भोजन कर आनेकी आज्ञा दी। आज्ञा पाकर पुष्पदन्तने सोचा कि बहुत कालके पश्चात् इस अपमृत्युसे जीवनका उद्धार हुआ है। आज मेरे बहुत पुण्यका उदय है।' यह सोच दीक्षाको छोड़नेकी इच्छासे, बन्धनमुक्त हुए पक्षीकी तरह वह वहाँसे भागा। वारिषेणने उसे इस तरहसे भागते हुए देखकर विचार किया कि 'यह अवश्य ही जिनदीक्षा छोड़ देनेके लिए उत्सुक जान पड़ता है। इसकी बुद्धि मोहसे भ्रष्ट हो गई है, अतः जिनागमके पालकोंको इसकी उपेक्षा नहीं

१. यदा स्वप्ने संगमो भवति तद्विषये प्रीत्यागमो भवति । यदा तु स्वप्नविप्रयोगो भवति तद्विषयेऽप्रमोदागमो भवति । २. वर्षाणि । ३. राजगृहनगरे । ४. सेवित । ५. आहारार्थं । ६. पुष्पदन्तेन । ७. दीक्षां मोक्तुमिच्छता । ८. शीघ्रं मार्गं रुद्ध्वा ।

जगाम। चेलिनीमहादेवी पुत्रं मित्रेण समुपढौकमानमवेदय तदभिप्रायपरीक्षार्थं सरागं वीतरागं चासनमयच्छत्। वारिषेणस्तेन समं चरमोपचारं[2] विष्टरमलंकृत्य 'अम्ब, समाहूयतां समस्ता अप्यात्मीयाः स्नुषाः'।

तदनु वनदेवता इव प्रसूनोत्तंसोत्तरङ्कितकुन्तलारामाः, कल्पलता इव मणिभूषणरमणीयाङ्गनिर्गमाः, प्रावृष इव समुन्नतपयोधराविद्धमध्यभागाः, सकलजगल्लावण्यलवलिपिलिखिता इव सुभगभोगायतनाभोगाः, कङ्केल्लिकाननक्षितय[3] इव पादपल्लवोल्लासितविहारविषयाः, कमलिन्य इव मणिमञ्जीरमणितोन्मदमरालमण्डलस्खलितचलनजलेशयाः[4][5], स्वकीयरूपसंपत्तिरस्कृतत्रिभुवनरामारामणीयकाः सलीलमहमहमिकोत्सुकाः समागत्य समन्तात्परिवव्रुः पुण्यदेवता इव ताः स्ववासिन्यः। 'अम्ब, मद्भ्रातृजाया सुदत्यप्याकार्यताम्'। ततः सन्ध्येव धातुरक्ताम्बरचराटोपा[6], तपःश्रीरिव विलुप्तकुन्तलकलापा, भव्यजनमतिरिव विभ्रमभ्रांशिदर्शना, हिमोन्मथिता कमलिनीव क्षामच्छायापघना, शरदिव दीनपयोधरभरा, खट्वाङ्गकरङ्काकृतिरिव[7] प्रकटकीकसनिकरा[8] सकलसंसारसुखव्यावृत्तिनीतिर्मूर्तिमती वैराग्यस्थितिरिव विवेश।

पुष्पदन्तहृदयकन्दलोल्लासवसुमती सुदती वारिषेणोऽवधार्य 'मित्र, सेयं तव प्रणयिनी

---

करनी चाहिए।' ऐसा सोचकर भागते हुए मित्रको रोककर उसको स्थिर करनेके लिए वे अपने पिताके घर गये।

चेलनी रानीने मित्रके साथ अपने पुत्रको आता हुआ देखकर उसके मनकी परीक्षा करनेके लिए दो आसन बिछा दिये। उनमें एक आसन रागियोंके योग्य था और दूसरा विरागियोंके योग्य। वारिषेण अपने मित्रके साथ विरागियोंके योग्य आसनपर बैठ गया और बोला—'माता! अपनी सब बहुओंको बुलाओ।'

अपनी रूप-सम्पदासे तीनों लोकोंकी सुन्दर स्त्रियोंको तिरस्कृत करनेवाली सभी बहुएँ बड़ी उत्सुकताके साथ आकर चारों ओर बैठ गईं। केशपाशमें गूँथे गये फूलोंसे वे वनदेवताके समान प्रतीत होती थीं, उनके अंग मणियोंके भूषणोंसे शोभित थे अतः वे कल्पलताके तुल्य प्रतीत होती थीं, उन्नत पयोधरों (स्तनों) से उनका मध्यभाग पराजित हो गया था अर्थात् मध्यभाग कृश था, अतः वे वर्षाऋतुके तुल्य प्रतीत होती थीं क्योंकि वर्षाऋतुमें भी आकाशमें पयोधर (मेघ) उमड़े रहते हैं। उसके बाद वारिषेण बोले—'माता! मेरी भ्रातृवधू सुदतीको भी बुलाओ।'

आज्ञा पाते ही सुदती भी आ गई। उसके केशकलाप अस्त-व्यस्त थे, हिमपातसे कुमुलाई हुई कमलिनीकी तरह उसकी मुखश्री म्लान हो गई थी। शरीरमें हड्डियाँ ही दिखाई देती थीं। वह ऐसी मालूम देती थी मानो संसारके समस्त सुखोंसे उदासीन मूर्तिमती वैराग्य-विभूति ही है।

पुष्पदन्तके हृदयरूपी नवांकुरके उल्लासके लिए पृथ्वीके तुल्य सुदतीको जानकर वारिषेण

---

१. आगच्छन्तम्। २. वीतरागासनम्। ३. अशोकवृक्षवनभूमयः। ४. शब्दित। ५. चलना चरणा एव जलेशयानि यासां ताः। ६. गेरुरक्तवस्त्रेण चरः चपलः आटोपो यस्याः सा। ७. खट्वाङ्गमेव करङ्कः। ८. अस्थि।

यन्निमित्तमद्यापि न संपद्यसे मनोमुनिरिति । एताश्चैवंविधकायास्तव भ्रातृजायाः, तथैते च वयं तव समक्षोद्यं समाचरिताभिजातजनोचितचरिताः' । पुष्पदन्तः—

स्नानानुलेपवसनाभरणप्रसून-
ताम्बूलवासविधिना क्षणमात्रमेतत् ।
आधेयभावसुभगं वपुरङ्गनानां
नैसर्गिकी तु किमिव स्थितिरस्य वाच्या ॥२०१॥

इत्यसंशयमाशय्य[1] स्त्रैणेषु सुखकरणेषु विचिकित्सासज्जां लज्जामभिनीय 'हंहो निकाम[2]-निरुद्धमकरध्वजोद्धव[3]विधुरबान्धव संसारसुखसरोजोत्सार[4]नीहारायमाणचरण वारिषेण, पर्याप्तमत्रावस्थानेन । प्रकामं शकलित[5]कुसुमास्त्ररसरहस्य वयस्य, इदानीं यथार्थनिर्वेदाव-निर्मनोमुनिरस्मीति चावधाय[6] विशुद्धहृदयौ द्वावपि तौ चेलिनीमहादेवीमभिनन्द्योपसद्य[7] च गुरुपादोपसल्यं[8] निःशल्याशयौ साधु तपश्चक्रतुः ।

भवति चात्र श्लोकः—

*सुदतीसंगमासक्तं पुष्पदन्तं तपस्विनम् ।*
*वारिषेणः कृतत्राणः[9] स्थापयामास संयमे ॥२०२॥*

*इत्युपासकाध्ययने स्थितिकारकीर्तनो नाम चतुर्दशः कल्पः ।*

चैत्यैश्चैत्यालयैर्ज्ञानैस्तपोभिर्विविधात्मकैः ।
पूजामहाध्वजाद्यैश्च कुर्यान्मार्गप्रभावनम् ॥२०३॥

---

बोले—'मित्र ! यही तुम्हारी वह प्रियतमा है जिसके कारण अबतक भी तुम मनसे साधु नहीं बन सके हो । और ये सब तुम्हारी भ्रातृवधू हैं । हम सब तुम्हारी सेवाके लिए तैयार हैं ।

पुष्पदन्त सोचने लगा—'स्त्रियोंका शरीर स्नान, लेप, वस्त्र, आभूषण, फूल, पान, सुगन्ध आदिके द्वारा क्षणमात्र के लिए सुन्दर हो जाता है । यदि वह अपनी स्वाभाविक स्थितिमें रहे तब तो उसकी दशाका कहना ही क्या है ॥२०१॥

ऐसा निःसन्देह विचारकर तथा स्त्रियोंके विषयमें ग्लानिपूर्ण लज्जाका अभिनय करता हुआ वह बोला—'हे कामजेता और संसारके सुखरूपी कमलोंके लिए बर्फके समान वारिषेण ! यहाँ ठहरना वृथा है । कामरसके रहस्यको खण्ड-खण्ड कर डालनेवाले मेरे मित्र ! इस समय मुझे सच्चा वैराग्य हुआ है और मैं मनसे मुनि हूँ ।'

दोनों विशुद्ध हृदय मित्रोंने रानी चेलनीका अभिनन्दन किया और गुरुके चरणोंमें आकर निशल्य होकर तपस्यामें लीन हो गये ।

इस विषयमें एक श्लोक है जिसका भाव इस प्रकार है—

'वारिषेणने सुदतीमें आसक्त तपस्वी पुष्पदन्तकी रक्षा की और उसे संयममें लगाया ॥२०२॥

*इस प्रकार उपासकाध्ययनमें स्थितिकरणका वर्णन करनेवाला चौदहवाँ कल्प समाप्त हुआ ।*

*[ अब प्रभावना अंगको बतलाते हैं— ]*

जिनबिम्ब और जिनालयोंकी स्थापनाके द्वारा, ज्ञानके द्वारा, तपके द्वारा तथा अनेक प्रकारकी महाध्वज आदि पूजाओंके द्वारा जैनधर्मकी प्रभावना करना चाहिये ॥२०३॥

---

१. विचिन्त्य । २. अतिशयेन । ३. दर्प । ४. विनाशे हिममिव चारित्रं यस्य । ५. खण्डित । ६. उक्त्वा । ७. प्राप्य । ८. समीपम् । ९. रक्षणः ।

ज्ञाने तपसि पूजायां यतीनां यस्त्वसूयते[1]।
स्वर्गापवर्गभूर्लक्ष्मीर्नूनं तस्याप्यसूयते ॥२०४॥
समर्थश्चित्तवित्ताभ्यामिहाशासनभासकः[2]।
समर्थश्चित्तवित्ताभ्यां स्वस्यामुत्र न भासकः[3] ॥२०५॥
तद्दानज्ञानविज्ञानमहामहमहोत्सवैः।
दर्शनद्योतनं कुर्यादैहिकापेक्षयोज्झितः[4] ॥२०६॥

जो मुनियोंके ज्ञान, तप और पूजाकी निन्दा करता है, उनमें झूठा दोष लगाता है, स्वर्ग और मोक्ष लक्ष्मी भी नियमसे उससे द्वेष करती है। अर्थात् उसे न स्वर्गके सुखोंकी प्राप्ति होती है, और न मोक्ष ही मिलता है ॥२०४॥

इस लोकसे बुद्धि और धनमें समर्थ होनेपर भी जो जिनशासनकी प्रभावना नहीं करता, वह बुद्धि और धनसे समर्थ होनेपर भी परलोकमें अपना कल्याण नहीं करता। अतः ऐहिक सुखकी इच्छा न करके दान, ज्ञान, विज्ञान और महापूजा आदि महोत्सवोंके द्वारा सम्यग्दर्शनका प्रकाश करना चाहिए ॥२०५-२०६॥

**भावार्थ**—सम्यग्दर्शनका एक अंग प्रभावना है। जैनधर्मके महत्त्वको प्रकट करना, ऐसे कार्य करना जिससे लोगोंमें जैनजर्मकी जानकारी हो, जैनधर्मके विषयमें फैला हुआ अज्ञान दूर हो और जनताकी रुचि जैनधर्मकी ओर आकृष्ट हो, प्रभावना कहलाता है। पहले जैनधर्ममें बड़े-बड़े तपस्वी मुनि, ज्ञानी, आचार्य और धर्मात्मा सेठ होते थे। तपस्वी मुनि अपनी तपस्याके द्वारा जनतापर ऐसा प्रभाव डालते थे जिससे स्वयं जनता उनकी ओर आकृष्ट होती थी और उनसे संयमकी शिक्षा लेकर अपने इस जन्म और परजन्मको सुखी बनाती थी। ज्ञानी, आचार्य जगह-जगह विहार करके जैनधर्मका उपदेश देते थे। यदि कहीं जैनधर्मपर आक्षेप होते थे तो उनको दूर करते थे, यदि कोई शास्त्रार्थ करना चाहता था तो राजसभाओंमें उपस्थित होकर शास्त्रार्थ करते थे और यदि कहीं किसी प्रतिद्वन्द्वीके द्वारा जैनधर्मके कार्योंमें रुकावट डाली जाती थी तो अपनी वाग्मिताका प्रभाव डालकर उन रुकावटोंको दूर करते थे। तथा बड़े-बड़े ग्रन्थराज रचकर जिनवाणीके भण्डारको भरते थे। आचार्य कुन्दकुन्द, स्वामी समन्तभद्र, भट्टाकलंक, स्वामी वीरसेन, स्वामी जिनसेन आदि महान् आचार्योंके पुण्यश्रमका ही यह फल है जो जैनधर्म आज भी जीवित है। इसी प्रकार राजा, सेठ, साहूकार तरह-तरहका महोत्सव करके जैनधर्मका प्रकाश करते थे। आज न वैसे तपस्वी मुनि हैं, न ज्ञानी आचार्य हैं और न वैसे धर्मात्मा सेठ हैं। फिर भी आज जैनधर्मके प्रकाशको फैलानेकी बहुत आवश्यकता है। जैन बालक, बालिकाएँ दिन-पर-दिन धर्मसे अनजान बनते जाते हैं, उन्हें शिक्षा देनेके लिए पाठशालाएँ खोलनी चाहिएँ। विद्वानोंको पैदा करनेका तथा उनकी परम्परा बनाये रखनेका प्रयत्न करते रहना चाहिए; क्योंकि उनके बिना शिक्षा–उपदेश और शास्त्रार्थोंका आयोजन नहीं हो सकता। इसी तरह जनतामें प्रचारके लिए विविध भाषाओंमें

---

१. 'बोधे तपसि सन्माने यतीनां यस्त्वसूयति। रत्नत्रयमहासम्पन्नूनं तस्याप्यसूयति ॥१२॥'–प्रबोधसार। स्वर्गापवर्गविषये भवतीति भूः। २. न शासनदीपको भवति। ३. स्वस्यात्मनः परलोके स उद्द्योतको न भवति। ४. इहलोकसुखापेक्षारहितः।

श्रूयतामत्रोपाख्यानम्—पञ्चालदेशेषु श्रीमत्पार्श्वनाथपरमेश्वरयशःप्रकाशनामत्रे[1] अहिच्छत्रे चन्द्राननाङ्गनारतिकुसुमचापस्य द्विषंतपस्य भूपतेरुदितोदितकुलशीलः षडङ्गे वेदे दैवे निमित्ते दण्डनीत्यां चाभिविनीतमतिरापदां[2] दैवीनां मानुषीणां च प्रतिकर्ता यज्ञदत्ताभट्टिनीभर्ता सोमदत्तो नाम पुरोहितोऽभूत्। एकदा तु सा किल यज्ञदत्तान्तर्वत्नी[3] सती माकन्द[4]मञ्जरीकर्णपूरेषु तत्परिणतफलाहारेषु च समासादितदोहला व्यतिक्रान्तरसालवल्लरीफलकालतया कामितमनवाप्नुवती शिफासु[6] व्यथमाना [7]प्रतानिनीव [8]तनुतानवमुपेयुषी तेन पुरोहितेन ज्ञातिजनेन च प्रबन्धेन पृष्टा हृदयेष्टमभाषिष्ट। भट्टस्तन्निशम्य 'कथमेतन्मनोरथमयथार्थपथमस्मन्मनोमथं[9] [10]मव्यर्थप्रार्थनं करिष्यामि' इत्याकुलमनः परिच्छदच्छात्रतन्त्रानुपदः सातपत्रपदत्राणस्तद्गवेषणधिषणापरायणः सञ्चितस्ततो व्रजन् जलवाहिनीनामनदीतटनिकटनिविष्टप्रतनने महति कालिदासकानने परमतपश्चरणाचरणशुचिशरीरेण निःशेषश्रुतश्रवणप्रसृत-

ट्रैक्ट पुस्तकें वगैरह प्रकाशित करके वितरण करते रहना चाहिए। तथा साधु त्यागियोंको गुणवान् और विद्वान् बनानेका भी प्रयत्न करते रहना चाहिए। यदि साधु और त्यागीगण विद्वान् हों तो उनसे जैनधर्मकी प्रभावनाको बहुत साहाय्य मिल सकता है। इसके सिवा पूजा-प्रतिष्ठा कराकर भी जनतामें जैनधर्मका प्रचार कराते रहना चाहिए। आजकल कुछ भाई इसे व्यर्थ व्यय समझते हैं क्योंकि एक तो आज नये मन्दिरोंकी उतनी आवश्यकता नहीं है जितनी जीर्णोद्धारकी आवश्यकता है। दूसरे इस तरहके कार्योंमें धर्म-प्रेमकी भावना कम रहती है और नामकी भावना व पदकी इच्छा ज्यादा रहती है। अतः इन बुराइयोंको दूर करके आवश्यक स्थानोंमें महोत्सवोंका आयोजन करते रहना चाहिए और उनमें उपदेश सभाओंका सुन्दर आयोजन रहना चाहिए। ऐसा करनेसे महोत्सवोंका आयोजन विशेष लाभदायक सिद्ध होगा और उनसे जैनधर्मकी भी विशेष प्रभावना हो सकेगी।

### ७. प्रभावना अंगमें प्रसिद्ध वज्रकुमार मुनिकी कथा

अब इस विषयमें कथा कहते हैं, उसे सुनें—

पञ्चाल देशमें श्रीमान् भगवान् पार्श्वनाथके यशसे प्रकाशित अहिछत्र नामका नगर है। उसमें द्विषंतप राजा राज्य करता था। उसकी पत्नीका नाम चन्द्रानना था। राजा द्विषंतपके सोमदेव नामका पुरोहित था। वह बड़ा कुलीन और शीलवान् था। षडङ्ग वेद, ज्योतिष शास्त्र, निमित्त शास्त्र और दण्डनीतिका पण्डित था तथा दैवी और मानवी विपत्तियोंका प्रतिकार करनेमें चतुर था। एकबार उसकी पत्नी यज्ञदत्ता गर्भवती हुई। उसे आमके बौरको कानोंमें पहिरनेका तथा आमके फलोंको खानेका दोहला हुआ। किन्तु आमका मौसम बीत चुका था इस लिये दोहला पूरा न होनेसे वह बहुत दुबली हो गई। पुरोहित तथा कुटुम्बीजनोंके पूछनेपर उसने अपने मनकी बात उनसे कही। सुनकर पुरोहितका मन बड़ा व्याकुल हुआ। वह सोचने लगा कि हमारे मनको पीड़ा देने वाले इसके असामयिक मनोरथको कैसे पूर्ण करूं। उसने जूते पहने, छाता हाथमें लिया तथा शिष्योंको साथ लेकर आमकी खोजमें निकल पड़ा। इधर-उधर घूमते

१. पात्रे। २. विशारदः। ३. गर्भिणी। ४–५. आम्रमञ्जरी। ६. जटा। ७. लता। ८. कायकृशत्वं प्राप्ता। ९. अस्माकं मनो मथ्नातीति अस्मन्मनोमथं दुःखदम्। १०. सफल। ११. छत्रोपानत्सहितः।

मनस्कारेण समस्तसत्त्वस्वरूपनिरूपणस्वाध्यायध्वनिसिद्धौषधिसविधसाधितवनदेवतानिकरेण मूर्तिमतेव धर्मेण विनेयदैर्घिकेयमित्रेण[1] सुमित्रेण मुनिनालंकृतालवालवलयमेतद्ब्रह्मवर्चसमाहात्म्यादामूलमाचूलं चैकं चूतमुल्लसल्लवलीफलगुलुच्छस्फीतमवलोक्य [3]च्छेकच्छात्रहस्ते कलत्रस्य पिकप्रियप्रसवफलप्रतोलीं प्रहृत्य[4] ततो भगवतोऽवधिबोधपयोधिमध्यसंनिधीयमानसकलकलाकलापरत्नाद्धर्मश्रवणावसरप्रयत्नात्समायातं सहस्रारकल्पे[5] सूर्यविमानसंभूतं सूर्यचराभिधानानुगतमत्यल्पविभवपरिप्लुतमात्मगोचरं भवान्तरमाकर्ण्योदीर्णजातिस्मरभावः स्वप्नसमासादितसाम्राज्यसमानसारात्संसाराद्विरज्य मनोजविजयप्राज्यां प्रव्रज्यामासज्य[6] प्रबुद्धसिद्धान्तहृदयो मगधविषये सोपारपुरपर्यन्तधाम्नि नाभिगिरिनाम्नि महीधरे सम्यग्योगातापनयोगधरो बभूव।

तदनु सा तद्वियोगातङ्कोद्भ्रान्तचित्ता यज्ञदत्ता तदन्तेवासिभ्यः[7] सोमदत्तव्रतव्यतिकरमात्मखेदकरमनुभूय प्रसूय च समये स्तनन्धयं पुनस्तमादाय प्रयाय च तं भूमिभृतम् 'अहो कूटकपटपिटक मन्मनोवनदाहदावपावकनिःस्निग्ध दुर्विदग्ध, यदीमं दिगम्बरप्रतिच्छन्दमवच्छिद्य[9] स्वच्छं[10] येच्छयागच्छसि तदाऽऽगच्छ। नो चेद् गृहाणैनमात्मनो नन्दनम्' इति व्याहृत्यास्योर्ध्वज्ञो[11] भगवतः पुरतः शिलातले बालकमुत्सृज्य विजहार निजं निवासम्। भगवानपि तेन सुतेन दृषदः प्लोषोत्कर्षकलुषत्वाद्विष्टरी[12] कृतचरणवर्गः सोपसर्गस्तथैवावतस्थे।

हुए उसने जलवाहिनी नामकी नदीके तटके निकट फैले हुए कालिदास नामके बड़े भारी जंगलमें सुमित्र नामके मुनिको देखा। उत्कृष्ट तपके करनेसे उनका शरीर पवित्र हो गया था, समस्त शास्त्रोंके सुननेसे उनका मनोबल बढ़ गया था। वे ऐसे प्रतीत होते थे मानो मूर्तिमान् धर्म है। उनके ब्रह्मचर्यके तेजके प्रतापसे एक आमका वृक्ष जड़से लेकर चोटी तक सुन्दर फलोंसे लदा हुआ था। पुरोहितने एक छात्रके द्वारा अपनी पत्नीके लिए आम्रफल भेज दिया और आप धर्म श्रवण करनेके लिए अवधिज्ञानी मुनिके समीप बैठ गया। मुनिने बतलाया कि वह पहले जन्ममें सहस्रार स्वर्गके सूर्य विमानमें बहुत थोड़े वैभवका स्वामी सूर्यचर नामका देव था।

पूर्वजन्मका वृत्तान्त सुनकर उसे जातिस्मरण हो आया। स्वप्नमें प्राप्त हुए साम्राज्यके तुल्य इस संसारसे विरक्त होकर उसने कामको जीतनेमें समर्थ जिन-दीक्षा ले ली, और शास्त्रोंके रहस्य को जानकर मगधदेशके सोपारपुरके निकटवर्ती नाभिगिरि पर्वतपर आतापनयोगसे स्थित होगया।

उधर यज्ञदत्ताको जब छात्रोंसे सोमदत्तके दीक्षा ग्रहण करनेका समाचार मिला तो उसे बड़ा खेद हुआ। उसके वियोगसे उसका चित्त उखड़ गया। समयपर उसने एक पुत्रको जन्म दिया और उसे लेकर उसी पर्वतपर आई जहाँ सोमदत्त आतापनयोगसे स्थित था। उसे देखकर बोली—'अरे मेरे मन रूपी वनको जलानेके लिए वनकी आगके समान, निःस्नेही, मूर्ख कपटी! यदि इस दिगम्बर वेषको छोड़कर स्वेच्छासे चलता हो तो चल, नहीं तो इस अपने पुत्रको ले।' ऐसा कहकर उस आतापनयोगसे स्थित मुनिके सामने शिलापर बालकको छोड़कर अपने घर चली गई। शिला तप रही थी अतः बच्चा उनके चरणोंपर लिटा हुआ था और मुनि इस उपसर्गके साथ ज्योंके त्यों निश्चल खड़े थे।

---

१. कमलसूर्येण। २. माहूहीत्म्या–अ० ज० मु०। ३. चतुर। ४. संप्रेष्य। ५. सहितम्। ६. गृहीत्वा। ७. छात्रेभ्यः। ८. रूपम्। ९. मुक्त्वा। १०. स्वेच्छयागच्छसि–आ०। ११. उद्भूवस्य–ऊर्ध्वजानो। १२. शिशोराधारीभूतपादः।

अत्रान्तरे सहचरानुचरसंचरत्खेचरीचरणालक्तकरक्तरन्ध्रस्य विजयार्धतटीध्रस्य दयिताविदूरविद्याधरीविनोदविहारपरिमलितकान्तारधरण्यामुत्तरश्रेण्याममरावतीपुरीपरमेश्वरः सुमङ्गलाबलावरः प्रकामनिखातारातिकान्ताशयशोकशङ्कुस्त्रिशङ्कुर्नाम नृपतिः समरावसराभिसरत्सपत्नसंतानावसानसारशिलीमुखश्चिराय राज्यसुखमनुभूय जिनागमादवगतसंसारशरीरभोगवैराग्यस्थितिर्यतिर्बुभूषुर्भूगोचरसंचाराय हेमपुरेश्वराय समस्तमहीशमान्यशासनाय बलवाहनाय सुतां सुदेवीं राज्यं च ज्येष्ठाय पुत्राय भास्करदेवाय प्रदाय सुप्रभसूरिसमीपे संयमी समजनि।

ततो गतेषु कतिपयेषुचिद्दिवसेषु समुत्साहितात्मीयसहायसमूहेन स्वदोर्दर्पविद्याबलव्यूहेन दुर्विनीतवरिष्ठेन कनिष्ठेनानुजेन पुरंदरदेवेन विहितराज्यापहारः परिजनेन समं स भास्करदेवस्तत्र बलवाहनपुरे शिबिरमधिनिवेश्य मणिमालया महिष्या[1]नुगस्तं सोमदत्तभगवन्तमुपासितुमागतस्तत्पादमूले स्थलकमलमिव तं बालकमवलोक्य 'अहो महदाश्चर्यम्, यतः कथमिदमरत्नाक[2]रमपि रत्नम्, अजलाशयमपि कुशेशयम्, अनिन्ध[3]नमपि तेजःपुञ्जम्, अचण्डकरमप्युग्रत्विषम्, अनिला[4]मातुलमपि कमनीयम्, अपि च कथमयं बालपल्लव इव पाणिस्पर्शेनापि म्लायल्लावण्यः, कठोरोष्मणि ग्रावणि वज्रघटित इव रिरंसमानमानसः, मातुरुत्सङ्गगत इव सुखेन समास्ते' इति कृतमतिः प्रियतमे 'कामं स्तनंधयधृतमनोरथायास्तवायं भगवत्प्रसादसंपन्नः सर्वलक्षणोपपन्नो वज्रकुमारो नामास्मदीयवंशविशालताविधा-

इसी बीचमें एक घटना घटी। विजयार्ध पर्वतकी उत्तरश्रेणिमें अमरावती नगरीका राजा त्रिशङ्कु चिरकाल तक राज्यसुखको भोगकर संसारसे विरक्त हो गया। मुनि होनेकी इच्छासे उसने अपनी कन्या तो हेमपुरके स्वामी भूमिगोचरी बलवाहन राजाको दे दी और राज्य ज्येष्ठ पुत्र भास्कर देवको दे दिया। फिर सुप्रभ सूरिके निकट जिनदीक्षा धारण कर ली।

कुछ दिन बीतनेपर उसके छोटे पुत्र पुरन्दरने आत्मीय जनोंके द्वारा उत्साहित किये जानेपर अपनी भुजाओंके और सैन्यबलके घमण्डमें आकर अपने बड़े भाई भास्करदेवका राज्य छीन लिया। तब भास्करदेवने अपने परिजनोंके साथ आकर बलवाहनपुरमें अपना लश्कर डाला और स्वयं अपनी पटरानी मणिमालाके साथ सोमदत्त मुनिकी वन्दना करनेके लिए आया। मुनिके चरणोंमें पृथ्वीके कमलके समान उस बालकको देखकर वह बोला—'अरे! बड़ा आश्चर्य है। विना रत्नाकरके रत्न, विना जलाशयके कमल, विना ईंधनके तेजका पुंज, विना सूर्यके उग्रकान्तिकारक और विना चन्द्रमाके मनोहर यह बालक यहाँ कहाँसे आया? नवपल्लवके समान इसका लावण्य हाथके स्पर्शसे भी म्लान होने वाला है। किन्तु इस अत्यन्त गर्म पहाड़पर वज्रसे बने हुए के समान क्रीड़ा करता हुआ सुखसे ऐसा लेटा है मानो माताकी गोदमें ही है।

'प्रियतमे! तुम्हें पुत्रकी वांछा थी। भगवान्‌के प्रसादसे तुम्हें यह सर्व लक्षणोंसे पूर्ण पुत्र प्राप्त हुआ है। इसका नाम वज्रकुमार रखते हैं। यह हमारे वंशको समुन्नत करेगा।' ऐसा कह

१. –नुगतः आ०। २. समुद्रं विना। ३. इन्धनं विनाऽग्नि। ४. न इलामातुलम् अनिलामातुलम्–नचन्द्रम्।

यिधामपात्रम् पुत्र इत्यभिधाय विधाय च यथावत्तस्य भगवतः पर्युपासनं पुनरत एव[1] महतोऽधिगतैतदपत्यवृत्तान्तो[2] भावपुरमनुससार।

भवति चात्र श्लोकः—

> अन्तःसारशरीरेषु हितायैवाहितेहितम्।
> किं न स्यादग्निसंयोगः स्वर्णत्वाय तदश्मनि[3] ॥२०७॥

*इत्युपासकाध्ययने वज्रकुमारस्य विद्याधरसमागमो नाम पञ्चदशः कल्पः।*

पुनर्बालभावाच्छोणच्छायकायः[4] कङ्केल्लिपल्लव इव धातकीप्रसवस्तबक इवारुणमणिकन्दुक इव च बन्धूनामानन्दनिरीक्षितामृतपीथमन्थरितमुखः[5] सखेलं करपरम्परया संचार्यमाणः क्रमेणोत्तानशयदरहसितजानुचङ्क्रमणगद्गदालापस्पष्टक्रियापञ्चकस्थामवस्थामनुभूय मरुमार्ग[6] इव छायापादपेन, छायापादप इव जलाशयेन, जलाशय इव कमलाकरेण, कमलाकर इव कलहंसनिवहेन, कलहंसनिवह इव रामासमागमेन, रामासमागम इव च स्मरलीलायितेन, तरुणीजनमनोमृगप्रमदवनेन यौवनेनालंचक्रे।

तदनु बाढं प्ररूढप्रौढयौवनावतारसारो वज्रकुमारः पितुर्मातुश्च वंशनिवेशानवद्याभिर्विद्याभिः प्रवलितप्रतापगुणः प्राप्तखचरलोकाधिक्यः सुवाक्यमूर्तिनामधामस्य मामस्य मदनमदपण्यतारुण्यलावण्यारण्यवनदेवतावतरवसुमतीमिन्दुमतीं दुहितरं परिणीय मणिकुण्डल-रत्नशेखर-माणिक्य-शिखण्ड-किरीट-कीर्तन-कौस्तुभ-कर्णपूरपुरःसरैर्नभश्चरकुमारैरनुसृतस्तं पूर्वापरावारपारतरङ्गदन्तुरकन्दराधरं क्रीडारसवर्धनोद्धुरं विजयार्धमहीधरम-

कर उसने मुनिकी उपासना की और उनसे बच्चेका सब वृत्तान्त जानकर नगरको लौट आया।

किसीने ठीक कहा है—

'जिनके अन्तरंगमें कुछ सार है उनका अहित चाहना भी हितके लिए होता है। देखो, स्वर्णपाषाणको आगमें तपानेसे क्या वह सोना नहीं हो जाता ॥२०७॥

*इस प्रकार उपासकाध्ययनमें वज्रकुमारका विद्याधरसे समागमका वर्णन करनेवाला पन्द्रहवाँ कल्प समाप्त हुआ।*

बचपनके कारण वज्रकुमारके शरीरकी कान्ति अशोक वृक्षके नये पत्तोंकी तरह या धतूरेके अथवा लालमणिकी गेंदकी तरह प्रतीत होती थी। घरके आदमी उसे बड़े प्यारसे पुष्प गुच्छकी तरह देखते थे और वह हाथों हाथ घूमता था। पहले वह ऊपरको मुख किये लेटा रहता था, कुछ बड़ा होनेपर उसनेमुसकराना शुरू किया। फिर घुटनोंके बल चलने लगा। फिर तुतुलाते हुए बोलना शुरू किया। फिर स्पष्ट बोलने लगा। इस तरह क्रमसे पाँच अवस्थाओंको बिताकर वह बड़ा हुआ। और जैसे मरु भूमिका मार्ग छाया देने वाले वृक्षसे शोभित होता है, छाया वृक्ष सरोवरसे शोभित होता है, सरोवर कमलोंसे शोभित होता है, कमलसमूह राजहंसोंसे शोभित होता है, राजहंसोंका समूह स्त्रीके समागमसे शोभित होता है और स्त्रीसमागम काम विलाससे शोभित होता है वैसे ही वज्रकुमारका शरीर यौवनसे सुशोभित हो गया।

उसके बाद यौवनके भर उठनेपर पितृवंश और मातृवंशसे प्राप्त हुई निर्दोष विद्याओंके प्राप्त होनेसे उसका प्रताप और भी बढ़ गया और उसने अपने मामाकी लड़की इन्दुमतीसे विवाह

---

१. योगावसाने एतस्मात् सोमदत्तगुरोः। २. ज्ञातबालकवृत्तान्तः। ३. स्वर्णपाषाणे। ४. रक्त। ५. पीथं बालस्य देयं नवनीतादि। ६. यथा मरुस्थलं छायावृक्षेण शोभते तथाऽयं यौवनेनालंचक्रे।

ध्यास्य विरविहायश्चरीपरिमिलनम्लानमृणालजलेजमशोकदलशय्यादयितासाद्यविद्याधरीसुरतपरिमलबहलमिदमुपवनलतास्थानं कन्दुकविनोदपरिणताम्बरचरीचरणालक्तकाङ्कितमंदस्तमालमूलालवालालयमेवमिदं रमणीयमेतन्मनोहरमदश्च सुन्दरमटनीप्रतटमिति निध्यायन् समाचरितस्वैरविहारः पुनः प्राप्तहिमवद्गिरिप्राग्भारः खेचरीलोचनचन्द्रस्य पुरेन्द्रस्याङ्कवतीयुवतिप्रीतिधाम्नो गरुडवेगनाम्नो विद्याधरपतेरतिशयरूपनिरूपणपात्रीं प्रियपुत्रीं पवनवेगानामसङ्कां प्रालेयाचलमेखलाखलतिकलतालयनिलीनाङ्गां बहुरूपिणीं नाम निषद्यां विद्यामाराधयन्तीमनयैवं विघ्नविघ्नया जाताजगररूपया विद्यया निगीर्णवदनामुपलक्ष्य परोपकारविचक्षणस्तार्क्ष्यविद्यया तमेतत्कल्पनाविलतालुं मार्याशयालुं वित्रासयामास।

पवनवेगा तत्प्रत्यूहाभोगापगमानन्तरमेव विद्यायाः सिद्धिं प्रपद्य 'अवश्यमिह जन्मन्ययमेव मे कृतप्राणत्राणावेशः प्राणेशः' इति चेतस्यभिनिविश्य पुनरस्यैव नीहारमहीधरस्य नितम्बतीरिणीपर्यन्ते सूर्यप्रतिमां समाश्रितवतो भगवतस्तपःप्रभावसंपादितसमस्तसत्त्वव्यापदन्तस्य संयतस्य पादपीठोपकण्ठे पठतस्तवेयं सेत्स्यतीत्युपदेशावेशाभिनवमाराय वज्रकुमाराय गगनगमनाङ्गनाजीवितभूताममिमतार्थसाधनपर्याप्तिं प्रज्ञप्तिं विद्यां वितीर्य निजनगर्यां पर्यटत्। वज्रकुमारस्तथैव तत्सूरिसमक्षं फेनमालिनीकूले विद्यां प्रसाध्यासाध्यसाधनप्रवृद्धपराक्रमस्तमक्रमविक्रमाल्पीभूतदैवं पुरन्दरदेवं पितृव्यमव्याजमुच्छिद्य सद्यस्तां विजयोत्सवपरम्परावतीममरावतीं पुरमात्मपितरमखिलखचराचरितचरणसेवं भास्करदेवं निवेश्य वश्येन्द्रियः स्वयंवरव्याजेन विहिताभिलषितकान्तसंगामनङ्गसंगसंगतशृङ्गारसुभगां पवनवेगामपराश्चाम्बरचरपतिवरा विवाह्य महाभागगृह्यो विहायश्चरचित्तचिन्तामात्रायासैस्तैस्तैर्विलासैः कालमतिवाहयामास।

---

किया। एक बार वज्रकुमार अनेक विद्याधर कुमारोंके साथ विजयार्ध पर्वतकी शोभा देखता हुआ घूम रहा था। घूमते-घूमते वह हिमवान पर्वतपर जा पहुँचा। वहाँ विद्याधरोंके स्वामी गरुडवेग की अतिशय रूपवती कन्या पवनवेगा बहुरूपिणी विद्या साधती थी। वज्रकुमारने देखा कि विघ्न डालनेकी भावनासे वह विद्या अजगरका रूप बनाकर उस कन्याको निगला ही चाहती है। उस परोपकारीने तुरन्त ही गरुड़विद्याके द्वारा उसके मुखको चीर दिया। इस विघ्नके दूर होते ही पवनवेगाको विद्या सिद्ध हो गई। उसने संकल्प किया कि इस जन्ममें मेरे प्राणोंकी रक्षा करने वाला यही युवक मेरा स्वामी है। यह संकल्प करके उसने वज्रकुमारको इष्ट वस्तुकी सिद्धि करने वाली प्रज्ञप्ति नामकी विद्या प्रदान की और कहा कि इसी पहाड़के किनारेसे बहने वाली नदीके पास आतापनयोगसे स्थित, मुनि महाराजके चरणोंके समीपमें बैठकर पढ़ने मात्रसे तुम्हें यह विद्या सिद्ध हो जायेगी। यह कह कर वह अपने नगरको लौट गई। वज्रकुमारने उसके कहे अनुसार फेनमालिनी नदीके किनारे आचार्यके समक्ष विद्या सिद्ध की। इस विद्याके प्रभावसे उसमें असाध्य कामको भी साधनेकी शक्ति आ गई और इससे उसका पराक्रम और भी बढ़ गया। तब उसने अपने चाचा पुरन्दरदेवको मारकर अमरावती नगरीके राज्यासनपर अपने पिता भास्करदेवको बैठाया और स्वयंवरमें पवनवेगाके साथ अन्य विद्याधर कुमारियोंसे विवाह करके आनन्दपूर्वक दिन बिताने लगा।

---

१. विहायश्चरी–आ०। विरहिणी। २. अशोकदलशय्यायां दयितेन भर्त्रा आसाद्या प्राप्या या विद्याधरी। ३. चिह्नितं। ४. स्थानम्। ५. -मूलालवलय–अ० ज०। ६. पर्वत। ७. विघ्नविघ्न–ब०। ८. मायाजगरसर्पम्। ९. नदी। १०. विद्याधरी।

अन्यदा पुनरिष्टदुष्टज्ञातिप्रज्ञावज्ञाभ्यामात्मनः परैधितत्वमवबुध्य निजान्वयनिश्चये सति शारीरेषूपचारेषु प्रवृत्तिरन्यथा निवृत्तिरित्याचरितसंगरस्ताभ्यां महामुनिमाहात्म्यमन्त्रवित्रासितदुरितनिशाचरायां मथुरायां तपस्यतः सोमदत्तस्य भगवतः सनीडे नीतस्तदङ्गमुद्राप्रायमात्मकायमवसाय संजातानन्दनिकायस्तावुभावप्युपनेतारौ मातापितरौ सादरमुक्तियुक्तिभ्यां प्रतिबोध्यावधीरितोभयग्रन्थो निर्ग्रन्थश्चारणर्द्धिवृद्धिः समपादि ।

भवति चात्रार्या—

तृणकल्पः श्रीकल्पः कान्तालोकश्चितो चितालोकः ।
पुण्यर्जनश्च स्वजनः कामविदूरे नरे भवति ॥२०८॥

*इत्युपासकाध्ययने वज्रकुमारस्य तपोग्रहणो नाम षोडशः कल्पः ।*

पुनर्महामहोत्सवोत्साहितातोद्यवादनादमेदुरप्रासादकन्दरायामेतस्यामेव मथुरायां किल गोचराय चारणऋद्धियुगलं नगरमार्गे संगतगतिसर्गं सत् तत्र द्वित्रिपरिवत्सर पवावस्थावसरे बालिकामेकां चिल्लचिकिन लोचनसनाथमनाथामापणाङ्गणचारिणीं स्खलद्गमनविहारिणीं निरीक्ष्य प्रतीक्ष्य पश्चाच्चरः सुनन्दनाभिधानगोचरो भगवानेवमवादीत्—'अहो, दुरालोकः खलु प्राणिनां कर्मविपाकः, यदस्यामेव दशायां क्लेशाय प्रभवति' इति ।

पुरश्चारी भगवानभिनन्दननामधारी—'तपःकल्पद्रुमोत्पादनन्दन सुनन्दनमुने, मैवं वादीः ।

एक बार इष्ट बन्धु-बान्धवोंके कहनेसे और दुष्ट जनोंके अनादरसे, उसे पता चला कि मैं भास्करदेवका पुत्र नहीं हूँ, बल्कि उन्होंने मेरा पालन किया है, तो उसने प्रतिज्ञा की कि अपने वंशका निश्चय होजानेपर ही मैं अन्न-जल ग्रहण करूँगा अन्यथा मेरे सबका त्याग है। तब उसके पालक माता-पिता उसे मथुरा नगरीमें तपस्या करते हुए सोमदत्त मुनिके पास ले गये। मुनिकी शारीरिक आकृतिके तुल्य ही अपनी आकृतिको देखकर उसे बड़ा आनन्द हुआ। और उसने उन दोनों माता-पिताको समझा-बुझाकर अन्तरंग और बहिरंग परिग्रहका त्याग कर दिया और निर्ग्रन्थ साधु बनकर चारणऋद्धिका स्वामी हो गया।

किसीने ठीक कहा है कि 'जो मनुष्य काम-विकारसे दूर है उसके लिए लक्ष्मी तृणके समान है, एकत्र हुआ स्त्री-समुदाय चिताके आलोक समान हैं और कुटुम्बीजन राक्षसोंके समान हैं ॥२०८॥'

*इस प्रकार उपासकाध्ययनमें वज्रकुमारके तप ग्रहण करनेका वर्णन करनेवाला सोलहवाँ कल्प समाप्त हुआ।*

एक बार मथुरा नगरीमें चारणऋद्धिके धारी दो मुनि मार्गमें चले जाते थे। उसी मार्गमें दो-तीन वर्षकी एक अनाथ बालिका जिसकी आँखें मैलसे भरी थीं, इधर-उधर भटकती माँगती खाती डोलती थी। उसे देखकर पीछे चलने वाले सुनन्दन नामके मुनि बोले—'जीवोंके कर्मका विपाक कोई नहीं जानता, देखो तो बेचारी यह बालिका इतनी-सी उम्रमें ही कष्ट भोगती है।'

यह सुनकर आगे चलने वाले अभिनन्दन मुनि बोले—'सुनन्दन मुनि! ऐसा मत कहो।

१. ज्ञातिमध्ये ये इष्टास्ते प्रज्ञां ददति, ये दुष्टास्ते निरादरं कुर्वन्ति। २. परपोषितत्वं। ३. स्नानभोजनादौ। ४. प्रतिज्ञः। ५. पापान्येव राक्षसाः यत्र। ६. ज्ञात्वा। ७. मृतकचितासदृशः। ८. राक्षसः। ९. आहारार्थम्। १०. वर्षद्वित्रिसमये। ११. दूषित।

यद्यपीयं गर्भसंभूता सती राजश्रेष्ठिपदप्रभूतं समुद्रदत्तं पितरं जातमात्रा तद्वियोगदुःखोपसदां धनदां मातरं प्रवर्धमाना च बन्धुजनमकाण्ड एव दशमीं दशामानीय इदमवस्थान्तरमनुभवन्ती तिष्ठति, तथाप्यनया प्रौढयौवनयास्य मथुरानाथस्यौर्विलादेवीविनोदावसथस्य पूतिकवाहनस्य महीनस्याग्रमहिष्या भवितव्यम्' इत्यवोचत्। एतच्च तत्रैव प्रस्तावे पिण्डपाताय हिण्डमानः शाक्यभिक्षुरुपश्रुत्य 'नान्यथा मुनिभाषितम्' इति निर्विकल्पं संकल्प्य, स्वीकृत्य चैनामभिकामाहितविहारवसतिकामभिलषितानुहारैराहारैरवीवृधत्। जुहाव च बुद्धदासीति परिजनपरिहासतन्त्रेण गोत्रेण।

ततो गतेषु केषुचिद्वर्षेषु भ्रमरकभङ्गाभिनयनभरते भ्रूविभ्रमारम्भोपाध्यायस्थानिनि लोचनविचारचातुर्याचार्ये चतुरोक्तिचातुरीप्रचारगुरुणि बिम्बाधरविकारसौन्दर्यकादम्बरीयोगे निम्नोन्नतप्रदेशप्रकाशनशिल्पिनि मनसिजगजमदोद्दीपनपिण्डिपण्डिते शृङ्गारगर्भगतिरहस्योपदेशिनि समस्तभुवनमनोमोहनसिद्धौषधे प्रतिदिनप्रादुर्भावसंविधे सति यौवने सा रूपसंपन्महीयसी बुद्धदासी सोत्तालमुत्तुङ्गतमङ्गशृङ्गोत्सङ्गसंगता तं श्रमणिकया कृतविहारोपान्तागमनं पूतिकवाहनं राजानमदर्शत्। राजा च ताम्। राजा—

> 'अलकवलयावर्तभ्रान्ता विलोचनवीचिका
> प्रसरविधुरा मन्दोद्योगा स्तनद्वयसैकते।
> त्रिवलिवलनश्रान्ता नाभौ पुनश्च निमज्जना-
> दिह हि सरिति प्रायेणैवं मतिर्मम वर्तते ॥२०६॥

यद्यपि जब यह बालिका गर्भमें आई तो राजश्रेष्ठीके पदपर प्रतिष्ठित इसका पिता समुद्रदत्त मर गया, जब यह जन्मी तो पतिके वियोगमें इसकी माता धनदा चल बसी, बड़ी हुई तो असमयमें ही बन्धु-बान्धव मर गये और अब यह इस हालतमें है। तथापि युवती होनेपर यह इसी मथुरा नगरीके राजा पूतिकवाहनकी पटरानी होगी।' वहींपर भोजनके लिए घूमते हुए बौद्धभिक्षुने इस बातचीतको सुना। उसने सोचा कि मुनि झूठ नहीं बोलते। अतः वह उस बालिकाको अपने विहारमें लेगया और उसकी रुचिके अनुसार खान-पान देकर उसे बड़ा किया। सब लोग हँसीमें उसे बुद्धदासी कहते थे। धीरे-धीरे उसमें यौवनका प्रादुर्भाव हो चला। उसकी भ्रुकुटियोंमें विलास आ चला, लोचनोंमें कुछ अजीब चंचलता दृष्टिगोचर होने लगी, उसकी बातोंमें भी चातुर्य झलकने लगा, ओष्ठोंपर अपूर्व मादकता छा गई, अंग-प्रत्यङ्गमें यौवनकी शिल्पकलाका चातुर्य दिखाई पड़ने लगा, चालमें मादकता आगई। कुछ वर्ष बीतनेपर एक दिन वह रूपवती बुद्धदासी विहारके एक ऊँचे शिखरपर चढ़ी हुई थी। घूमते-घूमते राजा पूतिकवाहन उस विहारके करीब आ गया। दोनोंने एक दूसरेको देखा।

देखते ही राजा काममोहित हो गया और विचारने लगा—'इस स्त्रीरूपी नदीमें प्रायः मेरी मति इस प्रकारकी हो रही है—पथम तो वह उसके कुटिल केश पाशके गोलाकार जूड़ेरूपी भँवरमें पड़कर भ्रान्त हो गई, फिर नेत्ररूपी लहरोंके तूफानमें पड़कर पीड़ित हुई, उसके बाद दोनों स्तनरूपी बालुकामय किनारों पर पहुँचकर उसकी दौड़धूप शिथिल पड़ गई, पुनः उदरकी तीन रेखाओंमें भ्रमण करनेसे थक गई और पुनः नाभिमें डूब जानेसे क्लान्त हो गई ॥ २०६ ॥

१. मरणावस्थाम्। २. भिक्षार्थं। ३. श्रुत्वा। ४. सदृशैः। ५. आकारितवान्। ६. नाम्ना। ७. अलक। ८. मदिरा। ९. समीपे। १०. कल्लोल। ११. स्त्रीनद्यां मम मतिरीदृशी वर्तते।

इति विचिन्त्य, चेतोभूविभ्रमप्रारम्भं निवार्यावधार्य च, 'किमियं[1] विहितविवाहोपचारा, किं वाद्यापि पतिंवरा' इति भिक्षूनापृच्छ्य तत्र 'द्वितीयपक्षे[2] सर्वथास्मत्पक्षे कर्तव्या' इति समर्पिताभिलाषमाप्तपुरुषं प्रेष्य रणरणकजडान्तःकरणः[3] शरणमगात्[4] । आप्तपुरुषोऽप्यग्रमहिषीपदपणबन्धेन[5] साध्यसिद्धिं विधाय स्वामिनं तत्समागमिनमकरोत् ।

भवति चात्रार्या—

> पुण्यं वा पापं वा यत्काले जन्तुना पुराचरितम् ।
> तत्तत्समये तस्य हि सुखं च दुःखं च योजयति ॥२१०॥

*इत्युपासकाध्ययने बुद्धदास्याः पूतिकवाहनवरणो नाम सप्तदशः कल्पः ।*

अथ समायाते भव्यजनानन्दसंपादितकर्मणि नन्दीश्वरपर्वणि तया पतिप्रणयप्रेयस्या बुद्धदास्या प्रतिचातुर्मास्यमौर्विलादेव्याः स्यन्दनविनिर्गमेण भगवतः सकलभुवनोद्धरणस्थितेर्जिनपतेर्महामहोत्सवकरणमुत्सेत्तुमिच्छन्त्या[6] शुद्धोदनतनयस्य[7]ष्टार्थमष्टाह्ना सकलपरिवारानुगतमेतदुचितमुपकरणजातमवनिपतिर्याचितस्तथैव प्रत्यपद्यत । ऊर्विलादेव्यपि सुभगभावात्सपत्नीप्रभवं दौर्जन्यमनन्यसामान्यमप्रतीकारमाकलय्य सोमदत्ताचार्यमुपसद्य[8] 'भदन्त, यद्येतस्मिन्द्वित्रिदिनभाविन्यष्टाहामहे पूर्वक्रमेण जिनपूजार्थे मथुरायां मदीयो रथो भ्रमिष्यति, तदा मे देहस्थितिहेतुषु वस्तुषु साभिलाषं मनः, अन्यथा निरभिलाषम्' इति प्रतिजिज्ञासमाना[9]

---

फिर उसने अपने चित्तमें उठते हुए बवण्डरको जिस किसी तरह रोककर आगेका मार्ग निर्धारित किया । एक विश्वस्त पुरुषको बुलाकर उससे अपने मनकी अभिलाषा बतलाकर वह बोला—'तुम भिक्षुके पास जाकर यह पूछो कि यह कन्या विवाहित है या अविवाहित ? यदि अविवाहित हो तो उसे हमारे लिए तैयार करो ।' उस विश्वस्त पुरुषने राजमहिषीका पद प्रदान करनेकी प्रतिज्ञा करके उसका राजाके साथ विवाह करा दिया ।

किसीने ठीक कहा है—

'जीवने पूर्वजन्ममें जो पुण्य या पाप किया है, समय आनेपर वह उसे अवश्य सुख या दुःख देता है' ॥२१०॥

*इस प्रकार उपासकाध्ययनमें बुद्धदासी द्वारा पूतिकवाहनके वरणका वर्णन करनेवाला सत्रहवाँ कल्प समाप्त हुआ ।*

इसके बाद भव्यजनोंको आनन्द देनेवाला नन्दीश्वर पर्व आया । इस पर्वमें पूतिकवाहन राजाकी रानी ऊर्विलादेवी बड़ा भारी महोत्सव करके जिनेन्द्रदेवका रथ निकालती थी । बुद्धदासीने उसके महोत्सवको नष्ट-भ्रष्ट करनेके लिए बुद्धदेवकी पूजाका आयोजन किया और उसके योग्य सब सामग्री राजासे माँगी । राजाने सब सामान दे दिया । जब ऊर्विलाको अपनी सौतकी इस असाधारण दुर्जनताका पता चला तो उसे इसका कोई प्रतीकार न सूझा । तब वह सोमदत्त आचार्यके पास गई और बोली—'भगवन्, यदि इस दो-तीन दिनमें आनेवाले अष्टाह्निकापर्वमें पुराने क्रमके अनुसार जिन भगवानकी पूजाके निमित्तसे मेरा रथ मथुरामें निकलेगा तो मैं अन्न-जल ग्रहण करूँगी, नहीं तो मेरा त्याग है ।' यह सुनकर सोमदत्तने उसके मनोरथको पूर्ण करनेकी भावनासे मुनि वज्रकुमारकी ओर देखा । वज्रकुमारने उसे समझाते हुए कहा—'सम्यग्दृष्टि ललनाओंमें अग्रणी

---

१. कन्या । २. चेत् कन्या भवति तर्हि ममाधीना कर्तव्येति । ३. उद्वेग । ४. गृह । ५. प्रतिज्ञया । ६. उच्छेदनकर्तुं । ७. बुद्धस्य । ८. प्राप्य । ९. प्रतिज्ञां कर्तुमिच्छन्ती ।

तेन सोमदत्तेन भगवता तन्मनोरथसमर्थनार्थमवलोकितवक्त्रेण वज्रकुमारेण साधुना साधु संबोधिता 'मातः, सम्यग्दृशामेणीदृशामवाप्तप्रथमकथे[1], अलमलमावेगेन। यतो न खलु मयि तव समयसवित्र्याश्चिन्तके[2] पुत्रके सति भविताऽर्हतामर्हणीयायाः प्रत्यवायः[3]। तत्स्वस्थं पूर्वस्थित्यात्मस्थाने स्थातव्यम्' इति हृद्यमनवद्यममृषोद्यं च निगद्य, आसाद्य[4] च द्युगतिविद्याधरपुरं महामुनितया बान्धवधिषणतया च निखिलेन भास्करदेवमुख्येनाम्बरचरचक्रेण क्रमशः कृताभ्युत्थानादिक्रियः सप्रश्रयमागमनायतनमापृष्टः[6] स्पष्टमाचष्ट।

तदनन्तरमानन्ददुन्दुभिनादोत्तालक्ष्वेलितमुखरमुखमण्डलैः[7], सामयिकालंकारसारसज्जि[8]तगजवाजिविमानगमनप्रचलत्कर्णकुण्डलैः, अनेकानणुमणिकिङ्किणीजालजटिलदुकूलकल्पि[9]तपालिध्वजराजिविराजितभुजपञ्जरैः[10], करिमकरसिंहशार्दूलशरभकुम्भीर[11]शफर[12]शकुन्तेश्वर[13]पुरःसराकारपताकासन्तानस्तिमितकरैः, मानस्तम्भस्तूपतोरणमणिवितानदर्पणसितातपत्रचामरविरोचनचन्द्र[14]भद्रकुम्भ[15]संभृतशयैः[16], अतुच्छदेवच्छन्दाविच्छिन्न[17]कर्णीरथ[18]स्यन्दनद्विपतुरगनरनिकीर्णसैन्यनिचयैः, सजयघण्टापटुपटहकरटामृदङ्गशङ्खकाहलत्रिविलतालझल्लरीभेरिभम्भादिवाद्यानुगतगीतसंगताङ्गनाभोग[19]सुभगसंचारैः, कुब्जवामनकिरातकितवनटनर्तकबन्दिवाग्जीवनविनोदानन्दितदिविजमनस्कारैः, स[20]खेलखेचरसहचरीहस्तविन्यस्तस्वस्तिकप्रदीपधूपनिप[21]प्रभृतिविचित्रार्चनोपकरणरमणीयप्रसरैः, पिष्टातकपटवासप्रसूनोपहाराभिरामरमणीनिकरैः, अपरैश्च तैस्तैर्विधृतपूजापर्यायपरिवारैर्विहायोविहारैः[22] सह तं वज्रकुमारभगवन्तमम्बरादवतरन्तमुत्प्रेक्ष्य [23]'भिक्षुदीक्षापटीयसी पुण्यभूयसी खलु बुद्धदासी, यस्याः सुगतस[24]-

माता ! इतनी क्यों घबराती हो ? अपनी धर्ममाताकी चिन्ता करनेवाले मुझ पुत्रके होते हुए जिन-भगवान्‌की पूजामें विघ्न नहीं हो सकता। अतः निश्चिन्त होकर अपने महलोंमें जाकर बैठो।'

इस प्रकार अपने हृदयकी सच्ची बातको कहकर वज्रकुमार मुनि विद्याधर भास्करदेवके नगरमें पहुँचे। एक तो महामुनि होनेसे दूसरे बन्धुभाव होनेसे भास्करदेव वगैरह सभी विद्याधरोंने उनका सत्कार किया और विनयपूर्वक उनके आनेका कारण पूछा। वज्रकुमारने सब समाचार कहा।

सुनते ही सब विद्याधर उनके साथ मथुरा चलनेको तैयार हो गये। खूब जोर-जोरसे बाजे बजने लगे। हाथी, घोड़े और विमान सामयिक अलंकारोंसे सजा दिये गये। विद्याधरोंने बड़ी-बड़ी मणियोंकी घंटियोंसे सुशोभित ध्वजाएँ अपने हाथोंमें ले लीं। कुछके हाथोंमें हाथी, मगर, सिंह आदिके आकारोंसे चित्रित पताकाएँ थीं। कुछके हाथोंमें मानस्तम्भ, स्तूप, तोरण, दर्पण, छत्र, चमर, शृङ्गार आदि थे। जय-जयकारके साथ घण्टा, नगारा, मृदंग, शंख, वीणा, झाँझ आदि बाजे बजने लगे और उनके स्वरके साथ स्त्रियाँ गाने लगीं। नट लोग कुबड़े, बौने आदिका रूप बनाकर नाचने लगे, भाटोंने स्तुति-गान करना प्रारम्भ कर दिया। विनोदकी लहरें उठ पड़ीं। विद्याधरोंने अपनी-अपनी स्त्रियोंके साथ हाथोंमें स्वस्तिक, दीप, धूपघट आदि पूजनकी सामग्री ले ला। स्त्रियोंके हाथ केशरका चूर्ण, पुष्प आदि उपहारोंसे अलंकृत थे। इस प्रकार पूजनकी विविध सामग्री लेकर सब विद्याधर बड़े उत्सवके साथ वज्रकुमार मुनिके पीछे-पीछे चल दिये।

१. सम्यक्त्वसहितानां स्त्रीणां मध्ये धुरि वर्णनीये। २. जैनजनमातुः। ३. भविष्यति कोऽपि विघ्नः पूजायाः। ४. प्राप्य। ५. द्युगत्या आकाशगमनेन। ६. कारणं। ७. हस्तमुखसंयोगजो ध्वनिः। ८. यात्रोचित। ९. रचित। १०. लघुध्वज। ११. जलचरविशेषः। १२. मत्स्य। १३. गरुड। १४. सूर्य। १५. पूर्णकुम्भ। १६. हस्तैः। १७. निरन्तर। १८. शिविका। १९. शरीर। २०. सक्रीडा। २१. घट। २२. विद्याधरैः। २३. बौद्ध। २४. बुद्धपूजा।

पर्यासमये समायातं सकलमेतत्सुरसैन्यम्' इति धृतधिषणे पौरजनान्तःकरणे सति स भगवान्गगनगमनानीकैः साकमौर्विलानिलये निलीय[1] सावष्टम्भमष्टाह्नीमथुरायां[2] चक्रचरणं[3] परिभ्रमय्यार्हत्प्रतिबिम्बाङ्कितमेकं स्तूपं तत्रातिष्ठिपत्। अत एवाद्यापि तत्तीर्थं देवनिर्मिताख्यया प्रथते[4]। बुद्धदासी दासीवासीद्भग्नमनोरथा।

भवति चात्र श्लोकः—

ऊर्विलाया महादेव्याः पूतिकस्य महीभुजः।
स्यन्दनं भ्रमयामास मुनिर्वज्रकुमारकः ॥२११॥

*इत्युपासकाध्ययने प्रभावनविभावनो नामाष्टादशः कल्पः।*

अर्थित्वं भक्तिसंपत्तिः प्रयुक्तिः [प्रियोक्तिः] सत्क्रियाविधिः।
सधर्मसु च सौचित्यकृतिर्वत्सलता मता ॥२१२॥
स्वाध्याये संयमे सङ्घे गुरौ सब्रह्मचारिणि[6]।
यथौचित्यं कृतात्मानो विनयं प्राहुरादरम् ॥२१३॥
आधिव्याधिनिरुद्धस्य निरवद्येन कर्मणा।
सौचित्यकरणं प्रोक्तं वैयावृत्यं विमुक्तये ॥२१४॥

मथुरा नगरीमें आकाशसे नीचे उतरते हुए इन विद्याधरोंको देखकर पुरवासी जनोंने समझा कि 'बुद्धदासी बड़ी पुण्यात्मा है उसीकी बुद्धपूजामें सम्मिलित होनेके लिए यह सब देवगण आये हैं। किन्तु वज्रकुमार मुनि विद्याधरोंकी इस सेनाके साथ ऊर्विला रानीके महलमें उतरे और उन्होंने अष्टाह्निका-पर्वमें मथुरामें रथयात्रा कराकर जिन-बिम्बसे सुशोभित एक स्तूपकी वहाँ स्थापना की। इसीसे आज भी वह तीर्थ 'देवनिर्मित' कहा जाता है। यह सब देखकर बुद्धदासीका मनोरथ भग्न हो गया।

इस विषयमें एक श्लोक है। जिसका भाव इस प्रकार है—

वज्रकुमार मुनिने राजा पूतिककी रानी महादेवी ऊर्विलाके रथका विहार कराया ॥२११॥

*इस प्रकार उपासकाध्ययनमें प्रभावना अंगका वर्णन करनेवाला अठारहवाँ कल्प समाप्त हुआ।*

*[ अब वात्सल्य अंगको कहते हैं— ]*

धर्मात्मा पुरुषोंके प्रति उदार होना, उनकी भक्ति करना, मिष्ट वचन बोलना, आदर सत्कार तथा अन्य उचित क्रियाएँ करना वात्सल्य है ॥२१२॥

स्वाध्याय, संयम, संघ, गुरु और सहाध्यायीका यथायोग्य आदर-सत्कार करनेको कृती पुरुष विनय कहते हैं ॥२१३॥

जो मानसिक या शारीरिक पीड़ासे पीड़ित हैं, निर्दोष विधिसे उनकी सेवा-शुश्रूषा करना वैयावृत्य कहा जाता है। यह वैयावृत्य मुक्तिका कारण है ॥२१४॥

---

१. अवतीर्य। २. अष्टाह्नी उपलक्षितायाम्। ३. रथम्। ४ प्रकाशते। ५. सौमनस्यम्। 'आदृतिर्व्यावृतिर्भक्तिश्चाटूक्तिः सत्कृतिः कृतिः। सधर्मसु च सौचित्तीकृतिर्वात्सल्यमुच्यते–।' धर्मरत्ना० प० ७३ उ०। 'भक्तिसंपत्तिरर्थित्वमिष्टोक्तिः सत्क्रियाविधिः। स्वधर्मस्वक्षिसौचित्तीकृतिर्वात्सल्यमूचिरे ॥३॥ –दानशासन, पृ० २७५। ६. समानशीले। 'स्वाध्याये संयमे धर्मे मुनौ वा धर्मबान्धवे। प्रतिपत्तिस्त्रिधा प्राहुर्विनयं विनयान्विताः ॥५४॥ व्याध्यादिना निरुद्धस्य निरवद्यो विधिर्महान्। विधेयो धर्मताधारैरौषधाद्यैः स्ववस्तुभिः ॥५५॥–प्रबोधसार

जिने जिनागमे सूरौ तपःश्रुतपरायणे।
सद्भावशुद्धिसंपन्नोऽनुरागो भक्तिरुच्यते ॥२१५॥
चातुर्वर्ण्यस्य संघस्य यथायोग्यं प्रमोदवान्।
वात्सल्यं यस्तु नो कुर्यात्स भवेत्समयी कथम् ॥२१६॥
तद्व्रतैर्विद्यया[1] वित्तैः शारीरैः श्रीमदाश्रयैः[2]।
त्रिविधातङ्कसंप्राप्तानुपकुर्वन्तु[3] संयतान् ॥२१७॥

---

जिन-भगवान्में, जिन-भगवान्के द्वारा कहे हुए शास्त्रमें, आचार्यमें और तप और स्वाध्यायमें लीन मुनि आदिमें विशुद्ध भावपूर्वक जो अनुराग होता है उसे भक्ति कहते हैं ॥२१५॥

जो हर्षित होकर चार प्रकारके संघमें यथायोग्य वात्सल्य नहीं करता वह धर्मात्मा कैसे हो सकता है ॥२१६॥

इसलिए व्रतोंके द्वारा, विद्याके द्वारा, धनके द्वारा, शरीरके द्वारा और सम्पन्न साधनोंके द्वारा शारीरिक मानसिक और आगन्तुक रोगोंसे पीड़ित संयमीजनोंका उपकार करना चाहिए ॥२१७॥

**भावार्थ**—जिस प्रकार एक सच्चा हितैषी भृत्य अपने स्वामीके कार्यके लिए सदा तैयार रहता है वैसे ही धर्मके कार्योंको करनेमें सदा तैयार रहना, धर्मके अंगोंकी रक्षाके लिए अपनी जान तक लगा देना वात्सल्य है। सम्यग्दृष्टिको वात्सल्यसे परिपूर्ण होना चाहिए। किसी भी धर्मायतनपर विपत्ति आनेपर उसे तन, मन और धन लगाकर दूर करना चाहिए। हम धर्मसे तो प्रेम करें और धर्मके जो अंग हैं—जिनबिम्ब, जिनमन्दिर, जिनागम, जैन साधु, गृहस्थ वगैरह, उनके प्रति उदासीन बने रहें, तो हमारा वह धर्म-प्रेम आखिर है क्या वस्तु ? जब धर्मके अंग ही नहीं रहेंगे तो धर्म ही कैसे रह सकता है ? जैसे शरीरकी स्थिति उसके अंगों और उपांगोंकी स्थितिपर निर्भर है वैसे ही धर्मकी स्थिति उसके उक्त अंगोंके आश्रित है। अतः धर्म-प्रेमीका यह कर्तव्य है कि वह धर्मके अंगोंसे प्रेम करे—उनके ऊपर कोई विपत्ति आई हो तो उसे प्राण-पणसे दूर करनेकी चेष्टा करे। इसीसे वात्सल्य अंगका वर्णन करते हुए श्री पञ्चाध्यायीके कर्ताने लिखा है कि 'जिनबिम्ब जिनालय वगैरहमेंसे किसीके ऊपर भी घोर संकट आनेपर बुद्धिमान् सम्यग्दृष्टि सदा उसे दूर करनेके लिए तत्पर रहता है और जब तक उनमें आत्मबल रहता है, मन्त्र, तलवार और धनका बल रहता है तब तक उस संकटको न वह सुन ही सकता है और न देख ही सकता है।' आज इस प्रकारका वात्सल्य देखनेमें नहीं आता। साधर्मी भाई मुसीबतमें पड़े रहते हैं और हम देखकर भी अनदेखा कर देते हैं। साधु त्यागियोंके कष्टोंकी ओर हमारा कोई ध्यान नहीं है। अपने ही भाइयोंकी कन्याके विवाहके अवसरपर हम उससे हजारोंका दहेज माँगते हैं। कोई गरीब निराश्रय हो तो उसकी सहायता करनेकी भावना हममें नहीं होती। उनका दुःख देखकर हमारा हृदय द्रवित हो भी जाये तो भी हम उनकी सहायता नहीं करते। मौखिक सहानुभूति मात्र प्रकट करके चुप हो जाते हैं। इस तरहकी बेरुखाईसे धर्मकी स्थिति कभी भी नहीं रह सकती। अतः जो सम्यग्दृष्टि धर्मात्मा है वह सबकी यथायोग्य सेवा-शुश्रूषा करके, अपने हृदयकी भक्तिको प्रकट करता है और इस तरह वात्सल्य अंगका पालन करके अपना और दूसरोंका महान् उपकार करता है।

---

१. व्रतदानेन उपकारं कुर्वन्तु। २. उत्तमस्थानैः। ३. शारीरमानसागन्तुक।

श्रूयतामत्रोपाख्यानम्—अवन्तिविषयेषु सुधान्धः[1]सौधस्पर्द्धिशालायां विशालायां[2] पुरि प्रभावतीमहादेवोश्रितशर्मसीमा जयवर्मनामा काश्यपीश्वरः शाक्यवाक्यवारिधिविक्रान्तिनक्रेण शुक्रेण चार्वाकलोकदिवस्पतिना[3] बृहस्पतिना रुद्रमुद्रानुद्रितविवेकेन प्रह्लादकेन चानुजेनानुगतेन वेदविद्यावलिना बलिना सचिवेन चिन्त्यमानराज्यस्थितिरेकदा समस्तशास्त्राभ्यासवर्षविस्फारितसरस्वतीतरङ्गपरम्पराप्लावनपवित्रितविनेयजनमनोनलिननिकुरुम्बस्य परमतपश्चरणगर्ण[4]ग्रहणाजिह्मब्रह्मस्तम्बस्य[5] महामुनिपञ्चशतीवर्यस्य भगवतोऽकम्पनाचार्यस्य महर्द्धिजुषः सर्वजनानन्दनं नाम नगरोपवनमधितस्थुषश्चरणार्चनोपचाराय[6] राजमार्गेषु महोत्सवोत्साहोत्सेकि[7]परिजनं[8] पौरजनमभ्रंलिहगेहाग्रभागावसरे दिग्विलोकानन्दमन्दिरे स्थितः समवलोक्य 'कोऽयमकाण्डे प्रचण्डः पौराणामुद्यावद्योगे नियोगः' इति वितर्कयन्, सकलसमयसंभवि[9]प्रसूनस्तिमितहस्तपल्लवान्तरालाद्वनपालात् 'देव, भवद्दर्शनोत्सुकवनदेवतालोचने भगवत्तपःप्रभावप्रवृत्तसमस्ततूर्न्मादितमेदिनीनन्दने[10] निजलक्ष्मीविलक्षयीकृतगन्धमादने पुरोपवने सद्गुणश्रीसंपादितसमूहेन[11] महता मुनिसमूहेन सर्वसत्त्वानन्दप्रदानोदाराभिधासुधाप्रबन्धावधीरितामृतमरीचि[12]मण्डलो निखिलदिक्पालमौलिमणिनायकमुकुरन्दी[13]भवत्पादनखमण्डलः पुण्यद्विपयूथबन्धनवारिरकम्पनसूरिः समायातः। तदुपासनाय चास्योज्जयिनीजनस्य महामहावह[14]श्चित्तोत्साहः' इत्याकर्ण्य प्रतूर्णमेतत्पादवन्दनोद्यतहृदयस्तत्र गमनाय तं मिथ्यात्वप्रबलतालताश्रयक[15]लिं बलिमपृच्छत्।

---

## ८ वात्सल्य अंगमें प्रसिद्ध विष्णुकुमार मुनिकी कथा

इसके विषयमें एक कथा है उसे सुनें—

अवन्ति देशकी विशाला नगरीमें जयवर्म नामक राजा राज्य करता था। उसके चार मंत्री थे शुक्र, बृहस्पति, प्रह्लाद और बलि। शुक्र बौद्ध शास्त्रमें निष्णात था, बृहस्पति चार्वाक दर्शनमें बृहस्पतिके तुल्य था, प्रह्लाद शैव था और बलि वेदविद्यामें पारंगत था।

एक बार समस्त शास्त्रोंमें पारंगत और परम तपस्वी अकम्पनाचार्य पाँच सौ मुनियोंके संघके साथ सर्वजनानन्दन नामके उपवनमें आकर ठहरे। अपने आकाशचुम्बी महलके ऊपरसे आचार्यकी चरण पूजाके लिए बड़े उत्साहके साथ राजमार्गसे जाते हुए पुरवासियोंको देखकर राजा विचारने लगा—असमयमें ये पुरवासी उद्यानकी ओर क्यों जाते हैं?

इतनेमें ही सब ऋतुओंके फल-फूल हाथमें लेकर वनपाल उपस्थित हुआ और बोला—'स्वामी! नगरके उपवनमें बड़े भारी मुनि-संघके साथ सब जीवोंको आनन्द देनेवाले, अपने अमृतमय वचनोंकी वर्षासे चन्द्रमाको भी तिरस्कृत करनेवाले अकम्पनाचार्य गुरु पधारे हैं। उनके तपके प्रभावसे आई हुई समस्त ऋतुओंने उपवनको पृथिवीका नन्दनवन बना दिया है। उनकी उपासनाके लिए उज्जैनीवासियोंका उत्साह उमड़ पड़ा है।'

यह सुनकर राजाका मन उनके चरणोंकी वन्दना करनेके लिए आतुर हो उठा। राजाने

---

१. अमृतभोजना देवाः। २. उज्जयिन्याम्। ३. इन्द्रेण। ४. -णमण-ज० द०। ५. त्रिभुवनस्य। ६. स्थितवतः। ७. गर्वित। ८. उत्सव। ९. षड्ऋतु। १०. वृक्षे। ११. सम्पादितः सम्यगूहो विचारो येन। १२. चन्द्रः। १६. दर्पण। १४. महापूजाकारकः। १५. विभीतकवृक्षम्।

सद्धर्मधुरोद्धरणर्गलिर्बलिः—'देव,

न वेदादपरं तत्त्वं न श्राद्धादपरो विधिः।
न यज्ञादपरो धर्मो न द्विजादपरो यतिः' ॥२१८॥

सन्मार्गसर्गोच्छेदकः प्रह्लादकः—

'अद्वैतान्न परं तत्त्वं न देवः शङ्करात्परः।
शैवशास्त्रात्परं नास्ति भुक्तिमुक्तिप्रदं वचः ॥२१९॥

तथा नास्तिक्याधिक्यवाक्यवाचस्पती शुक्रबृहस्पती अपि राज्ञे स्वप्रज्ञां विज्ञापयामासतुः। मनागन्तःक्षुभितमतिः क्षितिपतिः—'अहो दुर्जनतालतालम्बनकुजा[1] द्विजाः, किं ममैव पुरतो भवतां भारती प्रगल्भते, किं वा बुधप्रवेकस्य लोकस्यापि ?

सन्नीतिवसुमतीविदारणहलिर्[2]बलिः—'इलापाल[3], यदि तवास्मन्मनीषोत्कर्षविषये सेर्ष्यं मनः, तदास्तां तावदभ्यस्तशास्त्रप्रवीणप्रज्ञः परः प्राज्ञः। किं तु सर्वज्ञस्यापि वादिवादे[4] पुरस्तात्परिगृहीतविधानवद्या एव'। स्थिरप्रकृतिः क्षोणीपतिः—'यद्येवं शूराणां कातराणां च रणे व्यक्तिर्भविष्यति' इत्यभिधायानन्ददुन्दुभिरवोपार्जितपरिजनपूजोपकरणो विजयशेखरं नाम करिणमारुह्यान्तःपुरानुगमप्राह्णोऽतिवाह्य[5] नगरमार्गमुपगतारामसीमसंसर्गः[6], ततः करिणोऽवतीर्य गृहीतार्यवेषपरिकरः कतिपयाप्तपरिवारपुरःसरस्तं व्रतविधानवद्यं भगवन्तं

---

मुनियोंके पास चलनेके लिए बलि मंत्रीसे पूछा। सच्चे धर्मकी धुराको उखाड़ फेंकनेमें पटु बलि बोला—'राजन्, वेदसे उत्कृष्ट कोई तत्त्व नहीं है। श्राद्धसे बढ़कर कोई दूसरी विधि नहीं है। यज्ञसे बड़ा कोई दूसरा धर्म नहीं है और ब्राह्मणसे बढ़कर दूसरा कोई यति नहीं है' ॥२१८॥

सन्मार्गका नाशक प्रह्लाद मंत्री बोला—

'अद्वैतसे उत्कृष्ट दूसरा कोई तत्त्व नहीं है, शंकरसे बड़ा दूसरा कोई देवता नहीं है। और शैव शास्त्रसे बढ़कर दूसरा कोई भुक्ति और मुक्तिको देनेवाला शास्त्र नहीं है' ॥२१९॥

नास्तिक शिरोमणि शुक्र और बृहस्पतिने भी राजासे अपना अभिप्राय कहा। थोड़ा क्षुब्ध होकर राजा बोला—'अहो दुर्जनरूपी लताके आधारभूत द्विज वृक्षो, क्या मेरे ही सामने आपकी जबान चलती है या विद्वानोंके सामने भी कुछ बोल सकते हैं ?'

बलि बोला—'राजन्! यदि हमारी बुद्धिके वैशिष्ट्यके विषयमें आपके मनमें ईर्ष्या है तो समस्त शास्त्रोंमें प्रवीण विद्वान्की तो बात ही क्या, सर्वज्ञ भी यदि वादी हो तो उसके सामने भी हमारी विद्या निर्दोष उतरेगी।'

'यदि ऐसा है तो शूर-वीर और कायरकी पहचान रणमें ही होगी।' ऐसा कहकर उस स्थिरस्वभाव राजाने आनन्द सूचक भेरी बजवायी। उसे सुनकर उसके परिवारके लोग पूजाकी सामग्री ले-लेकर आ गये। तब राजा विजयशेखर नामके हाथीपर चढ़कर चल दिया और नगरके बाहर उद्यानकी सीमामें पहुँचते ही हाथीसे उतर पड़ा। तथा अपने

---

१. दुष्टवृषः। २. महत् हलम्। ३. भूपाल। ४. वादिनः। ५. बहिर्नगरमार्गमतिबाह्य अतिक्रम्य। ६. संप्राप्तमुनिवनसीमसंगः।

यथावदभिवन्द्य समाचरितनीचासनपरिग्रहः सविनयाग्रहं स्वर्गापवर्गमार्गस्वरूपनिरूपणपरायणः सद्धर्मसनाथां कथां प्रथयामास ।

सत्कर्मवंशप्रभिदलिर्बलिः—'स्वामिन्, कोऽयं स्वर्गापवर्गास्तित्वसंग्रहे देवस्य दुराग्रहः, यतो द्वादशवर्षा स्त्री षोडशवर्षः पुरुषः । तयोरन्योन्यमनन्यसामान्यस्नेहरसोत्सेकप्रादुर्भूतिः प्रीतिः प्रत्यक्षसमर्धिसर्गः स्वर्गो न पुनरदृष्टः कोऽपीष्टः स्वर्गः समस्ति' ।

गुणभूरिः सूरिः—'सकले प्रमाणबले बले, किं प्रत्यक्षताधिकरणमेकमेव प्रमाणं समस्ति' । नास्तिकेन्द्रमनोरथरथमातलिर्बलिः—'अखिलश्रुतधरोद्धारादिपुरुषविदुष, एकमेव' । भगवान्—'कथं तर्हि भवतः पित्रोर्विवाहाद्यस्तित्वतन्त्रम्, कथं वा तवादृश्यानां वंश्यानामवस्थितिः, स्वयमप्रत्यक्षप्रमेयत्वादाप्तपुरुषोपदेशाश्रितौ स्वपक्षपरिक्षतिः परमतोत्सवकृतिश्च ।

बलिभट्टो भट्ट इवेतस्ततमितो मदोत्कटः करटीति संकटप्रघट्टकमापतितः परं सभाजनसभाजनकरमुत्तरमपश्यन्नश्लीलमसभ्यसर्गं निरर्गलमार्गं किमपि तं भगवन्तं प्रत्युवाच । क्षितिपतिरतीव मन्दाक्षविक्षिप्तवीक्षणो मुमुक्षुसमक्षमासन्नाशिवताशनिसंघट्टं बलिभट्टं प्रतिष्ठाभङ्गभयात्किमप्यनभिलप्य 'भगवन्, संपन्नतत्त्वसंबन्धस्य निजस्खलितप्रवृत्तचित्तमहामोहान्धस्य सद्धर्मध्वंसहेतोर्जन्तोर्निसर्गस्थैर्यमेरुषु गुणगुरुषु न खलु दुरपवादकरणात्परमव-

परिवारके कुछ आप्त पुरुषोंके साथ आचार्यके पास जाकर और उनके चरणोंकी वन्दना करके एक नीचे आसनपर बैठ गया और विनयपूर्वक स्वर्ग और मोक्षका स्वरूप बतलानेकी प्रार्थना करके चुप हो गया । आचार्यने स्वर्ग और मोक्षका निरूपण करते हुए धर्म चर्चा की । तब बलि बोला—'स्वामी ! स्वर्ग और मोक्षका अस्तित्व माननेका दुराग्रह आप क्यों करते हैं ? बारह वर्षकी स्त्री और सोलह वर्षके पुरुषका परस्परमें जो असाधारण प्रेमरस उत्पन्न होता है उसे प्रीति कहते हैं । यह प्रीति ही साक्षात् स्वर्ग है, उससे भिन्न कोई दूसरा अदृश्य स्वर्ग नहीं है ।' आचार्य—बलि ! क्या एक प्रत्यक्ष प्रमाण ही है ?

बलि—'हाँ, समस्त श्रुतरूपी पृथिवीका उद्धार करनेवाले आदि पुरुषके तुल्य विद्वन् महात्मन्, एक प्रत्यक्ष ही प्रमाण है ।'

आचार्य—तो फिर तुम्हारे माता पिताने विवाह किया था इत्यादिमें क्या प्रमाण है ? और तुम्हारे पूर्व पुरुष थे इसमें भी क्या प्रमाण है ? यदि कहोगे कि जो वस्तुएँ हमारे प्रत्यक्षमें नहीं हैं उन्हें हम प्रामाणिक पुरुषोंके कथनसे मानते हैं तो ऐसा माननेमें तुम्हारे पक्षकी हानि होती है और हमारे मतकी पुष्टि होती है ।

इस उत्तरको सुनकर बलि संकटमें पड़ गया और सदस्योंके लिए प्रीतिकर उत्तर न सूझने पर असभ्य वचन बकने लगा । यह देखकर राजाकी आँखें शरमसे गड़ गईं । किन्तु प्रतिष्ठाके भङ्ग होनेके भयसे उसने मुनिजनोंके सामने बलिसे कुछ भी नहीं कहा और बोला—'भगवन् ! जिसका चित्त महामोहसे अन्धा हो रहा है और जो समीचीन धर्मको ध्वंस करनेपर तत्पर है तथा वर्तमान

---

१. वेणुः तत्र प्रभित् भेदने अलिर्भ्रमरः । २. निश्चयः । ३. सह कलिना वर्तते हे । ४. प्रमाणे बलिः पूजा यस्य सः हे । ५. इन्द्रसारथिः । ६. बलीवर्दवत् । ७. प्रीतिकरम् । ८. लज्जा । ९. अकल्याण । १०. अनुक्त्वा ।

साने प्रहरणमस्ति' इति वचनपुरःसरं कथान्तरमनुबध्य साधु समाराध्य च प्रशान्तिहैमवती-प्रभवगिरिमकम्पनसूरिं विनेयजनसंभावनौचित्यश्रया तदनुज्ञयात्मसदनमासाद्यापरेद्युरपर-दोषमिषेण सनिकारकरणमनुजैः सह कर्मस्कन्धबन्धवार्द्धलिं बलिं निजदेशान्निर्वासयामास।

भवतश्चात्र श्लोकौ—

सद्संश्च समावेव यदि चित्तं मलीमसम्।
यात्यशान्तेः क्षयं पूर्वः परश्चाशुभचेष्टितात् ॥२२०॥
स्वमेव हन्तुमीहेत दुर्जनः सज्जनं द्विषन्।
योऽधितिष्ठेत्तुलामेकः किमसौ न व्रजेदधः ॥२२१॥

*इत्युपासकाध्ययने बलिनिर्वासनो नामैकोनविंशः कल्पः।*

बलिद्विजः सानुजस्तथा सकलजनसमक्षमसूक्ष्मसूक्ष्मणपूर्वकं निर्वासितः सन्मुनि-विषयरोषोन्मेषकलुषितः कुरुजाङ्गलमण्डलेषु तद्विलासिनीजलकेलिविगलितकालेयपाटल-कल्लोलाधरसुरसरित्सीमन्तिनीचुम्बितपर्यन्तप्रसरे हस्तिनागपुरे साम्राज्यलक्ष्मीमिव लक्ष्मी-मतीं महादेवीमवहाय सरस्वतीरसावगाहसागरस्य श्रुतसागरस्य भगवतोऽभ्यर्णे पितृ-विनयविष्णुना विष्णुना लघुजन्मना सूनुना सार्धं प्रवर्धितदीक्षापद्मस्य महापद्मस्य मही-पतेर्महान्तं पद्मनामनिलयं तनयमशिश्रियत्। पद्मोऽपि चारसंचाराद्विदितवंशविद्याप्रभावाय

तत्त्वोंसे ही सम्बन्ध रखता है उस मनुष्यके पास मेरुके समान स्थिर आप सरीखे गुरुओंका अपवाद करनेके सिवा दूसरा हथियार नहीं है।'

१. 'अपाङ्क्तेयैः समं कुर्वन् संसर्गं भोजनादिषु ।
प्राप्नोति निन्द्यतामत्र परत्र च न सत्फलम् ॥७३॥'–धर्मर०, पृ० ८० उ.।

२. चर्मभाण्डेषु। ३. घृततैलाधारचर्मभाजनेषु। 'दृतिप्रायेषु पात्रेषु तोयं स्नेहं तु नाश्रयेत्।' –प्रबोधसार पृ० ७४।

जीवयोगाविशेषेण मयमेषादिकायवत्[1]।
मुद्गमाषादिकायोऽपि मांसमित्यपरे जगुः ॥३००॥

तदयुक्तम् । तदाह—

*मांसं जीवशरीरं जीवशरीरं भवेन्न वा मांसम् ।*
*यद्वन्निम्बो वृक्षो वृक्षस्तु भवेन्न वा निम्बः ॥३०१॥*

किं च—

द्विजाण्डजनिहन्तॄणां यथा पापं विशिष्यते ।
जीवयोगाविशेषेऽपि तथा फलपलाशिनाम् ॥३०२॥
स्त्रीत्वपेयत्वसामान्याद्दारवारिवदीहताम्[2]।
एष वादी वदन्नेवं मद्यमातृसमागमे ॥३०३॥
शुद्धं दुग्धं न गोर्मांसं वस्तुवैचित्र्यमीदृशम् ।
विषघ्नं रत्नमाहेयं[3] विषं च विपदे यतः ॥३०४॥

---

भले ही कहलावें किन्तु इसकी परवाह न करें। आप दृढ़ रहेंगे तो दुनिया आपकी बातकी कदर करने लगेगी। किन्तु यदि आप ही अपना विश्वास खो बैठेंगे और क्षण-भरकी वाहवाहीमें बह जायेंगे तो न अपना हित कर सकेंगे और न दूसरोंका हित कर सकेंगे। मधु भी मद्य और मांसका ही भाई है। कुछ लोग आधुनिक ढंगसे निकाले जानेवाले मधुको खाद्य बतलाते हैं। किन्तु ढंगके बदलने मात्रसे मधु खाद्य नहीं हो सकता। आखिरको तो वह मधु-मक्खियोंका उगाल ही है।

## मांस, और अन्न, दूध वगैरहमें अन्तर

कुछ लोगोंका कहना है कि मूँग, उड़द वगैरहमें और ऊँट, मेढ़ा वगैरहमें कोई अन्तर नहीं है क्योंकि जैसे ऊँट, मेढ़ा वगैरहके शरीरमें जीव रहता है वैसे ही मूँग उड़द वगैरहमें भी जीव रहता है। दोनों ही जीवके शरीर हैं। अतः जीवका शरीर होनेसे मूँग, उड़द वगैरह भी मांस ही हैं ॥३००॥ किन्तु उनका ऐसा कहना ठीक नहीं है। क्योंकि मांस जीवका शरीर है यह ठीक है। किन्तु जो जीवका शरीर है वह मांस होता भी है और नहीं भी होता। जैसे, नीम वृक्ष होता है किन्तु वृक्ष नीम होता भी है और नहीं भी होता ॥३०१॥ तथा—

जैसे ब्राह्मण और पक्षी दोनोंमें जीव है फिर भी पक्षीको मारनेकी अपेक्षा ब्राह्मणको मारने में अधिक पाप है। वैसे ही फल भी जीवका शरीर है और मांस भी जीवका शरीर है, किन्तु फल खानेवालेकी अपेक्षा मांस खानेवालेको अधिक पाप होता है ॥३०२॥ तथा जिसका यह कहना है कि फल और मांस दोनों ही जीवका शरीर होनेसे बराबर हैं उसके लिए पत्नी और माता दोनों स्त्री होनेसे समान हैं और शराब तथा पानी दोनों पेय होनेसे समान हैं। अतः जैसे वह पानी और पत्नीका उपभोग करता है वैसे ही शराब और माताका भी उपभोग क्यों नहीं करता? ॥३०३॥

गौका दूध शुद्ध है किन्तु गोमांस शुद्ध नहीं है। वस्तुका वैचित्र्य ही इस प्रकार है। देखो, साँपकी मणिसे विष दूर होता है, किन्तु साँपका विष मृत्युका कारण है ॥३०४॥

---

१. उष्ट्रः। 'जीवयोगाविशेषेण उष्ट्रमेषादिकायवत्।—धर्मर०, पृ० ८० उ.। २. मातरं दारानिव, मद्यं वारीव ईहताम्। "प्राण्यङ्गत्वाविशेषेऽपि भोज्यं मांसं न धार्मिकैः। भोग्या स्त्रीत्वाविशेषेऽपि जनैर्जायैव नाम्बिका ॥१०॥" —सागारधर्मामृत, २ अ०। ३. अहेः सर्पस्येदं रत्नम्। धेन्वादीनां पयः पेयं न मूत्रादि स्वभावतः। विषापहमहे रत्नं विषं तु मृतिसाधनम् ॥३७॥—प्रबोधसार।

अथवा—

> हेयं पलं पयः पेयं समे सत्यपि कारणे ।
> विषद्रोरायुषे[1] पत्रं मूलं तु मृतये मतम् ॥३०५॥

अपि च—

> शरीरावयवत्वेऽपि[2] मांसे दोषो न सर्पिषि ।
> जिह्वावत् हि दोषाय पादे मद्यं द्विजातिषु ॥३०६॥
> विधि[3]श्चेत्केवलं शुद्ध्यै[4] द्विजैः सर्वं निषेव्यताम् ।
> शुद्ध्यै[5] चेत्केवलं वस्तु भुज्यतां श्वपचालये ॥३०७॥
> तद्द्रव्यदातृपात्राणां विशुद्धौ विधिशुद्धता ।
> यत्संस्कारशतेनापि नाजातिर्द्विजतां व्रजेत् ॥३०८॥
> तच्छाक्यसांख्यचार्वाकवेदवैद्यकपर्दिनाम् ।
> मतं विहाय हातव्यं[6] मांसं श्रेयोऽर्थिभिः सदा ॥३०९॥
> यस्तु लौल्येन मांसाशी[7] धर्मधीः स द्विपातकः[8] ।
> परदारक्रियाकारी मात्रा सत्रं[9] यथा नरः ॥३१०॥

अथवा, मांस और दूधका एक कारण होनेपर भी मांस छोड़ने योग्य है और दूध पीने योग्य है। जैसे कारस्कर नामके विषवृक्षका पत्ता आयुवर्धक होता है और उसकी जड़ मृत्युका कारण होती है ॥३०५॥ और भी कहते हैं—

मांस भी शरीरका हिस्सा है और घी भी शरीरका ही हिस्सा है फिर भी मांसमें दोष है, घी में नहीं। जैसे ब्राह्मणोंमें जीभसे शराबका स्पर्श करनेमें दोष है पैरमें लगानेपर नहीं ॥३०६॥

यदि विधिसे ही वस्तु शुद्ध हो जाती तो ब्राह्मणोंके लिए कोई वस्तु असेव्य रहती ही नहीं। और यदि केवल वस्तुकी शुद्धि ही अपेक्षित है तो चाण्डालके घरपर भी भोजन कर लेना चाहिए ॥३०७॥ अतः द्रव्य, दाता और पात्र तीनोंके शुद्ध होनेपर ही शुद्ध विधि बनती है। क्योंकि सैकड़ों संस्कार करनेपर भी शूद्र ब्राह्मण नहीं हो सकता ॥ ३०८ ॥ इस लिए जो अपना कल्याण चाहते हैं उन्हें बौद्ध, सांख्य, चार्वाक, वैदिक और शैवोंके मतोंकी परवाह न करके मांसका त्याग कर देना चाहिए ॥३०९॥

जैसे जो परस्त्रीगामी पुरुष अपनी माताके साथ सम्भोग करता है वह दो पाप करता है, एक तो परस्त्री गमनका पाप करता है और दूसरे माताके साथ सम्भोग करनेका पाप करता है। वैसे ही जो मनुष्य धर्मबुद्धिसे लालसापूर्वक मांस भक्षण करता है वह भी डबल पाप करता है। एक तो वह मांस खाता है दूसरे धर्मका ढोंग रचकर उसे खाता है ॥३१०॥

---

१. विषतरोः आयुर्निमित्तं पत्रं स्यात्। "पयः पेयं पलं हेयं समे सत्यपि साधने। विषद्रोरायुषे पत्रं मूलं तु मृतये मतम् ॥३८॥" —प्रबोधसार। "ग्राह्यं दुग्धं पलं नैव वस्तुनो गतिरीदृशी। विषद्रोः पत्रमारोग्य-कृन्मूलं मृतिकृद् भवेत् ॥४२॥" —धर्मसं०। २. द्वयोर्मांससर्पिषोः निमित्तं शरीरमेव। "शरीरावयवत्वेऽपि मांसे दोषो न सर्पिषि। धेनुदेहस्रुतं मूत्रं न पुनः पयसा समम् ॥३९॥" —प्रबोधसार। ३. संप्रोक्षणं यज्ञादिश्चेत् शुद्ध्यं भवति। ४. योग्यमयोग्यञ्च। ५. अथवा विधिस्तिष्ठतु वस्तु स्वयमेव शुद्धं वर्तते। ६. त्याज्यम्। ७. मांसभक्षकः। ८. तस्य पातकद्वयं भवति। ९. सह। 'यस्तु मांसादिलौल्येन धर्म धर्मेति भाषते। मांसास्वादाद्विधेर्ध्वंसात् स स्यात्पापद्वयाश्रयः ॥४०॥' —प्रबोधसार। 'पापी ह्यास्यं लभेतासौ मांसलौल्येन धर्मधीः। परदारं विधातेव मात्रा सार्द्धं नराधमः ॥४१॥ प्रबोधसार।

श्रूयतामत्र मांसाशनाभिध्यानमात्रस्यापि[1] पातकस्य फलम्—श्रीमत्पुष्पदन्तभदन्तावतारावतीर्णत्रिदिवपतिसंपादितोद्यो[2]येन्दिरासन्द्यां काकन्द्यां पुरि श्रावकान्वयसंभूतिः सौरसेनो नाम नृपतिः कुलधर्मानुरोधबुद्ध्या गृहीतपिशितव्रतः पुनर्वेदवैद्याद्वै[3]तमतमोहितमतिः संजातजाङ्गलजिघित्सानुमतिरङ्गीकृतवस्तुनिर्वहणाज्जनापवादाज्जुगुप्समानो मनोविश्रान्तिहेतुना कर्मप्रियनामकेतुना बल्लवेन[4] रहसि[5] बिलस्थलजलान्तरालचरतरसमानाययन्[6]नप्यनेकराजकार्यपर्याकुलमानसतया मांसभक्षणक्षणं नावाप ।

---

भावार्थ—जो व्यक्ति या धर्म मांसाहारको उचित ठहराते हैं वे उसके समर्थनमें अनेक कुयुक्तियाँ देते हैं। उन्हींका निर्देश तथा परीक्षण ग्रन्थकारने ऊपर किया है। जीवका शरीर होने मात्रसे मांसको अभक्ष्य नहीं बतलाया गया है, किन्तु एक तो किसी पञ्चेन्द्रिय जीवको काटे बिना मांस उत्पन्न नहीं होता। दूसरे वह अत्यन्त तामसिक भोजन है। दूध, फल वगैरहमें यह बात नहीं है। वे पशुओं और वृक्षोंको बिना हानि पहुँचाये प्राप्त किये जा सकते हैं तथा उनके खानेसे चित्तमें सात्त्विकता आती है। कहा जा सकता है कि यदि स्वयं मरे हुए जीवका मांस प्राप्त हो जाये तो क्या हानि है? इसका समाधान यह है कि यद्यपि इससे शुरूमें किसी जीवका घात नहीं होगा किन्तु आगे मांस खानेका चश्का लग जानेसे दूसरे लोगोंके द्वारा मारे गये पशुके मांसमें भी प्रवृत्ति होने लगेगी। जैसे बौद्ध धर्ममें त्रिकोटि परिशुद्ध मांसके ग्रहण कर लेनेका विधान है तो तिब्बतके लामाओंके लिए शहरसे दूर पशु मारे जाते हैं और उनका मांस वह ग्रहण कर लेते हैं। दूसरे, मांसमें भी एकेन्द्रिय जीवोंकी उत्पत्ति होने लगती है तीसरे, मृत पशुका मांस खानेपर भी तामसिकपना तो बना ही रहता है। वह तो मांसमात्रका धर्म है। अतः मांसाहार और दुग्ध तथा फलाहार समान नहीं हो सकता। हिन्दू धर्ममें यज्ञके प्रसादके तौरपर मांसके ग्रहणका विधान कुछ ग्रन्थोंमें मिलता है। किन्तु जो चीज स्वभाव से ही अशुद्ध है, मन्त्रादिकके द्वारा उसे शुद्ध नहीं किया जा सकता। यदि मंत्रोंके द्वारा स्वभावसे ही अशुद्ध वस्तुएँ भी शुद्ध हो सकती हैं तो फिर तो संसारमें अभक्ष्य कुछ रहेगा ही नहीं। अतः यज्ञादिकमें मन्त्रपाठपूर्वक पशुका बलिदान करके उसका मांस खाना भी निरामिषभोजियोंके लिए उचित नहीं है। मांस खाना तो बहुत दूर है उसका इरादा करना भी बुरा है। मांस खानेके संकल्पमात्रसे भी जो पाप होता है उसके फलके सम्बन्धमें एक कथा है उसे सुनें—

## ११ मांसभक्षणसंकल्पी राजा सौरसेनकी कथा

भगवान् पुष्पदन्तके जन्मोत्सवसे पवित्र काकन्दी नगरीमें श्रावककुलोत्पन्न सौरसेन नामका राजा राज्य करता था। उसने अपना कुलधर्म समझकर मांस खानेका त्याग कर दिया था। बादमें कुछ वैदिकों, वैद्यों और शैवोंके कहनेसे उसे मांस खानेकी रुचि उत्पन्न हुई। किन्तु की हुई प्रतिज्ञाको न निबाहनेके लोकापवादसे वह डरता था। उसका कर्मप्रिय नामका रसोइया एकान्तमें अनेक जलचर, थलचर और बिलोंमें रहनेवाले जन्तुओंका मांस तैयार करता था किन्तु अनेक राजकार्योंमें घिरे रहनेसे उसे मांस खानेके लिए एकान्त समय नहीं मिलता था।

---

१. चिन्तनम्-इच्छामात्रं वा। २. उत्सवलक्ष्मीस्थान। ३. वेदवचन-वैद्यवचन-शैववचन। ४. सूपकारेण। ५. एकान्ते। ६. आनयनं कारयन्।

कर्मप्रियोऽपि तथा पृथिवीश्वरनिदेशमनुदिनमनुतिष्ठन्[1]नेकदा पृदाकु[2]पाकोपप्लुतः प्रेत्य[3] स्वयम्भूरमणाभिधानमुद्रे समुद्रे महादेहबलस्तिमिङ्गिलगिलो बभूव। भूपालोऽपि चिरकालेन कथाशेषतामाश्रित्य पिशिताशनाशयानु[4]बन्धात्तत्रैव सिन्धौ तस्यैव महामीनस्य कर्णबिले तन्मलाशनशील: शालिसिक्थ[6]कलकलेवरः शफरोऽभूत्। तदन्वेष पर्याप्तोभयकरणस्तस्य वदनं व्यादाय निद्रायतो गलगुहावगाहे वेलानदीप्रवाह इवानेकं जलचरानीकं प्रविश्य तथैव निष्क्रामन्तं निरीक्ष्य 'पापकर्मा निर्भाग्याणां चाग्रणीधर्मा खल्वेष झषो यद्धकसंपातरत[7]चेतांस्यपि न शक्नोति अशितुं यादांसि। मम पुनर्यदि हृदयेप्सितप्रभावाद्दैवादेतावन्मात्रं गात्रं स्यात्तदा समस्तमपि समुद्रं विद्रुतसकलसत्त्वसंचारमुद्रं विदधामि' इत्यभिध्यानादल्पकायकर्लः शकुलो[9] निखिलनक्रचक्रचाराद्[10] महादेहाधीनो मीनः कालेन विपद्योत्पद्य[11] चोत्तमतस्त्रयस्त्रिंशत्सागरोपमायुर्निलये निरये भवप्रत्ययायत्ताविर्भूतज्ञानविशेषौ तावनिमिषचरौ[12] नारकपर्यायधरौ किलैवमालापं चक्रतुः—'अहो क्षुद्रमत्स्य, तथा निर्मितकर्मणो दुष्कर्मणो ममात्रागतिरुचितैव। तव तु मत्कर्णबिले मलोपजीवनस्य कथमत्रागमनमभूत्? हे महामत्स्य, चेष्टितादपि दुरन्तदुःखसंबन्धनिबन्धनादशुभध्यानात्।'

भवति चात्र श्लोकः—

---

इस प्रकार कर्मप्रिय राजाकी आज्ञाके अनुसार प्रतिदिन मांस पकाता था। एक दिन उसने साँपका मांस पकाया और उसीके जहरसे मरकर वह स्वयंभूरमण नामके समुद्रमें विशालकाय तिमिङ्गिल नामका महामत्स्य हुआ। कुछ कालके बाद राजा भी मरकर मांस खानेके संकल्पके कारण उसी समुद्रमें उसी महामत्स्यके कानमें उसका मैल खानेवाला मत्स्य हुआ, जिसका शरीर शाली चावलके बराबर था। महामत्स्य मुँह खोलकर सोता रहता था और उसके गुफाके समान गहरे गलेमें नदीके प्रवाहकी तरह जलचर जीवोंकी सेना घुसकर जीवित निकल आती थी। उसे देखकर तन्दुलमत्स्य सोचता—'यह मत्स्य बड़ा पापी और अभागोंमें भी सबसे बड़ा अभागा है, जो अपने मुँहमें स्वयं ही आनेवाले मत्स्योंको भी नहीं खा सकता। यदि हार्दिक इच्छाके प्रभावसे दैववश मेरा इतना बड़ा शरीर हो जाये तो मैं समस्त समुद्रको जलचर जीवोंसे शून्य कर दूँ।'

इस संकल्पसे अल्पकाय तन्दुलमत्स्य और समस्त मगरमच्छोंको खानेसे महाकाय महामत्स्य मरकर सातवें नरकमें तेतीस सागरकी उत्कृष्ट आयु लेकर उत्पन्न हुए। उन दोनोंको भवप्रत्यय नामका कुअवधि ज्ञान था। उसके द्वारा पूर्वजन्मका वृत्तान्त जानकर वे दोनों नारकी आपसमें कहते–'तन्दुलमत्स्य ! मैंने बड़ा पाप किया इसलिए मेरा यहाँ आना तो उचित ही था। किन्तु तुम तो मेरे कानके बिलमें कानका मैल ही खाया करते थे। तुम यहाँ कैसे आये ?' तब तन्दुल मत्स्य उत्तर देता—'तुम्हारे कर्मसे भी बुरे, महादुःखके कारण अशुभ ध्यानसे मरकर मैं यहाँ पैदा हुआ हूँ।'

इस विषयमें एक श्लोक है जिसका भाव इस प्रकार है–

---

१. कुर्वन्। २. सर्प। ३. मृत्वा। ४. संतत्या प्रवर्तनात्। ५. भक्षण। ६. शालिसिक्थमात्रशरीरः। ७. संपातरत—अ० ज०। ८. भागः। ९. मत्स्यः। १०. भक्षणात्। ११. मृत्वा। १२. भूतपूर्वमत्स्यौ।

*क्षुद्रमत्स्यः[1] किलैकस्तु स्वयम्भूरमणोदधौ।*
*महामत्स्यस्य कर्णस्थः स्मृतिदोषादधो गतः ॥३११॥*

—वरांगचरित ५,१०३।

*इत्युपासकाध्ययने मांसाभिलाषमात्रफलप्रलपनो नाम चतुर्विंशतितमः कल्पः।*

**श्रूयतामत्र मांसनिवृत्तिफलस्योपाख्यानम्—अवन्तिमण्डलनलिनाभिनिवाससरस्यामेकानस्यां[2] पुरि पुरबाहिरिकायां देविलामहिलाविलासविशिखवृत्तिकोदण्डस्य[3] चण्डनाम्नो मातङ्गस्यैकस्यां दिशि निवेशितपिशितोपदंशस्यापरस्यां दिशि विन्यस्तसुरासंभृतकलशस्य[4] तां पलावदंशोदारां[5] सुरां पायं पायं तदुभयान्तराले चर्मनिर्माणतन्त्रीं वरत्रां वर्तयतो वियद्विहारोड्डीनाण्डजडिम्भतुण्डखण्डनविनिष्पन्दिविषधरविषदोषावसरा सुरासीत्। अत्रैवावसरे तत्समीपवर्त्मगोचरे धर्मश्रवणजन्मान्तरादिप्रकाशनपथाभिः कथाभिर्विनेयजनोपकाराय कृतकामचारप्रचारमम्बरान्मूर्तिमत्स्वर्गापवर्गमार्गयमलमिवावतरच्चारणर्षियुगलमवलोक्य संजातकुतूहलस्तं देशमनुगम्य नगरे तद्दर्शनेन श्रावकलोकं व्रतानि समाददानमनुस्मृत्य समाचरितप्रणामः सुनन्दनाग्रेसरगमनमभिनन्दनं भगवन्तमात्मोचितं व्रतमयाचत।**

**भगवानपि—**

**उपकाराय सर्वस्य पर्जन्य[6] इव धार्मिकः।**
**तत्स्थानास्थान[7]चिन्तेयं वृष्टिवन्न हितोक्तिषु ॥३१२॥**

---

"स्वयंभूरमण समुद्रमें महामत्स्यके कानमें रहने वाला तन्दुलमत्स्य बुरे संकल्पसे नरक में गया ॥३११॥

*इस प्रकार उपासकाध्ययनमें मांसकी इच्छा मात्र करनेका फल बतलानेवाला*
*चौबीसवाँ कल्प समाप्त हुआ।*

अब मांस त्यागके फलके सम्बन्धमें एक कथा कहते हैं, उसे सुनें—

## १२ मांसत्यागी चाण्डालकी कथा

अवन्तिदेशकी उज्जयिनी नामकी नगरीमें नगरके बाहर चण्ड नामका एक चाण्डाल रहता था। एक दिन वह चाण्डाल मौज ले रहा था। उसके एक ओर मांसके व्यंजन रखे हुए थे। दूसरी ओर शराबसे भरे कलश रखे थे। चाण्डाल मांसके व्यंजनोंके साथ शराब पीता जाता था और बीच-बीचमें चमड़ेकी रस्सी बटता जाता था। आकाशमें उड़ते हुए एक पक्षीशावकका मुँह खुल जानेसे एक सर्प शराबमें आ गिरा था और उससे शराब विषैली हो गयी थी। इसी समय धर्मोपदेश तथा जन्मान्तरकी कथाओंके द्वारा लोगोंका उपकार करनेके लिए भ्रमण करते हुए दो चारण ऋद्धिके धारी मुनियोंको पासमें ही आकाशसे उतरते हुए देखकर चाण्डालको बड़ा कुतूहल हुआ। वह भी उनके समीप गया। वहाँ नगरके श्रावकोंको व्रत ग्रहण करते हुए देखकर उसने उन्हें प्रणाम किया और सुनन्दन मुनिके अग्रवर्ती भगवान् अभिनन्दन मुनिसे अपने योग्य व्रतकी याचना की।

'जैसे मेघ सबके उपकारके लिए है वैसे ही धार्मिक पुरुष भी सबके उपकारके लिए हैं।

---

१. सिक्थमत्स्यः किलैकोऽसौ स्वयम्भूरमणाम्बुधौ। महामत्स्यसमान् दोषान् अवाप स्मृतिदोषतः ॥ ४७ ॥ —महापुराण २१ पर्व। २. उज्जयिन्याम्। ३. बाण। ४. सुरासारसं—ब०। ५. पलोपदंशो—ब०। ६. मेघ। ७. एष उत्तम एष नीचः धर्मकथने इति चिन्ता न सर्वेषां धर्मो वाच्यः।

इत्यवगम्य सम्यगवधिबोधोपयोगाद[1]वगतैतदासन्नपरासु[2]तायोगस्तन्मातङ्गमेवमवोचत्–'अहो मातङ्ग, तदु[3]भयान्तरालसज्जां रज्जुं सृजतस्तन्मध्ये तव तन्निवृत्तिव्रतम्' इति । मातङ्गस्तथा प्रतिपद्योपसृ[4]त्य च तमवका[5]शं पिशितं[6] प्राश्य[7] 'यावदहमिदं स्थानकं नायामि तावन्मेऽस्य निवृत्तिः' इत्यभिधाय समासादितमदिरास्थानः प्रतिपन्नपानस्तदुग्रतरगरभराशु[8]घूर्णितमतिप्रसरस्तन्नि[9]वृत्तिमलभमानचित्तोऽपि प्रेत्य[10] तावन्मात्रव्रतमाहात्म्येन यक्षकुले यक्षमुख्यत्वं प्रतिपेदे ।

भवति चात्र श्लोकः—

चण्डोऽवन्तिषु मातङ्गः पिशितस्य निवृत्तितः ।
अत्यल्पकालभाविन्याः प्रपेदे यक्षमुख्यताम् ॥३१३॥

*इत्युपासकाध्ययने मांसनिवृत्तिफलाख्यानो नाम पञ्चविंशतितमः कल्पः ।*

अथ के ते उत्तरगुणाः—

[11]अणुव्रतानि पञ्चैव त्रिप्रकारं गुणव्रतम् ।
शिक्षाव्रतानि चत्वारि गुणाः स्युर्द्वादशोत्तरे ॥३१४॥

---

और जैसे स्थान और अस्थानका विचार किये बिना मेघ सर्वत्र बरसता है वैसे ही धार्मिक पुरुष भी हितकी बात कहनेमें स्थान और अस्थानका विचार नहीं करते ॥३१२॥' ऐसा सोचकर भगवान् अभिनन्दन मुनिने अवधिज्ञानसे जाना कि यह चाण्डाल जल्द ही मरने वाला है । अतः वे उससे बोले–'भाई चाण्डाल ! मांस खाने और शराब पीनेके बीचमें जितनी देर तुम रस्सी बाँटो उतनी देरके लिए तुम मांस और शराबका त्याग कर दो ।'

चाण्डालने इस बातको स्वीकार कर लिया । और वहाँसे चलकर अपने स्थानपर आया । मांसके पास जाकर उसने मांस खाया और संकल्प किया कि जबतक फिर मैं इस स्थानपर नहीं आऊँगा तबतकके लिए मेरे मांसका त्याग है । इसके बाद वह शराबके पास गया और वहाँ उसने शराब पी । पीते ही तीव्र जहरके प्रभावसे उसकी बुद्धि कुण्ठित हो गयी । अतः यद्यपि वह उसका त्याग नहीं कर सका फिर भी मरकर उतने ही व्रतके प्रभावसे यक्षकुलमें प्रधान यक्ष हुआ ।

इस विषयमें एक श्लोक है जिसका भाव इस प्रकार है--

"अवन्ति देशमें चण्ड नामका चाण्डाल बहुत थोड़ी देरके लिए मांसका त्याग कर देनेसे मरकर यक्षोंका प्रधान हुआ ॥३१३॥"

*इस प्रकार उपासकाध्ययनमें मांस त्यागके फलको कहनेवाला पच्चीसवाँ कल्प समाप्त हुआ ।*

## श्रावकोंके उत्तरगुण

*[ अब श्रावकोंके उत्तरगुण बतलाते हैं— ]*

पाँच अणुव्रत, तीन गुणव्रत और चार शिक्षाव्रत ये बारह उत्तरगुण हैं ॥३१४॥

---

१. ज्ञात । २. मरण । ३. यस्मिन् पार्श्वे यद्भुक्तं तत्समीपं त्यक्त्वा द्वितीयवारं यावन्नायाति तावत्कालपर्यन्तं तद्व्रतम् । ४. गत्वा । ५. स्थानम् । ६. मांसम् । ७. भुक्त्वा । ८. शीघ्रम् । ९. मद्यनियमम् । १०. मृत्वा । ११. 'पंचेवणुव्वयाइं गुणव्वयाइं हवंति तह तिण्णि । सिक्खावय चत्तारि संजमचरणं च सायारं' ॥ २ ॥ —चारित्रप्राभृत । 'गृहिणां त्रेधा तिष्ठत्यणुगुणशिक्षाव्रतात्मकं चरणम् । पञ्चत्रिचतुर्भेदं त्रयं यथासंख्यमाख्यातम् ॥५१॥' —रत्नकरण्ड श्रा० । 'अणुव्रतानि पञ्चैव त्रिःप्रकारं गुणव्रतम् । शिक्षाव्रतानि चत्वारि इत्येतद्द्वादशात्मकम् ॥' —वरांगचरित १५,१११ । 'व्रतान्यणूनि पञ्चैषां शिक्षा चोक्ता चतुर्विधा । गुणास्त्रयो यथाशक्तिनियमास्तु सहस्रशः ॥१८३॥'—पद्मपु०, पर्व १४ । पद्मनन्दि पञ्च० पृ० १९

तत्र—

**हिंसास्तेयानृताब्रह्मपरिग्रहविनिग्रहाः।**
**एतानि देशतः पञ्चाणुव्रतानि प्रचक्षते ॥३१५॥**
**संकल्पपूर्वकः सेव्ये नियमो व्रतमुच्यते।**
**प्रवृत्तिविनिवृत्ती वा सदसत्कर्मसंभवे ॥३१६॥**
**हिंसायामनृते चौर्यामब्रह्मणि परिग्रहे।**
**दृष्टा विपत्तिरत्रैव परत्रैव च दुर्गतिः ॥३१७॥**

---

हिंसा, झूठ, चोरी, कुशील और परिग्रहका एक देश त्याग करनेको पाँच अणुव्रत कहते हैं ॥ ३१५ ॥

### व्रतका लक्षण

सेवनीय वस्तुका इरादापूर्वक त्याग करना व्रत है। अथवा अच्छे कार्योंमें प्रवृत्ति और बुरे कार्योंसे निवृत्तिको व्रत कहते हैं ॥३१६॥

**भावार्थ**—किसी वस्तुके सेवन न करनेका नाम व्रत नहीं है किन्तु उसका बुद्धिपूर्वक त्याग करके सेवन न करना व्रत कहलाता है, क्योंकि किसी वस्तुके सेवन नहीं करनेमें तो अनेक कारण हो सकते हैं। कोई अच्छी न लगनेके कारण किसी वस्तुका सेवन नहीं करता। कोई न मिलनेके कारण किसी वस्तुका सेवन नहीं करता। कोई स्वास्थ्यके अनुकूल न होनेके कारण किसी वस्तुका सेवन नहीं करता। कोई बदनामीके भयसे किसी वस्तुका सेवन नहीं करता। किन्तु यदि वह वस्तु उसे अच्छी लगने लगे, या बाजारमें मिलने लगे, या स्वास्थ्यके अनुकूल पड़ने लगे या बदनामीका भय जाता रहे तो वह उस वस्तुको तुरन्त सेवन करने लगेगा। परन्तु जो किसी वस्तुके सेवन न करनेका नियम ले लेता है वह अपने नियमकाल तक किसी भी अवस्थामें उस वस्तुका सेवन नहीं करता। अतः केवल सेवन न करनेका नाम व्रत नहीं है बल्कि समझ-बूझकर त्याग कर देनेका नाम व्रत है।

## पाँचों पापोंमें बुराई

हिंसा करने, झूठ बोलने, चोरी करने, कुशील सेवन करने और परिग्रहका संचय करनेसे इसी लोकमें मुसीबत आती देखी जाती है और परलोकमें भी दुर्गति होती है ॥३१७॥

**भावार्थ**—भारतीय पिलनकोडमें जिन जुर्मोंके लिए सजा देनेका विधान है वे सब जुर्म प्रायः इन पाँच पापोंमें ही सम्मिलित हैं। हिंसा करनेसे फाँसी तक हो जाती है। झूठी बात कहने, झूठी गवाही देनेसे जेलकी हवा खानी पड़ती है। चोरी करनेसे भी यही दण्ड भोगना पड़ता है। दुराचार करनेसे जेलखानेकी साथ-ही-साथ बेतोंकी भी सजा मिलती है। और

---

१. 'थूले तसकायवहे थूले मोसे तितिक्ख थूले य। परिहारो परपिम्मे परिग्गहारम्भपरिमाणं ॥२३॥' —चारि० प्रा०। 'हिंसानृतचौर्येभ्यो मैथुनसेवापरिग्रहाभ्याञ्च। पापप्रणालिकाभ्यो विरतिः संज्ञस्य चारित्रम्' ॥४९॥ —रत्नकरण्ड श्रा०। 'प्राणातिपाततः स्थूलाद्विरतिर्वितथात्तथा। ग्रहणात् परवित्तस्य परदारसमागमात् ॥१८४॥ अनन्तायाश्च गर्द्धायाः पञ्चसंख्यमिदं व्रतम्।···' ॥१८५॥ —पद्मपु०, पर्व १४। २. संकल्पपूर्वकः सेव्ये नियमोऽशुभकर्मणः। निवृत्तिर्वा व्रतं स्याद्वा प्रवृत्तिः शुभकर्मणि ॥ ८० ॥ सागारधर्मामृत अ० २। ३. सर्वार्थसिद्धि अ० ७, सू० ९ इसके विवरणके लिए देखें।

**यत्स्यात्प्रमादयोगेन[1] प्राणिषु प्राणहापनम् ।**
**सा हिंसा रक्षणं तेषामहिंसा तु सतां मता ॥३१८॥**
**विकथाक्षकषायाणां[2] निद्रायाः प्रणयस्य च ।**
**अभ्यासाभिरतो जन्तुः प्रमत्तः परिकीर्तितः ॥३१९॥**
**देवतातिथिपित्रर्थं[3] मन्त्रौषधभयाय वा ।**
**न हिंस्यात्प्राणिनः सर्वानहिंसा नाम तद्व्रतम् ॥३२०॥**

अनुचित तरीकेसे ज्यादा सामग्री इकट्ठी कर लेनेपर भी सजाका भय बना ही रहता है । तथा परिग्रहीको चोरोंका डर भी सताता रहता है, इसके कारण वह रातको आरामसे सो भी नहीं पाता । जब इसी लोकमें इन पाँच पापोंके कारण इतनी विपत्ति उठानी पड़ती है तब परलोकका तो कहना ही क्या है ।

## अहिंसा

*[ अब अहिंसा धर्मका वर्णन करते हैं— ]*

प्रमादके योगसे प्राणियोंके प्राणोंका घात करना हिंसा है और उनकी रक्षा करना अहिंसा है ॥३१८॥ जो जीव ४ विकथा, ४ कषाय, ५ इन्द्रियाँ, निद्रा और मोहके वशीभूत है उसे प्रमादी कहते हैं ॥ ३१९ ॥

**भावार्थ**—प्रमादके पन्द्रह भेद हैं—४ विकथा, ४ कषाय, ५ इन्द्रियाँ, एक निद्रा और एक मोह । विकथा खोटी कथाको कहते हैं जैसे स्त्रियोंकी चर्चा करना, भोजनकी चर्चा करना, चोरोंकी चर्चा करना, ये चर्चाएँ प्रायः कामुकता और मनोविनोदके लिए की जाती हैं और उनसे लाभके बजाय हानि होती है । अतः जो मनुष्य इस प्रकारकी चर्चाओंमें रस लेता है वह प्रमादी है । क्रोध, मान, माया और लोभको कषाय कहते हैं । जो क्रोध करता है, मान करता है, मायाचार करता है या लोभी है वह तो प्रमादी है ही, क्योंकि ऐसा आदमी कभी भी अपने कर्तव्यके प्रति सावधान नहीं रह सकता । इसी तरह जो पाँचों इन्द्रियोंका दास है उन्हींकी तृप्तिमें लगा रहा है वह भी प्रमादी है । ऐसे लोग किसीका घात करते हुए नहीं सकुचाते । यही बात निद्रा और मोहके सम्बन्धमें जाननी चाहिए । अतः प्रमादके योगसे जो प्राणोंका घात किया जाता है वह हिंसा है किन्तु जहाँ प्रमाद नहीं है वहाँ किसीका घात हो जानेपर भी हिंसा नहीं कहलाती है । इसका खुलासा पहले कर आये हैं ।

देवताके लिए, अतिथिके लिए, पितरोंके लिए, मंत्रकी सिद्धिके लिए, औषधिके लिए, अथवा भयसे सब प्राणियोंकी हिंसा नहीं करनी चाहिए । इसे अहिंसाव्रत कहते हैं ॥३२०॥

---

१. 'प्रमत्तयोगात् प्राणव्यपरोपणं हिंसा ॥' —तत्त्वार्थसूत्र ७-१३ । २. 'विकहा तहा कसाया इंदिय णिद्दा तहेव पणयो य । चदु चदु पण एगेगं होंति पमादा हु पण्णरसा ॥ १५ ॥' —पञ्चसंग्रह-जीवसमास । ३. 'मधुपर्के च यज्ञे च पितृदैवतकर्मणि । अत्रैव पशवो हिंस्या नान्यत्रेत्यब्रवीन्मनुः ॥' —मनुस्मृति ५-४१ । 'देवतातिथिप्रीत्यर्थं मन्त्रौषधिभयाय वा । न हिंस्याः प्राणिनः सर्वे अहिंसा नाम तद्व्रतम् ।' —वरांग च० १५-११२ । 'देवतातिथिमन्त्रौषधपित्रादिनिमित्ततोऽपि सम्पन्ना । हिंसा धत्ते नरके किं पुनरिह नान्यथा विहिता ॥२९॥' —अमित० श्रावकाचार ६ परि० । 'उक्तं च—देवता···मन्त्रौषधिभयेन वा । —धर्मरत्ना०, पृ० ८५ ।

गृहकार्याणि सर्वाणि दृष्टिपूतानि कारयेत् ।
द्रवद्रव्याणि सर्वाणि पटपूतानि योजयेत् ॥३२१॥
आसनं शयनं[2] मार्गमन्नमन्यच्च वस्तु यत् ।
अदृष्टं तन्न सेवेत यथाकालं भजन्नपि ॥३२२॥
दर्शनस्पर्शसंकल्पसंसर्गत्यक्तभोजिताः ।
हिंसनाक्रन्दनप्रायाः प्राशप्रत्यूहकारकाः[3] ॥३२३॥

**भावार्थ**—मनुस्मृतिके तीसरे अध्यायमें मांससे श्राद्ध करनेका विधान है तथा यह भी बतलाया है कि किस मांससे श्राद्ध करनेसे कितने दिन तक पितृ लोग तृप्त रहते हैं। पाँचवें अध्यायमें यज्ञके लिए पशुवध करनेका तथा मांस खानेका विधान है। उत्तररामचरितमें लिखा है कि जब वशिष्ठ ऋषि वाल्मीकि ऋषिके आश्रममें पहुँचे तो उनके आतिथ्य-सत्कारके लिए वाल्मीकि ऋषिने गायकी बछियाका वध करवाया। ये सब कार्य हिंसा ही हैं। इसी तरहकी बातोंको देखकर ग्रन्थकारने देवता वगैरहके लिए पशुघात करनेका निषेध किया है। आश्चर्य है कि धर्मके नामपर भी हिंसाका पोषण किया गया है। जब कि हिंसासे बड़ा कोई अधर्म नहीं है। इसी तरह दवाईके लिए भी किसीका घात नहीं करना चाहिए, क्योंकि अपने जीवनकी रक्षाके लिए दूसरोंके जीवनको नष्ट कर देनेका हमें क्या अधिकार है ?

## पानी वगैरहको छानकर काममें लाओ

घरके सब काम देख-भाल कर करना चाहिए। और पतली वस्तुओंको कपड़ेसे छानकर ही काममें लाना चाहिए। आसन, शय्या, मार्ग, अन्न और भी जो वस्तु हो, समयपर उसका उपयोग करते समय बिना देखे उपयोग नहीं करना चाहिए ॥३२१-३२२॥

**भावार्थ**—प्रत्येक वस्तुको देख-भाल कर काममें लानेकी आदत डालनेसे तथा पानी वगैरहको छानकर काममें लानेसे मनुष्य हिंसासे ही नहीं बचता, किन्तु बहुत-सी मुसीबतोंसे भी बच जाता है। उदाहरणके लिए प्रत्येक वस्तुको देख-भाल कर काममें लानेकी आदतसे साँप, बिच्छू वगैरहसे बचाव हो जाता है। शय्याको बिना झाड़े उपयोगमें लानेसे अनेक मनुष्य साँपके शिकार बन चुके हैं। बिना देखे चाहे जहाँ हाथ डाल देनेसे भी ऐसी ही घटनाएँ प्रायः घटती हैं। बिना छाने या बिना देखे-भाले पानी पी लेनेसे मुरादाबाद जिलेके एक गाँवमें एक लड़केके मुँहमें बिच्छू चला गया था और उसके कारण उस लड़केकी मौत बिच्छूके डंक मारते रहनेसे बड़ी कष्टकर हुई थी। अतः प्रत्येक वस्तुको देखकर ही काममें लाना चाहिए और पानी वगैरह कपड़ेसे छानकर ही काममें लाना चाहिए।

## भोजनके अन्तराय

ताजा चमड़ा, हड्डी, मांस, लोहू और पीब वगैरहका देखना, रजस्वला स्त्री, सूखा

१. 'दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ।' —मनुस्मृति अ० ६-४६। २. 'शयनं यानं मार्गमन्यच्च' —सागारधर्मा० पृ० १२०। ३. भोजनान्तरायाः। 'दृष्ट्वाऽऽर्द्रचर्मास्थिसुरामांसासृक्पूयपूर्वकम् । स्पृष्ट्वा रजस्वलाशुष्कचर्मास्थिशुनकादिकम् । श्रुत्वातिकर्कशाक्रन्दविड्वरप्रायनिःस्वनम् । भुक्त्वा नियमितं वस्तु भोज्येऽशक्यविवेचनैः ॥ संसृष्टे सति जीवद्भिर्जीवैर्वा बहुभिर्मृतैः। इदं मांसमिति दृष्टसंकल्पे चाशनं त्यजेत् ॥' —सागारधर्मामृत ४ अ०, श्लो० ३१-३३। 'उदक्यामपि चाण्डालश्वानकुक्कुटमेव च। भुञ्जानो

**अतिप्रसङ्गहानाय तपसः परिवृद्धये ।**
**अन्तरायाः स्मृता सद्भिर्व्रतबीजविनिक्रियाः[1] ॥३२४॥**
**अहिंसाव्रतरक्षार्थं[2] मूलव्रतविशुद्धये ।**
**निशायां वर्जयेद्भुक्तिमिहामुत्र च दुःखदाम् ॥३२५॥**

चमड़ा, कुत्ता वगैरहसे छू जाना, भोजनके पदार्थोंमें 'यह मांसकी तरह है' इस प्रकारका बुरा संकल्प हो जाना, भोजनमें मक्खी वगैरहका गिर पड़ना, त्याग की हुई वस्तुको खा लेना, मारने, काटने, रोने, चिल्लाने आदिकी आवाज सुनना, ये सब भोजनमें विघ्न पैदा करनेवाले हैं। अर्थात् उक्त अवस्थाओंमें भोजन छोड़ देना चाहिए ॥३२३॥ ये अन्तराय व्रतरूपी बीजकी रक्षाके लिए बाड़के समान हैं। इनके पालनेसे अतिप्रसङ्ग दोषकी निवृत्ति होती है और तपकी वृद्धि होती है ॥३२४॥

**भावार्थ**—भोजन करते समय यदि ऊपर कही हुई चीजोंको देख ले या उनसे छू जाये या ऊपर बतलायी हुई बातोंमें-से कोई और बात हो जाये तो भोजन छोड़ देना चाहिए। क्यों कि उस अवस्थामें भी यदि भोजन नहीं छोड़ा जायेगा तो बुरी वस्तुओंसे घृणा धीरे-धीरे दूर हो जायेगी और उसके दूर होनेसे मन कठोर होता जायेगा, बुरी वस्तुओंके प्रति अरुचि हटती जायेगी और फिर एक समय ऐसा भी आ सकता है जब उन बुरी वस्तुओंमें प्रवृत्ति होने लगे। इस तरह यह अतिप्रसङ्ग दोष उपस्थित हो सकता है। इससे बचनेके लिए अन्तरायोंका पालन करना जरूरी है। तथा ऐसी अवस्थामें भोजनके छोड़ देनेसे तपकी वृद्धि भी होती है, क्योंकि इच्छाके रोकनेको तप कहते हैं। भोजनके बीचमें अन्तरायके आ जानेपर भी भूख तो भोजन चाहती है अतः मन भोजनके लिए लालायित रहता है। किन्तु समझदार व्रती भूखकी परवाह न करके भोजन छोड़ देता है और इस तरह वह खानेकी इच्छापर विजय पाकर अपने तपको बढ़ाता है। अतः अन्तरायोंका पालना आवश्यक है। वे व्रतरूपी बीजकी बाड़के समान हैं। जैसे खेतमें बीज बोकर उसकी रक्षाके लिए चारों ओर काँटे वगैरहकी बाड़ लगा देते हैं उससे कोई पशु वगैरह भीतर घुसकर खेतीको नहीं चर पाता; वैसे ही अन्तरायोंका पालन भी व्रतोंकी रक्षा करता है।

## रात्रि-भोजन त्याग

अहिंसा व्रतकी रक्षाके लिए और मूलव्रतोंको विशुद्ध रखनेके लिए इस लोक और परलोकमें दुःख देनेवाले रात्रि-भोजनका त्याग कर देना चाहिए ॥३२५॥

**भावार्थ**—रातमें भोजन करनेसे हिंसा अवश्य होती है; क्योंकि सूर्यके सिवा अन्य जितने भी कृत्रिम प्रकाश हैं उनमें जीवोंका बाहुल्य देखा जाता है। रात्रिमें दीपक या बिजलीकी

---

यदि पश्येत तदन्नं तु परित्यजेत् ॥' —व्यासः। 'चाण्डालपतितोदक्यावाक्यं श्रुत्वा द्विजोत्तमः। भुञ्जीत ग्रासमात्रं चेद्दिनमेकमभोजनम् ॥' —कात्यायनः। —आह्निक प्रकरण पृ० ४८२ पर उद्धृत।

१. व्रतबीजवृत्तयः। 'अतिप्रसङ्गमसितुं परिवर्धयितुं तपः। व्रतबीजवृती भुक्तेरन्तरायान् गृही श्रयेत् ॥ ३० ॥' —सागारधर्मामृत ४ अ०। २. 'अहिंसाव्रतरक्षार्थं मूलव्रतविशुद्धये। नक्तं भुक्तिं चतुर्धाऽपि सदा धीरस्त्रिधा त्यजेत् ॥' —सागारधर्मा०, ४-२४। 'निशायामशनं हेयमहिंसाव्रतवृद्धये। मूलव्रतविशुद्ध्यर्थं यमार्थं परमार्थतः ॥ ५१ ॥' —प्रबोधसार पृ० ८४।

**आश्रितेषु च सर्वेषु यथावद्विहितस्थितिः ।**
**गृहाश्रमी समीहेत शारीरेऽवसरे स्वयम् ॥३२६॥**
**संधानं पानकं धान्यं पुष्पं मूलं फलं दलम् ।**
**जीवयोनि न संग्राह्यं यच्च जीवैरुपद्रुतम् ॥३२७॥**
**[1]अमिश्रं [2]मिश्रमुत्सर्गि[3] कालदेशदशाश्रयम् ।**
**वस्तु किञ्चित्परित्याज्यमपीहास्ति जिनागमे ॥३२८॥**
**यदन्तःशुषिरप्रायं हेयं नालीनलादि तत् ।**

रोशनीपर इतने जीव मँडराते देखे जाते हैं कि जिनकी संख्याका अन्दाजा भी लगाना कठिन है। ऐसे समयमें रातमें खानेवाला कैसे उनसे बच सकता है ? उसके भोजनमें वे जीव बिना पड़े रह नहीं सकते। और इस तरह भोजनके साथ उनका भी भोजन हो जाता है। ऐसी स्थितिमें न तो अहिंसा व्रतकी ही रक्षा हो सकती है और न अष्ट मूलगुण ही रह सकते हैं। रातके खानेमें केवल इतनी ही बुराई नहीं है। कभी-कभी तो विषैले जन्तुओंके संसर्गसे दूषित भोजनके कर लेनेपर जीवनका ही अन्त हो जाता है। जैसा कि एक बार लाहौरमें एक दावतमें चायके साथ छिपकलीके भी चुर जानेसे बहुत-से आदमी उसे पीकर बेहोश हो गये थे। यदि मकड़ी भोजनमें चली जाये तो कोढ़ पैदा कर देती है। यदि बालोंकी जूं पेटमें चली जाये तो जलोदर रोग हो जाता है। अतः दिनमें सूर्यके प्रकाशमें ही भोजन करना चाहिए।

गृहस्थको चाहिए कि जो अपने आश्रित हों पहले उनको भोजन कराये पीछे स्वयं भोजन करे ॥३२६॥ अचार, पानक, धान्य, फूल, मूल, फल और पत्तोंके जीवोंकी योनि होनेसे ग्रहण नहीं करना चाहिए। तथा जिसमें जीवोंका वास हो ऐसी वस्तु भी काममें नहीं लानी चाहिए ॥ ३२७ ॥

**भावार्थ**—अधिक दिनोंका मुरब्बा, अचार, मद्य और मांसके तुल्य हो जाता है अतः मर्यादाके भीतर ही उसका सेवन करना चाहिए। पेय भी सब ताजे और साफ होने चाहिए। अनाज घुना हुआ नहीं होना चाहिए और न इतना अन्न संग्रह ही करना चाहिए कि घुन लग जाये। फल, फूल, शाक-सब्जी वगैरह भी शोध कर ही काममें लाना चाहिए। गली सड़ी हुई या कीड़ा खायी सब्जी प्रत्येक दृष्टिसे अभक्ष्य है।

जिनागममें कोई वस्तु अकेली त्याज्य बतलायी है, कोई वस्तु किसीके साथ मिल जानेसे त्याज्य हो जाती है। कोई सर्वदा त्याज्य होती है और कोई अमुक काल, अमुक देश और अमुक दशामें त्याज्य होती है ॥३२८॥

## अहिंसा पालनके लिए अन्य आवश्यक बातें

जिसके बीचमें छिद्र रहते हैं ऐसे कमलडंडी वगैरह शाकोंको नहीं खाना चाहिए।

---

१. केवलम्। २. संयुक्तम्। ३. निरपवादम्। 'अमिश्रं मिश्रसंसर्गि...।' —धर्मरत्ना०, पृ० ८५ उ०। 'जातिदुष्टं क्रियादुष्टं कालाश्रयविदूषितम्। संसर्गाश्रयदुष्टं च सहृल्लेखं स्वभावतः ॥' तथा— 'भावदुष्टं क्रियादुष्टं कालदुष्टं तथैव च। संसर्गदुष्टं च तथा वर्जयेद्यज्ञकर्मणि ॥' —वृद्ध हारीत—११, १२२-१२३ ॥ ४. 'सन्धानपानकफलं दलमूलपुष्पं जीवैरुपद्रुतमपीह च जीवयोनिः। नालीनलादिसुषिरं च यदस्ति मध्ये यच्चाप्यनन्तमनुरूपमदः समुज्झ्यम् ॥ ४६ ॥' —धर्मरत्ना०, पृ० ८५ उ०। 'नालीसूरण-कालिन्दद्रोणपुष्पादि वर्जयेत्। आजन्म तद्भुजां ह्यल्पं फलं घातश्च भूयसाम् ॥१६॥' —सागारधर्मा० ५ अ०।

अनन्तकायिकप्रायं वल्लीकन्दादिकं[1][2] त्यजेत् ॥३२९॥
द्विदलं[3] द्विदलं[4] प्राश्यं प्रायेणानवतां गतम् ।
शिम्बयः[5] सकलास्त्याज्याः साधिताः सकलाश्च याः ॥३३०॥
तत्राहिंसा कुतो यत्र बह्वारम्भपरिग्रहः ।
वञ्चके च कुशीले च नरे नास्ति दयालुता ॥३३१॥
शोकसंतापसंक्रन्दपरिदेवनदुःखधीः ।
भवन्स्वपरयोर्जन्तुरसद्वेद्याय[6] जायते ॥३३२॥
कषायोदयतीव्रात्मा भावो यस्योपजायते ।
जीवो जायेत चारित्रमोहस्यासौ[7] समाश्रयः ॥३३३॥

---

और जो अनन्तकाय हैं, जैसे लता, सूरण वगैरह, उन्हें भी नहीं खाना चाहिए ॥ ३२९ ॥

पुराने मूंग, उड़द, चना वगैरहको दलनेके बाद ही खाना चाहिए, बिना दले सारा मूंग, सारा उड़द वगैरह नहीं खाना चाहिए । और जितनी साबित फलियाँ हैं चाहे वे कच्ची हों या आगपर पकायी गयी हों, उन्हें नहीं खाना चाहिए । उन्हें खोलकर शोधनेके बाद ही खाना चाहिए ॥३३०॥ जहाँ बहुत आरम्भ और बहुत परिग्रह है वहाँ अहिंसा कैसे रह सकती है ? तथा ठग और दुराचारी मनुष्यमें दया नहीं होती ॥ ३३१ ॥

**भावार्थ**—बहुत आरम्भ करनेवाले और बहुत परिग्रह रखनेवाले कभी अहिंसक हो ही नहीं सकते क्योंकि आरम्भ और परिग्रह हिंसाका मूल है । इसीलिए सागारधर्मामृतमें लिखा है कि जो सन्तोष धारण करके अल्प आरम्भ करता है और अल्पपरिग्रह रखता है उसीका मन शुद्ध रहता है और वही अहिंसाणुव्रतका पालन कर सकता है । इसी तरह व्यभिचारी और ठग भी निर्दय हो जाते हैं । जो दूसरोंको सताते हैं, खूब क्रोध वगैरह करते हैं उनके परिणाम भी सदा खराब रहते हैं और उससे उन्हें अशुभ कर्मका बन्ध होता है ।

जो मनुष्य स्वयं शोक करता है तथा दूसरोंके शोकका कारण बनता है, स्वयं सन्ताप करता है तथा दूसरोंके संतापका कारण बनता है, स्वयं रोता है तथा दूसरोंको रुलाता या कलपाता है, स्वयं दुःखी होता है और दूसरोंको दुःखी करता है, वह असातावेदनीय कर्मका बन्ध करता है ॥३३२॥ जिसके कषायके उदयसे अति संक्लिष्ट परिणाम होते हैं वह जीव चारित्रमोहनीय कर्मका बन्ध करता है ॥३३३॥

---

'सन्धानं पुष्पितं मिश्रं पुष्पं मूलं फलं दलम् । तथान्तर्विवरप्रायं हेयं नालीनलादि यत् ॥४९॥' —प्रबोधसार ।

१. गुडूच्यादि । २. सूरणादि । ३. द्विदलं द्विदलं हेयं···।—धर्मरत्ना०, पृ० ८५ उ० । माषमुद्गादि । ४. द्विखण्डम् । 'आमगोरससम्पृक्तं द्विदलं प्रायशोऽनवम् । वर्षास्वदलितं चात्र पत्रशाकं च नाहरेत् ॥१८॥' —सागारधर्मा० ५ अ० । 'बहुशोऽनन्तदेहास्त्वमृतवल्ल्यादिसंश्रया ॥ शिम्बयोऽपि न हि प्राश्या यतस्तास्त्रससंहिताः ॥५०॥' —प्रबोधसार । ५. 'सिधयः' अ० ज० । सिद्धयः मु० । फलयः । ६. 'दुःखशोकतापाक्रन्दनवधपरिदेवनान्यात्मपरोभयस्थानान्यसद्वेद्यस्य' —तत्त्वार्थसूत्र० ६-११ । ७. 'कषायोदयात्तीव्रपरिणामश्चारित्रमोहस्य' —तत्त्वार्थसूत्र ६-१४ ।

[1]मैत्रीप्रमोदकारुण्यमाध्यस्थानि यथाक्रमम् ।
सत्त्वे गुणाधिके क्लिष्टे निर्गुणेऽपि च भावयेत् ॥३३४॥
[2]कायेन मनसा वाचाऽपरे सर्वत्र देहिनि ।
अदुःखजननी वृत्तिर्मैत्री मैत्रीविदां मता ॥३३५॥
तपोगुणाधिके पुंसि प्रश्रयाश्रयनिर्भरः ।
जायमानो मनोरागः प्रमोदो विदुषां मतः ॥३३६॥
दीनाभ्युद्धरणे बुद्धिः कारुण्यं करुणात्मनाम् ।
हर्षामर्षोज्झिता वृत्तिर्माध्य[3]स्थ्यं निर्गुणात्मनि ॥३३७॥
इत्थं प्रयतमानस्य गृहस्थस्यापि देहिनः ।
करस्थो जायते स्वर्गो नास्य दूरे च तत्पदम् ॥३३८॥
पुण्यं तेजोमयं प्राहुः प्राहुः पापं तमोमयम् ।
तत्पापं पुंसि किं तिष्ठेद्दयादीधितिमालिनि ॥३३९॥
सा क्रिया कापि नास्तीह यस्यां हिंसा न विद्यते ।
विशिष्येते परं भावावत्र मुख्यानुषङ्गिकौ ॥३४०॥
[4]अघ्नन्नपि भवेत्पापी निघ्नन्नपि न पापभाक् ।
अभिध्यानविशेषेण यथा धीवरकर्षकौ ॥३४१॥

## मैत्री, प्रमोद, कारुण्य और माध्यस्थ्य भावनाका स्वरूप

सब जीवोंसे मैत्री भाव रखना चाहिए। जो गुणोंमें अधिक हों उनमें प्रमोद भाव रखना चाहिए। दुःखी जीवोंके प्रति करुणा भाव रखना चाहिए। और जो निर्गुण हों, असभ्य और उद्धत हों उनके प्रति माध्यस्थ्य भाव रखना चाहिए ॥ ३३४ ॥ 'अन्य सब जीवोंको दुःख न हो' मन, वचन और कायसे इस प्रकारका बर्ताव करनेको मैत्री कहते हैं ॥३३५॥ तप आदि गुणोंसे विशिष्ट पुरुषको देखकर जो विनयपूर्ण हार्दिक प्रेम उमड़ता है उसे प्रमोद कहते हैं ॥३३६॥ दयालु पुरुषोंकी गरीबोंका उद्धार करनेकी भावनाको कारुण्य कहते हैं। और उद्धत तथा असभ्य पुरुषोंके प्रति राग और द्वेषके न होनेको माध्यस्थ्य कहते हैं ॥३३७॥ जो प्राणी गृहस्थ होकर भी इस प्रकारका प्रयत्न करता है, स्वर्ग तो उसके हाथमें है और मोक्ष भी दूर नहीं है ॥ ३३८ ॥ पुण्यको प्रकाशमय कहते हैं और पापको अन्धकारमय कहते हैं। दयारूपी सूर्यके होते हुए क्या पुरुषमें पाप ठहर सकता है ? ॥ ३३९ ॥ ऐसी कोई क्रिया नहीं है जिसमें हिंसा नहीं होती। किन्तु हिंसा और अहिंसाके लिए गौण और मुख्य भावोंकी विशेषता है ॥३४०॥ संकल्पमें भेद होनेसे धीवर नहीं मारते हुए भी पापी है और किसान मारते हुए भी पापी नहीं है ॥३४१॥

---

१. 'मैत्रीप्रमोदकारुण्यमाध्यस्थानि च सत्त्वगुणाधिकक्लिश्यमानाविनयेषु' —तत्त्वा० सू० ७-११। २. 'परेषां दुःखानुत्पत्त्यभिलाषो मैत्री। वदनप्रसादादिभिरभिव्यज्यमानान्तर्भक्तिरागः प्रमोदः। दीनानुग्रहभावः कारुण्यम्। रागद्वेषपूर्वकपक्षपाताभावो माध्यस्थम्।' —सर्वार्थसिद्धि ७-११। उक्तं—'कायेन मनसा वाचा सर्वेष्वपि च देहिषु।' —धर्मर०, प० ९६ पू०। ३. माध्यस्थं समुदाहृतं ॥५९॥ —धर्मर० प० ८६ पू०। ४. 'आरम्भेऽपि सदा हिंसां सुधीः साङ्कल्पिकीं त्यजेत्। घ्नतोऽपि कर्षकादुच्चैः पापोऽघ्नन्नपि धीवरः ॥२२॥' —सागारधर्मा०, अ० २। 'मृतेऽपि न भवेत् पापममृतेऽपि भवेद्ध्रुवम्। पापधर्मविधाने हि स्वान्तं हेतुः शुभाशुभम् ॥५६॥' —प्रबोधसार।

**कस्यचित्सन्निविष्टस्य दारान्मातरमन्तरा।**
**वपुःस्पर्शाविशेषेऽपि शेमुषी तु विशिष्यते ॥३४२॥**

**तदुक्तम्—**

*"परिणाममेव कारणमाहुः खलु पुण्यपापयोः कुशलाः।*
*तस्मात्पुण्योपचयः पापापचयश्च सुविधेयः" ॥३४३॥*

—आत्मानुशासन, श्लो० २३।

**वपुषो वचसो वापि शुभाशुभसमाश्रया।**
**क्रिया चित्तादचिन्त्येयं तदत्र प्रयतो भवेत् ॥३४४॥**
**क्रियान्यत्र[2] क्रमेण स्यात्कियत्स्वेव च वस्तुषु।**
**जगत्त्रयादपि स्फारा चित्ते तु क्षणतः क्रिया ॥३४५॥**

---

**भावार्थ**—हिंसा और अहिंसाका विवेचन करते हुए पहले बतला आये हैं कि किसीका घात हो जानेसे ही हिंसाका पाप नहीं लगता। संसारमें सर्वत्र जीव पाये जाते हैं और वे अपने निमित्तसे मरते भी हैं फिर भी मात्र इतनेसे ही उसे हिंसा नहीं कह सकते। वास्तवमें तो हिंसा रूप परिणाम ही हिंसा है। जहाँ हिंसारूप परिणाम है वहाँ किसी अन्यका घात न होनेपर भी हिंसा होती है और जहाँ हिंसारूप परिणाम नहीं है वहाँ अन्यका घात हो जानेपर भी हिंसा नहीं होती। उदाहरणके लिए धीवर और किसानको उपस्थित किया जा सकता है। एक मच्छीमार धीवर मछली मारनेके उद्देश्यसे पानीमें जाल डालकर बैठा है। उसके जालमें एक भी मछली नहीं आ रही है फिर भी धीवर हिंसक है क्योंकि उसके परिणाम मछली मारनेमें लगे हैं। दूसरी ओर एक किसान है वह अन्न उपजानेकी भावनासे खेतमें हल चलाता है। हल चलाते समय बहुतसे जीव उसके हलसे मरते जाते हैं किन्तु उसका भाव जीवोंके मारनेका नहीं है बल्कि खेत जोत-बोकर अन्न उत्पन्न करनेका है अतः वह मारते हुए भी पापी नहीं है। इसीलिए गृहस्थको सबसे पहले संकल्पी हिंसाका त्याग करना आवश्यक बतलाया है।

एक आदमी पत्नीके समीप बैठा है और एक आदमी माताके समीप बैठा है। दोनों ही नारीके अंगका स्पर्श करते हैं किन्तु दोनोंकी भावनाओंमें बड़ा अन्तर है ॥३४२॥

कहा भी है—

'कुशल मनुष्य परिणामोंको ही पुण्य और पापका कारण बतलाते हैं। अतः पुण्यका संचय करना चाहिए और पापकी हानि करनी चाहिए' ॥३४३॥

मनके निमित्तसे ही शरीर और वचनकी क्रिया भी शुभ और अशुभ होती है। मनकी शक्ति अचिन्त्य है। इसलिए मनको ही शुद्ध करनेका प्रयत्न करो ॥३४४॥ शरीर और वचनकी क्रिया तो क्रमसे होती हैं और कुछ ही वस्तुओंको अपना विषय बनाती हैं। किन्तु मनमें तो तीनों लोकोंसे भी बड़ी क्रिया क्षण-भरमें हो जाती है। अर्थात् मन एक क्षणमें तीनों लोकोंके बारेमें सोच सकता है ॥३४५॥

---

१. 'भावशुद्धिर्मनुष्याणां विज्ञेया सर्वकर्मसु। अन्यथा चुम्ब्यते कान्ता भावेन दुहितान्यथा ॥' —सुभाषितावलि, पृ० ४९३। २. काये वचसि च।

तथा च लोकोक्तिः—

> *"एकस्मिन्मनसः कोणे पुंसामुत्साहशालिनाम् ।*
> *अनायासेन संमान्ति भुवनानि चतुर्दश"* ॥३४६॥
> **भूपयःपवनाग्नीनां तृणादीनां च हिंसनम् ।**
> **यावत्प्रयोजनं स्वस्य तावत्कुर्यादजन्तु यत्** ॥३४७॥
> **ग्रामस्वामिस्वकार्येषु यथालोकं प्रवर्तताम् ।**
> **गुणदोषविभागेऽत्र लोक एव यतो गुरुः** ॥३४८॥
> **दर्पेण वा प्रमादाद्वा द्वीन्द्रियादिविराधने ।**
> **प्रायश्चित्तविधिं कुर्याद्यथादोषं यथागमम्** ॥३४९॥

---

इसी विषयमें एक कहावत भी है—

'उत्साही मनुष्योंके मनके एक कोनेमें बिना किसी प्रयासके चौदह भुवन समा जाते हैं' ॥ ३४६ ॥

**भावार्थ**—पहले बतला आये हैं कि जो काम अच्छे भावोंसे किया जाता है उसे अच्छा कहते हैं और जो काम बुरे भावोंसे किया जाता है उसे बुरा कहते हैं। अतः वचनकी और कायकी क्रिया तभी अच्छी कही जायेगी जब उसके कर्ताके भाव अच्छे हों। अच्छे इरादेसे बच्चोंको पीटना भी अच्छा है और बुरे इरादेसे उन्हें मिठाई खिलाना भी अच्छा नहीं है। अतः मनकी खराबीसे वचनकी और कायकी क्रिया खराब कही जाती है और मनकी अच्छाईसे अच्छी कही जाती है। इसीलिए मनकी शक्तिको अचिन्त्य बतलाया है। मन एक ही क्षणमें दुनिया-भर की बातें सोच जाता है किन्तु जो कुछ वह सोच जाता है उसे एक क्षणमें न कहा जा सकता है और न किया जा सकता है। अतः मनका सुधार करना चाहिए।

पृथ्वी, जल, हवा, आग और तृण वगैरहकी हिंसा उतनी ही करनी चाहिए जितनेसे अपना प्रयोजन हो ॥३४७॥

**भावार्थ**—जीव दो प्रकारके बतलाये हैं त्रस और स्थावर। त्रस जीवोंकी हिंसा न करनेके विषयमें ऊपर कहा गया है। स्थावर जीवोंकी भी उतनी ही हिंसा करनी चाहिए जितनेके बिना सांसारिक काम न चलता हो। व्यर्थ जमीनका खोदना, पानीको व्यर्थ बहाना, व्यर्थ हवा करना व आग जलाना और बिना जरूरतके पेड़-पत्तोंको तोड़ना आदि काम नहीं करना चाहिए। आशय यह है कि मिट्टी, पानी, हवा, आग और सब्जीका भी दुरुपयोग नहीं करना चाहिए।

नागरिक कार्योंमें, स्वामीके कार्योंमें और अपने कार्योंमें लोकरीतिके अनुसार ही प्रवृत्ति करनी चाहिए, क्योंकि इन कार्योंकी भलाई और बुराईमें लोक ही गुरु है। अर्थात् लौकिक कार्योंको लोकरीतिके अनुसार ही करना चाहिए ॥३४८॥

## प्रायश्चित्तका विधान

मदसे अथवा प्रमादसे द्वीन्द्रिय आदि त्रस जीवोंका घात हो जानेपर दोषके अनुसार आगममें बतलायी गयी विधिपूर्वक प्रायश्चित्त करना चाहिए ॥३४९॥

---

१. —दजन्तुजित्—सागारधर्मा० पृ० १२२। –दयं तु यत् मु०।

प्राय[1] इत्युच्यते लोकस्तस्य चित्तं मनो भवेत् ।
एतच्छुद्धिकरं कर्म प्रायश्चित्तं[2] प्रचक्षते ॥३५०॥
द्वादशाङ्गधरोऽप्येको न कृच्छ्रं दातुमर्हति ।
तस्माद्बहुश्रुताः प्राज्ञाः प्रायश्चित्तप्रदाः स्मृताः ॥३५१॥
मनसा कर्मणा वाचा यद्दुष्कृतमुपार्जितम् ।
मनसा कर्मणा वाचा तत् तथैव विहापयेत् ॥३५२॥
आत्मप्रदेशपरिस्पन्दो[3] योगो योगविदां मतः ।
मनोवाक्कायतस्त्रेधा पुण्यपापास्रवाश्रयः ॥३५३॥

## प्रायश्चित्तका स्वरूप

'प्रायः' शब्दका अर्थ ( साधु ) लोक है । उसके मनको चित्त कहते हैं । अतः साधु लोगोंके मनको शुद्ध करनेवाले कामको प्रायश्चित्त कहते हैं ॥३५०॥

## प्रायश्चित्त देनेका अधिकार

द्वादशांगका पाठी होनेपर भी एक व्यक्ति प्रायश्चित्त देनेका अधिकारी नहीं है । अतः जो बहुश्रुत अनेक विद्वान् होते हैं वे ही प्रायश्चित्त देते हैं ॥३५१॥

मनके द्वारा, वचनके द्वारा अथवा कायके द्वारा जो पाप किया है उसे मनके द्वारा, वचन के द्वारा अथवा कायके द्वारा ही छुड़वाना चाहिए ॥३५२॥

## योगका स्वरूप, भेद और कार्य

योगके ज्ञाता पुरुष आत्माके प्रदेशोंके हलन-चलनको योग कहते हैं । वह योग मन, वचन और कायके भेदसे तीन प्रकारका होता है और उसीके निमित्तसे पुण्यकर्म और पापकर्मका आस्रव होता है ॥३५३॥

**भावार्थ**—जीवकाण्ड गोमट्टसारमें योगका स्वरूप इस प्रकार बतलाया है—पुद्गल विपाकी शरीर नाम कर्मके उदयसे मन, वचन और कायसे युक्त जीवकी जो शक्ति कर्मोंके ग्रहण करनेमें कारण है उसे योग कहते हैं । इस योग शक्तिके द्वारा जीव शरीर, वचन और मनके योग्य पुद्गल वर्गणाओंका ग्रहण करता है और उनके ग्रहण करनेसे आत्माके प्रदेशोंमें कम्पन होता है । यदि वह कम्पन काय-वर्गणाके निमित्तसे होता है तो उसे काययोग कहते हैं, यदि वचन वर्गणाके निमित्तसे होता है तो उसे वचनयोग कहते हैं और यदि मनोवर्गणाके निमित्तसे होता है तो मनोयोग कहते हैं । इन योगोंके होनेपर जीवके पुण्य और पाप कर्मोंका आस्रव होता है । ये तीनों योग शुभ और अशुभके भेदसे दो प्रकारके होते हैं ।

१. 'प्रायः साधुलोकः, प्रायस्य यस्मिन् कर्मणि चित्तं तत्प्रायश्चित्तम् । अपराधो वा प्रायः, चित्तं शुद्धिः, प्रायस्य चित्तं प्रायश्चित्तम् अपराधविशुद्धिरित्यर्थः ।' —तत्त्वार्थवार्तिक, पृ० ६२० । भगवती आराधना ( गा० ५२९ ) की अपराजिता टीकामे उद्धृत है—'चित्तशुद्धिकरं कर्म प्रायश्चित्तमिति स्मृतम्' ।। उसी गाथाकी मूलाराधना टीकामें भी उद्धृत है—'तच्चित्तग्राहकं कर्म प्रायश्चित्तमितीरितम्' ।। किन्तु अनगारधर्मामृत टीका ( पृ० ४९५ ) मे उपासकाध्ययनवाले पाठको लिये हुए ही उद्धृत है । 'तदुक्तम्—प्रायो लोको जिनैरुक्तश्चित्तं तस्य मनो मतम् । तच्चित्तग्राहकं कर्म प्रायश्चित्तं निगद्यते' ॥६४॥—धर्मरत्ना०, पृ० ८७ पू० । २. प्रायश्चित्तम् । ३. 'आत्मप्रदेशपरिस्पन्दो योगः । स निमित्तभेदेन त्रिधा भिद्यते । काययोगो वाग्योगो मनोयोग इति' । —सर्वार्थसिद्धि ६-१ ।

हिंसनाब्रह्मचौर्यादि[1] काये कर्माशुभं विदुः ।
असत्यासभ्यपारुष्यप्रायं वचनगोचरम् ॥३५४॥
[2]मदेर्ष्यासूयनादि स्यान्मनोव्यापारसंश्रयम् ।
[3]एतद्विपर्ययाज्ज्ञेयं शुभमेतेषु तत्पुनः ॥३५५॥
[4]हिरण्यपशुभूमीनां कन्याशय्यान्नवाससाम् ।
दानैर्बहुविधैश्चान्यैर्न पापमुपशाम्यति ॥३५६॥
लङ्घनौषधसाध्यानां व्याधीनां बाह्यको विधिः ।
यथाकिञ्चित्करो लोके तथा पापोऽपि मन्यताम् ॥३५७॥
निहत्य निखिलं पापं मनोवाग्देहदण्डनैः ।
करोतु सकलं कर्म दानपूजादिकं ततः ॥३५८॥
आप्रवृत्तेर्निवृत्तिर्मे सर्वस्येति कृतक्रियः ।
संस्मृत्य गुरुनामानि कुर्यान्निद्रादिकं विधिम् ॥३५९॥

## शुभाशुभ योग

हिंसा करना, कुशील सेवन करना, चोरी करना आदि कायसम्बन्धी अशुभ कर्म जानना चाहिए। झूठ बोलना, असभ्य वचन बोलना और कठोर वचन बोलना आदि वचनसम्बन्धी अशुभ कर्म जानना चाहिए ॥३५४॥ घमण्ड करना, ईर्ष्या करना, दूसरोंकी निन्दा करना आदि मनो-व्यापार सम्बन्धी अशुभ कर्म हैं। तथा इससे विपरीत करनेसे काय, वचन और मन सम्बन्धी शुभ कर्म जानना चाहिए। अर्थात् हिंसा न करना, चोरी न करना, ब्रह्मचर्य पालन करना आदि कायिक शुभ कर्म हैं। सत्य और हित मित वचन बोलना आदि वचन सम्बन्धी शुभ कर्म हैं। अर्हन्त आदि की भक्ति करना, तपमें रुचि होना, ज्ञान और ज्ञानियोंकी विनय करना आदि मानसिक शुभ कर्म हैं ॥३५५॥

## पापसे बचनेका उपाय

सोना, पशु, जमीन, कन्या, शय्या, अन्न, वस्त्र तथा अन्य अनेक वस्तुओंके दान देनेसे पाप शान्त नहीं होता ॥३५६॥ जो रोग उपवास करने और औषधीका सेवन करनेसे दूर होते हैं जैसे उनके लिए केवल बाह्य उपचार व्यर्थ होता है वैसे ही पापके विषयमें भी समझना चाहिए। अर्थात् मन वचन और कायको वशमें किये बिना केवल बाह्य वस्तुका त्याग कर देने मात्रसे पाप रूपी रोग शान्त नहीं होता ॥३५७॥ इसलिए पहले मन, वचन और कायको वशमें करके समस्त पापके कारणोंको दूर करो। फिर दान-पूजा वगैरह सब काम करो ॥३५८॥

## रात्रिका कर्तव्य

रात्रिको जब सोओ तो सन्ध्याकालका कृतिकर्म करके यह प्रतिज्ञा करो कि जबतक मैं गार्हस्थिक कार्योंमें फिरसे न लगूँ तबतकके लिए मेरे सबका त्याग है। और फिर पञ्च नमस्कार

१. 'प्राणातिपातं स्तैन्यं च परदारानथापि च। त्रीणि पापानि कायेन नित्यशः परिवर्जयेत् ॥ असत्प्रलापं पारुष्यं पैशुन्यमनृतं तथा। चत्वारि वाचा राजेन्द्र न जल्पेन्नापि चिन्तयेत् ॥ अस्पृहां परवित्तेषु सर्वसत्त्वेषु सौहृदम्। कर्मणां फलमस्तीति मनसा त्रिविधं चरेत्' ॥ —सुभाषितावली, पृ० ४९२-४९३। 'स्तेयाब्रह्महिंसादि पापं देहाश्रितं विदुः। पैशुन्यासत्यपारुष्यप्रायं भाषोद्भवं तथा ॥५८॥' —प्रबोधसार।

दैवादायुर्विरामे स्यात्प्रत्याख्यानफलं[1] महत् ।
भोगशून्यमतः कालं[2] नावहेद्व्रतं व्रती ॥३६०॥
एका जीवदयैकत्र परत्र सकलाः क्रियाः ।
परं फलं तु पूर्वत्र[3] कृषेश्चिन्तामणेरिव ॥३६१॥
आयुष्मान्सुभगः श्रीमान्सुरूपः कीर्तिमान्नरः ।
अहिंसाव्रतमाहात्म्यादेकस्मादेव जायते ॥३६२॥

श्रूयतामत्र हिंसाफलस्योपाख्यानम्—अवन्तिदेशेषु सकललोकमनोहरागमारामे शिरीषग्रामे मृगसेनाभिधानो मत्स्यबन्धः स्कन्धावलम्बितगलजालाद्युपकरणः[4] पृथुरोमसमानयनोपनीतविहरणः[5] कल्लोलजलप्लावितकूलशालेयमालवप्रां[6] सिप्रां सरितमनुसरन्नशेषमहर्षिपरिषद्धृ[7]यमखिलमहाभागभूपतिपरिकल्पितसपर्यं मिथ्यात्वविरहितधर्मचर्यं[8] श्रीयशोधराचार्यं निचाय्य[9] समासन्नसुकृतासाद्यहृदयत्वाद्दूरादेव परित्यक्तपापसंपादनोपकरणग्रामः[10] [11]ससंभ्रमं संपादितदीर्घप्रणामः प्रकामप्रगलदेनाः समाहितमनाः 'साधुसमाजसत्तम, समस्तमहामुनिजनोत्तम, दैवादुपपन्नपुण्यगृह्याभावोऽनुगृह्यतां कस्यचिद्व्रतस्य प्रदानेनायं जनः' इत्यभाषत ।

मंत्रका स्मरण करके निद्रा वगैरह ले ॥३५९॥ क्योंकि दैववश यदि आयु समाप्त हो जाये तो त्यागसे बड़ा लाभ होता है । इसलिए व्रतीको चाहिए कि जिस कालमें वह भोग न करता हो उस कालको बिना व्रत के न जाने दे । अर्थात् उतने समयके लिए भोगका व्रत ले ले ॥३६०॥

## जीव दयाका महत्त्व

अकेली जीव दया एक ओर है और बाकीकी सब क्रियाएँ दूसरी ओर हैं । अर्थात् अन्य सब क्रियाओंसे जीव दया श्रेष्ठ है । अन्य सब क्रियाओंका फल खेतीकी तरह है और जीवदयाका फल चिन्तामणि रत्नकी तरह है—जो चाहो सो मिलता है । अकेले एक अहिंसा व्रतके प्रतापसे ही मनुष्य चिरजीवी, सौभाग्यशाली, ऐश्वर्यवान्, सुन्दर और यशस्वी होता है ॥३६१-३६२॥

## १३ अहिंसाव्रतके पालक मृगसेन धीवरकी कथा

अब अहिंसाव्रतके फलके सम्बन्धमें एक कथा सुनें—

अवन्ति देशके शिरीष नामक गाँवमें मृगसेन नामका धीवर रहता था । एक दिन वह कन्धेपर जाल रखकर मछली लानेके लिए सिप्रा नदीकी ओर चला । रास्तेमें उसने मुनियोंकी परिषद्के बीचमें बैठे हुए तथा राजाओंसे पूजित और मिथ्यात्वसे रहित धर्मका आचरण करनेवाले आचार्य श्री यशोधरको देखा । अपने पापार्जनमें सहायक जाल वगैरह उपकरणोंको दूरसे ही छोड़कर वह आचार्यके पास गया और जल्दीसे साष्टांग नमस्कार करके बड़ी धीरताके साथ बोला–'हे साधु-समाजमें श्रेष्ठ और समस्त महामुनियोंमें उत्तम मुनिराज ! आज भाग्यसे ही पुण्य संचयका यह अवसर मिला है अतः कोई व्रत देकर मुझे अनुगृहीत करें ।'

---

१. संन्यासफलम् । २. नियमं विना कालं न गमयेत् । ३. अन्यासां क्रियाणां फलं कृषिवत्, दयायास्तु चिन्तामणिवत् । ४. मत्स्य । ५. कृत । ६. प्लावित ज० । ७. वृक्षश्रेणितटाम् । ८. मिथ्यात्वेन विरहिता धर्मचर्या चारित्रं यस्य स तम् । ९. अवलोक्य । १०. समूहः । ११. सादरम् ।

भगवान्—'ननु कथमस्य [1]पयःपतङ्गस्येव सदैव [2]शकुलिविनाशनिःशूकाशयवशस्य [3]व्रतग्रहणोपदेशे प्रवीणमन्तःकरणमभूत्। अस्ति हि लोके प्रवादः, न खलु प्रायेण प्राणिनां प्रकृतेर्विकृतिरायत्यां[4] शुभमशुभं वा विना भवति' इत्युपयुक्तावधिः सम्यगवबुद्धसंविधैतज्जीवितावधि[6]स्तमेवमवादीत्—'अहो शुभाशयायतन, अद्यतनाहनि यस्तवानायेवानायि[7][8] मीनः समापतति स त्वया न प्रमापयितव्यः[9]। यावच्चात्म[10]वृत्तिविषयमामिषं न प्राप्नोषि तावत्तव तन्निवृत्तिः[11]। अयं पुनः पञ्चत्रिंशदक्षरपवित्रो मन्त्रः सर्वदा सुस्थितेन दुःस्थितेन च त्वया ध्यातव्यः' इति।

मृगसेनः—'यथादिशति बहुमानस्तथास्तु' इत्यभिनिविश्य[12] तां शैव[13]लिनीमनुसृत्य जनितजालक्षेपो[14]ऽकालक्षेपमतनु[15]करणं[16] वैसारिणमासाद्य स्मृतव्रतस्तस्य[17] [18]श्रवसि चिह्नाय[19] चीरचीरीं[20] निबध्यात्याक्षीत्[21]। पुनरपरावकाशे[22] तीरिणीप्रदेशे तथैवादूरतरशर्मा समाचरितकर्मा [23]तमेवाषडक्षीणमक्षीणायुषमवाप्यामुञ्चत। तदेवमेतस्मिन्ननणिष्ठे पाठीनवरिष्ठे पञ्चकृत्वो लग्ने विपदमग्ने मुच्यमाने सति, [24]अस्तमस्तकमध्यास्त[25] [26]घनघुसृणरसारुणितवरुणपुरपुरन्ध्रीकपोलकान्तिशाली गभस्तिमाली[27]। तदनु तं गृहीतव्रतापरित्यागमोदमानचेतनं मृगसेनमधार्मिकलोकव्यतिरिक्तं[28] रिक्तमागच्छन्तं परिच्छिद्य[29], अतुच्छकोपापरिहार्या तद्भार्या घण्टाख्या यमघण्टेव किमपि कर्णकटु क्वणन्ती कुटीरान्तःश्रितशरीरा निर्विवरं[30]मररं

---

यह सुनकर मुनिराज सोचने लगे—'बगुलेकी तरह सदैव मछलियोंके मारनेमें निःशङ्कचित्त इस धीवरका मन व्रतग्रहण करनेके लिए कैसे हुआ ? लोकमें किंवदन्ती है कि प्रायः उत्तर कालमें होनेवाले शुभाशुभके बिना प्राणियोंका स्वभाव नहीं बदलता' यह सोचकर उन्होंने अवधिज्ञानका उपयोग किया और उसे अल्पायु जानकर बोले—'हे सदाशय ! आज तुम्हारे जालमें जो पहली मछली आये उसे मत मारना। तथा जब तक अपनी जीविकारूप मांस तुम्हें प्राप्त न हो तब तकके लिए तुम्हारे मांसका त्याग है। और यह पैंतीस अक्षरका पवित्र नमस्कार मन्त्र है, सदा सुख-दुःखमें इसका ध्यान करना।'

मृगसेनने 'जो आज्ञा' कहकर व्रत ग्रहण कर लिये और नदीपर जाकर जाल डाल दिया। जल्दी ही उसके जालमें एक बड़ी मछली आ गयी। उसने अपने व्रतको स्मरण करके पहचानके लिए उसके कानमें कपड़ेकी चिन्दी बाँधकर जलमें छोड़ दिया। फिर उसने दूसरे स्थानसे नदीमें जाल डाला किन्तु वही मछली जालमें फिर आ गयी। अतः उसे अवध्य जानकर छोड़ दिया। इस प्रकार पाँच बार वही मछली जालमें आयी और पाँचों बार उसने उसे जलमें छोड़ दिया। इतनेमें प्रचुर केसरसे युक्त स्त्रीके कपोलकी तरह कान्तिवाला सूर्य अस्त हो गया। और मृगसेन स्वीकार किये हुए व्रतका पालन करनेसे प्रसन्नचित्त होता हुआ खाली हाथ घर लौटा।

उसे खाली हाथ आता देखकर उसकी पत्नी घण्टा बड़ी क्रुद्ध हुई और यमराजके घण्टेकी

---

१. बकस्य। २. मत्स्य विनाशे। ३. निर्दयस्य। ४. उत्तरकाले। ५. समीप। ६. मर्यादः। ७. प्रथमतः। ८. जाले। ९. न मारणीयः। १०. स्वकरमानीतम्। ११. मांसस्य नियमः। १२. अभिप्रायं कृत्वा। १३. सिप्रां नदीम्। १४. शीघ्रम्। १५. बृहच्छरीरम्। १६. मत्स्यम्। १७. मत्स्यस्य। १८. कर्णे। १९. अभिज्ञानाय। २०. वस्त्रम्। २१. त्यजति स्म। २२. स्थाने। २३. मत्स्यम्। २४. अस्तपर्वते। २५. आश्रितः। २६. प्रचुरकुङ्कुमयुक्तकपोलवत् शोभमानः। २७. सूर्यः। २८. पृथग्भूतम्। २९. ज्ञात्वा। ३०. निश्छिद्रं कपाटं।

प्रदायास्थात्। मृगसेनोऽपि तया निरुद्धवेश्मप्रवेशनस्तन्मन्त्र[1]स्मरणशक्तचित्तः [2]पुराणतरतरुभित्तमुच्छीर्षं विधाय सान्द्रं [3]निद्रायमाणस्तरुभित्ताभ्यन्तरविनिःसृतेन [4]सरीसृपसुतेन दष्टः कष्टमवस्थान्तरमाविष्टो [5]व्युष्टसमये घण्टया दृष्टः। पुनरनेन सार्धमुषर्बुधमध्यानुगमोचितनिश्चयात्मनि विहितबहुनिन्दया शोचितश्च। ततः सा 'यदेवास्य व्रतं तदेव ममापि। जन्मान्तरे चायमेव मे पतिः' इत्यावेदितनिदाना समित्समिद्धमहसि द्रविणोदसि[7] [8]हव्यसमस्नेहं देहं [9]जुहाव।

अथ विलासिनीविलोचनोत्पलपुनरुक्त[10]वन्दनमालायां विशालायां[11] पुरि विश्वगुणामहादेवीश्वरो विश्वम्भरो विश्वम्भरो नाम नृपतिः धनश्रीपतिः पिता च दुहितुः [12]सुबन्धोर्गुणपालो नाम श्रेष्ठी। तस्य किल गुणपालस्य मनोरथपान्थप्रीतिप्रपापालिकायामेतस्यां [13]कुलपालिकायामनेन मृगसेनेन समापन्नसत्त्वायां[14] सत्याम्, असौ वसुधापतिर्विटकथासंसृष्टतया प्रतिपन्नपाञ्चजनीनभावो[15] नर्मभर्मनाम्नो नर्मसचिवस्य सुताय नर्मधर्मणे गुणपालश्रेष्ठिनमखिलकलाकलापालंकृतरूपसमन्वितां सुतामयाचत। श्रेष्ठी दुष्प्रज्ञेन राज्ञा तथा याचितः 'यदि नर्मसचिवसुताय सुतां वितरामि[16] तदावश्यं कुलक्रमव्यतिक्रमो दुरपवादोपक्रमश्च। अथ [17]स्वामिशासनमतिक्रम्यात्रैवासे तदा सर्वस्वापहारः प्राणसंहारश्च' इति निश्चित्य

तरह गाली-गलौज बकती-झकती अपनी झोपड़ीमें चली गयी और अन्दरसे दरवाजा बन्द करके बैठ गयी।

मृगसेन भी अपनी पत्नीके द्वारा घरमें प्रवेश करनेसे रोक दिये जानेपर पञ्च-नमस्कार मन्त्रका स्मरण करते हुए एक पुराने वृक्षकी जड़को तकिया बनाकर गाढ़ नींदमें सो गया। जब वह गाढ़ नींदमें था तभी उस वृक्षकी जड़से निकलकर एक साँपने उसे डस लिया और वह बड़े कष्टसे मर गया। प्रभात होनेपर घण्टाने उसे उस अवस्थामें देखा। उसने अपनी निन्दा करते हुए बड़ा पश्चात्ताप किया। और उसीके साथ अग्निमें जल जानेका निश्चय किया। तथा उसने निदान किया कि जो इसका व्रत था वही मेरा भी है और दूसरे जन्ममें भी यही मेरा पति हो। उसके बाद उसने आग प्रदीप्त की और उसमें होम सामग्रीके समान स्नेहसे पूरित शरीरको होम दिया।

विशाला नगरीमें विश्वम्भर नामका राजा राज्य करता था। उसकी पटरानीका नाम विश्वगुणा था। वहीं गुणपाल नामका सेठ रहता था। उसकी पत्नीका नाम धनश्री था और पुत्रीका नाम सुबन्धु था। गुणपाल सेठकी पत्नी धनश्री गर्भवती हुई और मृगसेन धीवरका जीव उसके गर्भमें आया। राजा विश्वम्भरको विटोंकी संगतिके कारण भाण्डजन बहुत प्रिय थे। अतः उसने नर्मभर्म नामके विदूषकके पुत्र नर्मधर्मके लिए गुणपालसे उसकी समस्त कलाओंमें प्रवीण सुन्दरी कन्याकी याचना की। दुर्बुद्धि राजाकी इस माँगसे गुणपाल विचारमें पड़ गया। 'यदि विदूषकके पुत्रको कन्या देता हूँ तो अवश्य ही कुलपरम्पराका लंघन होता है और अपवाद भी फैलता है। और यदि राजाज्ञाको न मानकर भी यहाँ रहता हूँ तो सर्वस्व अपहरणके साथ-साथ प्राण भी जाते हैं।' ऐसा सोचकर उसने रत्नजटित करधौनीसे शोभित अपनी पत्नीको तो अपने

१. पञ्चनमस्कार मन्त्र। २. जीर्णवृक्षखण्डकाष्ठम्। ३. निद्रां कुर्वन्। ४. सर्पेण। ५. प्रभातकाले। ६. अग्नि। ७. अग्नौ। ८. घृतवत् चिक्कणम्। ९. आहुतीचकार। १०. तोरण। ११. उज्जयिन्याम। १२. सुबन्धुपुत्रीतातः। १३. भार्यायाम्। १४. गर्भिण्याम्। १५. पाञ्चजनीनः भण्डप्रियः। १६. ददामि। १७. राजादेशम्।

प्रियसुहृदः श्रीदत्तस्य वणिक्पतेर्निकेतने समणिमेखलकलत्रं[1] कलत्रमवस्थाप्य स्वापतेयसारं[2] दुहितरं चात्मसात्कृत्य सुलभकेलिवनवनाशयनिवेशं[3] कौशाम्बीदेशमयासीत्।

अत्रान्तरे श्रीमद्दरिद्रमन्दिरनिर्विशेषमाचरितचर्यापर्यटनौ[4] शिवगुप्तमुनिगुप्तनामानौ मुनी श्रीदत्तप्रतिनिवेशनिवासिनोपासकेन यथाविधिविहितप्रतिग्रहौ कृतोपचारविग्रहौ च तामङ्गणाश्रयां धनश्रियमपश्यताम्।

तत्र मुनिगुप्तभगवान्किल केवलखलिस्नानपरुषवपुषमुद्वमनीयसंगताङ्गाभोगत्विषम[5] वैधव्यचिह्नदवरकमात्रालंकारजुषमाप्तकान्तापत्यपरिजनविरहदेहसादां गर्भगौरवखेदां च शिशिराजस्रवासरवशवर्तिनीं[6] स्थलकमलिनीमिव मलिनच्छविमुदवसितपरिसरे[7] परगृहवासविशीर्यमाणमुखश्रियं[8] धनश्रियं निध्याय[9] 'अहो, महीयसां खलु एनसामावासः कोऽप्यस्याः कुक्षौ महापुरुषोऽवतीर्णः, येनावतीर्णमात्रेणापि दुष्पुत्रेणेयं वराकी इयदावेशां दशामशिश्रियत्' इत्यभाषत। मुनिवृषा[10] शिवगुप्तः—'मुनिगुप्त मैवं भाषिष्ठा यतो यद्यपीयं श्रेष्ठिनी कानिचिद्दिनान्येवम्भूता सती[11] पराधिष्ठाने तिष्ठति, तथाप्येतन्नन्दनेन सकलवणिक्पतिना राजश्रेष्ठिना निरवधिशेव[12]धीश्वरेण विश्वम्भरेश्वरसुतावरेण च भवितव्यम्' इत्यवोचत्।

एतच्च स्वकीयमन्दिरालिन्दगतः[13] श्रीदत्तो निशम्य 'न खलु प्रायेणासत्यमिदमुक्तं भविष्यति महर्षेः' इत्यवधार्य सूचीमुखसर्पवद्दरीहितदत्तचेतोवृत्तिरासीत्। धनश्रीश्च परि-

प्रिय मित्र श्रीदत्त सेठके घरमें रखा और पुत्रीको साथ लेकर बाग-बगीचोंसे शोभित कौशाम्बीपुरीको चला गया।

इसी बीचमें धनी और गरीबके मकानका भेद न करके चर्याके लिए भ्रमण करते हुए शिवगुप्त और मुनिगुप्त नामके दो मुनि श्रीदत्तके मकानके सामनेसे निकले। श्रीदत्तके पड़ोसमें रहनेवाले गृहस्थने उन्हें विधिपूर्वक पड़गाहा। और जब वे भोजन कर चुके तो आँगनमें बैठी हुई धनश्रीपर उनकी दृष्टि पड़ी।

तेलके बिना स्नान करनेसे उसका शरीर रूक्ष हो गया था, केवल दो वस्त्र और सधवाके चिह्न स्वरूप बहुत थोड़े अलंकार पहने हुए थी, पति पुत्री और परिजनोंके वियोगसे उसका शरीर खेद खिन्न था, गर्भके भारसे पीड़ित थी, शीतऋतुके निरन्तर आगमनसे कुम्हलायी हुई स्थलकमलिनीकी तरह उसकी कान्ति मलिन हो गयी थी, दूसरेके घरमें रहनेसे मुखकी शोभा चली गयी थी। घरके आँगनमें बैठी हुई धनश्रीको इस रूपमें देखकर मुनिगुप्त मुनि बोले—'इसकी कोखमें कोई बड़ा पापी महापुरुष आया जान पड़ता है, जिसके गर्भमें आने मात्रसे इस बेचारीकी यह दुर्दशा हुई है।'

यह सुनकर शिवगुप्त मुनि बोले—'मुनिगुप्त! ऐसा मत कहो। यद्यपि यह सेठानी कुछ दिन तक इस तरह पराये घरमें रहेगी, फिर भी इसका पुत्र समस्त वैश्योंका स्वामी और अपार सम्पत्तिशाली राजश्रेष्ठी होगा तथा राजा विश्वम्भरकी पुत्रीको वरण करेगा।'

यह बात अपने मकानके बाहर चबूतरेपर खड़े श्रीदत्तने सुनी। 'मुनियोंका कथन झूठा

१. कलत्रं जघनं भार्या च। २. धनम्। ३. जलाशय। ४. सधननिर्धनगृहसमचित्त। ५. शुक्लवस्त्रयुक्ता अंगत्वक् यस्याः। ६. दिन। ७. गृहाङ्गणे। ८. म्लान। ९. दृष्ट्वा। १०. मुनिश्रेष्ठः। ११. परगृहे। १२. निधि। १३. उत्तरकगतः।

प्राप्तप्रसवदिवसा सती सुतमसूत ।

श्रीदत्तः—[1]'चित्रभानुरिवायमाश्रयाश[2]: खलु बालिशः । [3]तदसंजातस्नेहायामेवास्य जनन्यामुपांशुदण्ड[4]: श्रेयान्' इति परामृश्य प्रसूतिदुःखेनातुच्छमूर्छापाश्रयां धनश्रियमाकलय्य निजपरिजनजरती[5]मुखेन 'प्रमीत[6] एवायं तनयः संजातः' इति प्रसिद्धिं विधायाकार्यं चैकमाचरितोपचारप्रपञ्चं श्वपचं जिह्मवाक्[7]मीरहस्यनिकेतः कृतापायसंकेतस्तं स्तनन्धय[8]मेतस्मै समर्पयामास ।

सोऽपि जनंगमः स्वर्भानु[9]प्रभेण करेण रामर[10]श्मिमिव तं स्तनन्धयमुपरुध्य निःशला[11]कावकाशं देशमाश्रित्य पुण्यपरमाणुपुञ्जमिव शुभशरीरभाजमेनमवेक्ष्य संजातकरुणारसप्रसरप्रसन्नमुखः सुखेन विनिधाय स्वकीय[12]मटीकत । पुनरस्यै[13]वाधरभव[14]भगिनीपतिरशेषापणिक[15]-पणपरमेष्ठी इन्द्रदत्तश्रेष्ठी विक्रयाडम्बरितशण्ड[16]मण्डलाधीनं पेठोपकण्ठगोष्ठीनमनुसृतो वत्सीय[17]-विषयै[18]र्संनीडक्रीडागतगोपालबालकलप[19]नपरम्परालापाद्वत्सतर[20]रतानकसंतानपरिवृतमनेकचन्द्रकान्तोपलान्तरालनिलीनमरुणमणिनिधानमिव तं जात[21]मुपलभ्य स्वयमदृष्टनन्दनवदनत्वात्तद्बुद्ध्या साध्वनुरुध्य 'स्तनन्धयावधानधृतबोधे राधे, तवायं गूढगर्भसंभवस्तनूद्भवः' इति प्रवर्धितप्रसिद्धिर्महान्तमपत्योत्पत्तिमहोत्सवमकार्षीत् ।

---

नहीं होता' यह सोचकर श्रीदत्तने विषधर सर्पकी तरह अपना मन अपने दुष्ट संकल्पकी ओर लगाया।

पूरे दिन होनेपर धनश्रीने पुत्रको जन्म दिया । श्रीदत्तने सोचा—'यह बालक आगकी तरह अपने आश्रयको ही खानेवाला है । इसलिए माताका इसपर स्नेह उत्पन्न होनेके पहले ही इसका गुप्त वध करा डालना श्रेष्ठ है ।' प्रसूतिके कष्टसे धनश्रीको एकदम बेहोश देखकर उसने अपने कुटुम्बकी एक बुढ़ियाके द्वारा यह प्रसिद्ध करा दिया कि बच्चा मरा हुआ ही पैदा हुआ है । और घूस वगैरह देकर एक चाण्डालको इस कार्यके लिए तैयार किया तथा उसे बुलाकर उस कुटिल भाषाके रहस्यमें विशारद श्रीदत्तने उसे मारनेका संकेत करके बालकको सौंप दिया ।

राहुके समान हाथके द्वारा सूर्यके समान उस बालकको उठाकर वह चाण्डाल एकान्त स्थानमें ले गया । वहाँ पुण्य परमाणुओंके पुंजकी तरह इस सुन्दर बालकको देखकर उसे दया आ गयी और प्रसन्नमुख होकर उसने उस बालकको वहीं सुखसे लिटा दिया तथा अपने घर चला आया ।

श्रीदत्तका छोटा बहनोई इन्द्रदत्त श्रेष्ठी व्यापारके लिए उधर गया था । वहाँ उसने शिशुके पास खेलनेके लिए आये हुए ग्वाल-बालकोंके मुखसे उस बालकका समाचार सुना और वह उस स्थानपर गया । वहाँ उसने अनेक बछड़ोंसे घिरे हुए उस शिशुको देखा जो ऐसा प्रतीत होता था, मानो अनेक चन्द्रकान्त मणियोंके बीचमें स्थित लालमणिका खजाना है । उसके कोई पुत्र नहीं था । अतः उसने उसे अपना पुत्र मानकर उठा लिया और पुत्रके लिए अत्यन्त लालायित अपनी पत्नी राधासे बोला—'राधे ! तुम्हारे गूढ़ गर्भसे इस शिशुने जन्म लिया है ।' उसने सर्वत्र यह बात फैला दी और पुत्रोत्पत्तिकी खुशीमें बड़ा भारी उत्सव किया ।

श्रीदत्तने कानों-कान यह समाचार सुना और बच्चेको मार डालनेके विचारसे यमराजकी

---

१. अग्निवत् । २. आश्रयमश्नातीति । ३. तस्मात् कारणात् । ४. गूढवधः । ५. वृद्धा स्त्री । ६. मृत एव जनितः । ७. कुटिलवाणी । ८. बालम् । ६. राहु । १०. चन्द्रम् । ११. एकान्तम् । १२. स्वगृहं गतः । १३. श्रीदत्तस्य । १४. लघुभगिनी । १५. वणिग्व्यवहार । १६. गोकुल । १७. वत्सेभ्यो हितप्रदेशः । १८. समीप । १९. मुख । २०. लघुवत्स । २१. बालम् ।

श्रीदत्तः श्रवणपरम्परया तमेनं वृत्तान्तमुपश्रुत्याश्रित्य च शिशुविनाशनाशयेन कीनाश इव तन्निवेशम् 'इन्द्रदत्त, अयं महाभागधेयो भागिनेयो ममैव तावद्धाम्नि वर्धताम्' इत्यभिधाय सभगिनीकं [1]तोकमात्मावासमानीय पुरावत्क्रूरप्रज्ञः सं[2]ज्ञपनार्थमन्तावसायिने[3] प्रायच्छत। सोऽपि दिवाकीर्तिरुपात्तपुत्रभाण्डः सत्वरमुप[4]ह्वरगह्वरानुसारी समीर[5]वशविगलितघनाम्बरावरणं [6]हरिणकिरणमिव ईक्षणरमणीयं गुणपालतनयमालोक्य सदयहृदयः प्रबलविटपिसंकटे सरित्तटनिकटे परित्यज्य यथायथमश्वक्षीत्[7]।

तत्राप्यसौ पुरोपार्जितपुण्यप्रभावादुपमातृभि[8]रिव [9]एतद्वीक्षणात्क्षरत्क्षीरस्तनीभिरानन्दोदीरितनिर्भरहम्भाध्वनिभिः[10] [11]प्रचारायागताभिः कुण्डोध्नीभिर्व्रज[12]लोकधेनुभिरुपरु[13]द्धसविधभागोऽपदान्तर[14]मागतेन तद्रक्षणदक्षेण गोपालजनेन [15]अस्तावतंस[16]भासिन्यशोकस्तबकसुन्दरे [17]सरोजसुहृदि सति विलोकितः। कथितश्च सकलगोष्ठज्येष्ठाय बल्लवकुलवरिष्ठाय निजाननापहसितारविन्दाय गोविन्दाय। सोऽपि पुत्रप्रेम्णा प्रमोदगरिम्णा चानीय जनितहृदयानन्दायाः सुनन्दायाः समर्पितवान्। अ(क)रोच्चास्येन्दिरामन्दिरस्य[18] धनकीर्तिरिति नाम।

ततोऽसौ क्रमेण मकरन्दपरित्यक्तशैशवदशः कम[19]लेश इव युवजनम[20]नःपण्यतारुण्योत्फुल्लव[21]ल्लवीलोचनालिकुलाव[22]लेह्यलावण्यमकरन्दममन्दानन्दकामदमतिकान्तरूपायतनं यौवनमासादितः पुनरपि प्राज्याज्यवणिज्योपार्जनसज्जागमनेन तेन श्रीदत्तेन दृष्टः। पृष्टश्च गोविन्द-

तरह इन्द्रदत्तके घर आया और बोला—'इन्द्रदत्त ! यह भाग्यशाली भानजा मेरे ही घरमें बड़ा होना चाहिए।' यह कहकर बहिनके साथ बच्चेको अपने घर ले आया और पहलेकी ही तरह मार डालनेके लिए उसे बधिकको दे दिया। वह बधिक भी उस बच्चेको लेकर शीघ्र ही एकान्त गुफाकी ओर चल दिया। हवाके चलनेसे जिसके ऊपरसे मेघपटलका आवरण हट गया है उस चन्द्रमाके समान नयनाभिराम उस बालकको देखकर उसका हृदय भी दयालु हो गया। और नदीके किनारे वृक्षोंके एक झुण्डमें उस बालकको रखकर वह चला गया।

इसके पूर्वोपार्जित पुण्यके प्रभावसे वहाँ भी चरनेके लिए जो गायें आयी थीं वे इसे देखते ही आनन्दसे रंभाती हुई इसके पास चली आयीं और उनके थनोंसे दूध झरने लगा। सन्ध्याके समय जब सूर्य डूबने लगा तो उन गायोंके रखवाले ग्वालोंने यह कौतुक देखा और समस्त ग्वालोंके सरदार गोविन्दसे कहा। पुत्र स्नेह वश आनन्दसे गद्गद होता हुआ गोविन्द भी उस बालकको घर ले आया और अपनी पत्नी सुनन्दाको सौंप दिया। बालकका नाम धनकीर्ति रखा गया।

धीरे-धीरे बचपनको छोड़कर धनकीर्ति असीम आनन्दको देनेवाली तथा अत्यन्त मनोहर रूपकी दात्री युवावस्थाको प्राप्त हुआ। श्री कृष्णकी तरह युवाजनोंके मनको खरीदनेके लिये पण्य रूप तारुण्यसे विकसित गोपिकाओंके लोचनरूपी भ्रमर उसके लावण्यरूपी मकरन्दका पान करनेके लिए आकुल रहते थे। एक दिन घीके व्यापारके निमित्तसे श्रीदत्त उधर आ निकला। उसने देखा और गोविन्दसे पूछा कि यह लड़का उसे कहाँसे मिला ? सुनकर श्रीदत्त बोला—

---

१. पुत्रम्। २. मारणार्थम्। ३. मातंगाय। ४. एकान्त। ५. वायुवशेन। ६. चन्द्रम्। ७. आशु गतवान्। ८. धात्रीभिः। ९. शिशु। १०. हंभा—गोरुतम्। ११. तृणादनार्थम्। १२. गोपाल। १४. समीप। १५. सन्ध्यासमये। १६. भागिन्य—आ०। १७. रवौ। १८. लक्ष्मीगृहस्य। १९. हरिरिव। २०. मनोग्रहणे यत्पण्यं क्रियाणं (?) अर्थप्रायं तारुण्यम्। २१. गोपी। २२. आस्वाद्य।

स्तदवाप्तिप्रपञ्चम्। श्रीदत्तः—'गोविन्द, मदीये सदने किमपि महत्कार्यमात्मजस्य निवेद्यमस्ति। तदयं [1]प्रज्ञुरिमं लेखं ग्राहयित्वा सत्वरं प्रहेतव्यः[2]।' गोविन्दः—'श्रेष्ठिन्, एवमस्तु।' लेखं चैवमलिखत्—'अहो विदितसमस्तपौतवकल[3] महाबल, एष खल्वस्मद्वंशविनाशवैश्वानरोऽवश्यं [4]विष्यो [5]मुशल्यो वा विधातव्यः' इति। धनकीर्तिस्तथा तातवणिक्पतिभ्यामादिष्टः सावष्टम्भं[6] गलालङ्कारसक्तं लेखं कृत्वा गत्वा च [7]जन्मान्तरोपकाराधीनमीनावतारसरसीमेकानसीं[8] तत्प्रवेशपदिरपर्यन्तवर्तिनि[9] वने वर्त्मश्रमापनयनाय [10]पिकप्रियालवालपरिसरे [11]निःसंज्ञमस्वाप्सीत्।

अत्रावसरे विहितपुष्पावचयविनोदा सपरिच्छदा निखिलविद्याविदग्धा[12] पूर्वभवोपकारस्निग्धा संजीवनौषधिसमानानङ्गसेनानामिका गणिका तस्यैव सहकारतरोस्तलमुपढौक्य विलोक्य च निस्पन्दलोचना चिराय तमनङ्गमिव [13]मुक्तकुसुमास्त्रतन्त्रं [14]लोकान्तरमित्रमशेषलक्षणोपलक्षितमूर्तिं धनकीर्तिं पुनरायुःश्रीसरस्वतीसमागमादेशरेखात्रयेणेव प्रकटवितर्कितकर्कोट[15]त्रयेण बन्धुरमध्यप्रदेशात्कण्ठदेशादादायापायप्रतिपादनाक्षरालेखं लेखमवाचयत्। लिलेख च तं वाणिजकापसदं हृदयेन [16]विकुर्वती लोचनाञ्जनकरण्डादुपात्तेन वनवल्लिपल्लवनिर्यासरसद्रुतेन[17] कज्जलेनार्जुनशलाकया[18] तत्रैव परिम्लिष्टपुरातनसूत्रे[19] पत्रे लेखान्तरम्। तथा हि—'यदि श्रेष्ठिनी मामवधेयवचनं[20] श्रेष्ठिनं मन्यते, महाबलश्च यदि मामनुल्लङ्घनीय-

'गोविन्द, मुझे अपने घरपर अपने लड़केसे कुछ जरूरी बात कहलाना है। अतः इस लड़केको यह पत्र देकर शीघ्र भेज दो।'

गोविन्दने श्रीदत्तकी बात स्वीकार कर ली। पत्रमें लिखा था—'माप-तौलमें कुशल महाबल! यह लड़का हमारे वंशका विनाश करनेके लिए आगके समान है। अतः या तो इसे विष दे देना या मूसलसे मार डालना।'

पिता और वैश्यपतिकी आज्ञा पाकर उस मुद्राङ्कित पत्रको अपने गलेमें बाँधकर धनकीर्ति उस उज्जैनी नगरीकी ओर चल दिया जिसमें उसके द्वारा पूर्व जन्ममें उपकृत मछलीने जन्म लिया था। नगरीके निकट पहुँचकर वह नगरीके प्रवेश मार्गके निकटवर्ती वनमें रास्तेकी थकान दूर करनेके लिए आमकी क्यारियोंके निकट गहरी नींदमें सो गया।

इसी बीचमें वस्त्रालंकारसे सुसज्जित, समस्त विद्याओंमें निपुण और पूर्व जन्मके उपकारसे उपकृत अनङ्गसेना नामक वेश्या पुष्प चयन करके उसी आमके पेड़के नीचे आयी और कामदेवके समान सुन्दर समस्त लक्षणोंसे युक्त तथा पूर्व जन्मके मित्र धनकीर्तिको देखकर देखती ही रह गयी। उसके कण्ठमें तीन रेखाएँ थीं जो मानो आयु, लक्ष्मी और सरस्वतीके आगमनको ही सूचित करती थीं। अचानक अनङ्गसेनाकी निर्निमेष दृष्टि गलेमें बँधे पत्रपर पड़ी। उसने उस अशुभ पत्रको खोलकर पढ़ा, और उस निकृष्ट वणिकका हृदयसे तिरस्कार करते हुए अपने लोचनरूपी अञ्जनकी डिबियासे काजल लेकर उसे लताओंकी नयी कोंपलोंके रसमें भिगोया तथा चाँदीकी सलाईसे अथवा तृणसे उसी पत्रपर पहलेके लेखको मिटाकर दूसरा लेख लिखा। लेख इस

१. प्रकृष्ट जानुः। २ प्रेषणीयः। ३. तुला मानं वा। ४. विषेण वध्यः। ५. मुशलेन वध्यः। ६. मुद्रासहितम्। ७. पूर्वजन्मनि यो मत्स्यः स यत्र वेश्या जाता वर्तते। ८. उज्जयिनीम्। ९. मार्ग। १०. आम्रवृक्षथाणप्रांगणे। ११. निश्चेतनं यथा। १२. चतुरा। १३. वाणान् विना कन्दर्पम्। १४. जन्मान्तरोपकारिणम्। १५. कण्ठरेखा। १६. निन्दती। १७. घोलितेन। १८. हेम, तृणं वा। १९. पूर्वाक्षराणि परिमृज्य नूतनाक्षराणि लिखितानि। २०. आदरणीय।

वाक्यसरं पितरं गणयति, तदास्मै निकामं सप्तपुरुषपर्यन्तपरीक्षितान्वयसंपत्तये धनकीर्तये कूपद[1]प्रक्रमेण '[2]द्विजदेवमुखसमक्षमविचारापेक्षं श्रीमतिर्दातव्या' इति। ततो यथाम्नातवि-[3]शिखमिमं लेखमामुच्य[4] समाचरितगमनायामनङ्गसेनायां धनकीर्तिश्चिरेण [5]विद्राणसान्द्र-निद्रोद्रेकः [6]सोत्सेकमुत्थाय प्रयाय[7] च श्रीदत्तनिकेतनं जननीसमन्विताय महाबलाय प्रदर्शित-लेखः श्रीमतीसखो[8]ऽभवत्।

श्रीदत्तो वार्तामिमामाकर्ण्य प्रतूर्णं प्रत्यावर्त्य[9] निधाय[10] च तद्वधाय राजधानीबाहिरि-कायां चण्डिकायतने कृतसंकेतं संनद्धवपुषं पुरुषं कर्बुरा[11]चरणपिशाचीं [12]देवध्रीचीं च परि-प्राप्तो[13]ऽवसितो रहसि धनकीर्तिं मुहुराहूय बहुकूटकपटमतिरेवमावभाषे—'वत्स, मदीये कुले किलैवमाचारो यदुत यामिनीमुखे कात्यायिनीप्रमुखे[14] प्रदेशे प्रतिपन्नाभिनवकङ्कणबन्धेन स्तनन्ध-यागोधेन महारजनै[15]रसरकांशुक[16]समाश्रयः स्वयमेव माषमय[17]मोरमौकु[18]लिर्बलिरुपहर्तव्यः[19]।' धनकीर्तिः—'तात, यथा तातादेशः' इति निगीर्य गृहीतकुलदेवतादेयहन्तकारो[20]पकरणस्तेन श्यालेन महाबलेन पुरप्रदेशान्निःसरन्नवलोकितः। समालापितश्च—'हंहो धनकीर्ते, प्रवर्ध-मानान्धकारावन्ध्यायामस्यां वेलायामवर्गणः[21] क्वोच्चलितोऽसि।' 'महाबल, मातुलनिदेशान्न-[22]मसितनिवेदनाय दुर्गालये।' 'यद्येवं नगरजनासंस्तुतत्वात्त्वं निवासं प्रति निवर्तस्व।

---

प्रकार था—'यदि सेठानी मेरे वचनोंको मानती है और यदि महाबल मुझे अपना पिता मानता है तथा मेरे वचनोंको अनुल्लङ्घ्य समझता है तो इस धनकीर्तिको, जिसके वंशकी श्रेष्ठताकी परीक्षा सात जनोंके सामने कर ली गयी है, बिना किसी विचारके अग्निकी साक्षी पूर्वक दहेजके साथ श्रीमतीको सौंप देना।' पहलेकी ही तरह इस लेखको उसके गलेमें बाँधकर अनङ्गसेना चली गयी। धनकीर्ति बहुत देर तक गहरी नींदमें सोता रहा। फिर उठकर श्रीदत्तके घर पहुँचा और माता सहित महाबलको पत्र देकर श्रीमतीका पति बन गया। श्रीदत्त इस समाचारको सुनकर शीघ्र ही लौट आया और राजधानीके बाहर स्थित चण्डीदेवीके मन्दिरमें धनकीर्तिको मारनेके लिए एक सशस्त्र मनुष्यको तथा कुत्सित काम करनेमें पिशाचीसमान देवीको नियुक्त करके घर आया। और एकान्तमें धनकीर्तिको बुलाकर वह कपटी बोला—'वत्स ! मेरे कुलकी ऐसी रीति है कि जिस कन्याका नया विवाह होता है उसका पति रात्रिके समय कुसुम्भेके रंगसे रंगे हुए वस्त्र पहनकर स्वयं ही चण्डीके मन्दिरमें उड़दसे बने हुए मोर और कौवेकी बलि देता है।'

'जैसी आज्ञा' कहकर धनकीर्ति कुलदेवताको अर्पित करनेकी सामग्री लेकर घरसे निकला। सामनेसे आते हुए उसके साले महाबलने उसे देखा और पूछा—'धनकीर्ति ! इस अन्धेरी रातमें अकेले कहाँ जाते हो ?'

'महाबल ! मामाकी आज्ञासे बलि देनेके लिए दुर्गाके मन्दिरको जाता हूँ।'

'यदि ऐसा है तो तुम्हारा जाना ठीक नहीं है। नगरके आदमी क्या कहेंगे ! अतः तुम

---

१. जामातृदेयं वस्तु सहिरण्यकन्यादायी कूपदः कथ्यते। २. अग्निसाक्षिकम्। ३. मार्गम्। ४. कण्ठे बध्वा। ५. उपशान्त। ६. सगर्वम्। ७. गत्वा। ८. भर्ता। ९. गोविन्दगृहात् स्वगृहमागत्य। १०. पुरुषं स्थापयित्वा। ११. कुत्सितं। १२. चण्डिकां। १३. गृह। १४. प्राङ्गणे। १५. कुसुम्भ। १६. रक्तवस्त्रेण वेष्टितः। १७. माषधान्येन घटित। १८. मयूर-काक। १९. दातव्यः। २०. दान। २१. एकाकी। २२. देय वस्तु। नमस्तित–ज०।

अहमेतदुपयाचित[1]मैशान्याः [2]स्पर्शयितुं प्रगच्छामि। यद्यत्र तातो रोषिष्यति तदा तद्रोषमह-मपनेष्यामि।' ततो धनकीर्तिर्मन्दिरमगात्, महाबलश्च कृतान्तोदरकन्दरम्।

श्रीदत्तः सुतमरणशोकातङ्कोपान्तः प्रकाशिताशेषवृत्तान्तः 'सकलनिकाय्य[3]कार्यानुष्ठान-परमेष्ठिनि श्रेष्ठिनि मन्मनोह्लादचन्द्रलेखे विशाखे, कथमयं वैधेयो[4] ममान्वय[5]पायहेतुः [6]प्रयुक्तोपायविलोपनकेतुः [7]प्रवाशयितव्यः।' विशाखा—'श्रेष्ठिन्, [8]भेलभावात्सर्वमनुपपन्नं त्वया चेष्टितम्। अतः [9]कुरुण्डतो भीतः कुक्कुटपोत इव तूष्णीमास्स्व। भविष्यति भवतोऽशेषं मनीषितम्' इत्याभाष्य अपरेद्युर्दयितजीवितव्यतोदकेषु[10] मोदकेषु विषं संचार्य 'सुते श्रीमते, य एते कुन्दकुमुदकान्तयो मोदकास्ते स्वकीयाय कान्ताय देयाः, [11]श्यावश्यामाक-श्यामलरुचयश्च जनकाय' इति समर्पितसमया[12] समासन्नमरणसमया सरिति [13]सवनायानु-ससार। श्रीमतिः 'यच्चोक्षं[14] भक्ष्यन्तत् [15]प्रतीक्ष्याय ताताय वितरीतव्यम्[16]' इत्यवगत्या-विज्ञातसवित्रीचित्तकौटिल्या निःशल्यहृदया तानेतयोर्विपर्ययेणावीवृधत्। विशाखा पति-शून्यमरण्यसामान्यमगारमाप्य परिदेव्य च सुचिरं पुनः 'पुत्रि, किमन्यथा भवति महामुनि-भाषितम्। केवलं तव [17]वापेन मया च [18]थेय्यात्मीयान्वयविलोपाय कृत्योत्थापनमाचरितम्।

---

घरको लौट जाओ। देवीको यह भेंट समर्पित करनेके लिए मैं जाता हूँ। यदि पिताजी रुष्ट होंगे तो उनके रोषको मैं दूर कर दूँगा।'

इस बात-चीतके बाद धनकीर्ति घरको चला गया और महाबल यमराजके पेटमें समा गया।

पुत्र-मरणके शोकसे विह्वल होकर श्रीदत्तने अपनी पत्नी विशाखासे सब समाचार कह दिया और बोला—सब गृहकार्योंके करनेमें चतुर सेठानी! यह अभागा मेरे वंशका अनिष्ट करने-वाला है, इसके मारनेका जो-जो उपाय किया जाता है वही व्यर्थ हो जाता है। इसे कैसे मारना चाहिए।'

'सेठजी! अविचारके कारण आपके सब उपाय व्यर्थ हुए। अतः बिलावसे डरे हुए मुर्गेके बच्चेकी तरह आप चुप होकर बैठो। आपकी सब इच्छाएँ पूर्ण होंगी।'

दूसरे दिन सेठानीने अपने पतिके जीवनको नष्ट करनेवाले लड्डुओंमें जहर मिलाकर अपनी पुत्री श्रीमतीसे कहा—'पुत्री! ये जो सफेद कमलकी तरह स्वच्छ लड्डू हैं इन्हें अपने पतिको देना और ये जो काले धान्यके समान काले रंगके लड्डू हैं इन्हें अपने पिताको देना।' इतना कहकर सेठानी नदीमें स्नान करने चली गयी। श्रीमतीको माताके चित्तकी कुटिलताका पता नहीं था। उसने सोचा कि जो सुन्दर लड्डू हैं उन्हें पूज्य पिताको देना चाहिए। अतः उसने जहर मिले सफेद लड्डू तो पिताको दिये और काले लड्डू अपने पतिको दिये। जब विशाखा लौटी तो उसका पति मर चुका था। वह बहुत रोई फिर बोली—'पुत्री! महामुनियोंका कथन कैसे झूठा हो सकता है? तेरे पिताने और मुझ वृद्धाने अपने वंशका नाश करनेके लिए

---

१. नभसितम्। २. दातुम्। ३. गृहकार्य। ४. निर्भाग्यः। ५. वंश। ६. मम कृतानेककपटविनाशस-मर्थः। ७. प्रणाश—ब०। मारणीयः। ८. वृद्ध वा अविचारक। ९. मार्जारात्। १०. पीडकेषु। ११. श्यावः स्यात् कपिशः धूसरारुणः। १२. मता-अभिप्राया। १३. स्नानाय। १४. चोक्षः सुन्दरगीतयोः। १५. पूज्याय। १६. देयम्। १७. पित्रा। १८. वृद्धया।

तदलमत्र बहुप्रलापेन। कल्पद्रुमेण कल्पलतेव त्वमनेन दैवदेयदेहरक्षाविधानेन धवेन[1] सार्ध-माकल्पमिन्द्रियैश्वर्यसुखमनुभव' इति संभावि[2]ताशीर्वादा तमेकं मोदकमास्वाद्य पत्युः पथि प्रतस्थे[3]।

एवं विहितदुरीहितवशादुपात्तामिततोकशोकावस्थे दर्शमीस्थे तस्मिञ्श्वशुरे श्वश्रूजने च सति स पुरातनपुण्यमाहात्म्यादुल्लङ्घितघोरप्रतिघ[5]पञ्चकापत्प्रतिदिनमुदीयमानसंपदेकदा तेन विश्वम्भरेण क्षितीश्वरेण निरीक्षितः। तद्रूपसंपत्तौ जातबहुविस्मयेन तनूजया सह उभयेन[6] विशामाधिपत्यपदेन योजितश्च। गुणपालः किंवदन्तीपरम्परया अस्य[7] कल्याणपरम्परामुप-श्रुत्य कौशाम्बीदेशात्पद्मावतीपुरमागत्य अनेनाश्चर्यैश्वर्यभाजा तुजा[9] सह संजग्मे[10]।

अथान्यदा सकलत्रपुत्रमित्रतन्त्रेण धनकीर्तिना दर्शनायागतयानङ्गसेनया चानुगतिनिष्ठो गुणपालश्रेष्ठी मतिश्रुतावधिमनःपर्ययविषयसम्राजमखिलमुनिमण्डलीराजं श्रीयशोध्वजनाम-भाजं भगवन्तमभिवन्द्य सबहुप्रश्रयमेवमपृच्छत्—'भगवन्, किं नाम जन्मान्तरे धर्ममूर्तिना[8] धनकीर्तिना सुकृतमुपार्जितम्, येन बालकालेऽपि तानि तानि दैवैकशरणप्रतीकाराणि व्यस-नानि व्यतिक्रान्तः, येनास्मि[11]न्व्यतिरिक्त[12]रसारूपसंपन्नोऽभूत्, येनाद[13]भ्राभ्रिय[14]विभावसुप्रभा-संभार इव देवानामप्यप्रतिहतमहः[15] समजनि, येन चापरेषामपि तेषां तेषां महापुरुषकक्षा-[16]वग्रहाणां गुणानां समवायोऽभवत्। तथा हि—स्थानं [17]वदन्यतायाः, समाश्रयो वदान्य[18]-

ही यह गढ़ा खोदा था। अब रोनेसे क्या होता है? कल्पवृक्षके साथ कल्पलताके समान तू अपने इस दैवरक्षित पतिके साथ कल्पकाल तक ऐश्वर्य और इन्द्रिय सुखको भोग।' ऐसा आशीर्वाद देकर उसने भी एक जहरीला लड्डू खा लिया और पतिकी अनुगामिनी बन गयी।

इस प्रकार पूर्व उपार्जित पुण्यके प्रतापसे पाँच भयानक विपत्तियोंसे बचकर धनकीर्ति अपने ही द्वारा की गयी दुर्भावनाओंके कारणसे सास और श्वसुरके चल बसनेपर प्रतिदिन सम्पत्तिशाली होने लगा। एक दिन राजा विश्वम्भरने उसे देखा। उसका सौन्दर्य देखकर राजाको बहुत अचरज हुआ। उसने उसके साथ अपनी पुत्रीका विवाह कर दिया और उसे वैश्योंका अधिपति बना दिया। धनकीर्तिके पिता गुणपालने लोगोंके मुखसे जब अपने पुत्रके अभ्युदयका समाचार सुना तो वह कौशाम्बी नगरीसे उज्जयिनी आकर आश्चर्यजनक सम्पत्तिशाली पुत्रसे मिला।

एक बार मति, श्रुत, अवधि और मनःपर्यय ज्ञानके धारी श्री यशोध्वज मुनिराज वहाँ पधारे। गुणपाल सेठ, सकुटुम्ब धनकीर्ति और उससे मिलनेके लिए आयी हुई अनंगसेनाके साथ मुनिराजके दर्शनके लिए गया, और उन्हें नमस्कार करके विनयपूर्वक बोला—'भगवन्! धर्म-मूर्ति धनकीर्तिने पूर्व जन्ममें कौन-सा पुण्य कमाया था, जिसके कारण बचपनमें भी यह उन कष्टोंको पार कर गया जो दैवके द्वारा ही दूर किये जा सकते थे तथा इस जन्ममें इसने बड़ी भारी सम्पत्ति और सौन्दर्य पाया, सूर्यके तेजकी तरह देवोंसे भी न रोका जा सकनेवाला इसे तेज प्राप्त हुआ। इसके सिवाय महापुरुषोंके योग्य अन्य भी गुण इसे प्राप्त हो सके। जैसे, यह बड़ा दानी

१. कान्तेन। २. दत्त। ३. मृता इत्यर्थः। ४. मृते। ५. विघ्न। ६. एको विवाहोत्सवो द्वितीयः श्रेष्ठिपदप्रदानोत्सवः। ७. धनकीर्तेः। ८. उज्जयिनीम्। ९. पुत्रेण। १०. सम्मिलितः। ११. जन्मनि। १२. अधिक। –क्तसाररूप—आ०। १३. बहुल। १४. अभ्रपटलसम्बन्धि अग्नितेजःसमूहवत्। वज्राग्निवत्। १५. तेजः। १६. पक्षवशानां। १७. विदग्धतायाः। १८. वदति दीयतामिति वदान्यः। त्यागी।

भावस्य, निकेतनमवदानकर्मणः[1], क्षेत्रं मैत्रेयिकायाः[2], स्वप्नेऽपि न स्वजनस्याजनि मनोमर्तुः[3] [4]कन्तुरिव च कामिनीलोकस्य। तदस्य [5]भदन्त, [6]प्रापणिकपरिषत्प्रवणस्य निःशेषशास्त्रप्रवीणान्तःकरणस्य निसर्गादेव निखिलपरिजनालापनसक्तस्य विनेयजनमनःकुवलयानन्दिकथावतारामृतमूर्तेः[7] सुकीर्तेर्धनकीर्तेः पुरोपार्जितं सुकृतं कथयितुमर्हसि।'

भगवान्—'श्रेष्ठिन्, श्रूयताम्।' तत्संबन्धसक्तं पूर्वोक्तं वृत्तान्तमचकथत्—'या चास्य पूर्वभवनिकटा घण्टा वधूटी सा कृतनिदानादर्मूनसि[8]प्रवेशादियं संप्रति श्रीमतिः संजाता। यश्च स मीनः स कालक्रमेण व्यतिक्रम्य पूर्वपर्यायपर्वैयमनङ्गसेनाभूत्। अतोऽस्य महाभागस्यैकदिवसाऽहिंसाफलमेतद्विजृम्भते। धनकीर्तिरेतद्वचः[9]पवित्रश्रोत्रवर्त्मा तथा श्रीमतिरनङ्गसेना च पुराभवं भवं संभाल्योन्मूल्य च तमःसंतानतरुनिवेशमिव केशपाशं तस्यैव दोषज्ञस्या[10]न्तिके यथायोग्यताविकल्पं तपःकल्पमादाय जिनमार्गोचितेनाचरितेन चिरायाराध्य रत्नत्रयं विधाय च विधिवन्निरं[11]जन्यमनोवर्तनं प्रायोपवेशनम्[12]। तदनु धनकीर्तिः सर्वार्थसिद्धिसाधनकीर्तिर्बभूव। श्रीमतिरनङ्गसेना च [13]कल्पान्तरसंयोज्यं देवसायुज्यमभजत्।

भवति चात्र श्लोकः—

---

है, प्रियवादी है, सत्कर्म करता है, मित्रताके उपयुक्त है, स्वप्नमें भी स्वजनोंके मनको कष्ट नहीं पहुँचाता और स्त्रियोंके लिए तो मानो कामदेव ही है। इसलिए भगवन्! समस्त शास्त्रोंमें प्रवीण और स्वभावसे ही समस्त कुटुम्बीजनोंसे मीठे वचन बोलनेवाले इस वैश्यपति धनकीर्तिके पूर्वोपार्जित पुण्यकी कथा कहें। इसकी कथा सुनकर सबके मन प्रफुल्लित होंगे।'

मुनिराजने धनकीर्तिके पूर्व जन्मकी कथा कह सुनायी और बोले—'इसके पूर्वभवकी पत्नी घण्टा यह निदान करके कि 'जो इसका व्रत है वही मेरा भी व्रत है और मैं दूसरे भवमें भी इसकी पत्नी होऊँ' अग्निमें जल मरी थी। वही मरकर श्रीमती हुई है। और जो मछली थी जिसे मृगसेन धीवरने जलमें छोड़ दिया था, वह पूर्व पर्यायको छोड़कर अनङ्गसेना हुई है। अतः एक दिन हिंसा न करनेका यह फल इस महाभागको मिला है।'

पूर्वभवके इस वृत्तान्तको सुनकर धनकीर्ति, श्रीमती और अनंगसेनाने केशलोंच करके उन्हीं मुनिराजके पासमें जिनदीक्षा ले ली। और अपनी-अपनी शक्तिके अनुसार तप ग्रहण करके जैनमार्गके अनुसार चिरकाल तक रत्नत्रयका आराधन किया। तथा अन्तमें विधिपूर्वक निर्विघ्न समाधिमरण करके धनकीर्ति तो सर्वार्थसिद्धिमें देव हुआ और श्रीमती तथा अनंगसेना स्वर्गलोकमें उत्पन्न हुई।

इस कथाके विषयमें एक श्लोक है जिसका भाव इस प्रकार है—

---

१. अवदानं शत्रुखण्डनं, सर्वपालनम् साहसम्। २. मित्रयुर्व्यवहारवेदी तस्य भावो मैत्रेयिका। ३. विप्रियम्। ४. कामः। ५. हे मुने। ६. वणिक्। ७. चन्द्रस्य। ८. अग्नौ। ९. वचन। १०. अतीन्द्रियज्ञस्य विदुषः। ११. निर्विघ्नं। १२. संन्यासविधिम्। १३. स्वर्गलोक।

पञ्चकृत्वः किलैकस्य मत्स्यस्याहिंसनात्पुरा ।
अभूत्पञ्चापदोऽतीत्य धनकीर्तिः पतिः श्रियः ॥३६३॥

*इत्युपासकाध्ययने अहिंसाफलावलोकनो नाम षड्विंशः कल्पः ।*

अदत्तस्य परस्व[1]स्य ग्रहणं स्तेयमुच्यते ।
सर्वभोग्यात्तदन्यत्र भावात्तोयतृणादितः ॥३६४॥
ज्ञातीनामत्य[2]ये वित्तमदत्तमपि संमतम् ।
जीवतां तु निदेशेन[3] व्रतक्षति[4]रतोऽन्यथा ॥३६५॥
[5]संक्लेशाभिनिवेशेन प्रवृत्तिर्यत्र जायते ।
तत्सर्वं रायि विज्ञेयं स्तेयं स्वान्यजनाश्रये ॥३६६॥
रिक्थं [6]निधिनिधानोत्थं न राज्ञोऽन्यस्य युज्यते ।
यत्स्वस्या[7]स्वामिकस्येह दायादो मेदिनीपतिः ॥३६७॥

"पूर्व जन्ममें पाँच बार एक मछलीको न मारनेसे धनकीर्ति पाँच बार आपत्तिसे बचकर लक्ष्मीका स्वामी बना" ॥३६३॥

*इस प्रकार उपासकाध्ययनमें अहिंसाका फल बतलानेवाला छब्बीसवाँ कल्प समाप्त हुआ ।*

अब चोरी न करनेका उपदेश करते हैं—

## अचौर्याणुव्रत

पानी, घास वगैरह जो वस्तु सबके भोगनेके लिए हैं उनके सिवा शेष सब बिना दी हुई परवस्तुओंको ले लेना चोरी है ॥३६४॥ यदि कोई ऐसे कुटुम्बी मर जायें जिनका उत्तराधिकार हमें प्राप्त है तो उनका धन बिना दिये हुए भी लिया जा सकता है । किन्तु यदि वह जीवित हों तो उनकी आज्ञासे ही उनका धन लिया जा सकता है । उनकी जीवित अवस्थामें ही उनसे पूछे बिना उनका धन ले लेनेसे अचौर्याणुव्रतकी क्षति होती है ॥३६५॥

अपना धन हो या दूसरोंका हो, जिसमें चोरीके भावसे प्रवृत्ति की जाती है तो वह सब चोरी ही समझना चाहिए ॥३६६॥ जमीन वगैरहमें गड़ा हुआ धन राजाका होता है किसी दूसरेका नहीं । क्योंकि जिस धनका कोई स्वामी नहीं है उसका स्वामी राजा होता है ॥३६७॥ अपने द्वारा

१. धनस्य । 'अदत्तादानं स्तेयम्' । —तत्त्वा० सू० ७-१५ । 'निहितं वा पतितं वा सुविस्मृतं वा परस्वमविसृष्टम् । न हरति यन्न च दत्ते तदकृशचौर्यादुपारणम् ॥५७॥ —रत्नकरण्डश्रा० । 'अवितीर्णस्य ग्रहणं परिग्रहस्य प्रमत्तयोगाद्यत् । तत्प्रत्येयं स्तेयं' ॥१०२॥ 'असमर्था ये कर्तुं निपानतोयादिहरणविनिवृत्तिम् । तैरपि समस्तमपरं नित्यमदत्तं परित्याज्यम् ॥ १०६ ॥' —पुरुषार्थसि० । 'परस्वस्याप्रदत्तस्यादानं स्तेयमुदाहृतम् । सर्वस्वाधीनतोयादेरन्यत्र तन्मतं सताम् ॥ ६१ ॥ प्रबोध० । २. मरणे सति । ३. आदेशेन ग्राह्यम् । ४. विनाशः । 'वंश्यानामत्यये वित्तमदत्तमपि सम्मतम् । समर्पितं निदेशेन व्रतहानिरतोऽन्यथा ॥६६॥' —प्रबोधसार । ५. 'संक्लेशाभिनिवेशेन तृणमप्यन्यभर्तृकम् । अदत्तमाददानो वा ददानस्तस्करो ध्रुवम् ॥४७॥' सागारधर्मा०, ४ अ० । ६. यो व्ययीकृतः क्षयं न याति स निधिः । यद् व्ययीकृतं सत् क्षयं याति तन्निधानम् । ७. धनस्य । 'नास्वामिकमिति ग्राह्यं निधानादि धनं यतः । धनस्यास्वामिकस्येह दायादो मेदनीपतिः' ॥४८॥ —सागारधर्मा, ४ अ० । 'प्रणष्टस्वामिकं रिक्थं राजा त्र्यब्दं निधापयेत् । अर्वाक् त्र्यब्दाद्धरेत्स्वामी परेण नृपतिर्हरेत् ॥३०॥ —मनुस्मृति ८ अ० । 'द्रव्य निधिनिधानोत्थं भूपादन्यस्य नो भवेत् । निरीशस्य यतः स्वस्य दायादो मेदिनीपतिः ॥६७॥' —प्रबोधसार ।

आत्मार्जितमपि द्रव्यं द्वापरायान्यथा भवेत् ।
निजान्वयादतोऽन्यस्य व्रती स्वं परिवर्जयेत् ॥३६८॥
मन्दिरे पदिरे नीरे कान्तारे धरणीधरे ।
तन्नान्यदीयमादेयं स्वापतेयं व्रताश्रयैः ॥३६९॥
पौतवन्यूनताधिक्ये स्तेनकर्म ततो ग्रहः ।
विग्रहे संग्रहोऽर्थस्यास्तेयस्यैते निवर्तकाः ॥३७०॥
रत्नरत्नाङ्गरत्नस्त्रीरत्नाम्बरविभूतयः ।
भवन्त्यचिन्तितास्तेषामस्तेयं येषु निर्मलम् ॥३७१॥
परप्रमोषतोषेण तृष्णाकृष्णधियां नृणाम् ।
अत्रैव दोषसंभूतिः परत्रैव च दुर्गतिः ॥३७२॥

श्रूयतामत्र स्तेयफलस्योपाख्यानम्—प्रयागदेशेषु निवासविलासवारलाप्रलापवाचालितविलासिनीनूपुरे सिंहपुरे समस्तसमुद्रमुद्रितमेदिनीप्रसाधनसेनः पराक्रमेण सिंह इव सिंहसेनो नाम नृपतिः । तस्य निखिलभुवनजनस्तवनोचितवृत्ता रामदत्ता नामाग्रमहिषी । सुतौ चानयोराश्चर्यसौन्दर्यौदार्यपरितोषितानिमिषेन्द्रौ सिंहचन्द्र-पूर्णचन्द्रौ नाम । निःशेषशास्त्रविशारदमतिः श्रीभूतिरस्य पुरोहितः सूनृताधिकधिषणतया सत्यघोषापरनामधेयः ।

उपार्जित द्रव्यमें भी यदि संशय हो जाये कि यह मेरा है या दूसरेका, तो वह द्रव्य ग्रहण करनेके अयोग्य है अतः व्रतीको अपने कुटुम्बके सिवा दूसरोंका धन नहीं लेना चाहिए ॥३६८॥

अतः मकानमें, मार्गमें, पानीमें, जंगलमें या पहाड़में रखा हुआ दूसरोंका धन अचौर्याणुव्रतीको नहीं लेना चाहिए ॥३६९॥ बाँट तराजूका कमती-बढ़ती रखना, चोरीका उपाय बतलाना, चोरीका माल खरीदना, देशमें युद्ध छिड़ जानेपर पदार्थोंका संग्रह कर रखना, ये सब अचौर्याणुव्रतके दोष हैं ॥३७०॥

जो निर्दोष अचौर्याणुव्रतको पालते हैं उनको रत्न, सोना, उत्तम स्त्री, उत्तम वस्त्र आदि विभूति स्वयं प्राप्त होती है, उसके लिए उन्हें चिन्ता नहीं करनी पड़ती ॥३७१॥ जो मनुष्य दूसरोंकी वस्तुओंको चुराकर प्रसन्न होते हैं, तृष्णासे कलुषित बुद्धिवाले उन मनुष्योंमें इसी जन्ममें अनेक बुराइयाँ पैदा हो जाती हैं और दूसरे जन्ममें भी उनकी दुर्गति होती है ॥३७२॥

## १४. चोरीमें आसक्त श्रीभूति पुरोहितकी कथा

चोरीके फलके सम्बन्धमें एक कथा है उसे सुनें—

प्रयागदेशके सिंहपुर नामक नगरमें सिंहकी तरह पराक्रमशाली सिंहसेन नामका राजा राज्य करता था । उसकी पटरानीका नाम रामदत्ता था । उनके आश्चर्यजनक सौन्दर्य और उदारतासे देवोंके इन्द्रको भी सन्तुष्ट करनेवाले सिंहचन्द्र और पूर्णचन्द्र नामके दो पुत्र थे । समस्त शास्त्रोंमें कुशल श्रीभूति राजाका पुरोहित था । सत्यकी ओर अधिक रुझान होनेके कारण उसका

१. संदेहाय । २. स्ववंशादन्यस्य धनं वर्जयेत् । ३. मार्गे । ४. तुलाहीनाधिक्ये । ५. चौरार्थादानम् । ६. अतीचाराः । 'स्तेनप्रयोग-तदाहृतादान-विरुद्धराज्यातिक्रमहीनाधिकमानोन्मानप्रतिरूपकव्यवहाराः ॥' तत्त्वार्थसू० ७-२७ । 'चौरप्रयोगचौरार्थादानविलोपसदृशसन्मिश्राः। हीनाधिकविनिमानं पञ्चास्तेये व्यतीपाताः ॥५८॥' —रत्न० श्रा० । पुरुषार्थसि०, श्लो० १८५ । ७. सुवर्णादि । ८. उत्तम । ९. परवस्तुचौर्यहर्षेण । १०. सत्यवचन ।

धर्मपत्नी चास्य पतिहितैकचित्ता श्रीदत्ता नामाभूत् ।

स किल श्रीभूतिर्विश्वासरसनिर्विघ्नतया[1] परोपकारनिघ्नतया च विभक्तानेकापवरकरचनाशालिनीभिर्महाभाण्डवाहिनीभिर्गोशालोपशल्याभिः[2] कुल्याभिः समन्वितमतिसुलभजलयवसेन्धनप्रचारं[3] भण्डनारम्भोद्भटभटीरपेटकपक्षरक्षासारं[4][5][6] गोरुतप्रमाणं वप्रप्राकारप्रतोलिपरिखापरिसूत्रितत्राणं[7] प्रपासत्रसभासनाथवीथिनिवेशनं पण्यपुटभेदनं विदूरितकितवविटविदूषकपीठमर्दावस्थानं[8][9] पेण्ठास्थानं विनिर्माप्य नानादिग्देशोपसर्पणयुजां वणिजां[10] प्रशान्तशुल्कभाटकभागहारव्यवहारमचीकरत्[11] ।

अत्रान्तरे पद्मिनीखेटपट्टनविनिविष्टावासतन्त्रस्य सुदत्ताकलत्रचरित्रपवित्रितगोत्रस्य वणिक्पतेः सुमित्रस्य[12] निजसनाभिजनाम्भोजभानुः सूनुर्भद्रमित्रो नाम समानधनचारित्रैर्वणिक्पुत्रैः[13] सत्रं[14] वहित्रयात्रायां यियासुः

'पादमायान्निधिं[15][16] कुर्यात्पादं वित्ताय[17] कल्पयेत् ।
धर्मोपभोगयोः पादं पादं भर्तव्यपोषणे ॥३७३॥' इति पुण्यश्लोकः ।

श्लोकार्थमवधार्य विचार्य चातिचिरमुपनिधिन्यासयोग्यमावासम्[18] उदिताचारसेभ्योऽवधारितेतिकर्तव्यस्तस्याखिललोकश्लाघ्यविश्वासप्रसूतेः[19] श्रीभूतेर्हस्ते तत्पत्नीसमक्षमनर्घ-

---

नाम सत्यघोष पड़ गया था। उसकी धर्मपत्नीका नाम श्रीदत्ता था। वह सदा पतिका हित चाहती थी।

श्रीभूति पुरोहितका सब विश्वास करते थे और वह सदा परोपकारमें लगा रहता था। उसने एक बाजार बनवाया था। उसमें अनेक गलियाँ थीं, जिनमें अनेक दूकानें बनी हुई थीं, जो मालसे भरी रहती थीं और उनके पासमें ही गोशालाएँ बनी हुई थीं।

पानी, घास व ईंधन वगैरह बहुत सहूलियतसे मिल जाता था। लड़नेके लिए तत्पर अनेक सुभट वीर उसकी रक्षा करते थे। दो कोसका उसका विस्तार था। खाई, कोट, गली-कूँचा आदिसे सुरक्षित था। मार्गोंमें प्याऊ और सदाव्रतशालाएँ बनी हुई थीं, धूर्त, जार और विलासी पुरुषोंसे रहित था। उसमें नाना देशोंके व्यापारी व्यापारके लिए आते थे। उनसे बहुत थोड़ा टैक्स, भाड़ा और दान लिया जाता था।

एकबार पद्मिनीपुरके निवासी, सुदत्ता नामकी सुशील स्त्रीके पति, वणिक्पति सुमित्रके पुत्र भद्रमित्रने धन और चारित्रमें अपने समान अन्य वणिक् पुत्रोंके साथ समुद्र-यात्रा करनेकी इच्छा की।

नीतिमें कहा है—"अपनी आमदनीका एक चौथाई तो जमा करके रखना चाहिए। एक चौथाईसे व्यापार करना चाहिए। एक चौथाई धार्मिक कार्यों और भोगमें खर्च करना चाहिए और एक चौथाईसे अपने आश्रितोंका पालन करना चाहिए ॥३७३॥

इस नीतिको मानकर भद्रमित्रने अपने संचित धनको किसी सुरक्षित स्थानमें रखनेका विचार किया और सोच-विचार कर समस्त लोकमें अति विश्वस्त माने जानेवाले उसी श्रीभूतिके

---

१. परवशतया। २. गोमहिषीबन्धनस्थानसमीपाभिः। ३. तृण। ४. संग्राम। ५. उत्कट। ६. भरीर—अ०, ज०, मु०,। सुभट। ७. सहितमार्ग। ८. कामाचार्य। ९. पीठस्थानम्। १०. स्वल्प। ११. दान। १२. गोत्रजन। १३. सह। १४. यानपात्र। १५. उपार्जितलाभमध्यात्। १६. अन्तर्द्धानं—स्थापनम्। १७. पुंजीनिमित्तम्। १८. स्थापनीयद्रव्यस्थापनयोग्यम्। १९. निर्धारितकार्यः।

[1]कलत्रमनुगतासक[2] रत्नसप्तकं निधाय विधाय च जलयात्रासमर्थमर्थमेकवर्णप्रजाप्रलापसुवर्णद्वीपमनुससार।

पुनरगण्यपण्यविनिमयेन तत्रत्यमचिन्त्यमात्माभिमतवस्तुस्कन्धमादाय[3] [4]प्रत्यावर्तमानस्यादूरसागरावसानस्याकाण्डप्रचण्डवलादनिलात्परिवर्तितपोतपात्रस्य [5]यक्षविध्यत्तया आयुषः शेषत्वात्तस्यैकस्य [6]प्रमादफलकावलम्बनोद्यतस्य कण्ठप्रदेशप्राप्तजीवितस्य कथंकथमपि क्षणदायाः[7] क्षयिणि चरमयामक्षणेऽब्धिरोधोपलब्धिरभवत्[8] ।

ततोऽसौ सुखैधित[9]शरीरत्वादपाराकूपारक्षारवारिवशवशीकाशयश्चिरायापचितमूर्छोदयः[10] कर[11]प्रचारचूर्णितचक्रवाकचिन्तामणौ[12] प्रागचलचूलिकाचक्र[13]वालचूडामणौ कमलिनीकुलविकासाहितहंसवासितां[14]शर्मणि विश्वकर्मणि[15] दरदलि[16]तनान्तरालरुचिरे लोचनगोचरे संजाते सति बान्धवजनमरणाद्द्रविण[17]संद्रवणाच्चातीवान्तर्मनस्तया[18] [19]छातच्छायकायः पटच्चर[20]चेलचीरीनिचिताङ्गशकटिः[21] [22]कर्पटिः पर[23]पस्त्योपास्तिनिरस्ताभिमानावनिर्वर्तनिः[24] सन् क्रमेण सिंहपुरं नगरमागत्य गीर्मात्रावसेयपूर्वपर्यायस्तं महामोहरसोत्सारितप्रीतिं[25] श्रीभूतिमभिज्ञानाधिकवाक्यो माणिक्यसप्तकमयाचत ।

हाथमें उसकी पत्नीके सामने अत्यन्त मूल्यवान् सात रत्न सौंपकर जल-यात्रामें समर्थ एक जहाजके द्वारा सुवर्णद्वीपको चल दिया।

वहाँ बहुत-सा माल बेचकर तथा उसके बदलेमें वहाँकी बहुत-सी मनपसन्द वस्तुएँ खरीद कर वह घरके लिए लौटा। जब समुद्रका किनारा थोड़ी दूर रह गया, बड़ी जोरका तूफान आ गया और उससे उसका जहाज उलट गया। दैववश आयु शेष होनेसे उसे जहाजका टूटा हुआ एक लकड़ीका पटिया मिल गया और उसने उसे पकड़ लिया। उसे पकड़े-पकड़े जब उसके प्राण कण्ठमें आ गये तब जिस किसी तरह रात्रिका अन्तिम पहर बीतते-बीतते उसे समुद्रका किनारा मिल गया।

एक तो वणिकपुत्र जन्मसे ही सुखमें पला था दूसरे अपार समुद्रके खारी पानीने उसे धनशून्य ही नहीं संज्ञाशून्य भी बना दिया था। अतः किनारेपर लगकर वह बहुत देर तक मूर्छित पड़ा रहा। जब सूर्योदय हुआ तो उसकी आँखें कमलोंकी तरह कुछ खुलीं। बन्धुजनोंके मर जाने और धनके नष्ट हो जानेसे उसका मन बहुत दुखी था और मुख पीला पड़ गया था। जिस किसी तरह फटे हुए वस्त्रके टुकड़ेसे अपने शरीरको ढाँककर वह वहाँसे उठा।

दूसरोंकी चाकरी करते-करते उसका सब अभिमान जाता रहा। अन्तमें आजीविकाके न मिलनेसे घूमता-घूमता सिंहपुर पहुँचा और श्रीभूतिके पास जाकर उससे अपने सात रत्न माँगे। इस समय उसकी दशा बिलकुल हीन थी। उसकी पूर्व दशाको उसके बचनसे ही जाना जा सकता था। अन्य कुछ प्रमाण उसके पास नहीं था।

---

१. बहुमूल्य। २. पूर्वपुरुषसंचितम्। ३. समूहं। ४. व्याघुटितस्य। ५. दैवालम्बनपरतया। ६. त्रुटित। भग्नप्रवहणकाष्ठ। ७. रात्रेः। ८. समुद्रतटप्राप्तिः। ९. वर्धित। १०. शून्यचित्तः। ११. किरण। १२. चिन्ता एव मणिः। १३. मण्डल। १४. स्त्री। १५. सूर्ये। १६. विकसत्कमल। १७. धनविनाशात्। १८. अतीवार्तमनस्तया—मु०। मानसदुःखेन। १९. कृश। २०. जीर्णवस्त्र। २१. अङ्गमेव शकटिः। २२. कटिमात्रवस्त्रः दरिद्रः। २३. परगृहसेवा। २४. वर्तनिः—आजीविका। २५. त्यक्तस्नेहम्।

परप्रतारणाभ्यस्त[1]श्रुतिगीतिः श्रीभूतिः

'सुप्रयुक्तेन दम्भेन स्वयंभूरपि वञ्च्यते ।
का नामालोच[2]नान्यत्र[3] संवृत्तिः परमा यदि ॥३७४॥'

इति परामृश्य [4]महाधनाघ्रातचेतास्तमायातं[5]शुचमेवमवोचत्—'अहो दुर्दुरूट[6] किराट, किमिह खलु त्वं केनचित्पिशाचेन छलितः, किमु मनोमहामोहावहानुरोधेन मोहनौषधेनातिलङ्घितः, किं वा कितवव्यवहारेषु हारितसमस्तचित्तवृत्तिः, उत अहो परचित्तवञ्चनपिशाचिकया कयाचिल्लञ्जिकया[7] जनितदुष्प्रवृत्तिः, आहोस्वित्फलवतः पादपस्येव श्रीमतः क्रियमाणोऽभियोगो न खलु किमपि फलमसंपाद्य विश्राम्यतीति चेतसा केनचिद्दुर्मेधसा विप्रलब्धबुद्धिर्येनैवमतिविरुद्धमभिधत्से[8] । काहम्, क्व भवान्, क्व मणयः, कश्चावयोः सम्बन्धः । तत्कूटकपटचेष्टिताकर पट्टनपाटच्चर[9], [10]अर्णकपणिक, सकलमण्डलप्रतीतप्रत्ययि[11]कशीलमति[12]वेलमेवं मामकाण्डे चण्डकर्मन्पर्यनुयुञ्जानः[13] कथं न लज्जसे' । पुनश्चैनमर्थप्रार्थनपथमनोरथविशालं शब्दालं[14] बलात्[15]अलिन्दमन्दिरमनुचरैरानाय्यानायमतिः[16], 'देव, अयं वणिग्निष्कारणमस्माकं दुरपवादमृदङ्गवन्मुखरमुखः सुखेनानस्ततस्तानक्ष्वा[17] इवासितुं न ददाति' इत्यादिभिरुदितैरवाप्तप्रसरतयोत्तेजितराजहृदयस्तथैव पृथिवीनाथेनापि निराकारयत्[18] ।

---

अतः दूसरोंको ठगनेमें कुशल श्रीभूतिने सोचा--

'यदि अच्छी तरहसे छलका प्रयोग किया जाये तो ब्रह्माको भी ठगा जा सकता है । और यदि दूसरे मनुष्यमें बड़ा परिवर्तन हो गया हो तब तो आलोचनाकी बात ही दूर है' ॥३७४॥

ऐसा विचारकर वह महातृष्णालु उस शोकमग्न वणिक्पुत्रसे इस प्रकार बोला—'अरे दुराग्रही नीच वणिक् ! क्या तुझे किसी पिशाचने छला है ? या मनको मोहित करनेवाली किसी मोहन औषधने तुझे बदहोश कर दिया है ? या जुएमें अपनी चित्तवृत्तिको भी हार गया है ? या दूसरोंके मनको ठगनेवाली किसी दुराचारिणीने तेरी यह दुर्गति की है ? या 'फलवान वृक्षकी तरह किसी श्रीमान्के विरुद्ध लगाया गया अभियोग बिना फल दिये नहीं रहता' इस विचारसे किसी दुर्बुद्धिने तुझे ठगा है जिससे तू ऐसी बेसिर-पैरकी बात बोलता है ? कहाँ मैं, कहाँ तू, कहाँ रत्न ? हमारा तुम्हारा सम्बन्ध ही क्या ? छल-कपटमें चतुर, नगरचोर, निन्दनीय वणिक ! सर्वत्र देशोंमें मेरी विश्वसनीयताकी ख्याति है । इस तरह असमयमें मुझसे पूछते हुए तुझे लज्जा नहीं आती ?'

इसके पश्चात् उस पिशाच श्रीभूतिने अपने रत्न प्राप्त करनेके लिए चिल्लाते फिरते उस वणिक्पुत्रको जबरदस्ती नौकरोंके द्वारा राजमन्दिरमें बुलवाकर राजासे कहा—'महाराज ! यह वणिक् व्यर्थ ही सर्वत्र हमारा अपवाद करता फिरता है । बिना नाथके बैलकी तरह सुखसे बैठने भी नहीं देता।' इत्यादि बातोंके द्वारा उसने राजाका हृदय भी उसकी ओरसे उत्तेजित कर दिया । और राजाके द्वारा भी उसे महलसे निकलवा दिया ।

---

१. शास्त्रं वेदः स्मृतिश्च । २. विचारः । ३. परनरे । ४. तृष्णा । ५. प्राप्तशोकम् । ६. दुराग्रहिन् । ७. वेश्यया । ८. वदसि । ९. नगरचौर । १०. निन्द्यवणिक । ११. विश्वासस्वभावम् । १२. अतीव । १३. प्रच्छन् । १४. वाचालम् । १५. राजमन्दिरम् । १६. असंगतमतिः । —नार्यमतिः आ० । १७. नाथरहितवृषभवत् । १८. निर्घाटनं कारयामास ।

भद्रमित्रः 'चित्रमेतन्ननु यन्मामपि परविप्रलम्भाय[1] कुलक्रमायाताखिलकमलानिलयम-नन्यसामान्यसाहसालयमेष मोष[2]धिषणानिधिरपर[3] इवापायजलनिधिर्नगरमध्येऽपि मोषितुम-भिलषति' इति जातामर्षो[4]त्कर्षस्तं न्यासार्पणे[5]ऽतिचिक्कण[6]चित्तं निश्चित्य स्वाध्यायिपरिषदि महापरिषदि[7] च तदन्यायोपविन्यासेन साध्यसिद्धिमनवबुद्ध्यानधीनधीः[8] अशङ्कशुकमति[9]र्महा-देवीधामनेम[10] निवेशमल्लिकानोकहशिखादेशमारुह्यापदगृह्यः[11] कुररीविरहावसरः कुरर इव तमस्विनी[12]प्रथमपश्चिमयामसमये [13]'सुहृद्वराहुतिः श्रीभूतिरेवंविधकरण्डकविन्यस्तम्, इय-त्संस्थानसम्, एतद्वर्णम्, अदः संख्याभ्यर्णं च मदीयं मणिगणमुपनिधिनिधेयं[14] न प्रतिददा-तीत्यत्र चास्यैव धर्मरमणी साक्षिणी। यदि च यद्वदतयै[15]तदन्यथा मनागपि भवति तदा मे चित्रवधो विधातव्यः' इति दीर्घघोषघूर्णितमूर्धमध्यमूर्ध्वबाहुः सर्वर्तुपरिवर्तार्ध[16] पूत्कुर्वन्ने-कदा नगराङ्गनाजनस्य [17]चन्द्रामृतपात्रयन्त्रधारागृहावगाहगौरितजगत्त्रयं कौमुदीमहोत्स-वसमयमालोकमानया तमङ्कोत्सङ्गसमासीनया[18] निपुणिकाभिधानोपसवित्री[19] समेतया अना-थलोकलोचनचकोरकौमुदीकल्पवृत्तया रामदत्तया करुणारसप्रचारपदव्या[20] महादेव्याकर्णि-तोऽ[21]नुक्रोशाभिनिवेशान्निर्वर्णितश्च।

तदस्मन्मनःसंधात्रि धात्रि, न खल्वेष मनुष्यः पिशाचपरिप्लुतो नाप्युन्मत्ताचरितो

---

तब भद्रमित्र विचारने लगा—'मेरे घरमें वंशपरम्परासे लक्ष्मीका निवास चला आता है, तथा मैं असाधारण साहसी भी हूँ फिर भी आश्चर्य है कि यह पक्का ठग नगरके बीचमें ही मेरा माल हड़प लेना चाहता है।' यह सोचकर उसे बड़ा क्रोध हो आया। उसे निश्चय हो गया कि श्रीभूति मेरी धरोहरको कभी नहीं देगा तथा समझदारों और धर्माधिकारियोंके सामने उसके अन्यायको रखनेसे भी कुछ लाभ नहीं होगा। तब उस बुद्धिशालीने एक दूसरा उपाय किया।

राजाकी पटरानीके महलके समीप एक इमलीका वृक्ष था। रातके समय वह उसकी चोटीपर चढ़ जाता और जैसे सारसीके बिछोहमें सारस चिल्लाता है उस तरह रात्रिके प्रथम और अन्तिम पहरमें हाथ ऊपर उठाकर बड़े जोरसे चिल्लाता—"मेरा पूर्व मित्र किन्तु अब शत्रु श्रीभूति अमुक प्रकारकी पेटीमें रखे हुए, अमुक आकार और अमुक रंगके तथा अमुक संख्यावाले मेरे रत्नोंको नहीं देता। मैंने उसके पास धरोहरके रूपमें रखे थे। इसकी साक्षी उसीकी धर्मपत्नी है। यदि मेरा कथन रंच मात्र भी असत्य हो तो मुझे मरवा दिया जाये।"

ऐसा चिल्लाते-चिल्लाते उसे छह माह बीत गये। एकबार अनाथ लोगोंके लोचनरूपी चकोरके लिए चाँदनीके समान आचरणवाली दयावती राजमहिषी रामदत्ता कौमुदी महोत्सव देखती थी। उसके पासमें उसकी धाय निपुणिका बैठी थी। उस समय रामदत्ताने उस वणिक्की पुकार सुनी और दयापूर्ण भावसे अपनी धायसे बोली—

'धाय! न तो यह मनुष्य पिशाचसे ही ठगा गया है और न इसका आचरण पागलोंके

---

१. परवञ्चननिमित्ते मामपि मोषितुमभिलषति। २. चौर्य। ३. द्वितीयः। ४. क्रोध। ५. स्थापित-धनदाने। ६. लोभिष्टम्। ७. धर्माधिकार। ८. न परवशबुद्धिः। ९. असंकमुक—अ० ज० द०। स्थिर-मतिः। १०. समीप। ११. पक्षिणी। १२. रात्रि। १३. पूर्वं सुहृदिदानीं शत्रुरिति। १४. स्थाप्यं धनम्। १५. असंबद्धप्रलापतया। १६. षण्मासान् यावत्। १७. चन्द्र एवाऽमृतपात्रं तदेव यन्त्रधारागृहम्। १८. उप-रितनभूमिस्थितया रामदत्तया। १९. धात्री। २०. मार्गरूपया। २१. करुणाभिप्रायात्।

यतस्तं दिवसमादिं कृत्वा सकलमपि परिवत्सर[1]दलमेकवाक्यव्याहा[2]राकुण्[3]ठपाठकठोरकण्ठनालः। तद्विचारयेयं तावदचिरकालं [4]शारविशारदहृदयाम्बुजस्य एतत्क्रीडाव्याजेन [5]मन्त्रेरन्तःकरणम्। अम्बिके, त्वयापि [6]द्यूतदेवनावसरे यद्यहमेनमनेककुच[7]राचारनिचितचित्तमतिबहुकुक्कुटिचेष्टितं[8] बकोटवृत्तमुदन्तजातं पृच्छामि, यद्यवास्य [9]कटकोर्मिकांशुकादिकं जयामि, तत्तदेवाभिज्ञानीकृत्य मृगीमुखव्याघ्रीसमाचारकुट्टनी[10] श्रीदत्ता भट्टिनी तिन्तिणीकातरुभाजोऽस्य वणिजो विषमरुचिमरीचिसंख्यासंपन्नानि[11] रत्नानि याचयितव्या' इति निपुणिकायाः कृतसंगीतिः[12] श्वस्त्येऽहनि[13] 'सदैव मदीयहृदयानन्ददुन्दुभे दुन्दुभे, त्वयापि भगवत्या साधु विजृम्भितव्यम्, यद्यस्य चिञ्चापुरुषस्यास्ति सत्यता' इत्यध्येष्य[14] तथैवाचरिताचरणा शतशस्तत्तदभिज्ञानज्ञापनानुबन्धतन्त्रात्तत्कलत्रान्मणीनुपप्रणीय[15] राज्ञः समर्पयामास।

स राजाद्भुतांशौ[16] स्वकीयरत्नराशौ तानि संकीर्य[17] आकार्य चैनमासन्नलक्ष्मीकल्पलताविलासनन्दनं[18] वैदेहकनन्दनम्, 'अहो वणिक्तनय, यान्यत्र रत्ननिचये तव रत्नानि सन्ति तानि त्वं विचिन्त्य गृहाण' इत्यभाणीत्। भद्रमित्रः 'चिरत्नाय[19] ननु दिष्ट्या[20] वर्धेऽहम्' इति मनस्यभिनिविश्य[21] 'यथादिशति विशांपतिः' इत्युपादिश्य विमृश्य च तस्यां माणिक्यपुञ्जौ[22] निजान्येव मनाग्विलम्बित[23]परिचयचिरत्नानि रत्नानि समग्रहीत्।

ततः स नरवरः सपरिवारः प्रकामं विस्मितमतिः 'वणिक्पते, त्वमेवात्रान्वर्थतः

---

जैसा ही है। क्योंकि उस दिनसे लेकर पूरे छह माह तक यह एक ही बात चिल्लाता है। अतः द्यूतक्रीडाके शौकीन श्रीभूतिके साथ द्यूतक्रीडाके बहानेसे उसके मनकी बात शीघ्र जाननी चाहिए। जुआ खेलते समय मैं उस अनाचारी बगुला भगतसे जो-जो बात पूछूँ तथा जो उसके कंकण, अँगूठी, वस्त्र वगैरह जीतूँ उन सबको प्रमाणरूपसे उपस्थित करके तुम्हें उस मृगीके समान मुख किन्तु सिंहनीके समान आचरणवाली कुटनी श्रीदत्तासे इमलीके वृक्षपर चढ़े हुए इस वणिक्के सात रत्न माँग लाने चाहिए।'

इस प्रकार निपुणिकाको समझाकर दूसरे दिन रानीने—हे मेरे हृदयको आनन्द देनेवाले पाशदेवता! यदि इस इमलीके वृक्षवाला मनुष्य सच्चा है तो तुम्हें भी उसमें सहायता करनी चाहिए ऐसी प्रार्थना करके वैसा ही किया और बार-बार जुएमें जीते हुए पदार्थोंको प्रमाण रूपसे उपस्थित करके श्रीभूतिकी पत्नीसे रत्न माँग लिये तथा उन्हें राजाको दे दिया। राजाने उन रत्नोंको अपने अद्भुत रत्नोंमें मिलाकर उस वणिक्-पुत्रको बुलाया और कहा—'वणिक्-पुत्र! इन रत्नोंमें-से जो रत्न तुम्हारे हों उन्हें चुनकर ले लो।' 'चिरकालके बाद मेरा भाग्योदय हुआ है' ऐसा मनमें सोचकर भद्रमित्र बोला—'जो आज्ञा महाराज।' चूँकि रत्नोंको देखे हुए बहुत दिन हो गये थे इसलिए उन्हें चुननेमें थोड़ा समय लगा। किन्तु उसने विचारकर उन रत्नोंमें-से अपने रत्नोंको खोज लिया।

यह देखकर सपरिवार राजाको बड़ा आश्चर्य हुआ। वह बोला—'वणिक्पति! तुम ही

---

१. वर्षार्द्धं। २. आलाप। ३. अमन्द। ४. द्यूतक्रीडा। ५. सचिवस्य। ६. द्यूतक्रीडन। ७. कुत्सित। ८. माया। कुक्कुटि–आ०। ९. कंकण-मुद्रिका-वस्त्रादिकं। १० कुटनीति भाषायाम्। ११. सप्तार्चिः संख्यानि। १२. संकेतः। १३. आगामिनि दिने। १४. प्रार्थ्य। १५. आनीय। १६. किरणे। १७. मिश्रीकृत्य। १८. देवोद्यानम्। १९. चिराय। २०. पुण्येन। २१. अभिप्रायं कृत्वा। २२. समूहे। २३. मनाग् विलम्बितपरिचयेन चिरत्नः कालक्षेपो येषु रत्नेषु तानि चिरत्नानि।

सत्यघोषः, त्वमेव च परमनिस्पृहमनीषः, यत्तव चेतसि वचसि च न मनागप्यन्यथाभावः समस्ति' इति प्रतीतिभिः पारितोषिकप्रदानपुरःसरप्रकृतिभिस्तत्तदौपयिकोपचितिवसतिभिश्च[भणितिभिस्तमखिलब्रह्म[1]स्तम्बस्तिभीविजृम्भमाणगुणस्तोमं भद्रमित्रं कथंकारं न श्लाघयामास।

पुनरदू[2]राशिवतातिं श्रीभूतिं निखिललोकलपना[3]लवालमूलकीलीनै[4]तालताश्रयशाखिनं न्युब्जाननं[5] निसर्गेण [6]हरिणीसमच्छायमपि महासाहसानुष्ठानात्सूर्मी[7]समानकायमनल्पवैलक्ष्यस्फुटदास्यनितमतीवभयाविर्भूतोत्पथ[8]वेपथु[9]स्तिमितमवेक्ष्य बह्वाक्षेपम्, 'आः[10] सोमपायिनामपांक्तेय[11] वैधेय[12], विश्वासघातपातकप्रसव श्रोत्रियकितव दुराचार प्रवर्तितनूत्नरत्नापहार, कुसिक[13]कुलपांसन, बकानुष्ठानसद्म, साधुजनमनःशकुं[14]निबन्धनायातनुतन्त्रीजालमिव खलु तवेदं यज्ञोपवीतम्। असदाचारावधिक[15] वेदवैवधिक[16], सद्धर्मधाममध्यामलताविधानाय विश्वभोजः[17] समेधनं[18], अकृत्यचैत्य[19] वात्यामात्य[20] जरायमदूतिको[21]पपतिक[22] दुर्गतिक, किमात्मनो न पश्यसि [23]चर्मितरुत्वचमिवातिप्रवृद्धविश्रो[24]वात्योन्माथशिथिलितां,' प्रभातप्रदीपिकामिवास्तासन्नजीवितरविमङ्कच्छविं येनाद्यापि वयोधसि[25] वयसि वर्तमान इव चेष्टसे। तदिदानीं यदि घनाभि[26]घारघोरतेजसि विश्ववेदसि[27] निक्षिप्यसे, तदा चिरोपचितदुराचारग्रहस्य स तवाचिरदुःखदायिपरिग्रहोऽनुग्रहो इव। ततो द्विजापसद, कदा[28]चित्त्वयेदमति-

वास्तवमें सत्यघोष हो, तुम ही अत्यन्त निस्पृही हो; क्योंकि तुम्हारे मन और वचनमें जरा भी छलछिद्र नहीं है।' इस प्रकारके वचनोंके द्वारा, पारितोषिक वगैरहके द्वारा तथा उस समयके योग्य अन्य उपायोंके द्वारा राजाने सबके द्वारा प्रशंसित भद्रमित्रकी बहुत-बहुत सराहना की।

बेचारा अभागा श्रीभूति नीचा मुख किये हुए खड़ा था। यद्यपि वह स्वभावसे ही देखनेमें हरिणीके समान दीन था तथापि उसने बड़ा साहस किया था और उसके कारण वह ऐसा प्रतीत होता था मानो लोहेकी कोई मूर्ति है। उसके मुखपर असीम लज्जा बोलती थी। भयके कारण वह थर-थर काँप रहा था। उसे देखकर राजा बड़े तिरस्कारके साथ बोला–'ब्राह्मण कुल कलंक, मूर्ख, विश्वासघाती, जुएके द्वारा नये-नये रत्नोंको अपहरण करनेवाले, बगुला भगत! तुम्हारा यह यज्ञोपवीत साधु पुरुषोंके मनरूपी पक्षियोंको फँसानेके लिए बड़ा भारी ताँतका जाल है। अरे दुराचारी, वेदोंके भारवाही! समीचीन धर्मरूपी मन्दिरको मलिन करनेवाले, कुकर्मके घर, दुष्ट मन्त्री! क्या तुम वृद्धताके कारण भोजवृक्षकी छालकी तरह शिथिल हुए और तेज हवा के झोंकेसे बुझनेके उन्मुख हुए प्रभातकालीन दीपककी तरह अथवा अस्त होनेके उन्मुख हुए सूर्यकी तरह अपने शरीरकी दशाको नहीं देखते हो, जिससे अब भी ऐसी चेष्टाएँ करते हो मानो तुम युवा हो। अतः अब यदि तुम्हें खूब जलती हुई अग्निमें डाल दिया जाये तो यह तुम्हारे जैसे पुराने पापीपर अनुग्रह ही होगा; क्योंकि इससे तुम थोड़ी ही देर तक दुःख उठा सकोगे। इसलिए नीच ब्राह्मण! या तो तुम्हें अत्यन्त दुर्गन्धित गोबरसे भरे हुए तीन प्याले खाने चाहिये, या

---

१. ब्रह्माण्ड। २. समीपाऽमंगलम्। ३. मुख। ४. जनापवाद। ५. अधोमुखम्। ६. स्वर्णप्रतिमा। ७. लोहप्रतिमा। ८. उन्मार्ग। ९. कम्पेनार्द्र–प्रस्वेदितम्। १०. खेदे। ११. पंक्तिरहित। १२. निर्भाग्य। १३. ब्राह्मणकुलदूषण। १४. पक्षिबन्धनार्थम्। १५. मर्यादक। १६१. भारवाहक। १७. अग्नेः। १८. इन्धन। १९. गृह। २०. निकृष्टमंत्रिन्। २१. जरा एव यमदूती। २२. जार। २३. भूर्जपत्रवत् शिथिलशरीरचर्म। २४. जरा एव वात्या। २५. यौवने। २६. घृत। २७. अग्नौ। २८. अथवा।

दुर्गन्धगोर्वरोदूर्गर्वितमध्याशयं[1] शालाजिर[2]त्रयमशितव्यम्, नो चेद्शरालबलोत्फुल्लगल्लानां[3] मल्लानां त्रयस्त्रिंशदपहस्त[4]प्रहतानि सहितव्यानि । ध्रुवमन्यथा तव सर्वस्वापहारः ।'

प्रणाशावकाशविभूतिः श्रीभूतिराद्यनयं दण्डद्वयं क्रमेणातितिक्षमाणः[5] पर्याप्त[6]समस्तद्रविणः क्रिमिकिर्मीरपरिषत्परिकल्पित[7]मार्ष्टिः[8] ,कृतकलशकपालमालावासिकस्थूष्टिरुत्सृष्ट[9]सरावकपरिष्कृतः[10] पुरादवा[11]लंबालेय[12]कमारोह्य सनिकारं निष्कासितः पापविपाकोपपन्नाप्रतिष्ठ[13]कुष्ठो दुष्परिणामकनिष्ठः[14] शुभाशयारण्यविनाशमहसि[15] हिरण्यरेतसि तनुविसर्गादतिरौद्रसर्गाद्[16]अहेयेऽन्ववाये[16] प्रादुर्भूय[17] चिरायापराध्य[18] च प्राणिषु जातजीवितावधिरधःप्रधाननिधिर्बभूव ।

भवति चात्र श्लोकः—

> श्रीभूतिः स्तेयदोषेण पत्युः प्राप्य पराभवम् ।
> रोहिद्भ्व[19] प्रवेशेन दंशेरः[20] सन्नधोगतः ॥३७५॥

*इत्युपासकाध्ययने स्तेयफलप्रलपनो नाम सप्तविंशतितमः कल्पः ।*

> अत्युक्तिमन्यदोषोक्तिमसभ्योक्तिं च वर्जयेत् ।
> भाषेत वचनं नित्यमभिजातं[21] हितं मितम् ॥३७६॥
> तत्सत्यमपि[22] नो वाच्यं यत्स्यात्परविपत्तये ।

खूब मोटे ताजे बलशाली पहलवानोंके हाथके तेतीस प्रहार सहने चाहिएँ । नहीं तो अवश्य ही तुम्हारा सर्वस्व हर लिया जायेगा ।'

विनाशसे बचावको विभूति माननेवाला श्रीभूति पहलेके दो दण्ड तो क्रमसे नहीं सह सका । अतः उसका सब धन हर लिया गया और समस्त बदनपर चितकबरे रंगसे चित्रकारी करके तथा घड़ेके खप्परोंकी और फूटे हुए शकोरोंकी माला पहना कर गधेपर बैठाकर उसे तिरस्कारपूर्वक नगरसे निकाल दिया । पापकर्मका उदय आनेसे उसे कोढ़ हो गया और वह अत्यन्त नीच परिणामोंसे आगमें जलकर मर गया । तथा साँपोंके वंशमें उत्पन्न हुआ । वहाँ उसने अनेक प्राणियोंको डँसा और आयु पूरी करके नरकमें गया ।

इसके सम्बन्धमें एक श्लोक है जिसका भाव इस प्रकार है—

'चोरीके दोषके कारण श्रीभूति राजाके द्वारा तिरस्कृत हुआ । और आगमें जलकर मर गया । फिर सर्पयोनिमें जन्म लेकर नरकगामी हुआ' ॥३७५॥

*इस प्रकार उपासकाध्ययनमें चोरीका फल बतलानेवाला सत्ताईसवाँ कल्प समाप्त हुआ ।*

[ अब सत्य व्रतका वर्णन करते हैं— ]

## सत्याणुव्रत

किसी बातको बढ़ाकर नहीं कहना चाहिए, न दूसरेके दोषोंको ही कहना चाहिए और न असभ्य वचन ही बोलना चाहिए । किन्तु सदा हित-मित और सभ्य वचन ही बोलना चाहिए ॥ ३७६ ॥ किन्तु ऐसा सत्य भी नहीं बोलना चाहिए, जिससे दूसरोंपर विपत्ति आती हो

१. भृतमध्यदेशम् । २. सरावं भाजनं । ३. बहुबल । ४. कोहणी । ५. असहमान । ६. गृहीत । ७. क्रमिभिर्विचित्रः । ८. विलेपन । ९. उच्छिष्ट । १०. सरावमालालंकृतः । ११. नगरात् । १२. बृहत् रासभम् । १३. अशोभमान । १४. जघन्यः । १५. अग्नौ । १६. सर्पवंशे । १७. उत्पद्य । १८. प्राणिषु अपराधं कृत्वा । १९. अग्नि । २०. सर्पः । २१. अभिजातस्तु कुलजे बुधे सुकुमारे न्याय्ये चोपचारात् । २२. 'स्थूलमलीकं न वदति न परान् वादयति सत्यमपि विपदे । यत्तद्वदन्ति सन्तः स्थूलमृषावादवैरमणम् ॥ ५५ ॥' —रत्न० श्रा० । पुरुषार्थसि० श्लो० ९१–९८ । अमित० श्राव० अ० ६ श्लो० ४५–५८ । 'तत्सत्यमपि नो भाष्यं यत्स्यात्स्वपरविपत्तये । वर्तन्ते येन वा स्वस्य व्यापदस्तु दुरुत्तराः ॥७५॥' —प्रबोधसार ।

जायन्ते येन वा स्वस्य व्यापदश्च दुरास्पदाः ॥३७७॥
प्रियशीलः प्रियाचारः प्रियकारी प्रियंवदः ।
स्यादानृशंसधी[1]र्नित्यं नित्यं परहिते रतः ॥३७८॥
केवलिश्रुतसङ्घेषु देवधर्मतपःसु च ।
अवर्णवाद[2]वाञ्जन्तुर्भवेद्दर्शनमोहवान् ॥३७९॥
मोक्षमार्गं स्वयं जानन्नर्थिने यो न भाषते ।
मदापह्नवमात्सर्यैः स स्यादावरणद्वयी[3] ॥३८०॥
मन्त्रभेदः[4] परीवादः पैशून्यं कूटलेखनम् ।
मुधासाक्षिपदोक्तिश्च सत्यस्यते विघातकाः ॥३८१॥
परस्त्रीराजविद्विष्टलोकविद्विष्टसंश्रयाम् ।
अनायकसमारम्भां न कथां कथयेद्बुधः ॥३८२॥
असत्यं[5] सत्यगं किंचित्किंचित्सत्यमसत्यगम् ।
सत्यसत्यं पुनः किंचिदसत्यासत्यमेव च ॥३८३॥

अस्येदमैदंपर्यम्—असत्यमपि किंचित्सत्यमेव, यथान्धांसि रन्धयति वयति वासांसी-

या अपने ऊपर दुर्निवार संकट आता हो ॥ ३७७ ॥

मनुष्यको सदा प्रिय स्वभाववाला, प्रिय आचरणवाला, प्रिय करनेवाला, प्रिय बोलनेवाला, सदा दयालु और सदा दूसरोंके हितमें तत्पर होना चाहिए ॥ ३७८ ॥

जो जीव केवली, शास्त्र, संघ, देव, धर्म और तपमें मिथ्या दोष लगाता है, वह दर्शन मोहनीय कर्मका बन्ध करता है ॥ ३७९ ॥ जो मोक्षके मार्गको जानता हुआ भी, जो उसे जानने को इच्छुक है उसे भी नहीं बतलाता, वह अपने ज्ञानका घमण्ड करनेसे, ज्ञानको छिपानेसे तथा उसके सिवा दूसरा कोई न जानने पावे इस ईर्ष्या भावसे ज्ञानावरण और दर्शनावरण कर्मका बन्ध करता है ॥ ३८० ॥

संकेत वगैरहसे दूसरेके मनकी बातको जानकर उसे दूसरोंपर प्रकट कर देना, दूसरेकी बदनामी फैलाना, चुगली खाना, जो बात दूसरेने नहीं कही या नहीं की, दूसरोंका दबाव पड़नेसे ऐसा उसने कहा या किया है इस प्रकारका झूठा लेख लिखना, और झूठी गवाही देना, ये सब काम सत्यव्रतके घातक हैं ॥३८१॥ समझदार मनुष्यको परायी स्त्रियोंकी कथा, राजविरुद्ध कथा, लोकविरुद्ध कथा और कपोलकल्पित व्यर्थ कथा नहीं कहनी चाहिएँ ॥ ३८२ ॥

वचन चार प्रकारका होता है । कोई वचन असत्य-सत्य होता है, कोई वचन सत्य-असत्य होता है । कोई वचन सत्य-सत्य होता है और कोई वचन असत्य-असत्य होता है ॥ ३८३ ॥

इसका यह अभिप्राय है कि कोई वचन असत्य होते हुए भी सत्य होता है, जैसे–'भात पकाता है, या कपड़ा बुनता है' । ये वचन यद्यपि असत्य हैं क्योंकि न भात पकाया जाता है

१. दयासहितबुद्धिः । २. निन्दापरः । 'केवलिश्रुतसंघधर्मदेवावर्णवादो दर्शनमोहस्य ॥' तत्त्वा० सू० ६, १३ सू० । ३. 'तत्प्रदोषनिह्नवमात्सर्यान्तरायासादनोपघाता ज्ञानदर्शनावरणयोः ॥' ६ तत्त्वा० सू० ६, १० । ४. 'मिथ्योपदेशरहोभ्याख्यानकूटलेखक्रियान्यासापहारसाकारमन्त्रभेदाः ।' —त० सू० ७–२६ । 'परिवादरहोभ्याख्या पैशून्यं कूटलेखकरणं च । न्यासापहारितापि च व्यतिक्रमाः पञ्च सत्यस्य ॥५६॥' —रत्न० श्रा० । पुरुषार्थसि० श्लो० १८४ । अमित० श्राव०, अ० ७, श्लो० ४ । ५. एतत् सर्वं गद्यभागसहितं धर्मरत्नाकरे समुपलभ्यते ।

ति। सत्यमप्यसत्यं किंचिद्यथार्धमासतमे दिवसे तवेदं देयमित्यास्थाय मासतमे संवत्सरतमे वा दिवसे ददातीति। सत्यसत्यं[1] किंचिद्यद्वस्तु यद्देशकालाकारप्रमाणं प्रतिपन्नं तत्र तथैवाविसंवादः। असत्यासत्यं किंचित्स्वस्यासत्संगिरते कल्ये दास्यामीति।

तुरीयं वर्जयेन्नित्यं लोकयात्रा[2] त्रये स्थिता।
सा मिथ्यापि न गीर्मिथ्या या गुर्वादिप्रसादिनी ॥३८४॥
न स्तूयादात्मनात्मानं[3] न परं परिवादयेत्।
न सतोऽन्यगुणान् हिंस्यान्नासतः स्वस्य वर्णयेत् ॥३८५॥
तथा कुर्वन्प्रजायेत नीचैर्गोत्रोचितः पुमान्।
उच्चैर्गोत्रमवाप्नोति विपरीतकृतेः कृती ॥३८६॥
यत्परस्य प्रियं कुर्यादात्मनस्तत्प्रियं हि तत्।
अतः किमिति लोकोऽयं पराप्रियपरायणः ॥३८७॥
यथा यथा परेष्वेतच्चेतो वितनुते तमः।

और न कपड़ा बुना जाता है किन्तु पके हुए को भात कहते हैं, और बुन जानेपर कपड़ा कहलाता है, फिर भी लोकव्यवहारमें ऐसा ही कहा जाता है इसलिए इस तरहके वचनोंको सत्य मानते हैं। इसी तरह कोई वचन सत्य होते हुए भी असत्य होता है। जैसे-किसीने वादा किया कि पन्द्रह दिनमें मैं तुम्हें अमुक वस्तु दे दूँगा। किन्तु पन्द्रहवें दिन न देकर वह एक मासमें या एक वर्षमें देता है। यहाँ चूँकि उसने वस्तु दे दी इस लिए उसका कहना सत्य है किन्तु समयपर नहीं दी इस लिए सत्य होते हुए भी असत्य है। जो वस्तु जिस देशमें, जिस कालमें, जिस आकारमें और जिस प्रमाणमें जानी है उसको उसी रूपमें कहना सत्य-सत्य है। जो वस्तु अपने पास नहीं है उसके लिए ऐसा वचन देना कि मैं तुम्हें कल दूँगा असत्य-असत्य वचन है।

इनमेंसे चौथे असत्य असत्य वचनको कभी नहीं बोलना चाहिए। क्योंकि लोकव्यवहार शेष तीन प्रकारके वचनोंपर ही स्थित है। जो वचन गुरुजनोंको प्रसन्न करनेवाला है, वह मिथ्या होते हुए भी मिथ्या नहीं है ॥ ३८४ ॥

न स्वयं अपनी प्रशंसा करनी चाहिए और न दूसरोंकी निन्दा करनी चाहिए। दूसरोंमें यदि गुण हैं तो उनका लोप नहीं करना चाहिए और अपनेमें यदि गुण नहीं हैं तो उनका वर्णन नहीं करना चाहिए कि मेरेमें ये गुण हैं ॥ ३८५ ॥ ऐसा करनेसे मनुष्य नीच गोत्रका बन्ध करता है, और उससे विपरीत करनेसे अर्थात् अपनी निन्दा और दूसरोंकी प्रशंसा करनेसे तथा दूसरोंमें गुण न होनेपर भी उनका वर्णन करनेसे और अपनेमें गुण होते हुए भी उनका कथन न करनेसे उच्चगोत्रका बन्ध करता है ॥ ३८६ ॥

जो दूसरोंका हित करता है वह अपना ही हित करता है फिर भी न जाने क्यों यह संसार दूसरोंका अहित करनेमें ही तत्पर रहता है ॥ ३८७ ॥ जैसे-जैसे यह चित्त दूसरोंके विषयमें

---

१. 'यद्वस्तु यद्देशकालप्रमाकारं प्रतिश्रुतम्। तस्मिंस्तथैव संवादि सत्यसत्यं वचो वदेत् ॥४१॥' —सागारधर्मामृत, अ० ४। २. 'लोकयात्रानुरोधित्वात्सत्यसत्यादिवाक्त्रयम्। ब्रूयादसत्यासत्यं तु तद्विरोधान्न जातुचित् ॥४०॥' —सागारधर्मा०, अ० ४। ३. 'परात्मनिन्दाप्रशंसे सदसद्गुणोच्छादनोद्भावने च नीचैर्गोत्रस्य ॥२५॥ तद्विपर्ययो नीचैर्वृत्यनुत्सेकौ चोत्तरस्य ॥२६॥' —तत्त्वा० सू० ६ अ०। 'सा मिथ्या न भवेन्मिथ्या या पत्यादिप्रसादिनी। न स्तुयादात्मनात्मानं न परं परिवादयेत् ॥८६॥ —प्रबोधसार।

तथा तथात्मनाडीषु तमोधारा निषिञ्चति ॥३८८॥
दोषतोयैर्गुणग्रीष्मैः संगन्तृणि शरीरिणाम् ।
भवन्ति चित्तवासांसि गुरूणि च लघूनि च ॥३८९॥
सत्यवाक्सत्यसामर्थ्याद्वचःसिद्धिं समश्नुते ।
वाणी चास्य भवेन्मान्या यत्र यत्रोपजायते ॥३९०॥
तर्षेर्ष्यामर्षहर्षाद्यैर्मृषाभाषामनीषितः ।
[1]जिह्वाच्छेदमवाप्नोति परत्र च गतिक्षतिम् ॥३९१॥

श्रूयतामत्रासत्यफलस्योपाख्यानम्—जाङ्गलदेशेषु हस्तिनागनामावनीश्वरकुञ्जरजनितावतारे[2] हस्तिनागपुरे प्रचण्डदोर्दण्डमण्डलीमण्डनमण्डलाग्रखण्डितभण्डनकण्डूलारातिकीर्तिलतानिबन्धनोऽभूदयोधनो नाम नृपतिः। अनवरतवसुविश्राणनप्रीणितातिथिरतिथिर्नामास्य[3] महादेवी। सुता चानयोः सकलकलावलोकानलसा सुलसा नाम। सा किल तया महादेव्या गर्भगतापि [4]ज्ञातेयेनैकोदर[5]शालिनो रम्यकदेशनिवेशोपेतपोदनपुरनिवेशिनो निर्विपक्ष[6]लक्ष्मीललितातूर्णमङ्गलस्य[7] पिङ्गलस्य [8]गुणगीर्वाणाचलरत्नसानवे सूनवे दुर्वारवैरिवक्षःस्थलोद्दलनावदानोद्योगलाङ्गलाय[9] मधुपिङ्गलाय परिपणिता[10] बभूव।

भूभुजा च महोदयेन तेन विदितमहादेवीहृदयेनापि 'यस्य कस्यचिन्महाभागस्य भाग्यैर्भोग्यतया योग्यमिदं स्त्रैणं द्रविणं तस्यैतद्भूयात्। अत्र सर्वेषामपि वपुष्मतामचिन्तितसुख-

अन्धकार फैलाता है वैसे-वैसे अपनी नाड़ियोंमें अन्धकारकी धाराको प्रवाहित करता है। अर्थात् दूसरोंका बुरा सोचनेसे अपना ही बुरा होता है ॥ ३८८ ॥

प्राणियोंके चित्तरूपी वस्त्र यदि दोषरूपी जलमें डाले जाते हैं तो भारी हो जाते हैं और यदि गुणरूपी ग्रीष्म ऋतुमें फैलाये जाते हैं तो हल्के हो जाते हैं ॥ ३८९ ॥ सत्यवादीको सदा सच बोलनेके कारण वचनकी सिद्धि प्राप्त होती है। जहाँ-जहाँ वह जो कुछ कहता है उसकी वाणीका आदर होता है ॥ ३९० ॥ इसके विपरीत जो तृष्णा, ईर्षा, क्रोध या हर्ष वगैरह के वशीभूत होकर झूठ बोलता है उसकी जिह्वा कटवा दी जाती है और परलोकमें भी उसकी दुर्गति होती है ॥ ३९१ ॥

## १५ असत्यभाषी वसु और पर्वत-नारदकी कथा।

अब झूठ बोलनेका क्या फल होता है इसके विषयमें एक कथा सुनें—जांगल देशमें हस्तिनागपुर नामका नगर है, वहाँ अयोधन नामका राजा था। उसके अतिथि नामकी राजमहिषी थी। उनके समस्त कलाओंमें निपुण सुलसा नामकी पुत्री थी। जब वह गर्भमें थी तभी रानीने अपने सहोदर भाई पोदनपुरनरेश पिंगलके गुणी पुत्र मधुपिंगलके साथ उसका वाग्दान करनेका संकल्प कर लिया था।

राजाको यद्यपि रानीके हृदयकी बात ज्ञात थी फिर भी उसने सोचा कि 'यह स्त्रीधन

१. 'तथा अनृतवादी अश्रद्धेयो भवति इहैव च जिह्वाच्छेदादीन् प्रतिलभते।'''प्रेत्य च अशुभां गतिम् ॥' —सर्वार्थसिद्धि ७, ९। २. हस्तिनागनामा कश्चिद् राजा तत्र पूर्वमभूत् तेन तन्नगरं हस्तिनागपुरमित्यभवत्। ३. नामा चास्य—मु०। ४. ज्ञातेर्भावः ज्ञातेयं तेन बन्धुत्वेन इत्यर्थः। ५. अतिथिपिंगलावेकोदरोत्पन्नौ। ६. शत्रुरहित। ७. परिपूर्ण। ८. गुणा एव गीर्वाणाचलः मेरुस्तत्र रत्नशिखराय। ९. उद्दलनाय अवदानं अद्भुतकर्म तत्र उद्योग एव लाङ्गलं यस्य तस्मै। १०. संकल्पिता।

दुःखागमानुमेयप्रभावं दैवमेव शरणम्' इति विगणय्य[1] स्वयंवरार्थं भीम-भीष्म-भरत-भाग-सङ्ग-सगर-सुबन्धु-मधुपिङ्गलादीनामवनिपतीनामुपदे[2]नुकूलं मूलं[3] प्रस्थापयाम्बभूवे[4]।

अत्रान्तरे मगधमध्यप्रसिद्धधाराध्यायामयोध्यायां नरवरः सगरो नाम। स किल लास्यादिविलासकौशलरसायाः सुलसायाः कर्णपरम्परया श्रुतसौरूप्यातिशयो मनागुपरमत्तारुण्यलावण्योदयः प्रयोगेण[5] तामात्मसाच्चिकीर्षुस्तौर्यत्रिकसूत्रे प्रतिकर्मविकल्पेषु[6] संभोगसिद्धान्ते विप्रश्नविद्यायां[7] स्त्रीपुरुषलक्षणेषु [8]कथाख्यायिकाख्यानप्रवाह्लीकास्वपरासु च तासु तासु कलासु परमसंवीणतालताधरित्रीं मन्दोदरीं नाम धात्रीं ज्योतिषादिशास्त्रनिशित[9]मतिप्रसूतिं विश्वभूतिं च बहुमानसंभावितमनसं पुरोधसं तत्र पुरि प्राहिणोत्।

[10]विशिकाशयशार्दूलदरी[11]. मन्दोदरी तां पुरमुपगम्य परप्रतारणप्रगल्भमनीषा कृत[12]कात्यायिनीवेषा तत्तत्कलावलोकनकुतूहलमयोधनधरापालं [13]निजनाथार्थसिद्धिपरवती[14] रञ्जितवती सती [15]शुद्धान्तोपाध्यायी भूत्वा सुलसां सगरे[16] संगरं ग्राहयामास। तथा बकोटवृत्तिवेधाः स पुरोधाश्च तैस्तैरादेशैस्तस्य नृपस्य महादेव्याश्च वशीकृतचित्तवृत्तिः

> कुण्टे षष्टिरशीतिः स्यादेकाक्षे बधिरे शतम्।
> वामने च शतं विंशं दोषाः पिङ्गे त्वसंख्यया ॥३१२॥

---

जिस किसी महाभागके भाग्यमें भोगनेके योग्य है उसीका यह होना चाहिए। इस विषयमें सब शरीरधारियोंका दैव ही शरण है और दैवका प्रभाव अचानक सुख-दुःखके आगमनसे अनुमेय है।' ऐसा जानकर उसने स्वयंवरके लिए भीम, भीष्म, भरत, भाग, संग, सगर, सुबन्धु और मधुपिंगल वगैरह राजाओंके पास भेंट पूर्वक पत्र भिजवा दिये।

इसी बीचमें एक दूसरी घटना घटी। अयोध्याके राजा सगरने कानों-कानों नृत्य आदि कलामें कुशल सुलसाके सौन्दर्यकी चर्चा सुनी। इस राजाका तारुण्य अपने लावण्यके साथ थोड़ा ढल चला था। अतः उसने उसे उपायसे अपनानेके लिए ज्योतिष आदि शास्त्रोंमें प्रवीण विश्वभूति नामक पुरोहितके साथ मन्दोदरी नामकी धायको सुलसाकी नगरीमें भेजा। वह धाय सब कलाओंमें प्रवीण थी, गाना-बजाना और नाचना जानती थी। साज-शृङ्गार करनेमें चतुर थी। सम्भोगके सिद्धान्त, सामुद्रिक विद्या, स्त्री पुरुषके लक्षण, कथा-कहानी और पहेलीमें पूरी पण्डिता थी।

उस नगरमें पहुँचकर दूसरोंको ठगनेमें पटु उस धायने प्रौढ़ा स्त्रीका वेष बनाया और अपने स्वामीका प्रयोजन सिद्ध करनेके लिए तरह-तरहकी कलाएँ दिखाकर राजा अयोधनको प्रसन्न कर लिया तथा उसके अन्तःपुरमें अध्यापिका बनकर सुलसासे यह प्रतिज्ञा करा ली कि वह सगरको ही वरण करेगी। बगुला भगत पुरोहितने भी तरह-तरहके आदेशोंसे राजा और रानीका मन अपने वशमें कर लिया। उसने स्वयं श्लोक रच-रचकर राजा-रानीको सुनाये जिनका भाव इस प्रकार था—

टुण्टेमें ६० दोष होते हैं, कानेमें अस्सी और बहरेमें सौ दोष होते हैं। बौनेमें एक सौ बीस दोष होते हैं। किन्तु जिसकी आँखें पीतवर्णकी होती हैं, उसमें तो अगणित दोष होते

---

१. ज्ञात्वा। २. भेंटपूर्वकं। ३. लेखम्। ४. तेन भुभुजा। ५. केनाऽप्युपायेनेत्यर्थः। ६. मण्डनाभरणादिषु। ७. होराक्षरादिभिः परचित्तज्ञानम्। ८. 'कथा चित्रार्थगा ज्ञेया, ख्यातार्था ख्यायिका मता। दृष्टान्तस्योक्तिराख्यानं प्रवाह्लीका प्रहेलिका।' ९. तीक्ष्ण। १०. परवञ्चनोपाय। ११. व्याघ्रगुहा। १२. अर्द्धवृद्धा। १३. सगरनृप। १४. तत्पराम्। १५. अन्तःपुर। १६. प्रतिज्ञां।

मुखस्यार्धं शरीरं स्यान्घ्राणार्धं मुखमुच्यते ।
नेत्रार्धं घ्राणमित्याहुस्तत्तेषु[1] नयने परे ॥३९३॥

इत्यादिभिः स्वयं विहितविरचनैर्मधुपिङ्गले विप्रीतिं कारयामास ।

[2]ततश्चाम्पेयमञ्जरीसौरभपयःपानलुब्धबोधस्तनन्धयेषु पुष्पन्धयेष्विव मिलितेषु तेषु स्वयंवराह्वानभृङ्कारिताहङ्कारेषु महीश्वरेषु सा मन्दोदरीवशमानसा सुलसा श्रुतिमनोहरं सगरमवृणीत्तन्निम्न[3]चरोपगार्पगेव सागरम् ।

भवति चात्र श्लोकः—

अल्पैरपि समर्थैः स्यात्सहायैर्विजयी नृपः ।
कार्यान्तो[4] हि कुन्तस्य दण्डस्त्वस्य[5] परिच्छदः ॥३९४॥

*इत्युपासकाध्ययने सुलसायाः सगरसंगमो नामाष्टाविंशः कल्पः ।*

प्ररूढनिर्वेदकन्दलो मधुपिङ्गलः 'धिगिदमभोगायतनं[7] भोगार्यतनं[8] यदेकदेशदोषादिमामुचितसमागमामपि मामतनूद्भवाम्[9] नालं[10] प्सि' इति मत्वा विमुक्तसंसारपक्षः परिगृहीतदीक्षः क्रमेण तांस्तान्ग्रामारामनिवेशान्निरनुको[11] [12]जङ्घाकरिक इव लोचनोत्सवतां नयन्नशनायाबु-[13]द्ध्यायोध्यामागत्यानेकोपवासपरवशहृदयोत्साहस्तीव्रातपातिश्रान्तदेहो [14]वाप्पीह इव

हैं ॥३९२॥ तथा, शरीरमें मुखके आधे भागका जो मूल्य है वह पूरे शरीरके बराबर है। नाकके आधे भागका मूल्य पूरे मुखके बराबर है। और आधे नेत्रका मूल्य पूरी नाकके बराबर है। इसलिए उन सबमें नेत्र ही वेशकीमत होते हैं ॥३९३॥

इस प्रकारके वचनोंसे उसने उन्हें मधुपिंगलके प्रति विरक्त बना दिया।

इसके बाद स्वयंवर हुआ। जैसे चम्पेकी कलीकी सुगन्धि रूपी दुग्धका पान करनेके लिए भौंरे एकत्र हो जाते हैं उसी तरह स्वयंवरके नियंत्रणको पाकर मदमत्त हुए सब राजा उसमें सम्मिलित हुए। सुलसाका मन तो मन्दोदरीके वशमें था। अतः जैसे नीची भूमिकी ओर बहनेवाली नदी सागरमें जाकर मिल जाती है वैसे ही उसने उन राजाओंमें-से सगर राजाको वरण कर लिया।

इस विषयमें एक श्लोक है जिसका भाव इस प्रकार है—

शक्तिशाली थोड़से भी सहायकोंके द्वारा राजा विजयी होता है। जैसे भालेकी नोक ही अपना काम करती है, उसमें लगा डंडा तो उसका सहायक मात्र है ॥३९४॥

*इस प्रकार उपासकाध्ययनमें सुलसाका सगरके साथ संगम नामका*
*अठाईसवाँ कल्प समाप्त हुआ।*

इस घटनासे मधुपिंगलको बड़ा वैराग्य हुआ—'इस भोगशून्य शरीरको धिक्कार हो जिसके एक भागमें दोष होनेसे मैं समागमके योग्य भी मामाकी पुत्री नहीं प्राप्त कर सका'। ऐसा सोचकर उसने संसारको छोड़ दिया और जिन-दीक्षा ले ली। इसके बाद एकाकी पादचारीकी तरह अनेक ग्रामों और नगरोंमें भ्रमण करता हुआ एक दिन अचानक वह भोजनके लिए अयोध्या नगरीमें

१. पूर्वोक्तेषु मध्ये नेत्रे उत्कृष्टे। २. 'चम्पकवल्लरी शुभसुगन्धता एव दुग्धपानं तत्र लोभिष्ठज्ञानबालकेषु। ३. निम्नभूगामिनी। ४. नदी। ५. अग्रभागः। ६. कुन्तस्य।—स्तस्य आ०। ७. भोगरहितम्। ८. शरीरम्। ९. मातुलपुत्रीम्। १०. न प्राप्तवान्। ११. एकाकी। १२. पादचारी। १३. आहारार्थम्। १४. चातकवत्।

क्लमथुव्यपोहाय[1] सगरागारद्वारपद्रिरे[2] मनाग्न्यलम्बत। तत्र च पुराप्रयुक्तपरिणयापायनीतिर्विश्वभूतिः प्रगल्भमतये शिवभूतये रुचिष्यार्थ[3] शिष्याय रहितरहस्यमुद्रकं[4] सामुद्रकमशेषविदुषविचक्षणो व्याचक्षाणो बभूव। परामर्शवशाशीतिः शिवभूतिस्तं न्यक्षलक्षणपेशलं मधुपिङ्गलमवलोक्य-'उपाध्याय, घनघृताहुतिवृद्धिमद्धामशालिनि[5] ज्वालामालिनि दह्यतामेतदैतिह्यस्वाध्यायो यदेवंविधमूर्तिरप्ययमीदृगवस्थाकीर्तिः'। सदाचारनिगृहीतिर्विश्वभूतिः-अपर्याप्तपूर्वापरसंगीते[6] शिवभूते, मागाः खेदम्, यदेष नृपवरस्य सगरस्य निदेशादस्मदुपदेशादनन्यसामान्यलावण्यविनिवासां सुलसामलभमानस्तपस्वी[7] तपस्वी समभूत्।

एतच्चासन्नारिष्टतातेर्विश्वभूतेर्वचनमेकायनमनाः[8] स यतिर्निशम्य प्रवृद्धक्रोधानलः कालेन[9] [10]विपद्योत्पद्य चासुरेषु कालासुरनामा भवप्रत्ययमाहात्म्यादुपजातावधिसन्निधिस्तपस्याप्रपञ्चमसुरान्वयोदञ्चं[11][12] चात्मनो विनिश्चित्य यदीदानीमेव महापराधनगरं सगरमकारणप्रकाशितदोषजातिं विश्वभूतिं च चूर्णपेषं पिनष्मि, तदानयोः सुकृतभूयिष्ठत्वात्प्रेत्यापि[13] सुरश्रेष्ठत्वावाप्तिरिति न साध्वपराधः स्यात्। ततो [14]'यथेहानयोर्बहुविडम्बनावरोधो वधः, परत्र च दुःखपरम्परानुरोधो भवति, तथा विधेयम्। न चैकस्य बृहस्पतेरपि कार्यसिद्धिरस्ति' इत्यभि-

---

आया। कई दिनसे उपवास होनेके कारण उसके हृदयका उत्साह मन्द पड़ गया था और तेज घामसे उसका शरीर अत्यन्त खिन्न था। अतः चातककी तरह थकान दूर करनेके लिए सगर राजाके महलके द्वार-मण्डपपर थोड़ी देरके लिए ठहर गया।

वहाँ समस्त विद्वानोंमें प्रवीण विश्वभूति, जिसने पहले सुलसाका सगरके साथ विवाह कराने में दुर्नीतिका प्रयोग किया था, अपने प्रिय शिष्य बुद्धिशाली शिवभूतिको खुले तौरपर सामुद्रिक विद्याका व्याख्यान दे रहा था। विचारचतुर शिवभूतिने समस्त लक्षणोंसे युक्त मधुपिंगलको देखकर अपने गुरुसे कहा—'गुरुजी! घीकी आहुतिसे प्रज्वलित अग्निमें इस सामुद्रिक विद्याको जला देना चाहिए; क्योंकि इस प्रकारके लक्षणोंसे युक्त होनेपर भी इस आदमीकी यह अवस्था है।' सदाचारका शत्रु विश्वभूति बोला—'पूर्वापर सम्बन्धसे अनजान शिवभूति! खेद मत करो, क्योंकि राजा सगरकी आज्ञासे और हमारे कहनेसे असाधारण सुन्दरी सुलसाको न पा सकनेके कारण यह बेचारा तपस्वी हो गया है।'

विश्वभूतिका अमङ्गल निकट था। अतः उसकी बात उस एकाग्रमन तपस्वीने सुन ली। सुनते ही उसकी क्रोधाग्नि भड़क उठी और वह मरकर कालासुर नामका देव हुआ। वहाँ उसे भवप्रत्यय नामका अवधिज्ञान प्राप्त हुआ। उसके द्वारा उसने अपने पूर्व भवका सब वृत्तान्त जान लिया। तब वह सोचने लगा कि यदि मैं इसी समय महा अपराधी सगरको और दुष्ट विश्वभूति को पीस डालूँगा तो पुण्य अधिक होनेसे ये दोनों मरकर भी देव हो जायेंगे और यह प्रतिशोध ठीक नहीं होगा। इसलिए ऐसा प्रयत्न करना चाहिए कि इनका वध भी कष्टसे हो और ये मरकर परलोकमें भी बहुत दुःख उठा सकें। किन्तु अकेले तो बृहस्पतिका भी काम सिद्ध नहीं हो

---

१. श्रमदूरीकरणाय। २. प्राङ्गणे। ३. शास्त्रोपदेशयोग्याय विदुषे। ४. गोप्यरहितम्। ५. अग्नौ। ६. सम्बन्ध। ७. दीनः। ८. अमङ्गल। ९. एकाग्रमनाः। १०. मृत्वा। ११. विस्तारम्। १२. उद्भवम्। १३. मृत्वा। १४. नृपमन्त्रिणोः द्वयोः।

प्रायेणात्मवैकारिकर्द्धि[1]प्रदर्शनातिथिं वैरनिर्यातनमनोरथरथसारथि[2]मन्वेषमाणमतिरासीत् ।

अथ कामकोदण्डकारणकान्तारैरिक्षुवणावतारैर्विराजितमण्डलायां डहालायामस्ति स्वस्तिमती नाम पुरी । तस्यामभिचन्द्रापरनामवसुर्विश्वावसुर्नाम नृपतिः । तस्य निखिलगुणमणिप्रसूतिवसुमती वसुमती नामाग्रमहिषी । सूनुरनयोः समस्तसपत्न[3]भूरुहविभावसुर्वसुः । पुरोहितश्च निश्चिताशेषशास्त्ररहस्यनिकुरम्बः क्षीरकदम्बः । कुटुम्बिनी पुनरस्य सतीव्रतोपास्तिमती स्वस्तिमती नाम । जन्यु[4]रनयोरनेकनैमस्तिक[5]पर्वतप्राप्तः पर्वतो नाम । स किल सदाचारणभूरिः क्षीरकदम्बकसूरिः शिष्यशेमुष्यामिव स्वाध्यायसंपादनविशालायां सुवर्णगिरिगुहाङ्गणशिलायामेकदा तस्मै मुदा गतस्मयाय[6] यथाविधि समधिजिगांसवे[7] वसवे प्रगलितपितृपाण्डित्यगर्वपर्वताय तस्मै पर्वताय गिरिकूटपत्तनवसतेर्विश्वनाम्नो विश्वम्भरापतेः पुरोहितस्य विहितानवद्यविद्याचार्यचरणसेवस्य विश्वदेवस्य नन्दनाय नारदाभिधानाय च निखिलभुवनव्यवहारतन्त्र[8]मागमसूत्रमतिमधुरस्वरो[9]पदेशमुपदिशन्नम्बरादवतरद्भ्यां सूर्याचन्द्रमस्समाभ्याममितगत्यनन्तगतिभ्यामृषिभ्यामीक्षांचक्रे ।

तत्र समासन्नसुगतिरनन्तगतिर्भगवान्किलैवमभाषत—'भगवन्, एत एव खलु विदुष्याः शिष्याः यदेवमनवद्यं [10]ब्रह्मोद्यविद्यमेतस्माद्ग्रन्थार्थप्रयोगभङ्गीषु[11] यथार्थप्रदर्शनतया [12]विधूतोपाध्यायादुपाध्यायादेकसर्गधियो[13]ऽधीयते' । प्रयुक्तावधिबोधस्थितिरमितगतिर्भगवान्—'मुनिवृषन्, सत्यमेवैतत् । किन्त्वेतेषु चतुर्षु मध्ये द्वाभ्यामम्भसि गौरवोपेतपदार्थ-

सकता ।' ऐसा सोचकर वह ऐसे व्यक्तिकी खोजमें चला, जिसके द्वारा वह अपनी विक्रिया शक्तिका चमत्कार दिखला कर अपने बैरका परिशोध ले सके ।

इक्षुवनसे सुशोभित डहाला देशमें स्वस्तिमती नामकी नगरी है । उसमें विश्वावसु नामका राजा राज्य करता था । उसकी पटरानीका नाम वसुमती था । उनके वसु नामका पुत्र था । समस्त शास्त्रोंके रहस्यका ज्ञाता क्षीरकदम्ब राजाका पुरोहित था । उसकी पत्नी स्वस्तिमती थी । उन दोनोंके पर्वत नामका पुत्र था जो बहुविध देवाराधनसे प्राप्त हुआ था ।

एक दिन क्षीरकदम्ब सुवर्ण गिरिकी गुफाके आँगनमें एक शिलापर पढ़नेके इच्छुक मद-रहित वसुको, अपने पिताके पाण्डित्यके गर्वसे गर्वित पर्वतको और गिरिकूट नगरके स्वामी राजा विश्वके पुरोहित विश्वदेवके पुत्र नारदको अत्यन्त मधुर स्वरसे समस्त लोकके व्यवहारोंसे पूर्ण आगम सूत्रका उपदेश देता था । उस समय आकाशसे उतरते हुए सूर्य और चन्द्रमाके समान अमितगति और अनन्तगति नामके दो मुनियोंने उन्हें देखा ।

भगवान् अनन्तगति बोले—'भगवन् ! ये ही शिष्य विद्वान् हैं, जो ग्रन्थके अर्थको यथार्थ रूपसे बतलानेवाले गर्वरहित उपाध्यायसे इस निर्दोष ब्रह्मज्ञानको एकाग्रतासे पढ़ रहे हैं ।'

अवधिज्ञानसे जानकर भगवान् अमितगतिने उत्तर दिया—'मुनिश्रेष्ठ ! आपका कहना

---

१. विकारे भवा विक्रियर्द्धिः । २. वैरशुद्धिकरणसहायम् । ३. शत्रुवृक्षदहनाग्निः । ४. पुत्रः । ५. हंतकारा एव पर्वताः तैः प्राप्तः बहुलनैवेद्येन देवाराधनैः प्राप्त इत्यर्थः । ६. रहितगर्वाय । ७. अध्येतुमिच्छवे । ८. त्रैलोक्यवर्णनसिद्धान्तम् । ९. स्वरसहितम् । १०. शास्त्रम् । ११. रचनासु । १२. विधूतः स्फेटित उपाधेर्विकारस्य आय आगमनं येन स तथोक्तस्तस्मात् । १३. एकाभिप्रायाः ।

वद्धःप्रबोधोचितमतिभ्यामिदमतिपवित्रमपि सूत्रं विपर्यासयितव्यम्' ।

एतच्च प्रवचनलोचनालोकितब्रह्मस्तम्बः[1] क्षीरकदम्बः संश्रुत्य 'नूनमस्मिन्महामुनिवाक्येऽर्थात्सप्तरुचिमरीचिवद्द्वाभ्यामूर्ध्वगाभ्यां[2] भवितव्यमिति प्रतीयते । तत्राहं तावदेकदेशयतिव्रतपूतात्मानमात्मानमधरधामसंनिधानं[3] न संभावयेयम् । नरकान्तं राज्यम्, बन्धनान्तो नियोगः, मरणान्तः स्त्रीषु विश्वासः, विपदन्ता खलेषु मैत्री, इति वचनादिन्दिरामदिरामदमलिनमनःप्रचारे राज्यभारे प्रसरदसुं[4] वसुं च नोर्ध्वं यियासुम्[5] । तन्नारदपर्वतौ परीक्षाधिकृतौ' इति निश्चित्य[6] समिधमयमूर्णायुद्वयं[7] निर्माय प्रदाय च ताभ्याम् 'अहो, द्वाभ्यामपि भवद्भ्यामिदमुर्णयुगलं[8] यत्र न कोऽप्यालोकते तत्र विनाश्य[9] प्राशितव्यम्' इत्यादिदेश । तावपि तदादेशेन हव्यवाहवाहनद्वितयं[10] प्रत्येकमादाय यथायथमयासिष्टाम् । तत्र[11] सत्ख्याति[12] खर्वः पर्वतः पस्त्यपाश्चात्यकुम्बामु[13] पसद्यापाद्य[14] च[15] भटित्रमुरभ्रपुत्रमुदरानलपात्रमकार्षीत् । शुभाशयविशारदो नारदस्तु 'यत्र न कोऽप्यालोकते' इत्युपाध्यायोक्तं ध्यायन् 'को नामात्र पुरे कान्तारे वा सद्घुणो[16] योऽधिकरणं[17] नात्मेक्षणस्य व्यन्तरगणस्य महामुनिजनान्तःकरणस्य च' इति विचिन्त्य तथैव तं वृष्णिमुपाध्यायाय समर्पयामास ।

उपाध्यायो नारदमप्यूर्ध्वगमवबुद्ध्य संसारतरुस्तम्बमिव कचनिकुरम्बमुत्पाट्य

---

ठीक है, किन्तु इन चारोंमें-से दो शिष्योंकी बुद्धि पानीमें पड़े भारी पदार्थकी तरह नीच ज्ञानकी ओर जानेवाली है, ये दोनों इस अत्यन्त पवित्र शास्त्रको भी विपरीत कर देंगे ।'

शास्त्ररूपी चक्षुसे ब्रह्माण्डको देखनेवाले क्षीरकदम्बने मुनियोंकी बातचीत सुन ली । वह सोचने लगा—'महामुनिके वाक्यसे ऐसा प्रतीत होता है कि हममें-से दो निश्चय ही अग्निकी शिखाकी तरह उर्ध्वगामी हैं । उनमें-से मैं तो देशचारित्रका पालक हूँ अतः अपने नरकगामी होनेकी सम्भावना तो मैं नहीं कर सकता । कहावत है कि—'राज्यका फल नरक है । शासनका फल बन्धन है । स्त्रीमें विश्वास करनेका फल मरण है और दुर्जनोंसे मैत्री करनेका फल विपत्ति है ।' अतः लक्ष्मीरूपी मदिराके मदसे मनको कलुषित करनेवाले राज्यभारमें जिसके प्राण बसे हैं वह वसु ऊर्ध्वगामी हो नहीं सकता । शेष रह जाते हैं नारद और पर्वत । इनकी परीक्षा करनी चाहिए ।' ऐसा निश्चय करके पुरोहितने हविष्यके दो मेढ़े बनवाये और दोनोंको एक-एक मेढ़ा देकर कहा—'तुम दोनों जहाँ कोई न देख सके, ऐसे स्थानपर इन मेढ़ोंको मारकर खा जाओ ।'

गुरुकी आज्ञासे वे दोनों उन मेढ़ोंको लेकर चले गये । उनमेंसे पर्वतने तो घरके पिछवाड़े एक घिरे हुए स्थानपर जाकर उस मेढ़ेके बच्चेको भूनकर अपने पेटमें रख लिया । किन्तु शुभाशयी नारदने गुरुके 'जहाँ कोई न देख सके' इस वचनका ध्यान करके विचारा—'नगर या जंगलमें ऐसा कौन-सा स्थान है जो अतीन्द्रियदर्शी व्यन्तरादिकका और महामुनियोंके अन्तःकरणका विषय न हो ।' ऐसा विचारकर उसने वह मेढ़ा जैसाका-तैसा उपाध्यायको सौंप दिया ।

पुरोहितने जान लिया कि नारद भी ऊर्ध्वगामी है । अतः संसाररूपी वृक्षके गुच्छोंके

---

१. ब्रह्माण्डः । २. अग्नि । ३. नीचस्थान-नरक । ४. विस्तरत्प्राणम् । ५. नाहं संभावयेयमिति वाक्यशेषः । ६. कणिकमयं छागद्वयम् । ७. ऊरणद्वयं । ८. –मूर्णायुयुगलं–आ० । ९. हत्वा । १०. मेषद्वयम् । ११. तयोश्छात्रयोः । १२. ह्रस्वः । १३. वृत्तिम् । १४. कृत्वा । १५. शूलाकृतं । १६. प्रदेशः । १७. स्थानम् ।

स्वर्गलक्ष्मीसपत्नीं दीक्षामादाय निखिलागमसमीक्षां शिक्षामनुश्रित्य चातुर्वर्ण्यश्रमणसङ्घ-संतोषणं गणपोषणमात्मसात्कृत्य एकत्वादिभावनापुरस्कारमात्मसंस्कारं विधाय कायकषाय-कर्शनां सल्लेखनामनुष्ठाय निःशेषदोषालोचनपूर्वकाङ्गविसर्गसमर्थमुत्तमार्थं[1] च प्रतिपद्य सुर-सुखकृतार्थो बभूव। पूर्वमेव तदादेशादात्मदेशोपदेशद[2]ः सकलसिद्धान्तकोविदो नारदः सद्गुण-भूरेः क्षीरकदम्बसूरेः प्रव्रज्याचरणं स्वर्गावरोहणं चावगत्य 'गुरुवद्गुरुपुत्रं च पश्येत्' इति कृतसूक्तस्मरणः। पर्या[3]त्ततदाराधनोपकरणस्तद्विरहदुःखदुर्मनसमुपाध्यायानीं जननीं सहपांसु-क्रीडितं पर्वतं च द्रष्टुमागतः।

अपरेद्युस्तं पर्वतम् 'अजैर्यष्टव्यम्' इति वाक्यम् 'अजैर्जा[4]तमजैर्यष्टव्यं हव्यकव्यार्थो विधिर्विधातव्यः' इति श्रद्धामात्रावभासिभ्योऽन्तेवासिभ्यो व्याहरन्तमुपश्रुत्यबृहस्पतिप्रज्ञः– पर्वत, मैवं व्याख्यः। किं तु 'न जायन्त इत्यजा वर्षत्रयप्रवृत्तयो व्रीहयस्तैर्यष्टव्यं शान्ति-पौष्टिकार्था क्रिया कार्या' इति परार्ये[5]वाचार्यादिदं वाक्यमेवमश्रौष्व[6] परुत्सजूं[7]स्तथैवाचिन्त-याव। तत्कथमैषमं[8] एव तव मतिर्द्वापर[9]वसतिः समजनीति बहुविस्मयं मे मनः। आचार्य-निकेत पर्वत, यद्येवमर्थश्रीनेऽप्यर्थाभिधाने[11] भवानपरवानपि[12] [13]विपर्यस्यति, तदा पराधीने [14]मादृग्विधीने को नाम संप्रत्ययः'।

---

समान केशोंका लोंच करके उसने स्वर्गरूपी लक्ष्मीकी सखी जिन-दीक्षा ले ली। तथा समस्त शास्त्रोंकी शिक्षाका अनुसरण करके आचार्य पदको सुशोभित किया और श्रमण संघका पालन करके जब आयु थोड़ी शेष रह गयी, तब एकत्व आदि भावनाओंसे आत्माको सुसंस्कृत करके काय और कषायकी सल्लेखनारूप समाधिमरण धारण किया। तथा अपने समस्त दोषोंकी आलोचना पूर्वक शरीरको त्याग कर देवलोकमें उत्पन्न हुआ।

गुरुकी आज्ञासे नारद पहले ही अपने देशकी ओर चला गया था। समस्त सिद्धान्तके पण्डित नारदने जब गुणोंसे भूषित आचार्य क्षीरकदम्बके दीक्षा ग्रहण और स्वर्गारोहणके समाचार सुने तो उसे 'गुरुके समान ही गुरु-पुत्रको मानना चाहिए' इस सूक्तिका स्मरण हो आया। और वह उनकी भेंटके लिए बहुत-सा सामान साथ लेकर गुरुके वियोगसे दुःखी गुरुपत्नी और एक साथ खेले हुए मित्र पर्वतको देखनेके लिए आया।

दूसरे दिन नारदने सुना कि पर्वत श्रद्धालु छात्रोंको 'अजैर्यष्टव्यम्' का अर्थ 'बकरोंसे यज्ञ और श्राद्ध करना चाहिए' ऐसा बतला रहा है। नारदने रोका–'पर्वत! ऐसी व्याख्या मत करो। किन्तु 'अज' अर्थात् जो उग न सकें ऐसे तीन वर्षके पुराने धान्यसे शान्ति आदि क्रिया करनी चाहिए' ऐसा अर्थ करो। क्योंकि परार साल आचार्यसे हम दोनोंने इस वाक्यका यही अर्थ सुना था, और गत वर्ष हम दोनोंने ऐसा ही विचार भी किया था। न जाने इसी वर्ष तुम्हारी मति संशयमें क्यों पड़ गयी है? मुझे यह देखकर बड़ा अचरज हो रहा है। पर्वत! तुम आचार्यका काम करते हो। यदि तुम स्वतन्त्र होकर भी इस अर्थके करनेमें भूल करते हो तो मेरे समान पराधीनका ही क्या विश्वास है?'

---

१. संन्यासम्। २. नारदो गतः। ३. गृहीत। ४. छागपुत्रैः। ५. परारि—पूर्वतरवत्सर। ६. आवां श्रुतवन्तौ। ७. गतवर्ष। ८. इदानीमस्मिन् वर्षे। ९. सन्देह। १०. अद्यश्वः परदिने वा प्रसोष्यते। ११. अर्थ-कथने। १२. स्वतन्त्रः। १३. विपरीतं करोति। १४. मादृशी विधिः तस्य इने-नाथे।

पर्वतः—नारद, नेदमस्तुङ्कारं[1] यदस्य पदस्य मन्निरुक्त एवातिसूक्तोऽर्थः। यदि चाय-मन्यथा स्यात्तदा रसवाहिनीखण्डनमेव मे दण्डः[2]।

नारदः—'पर्वत, को नु खल्वत्र विवदमानयोरावयोर्निकषभूमिः'।

पर्वतः—'नारद, वसुः'।

कर्हि तर्हि तं समयानुसर्तव्यम्। 'इदानीमेव नात्रोद्धारः[3]' इत्यभिधाय द्वावपि तौ वसुं निकषा[4] प्रास्थिषाताम्[5], ऐक्षिषातां च तथोपस्थितौ तेन वसुना गुरुनिर्विशेषमाचरितसम्मानौ यथावत्कृतकशिपुविधानौ[6] विहितचितोचितकाञ्चनदानौ[7] समागमनकारणमापृष्टौ स्वाभिप्राय-मभाषिषाताम्। वसुः—'यथाहतुस्तत्रभवन्तौ तथा प्रातरेवानुतिष्ठेयम्'।

अत्रान्तरे वसुलक्ष्मीक्षयक्षपेव क्षपायां सा किलोपाध्याया नारदपक्षानुमतं क्षीरकदम्बा-चार्यकृतं तद्वाक्यव्याख्यानं स्मरन्ती स्वस्तिमती पर्वतपरिभवापायबुद्ध्या वसुमनुसृत्य 'वत्स वसो, यः पूर्वमुपाध्यायादन्तर्धानापराधलक्षणावसरो वरस्त्वयादायि, स मे संप्रति समर्पयितव्यः' इत्युवाच। सत्यप्रतिपालनासुर्वसुः—'किमम्ब, संदेहस्तत्र। यद्येवं यथा सहाध्यायी पर्वतो वदति, तथा त्वया साक्षिणा भवितव्यम्'। वसुस्तथा स्वयमाचार्यण्या-भिहितः[9]—'यदि साक्षी भवामि तदावश्यं निरये पतामि। अथ न भवामि तदा सत्यात्प्रच-लामि' इत्युभयाशयशार्दूलविद्रुतमनोमृगश्चिरं विचिन्त्य

---

पर्वत—नारद ! मैं इसे स्वीकार नहीं कर सकता, क्योंकि इस पदका मेरा कहा हुआ अर्थ ही ठीक है। यदि वह ठीक न हो तो मैं अपनी जिह्वा कटवा दूँगा।

नारद—पर्वत ! हमारे विवादका फैसला कौन करेगा ?

पर्वत—वसु।

नारद—तो उसके पास कब चलना चाहिए ?

पर्वत—इसी समय। इसमें विलम्ब क्यों ?

इस प्रकार बातचीत करके दोनों वसुके पास चल दिये। वसुने जैसे ही उन दोनोंको आते हुए देखा, गुरुके समान ही उनका सम्मान किया और यथायोग्य भोजन, वस्त्राभरण तथा स्वर्ण प्रदान करके उनसे आनेका कारण पूछा। दोनोंने अपना-अपना अभिप्राय कह दिया। वसुने उनसे सुबह आनेके लिए कहा।

इसी बीचमें पर्वतकी माता स्वस्तिमती गुरुवानीको अपने पति क्षीरकदम्बके द्वारा बतलाया हुआ उस वाक्यका व्याख्यान स्मरण हो गया। उसे लगा कि नारदका व्याख्यान ही ठीक है। अतः पर्वतके अनिष्टकी आशंकासे वह रात्रिमें ही वसुके पास गयी और बोली—'पुत्र वसु ! पहले गुरुसे छिपनेका अपराध करनेके समय तुमने मुझे जो वर दिया था वह मुझे अब दो।' सत्यका पालक वसु बोला—'माता ! उसमें सन्देह मत करो।' 'तो जैसा तुम्हारा गुरुपुत्र कहता है वैसा ही तुम्हें भी कहना चाहिए।' गुरुपत्नीके ऐसा कहनेपर वसु विचारमें पड़ गया—'यदि पर्वतका कथन ठीक ठहराता हूँ तो नरकमें गिरता हूँ। और यदि नहीं ठहराता हूँ तो सत्यसे विचलित

---

१. न युक्तम्। २. जिह्वा। ३. न विलम्बः। ४. समीपम्। ५. प्रस्थितौ। ६. भोजनाच्छादनौ। ७. विहितोचितोचित मु०। ८. तिरोधान। ९. प्रार्थितः।

'न व्रतमस्थिग्रहणं शाकपयोमूलभैक्षचर्या वा ।
व्रतमेतदुन्नतधियामङ्गीकृतवस्तुनिर्वहणम्' ॥३९५॥

इति च विमृश्य निरयनिदानदक्षं चरम[1]पक्षमेव पक्षमादीप्सीत्[2] ।

तदनु मुमुदिषमाणा[3]रविन्दहृदयविनिद्रेन्दिन्दिरचरणप्रचारोदश्रन्मकरन्दसिन्दूरितनीर[4]-देवतासीमन्तान्तराले प्रभातकाले, सेवासमागतसमस्तसामन्तोपास्तिपर्यस्तोत्तंसकुसुम-संपादितोपहारमहीयसि च सति सदसि मृगयाव्यसनव्याजशरव्यीकृते कुरङ्गपोते, अपरा[5]द्धेषु-रिषु[6]प्रत्यावृत्त्यासादितस्पर्शमात्रावसेयाकाशस्फटिकघटितविलसनं सिंहासनमुपगत्य 'सत्य-शौचादिमाहात्म्यादहं विहायसि गतो जगद्व्य[7]वहारं निहालयामि' इत्यात्मनात्मानमुत्कु[8]-र्वाणो विवादसमये तेन विनत[9]वरदेन नारदेन 'अहो, मृषोद्योक्त्रिदवविभावसो वसो, अद्यापि न किञ्चिन्नङ्क्ष्यति[10] तत्सत्यं ब्रूहि' इत्यनेकशः कृतोपदेशः काश्यपीतलं यियासुर्वसुः—'नारद, यथैवाह पर्वतस्तथैव सत्यम्' इत्यसमीक्ष्यं साक्ष्यं वदन् 'देव, अद्यापि यथायथं वद यथायथं वद' इत्यालापबहुले समन्यु[11]मानसविलासिनीस्ख[12]लितोक्तिकोलाहले[13] विषादासादि-हृदयप्रजाप्रजल्पकाहले स्फुटद्ब्रह्माण्ड[14]खण्डध्वनिकुतूहले समुच्छलति परिच्छदकोलाहले सत्यधर्मकर्मप्रवर्तनकुपितपुरदेवतावशदुर्विलसनः ससिंहासनः क्षणमात्रमप्य[15]नासादितसुख-

होता हूँ।' इस प्रकार उसका मनरूपी मृग द्विविधारूपी सिंहके फेरमें पड़ गया। बहुत देर तक विचार करनेके बाद उसने सोचा—

हड्डीका धारण करना, शाक, पानी, कन्दमूलका लेना अथवा भिक्षा भोजन करना ये सब व्रत नहीं हैं। किन्तु स्वीकार की हुई वस्तुको निबाहना ही समझदार पुरुषोंका व्रत है ॥३९५॥

ऐसा विचार कर उसने नरकमें ले जानेवाले दूसरे पक्षको ही स्वीकार कर लिया।

एक बार एक शिकारी जंगलमें शिकार खेलनेके लिये गया था वहाँ उसने एक हरिणके बच्चेपर तीर चलाया। किन्तु वह तीर किसी वस्तुसे टकराकर लौट आया। तब शिकारीको बड़ा आश्चर्य हुआ और वह इसका कारण जाननेके लिए आगे बढ़ा। मार्गमें उसे आकाशकी तरह स्वच्छ स्फटिकमणिकी एक शिला मिली, जो छूनेसे ही जानी जा सकती थी। उस शिलाको मँगाकर वसुने अपनी सभामें रखा और उसपर अपना सिंहासन रखवाया। तथा उसपर बैठकर अपने ही मुखसे अपनी प्रशंसा करते हुए यह घोषणा की कि मैं 'अपने सत्य धर्मके प्रभावसे आकाशमें बैठकर जगत्का न्याय करता हूँ।'

दूसरे दिन प्रभात होनेपर राजसभा लगी। वसु अपने उसी सिंहासनपर आकर बैठ गया। सेवाके लिए आये हुए सामन्तोंने भेंटें चढ़ायीं। और विवाद प्रारम्भ हुआ। नारदने विनय पूर्वक कहा—'असत्यवादी वसु अब भी कुछ नहीं बिगड़ा है अतः सच बोल,' बार-बार समझानेपर भी नरकगामी वसुने यही कहा—'जो पर्वत कहता है वही सत्य है'। इस प्रकार झूठी गवाही देते देखकर प्रजाको भी क्रोध आ गया और वह भी चिल्लाने लगी—'महाराज! 'अब भी सच बोलिए,', 'अब भी सच बोलिए।' सभामें ऐसा कोलाहल मचा मानो ब्रह्माण्डके फटनेकी आवाज है। इसी समय सत्य धर्म-कर्मका लोप करनेके कारण क्रुद्ध हुए नगर-देवताने सिंहासन-सहित

१. साक्षिवचनम्। २. अङ्गीचकार। ३. विकसमानपद्ममध्य--उच्छ्रीयमाणभ्रमरचरण। ४. जलदेवता। ५. लक्ष्यच्युतबाणः। ६. बाण पश्चाद्वलनेन। ७. न्यायं पश्यामि। ८. उत्कर्षतां प्रापयन्। ९. विनतानां विनेयानाम्। १०. नाशं यास्यति। ११. सकोपचित्त। १२. अव्यक्तवचन। १३. अस्फुटे। १४. मर्त्यलोक। १५. अप्राप्त।

कालं पाताल[1]मूलं जगाहे । अत एवाद्यापि प्रथममाहुतिवेलायां प्रजा[2] जल्पन्ति—'उत्तिष्ठ वसो, स्वर्गं गच्छ' इति । भवति चात्र श्लोकः—

> अस्थाने बद्धकक्षाणां नराणां सुलभं द्वयम् ।
> परत्र दुर्गतिर्दीर्घा दुष्कीर्तिश्चात्र शाश्वती ॥३९६॥

*इत्युपासकाध्ययने वसो रसातलासादनो नामैकोनत्रिंशः कल्पः ।*

नारदस्तमेव निर्वेदमुररीकृत्य नर्त[3]भ्रूविभ्रमभ्रमरकुलनिलयनीलोत्पलस्तूपमिव कुन्तलकलापमुन्मूल्य परमनिष्किञ्चनतानिरूपं जातरूपमास्थाय सकलसत्त्वाभयप्रदानामृतवर्षाधिकरणं संयमोप[4]करणमाकल[5]य्य मुक्तिलक्ष्मीसमागमसंचा[6]रिकामिवोदकप[7]रिचारिकामाहत्य शिवश्रीवशीकरणा[8]र्ध्यार्यमिव स्वाध्यायमनु[9]बद्ध्य मनोमर्कटक्रीडाप्र[10]काममिन्द्रियाराममुपरम्य अन्तरात्महेमाश्म[11]समस्तमलदहनं ध्यानदहनमुद्दीप्य संजातकेवलस्तत्पदा[12]प्तिपेशलो बभूव ।

पर्वतस्तु तथा सर्वसभासमाजोदीरितोद्दीर्घदुरपवादरजसि मिथ्यासाक्षिपक्षविचक्षणवक्षसि दुराचारेक्षणक्षुभितसहजाक्षा[13]नुचरीक्षितजीवितमहसि कथाशेषतेजसि [14]वसौ सति [15]अंहस्वह्रीणतया पौरापचिकीर्षया[16] च निरन्तरोदञ्चरोमाञ्चनिकायः शल्यश[17]लाकानिकीर्णकाय इव निर्जा[18]गणेयदुरीहिताध्मा[19]तोदरचर्मपुटः स्फुटन्निव च तैर्नृपतिविनाशवशामर्षिभिः संभूयोपदिष्टलोष्टवर्षिभिरतुच्छपिञ्छोल[20]दलास्फालनप्रकर्षिभिः प्रतिघातोच्छलच्छकलकषाप्रहारतर्षिभि-

वसुको पातालमें भेज दिया । इसीसे आज भी यज्ञमें पहला आहुति देते समय ब्राह्मणजन कहते हैं—'वसु उठ ! स्वर्ग जा ।'

किसीने ठीक ही कहा है— 'झूठी बातका दुराग्रह करनेवाले मनुष्योंके लिए दो चीज सुलभ हैं—परलोकमें दीर्घकाल तक दुर्गति और इस लोकमें स्थायी अपयश' ॥३९६॥

*इस प्रकार उपासकाध्ययनमें वसुकी रसातल-प्राप्तिको बतलानेवाला*
*उनतीसवाँ कल्प समाप्त हुआ ॥*

इस घटनासे नारदको बड़ा वैराग्य हुआ । उसने केशलोंच करके नग्न दिगम्बर होकर सकल जीवोंको अभयदान देनेवाले संयमके उपकरण पीछी और कमण्डलु ग्रहण कर लिये । और स्वाध्यायपूर्वक, मनरूपी बन्दरके खेलनेके स्थान इन्द्रियरूपी उपवनको बन्द करके, अन्तरात्मारूपी स्वर्णपाषाणके समस्त मलको जलानेमें समर्थ ध्यानरूपी अग्निको प्रदीप्त किया । तथा केवलज्ञान प्राप्त करके मुक्त हो गया ।

राजा वसुके मर जानेपर अत्यन्त लज्जा तथा पुरवासी जनोंके तीव्र तिरस्कारके कारण पर्वतको क्रोधसे रोमांच हो आया । उसे ऐसी पीड़ा हुई मानो सेहीके काँटोंसे उसका शरीर बीधा गया है । अपने असंख्य दुष्ट संकल्पोंके कारण उसका पेट फटने-सा लगा । उधर नगरवासी लोग राजाकी मृत्युसे क्रुद्ध होकर उसके ऊपर ईंट-पत्थरोंकी वर्षा करने लगे । उन्होंने उसे गधेपर चढ़ाकर समस्त नगरमें घुमाया । पीछे-पीछे कुत्ते भोंकते जाते थे । ईंट-पत्थरोंकी वर्षा होती जाती थी । मार्गमें उल्टे उस्तरेसे सिर मूँड़ा जाता था । गलेमें फूटे ठीकरोंको माला पड़ी थी । चाण्डालके

१. सप्तमनरकम् । २. प्रप्रा अ०, ज० । विप्राः । ३. स्त्री । ४. मयूरपिच्छम् । ५. गृहीत्वा । ६. दूती । ७. कमण्डलुम् । ८. परिच्छेद । ९. कृत्वा । १०. यथेष्टम् = अधिकम् । ११. सुवर्णपाषाण । १२. मोक्ष । १३. किङ्करीभिः क्षितं विध्वस्तं जीवितमेव महस्तेजो यस्य । १४. वासौ–अ०, ज०, मु० । १५. दीर्घलज्जिततया । १६. अपकर्तुमिच्छया । १७. सेहीशूलविद्धशरीरः । १८. असंख्य । १९. संधुक्षित । २०. वंश ।

र्नगरनिवासहर्षिभिर्जनैरगणितापकारं खरासभारोहणावतारं कण्ठप्रदेशप्राप्तप्राणः पुरु[1]पूत्क-तोल्बणकाएः सकलपुरवीथिषु विश्वरघुष्टा[2]नुजातो निष्काशितः श्वपच[3]स्मशानांशुकपिहित-मेहनो विपरीतक्षुरधाराचरितमार्गमुण्डनः प्रकाशितशिखाश्रीफलजालो गलनालावलम्बित-शरावमालः प्रथीयसि वनगहनरहसि प्रविष्टः तुच्छोदकस्रोपिनीतटिनीतट[4]निकटोपविष्टस्तेन कालासुरेण दृष्टः।

प्रत्यवमृष्टहृद्व्येष्टेन 'चाहं तावद्वैकारिकर्द्धिप्रचिकाशयिषुशक्तिः एषोऽपि स्वमतप्रतिति-ष्ठापयिषुमतिप्रसक्तिरतः निष्प्रतिघः[5] खलु मे कार्योद्घाघः' इति निर्भृतं[6] वितर्क्य पर्याप्तपरिव्राज[7]-कवेषेण मायामयमनीषेण भाषितश्च। तथा हि—'पर्वत, केन खलु समासन्नकीनाश[8]केलि-नर्मणा दुष्कर्मणा विनिर्मापितनिर्वर[9]ापकारः'। पर्वतः—'तात, को भवान्'। 'पर्वत, भवत्पितुः खलु प्रियसुहृदहं सहाध्यायी शाण्डिल्य इति नामाभिधायी। यदा हि वत्स, भवान्षोडन्सम[10]-भवत्तदाहं तीर्थयात्रायामगाम्। इदानीं चागाम्[11]। अतो न भवान्मां सम्यगवधारयति। तत्कथय हन्त[12] कारणमस्य व्यतिकरस्य'।

पर्वतः—'मत्प्राणित[13]परित्राणसद्मन् भगवन्, समाकर्णय। समस्तागमरत्नसन्निधातरि[14] सुकृतमणिसमाहर्तरि जिनरूपानुजातरि पितरि नाकलोकमिते सति स्वातन्त्र्यादेकदा प्रदीप्त-निकामकामोद्गमः संपन्नपण्याङ्गनाजनसमागमः[15] कृतपिशितकापिसायन[16]स्वादः पापकर्म-प्रासादः चेतन्नप्यार्योपदिष्टं[17] विशिष्टं व्याख्यानमहं दुरात्माख्यानः[18] स्वव्यसनविवृद्धये

कफनके टुकड़ेसे उसकी नग्नताको ढाँक दिया गया था। बेचारा रास्ते-भर चिल्लाता जाता था। कष्टसे प्राण कण्ठमें आ गये थे। इस रूपमें उसे नगरसे निकाल दिया गया और वह एक घने जंगलमें घुसकर एक नदीके किनारे बैठ गया। वहाँ उसे कालासुर नामके व्यन्तरने देखा। उसके मनकी दशा जानकर कालासुरने सोचा—'मैं अपनी विक्रिया शक्तिको दिखलाना चाहता हूँ और यह अपना मत चलाना चाहता है अतः मेरा काम निर्विघ्न होगा।' ऐसा विचारकर उसने संन्यासीका वेष धारण किया और मायावी बुद्धिसे बोला—'पर्वत! जल्दी ही यमराजकी क्रीड़ाके शिकार बननेवाले किस दुष्टने तुम्हारे साथ यह निष्ठुर व्यवहार किया है?'

पर्वत—पिता! आप कौन हैं?

'मैं तुम्हारे पिताका सहपाठी मित्र हूँ। मेरा नाम शाण्डिल्य है। जब तुम्हारे दाँत निकले थे तब मैं तीर्थयात्राके लिए चला गया था। और अब लौटा हूँ। इसलिए तुम मुझे नहीं पहचानते हो। अपनी इस विपत्तिका कारण बतलाओ।'

पर्वत—'मेरे प्राणोंके रक्षक भगवन्! सुनिए। समस्त आगमरूपी रत्नोंके धारक और पुण्यरूपी मणियोंके संग्राहक मेरे पिता जिन-दीक्षा धारण करके जब स्वर्गलोकको चले गये तो मैं स्वतन्त्र हो गया। एक दिन मैंने कामके वशीभूत होकर वेश्या सेवन किया और मांस-मदिराका स्वाद लिया। 'अजैर्यष्टव्यम्' इस वाक्यका पिताजीने जो व्याख्यान किया था उसे जानते हुए

१. महत्। २. सारमेयाः पृष्ठतो भवन्ति। विस्वरघुष्टा —आ०। ३. चाण्डालचितास्थानवस्त्रेण कृतकौपीनः। ४. नदी। ५. निर्विघ्नः। ६. निश्चलं विचार्य। ७. तपस्वि। ८. यम। ९. निष्ठुर। १०. यदा तव षड्दन्ताः। ११. आगतः। १२. अहो। १३. जीवितरक्षणे। १४. संधारके। १५. कृतवेश्यासमागमः। १६. मद्य। १७. जानन्नपि पित्रा उपदिष्ठम्। १८. दुरात्मा—दुष्टस्वभावमाख्यानं चरितं यस्य सोऽहम्।

धर्मबुद्ध्या साधुमध्ये अजैर्यष्टव्यमितीदं वाक्यमशेषकल्मषनिषेध्योऽन्यथोपन्यस्यमानो नारदेनापादितवचनस्खलनः सन् एतावद्विपत्तिस्थामवस्थामकरपम् ।'

कालासुरः—'पर्वत, मा शोच। मुञ्च त्वमशेषं धिषणाकलुषम्। अङ्ग, साधु सम्बोधयात्मानम्। न खलु निरीहस्य[1] नरस्यास्ति काचिन्मनीषितावाप्तिः। तदलं हन्त[2] हृदयदाहानुगेनावेगेन[3]। हंहो पुत्र पर्वत, यथा स्वकीयसंकेताङ्क ब्राह्मगोसवाश्वमेधसौत्रामणिवाजपेयराजसूयपुण्डरीकप्रभृतीनां सप्ततन्तूनां[4] प्रतिपादकानि वाक्यानि विरचय्य अन्तरान्तरा[5] वेदवचनेषु निवेशय। वत्स, मयि भूर्भुवःस्वस्त्रयीविपर्यासनसमर्थमन्त्रमाहात्म्ये, त्वयि च तरसासवसवित्रीप्रवृत्तिहेतुश्रुतिगीतिसमभ्यस्तसात्म्ये, किं नु[6] नामेहासाध्यम्' इत्युत्साह्य स्वयं विद्यावष्टम्भसृष्टाभिरष्टाभिरपीतिभि[7]रुपद्रूयमाणजनपदहृदयमयोध्याविषयमागत्य नगरबाहिरिकायां स देवश्चतुराननोऽभूत्। 'अध्वर्युः[8] पर्वतः समासीत्। मायामयसृष्टयः पिङ्गल-मनु-मतङ्ग-मरीचि-गौतमादयश्च ऋत्विजोऽजनिषत। तत्र श्रुतिधृतिश्चतुर्भिर्वदनैरुपदिशति[9]। पर्वतस्तु

*यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयम्भुवा ।*
*यज्ञो हि भूत्यै सर्वेषां तस्माद्यज्ञे वधोऽवधः ॥३९७॥*

---

भी मुझ दुरात्माने अपने व्यसनकी पुष्टिके लिए उसे बदल कर अन्यथा रूपसे कहा। नारदने मेरी इस गलतीको पकड़ लिया। बस, उसीसे मेरी यह दुर्दशा हुई है।'

कालासुर—'पर्वत! रंज मत कर, और इस सब बुद्धि विकारको दूर कर' अपनेको सम्बोध। जो मनुष्य निरीह है उसकी मनोवाञ्छा पूरी नहीं होती। अतः हृदयको जलानेवाले शोकको छोड़। और पुत्र पर्वत! अपने संकेतसे चिह्नित ब्राह्ममेध, गोमेध, अश्वमेध, सौत्रामणि, वाजपेय, राजसूय, पुण्डरीक आदि यज्ञोंके प्रतिपादक वाक्योंको रचकर वेदमें जगह-जगह मिला दो। पुत्र! मेरेमें 'भूर्भुवः स्वः' इत्यादि मन्त्रको बदलनेकी सामर्थ्यके होते हुए और मांस-मदिरा आदिमें प्रवृत्ति करानेवाले वेदमन्त्रोंकी रचनामें सिद्धहस्त तुम्हारे होते हुए ऐसा कौन काम है जो हम नहीं कर सकते।'

इस प्रकार पर्वतको उत्साहित करके उस कालासुरने अपनी विद्याके बलसे अतिवृष्टि आदि आठ ईतियोंको समस्त देशमें फैला दिया। तथा आप अयोध्या नगरीमें आकर ब्रह्माका रूप धारण करके नगरके बाहर बैठ गया। पर्वत यजुर्वेदका ज्ञाता पुरोहित बना। मायामयी पिंगल, मनु, मतङ्ग, मरीचि, गौतम वगैरह होता बन गये। ब्रह्माजी चारों मुखोंसे उपदेश देते थे। और पर्वत आदेश देता था—

ब्रह्माजीने स्वयं यज्ञके लिए ही पशुओंकी सृष्टि की है। यज्ञ सबकी समृद्धिके लिए है इसलिए यज्ञमें किया जानेवाला पशुवध वध नहीं है॥ ३९७॥

---

१. शत्रुलोकोपरि निस्पृहस्य। २. हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः। ३. शोकेन। ४. यज्ञानाम्। ५. मध्ये। ६. नु प्रच्छायां विकल्पे च वितर्के च। नाम प्रकाश्यसंभाव्य क्रोधोपगमकुत्सने। ७. अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः। स्वचक्रपरचक्रं च सप्तैता ईतयः स्मृताः॥ ८. यजुर्वेदज्ञाता। ९. ब्रह्मा।

**ब्रह्मणे[1] ब्राह्मणमालभेत, इन्द्राय क्षत्रियं, मरुद्भ्यः वैश्यं, तमसे शूद्रम्, उत्तमसे तस्करं, आत्मने क्लीबं, कामाय पुंश्चलमप्रतिकुष्टाय मागधं, गीताय सूतम्, आदित्याय स्त्रियं गर्भिणीं, सौत्रामणौ च एवंविधां सुरां पिबति, न तेन सुरा पीता भवति। सुराश्च[2] तिस्र एव श्रुतौ संमताः—पैष्टी, गौडी, माधवी चेति। गोसवे ब्राह्मणो गोसवेनेष्ट्वा संवत्सरान्ते मातरमप्यभिलषति। उपेहि मातरम्, उपेहि स्वसारम्।**

*[3]षट्शतानि नियुज्यन्ते पशूनां मध्यमेऽहनि।*
*अश्वमेधस्य वचनादूनानि पशुभिस्त्रिभिः ॥३९८॥*
*[4]महोक्षो वा [5]महाजो वा श्रोत्रियाय विशस्यते[6]।*
*निवेद्यते तु दिव्याय स्रक्सुगन्धनिधिर्विधिः ॥३९९॥*
*गोसवे सुरभिं हन्याद्राजसूये तु भूभुजम्।*
*अश्वमेधे हयं हन्यात्पौण्डरीके च दन्तिनम् ॥४००॥*
*[7]ओषध्यः पशवो वृक्षास्तिर्यञ्चः पक्षिणो नराः।*
*यज्ञार्थं निधनं प्राप्ताः प्राप्नुवन्त्युच्छ्रितां गतिम् ॥४०१॥*

ब्रह्माके लिए ब्राह्मणका वध करना चाहिए, इन्द्रके लिए क्षत्रियका वध करना चाहिए, वायुके लिए वैश्यका वध करना चाहिए, तमके लिए शूद्रका वध करना चाहिए, गाढ़तमके लिए चोरका वध करना चाहिए, आत्माके लिए नपुंसकका वध करना चाहिए, कामके लिए बदमाशका वध करना चाहिए, अप्रतिकुष्टके लिए मागधका वध करना चाहिए, गीतके लिए पुत्रका वध करना चाहिए, सूर्यके लिए गर्भिणी स्त्रीका वध करना चाहिए। सौत्रामणि यज्ञमें जो अमुक प्रकारकी शराब पीता है वह शराब नहीं पीता। तीन प्रकारकी शराब वेदसम्मत है—पैष्टी—जो जौ वगैरहके आटेसे बनायी जाती है, गौडी–जो गुड़से बनायी जाती है, और माधवी, जो महुएसे बनती है। गोसव यज्ञमें ब्राह्मण तुरतके जन्मे हुए गौके बछड़ेसे यज्ञ करके वर्षके अन्तमें मातासे भी भोग करता है। माताके पास जाओ, बहनके पास जाओ।

अश्वमेध यज्ञमें मध्यके दिन तीन कम छह सौ अर्थात् पाँच सौ सत्तानवे पशु मारे जाते हैं ऐसा वचन है ॥ ३९८ ॥ श्रोत्रियके लिए महान् बैल अथवा बकरा मारा जाता है। तथा माला गन्ध वगैरह विधिपूर्वक अर्पित की जाती है ॥३९९॥

गोसव यज्ञमें गायका वध करना चाहिए। राजसूय यज्ञमें राजाका वध करना चाहिए। अश्वमेधमें घोड़ेका वध करना चाहिए और पौण्डरीक यज्ञमें हाथीका वध करना चाहिए ॥४००॥ औषधि, पशु, वृक्ष, तिर्यञ्च, पक्षी और मनुष्य ये सब यज्ञमें मारे जाने से उच्चगति पाते हैं ॥४०१॥

१. 'ब्रह्मणे ब्राह्मणमालभते। क्षत्राय राजन्यम्। मरुद्भ्यो वैश्यम्। तपसे शूद्रम्। तमसे तस्करम्। नारकाय वीरहणम्। पाप्मने क्लीबम्। आक्रयाया योगूम्। कामाय पुंश्चलम्। अतिक्रुष्टाय मागधम्। गीताय सूतम्। नृत्ताय शैलूषम्।' –तैत्तिरीय ब्राह्मण ३, ४। वाजसनेयी संहिता ३०, ५ में तथा शतपथ ब्राह्मण १३, ६, २ में भी पाठभेदके साथ उक्त उद्धरण मिलता है। २. 'गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा।' –मनुस्मृति ११,९४। ३. वाजसनेयी संहिता २४, ४० की उव्वट और महीधरकी टीकामें यह श्लोक पाया जाता है। उसमें उत्तरार्ध इस प्रकार है–'अश्वमेधस्य यज्ञस्य नवभिश्चाधिकानि च।' ४. 'महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत्। सत्क्रियान्वासनं स्वादु भोजनं सूनृतं वचः॥१०९॥'–याज्ञवल्क्यस्मृति, पृ०३४। उक्षो वृषभः। ५. छागः। ६. हिंस्यते। ७. 'ओषध्यः····पक्षिणस्तथा।····प्राप्नुवन्त्युत्सृतीः पुनः ॥ ४० ॥ –मनुस्मृति अ० ५।

*मानवं व्यासवासिष्ठं वचनं वेदसंयुतम् ।*
*अप्रमाणं तु यो ब्रूयात्स भवेद्ब्रह्मघातकः ॥४०२॥*
*[1]पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम् ।*
*आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः ॥४०३॥*

**इति मनु-मरीचि-मतङ्गप्रभृतयश्च सवषट्[2]कारमजद्विजगजवाजिप्रभृतीन्देहिनो जुह्वति । तदेवं श्रुतिशस्त्र[3]वाणिज्यजित्योपजीविनामीतीः पर्वतो व्यपोहति । कालासुरः पुनरालभ्य[4]मानान् प्राणिनः साक्षाद्विमानारूढान्स्वर्गे सांवर्या[5] पर्यटतो दर्शयति । मनुप्रमुखाश्च मुनयः प्रभावयन्ति[6]। ततो मायाप्रदर्शितत्रिदशवेश्मप्रवेशादिलोभे सञ्जाते सकलजनक्षोभे [7]सप्रत्यासन्ननरकनगरः सगरः, स च श्वभ्रविभ्रमोचितस्थितिर्विश्वभूति[8]स्तदुपदेशात्तांस्तान्सत्त्वान् हत्वा [9]प्सात्त्वा च दुरन्तदुरितचित्तचेतसौ मखमिषात्कालासुरेण स्मारितपूर्वभवागसौ[10] वीतिहोत्राहु[11]-तिविहितविचित्रवधरहसौ विचित्रायाः[12] धरित्र्या[13] द्राघीयो[14] दुःखवेथुमन्थरं तलमगाताम्[15] । पर्वतोऽप्यग्नायीपतिविजये[16] जठरधनञ्जये[17] च हव्य[18]कव्य[19]कर्मभिः समाचरितसमस्तसत्त्व-संहारः कालासुरतिरोधानविधुरविधिसारस्तद्विरहातङ्कशोक[20]शोचिः क्लेशकृशयच्छरीरः कालेन [21]जीनजीवितप्रचारः सप्तमरसावसरः[22] समपादि[23] ।**

मनु, व्यास, वसिष्ठ आदि ऋषियोंके वचनोंको और वैदिक वचनोंको जो अप्रमाण बतलाता है वह ब्रह्मघाती है ॥४०२॥ पुराण, मानवधर्म मनुस्मृति, साङ्गवेद और आयुर्वेद ये चार स्वयं प्रमाण हैं । इन्हें युक्तियोंसे खण्डित नहीं करना चाहिए ॥४०३॥ इस तरहकी आज्ञाएँ पर्वत देता था । और मनु, मरीचि, मतङ्ग आदि ऋषि 'स्वाहा' शब्दके साथ बकरा, द्विज, हाथी, घोड़ा वगैरह प्राणियोंसे होम करते थे । इस प्रकार वेदसे जीविका करनेवाले ब्राह्मणोंमें, शस्त्रसे जीविका करनेवाले क्षत्रियोंमें, व्यापारसे जीविका करनेवाले वश्योंमें और खेती आदिसे जीविका करनेवाले कृषकोंमें कालासुरने जो बीमारियाँ फैलायी थीं उन्हें पर्वत दूर करता था, और कालासुर मारे गये प्राणियोंको अपनी मायाके द्वारा विमानमें सवार कराकर स्वर्गको जाते हुए दिखाता था । मनु वगैरह मुनि इससे दूसरोंको प्रभावित करते थे। इस प्रकार जब सब लोगोंमें मायाके द्वारा दिखलाये गये स्वर्ग गमनके लोभसे हलचल मच गयी तो नरकगामी सगर और विश्वभूति पुरोहितने भी कालासुरके उपदेशसे बहुतसे प्राणियोंका वध किया और उन्हें खाया । इससे उनका चित्त पापमें लिप्त हो गया । फिर कालासुरने उन दोनोंके पूर्व जन्ममें किये गये अपराधका स्मरण कराकर यज्ञके बहानेसे उन दोनोंको यज्ञकी अग्निमें होम दिया, और वे दोनों मरकर तीसरे नरकमें चले गये । पर्वतने भी अग्निको तिरस्कृत करनेवाली अपनी जठराग्निमें देवताओं और पितरोंकी तृप्तिके बहाने समस्त प्राणियोंका संहार कर डाला । कालासुर तो अपना काम करके अन्तर्धान हो गया । अतः उसके बिना उसकी सब विधि फीकी पड़ गयी । कालासुरके विरह रूपी संतापके शोकसे उसकी दशा शोचनीय हो गयी। क्लेशसे उसका शरीर कृश हो गया। अन्तमें मरण करके वह सप्तम नरकमें उत्पन्न हुआ ।

१. मनुस्मृति १२, ११० । २. स्वाहासहितम् । ३. श्रुतजीविनां विप्राणां, शस्त्रजीविनां क्षत्रियाणां, वाणिज्यहलजीविनां वणिजां या ईतयः कालासुरेण मायया कृताः ताः पर्वतः कालासुरमायया स्फेटयति । ४. हिंस्यमानान् । ५. मायया । ६. प्रभावनां कुर्वन्ति । ७. समीपनरकावासः । ८. कालासुर । ९. भक्षित्वा । १०. सुलसापहारदोषौ । ११. अग्नि । १२. बालुकाप्रभायाः । १३. दीर्घतरम् । १४. परितापेन मन्दगमन-सहितम् (?) । १५. गतौ । १६. अग्नितिरस्कारके । १७. उदराग्नौ । १८. देवदेयं । १९. पितृदेयं । २०. शोकाग्नि । २१. क्षीण । २२. सप्तमपृथिवी । २३. संजातः ।

भवति चात्र श्लोकः—

**मृषोद्यादीनवोद्योगात्पर्वतेन समं वसुः ।**
**जगाम जगतीमूलं ज्वलदातङ्कपावकम् ॥४०४॥**

*इत्युपासकाध्ययने असत्यफलसूचनो नाम त्रिंशत्तमः कल्पः ।*

**वधूवित्तस्त्रियौ मुक्त्वा सर्वत्रान्यत्र तज्जने ।**
**माता स्वसा तनूजेति मतिर्ब्रह्म गृहाश्रमे ॥४०५॥**
**धर्मभूमौ स्वभावेन मनुष्यो नियतस्मरः ।**
**यज्जात्यैव पराजातिबन्धुलिङ्गिस्त्रियस्त्यजेत् ॥४०६॥**
**रक्ष्यमाणे हि बृंहन्ति यत्राहिंसादयो गुणाः ।**
**उदाहरन्ति तद्ब्रह्म ब्रह्मविद्याविशारदाः ॥४०७॥**

इसके विषयमें एक श्लोक है जिसका भाव इस प्रकार है—

'झूठ बोलनेके दोषके कारण पर्वतके साथ वसु भी सातवें नरकको गया, जहाँ सदा संताप-रूपी अग्नि जलती रहती है ॥४०४॥

*इस प्रकार उपासकाध्ययनमें असत्यके फलका सूचक तीसवाँ कल्प समाप्त हुआ ।*

[ अब ब्रह्मचर्याणुव्रतका वर्णन करते हैं— ]

अपनी विवाहिता स्त्री और वेश्याके सिवा अन्य सब स्त्रियोंको अपनी माता बहिन और पुत्री मानना ब्रह्मचर्याणुव्रत है ॥४०५॥

विशेषार्थ—सब श्रावकाचारोंमें विवाहिताके सिवा स्त्री मात्रके त्यागीको ब्रह्मचर्याणुव्रती बतलाया है। परनारी और वेश्या ये दोनों ही त्याज्य हैं। किन्तु पं० सोमदेवजीने अणुव्रतीके लिए वेश्याकी भी छूट दे दी है। न जाने यह छूट किस आधारसे दी गई है ?

धर्मभूमि आर्यखण्डमें स्वभावसे ही मनुष्य कम कामी होते हैं। अतः अपनी जातिकी विवाहित स्त्रीसे ही सम्बन्ध करना चाहिए और अन्य कुजातियोंकी तथा बन्धु-बान्धवोंकी स्त्रियोंसे और व्रती स्त्रियोंसे सम्बन्ध नहीं करना चाहिए ॥४०६॥

जिसकी रक्षा करने पर अहिंसा आदि गुणोंमें वृद्धि होती है उसे ब्रह्मविद्यामें निष्णात विद्वान् ब्रह्म कहते हैं ॥४०७॥

---

१. आदीनवं दोषः । २. परिणीता अवधृता च । ३. स्त्रीजने । ४. 'न तु परदारान् गच्छति न परान् गमयति च पापभीतेर्यत् । सा परदारनिवृत्तिः स्वदारसन्तोषनामापि ॥५९॥' –रत्नकरण्ड श्रा० । 'उपात्ताया अनुपात्तायाश्च पराङ्गनायाः सङ्गान्निवृत्तरतिर्गृहीति चतुर्थमणुव्रतम् ।'–सर्वार्थसिद्धि ७, २० । 'ये निजकलत्रमात्रं परिहर्तुं शक्नुवन्ति न हि मोहात् । निशेषशेषयोषिन्निषेवणं तैरपि न कार्यम् ॥११०॥' –पुरुषार्थसि० । विवाहितां वा यदि वा विरुद्धां भजेदुदीर्णे मदनेऽथ वेश्याम् । विवर्जयेत् स्वामपि किन्त्वकाले स्वदारसन्तोष-परः सदैव ॥२१॥ –धर्मर०, प० ९२ उ० । स्वसृमातृदुहितृसदृशीः दृष्ट्वा परकामिनीः पटीयांसः । दूरं विवर्जयन्ते भुजगीमिव घोरदृष्टिविषाम् ॥६४॥ –अमित० श्रा०, ६ प० । 'सोऽस्ति स्वदारसन्तोषी योऽन्यस्त्रीप्रकटस्त्रियौ । न गच्छत्यंहसो भीत्या नान्यैर्गमयति त्रिधा ॥ ५२ ॥' –सागारधर्मा०, ४ अ० । ५. आर्यखण्डे । ६. अल्पकामः । ७. यस्मात् । स्वजात्या परिणीतया सह संभोगः कार्यः । ८. परा चासौ अजातिः पराजातिः परकीयजातिस्त्री । ९. 'अहिंसादयो धर्मा यस्मिन् परिपाल्यमाने बृंहन्ति वृद्धिमुपयान्ति तद् ब्रह्म ।' –सर्वार्थसि० ७-१६ ।

मदनोद्दीपनैर्वृत्तैर्मदनोद्दीपनै रसैः ।
मदनोद्दीपनैः शास्त्रैर्मदमात्मनि नाचरेत् ॥४०८॥
[1]हव्यैरिव [2]हुतप्रीतिः [3]पाथोभिरिव नीरधिः ।
तोषमेति पुमानेष न भोगैर्भवसंभवैः ॥४०९॥
विषवद्विषयाः पुंसामापाते मधुरागमाः ।
[4]अन्ते विपत्तिफलदास्तत्सतामिह को ग्रहः ॥४१०॥
बहिस्तास्ताः क्रियाः कुर्वन्नरः संकल्पजन्मवान् ।
[5]भावाप्तावेव निर्वाति क्लेशस्तत्राधिकः परम् ॥४११॥
[6]निकामं कामकामात्मा तृतीया[7] प्रकृतिर्भवेत् ।
अनन्तवीर्यपर्यायस्तस्यानारतसेवने [8]॥४१२॥
सर्वा क्रियानुलोमा स्यात्फलाय हितकामिनाम् ।
अपरत्रार्थकामाभ्यां [9]यतो न स्तां तदर्थिषु ॥४१३॥
क्षयामय[10]समः कामः सर्वदोषोदयद्युतिः ।
[11]उत्सूत्रे तत्र मर्त्यानां कुतः श्रेयः समागमः ॥४१४॥
[12]देहद्रविणसंस्कारसमुपार्जनवृत्तयः ।
जितकामे वृथा सर्वास्तत्कामः सर्वदोषभाक् ॥४१५॥

अतः कामोद्दीपन करनेवाले कार्योंसे, कामोद्दीपन करनेवाले रसोंके सेवनसे और कामोद्दीपन करनेवाले शास्त्रोंके श्रवण या पठनसे अपनेमें कामका मद नहीं लाना चाहिए ॥४०८॥

जैसे हवनकी सामग्रीसे अग्नि और जलसे समुद्र कभी तृप्त नहीं होते । वैसे ही यह पुरुष सांसारिक भोगोंसे कभी तृप्त नहीं होता ॥४०९॥ ये विषय विषके तुल्य हैं। जब आते हैं तो प्रिय लगते हैं किन्तु अन्तमें विपत्तिको ही लाते हैं। अतः सज्जनका विषयोंमें आग्रह कैसे हो सकता है ॥४१०॥ तरह-तरहकी बाह्य क्रियाओंको करता हुआ कामी मनुष्य रति सुखके मिलने पर ही सुखी होता है। किन्तु इसमें क्लेश ही अधिक होता है सुख तो नाम मात्र है ॥४११॥ जो अत्यन्त कामासक्त होता है वह निरन्तर कामका सेवन करनेसे नपुंसक हो जाता है और जो निरन्तर ब्रह्मचर्यका पालन करता है वह अनन्त वीर्यका धारी होता है ॥४१२॥ जो अपना हित चाहते हैं उनकी सब अनुलोम क्रियाएँ फलदायक होती हैं। किन्तु अर्थ और कामको छोड़कर । क्योंकि जो अर्थ और कामकी अभिलाषा करते हैं उन्हें अर्थ और कामकी प्राप्ति नहीं होती, अतः उन्हें अर्थ और कामकी प्राप्ति होने पर भी सदा असन्तोष ही रहता है ॥४१३॥ काम क्षय रोगके समान सब दोषों को उत्पन्न करता है। उसका आधिक्य होने पर मनुष्योंका कल्याण कैसे हो सकता है ? ॥४१४॥

जिसने कामको जीत लिया उसका देहका संस्कार करना, धन कमाना आदि सभी व्यापार व्यर्थ हैं; क्योंकि काम ही इन सब दोषोंकी जड़ है ॥४१५॥

१. देवदेयद्रव्यैः । 'न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते । २. अग्निर्न तोषमेति । ३. जलैः । ४. 'किंपाक फलसम्भोगसन्निभं तद्धि मैथुनम् । आपातमात्ररम्यं स्याद्विपाकेऽत्यन्तभीतिदम् ॥१०॥ –ज्ञानार्णव पृ० १३४ । ५. रतिरसप्राप्तावेव सुखी भवति किन्तु तत्र सुखं स्तोकम् । ६. अतीव कामेच्छावान् । ७. नपुंसकः । ८. ब्रह्मचर्यस्य । ९. 'यत्कारणात्तावर्थकामौ न स्तां न भवेताम्, केषु ? तदर्थिषु अर्थकामवाञ्छकेषु । कोऽर्थः ? तेषु तृप्तिर्न भवतीति भावार्थः । १०. क्षयरोगसदृशः । ११. आधिक्ये । १२. देहस्य संस्कारवृत्तिः द्रविणस्योपार्जनवृत्तिः ।

स्वाध्यायध्यानधर्माद्याः क्रियास्तावन्नरे कुतः ।
ईद्धे[1] चित्तेन्धने यावदेष कामाशुशुक्षणिः[2] ॥४१६॥
ऐदम्पर्यमतो[3] मुक्त्वा भोगानाहारवद्भजेत् ।
देहदाहोपशान्त्यर्थमभिध्यानविहानये ॥४१७॥
परस्त्रीसंगमानङ्गक्रीडान्योपयमक्रियाः[4] ।
तीव्रतारतिकैतव्ये[5][6] हन्युरेतानि तद्व्रतम्[7] ॥४१८॥
मद्यं द्यूतमुपद्रव्यं[8] तौर्यत्रिकमलंक्रिया:[9] ।
मदो विटा वृथाटय्येति[10][11] दशधानङ्गजो गणः ॥४१९॥
हिंसनं साहसं द्रोहः पौरो[12] भाग्यार्थदूषणे ।
ईर्ष्या वाग्दण्डपारुष्ये कोपजः स्याद्गणोऽष्टधा ॥४२०॥
ऐश्वर्यौदार्यशौण्डीर्यधैर्यसौन्दर्यवीर्यताः ।
लभेताद्भुतसञ्चाराश्चतुर्थव्रतपूतधीः ॥४२१॥

जबतक चित्तरूपी ईंधनमें यह कामरूपी आग धधकती है तबतक मनुष्य स्वाध्याय, ध्यान, धर्माचरण आदि क्रिया कैसे कर सकता है ? ॥४१६॥ अतः कामुकताको छोड़कर शारीरिक सन्तापकी शान्तिके लिए और विषयोंकी चाहको कम करनेके लिए आहारकी तरह भोगोंका सेवन करना चाहिए ॥४१७॥ परायी स्त्रीके साथ संगम करना, काम सेवनके अंगोंसे भिन्न अंगोंमें कामक्रीड़ा करना, दूसरोंके लड़की-लड़कोंका विवाह कराना, कामभोगकी तीव्र लालसाका होना और विटत्व, ये बातें ब्रह्मचर्यव्रतको घातनेवाली हैं ॥४१८॥ शराब, जुआ, मांस मधु, नाच, गाना और वादन, लिंगपर लेप वगैरह लगाना, शरीरको सजाना, मस्ती, लुच्चापन और व्यर्थ भ्रमण, ये दस कामके अनुचर हैं ॥४१९॥

हिंसा, साहस, मित्रादिके साथ द्रोह, दूसरोंके दोष देखनेका स्वभाव, अर्थदोष अर्थात् न ग्रहण करने योग्य धनका ग्रहण करना, और देयधनको न देना, ईर्ष्या, कठोर वचन बोलना और कठोर दण्ड देना ये आठ क्रोधके अनुचर हैं ॥४२०॥

ब्रह्मचर्याणुव्रती अद्भुत ऐश्वर्य, अद्भुत उदारता, अद्भुत शूर-वीरता, अद्भुत धीरता, अद्भुत सौन्दर्य और अद्भुत शक्तिको प्राप्त करता है ॥४२१॥

१. ज्वलति । २. कामाग्निः । 'श्रुतं सत्यं तपः शीलं विज्ञानं वृत्तमुत्तमम् । इन्धनीकुरुते मूढः प्रविश्य वनितानले ॥२२॥ –ज्ञानार्णव पृ० १६१ । ३. आधिक्यम् । 'भजेद्देहमनस्तापशमान्तं स्त्रियमन्नवत् । क्षीयन्ते खलु धर्मार्थकामास्तदतिसेवया ॥२९॥ –सागारधर्मा० अ० ३ । 'स्मरदोषास्पदं बुद्ध्वा स्वस्त्रीमन्नवदाश्रयेत् । देहदाहोपशान्त्यर्थं दुर्ध्यानस्यापि हानये ॥ ९८ ॥ –प्रबोधसार । ४. परविवाहकरणम् । ५. विपुलतृषा । ६. विटत्वम् । ७. ब्रह्मचर्यम् । 'परविवाहकरणेत्वरिकापरिगृहीतापरिगृहीतागमनानङ्गक्रीडाकामतीव्राभिनिवेशाः ॥२८॥–तत्त्वा० सू०, अ० ७ । 'अन्यविवाहाकरणानङ्गक्रीडाविटत्वविपुलतृषाः । इत्वरिकागमनं चास्मरस्य पञ्च व्यतीचाराः ॥६०॥ –रत्नकरण्ड श्रा० । 'स्मरतीव्राभिनिवेशानङ्गक्रीडान्यपरिणयनकरणम् । अपरिगृहीतेतरयोर्गमने चेत्वरिकयोः पञ्च ॥१८६॥ –पुरुषार्थसि० । अमित० श्रा० ७, ६ । सागारधर्मा० ४, ५८ । ८. मांस मधु । ९. यन्त्रलिङ्गलेपादिप्रयोगः । १०. एवमेव विहरणम् । ११. 'मृगयाऽक्षो दिवा स्वप्नः परिवादः स्त्रियो मदः । तौर्यत्रिकं वृथाटया च कामजो दशको गणः ॥ ४७ ॥ –मनुस्मृति अ० ७ । १२. पौरे भा–आ० मु० । पौरभा–ज० । पौरोभाग्यम्–असूयकत्वम् । 'पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम् । वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ॥ ४८ ॥–मनुस्मृति अ० ७ ।

अनङ्गानलसंलीढे परस्त्रीरतिचेतसि ।
सद्यस्का विपदो ह्यत्र परत्र च दुरास्पदाः ॥४२२॥

श्रूयतामत्राब्रह्मफलस्योपाख्यानम्—काशिदेशेषु सुरसुन्दरीसपत्नपौराङ्गनाजनविनोदारविन्दसरस्यां वाणारस्यां संपादितसमस्तारातिसंतानप्रकर्षकर्षणो धर्षणो नाम नृपतिः । अस्यातिचिरप्ररूढप्रणयसहकारमञ्जरी सुमञ्जरी नामाग्रमहादेवी । पञ्चतन्त्रादिशास्त्रविस्तृतवचन उग्रसेनो नाम सचिवः । पतिहितैकमनोमुद्रा सुभद्रा नामास्य पत्नी । दुर्विलासरसरङ्गः कडारपिङ्गो नामानयोः सूनुः । अनवद्यविद्योपदेशप्रकाशिताशेषशिष्यः पुष्यो नाम पुरोहितः । सौरूप्यातिशयापहसितपद्मा[1] पद्मा नामास्य धर्मपत्नी । समस्ताभिजातजनवाह्यव्यवहारानुगः स कडारपिङ्गः स्वापतेयतारुण्यमदमन्दमानबलाबापलाद्दुरालपनभण्डेन षिड्गषण्डेन[2] सह नतभ्रूविभ्रमाभ्यर्थ्यमानभुजङ्गा[3]तिथिषु वीथिषु संचरमाणस्तामेकदा प्रासादतलोपसंदा[4]मरालपक्ष्मेक्षणा[5]क्षिप्तपद्मां[6] पद्मामवलोक्य

'एषेन्द्रियद्रुमसमुल्लसनाम्बुवृष्टि-
रेषा मनोमृगविनोदविहारभूमिः ।
एषा स्मरद्विरदबन्धनवारिवृत्तिः
किं खेचरी किममरी किमियं रतिर्वा ॥४२३॥'

---

जिसका कामरूपी अग्निसे वेष्टित चित्त पर-नारीसे रति करनेमें आसक्त है उसे इसी जन्ममें तत्काल विपत्तियाँ उठानी पड़ती हैं और परलोकमें भी कठोर विपत्तियोंका सामना करना पड़ता है ॥४२२॥

दुराचारके फलके सम्बन्धमें एक कथा सुनें—

## १६ दुराचारी कडारपिंगकी कथा

काशी देशमें वाराणसी नामकी नगरी है । उसमें धर्षण नामका राजा राज्य करता था । सुमञ्जरी नामकी उसकी पटरानी थी, और उग्रसेन नामका मन्त्री था । मन्त्रीकी पत्नीका नाम सुभद्रा था, और पुत्रका नाम कडारपिंग था । वह बड़ा विलासी था । राजपुरोहितका नाम पुष्य था और उसकी पत्नीका नाम पद्मा था ।

मन्त्रीपुत्र कडारपिंग कुलीन पुरुषोंके न करने योग्य काम करता था । एक दिन वह धन और जवानीके मदसे मस्त होकर अश्लील बात-चीत करते हुए कामीजनोंके साथ उन गलियोंमें घूमता था, जहाँ स्त्रियोंके विलाससे आमन्त्रित होकर विलासी जन आतिथ्य ग्रहण करते हैं । उसने महलके ऊपर अपने सुन्दर नयनोंसे कमलको तिरस्कृत करनेवाली पद्माको देखा । वह सोचने लगा—

इन्द्रियरूपी वृक्षकी वृद्धिके लिए जलवृष्टि, मनरूपी मृगके विनोदके लिए क्रीड़ाभूमि और कामरूपी हाथीको बाँधनेके लिए सांकलके समान यह कौन है ? कोई विद्याधरी है या देवाङ्गना है अथवा रति है ? ॥४२३॥

---

१. तिरस्कृतलक्ष्मी । २. विटसमूहेन । ३. कामिजन । ४. गताम् । ५. अरालं चारु कुटिलं वा । ६. श्रियम् ।

इति च विचिन्त्य मकरकेतुवशव्यापारनिधिः प्रवृत्तदुरभिसन्धिः पुरुषप्रयोगेणाभिमतसिद्धि-[1] मनवबुध्यमानः पराशयशैलविदारणतडिल्लतामिव तडिल्लतां नाम धात्रीं अषडक्षीणे[4] शरणे[5] सुनयायतनपतनादिभिः[6] पादपतनादिभिः[7] प्रश्रयैरसदाशयाश्रयैरवन्ध्यसाध्यमुपरुध्य[8] स्वकी-याकूतकान्तारप्रबर्धनघरित्रीमं[10] करोत्।

तदुपरोधात्तथाविधविधिविधात्री[12] धात्री—(स्वगतम्) 'परपरि[13]ग्रहोऽन्यतरानु-रागग्रहश्चेति दुर्घटप्रतिभासः खलु कार्योपन्यासः। अथवा सुघट एवायं कार्यघटः। यत-स्तप्तातप्तयसोरयसोरिव चेतसोः साकृत्याय खलु पण्डितैर्दौत्यं[14] दौत्यमन्यथा संसरतरसो-रम्भसोरिव द्वयोरपि द्रवस्वभावयोरेकीकरणे किं नु नाम प्रतिभाविजृम्भितम्। किं च।

सा दूतिकाभिमतकार्यविधौ बुधानां
चातुर्यवर्यवचनोचितचित्तवृत्तिः।
या[16] चुम्बकोपलकलेवहि[17] शल्यमन्त-
श्चेतोनिरूढमपरस्य बहिष्करोति ॥४२४॥

तदलं विलम्बेन। परिपक्वफलमिव न खलु व्यतिक्रान्तकालमदः[18] सरं[19] सतामधिष्ठान-मनुष्ठानम्। किं त्वस्य साहसावलम्बनधर्मणः कर्मणः सिद्धावसिद्धौ वा दैवात्परेङ्गिताकार-सर्वज्ञैः प्राज्ञैः कथमपि बहुजनावकाशे कृते सति[20] पुरश्चारी हि शरीरी भवति दुरपवाद-

ऐसा विचारते हुए उसने कामसे पीड़ित होकर दुष्ट संकल्प किया। बलात्कारके द्वारा अपने मनोरथकी सिद्धि न होती जानकर उसने दूसरेके अभिप्रायरूपी पर्वतको भेदनेमें बिजलीकी तरह कुशल तडिल्लता नामकी धायको उसके पास भेजनेका विचार किया। और एकान्त गृहमें नीतिवानोंको भी मार्ग भ्रष्ट करनेवाले पैरों पर गिरना आदि दुर्जनोंके द्वारा आश्रय की जानेवाली विनयके द्वारा उसे अपना मनोरथ सिद्ध करनेके लिए तैयार किया।

उसके अति आग्रहसे उस कार्यका भार लेकर धाय सोचने लगी—'पर-नारी और किसी दूसरेके प्रेमको जुटानेका कार्य बड़ा कठिन प्रतीत होता है। अथवा यह कार्य सरल ही है; क्योंकि तपे हुए और बिना तपे हुए लोहोंके समान दो चित्तोंको मिलानेके लिए पंडित जन जो कुछ प्रयत्न करते हैं वही तो वास्तवमें दौत्य है। अन्यथा वेगसे बहनेवाले दो जलोंकी तरह दो तरल हृदयोंको मिलानेमें क्या बुद्धिमानी है?' तथा

वही दूती इष्ट कार्यको करनेमें चतुर कहलाती है, जो चुम्बक पत्थरकी तरह दूसरेके मनके भीतरके शल्यको बाहर निकाल लेती है ॥४२४॥

अतः इस कार्यमें देरी नहीं करनी चाहिए। जैसे समय बीत जानेपर पका फल भी सरस नहीं रहता वैसे ही समय बीत जानेपर सुकर काम भी दुष्कर हो जाता है। किन्तु यह कार्य बड़े साहसका है भाग्यवश यह सिद्ध हो या न हो किन्तु दूसरेके अभिप्रायको जाननेमें सर्वज्ञ विद्वान् भी यदि ऐसे कार्यको बहुतसे मनुष्योंके सामने करें तो दूत निन्दाका पात्र तो बनता ही है, साथ

१. बलात्कारेण। २. -मतकार्यघटनासिद्धि—आ०। ३. विद्युत्। ४. न सन्ति षट् अक्षीणि यत्र—तृतीयागोचरे। ५. गृहे। ६. सुनयायतनस्य पतनं गमनमदन्ति विनाशयन्तीत्येवं शीलानि तैः। ७. विनयैः। ८. सफल। अवन्ध्यसाध्यमिति क्रियाविशेषणम्। ९. अभिप्रायवन। १०. भूमिप्रायाम्। ११. तस्याग्रहात्। १२. कर्त्री। १३. कलत्रम्। १४. यत् क्रियते तदेव दूतत्वम्। १५. द्रवीभूतवेगयोः। १६. चुम्बकपाषाण। १७. पक्षे लोहादिकम्। १८. कार्यम्। १९. यथा पक्वं फलं अतीतकालं सरसं न भवति। २०. दूतः।

परागावसरो व्यसनगोचरश्च। तद् [1]ब्रूम येयमिदमवसेयं[2]मद्वितीयापत्यप्रसवाय सचिवाय। [3]तदुदाहरन्ति न चानिवेद्य भर्तुः किञ्चिदारम्भं कुर्यादन्यत्रापत्[4]प्रतीकारेभ्य' इति। (प्रकाशम्) 'प्राणप्रियैकापत्य अमात्य, ईदृश इव ननु [5]भवादृशोऽपि जनो [6]जातजीवितामृतानिषेकाय अचिरतनं यत्नं कर्तुमर्हति।'

अमात्यः—'समस्तमनोरथसमर्थनकथास्मार्ये आर्ये, तज्जीवितामृतनिषेकाय मज्जीवितोचितविवेकाय च [7]तत्रभवत्येव [8]प्रभवति।'

धात्री—'अथ किम्। तथाप्यबलाजनमनोतिरिक्तप्रतिभावता तत्रभवतापि प्रतियतितव्यम्।' इत्यभिधाय धृतकात्यायिनी[9]प्रतिकर्मा करतलामलकमिवाकलितसकलस्त्रैणधर्मा तैस्तैः परचित्ताकर्षणमन्त्रैर्वचो[10]भिश्चक्षुश्चेतोह्लाद[11]वास्तुभिश्च अतिचिरायाचरितोपचारा परिप्राप्तप्रणयप्रसरावतारा च एकदा मुदा रहसीमं प्रस्तुतकार्यघटनासमसीमं तां पुष्यकान्तामुद्दिश्य श्लोकमुदाहार्षीत्।

'स्त्रीषु धन्यात्र गङ्गैव परभोगोपगापि या।
मणिमालेव सोल्लासं ध्रियते मूर्ध्नि शम्भुना ॥४२५॥'

भट्टिनी—(स्वगतम्) इत्वरीजनाचरणहर्म्यनिर्माणाय प्रथमसूत्रपात इवायं वाक्यो-

ही साथ मुसीबतमें भी पड़ जाता है। इसलिए यह कार्य केवल एक ही पुत्रवाले मंत्रीसे कह देना चाहिए, कहा भी है कि स्वामीसे निवेदन किये बिना दूतको कोई भी काम नहीं करना चाहिए। हाँ, यदि कोई आपत्ति आ जाये तो उसका प्रतीकार स्वामीसे बिना कहे भी किया जा सकता है।'

ऐसा मनमें सोचकर धाय मन्त्रीसे बोली—

'मंत्री जी! आपका यह प्राणप्रिय इकलौता लड़का है। आप भी पहले ऐसे ही थे। इसलिए पुत्रके जीवनको बचानेके लिए आपको शीघ्र प्रयत्न करना चाहिए।'

मंत्री—आर्ये! मेरे और मेरे पुत्रके जीवनको बचाना आपके ही हाथ है।

धाय—सो तो है ही, किन्तु फिर भी आपकी प्रतिभा हम स्त्रियोंकी बुद्धिसे बहुत अधिक है। इसलिए आपको भी प्रयत्न करना चाहिए।

इतना कहकर धायने ढलती उम्रकी स्त्रीका वेश धारण किया। वह स्त्रीजनोचित सब बातोंमें बड़ी चतुर थी। उसने दूसरेके चित्तको आकृष्ट करनेवाले वचनोंसे और आँखों तथा मनको प्रसन्न करनेवाली वस्तुओंसे कुछ दिनोंमें ही पद्माको खुश कर लिया। एक दिन प्रेमका जाल फैलानेका अवसर आया देखकर धायने बड़े हर्षके साथ एकान्तमें पद्माको लक्ष्य करके एक श्लोक कहा उसका भाव यह था--'इस लोककी स्त्रियोंमें गङ्गा नदी ही धन्य है, जिसे सब भोगते हैं, फिर भी महादेव बड़े हर्षसे मणियोंकी मालाकी तरह उसे अपने मस्तक पर धारण करते हैं ॥४२५॥

इसे सुनकर पद्माने अपने मनमें विचारा--'इसकी यह भूमिका तो दुराचारिणी स्त्रियोंके

---

१. ब्रूत येय–मु०। कथयामि। २. कार्यम्। ३. आर्याः कथयन्ति। ४. आपत्प्रतीकारः स्वामिनोऽनिवेद्यापि करणीयः, अन्यत्कार्यं कथनीयमित्यर्थः। ५. पूर्वं त्वमपीदृशोऽभूः इति भावः। ६. पुत्रजीवितमेवाऽमृतं तत्सेचनाय। ७. त्वमेव। ८. समर्था। ९. अर्धवृद्धा। १०. वचनैः। ११. वास्तुभिर्वस्तुभिश्च अ.।

[1]पोद्घातः। तथा चाह येयं[2] तावदेतदाकूतपरिपाकम्[3]। ( प्रकाशम्। ) आर्ये, किमस्य सुभाषितस्य पैदम्पर्यम्[4]।

धात्री—परमसौभाग्यभागिनि भट्टिनि, जानासि एवास्य सुभाषितस्य [5]कैम्पर्यम्, यदि न वज्रघटितहृदयासि।

भट्टिनी—( स्वगतम् ) सत्यं वज्रघटितहृदयाहम्, यदि भवत्प्रयुक्तोपघातघण[6]-अर्जरितकाया न भविष्यामि। ( प्रकाशम् ) आर्ये, हृदयेऽभिनिविष्टमर्थं श्रोतुमिच्छामि।

धात्री—वत्से, कथयामि। किं तु।

'चित्तं द्वयोः पुरत एव निवेदनीयं
ज्ञानाभिमानधनधन्य[7]धिया नरेण।
यः प्रार्थितं न [8]रहयत्यभियुज्यमानो[9]
यो वा भवेन्ननु जनो मनसोऽनुकूलः ॥४२६॥

भट्टिनी—( स्वगतम् ) अहो नभः[10] प्रकृतिमपीयं पङ्कैरुपलेप्तुमिच्छति। ( प्रकाशम् ) आर्ये, [11]उभयत्रापि समर्थाहं न चैतन्मदुपज्ञं[12] भवदुपक्रमं वा।

धात्री—( स्वगतम् ) [13]अनुगुणेयं खलु कार्यपरिणतिः, यदि निकटतटतन्त्रस्य वहित्रपात्रस्येव[14] [15]दुर्वातालीसन्निपातो न भवेत्। ( प्रकाशम् ) अत एव भद्रे, वदन्ति पुराणविदः—

---

योग्य दुराचारका महल बनानेके लिए पहला नापा-जोखी जैसी है। फिर भी जो कुछ इसने कहा है उसके अभिप्रायको परिपक्व करनेका प्रयत्न करना चाहिए।' यह सोच धायसे बोली—'माता आपके इस सुभाषितका क्या मतलब है ?'

धाय—परम सौभाग्यवती देवी यदि तुम्हारा हृदय वज्रका नहीं है तो इस सुभाषितका मतलब तुम जानती ही हो।

पद्मा—( मनमें ) यदि तुम्हारे द्वारा फेंके गये इस लोह मुद्गरसे मेरा मन चूर्ण नहीं होता तो जरूर मेरा हृदय वज्रसे बना है। ( प्रकाशमें ) माता ! हृदयमें वर्तमान अर्थको मैं तुमसे सुनना चाहती हूँ।

धाय—पुत्री ? बतलाती हूँ। किन्तु समझदार और स्वाभिमानी मनुष्यको दोके ही सामने अपने मनकी बात कहनी चाहिए। एक तो उससे, जो प्रार्थना करने पर प्रार्थनाको अस्वीकार न करे। दूसरे उससे, जो अपने मनके अनुकूल हो ॥४२६॥

पद्मा—( मनमें ) देखो इसकी धृष्टता, आकाशकी तरह निर्लिप्त वस्तुको भी यह कीचड़से लीपना चाहती है। ( प्रकाशमें ) माता ! मैं उक्त दोनों बातोंमें समर्थ हूँ। न मेरे लिए यह कोई नयी बात है और न इसमें तुम्हारा ही कुछ प्रयत्न है।

धाय—( मनमें ) यदि कोई तूफ़ान न आ पहुँचे तो तटके निकट आये हुए जहाजकी तरह यह कार्य सिद्ध है। ( प्रकाशमें ) पुत्री ! इसीलिए पुराणकारोंने कहा है कि प्राचीनकालमें

---

१. अवतारणक्रमः। २. या इयं धात्री आह। ज्ञेयं आ०। ३. अभिप्रायोदयं सूत्रपातसदृशम्। ४. रहस्यम्। ५. रहस्यम्। ६. –घुण-अ० ज०। ७. –न धवनधन्य– आ० ज०। ८. त्याजयति। ९. प्रार्थितः। १०. आकाशस्वभावम्। ११. प्रार्थितदाने मनोऽनुकूलतायाञ्च। १२. न हि मदीय उपाधिर्न च भवदीय उद्यमः किन्तु पुरैव ईदृशी गतिरस्ति। १३. अनुकूला इयम्। १४. पोतस्य। १५. वात्या।

'विधुर्गुरोः कलत्रेण गोतमस्यामरेश्वरः ।
[1]संतनोश्चापि [2]दुश्चर्मा समगंस्त पुरा किल ॥४२७॥'

भट्टिनी—आर्ये, एवमेव । यतः-

'स्त्रीणां वपुर्बन्धुभिरग्निसाक्षिकं परत्र विक्रीतमिदं न मानसम् ।
स एव तस्याधिपतिर्मतः कृती विस्रम्भगर्भा ननु यत्र निर्वृतिः ॥४२८॥'

धात्री—पुत्रि, तर्हि श्रूयताम् । त्वं किलैकदा कस्यचित्कुसुम[3]किसारुनिर्विशेषवपुषः पुराङ्गनाजनलोचनोत्पलोत्सवामृतरोचिषः प्रासादपरिसरविहारिणी वीक्षणपथानुसारिणी सती कौमुदीव हृदयचन्द्रकान्तानन्दस्यन्दसंपादिनी अभूः । तत्प्रभृति ननु तस्य मदनसुन्दरस्य यूनः [4]प्रत्यवसितवसन्तश्रीसमागमसमयस्य [5]पुष्पन्धयस्येव [6]रसालमञ्जर्यामिव भवत्यां महान्ति खलु मन्दमकरन्दास्वादन[7]दोहदानि, नितान्तं चिन्ताचक्रपरिक्रान्तं स्वान्तम्, प्रसभं गुणस्मरणपरिणामाधिकरणमन्तःकरणम्, अनवरतं रामणीयकानुकीर्तनसंकेतं चेतः, प्रविकसत्कुसुमविलासोचितसंनिहितेऽप्यन्यस्मिंल्लताकान्ताजने महानुद्वेगः, पिशाचच्छलितस्येवास्थानानुबन्धः, सञ्जातोन्मादस्येव विचित्रोपलम्भः क्रियाप्रारम्भः, [8]स्कन्दगदगृहीतस्येव प्रतिवासरं कार्श्यावतारः, स्मराराधनप्रणीतप्रणिधानस्येवेन्द्रियेषु [9]सन्नता जडता प्राणेषु [10]चाद्यश्वीनपथाकथा । अपि च-

'अनवरतजलार्द्रान्दोलनस्पन्दमन्दै-
रतिसरसमृणालीकन्दलैश्चन्दनार्द्रैः ।

---

चन्द्रमाने अपनी गुरुपत्नीसे, इन्द्रने गौतमकी पत्नी अहिल्यासे और महादेवने संतनु राजाकी पत्नीसे संगम किया था ॥४२७॥

पद्मा—माता आपका कहना ठीक है; क्योंकि बन्धु-बान्धव अग्निकी साक्षी पूर्वक स्त्रीका शरीर दूसरेको बेच देते हैं, मन नहीं। उसका पति तो वही भाग्यशाली होता है जिससे उसे विश्वासके साथ ही साथ सुरत भी मिलता है ॥४२८॥

धाय—पुत्री ! तो सुन एक दिन तू अपने महलके ऊपर घूमती थी। फूलकी पंखुड़ीकी तरह कोमल और नगरकी स्त्रियोंके नयन कुमुदोंको विकसित करनेके लिए चन्द्रमाके तुल्य किसी युवाकी दृष्टि तेरे ऊपर पड़ गयी। जैसे वसन्तका समागम होनेपर भौंरा आमकी मंजरीका रस पान करनेके लिए लालायित रहता है वैसे ही उस दिनसे कामदेवकी तरह सुन्दर वह युवा तेरे रसका पान करनेके मनोरथ बाँधता रहता है। उसी दिनसे उसका चित्त तेरे लिए चिन्तित है, सदा तेरे गुणोंको स्मरण करता है, तेरी सुन्दरताका बखान करता है, विलासके योग्य अन्य स्त्रियोंके पास आनेपर भी उनकी ओर आँख उठाकर भी नहीं देखता। भूताविष्टकी तरह एक स्थानपर नहीं बैठता। पागलोंकी तरह विचित्र काम करता है। क्षयरोगके रोगीकी तरह दिन-दिन कृश होता जाता है। इन्द्रियाँ ऐसी क्षीण हो गयी है मानो कामदेवकी आराधनाके लिए उसने ध्यान लगाया है। आज-कलमें ही उसके प्राण पखेरू उड़ना चाहते हैं। तथा सदा जलसे भीगे हुए पंखेसे

---

१. शांतनुराज्ञः । २. हरः । ३. कामः । ४. संजात । ५. भ्रमरस्य । ६. आम्र । ७. -स्वादने दो- आ० म० द० । ८. स्कन्ध -आ० मु० । क्षयरोग । ९. क्षीणता । १०. अद्य कल्ये वा प्राणा यास्यन्ति ।

अमृतरुचिमरीचिप्रौढितायां निशायां
प्रियसखि सुहृदस्ते किञ्चिदात्मप्रबोधः[1] ॥४२९॥'

भट्टिनी—आर्ये, किमित्यद्यापि गोपाय्यते।

धात्री—( [2]कर्णजाहमनुसृत्य ) एवमेवम्।

भट्टिनी—को दोषः।

धात्री—कदा।

भट्टिनी—यदा तुभ्यं रोचते।

इतश्चानन्तरायतया [3]तनयानुमताहितमतिपाटवः सचिवोऽपि नृपतिनिवासोचितप्रचारेषु [4]वासुरेषु गुणव्यावर्णनावसरायातमेतस्य महीपतेः पुरस्ताच्छ्लोकमिममुप[5]न्यास्थत—

'राज्यं प्रवर्धते तस्य किञ्जल्पो यस्य वेश्मनि।
शत्रवश्च क्षयं यान्ति सिद्धाश्चिन्तामणेरिव ॥४३०॥'

राजा—अमात्य, क्व तस्य प्रादुर्भूतिः, कीदृशी च तस्याकृतिः।

अमात्यः—देव, भगवतः पार्वतीपतेः [6]श्वशुरस्य मन्दाकिनीस्पन्दनिदानकन्दरनीहा[7]रस्य [8]रमणसहचरखेचरीसुरतपरिमलमत्तमत्तालिमण्डलीविलिख्यमानमरकतमणिमेखलस्य प्रालेयाचलस्य [9]वृक्षोत्पलषण्डमण्डितशिखण्डस्य रत्नशिखण्डनाम्नः शिखरस्याभ्यासे[10] निः-

मन्द-मन्द हवाके किये जानेसे और अत्यन्त सरस कमलोंके डोंडोंको चन्दनके रसमें भिगोकर उनका लेप करनेसे चाँदनी रातमें तेरे प्रेमीको कुछ होश होता है ॥४२९॥

पद्मा—माता! तो अब तक यह बात तुम क्यों छिपाये रहीं ?

धाय—( कानमें ) । इस इस प्रकार ।

पद्मा—इसमें क्या बुराई है ?

धाय—तो कब ?

पद्मा—जब तुम चाहो ।

इधर धायका प्रयत्न चालू था उधर मन्त्री भी प्रतिदिन अपने पुत्रकी हित-कामनासे राजाके पास जाता था और राजाके महलमें रहने योग्य पक्षियोंके गुणोंका वर्णन किया करता था । एक दिन अवसर पाकर उसने राजाके सामने एक श्लोक पढ़ा । जिसका मतलब यह था कि जिस राजाके महलमें किञ्जल्प नामका पक्षी रहता है उसका राज्य बढ़ता है और सिद्ध किये गये चिन्तामणि रत्नकी तरह उससे शत्रु नष्ट हो जाते हैं ॥४३०॥

राजा—मन्त्री ! यह पक्षी कहाँ पैदा होता है और उसकी शक्ल कैसी होती है ?

मंत्री—स्वामी ! भगवान् महादेवके श्वसुर हिमालय पर्वतकी रत्नशिखण्ड नामकी चोटीके समीपमें एक गुफा है, जिसमें सब प्रकारके पक्षी उत्पन्न होते हैं । जटायु, वैनतेय, वैशम्पायन

१. -प्रबोधैः आ० ज० ब० । २. कर्णसमीपं शनैः कथितवती । ३. पुत्र । तयानुमता हि गता म—ब० । ४. पक्षिषु । ५. पठति स्म । ६. हिमाचलस्य । ७. हिमस्य । हिमं गलित्वा जलं भूत्वा गङ्गा वहति । ८. भर्तृसहगमन । ९. कर्णिकार । १०. समीपे ।

शेषशकुन्तसंभवावहा गुहा समस्ति । यस्यां जटायु-वैनतेय-वैशम्पायनप्रभृतयः शकुन्तयः प्रादुरासन् । [1]तस्यामेव [2]तस्योत्पत्तिः । तां च गुहामहं पुष्यश्चानेकशो नन्दाभगवतीयात्रानुसारित्वात्साधु जानीवः । प्रतिकृतिश्चास्या[3]नेकवर्णा मनुष्यसवर्णा[4] च ।

भूपालः—( सञ्जातकुतूहलः ) अमात्य, कथं तद्दर्शनोत्कण्ठा ममाकुण्ठा स्यात् ।

अमात्यः—देव, मयि पुष्ये वा गते सति ।

राजा—अमात्य, भवानतीव [5]प्रवयाः । तत्पुष्यः प्रयातु ।

अमात्यः—देव, तर्हि दीयतामस्मै सरत्नालङ्कारप्रवेकं[6] पारितोषिकम् , [7]अगणेयं पाथेयं च ।

राजा—बाढम् ।

स्वामिचिन्ताचारचक्षुष्यः पुष्यस्तथादिष्टो[8] गेहमागत्य 'आदेशं न विकल्पयेत्' इति मतानुसारी प्रयाणसामग्रीं कुर्वाणस्तया सतीव्रतपवित्रितसत्वया पद्मया पृष्टः—'भट्ट, किमकाण्डे प्रयाणाडम्बरः ।

पुष्यः—प्रस्तुतमाचष्टे ।

भट्टिनी—भट्ट, सर्वमेतत्सचिवस्य कूटकपटचेष्टितम् ।

भट्टः—भट्टिनि, किं नु खल्वेतच्चेष्टितस्यायतनम्[9] ।

भट्टिनी—प्रक्रान्तमभाषिष्ट ।

भट्टः—किमत्र कार्यम् ।

आदि पक्षी उसी गुफामें पैदा हुए थे। उसी गुफामें किञ्जल्प नामका पक्षी उत्पन्न होता है । उस गुफाको मैं और पुष्य अच्छी तरह जानते हैं क्योंकि हम दोनों भगवती नन्दाकी यात्रा करने गये थे । उसका आकार मनुष्यकी तरह होता है और वह अनेक रंगका होता है ।

राजा—( बड़े कौतूहलसे ) मंत्री ! उसके दर्शनकी मेरी अभिलाषा कैसे सफल हो ?

मंत्री—स्वामी ! मेरे या पुष्यके जानेसे आपकी अभिलाषा पूर्ण हो सकती है ।

राजा—मंत्री ! तुम बहुत वृद्ध हो इसलिए पुष्यको भेज दो ।

मंत्री—स्वामी ! तो पुष्यको उत्तम रत्नजड़ित कंकण पारितोषिकमें दीजिए और रास्तेके लिए बहुत-सी आवश्यक सामग्री भी ।

राजा—अच्छा ।

आज्ञा पाकर पुष्य घर आया । उसका मत था कि आज्ञामें संकल्प विकल्प नहीं करना चाहिए। अतः आते ही जानेकी तैयारी करने लगा । पतिव्रता पद्माने यह देखकर पूछा—'स्वामी ! यह असमयमें जानेकी तैयारी क्यों ?'

पुष्य—प्रस्तुत बातको कहता है ।

पद्मा—यह सब कपटी मन्त्रीका जाल है ।

पुष्य—ऐसा करनेका कारण क्या ?

पद्माने सब कुछ कह सुनाया ।

पुष्य—फिर अब क्या करना चाहिए ?

१. गुहायाम् । २-३ किंजल्पपक्षिणः । ४. समाना । ५. वृद्धः । ६. कङ्कणम् । ७. प्रचुरम् । ८. तदा दिष्टो आ० । ९. कारणम् ।

भट्टिनी—कार्यमेतदेव। दिवा सप्रकाशमेतस्मात्पुरात्प्रस्थाय निशि निभृतं च प्रत्यावृत्य अत्रैव महावकाशे निजनिवासनिवेशे सुखेन वस्तव्यम्। उत्तरत्राहं जानामि।

भट्टः—तथास्तु।

ततोऽन्यदा तया परनिकृतिपात्र्या[1] धात्र्या [2]सदुराचाराभिषङ्गः कडारपिङ्गः सुप्तजनसमये समानीतः 'समभ्यसतु तावदिहैवेयमयं[3] च महीमूलं यियासुः पातालावासदुःखम्' इत्यनुध्याय तया पद्मया [4]महावर्तस्य गर्तस्योपरि कल्पितायामवानायां खट्वायां क्रमेणोपवेशितवपुषौ तौ द्वावपि दुरातङ्कावन्ध्ये श्वभ्रमध्ये विनिपेततुः। अनुबभूवतुश्च निखिलपरिजनोच्छिष्टसिक्थजीवनौ कुम्भीपाकोपक्रमं षट्समा[5]शाखान्दुःखक्रमम्।

पुनरेकदा 'स्वाम्यादेशविशेषविदुष्यः पुष्यः तथाविधपक्षिप्रसवसमर्थपक्षिणीसहितं कृतपञ्जरपरिकल्पं किञ्जल्पमादाय आगच्छंस्त्रिचतुरेषु वासरेष्वस्यां पुरि प्रविशति' इति प्रसिद्धम्। प्रवर्तिनी भट्टिनी विविधवर्णविडम्बितकायेन चटकचकोरचाषचातकादिच्छदच्छादितप्र[6]तीकनिकायेन पञ्जरालयेन तद्द्वयेन सह चिरप्रवासोचितवेषजोष्यं[7] पुष्यं पुरोपवने विनिवेश्य भट्टोद्भूतारम्भसंभाषणसनाथसखीजनसंकल्पा धृतप्रोषितभर्तृकाक[8]ल्पाभि[9]मुखमयासीत्। अपरेद्युः स निखिलगुणविशेष्यः पुष्यः पृथिवीपतिभवनमनुगम्य 'देव, अयं स किञ्जल्पः पक्षी, इयं च तत्प्रसवित्री पतत्रिणी च' इत्याचरत्।

---

पद्मा—यही करना चाहिए कि दिन चढ़नेपर इस नगरसे प्रस्थान करो और रातमें चुपचाप लौट कर अपने इसी बड़े मकानके किसी एक हिस्सेमें सुखसे निवास करो। आगे जो करना है वह मैं कर लूँगी।

पुष्य—ठीक है।

दूसरे दिन जब सब सो गये तो वह ठगनी धाय उस दुराचारी कडारपिंगको लेकर आयी। उधर पद्माने यह सोचकर कि 'ये दोनों नरकगामी इसी जन्ममें नरकके दुःखोंको सहनेका अभ्यास क्यों न करें' अपने घरमें एक खूब गहरा गढ़ा खुदवाकर उसके ऊपर बिना बुनी खाट बिछा दी और खाटपर एक कपड़ा डाल दिया। वे दोनों जैसे ही उस खाटपर बैठे दोनों उस गढ्ढेमें गिर गये। और छह मासतक सबका झूठा भात खाकर नरकके समान दुखोंको भोगते रहे।

एक दिन सारे नगरमें यह बात फैल गयी कि स्वामीकी आज्ञाका पालक पुष्य एक पिंजरेमें किञ्जल्प पक्षीको और इस प्रकारके पक्षीको जन्म दे सकने वाली पक्षिणीको लेकर आ रहा है और तीन चार दिनमें वह इस नगरमें प्रवेश करेगा। उधर पद्माने उन दोनोंके शरीरोंको अनेक रंगोंसे रँगा और चिड़िया, चकोर, नीलकण्ठ, चातक आदि पक्षियोंके पर उनपर चिपका दिये। तथा पिंजरेमें बन्द करके उन दोनोंके साथ अपने पति पुष्यको चिर प्रवासके योग्य वेश बनाकर पहलेसे नगरके बाहर स्थित उपवनमें भेज दिया। और आप विरहिणी स्त्रीका वेश बनाकर पुरोहितके अद्भुत कार्यके सम्बन्धमें बातचीत करनेके लिए आतुर सहेलियोंके साथ पतिसे मिलने गयी।

दूसरे दिन गुणी पुष्य राजभवनमें जाकर बोला—"महाराज! यह किंजल्प पक्षी है और

---

१. माया। २. दुराचारेण सह अभिषङ्गः सम्बन्धो यस्य। ३. धात्रीकडारपिंगौ। ४. विस्तारेण गम्भीरस्य। ५. मासान्। ६. अवयव। ७. सेवनीयम्। ८. वेषा। ९. सम्मुखं गता।

राजा—( चिरं निर्वर्ण्य निर्णीय च स्वरेण । ) पुरोहित, नैष खलु किञ्जल्पः पक्षी, किं तु कडारपिङ्गोऽयम् । एषापि विहङ्गी न भवति, किं तु तडिल्लतेयं कुट्टिनी ।

पुष्यः—देव, एतत्परिज्ञाने प्रगल्भमतिप्रसवः सचिवः ।

राज्ञा सचिवस्तथा पृष्टः क्ष्मातलं प्रविविक्षुरिव[1] क्षोणीतलमवालोकत ।

राजा—पुष्य, समास्तामयं[2], भवानेतद्व्यतिकरं कथयितुमर्हति ।

पुष्यः—स्वामिन्, कुलपालिकात्र प्रगल्भते ।

भूपतिः भट्टिनीमाहूय 'अम्ब, कोऽयं व्यतिकरः' इत्यपृच्छत् । भट्टिनी गतमुदन्तमाख्यत्—काश्यपीश्वरः शैलूष[3] इव हर्षामर्षोत्कर्षस्थामवस्थामनुभवन्निखिलान्तःपुरपुरन्ध्रीजनवन्द्यमानपादपद्मां पद्मां तैस्तैः सतीजनप्रह्लादनवचनैः सम्मानसन्निधानैरलङ्कारदानैश्चोपचर्य, प्रवेश्य च वेदविद्द्विजोह्यमानकर्णीरथारूढां वेश्म[4], पुनः 'अरे निहीन, किमिह नगरे न सन्ति सकललोकसाधारणभोगाः सुभगाः सीमन्तिन्यः, येनैवमाचरः । कथं च दुराचार, एवमाचरन्नात्र विलायं[5] विलीनोऽसि । तदिदानीमेव यदि भवन्तं तृणाङ्कुरमिव तृणेह्मि[6] तदा न बहुकृतमपकृतं स्यात्' इति निर्वैरं निर्भर्त्स्य दुर्नयगरभुजङ्गं कडारपिङ्गं कुट्टिनीमनोरथातिथिसत्रिण[7]मुग्रसेनमन्त्रिणं च निखिलजनसमक्षमाक्रोशनपूर्वकं[8] प्रावासयत्[9] । दुष्प्रवृत्तानङ्गमा-[10]

---

यह उसको जन्म देने वाली पक्षिणी है ।'

राजा—( बहुत देरतक देखकर और स्वरसे पहचान कर ) पुरोहित ! यह किञ्जल्प पक्षी नहीं है, यह तो कडारपिङ्ग है । यह भी पक्षिणी नहीं है किन्तु कुट्टिनी तडिल्लता है ।

पुष्य—स्वामी ! इनको पहचाननेमें मन्त्रीजी बहुत प्रवीण हैं ।

राजाने मन्त्रीसे उन्हें पहचाननेके लिए कहा तो मन्त्री पृथ्वीको देखता रह गया, मानो पृथ्वीमें समा जाना चाहता है ।

राजा—पुष्य ! मन्त्रीको रहने दो, तुम सब समाचार कहो ।

पुष्य—स्वामी ! मेरी पत्नी ही यह काम कर सकनेमें समर्थ है ।

राजाने पद्माको बुलाकर कहा—"माता ! यह क्या मामला है ?" पद्माने सब बीता वृत्तान्त सुना दिया । वृत्तान्त सुनते-सुनते कभी राजा नटकी तरह प्रसन्न होता था और कभी क्रोधसे तमतमा उठता था । सब सुनकर अन्तःपुरकी स्त्रियोंने पद्माके पैर पड़े और राजाने सती स्त्रियोंके योग्य आनन्ददायक वचनोंसे और आदरसूचक वस्त्राभरणके प्रदानसे पद्माको सम्मानित करके पालकीमें बैठाकर उसके घर पहुँचा दिया । फिर कुट्टिनी और कडारपिङ्गका तिरस्कार करते हुए बोला—"अरे नीच ! क्या इस नगरमें वेश्याएँ नहीं हैं जो तूने ऐसा आचरण किया । अरे दुराचारी ! ऐसा करते हुए तू मर क्यों नहीं गया ? अतः यदि इसी समय मैं तुझे तिनके-की तरह नष्ट कर डालूँ तो यह तेरा बहुत अपकार नहीं कहलायेगा ।" इस प्रकार बुरी तरहसे तिरस्कार करके दुराचारी कडारपिङ्गको और कुट्टिनीके साथी उग्रसेन मन्त्रीको सब लोगोंके सामने फटकारते हुए देशसे निर्वासित कर दिया ।

---

१. प्रवेशं कर्तुमिच्छुरिव । २. तिष्ठतु तावदयं मन्त्री । ३. नटाचार्यवत् । ४. गृहम् । ५. विनाशं गत्वा किन्न विनष्टोऽसि । ६. हिनस्मि । ७. यजमानम् । ८. आक्रोश । ९. निर्घाटितः । १०. अनङ्ग एव मातङ्गो यस्य ।

ततः कडारपिङ्गस्तथा प्रजाप्रत्यक्षमाचारितः सुचिरमेतदेनःफलमनुभूय [1]दशमीस्थः सन् श्वभ्रप्रभवभाजनं[2] जनमभजत ।

भवति चात्र श्लोकः—

मन्मथोन्माथितस्वान्तःपरस्त्रीरतिजातधीः ।
कडारपिङ्गः संकल्पान्निपपात रसातले ॥४३१॥

*इत्युपासकाध्ययनेऽब्रह्मफल[3]सारणो नामैकत्रिंशत्तमः कल्पः ।*

ममेदमिति संकल्पो बाह्याभ्यन्तरवस्तुषु ।
[4]परिग्रहो मतस्तत्र कुर्याच्चेतोनिकुञ्चनम् ॥४३२॥
क्षेत्रं[5] धान्यं धनं वास्तु कुप्यं शयनमासनम् ।
द्विपदाः पशवो भाण्डं बाह्या दश परिग्रहाः ॥४३३॥
[6]समिथ्यात्वास्त्रयो वेदा हास्यप्रभृतयोऽपि षट् ।
चत्वारश्च कषायाः स्युरन्तर्ग्रन्थाश्चतुर्दश ॥४३४॥

---

इस प्रकार व्यभिचारके लिए प्रजाके सामने तिरस्कृत होकर कामी कडारपिङ्ग बहुत समय तक इस पापका फल भोगता रहा। फिर मरकर नरकमें चला गया।

इस विषयमें एक श्लोक है, जिसका भाव इस प्रकार है—

'कामसे पीड़ित और परस्त्री सम्भोगके लिए उत्सुक कडारपिङ्ग परस्त्रीगमनके संकल्पसे नरकमें गया।' ॥ ४३१ ॥

*इस प्रकार उपासकाध्ययनमें दुराचारके फलको बतलानेवाला एकतीसवाँ कल्प समाप्त हुआ।*

[ अब परिग्रह परिमाण व्रतको कहते हैं— ]

बाह्य और अभ्यन्तर वस्तुओंमें 'यह मेरी है' इस प्रकारके संकल्पको परिग्रह कहते हैं। उसके विषयमें चित्तवृत्तिको संकुचित करना चाहिए अर्थात् संकल्पको घटाकर परिग्रहका परिमाण करना चाहिए ॥ ४३२ ॥

खेत, अनाज, धन, मकान, ताँबा-पीतल आदि धातु, शय्या, आसन, दास-दासी, पशु और भाजन ये दस बाह्य परिग्रह हैं ॥ ४३३ ॥

मिथ्यात्व, पुरुषवेद, स्त्रीवेद, नपुंसकवेद, हास्य, शोक, रति, अरति, भय, जुगुप्सा, क्रोध, मान, माया और लोभ ये चौदह अन्तरङ्ग परिग्रह हैं ॥ ४३४ ॥

**भावार्थ**—बाह्य वस्तुओंको बाह्य परिग्रह कहते हैं। और आत्माके कर्मजन्य क्रोधादि भावोंको अन्तरंग परिग्रह कहते हैं।

---

१. मृतः। २. स्थानं नारकलोकं श्रित इत्यर्थः। ३. साधारणो मु०। ४. 'मूर्च्छा परिग्रहः ॥ १७ ॥' –तत्त्वा० सू० ७ अ०। 'ममेदमिति सङ्कल्पश्चिदचिन्मिश्रवस्तुषु। ग्रन्थस्तत्कर्शनात्तेषां कर्शनं तत्प्रमाव्रतम् ॥५९॥' –सागारधर्मा०। ५. 'वास्तु क्षेत्रं धनं धान्यं दासी दासं चतुष्पदं भाण्डम्। परिमेयं कर्त्तव्यं सर्वं सन्तोषकुशलेन ॥ ७३ ॥' –अमित० श्रा० ६। ६. 'मिथ्यात्ववेदरागास्तथैव हास्यादयश्च षड् दोषाः। चत्वारश्च कषायाश्चतुर्दशाभ्यन्तरा ग्रन्थाः ॥११६॥' –पुरुषार्थसि०।

अथवा—

चेतनाचेतनासङ्गाद्द्विधा बाह्यपरिग्रहः[1] ।
अन्तः स एक एव स्याद्भवहेत्वाशयाश्रयः[2] ॥४३५॥
धनायाविद्धबुद्धीनामधनाः[3] स्युर्मनोरथाः[4] ।
न ह्यनर्थक्रियारम्भो धीस्तदर्थिषु[5] कामधुक् ॥४३६॥
[6]सहसंभूतिरप्येष देहो यत्र न शाश्वतः ।
द्रव्यदारकदारेषु तत्र काऽऽस्था महात्मनाम् ॥४३७॥
स श्रीमानपि निःश्रीकः स नरश्च नराधमः ।
यो न धर्माय भोगाय विनयेत धनागमम् ॥४३८॥
प्राप्तेऽर्थे ये न माद्यन्ति नाप्राप्ते स्पृहयालवः ।
लोकद्वयश्रितां श्रीणां त एव परमेश्वराः ॥४३९॥
चित्तस्य वित्तचिन्तायां न फलं परमेनसः[7] ।
अस्थाने क्लिश्यमानस्य न हि क्लेशात्परं फलम् ॥४४०॥
अन्तर्बहिर्गते सङ्गे निःसङ्गं यस्य मानसम् ।
सोऽगण्यपुण्यसंपन्नः सर्वत्र सुखमश्नुते ॥४४१॥

अथवा, चेतन और अचेतनके भेदसे बाह्य परिग्रह दो प्रकारका है, और संसारके कारणभूत कर्माशयकी अपेक्षा अन्तरङ्ग परिग्रह एक ही प्रकारका है ॥४३५॥

जो धनकी वाञ्छा करते रहते हैं उनके मनोरथ सफल नहीं होते; क्योंकि वाञ्छा करने मात्रसे इच्छित वस्तुकी प्राप्ति नहीं होती ॥४३६॥

जहाँ साथ पैदा होनेवाला शरीर भी स्थायी नहीं है वहाँ शरीरसे भिन्न धन, स्त्री और पुत्रमें महात्माओंकी आस्था कैसे हो सकती है ? ॥४३७॥

वह मनुष्य धनी होकर भी गरीब है तथा मनुष्य होकर भी मनुष्योंमें नीच है जो धनको न धर्ममें लगाता है और न भोगता है ॥४३८॥

जो धनको पाकर मद नहीं करते और धनके न मिलनेपर उसकी इच्छा नहीं करते वे ही इस लोक और परलोकमें लक्ष्मीके स्वामी होते हैं ॥४३९॥

मनमें धनकी चिन्ता करनेका फल पापके सिवा और कुछ नहीं है। ठीक ही है अस्थानमें क्लेश करनेसे क्लेशके सिवा और क्या फल हो सकता है ॥४४०॥

अन्तरङ्ग और बाह्य परिग्रहमें जिसका मन अनासक्त है वह महान् पुण्यशाली सर्वत्र सुख भोगता है ॥४४१॥

---

१. 'अथ निश्चित्तसचित्तौ बाह्यस्य परिग्रहस्य भेदौ द्वौ ।'–पुरुषार्थसि० ११७ श्लो० । २. –शयश्रयः अ० ज० । संसाराश्रयपरिणामः । ३. निष्फलाः । ४. वांछामात्रा । ५. वांछितप्रदा । ६. 'तिष्ठन्तु बाह्यधनधान्यपुरःसरार्थाः संवर्धिताः प्रचुरलोभवशेन पुंसा । कायोऽपि नश्यति निजोऽयमिति प्रचिन्त्य लोभारिमुग्रमुपहन्ति विरुद्धतत्त्वम् ॥८२॥' –सुभाषितरत्नसंदोह । 'देहोऽयं सह संभूतिः सोऽप्येष नहि शाश्वतः । बाह्यास्तु द्रव्यदारादिपदार्थाः सर्वथा वृथाः ॥११३॥ प्राप्तेऽर्थे न प्रमाद्यन्ति न दूयन्तेऽन्यथा स्थिते ।' –प्रबोधसार । ७. 'पापात् भिन्नं फलं न, किन्तु पापमेव भवति । वित्तार्थचित्तचिन्तायां न फलं परमेनसः । अतीवोद्योगिनोऽस्थाने न हि क्लेशात् परं फलम् ॥६३॥' –धर्मरत्ना० पृ० ९६ ।

बाह्यसङ्गरते पुंसि कुतश्चित्तविशुद्धता ।
सतुषे हि बहिर्धान्ये दुर्लभान्तर्विशुद्धता ॥४४२॥
सत्पात्रविनियोगेन[1] योऽर्थसंग्रहतत्परः ।
लुब्धेषु स परं लुब्धः सहामुत्र धनं नयन् ॥४४३॥
कृतप्रमाणाल्लोभेन धनादधिकसंग्रहः ।
पञ्चमाणुव्रतज्यानिं[2] करोति गृहमेधिनाम् ॥४४४॥
यस्य [3]द्वन्द्वद्वयेऽप्यस्मिन्निस्पृहं देहिनो मनः ।
स्वर्गापवर्गलक्ष्मीणां क्षणात्पदे स दक्षते ॥४४५॥
अत्यर्थमर्थकाङ्क्षायामवश्यं जायते नृणाम् ।
अघसंघचितं चेतः संसारावर्तवर्तगम् ॥४४६॥

श्रूयतामत्र परिग्रहाग्रहस्योपाख्यानम्—पञ्चालदेशेषु त्रिदशनिवेशानुकूलोपशल्ये[4] काम्पिल्ये निजमतिमाहात्म्यापहसितामराचार्यप्रतिभो[5] रत्नप्रभो नाम नृपतिः । आत्मीय-

जो पुरुष बाह्य परिग्रहमें आसक्त है उसका मन कैसे विशुद्ध रह सकता है ? ठीक ही है, जो धान्य तुष—छिलके सहित है उसके भीतरी भागका स्वच्छ पाया जाना दुर्लभ है ॥४४२॥

**भावार्थ**—जब धानको कूटकर उसका छिलका अलग कर दिया जाता है तभी साफ चावल निकलता है । छिलकेके रहते हुए उसके अन्दरका चावल भी लाल ही रहता है । वैसे ही बाह्य परिग्रहमें आसक्त रहते हुए मनुष्यका मन स्वच्छ नहीं होता ।

जो सत्पात्रको दान देकर धनका संग्रह करनेमें तत्पर है, वह उस धनको परलोकमें अपने साथ ले जाता है । अतः वह लोभियोंमें परम लोभी है ॥४४३॥

**भावार्थ**—जो अपने धनको सत्पात्रोंके लिए खर्च करता है वह असीम पुण्यका बन्ध करता है और उस पुण्यको, जो धन-प्राप्तिका मूल कारण है, वह अपने साथ परलोकमें ले जाता है । उसके प्रभावसे उसे उस जन्ममें भी धनका लाभ होता है । अतः ऐसा आदमी ही सच्चा धनका लोभी है । किन्तु जो धनको ही समेटकर रखता है—न उसे भोगता है और न किसीको देता है वह तो उसे यहीं छोड़ जाता है । अतः सत्पात्रमें धनको खरचना ही उत्तम है । और पुण्यरूपी धन ही सच्चा धन है ।

जितने धनका प्रमाण किया है, लोभमें आकर उससे अधिकका संचय करना गृहस्थोंके परिग्रह परिमाणव्रतको हानि पहुँचाता है । अर्थात् यह उस व्रतका अतिचार है ॥४४४॥

जिस प्राणीका मन अन्तरङ्ग और बहिरङ्ग परिग्रहमें निस्पृह है वह क्षण-भरमें स्वर्ग और मोक्षकी लक्ष्मीका स्वामी बन जाता है ॥४४५॥

धनकी बहुत अधिक तृष्णा होनेपर मनुष्योंका मन पापके भारसे दबकर संसाररूपी भँवरके गड्ढेमें चला जाता है ॥४४६॥

अब परिग्रहकी तृष्णाके सम्बन्धमें एक कथा कहते हैं, उसे सुनें—

### १७. लोभी पिण्याकगंधकी कथा

पञ्चाल देशमें कम्पिला नामकी नगरी है, वहाँ रत्नप्रभ राजा राज्य करता था । उसकी

१. दानयोगेन । २. हानिम् । 'कृत····यो धनाधिक्यसंग्रहः'–धर्मर०, प० ९५ उ० । 'कृत····धनाद्यधिक्संग्रहः । पञ्चमाणुव्रतहानि····।'–सागारधर्मा० पृ० १६४से उद्धृत । ३. परिग्रहे । ४. समीपे । ५. बृहस्पतिबुद्धिः ।

कपोलकान्तिविजितामृतमरीचिमण्डला मणिकुण्डला नामास्य महादेवी। कुलक्रमागतात्मोपार्जितामितवित्तः सागरदत्तो नाम श्रेष्ठी। गृहस्य श्रीरिव धनश्रीर्नामास्य भार्या। सूनुरनयोर्न्याय्यार्थोपार्जनैकचित्तः सुदत्तो नाम। स महालोभविभावसुज्वलच्चित्तभित्तः सागरदत्तः पुरुषपरम्परायातायाः काञ्चनकोटेरेकस्याः स्वयमुपार्जितार्धकोटेः पतिर्भवन्नपि शालीयादिभक्तभोजने छितयतुषापनीतिर्धावनाश्चाव्रणकृतिश्च, शाकपाकविधाने [1]संभारादिकृतिः प्रसभा[2]भ्यवहृतिश्च, घार्तपूरपूरिमावेष्टिमादिभक्षोपक्षेपे महती स्नेहापहृतिरिन्धनविरतिश्च दुग्धदधिघोलरसाद्युपयोगे न विक्रयाय घृतं न च तक्रं [3]कडङ्करायेति च मन्यमानः स्वयमेव प्रतिदिवसवृद्धिग्रहणाय[4] [5]ध्वजलोकपाटके विहरमाणः [6]प्रतिपितृप्रियन्त्रमुपसृत्य 'आः, सुरभिः खल्वेष खलः संजातः' इति सस्मेरं व्याहरन्, गृहीतपिण्डखण्डः[7] प्रत्यवसानसमये[8] तद्गन्धमाजिघ्रन्सन्, सर्वलोकपरिहृतमनवधि[9]कालोषितमतिसमर्घतां[10] गतमकण्डितमेव[11] च स्थालीविलीयं भवति [12]तत्केवलावन्तिसोमसहायमाहरति। अत एवास्य[13] महामोहानुबन्धस्य पिण्याकगन्ध इति जगति नाम पप्रथे। 'मुखामोदमात्रेण च प्रयोजनम्। तदलं ताम्बूलार्थमर्थव्ययेन' इति विचिन्त्य विष्णुतरुत्वचः[14] [15]कालवल्लीदलोत्तरास्वादरुचः कवलयति। 'अर्धघ्राणोदरः[16] परिवारः कदाचिदपि देहे हृदये वा न मनागपि

पटरानी मणिकुण्डला थी। नगरसेठ सागरदत्त था। उसके पास बहुत धन था। नगरसेठकी पत्नीका नाम धनश्री था। उनके सुदत्त नामका पुत्र था वह सदा न्यायपूर्वक ही धन कमाता था।

महालोभी सागरदत्त यद्यपि वंश-परम्परासे प्राप्त एक करोड़ स्वर्णमुद्राओंका और स्वयं उपार्जित आधे करोड़ स्वर्णमुद्राओंका स्वामी था, फिर भी वह सोचता था कि यदि चावलका भात खाया जाये तो उसके छिलके दूर करने होंगे और धोने-धानेमें भी कुछ कमी अवश्य होगी, यदि शाक पकाया जाये तो मसाला वगैरह खर्च होगा और उसके साथमें अधिक अन्न खाया जायेगा, घेवर, पूरी वगैरह व्यञ्जनोंके बनानेमें घी खर्च होगा और ईंधन भी ज्यादा जलेगा, दूध, दही आदि रसोंका सेवन करनेसे न बेचनेके लिए घी रहेगा और न भूसीके लिए मठा बचेगा। अतः जब वह प्रतिदिन व्याज वसूल करनेके लिए जाता तो तेलियोंमें घूमते-घूमते उनके कोल्हूके पास जाकर जरा हँसकर कहता 'वाह यह तो खूब खुशबूदार है' और ऐसा कहकर तेलकी खलका एक टुकड़ा उठा लेता। जब भोजनका समय होता तो उस खलकी गन्धको सूँघता जाता और जिसे कोई भी नहीं खा सकता ऐसे बहुत पुराने और कम कीमती धानको बिना ही कूटे-काटे काँजीके साथ खा जाता। इसीसे सर्वत्र उस लोभीका नाम 'पिण्याकगन्ध' प्रसिद्ध हो गया था।

'मुखको सुगन्धित करने मात्रसे ही तो प्रयोजन है, अतः पानमें धन खर्च करना व्यर्थ है' ऐसा सोचकर वह पीपलके वृक्षकी छालको तमाखूके पत्तेके साथ खाता था उसके खानेसे भोजनसे भी अरुचि हो जाती थी।

आधे पेट खानेसे न शरीरमें कोई विकार उत्पन्न होता है और न मनमें, ऐसा सोचकर वह

१. मरिचादीनां व्ययः। २. प्रचुरान्नस्य भुक्तिः। ३. धान्यत्वग्निमित्तम्। ४. व्याज। ५. तिलंतुद। ६. तिलपील्लनभाण्डम्। ७. खलः। ८. भोजनवेलायाम्। ९. अतिजीर्णम्। १०. स्वल्पमूल्यम्। ११. खण्डनरहितम्। १२. काञ्जिकेन सह। १३. सागरदत्तस्य। १४. पिप्पलछल्ली। १५. वाक्चोपत्र। पत्राणां पश्चाद् भोजने न रुक्रुचिर्यासां विष्णुतरुत्वचां ताः। १६. अर्धाहारेण।

विकुरुते' इति मत्वा न कमप्यूर्धपूरं पूरयति। प्रतिचारकांश्चैवं शिक्षयति—'न तैलार्थं लवणार्थं वित्तं व्ययितव्यम्, किं तु कार्षापणं मापं चादाय आपणमुपढौक्य तदुभयं गृहीत्वा पुनरिदं साधु न भवतीति प्रतिसमर्पयंस्तत्र मापे किञ्चिल्लग्नमायाति तेन शारीरो विधिर्विधातव्यः।' परिजनार्भकान्स्वकीयांश्चैवमुपजपति—'न भवद्भिरङ्गाभ्यङ्गार्थं भवनमुपद्रोतव्यम्, किं तु सस्नेहदेहैः [1]प्रातिवेश्मिकशिशुसंदोहैः सहातिसंबाधं योद्धव्यम्। अतो भवतामनुपायसंनिधिः स्नानविधिः। क्षपायां च प्रतिवेशवेश्मप्रदीपप्रभाप्रज्वलितेन वली[2]कान्तावलम्बितेन [3]काचमुकुरेण गृहाङ्गणे प्रदीपकार्यं [4]निकाय्यमध्ये च सणसरण्डप्रोतै[5]र्विषमरुचिदीप्तैरुरुबूकबीजैः करोति। सकलजनसाधारणाश्च नवीनसक्ता एव [7]युगाः सपरिच्छदः परिदधाति। मनाग्मलीमसरागाश्च विक्रीणीते। ततोऽस्य [8]वसनधावनार्थमपि न कपर्दकोपक्षयः। [9]पर्वाणि च पुराणपल्लवकचवरापनयनके[10]णोत्करेणातपतप्तसंघाटस्नेहद्रवेण गुडगोणीक्षालनकषायेण च मिवर्तयति। प्रत्यामन्त्रणेन द्रविणव्ययात्परागार[11]भोजनावलोकनेनाश्रितजनमनोविनाशभयाच्चामन्त्रितो न कस्यापि निकेतने [12]प्साति।

एवमतीवतर्षोत्कर्षरसहायें सकलकदर्याचार्ये तस्मिञ्जीवत्यपि मृतकल्पमनसि वसति

---

अपने कुटुम्बको कभी भी भर पेट भोजन नहीं करने देता था। वह अपने नौकरोंको शिक्षा देता था कि 'तेल और नमकके लिए पैसा नहीं खर्च करना चाहिए, किन्तु पैसा और बर्तन लेकर दुकान पर जाना चाहिए और दोनों चीजें लेकर फिर यह कहकर लौटा देना चाहिए कि ये अच्छी नहीं हैं। ऐसा करनेसे बर्तनमें कुछ तेल और नमक लगा रह जाता है, उसीसे अपना काम चलाना चाहिए।' अपने और अपने कुटुम्बके बच्चोंसे वह कहता था कि 'तुम्हें शरीरमें तेल लगानेके लिए घरमें ऊधम नहीं मचाना चाहिए किन्तु पड़ोसियोंके तेल लगाये हुए बच्चोंके साथ खूब भिड़कर लड़ना चाहिए। इससे बिना प्रयत्नके ही तुम्हारे स्नानकी विधि बन जायेगी।'

उसने अपने घरकी छत पर एक दर्पण टाँग रखा था। रात्रिमें जब सामनेके घरमें दीपक जलता था तो उसका प्रकाश दर्पणमें प्रतिबिम्बित होकर घरके आगनमें पड़ता था। और उससे दीपकका काम निकल जाता था। तथा घरके अन्दर एरण्डके बीजोंको सड़ेरेकी लकड़ीमें पिरोकर और उन्हें आगसे जलाकर दीपकका काम लेता था। जन साधारणके पहनने योग्य कोरे वस्त्र ही वह पहनता था। और जैसे ही वह मैले होते थे उन्हें बेच डालता था। इस तरह कपड़े धोनेमें उसकी एक कौड़ी भी खर्च नहीं होती थी। पुराने पल्लवोंको कूट कर उसमेंसे रेसे निकाल देता था। घाममें संघाट (?) को सुखानेसे उसमेंसे तेल निकल आता था और गुड़के बोरोंको धोकर उनमेंसे मीठा निकाल लेता था। और इन सबसे तीज त्योहारका काम चलाता था। बदलेमें दूसरोंका निमन्त्रण करनेसे धन खर्च होगा, तथा दूसरोंके घरका भोजन देखनेसे मेरे आश्रित जनोंके मन मुझसे टूट जायेंगे इस भयसे निमन्त्रण आनेपर भी वह किसीके घर नहीं जीमता था। इस प्रकार वह तृष्णालु और सब कंजूसोंका सिरमौर जीते हुए भी मुर्देकी तरह जीवन व्यतीत करता था।

---

१. पड़ोसी। २. गृहस्योपरितनभागे। ३. दर्पणेन। ४. गृहमध्ये। ५. अग्नि। ६. एरण्ड। ७. कोरावस्त्र। ८. वस्त्रप्रक्षालनार्थम्। ९. दीपोत्सवादि। १०. करणो– अ० ज० मु०। ११. अन्यलोकगृहे भोजनं यदि एभिर्दृष्टं तदा मद्गृहे एते न स्थास्यन्तीति भयात्। १२. भुंक्ते।

सति एकदा स लक्ष्मीकमलिनीपरिमिलनकलभो रत्नप्रभो राजसिन्धुरप्रधावसन्दर्शनप्रासाद-संपादनाय श्रवणाश्रयवृत्तस्य[2] ब्रह्मदत्तस्य महीपतेः कालेन स्थण्डिलतालुतावकाशे भवनप्रदेशे भूशोधनं विधापयन्नेतदास्थानमण्डपाभोगबन्धजुषः प्रकामोषरदोषकलुषवपुषः संपूर्णविस्ता-[3]रपुषः [4]प्रथिमगुणविशिष्टकाः सुवर्णेष्टकाः समालोक्य बहिर्निकामं कलङ्कमलिनत्वादितरेष्ट-काविशिष्टत्वमाकलयन् 'एताः खलु चैत्यालयनिर्माणाय योग्याः' इति चेतसैकत्र स्तूपता-मानाययामास।

अत्रान्तरे समस्तमितंपचपुरोगमसगन्धः पिण्याकगन्धः सरभसमापतन्तामिष्टकावहतां [7]वैवधिकनिवहानां [8]सायंसमये मार्गविषये पतितामेकामिष्टकामवाप्य [9]चलनक्षालनदेशे न्यधात्। तत्र च [10]प्रतिघस्रमङ्घ्रिसंघर्षादशेषकालुष्यमोषे[11] भर्मनिर्मितत्वमवेत्य तैस्तैः प्रलोभनवस्तुभिः काचवहानां विहितोपचारस्ताः[12] संगृह्णन् श्रुतस्व[13]स्रीयापायोदन्तः स्फा-[14]यमानमनोमन्युकृतान्तः[15] पिण्याकगन्धः 'पुत्र, निखिलकलावदातचित्त सुदत्त, भवत्पितृ-स्वसुः सुतशोकशंकुशमनाय मयावश्यं तत्र गन्तव्यमपस्नातव्यं[16] च। ततस्त्वयाप्येताः परि-[17]स्कन्दलोकप्रलोभनेन साधु संग्रहीतव्याः' इत्युपह्वरे[18] व्याहृत्य सकलजगद्व्यवहारावतार-त्रिवेणीं काकन्द्यां तोकशोकभूयिष्ठायास्तूर्णं कनिष्ठाया दर्शनार्थमगच्छत्। असद्व्यवहार[19]-

एक बार राजा रत्नप्रभने हाथीकी दौड़ देखनेके लिए एक महल बनवानेका विचार किया और उसके लिए स्वर्गीय राजा ब्रह्मदत्तके महलके खण्डहरोंवाले प्रदेशको चुना। जब उन खण्डहरों को ढवाया गया तो उसके सभामण्डपसे बहुत-सी बड़ी-बड़ी सोनेकी ईंटे निकलीं। किन्तु वे बहुत दिनोंसे मिट्टीमें दबी रहनेके कारण एक दम काली पड़ गयी थीं। अतः उन्हें भी अन्य पुरानी ईंटोंकी तरह साधारण ईंट मानकर और वह सोचकर कि ये चैत्यालय बनवानेके लायक हैं एक जगह उनका ढेर लगवा दिया।

इसी बीचमें लुब्धक शिरोमणि पिण्याकगन्ध संध्याके समय उधर गया। जल्दी-जल्दी ईंटे ढोने वालोंसे मार्गमें एक ईंट गिर पड़ी वह उसे उठा लाया और लाकर पैर धोनेके स्थानपर उसे डाल दिया। प्रतिदिन पैरोंकी रगड़से उसकी कलौसी जाती रही। तब उसे मालूम हुआ कि यह तो सोनेकी ईंट है। फिर तो वह ईंटें ढोने वालोंको तरह-तरहका लालच देकर ईंटे इकट्ठी करने लगा।

एक दिन पिण्याकगन्धने अपने भानेजकी मृत्युका समाचार सुना। उसे बड़ा रंज हुआ। पुत्रको बुलाकर कहा—"पुत्र सुदत्त! तुम्हारी बुआके पुत्र-शोकको शान्त करनेके लिए मुझे अवश्य जाना है और मृतक स्नान भी करना है। अतः तुम भी बोझा ढोने वालोंको लालच देकर सोनेकी ईंटें संग्रह करते रहना।" इस तरह एकान्तमें पुत्रको समझाकर पिण्याकगन्ध शीघ्र ही अपनी छोटी बहनसे मिलनेके लिए काकन्दीकी ओर चला गया।

---

१. –प्रवाधाव– अ० ज० मु०। २. मृतस्य। ३. विस्तारं पुष्णाति याः। ४. पृथु। ५. सदृशः। ६. आगच्छताम्। ७. वार्तावहो वैवधिकः, विवधो भारः पर्याहारो वा तं वहतीति वैवधिकः। ८. सन्ध्यायाम्। ९. पादधावन। १०. प्रतिदिनम्। ११. विनाशे सति। १२. इष्टकाः। १३. भागिनेयमरण। १४. वृद्धि जायमान। १५. शोकयमः। १६. मृतकस्नानं कर्तव्यम्। १७. कावटिक। १८. एकान्ते। १९. अन्याय-पराङ्मुखः।

व्यावृत्तः सुदत्तः तातोपदेशमनभिधेयकमवस्यन्[1] यतो राजपरिगृहीततृणमपि गृहीतं काञ्चनीभवति संपद्यते च पूर्वोपार्जितस्याप्यर्थस्यापहाराय प्राणसंहाराय चेति जातमतिर्नैकामपीष्टकां समग्रहीत् ।

महालोभलोलतान्धः पिण्याकगन्धस्तस्याः पुरोऽपस्नाया[2]गतः सुतमप्राक्षीत्—'वत्स, कियतीः खलु त्वमिष्टकाततीः पर्यग्रहीः ?'

स्तेययोगविनिवृत्तः सुदत्तः—'तात, नैकामपि ।'

प्रादुर्भवद्दीर्घदुर्गतिदुरितबन्धः पिण्याकगन्धः समर्थे सदाचारकृतार्थे पुण्यभाजि तुजि परमुत्तरमपश्यन्, 'यदीमौ क्रमौ परिक्रमणक्षमौ मम नाभविष्यतां तदा कथंकारमहं मन्मनोरथवन्ध्यां काकन्दीमगमिष्यम्[3] । अत एतावेवात्र[4] श्रीविरामावद्धौ द्रोहौ' इति विचिन्त्योद्वर्तनं वर्तयन्त्याः स्ववासिन्याः करादाक्षिप्त[5]शरीरेण शिलापुत्रकेण तौ अजर्जरितावजीजनत् । एतच्च वैदेहकाच्च[6]जनपरिजनात्प्राचीनबर्हिनिभः[7] क्षितिरमणीकरिणीशः रत्नप्रभः श्रुत्वा वासीचक्रेण शिल्पिभिर्विघाटितेष्टकातक्षणः सुवर्णत्वं निर्णीय विहितसर्वस्वापहारं सनिकारं नगरजनोच्चार्यमाणदुरपवादप्रबन्धं पिण्याकगन्धं निरवासयत्[9] । 'इन्द्रयमस्थानं हि गुणदोषयोर्महीपतयः' इति नीतिवाक्यमनुस्मृत्य मूलधनप्रदानेनान्वयागतनिवासनिवेदनेन[10] च परद्रव्यादाननिवृत्तं सुदत्तं साधु समाश्वासयत् । स तथा निर्वासितः सञ्जातनरकनिषेकनिबन्धः कृतप्रका-

---

सुदत्त बुरे कामोंसे बचता था । उसे अपने पिताका उपदेश अहितकर प्रतीत हुआ । उसने विचारा कि राजाका तृण भी सोना हो जाता है और उसके लेनेसे पहलेका सञ्चित धन भी हर लिया जाता है और प्राण भी चले जाते हैं । अतः उसने एक भी ईंट नहीं ली ।

महालोभी पिण्याकगन्ध मृतक स्नान करके लौटा तो उसने पुत्रसे पूछा—'बेटा ! तुमने कितनी ईंटें ली हैं ?'

चोरीके त्यागी सुदत्तने उत्तर दिया—"पिता जी ! एक भी नहीं ।"

घोर दुर्गतिके कारण पापका बन्ध करनेवाले पिण्याकगन्धको अपने सदाचारी पुण्यशाली पुत्रकी बात सुनकर कोई उत्तर नहीं सूझा ।

तब "यदि मेरे ये दोनों पैर चलनेके लायक न होते तो मैं अपने मनोरथकी घातक काकन्दीको कैसे जाता । इसलिए ये दोनों ही लक्ष्मी समागमके शत्रु हैं ।" ऐसा सोचकर उसने उबटन पीसती हुई अपनी पत्नीके हाथसे लोढ़ा लेकर अपने पैर तोड़ डाले । राजा रत्नप्रभने उसके आदमियोंसे यह बात सुनकर शिल्पियोंसे उन ईंटोंको तुड़वाया तो वे सोनेकी निकलीं । उसने तुरन्त ही पिण्याकगन्धका सर्वस्व लुटवा लिया और उसे बेइज्जत करके देश निकाला दे दिया ।

"राजा लोग गुणवान्के लिए इन्द्र हैं और दोषीके लिए यमराज हैं ।" इस नीतिके अनुसार राजा रत्नप्रभने पराये धनको न लेनेके कारण सुदत्तको उसका मूल धन और वंशपरम्परागत निवास स्थान देकर धीरज बँधाया ।

---

१. संसारकारणं जानन् । २. मृतकस्नानं कृत्वा । ३. केन प्रकारेण । ४. पादौ । ५. गृहीत । ६. वणिक् । ७. इन्द्रसमानः । ८. कारित । ९. निर्घाटितवान् । १०. वंशागत-आवासानुमतेन ।

मलोभसम्बन्धश्चिरायोपार्जितदुरन्तदुष्कर्मस्कन्धः पिण्याकगन्धः प्रेत्य पातालमगात् ।

भवति चात्र श्लोकः—

षष्ठ्याः क्षितेस्तृतीयेऽस्मिन्लल्लके दुःखमल्लके ।
पेते पिण्याकगन्धेन धनायाविद्धचेतसा ॥४४७॥

*इत्युपासकाध्ययने परिग्रहाग्रहफलफुल्लनो नाम द्वात्रिंशः कल्पः ।*

[1]दिग्देशानर्थदण्डानां विरतिस्त्रितयाश्रयम् ।
गुणव्रतत्रयं सद्भिः सागारयतिषु स्मृतम् ॥४४८॥
दिक्षु[2] सर्वास्वधःप्रोर्ध्वदेशेषु निखिलेषु च ।
एतस्यां दिशि देशेऽस्मिन्नियत्येवं गतिर्मम ॥४४९॥
[3]दिग्देशनियमादेवं ततो बाह्येषु वस्तुषु ।
हिंसालोभोपभोगादिनिवृत्तेश्चित्तयन्त्रणा ॥४५०॥
रक्षन्निदं प्रयत्नेन गुणव्रतत्रयं गृही ।

---

देशसे निकाला जाकर पिण्याक गन्ध अत्यन्त लोभवश नरकायुका बन्ध तथा चिरकालके लिए अत्यन्त दुखदायी कर्मोंका बन्ध करनेके कारण मरकर नरकमें गया ।

इसके विषयमें एक श्लोक है जिसका भाव इस प्रकार है—

'धनका भूखा पिण्याक गंध मरकर छठे नरकके लल्लक नामके तीसरे पाथड़ेमें गया ॥४४७॥

*इस प्रकार परिग्रहकी आसक्तिका फल बतलानेवाला बत्तीसवाँ कल्प समाप्त हुआ ।*

[ अब गुणव्रतोंका वर्णन करते हैं— ]

महापुरुषोंने दिग्विरति, देशविरति और अनर्थदण्ड विरतिके भेदसे गृहस्थ व्रतियोंके तीन गुणव्रत बतलाये हैं ॥ ४४८॥

## दिग्विरति और देशविरति व्रतोंका स्वरूप

"अमुक-अमुक दिशामें मैं अमुक-अमुक स्थान तक ही जाऊँगा" इस प्रकार जन्म पर्यन्तके लिए जो सब दिशाओंमें और ऊपर तथा नीचे जानेकी मर्यादा की जाती है उसे दिग्विरतिव्रत कहते हैं । और ( दिगविरतिके भीतर कुछ समयके लिए ) जो मर्यादा की जाती है कि मैं अमुक अमुक दिशामें देश तक ही जाऊँगा, उसे देशविरति व्रत कहते हैं ॥ ४४९ ॥

## इन व्रतोंसे लाभ

इस प्रकार दिशाओंका और देशका नियमकर लेनेसे उससे बाहरकी वस्तुओंमें लोभ, उपभोग और हिंसा वगैरहके भाव नहीं होते हैं और उसके न होनेसे चित्त संयत होता है ॥४५०॥ जो गृहस्थ प्रयत्न करके इन तीन गुणव्रतोंका पालन करता है वह जहाँ-जहाँ जन्म

---

१. 'दिग्देशानर्थदण्डविरति····' । तत्त्वा० सू० ७-२१ । २. 'दिग्वलयं परिगणितं कृत्वातोऽहं बहिर्न यास्यामि । इति संकल्पो दिग्व्रतमामृत्यणुपापविनिवृत्त्यै ॥ ६८ ॥' –रत्नकरण्डश्रा० । 'ऊर्ध्वाधो दिग्विदिक्स्थानं कृत्वा यत्परिमाणतः । पुनराक्रम्यते नैव प्रथमं तद् गुणव्रतम् ॥११७॥ –वराङ्गचरित । पुरुषार्थसि० श्लोक १३७ । अमित० श्रा० ६-७६ । ३. 'अवधेर्वहिरणुपापप्रतिविरतेर्दिग्व्रतानि धारयताम् । पञ्चमहाव्रतपरिणतिमणुव्रतानि प्रपद्यन्ते ॥ ७० ॥ –रत्नकरण्डश्रा० । पुरुषार्थसि० १३८ श्लो० । –अमितगति श्रा० श्लोक ६-७७ ।

आज्ञैश्वर्यं लभेतैव यत्र यत्रोपजायते ॥४५१॥

आशा[1]देशप्रमाणस्य गृहीतस्य व्यतिक्रमात् ।
देशव्रती प्रजायेत प्रायश्चित्तसमाश्रयः ॥४५२॥

शिखण्डि[2]कुक्कुटश्येनबिडालव्यालबभ्रवः ।
विषकण्टक[3]शस्त्राग्निकषापाशकरज्जवः ॥४५३॥

पापाख्या[4]नाशुभाध्यानहिंसाक्रीडावृथा[5]क्रियाः ।
परोपतापपैशून्यशोकाक्रन्दनकारिता ॥४५४॥

वधबन्धनसंरोधहेतवोऽन्येऽपि चेदृशाः ।
भवन्त्यनर्थदण्डाख्याः संपराय[6]प्रवर्धनात् ॥४५५॥

पोषणं क्रूरसत्त्वानां हिंसोपकरणक्रियाम् ।
देशव्रती न कुर्वीत स्वकीयाचारचारुधीः ॥४५६॥

अनर्थदण्डनिर्मोक्षादवश्यं देशतो यतिः ।
सुहृ[7]त्तां सर्वभूतेषु स्वामित्वं च प्रपद्यते ॥४५७॥

वञ्चनारम्भहिंसानामुपदेशात्प्रवर्तनम् ।

लेता है वहीं-वहीं उसे ऐश्वर्य और हुकूमत मिलती है ॥ ४५१ ॥

दिशा और देशके किये हुए प्रमाणका उल्लंघन करनेसे अर्थात् उससे बाहर चले जानेसे दिग्व्रती और देशव्रतीको प्रायश्चित्त लेना पड़ता है ॥ ४५२ ॥

[ अब तीसरे अनर्थदण्डविरति व्रतको कहते हैं— ]

## अनर्थदण्डविरति व्रतका स्वरूप

मोर, मुर्गा, बाज, बिलाव, साँप, नेवला आदि हिंसक जन्तुओंका पालना, विष, काँटा, शस्त्र, आग, कोड़ा, जाल, रस्सा वगैरह हिंसाके साधनोंको दूसरोंको देना, पापका उपदेश देना, आर्त और रौद्र ध्यानका करना, हिंसामयी खेल खेलना, व्यर्थ इधर-उधर भटकना, दूसरोंको कष्ट पहुँचाना, चुगली करना, रंज करना, रोना, अन्य भी इस प्रकारके जो दूसरोंके घातमें बाँधनेमें और दूसरोंको रोक रखनेमें कारण हैं उन्हें अनर्थदण्ड कहते हैं; क्योंकि उनसे संसारकी वृद्धि होती है—बहुत समय तक संसारमें भटकना पड़ता है ॥ ४५३-४५५ ॥

अपने आचारका पालन करनेमें दक्ष देशव्रती श्रावकको हिंसक प्राणियोंका पोषण तथा हिंसाके उपकरणोंका दान नहीं करना चाहिए ॥ ४५६ ॥ ऊपर बतलाये हुए अनर्थदण्डोंको छोड़नेसे अणुव्रती श्रावक सब प्राणियोंका मित्र और स्वामी बन जाता है ॥ ४५७ ॥ उपदेशसे ठगी, आरम्भ, और हिंसाका प्रवर्तन करना, शक्तिसे अधिक बोझा लादना और दूसरोंको अधिक कष्ट देना आदि

---

१. दिशा । २. 'मण्डलबिडालकुक्कुटमयूरशुकसारिकादयो जीवाः। हितकामैर्न ग्राह्याः सर्वे पापोकारपराः ॥८२॥ –अमितगति० ६-८१ । ३. 'विषकण्टकशस्त्राग्निरज्जुकशादण्डादि हिंसोपकरणप्रदानं हिंसाप्रदानम् । –सर्वार्थसि० ७-२२ । 'दण्डपाशबिडालाश्च विषशस्त्राग्निरज्जवः । परेभ्यो नैव देयास्ते स्वपराघातहेतवः । छेदं भेदवधौ बन्धगुरुभारातिरोपणम् । न कारयति योऽन्येषु तृतीयं तद्गुणव्रतम् ।' –वरांगचरित, १५, ११९-१२० । ४. 'पार्द्धिजयपराजयसंगरपरदारगमनचौर्याद्याः । न कदाचनापि चिन्त्याः पापफलं केवलं यस्मात् ।' –पुरुषार्थसिद्धि० ॥१४१॥ ५. निष्प्रयोजनं भूखननादि । ६. संसार । ७. मैत्रीम् ।

भाराधिक्याधिकक्लेशौ तृतीयगुणहानये ॥४५८॥

*इत्युपासकाध्ययने गुणव्रतत्रयसूत्रणो नाम त्रयस्त्रिंशत्तमः कल्पः ।

आदौ सामायिकं कर्म प्रोषधोपासनक्रिया ।
सेव्यार्थनियमो[1] दानं शिक्षाव्रतचतुष्टयम् ॥४५९॥
आप्तसेवोपदेशः स्यात्समयः समयार्थिनाम् ।
नियुक्तं तत्र यत्कर्म तत्सामायिकमूचिरे[2] ॥४६०॥
आप्तस्यासन्निधानेऽपि पुण्यायाकृतिपूजनम्[3] ।
तार्क्ष्य[4]मुद्रा न किं कुर्याद्विषसामर्थ्यसूदनम्[5] ॥४६१॥

कर्म अनर्थदण्डव्रतको हानि पहुँचाते हैं, अर्थात् इस प्रकारके कामोंके करनेसे अनर्थदण्डव्रतमें दोष लगता है अतः ऐसे काम अणुव्रती श्रावकको नहीं करना चाहिए ॥ ४५८ ॥

**भावार्थ**—मन, वचन और कायको दण्ड कहते हैं। और बिना प्रयोजनके उनकी प्रवृत्ति करनेको अनर्थदण्ड कहते हैं। तथा उसको रोकनेको अनर्थदण्डव्रत कहते हैं। अणुव्रती श्रावकको देशकी मर्यादाके अन्दर भी मनसे, वचनसे और कायसे इस प्रकारके काम नहीं करना चाहिए जो दूसरोंको कष्ट पहुँचाते हों। मनमें किसीका बुरा नहीं विचारना चाहिए। वचनसे जालसाजीका, जीवोंको कष्ट पहुँचानेवाले व्यापारका उपदेश नहीं देना चाहिए और शरीरसे ऐसी चीजें दूसरोंको नहीं देनी चाहिए जिससे दूसरोंका घात किया जा सके या दूसरोंको कष्ट पहुँचाया जा सके। तथा स्वयं भी किसीको कष्ट नही पहुँचाना चाहिए। ऐसा करनेसे मनुष्य बहुतसे व्यर्थके पापोंसे बच जाता है और सब उसे अपना मित्र और रक्षक समझने लगते हैं ॥

*इस प्रकार उपासकाध्ययनमें तीन गुणव्रतोंका कथन करनेवाला तैंतीसवाँ कल्प समाप्त हुआ।*

[ अब *शिक्षाव्रतोंको कहते हैं*— ]

सामायिक, प्रोषधोपवास, भोगोपभोग परिमाण और दान ये चार शिक्षाव्रत हैं ॥४५९॥

## सामायिक व्रतका स्वरूप

जिनेन्द्र भगवान्की पूजा करनेका जो उपदेश है उसे समय कहते हैं और उसमें उसके इच्छुकजनोंके जो-जो काम बतलाये गये हैं उन्हें सामायिक कहते हैं ॥४६०॥

## मूर्तिपूजाका विधान

जिनेन्द्र भगवान्के अभावमें उनकी प्रतिमाका पूजन करनेसे भी पुण्यबन्ध होता है। क्या गरुड़ मुद्रा विषकी शक्तिको दूर नहीं करती ? ॥ ४६१ ॥

---

* अत्र यशस्तिलकचम्पूकाव्यस्य सप्तम आश्वासः समाप्यते; यथा—"इति सकलतार्किकलोकचूडामणेः श्रीमन्नेमिदेवभगवतः शिष्येण सद्योनवद्यगद्यपद्यविद्याधरचक्रवर्तिशिखण्डमण्डिनीभवच्चरणकमलेन श्रीसोमदेवसूरिणा विरचिते यशोधरमहाराजचरिते यशस्तिलकापरनाम्नि महाकाव्ये सच्चरित्रचिन्तामणिर्नाम सप्तम आश्वासः।

१. भोगोपभोगसंख्या। २. 'आ समयमुक्तिमुक्तं पञ्चाधानामशेषभावेन। सर्वत्र च सामयिकाः सामयिकं नाम शंसन्ति ॥९७॥"—रत्नकरण्ड श्रा०। 'समता सर्वभूतेषु संयमः शुभभावनाः। आर्त रौद्र-परित्यागस्तद्धि सामायिकं व्रतम् ॥१२२॥—वराङ्गचरित १५ सर्ग। 'रागद्वेषत्यागान्निखिलद्रव्येषु साम्य-मवलम्ब्य। तत्त्वोपलब्धिमूलं बहुशः सामायिकं कार्यम् ॥१४८॥"—पुरुषार्थ०। अमितग० श्रा० ६-८६। पद्मनन्दिपञ्चविंश० पृ० १९२। ३. 'तीर्थेशासन्निधानेऽपि प्रतिमा धर्महेतवे। वैनतेयस्य मुद्राऽपि विषं हन्ति न संशयः ॥२२२॥—प्रबोध०। ४. गरुड़। ५. अपनोदनम्।

अन्तःशुद्धिं[1] बहिःशुद्धिं विदध्याद्देवतार्चने ।
आद्या दौश्चित्यनिर्मोक्षादन्या[3] स्नानाद्यथाविधि: ॥४६२॥
संभोगाय विशुद्ध्यर्थं स्नानं धर्माय च स्मृतम् ।
धर्माय तद्भवेत् स्नानं यत्रामुत्रोचितो विधिः ॥४६३॥
नित्यस्नानं गृहस्थस्य देवार्चनपरिग्रहे ।
यतेस्तु दुर्जनस्पर्शात्स्नानमन्यद्विगर्हितम् ॥४६४॥
वातातपादिसंसृष्टे भूरितोये जलाशये ।
अवगाह्याचरेत्स्नानमतोऽन्यद्गालितं भजेत् ॥४६५॥

देवपूजन करनेके लिए अन्तरङ्गशुद्धि और बहिरंगशुद्धि करनी चाहिए। चित्तसे बुरे विचारोंको दूर करनेसे अन्तरङ्गशुद्धि होती है और विधिपूर्वक स्नान करनेसे बहिरङ्गशुद्धि होती है ॥ ४६२ ॥

## स्नानविधिका विधान

संभोगके लिए, विशुद्धिके लिए और धर्मके लिए स्नान करना बतलाया है। जिसमें परलोकके योग्य विधि की जाती है वह स्नान धर्मके लिए होता है ॥ ४६३ ॥

देवपूजा करनेके लिए गृहस्थको सदा स्नान करना चाहिए। और मुनिको दुर्जनसे छू जानेपर ही स्नान करना चाहिए। अन्य स्नान मुनिके लिए वर्जित है ॥ ४६४ ॥

जिस जलाशयमें खूब पानी हो और वायु, धूप वगैरह उसे खूब लगती हो उसमें घुस करके स्नान करना उचित है, किन्तु अन्य जलाशयोंका पानी छानकर ही स्नानके काममें लाना चाहिए ॥ ४६५ ॥

**भावार्थ**—यों तो गृहस्थको पानी छानकर ही काममें लाना चाहिए। किन्तु यदि कोई

---

१. अन्तःशुद्धिः । 'अन्तरङ्गबहिरङ्गविशुद्धिर्देवतार्चनविधौ विदधीत । आर्तरौद्रविरहात् प्रथमा स्यात् स्नानतः किल यथाविधितो ज्ञः ॥'—धर्मरत्ना० पृ० १०३ उ० । 'मध्यशुद्धिं बहिःशुद्धिं, विदध्यात्तदुपासने । पूर्वा स्यात् स्वान्तनैर्मल्यात्परा स्नानाद्यथाविधि: ॥ २२३ ॥—प्रबोधसार । "शौचं च द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा । मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथान्तरम् ॥"—दक्ष और व्याघ्रपाद । २. आर्तरौद्रध्यान । ३. बहिःशुद्धिः । ४. चाण्डाल । ५. 'घर्मवायुकलिते वहत्यगाधवारिभरिते जलाशये । संविगाह्य तदिहाचरेदतो वस्त्रपूतमपरं समाचरेत् ॥ १४ ॥—'धर्मरत्ना०, पृ० १०३ । पाषाणोत्स्फुटितं तोयं प्रासुकं प्रहरद्वयम् । सद्यः संतप्तवापीनां प्रासुकं जलमुच्यते ॥६३॥ देवर्षीणां प्र शौचाय स्नानाय च गृहार्थिनाम् । अप्रासुकं परं वारि महातीर्थजमप्यदः ॥६४॥—रत्नमाला । गालितैर्निर्मलै नीरैः सन्मन्त्रेण पवित्रितैः । प्रत्यहं जिनपूजार्थं स्नानं कुर्याद् यथाविधिः ॥१॥ सरितां सरसां वारि यदगाधं भवेत् क्वचित् । सुवातातपसंस्पृष्टं स्नानार्हं तदपि स्मृतम् ॥२॥ नभस्वताहृतं ग्रावघटीयन्त्रादिताडितम् । तप्तं सूर्यांशुभिर्वाप्यां मुनयः प्रासुकं विदुः ॥३॥ —धर्मसं० श्रा० पृ० २१८ । 'नदीषु देवखातेषु तडागेषु सरःसु च । स्नानं समाचरेन्नित्यं गर्तप्रस्रवणेषु च ॥२०३॥—'मनुस्मृति । 'अपोऽवगाहनं स्नानं विहितं सार्ववर्णिकम् । मन्त्रवत् प्रोक्षणं चापि द्विजातीनां विशिष्यते ॥—बौधायनधर्मसूत्र २-४-४ । 'स्नानं च सर्ववर्णानां कार्यं शौचपुरःसरम् । समन्त्रकद्विजानां स्यात् स्त्रीशूद्राणाममन्त्रकम् ॥ —स्मृत्यर्थसार पृ० २६ ।

पादजानुकटिग्रीवाशिरःपर्यन्तसंश्रयम् ।
स्नानं पञ्चविधं ज्ञेयं यथादोषं शरीरिणाम् ॥४६६॥

ब्रह्मचर्योपपन्नस्य निवृत्तारम्भकर्मणः ।
यद्वा तद्वा भवेत्स्नानमन्त्यमन्यस्य तद्द्वयम् ॥४६७॥

सर्वारम्भविजृम्भस्य ब्रह्मजिह्मस्य देहिनः ।
अविधाय बहिःशुद्धिं नाप्तोपास्त्यधिकारिता ॥४६८॥

अद्भिः शुद्धिं निराकुर्वन्मन्त्रमात्रपरायणः ।
स मन्त्रैः शुद्धिभाङ् नूनं भुक्त्वा हत्वा विहृत्य च ॥४६९॥

मृत्स्नयेष्टकया वापि भस्मना गोमयेन च ।
शौचं तावत्प्रकुर्वीत यावन्निर्मलता भवेत् ॥४७०॥

---

नदी वगैरहमें स्नान करना चाहे तो उसका पानी बहता हुआ होना चाहिए और उस पानीको धूप और हवा खूब लगना चाहिए। ऐसा पानी स्नानके योग्य है।

स्नान पाँच प्रकारका होता है—पैर तक, घुटनों तक, कमर तक, गर्दन तक और सिर तक। इनमें-से मनुष्योंको दोषके अनुसार स्नान करना चाहिए ॥४६६॥ जो ब्रह्मचारी है और सब प्रकारके आरम्भोंसे विरत है वह इनमें-से कोई-सा भी स्नान कर सकता है किन्तु अन्य गृहस्थोंको तो सिर या गर्दनसे ही स्नान करना चाहिए ॥४६७॥ जो सब प्रकारके आरम्भोंमें लगा रहता है और ब्रह्मचारी भी नहीं है, उसे बाह्य शुद्धि किये बिना देवोपासना करनेका अधिकार नहीं है ॥४६८॥ जो जलसे शुद्धिका निराकरण करता हुआ केवल मन्त्रपाठमें ही तत्पर रहता है, उसे भोजन करके, किसीको मारकर और विहार करके निश्चय ही मन्त्रोंके द्वारा शुद्ध हो जाना चाहिये ॥४६९॥

अतः मिट्टीसे, ईंटसे अथवा राखसे या गोबरसे तबतक सफाई करनी चाहिए जबतक निर्मलता न आ जाये ॥४७०॥

---

१. 'स्नानं तु द्विविधं प्रोक्तं गौणमुख्यप्रभेदतः। तयोस्तु वारुणं मुख्यं तत्पुनः षड्विधं भवेत्। नित्यं नैमित्तिकं काम्यं क्रियाङ्गं मलकर्षणम्। क्रिया स्नानं तथा षष्ठं षोढा स्नानं प्रकीर्तितम् ।—स्मृतिचन्द्रिका पृ० ११०। 'इष्टापूतक्रियार्थं यत्क्रियाङ्गं स्नानमुच्यते।—स्मृत्यर्थसार पृ० २७। 'अशिरस्कं भवेत् स्नानं स्नानाशक्तौ तु कर्मिणाम्। आर्द्रेण वाससा वापि मार्जनं दैहिकं विदुः ॥—अपरार्क पृ० १३५। २. ब्रह्मचर्यमन्दस्य। ३. 'अस्नातस्तु पुमान्नार्हो जप्याग्निहवनादिषु। प्रातःस्नानं तदर्थं च नित्यस्नानं प्रकीर्तितम् ।—अपरार्क पृ० १२७ में उद्धृत। स्नात्वा देवं स्पृशेन्नित्यं ब्रह्मव्रतविलोपने। स्नानाद्विना सदारस्य निष्फलो दैवतो विधिः ॥२२४॥ ब्रह्मव्रतोपपन्नस्य सर्वारम्भबहिर्मतेः। तोयस्नानं विना शुद्धिर्मन्त्रशुद्धो हि संयमी ॥२२५॥—प्रबोधसार। ४. 'असामर्थ्याच्छरीरस्य कालशक्त्याद्यपेक्षया। मन्त्रस्नानादितः सप्त केचिदिच्छन्ति सूरयः ॥ मान्त्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च। वारुणं मानसं चैव सप्त स्नानान्यनुक्रमात् ॥ आपो हिष्ठादिभिर्मान्त्रं मृदालम्भश्च पार्थिवम्। आग्नेयं भस्मना स्नानं वायव्यं गोरजः स्मृतम् ॥ यत्तु सातपवर्षेण तद्दिव्यस्नानमुच्यते। वारुणं चावगाहस्तु मानसं विष्णुचिन्तनम् ॥ —स्मृतिचन्द्रिका पृ० १३३। ५. दहनं कृत्वा (?)।

बहिर्विहृत्य संप्राप्तो नानाचम्य[1] गृहं विशेत् ।
स्थानान्तरात्समायातं सर्वं[2] प्रोक्षितमाचरेत्[3] ॥४७१॥
आप्लुतः[4] संप्लुतस्वान्तः[5] शुचिवासो विभूषितः ।
[6]मौनसंयमसम्पन्नः कुर्याद्देवार्चनाविधिम्[8] ॥४७२॥
दन्तधावनशुद्धास्यो मुखवासोचितानन[7]ः ।
असंजातान्यसंसर्गः सुधीर्देवानुपाचरेत् ॥४७३॥
होमभूतबली[8] पूर्वैरुक्तौ भक्तविशुद्धये ।
भुक्त्यादौ सलिलं सर्पि[9]रुध[10]स्यं च रसायने[11]म् ॥४७४॥
एतद्विधिर्न[8] धर्माय नाधर्माय तदक्रियाः ।
दर्भपुष्पाक्षतश्रोत्रवन्द[12]नादिविधानवत् ॥४७५॥
द्वौ हि धर्मौ गृहस्थानां लौकिकः पारलौकिकः ।
लोकाश्रयो भवेदाद्यः परः[13] स्यादागमाश्रयः ॥४७६॥

जब बाहरसे घूम कर आये तो बिना कुल्ला किये घरमें नहीं जाना चाहिए। दूसरी जगहसे आयी हुई सब वस्तुओंको पानी छिड़ककर ही काममें लाना चाहिए ॥४७१॥

स्नान करके, शुद्ध वस्त्र पहने, फिर शरीरको आभूषणोंसे भूषित करे और चित्तको वशमें करके मौन तथा संयमपूर्वक जिनेन्द्र देवकी पूजा करे ॥४७२॥ दातौनसे मुख शुद्ध करे और मुखपर वस्त्र लगाकर दूसरोंसे किसी तरहका सम्पर्क न रखकर जिनेन्द्र देवकी पूजा करे ॥४७३॥

पूर्व पुरुषोंने भोजनकी शुद्धिके लिए भोजन करनेसे पहले होम और भूतबलिका विधान किया है। भोजन करनेसे पहले होम पूर्वक अर्थात् प्राणियोंके उद्देश्यसे कुछ अन्न अलग निकालकर रख देना चाहिए। तथा भोजनके पहले पानी, घी और दूधके सेवनको रसायन कहा है। कुश, पुष्प, अक्षत, स्तवन, वन्दना वगैरह के विधानकी तरह उक्त विधि करनेसे न कोई धर्म होता है और न करनेसे न कोई अधर्म होता है। अर्थात्—ऊपर भोजनकी शुद्धिके लिए जो क्रिया बतलायी है उसके करनेसे धर्म नहीं होता और न करनेसे अधर्म नहीं होता है ॥४७४-४७५॥

गृहस्थोंका धर्म दो प्रकारका होता है—एक लौकिक और दूसरा पारलौकिक। इनमें-से लौकिक धर्म लोकको रीतिके अनुसार होता है और पारलौकिक धर्म आगमके अनुसार होता है ॥४७६॥

---

१. 'सुप्त्वा क्षुत्वा च भुक्त्वा च निष्ठीव्योक्त्वाऽनृतानि च । पीत्वापोऽध्येष्यमाणश्च आचमेत् प्रयतोऽपि सन् ॥ १४५ ॥—मनुस्मृति ५ अ० । 'बहिरागतो नानाचम्य गृहं प्रविशेत् ॥ १३ ॥—नीतिवाक्यामृत पृ० २५२ । 'बहिर्विहृत्य····। स्थानान्तरात् समानीते' ।—धर्मरत्ना० पृ० १०३ । २. वस्तु । ३. अभ्युक्षित्वा । ४. स्नातः । ५. संहृतचित्तः । ६. मौनसंयमसम्पन्नैर्देवोपास्तिर्विधीयताम् । दन्तधावनशुद्धास्यैधौतवस्त्रपवित्रितैः ॥२२६॥—प्रबोधसार । ७. वासोवृत्ताननः—सागारधर्मा० पृ० ६३ के पादटिप्पणमें पाठ है। ८. भोजनावसरे किञ्चिदग्नौ किञ्चित् प्राङ्गणेऽन्नं क्षिप्यते । 'अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥ ७० ॥—मनुस्मृति, ३ अ० । ९. 'घृताधरोत्तरभुञ्जानोऽग्निं दृष्टिं च लभते ॥३४॥—नीतिवाक्यामृत, पृ० २५३ । १०. दुग्धम् । ११. मथितम् । १२. शकुनार्थं वन्द्यते ( ? ) —'स्तोत्र वन्दनादि' पाठ सम्यक् प्रतीत होता है । क्योंकि प्रबोधसार ( पृ० १९४ ) में लिखा है—'पुष्पादिः स्तवनादिर्वा नैव धर्मस्य साधनम्' । १३. पारलौकिकः ।

जातयोऽनादयः सर्वास्तत्क्रियापि तथाविधा।
श्रुतिः शास्त्रान्तरं वास्तु प्रमाणं कात्र नः क्षतिः ॥४७७॥
स्वजात्यैव विशुद्धानां वर्णानामिह रत्नवत्।
तत्क्रियाविनियोगाय[1] जैनागमविधिः परम् ॥४७८॥
यद्भवभ्रान्ति[2]निर्मुक्तिहेतुधीस्तत्र दुर्लभा।
संसारव्यवहारे तु स्वतःसिद्धे वृथागमः ॥४७९॥

तथा च—

सर्व एव हि जैनानां प्रमाणं लौकिको[3] विधिः।
यत्र सम्यक्त्वहानिर्न यत्र न व्रतदूषणम् ॥४८०॥

*इत्युपासकाध्ययने स्नानविधिर्नाम चतुस्त्रिंशत्तमः कल्पः।*

---

सब जातियाँ अनादि हैं और उनकी क्रिया भी अनादि है। उसमें वेद अथवा अन्य शास्त्र प्रमाण रहो, उससे हमारी कोई हानि नहीं है ॥४७७॥

रत्नकी तरह जो वर्ण अपने जन्मसे ही विशुद्ध होते हैं उन्हें उनकी क्रियाओंमें लगानेके लिए जैनआगमोंका विधान ही उत्कृष्ट है ॥४७८॥ क्योंकि शास्त्रान्तरोंमें संसार भ्रमणसे छूटनेके कारणोंमें मनको लगानेवाले ज्ञानका पाया जाना दुर्लभ है। रहा लौकिक व्यवहार, वह तो स्वयं सिद्ध है उसको बतलानेके लिए किसी आगमकी आवश्यकता नहीं है ॥४७९॥ तथा सभी जैन-धर्मानुयायियोंको वह लौकिक व्यवहार मान्य है जिससे उनके सम्यक्त्वमें हानि न आती हो और न उनके व्रतोंमें दूषण लगता हो ॥४८०॥

सिक्तं कुम्भजलैश्च गन्धसलिलैः सम्पूज्य नुत्वा स्मरेत् ॥२२॥

टीका—स्नपनमभिषेकम्, आश्रुत्य प्रतिज्ञाय, तदिलां स्नपनभूमिं विशोध्य रत्नाम्बुकुशाग्निना सन्तर्पणविधिभिः शोधयित्वा, चतुष्कुम्भयुक्कोणायाम्—चत्वारः कुम्भयुजः पूर्णकलशोपेताः कोणा यस्याः सा तस्याम्, सकुशश्रियाम्—दर्भैश्चन्दननिर्मितश्रीकाराक्षरेण च सहितायां श्रियामित्युपलक्षणं तेन ह्रीकारोऽपि लेख्यः । पीठ्याम्—स्नपनपीठस्योपरि, जिनपतिं—जिनेन्द्रं, न्यस्य स्थापयित्वा, अन्तमाप्य, इष्टदिक्—इष्टा यज्ञांशं प्रापिता दिशस्तत्स्था दिक्पाला दश इन्द्रादयो यत्र नीराजनकर्मणि तदिष्टदिक् । नीराज्य-पूजापुरस्सरं मृत्स्नागोमयभूतिपिण्डदूर्वादर्भपुष्पाक्षतसचन्दनोदकैर्नीराजनं प्रापय्य अम्बुरसाज्यदुग्धदधिभिः सिक्त्वा—अम्बूनि च रसाश्च आज्यानि च दुग्धानि च दधीनि च अम्बुरसादीनि पञ्च स्नानीयद्रवद्रव्याणि तैः क्रमेण । जिनपतिमभिषिच्य । कृतोद्वर्तनम्—एलादिचूर्णकल्ककषायैरुद्वर्त्य कृतनन्द्यावर्ताद्यवतारणम् । गन्धसलिलैः-सुरभिद्रव्यमिश्रोदकैः कुम्भजलैः—पूर्वस्थापितकलशाम्भोभिः, च सिक्तं—अभिषिक्तं सम्पूज्य नुत्वा स्मरेत् ॥—सागार धर्मामृत अ. ६ । ६. शरावपुटैः ।

स्वादोन्मदमिलन्मत्तालिकुलप्रलापोत्ता[1] लितनिलिम्पाले[2]सिव्यापारिगलम्, अम्बरचरकुमारहे-लास्फालितवेणुवल्ल[3]की-पणवानकमृदङ्गशङ्खकाहलत्रिविलतालझल्लरीभेरीभम्भाप्रभृत्यनवधिघ[4]न-शुषिर[5]-तंताव[6]नद्धवाद्यनादनिवेदितनिखिलविष्टि(ष्ट)पाधिपोपासनावसरम्, अनेकामरविकिर-कुलकीर्णकिशलयाशोकानोकहोल्लसत्प्रसवपरागपुनरुक्तसकलदिक्पालहृदयरागप्रसरम्, अखि-लभुवनैश्वर्यलाञ्छनातपत्रत्रयशिखण्ड[10]मण्डनमणिमयूखरेखालिख्यमानम[11] खमुखरखेचरीभाल[12]-तलतिलकपत्रम्, अनवरतयक्षविक्षिप्यमाणोभयपक्षचामरपरम्परांशुजालधवलितविनेयजन-मनप्रासादचरित्रम्, अशेषप्रकाशितपदार्थातिशायिशारीरप्रभापरिवेषमुषितपरिष[13]त्सभास्तार-मतितिमिरनिकरम्, अनवधिवस्तुविस्तारात्मसात्कारासारविस्फारितसरस्वतीतरङ्गसङ्गसं-तर्पितसमस्तसत्त्वसरोजाकरम्, इभारा[14]तिपरिवृढोपवाह्यमानासनावसानलग्नरत्नकरप्रसरपल्ल-वितवियत्पादपाभोगम्, अनन्यसामान्यसमवसरणसभासीनमनुजदिविजभुज[15]ङ्गेन्द्रवृन्दवन्द्य-मानपादारविन्दयु[16]गलम्,

मङ्गाविलक्ष्मीलतिकावनस्य प्रवर्धनाव[17]र्जितवारिपूरैः ।
जिनं चतुर्भिः स्नपयामि कुम्भैर्नभःसदोधेनुपयोधराभैः ॥५४७॥

लक्ष्मीकल्पलते समुल्लसजनानन्दैः परं पल्लवै-
र्धर्मारामफलैः प्रकामसुभगस्त्वं भव्यसेव्यो भव ।

---

बहते हुए मकरन्द ( पुष्प मधुरस ) के स्वादसे मत्त हुए भौरोंके प्रलापसे जिन्होंने गीत गानमें संलग्न देवोंके गलोंको उत्सुक कर दिया है, विद्याधर कुमारोंके द्वारा क्रीड़ासे बजाये गये बाँसुरी, वीणा, ढोल, मृदंग, शंख, नगारा, खरताल, झाँझ, भेरी, नफीरी आदि वाद्योंके नाना प्रकारके शब्दोंसे जिन्होंने समस्त लोकोंके स्वामीकी उपासनाके अवसरको सूचित कर दिया है। ( जिनपर लगे हुए ) समस्त लोकोंके ऐश्वर्यके चिह्नरूप तीन छत्रोंके मस्तकपर लगी हुई मणिकी किरणोंकी रेखासे स्तुति करती हुई विद्याधरियोंके ललाटपर तिलककी रचना अंकित होती है अर्थात् जिनेन्द्र-देवके ऊपर लगे हुए तीन छत्रोंके मस्तकपर लगी हुए मणिकी किरणें स्तुति करती हुई विद्याधरी नारियोंके मस्तकपर तिलककी तरह प्रतीत होती हैं, दोनों ओर खड़े हुए यक्षोंके द्वारा निरन्तर ढोरे जानेवाले चामरोंकी किरणोंसे शिष्यजनोंके मनरूपी महलको जिन्होंने श्वेत कर दिया है, समस्त प्रकाशशील पदार्थोंको अतिक्रमण करनेवाली शारीरिक प्रभाके परिवेष (घेरा) से जिन्होंने समव-सरणमें उपस्थित सदस्योंकी बुद्धिके अन्धकारसमूहको दूर कर दिया है, अनन्त वस्तुओंके विस्तारको प्रत्यक्ष करने रूप महावृष्टिसे बढ़ी हुई सरस्वतीरूपी नदीकी तरंगोंके संसर्गसे जिन्होंने समस्त प्राणीरूपी कमलसमूहको सन्तुष्ट किया है, जिनके सिंहासनमें लगे हुए रत्नोंकी किरणोंके फैलावसे आकाशमें वृक्षका विस्तार पल्लवित हो गया है और अनुपम समवसरण-सभामें बैठे हुए मनुष्य, देव और नागोंके इन्द्रोंका समूह जिनके चरणयुगलकी वन्दना करता है— ऐसे जिनेन्द्र देवका मेरी भावी लक्ष्मीरूपी लताके वनको बढ़ानेवाले जलके पूरसे युक्त तथा कामधेनुके स्तनोंके तुल्य चार कलशोंसे अभिषेक करता हूँ ॥५४७॥

जिनभगवान्के तीनों लोकोंको आनन्द देनेवाले गन्धोदकके सिञ्चनसे हे लक्ष्मीरूपी

---

१. उत्सुकीकृत । २. गीत । ३. वीणा । ४. पटहभेद । ५. नफोरी । ६. तालादि । ७. वंशादि । ८. वीणादि । ९. मुरजादि । १०. मस्तक । ११. स्तुति । १२. ललाट । १३. समवसरणसभा । १४. सिंह । १५. भुजङ्गमेन्द्र-अ०ज० । १६.-युगम् अ० ज० । १७. उपात्त ।

बोधाधीश[1] विमुञ्च संप्रति मुहुर्दुष्कर्मघर्मक्लमं
त्रैलोक्यप्रमदाव हे जिनपतेर्गन्धोदकैः स्नापनात् ॥५४८॥
शुद्धैर्विशुद्धबोधस्य जिनेशस्योत्तरोदकैः[2] ।
करोम्यवभृथस्नानमुत्तरोत्तरसंपदे[3] ॥५४९॥
अमृतकृतकर्णिकेऽस्मिन्निजाङ्कबीजे कलादले कमले ।
संस्थाप्य पूजयेयं त्रिभुवनवरदं जिनं विधिना ॥५५०॥
पुण्योपार्जनशरणं[6] पुराणपुरुषं स्तवोचिताचरणम् ।
पुरुहू[7]तविहितसेवं पुरुदेवं पूजयामि तोयेन ॥५५१॥
मन्दमदम[9]दनदमनं मन्दरगिरिशिखरमज्जनावसरम् ।
कन्दमुमं[10] ललितिकायाश्चन्दनचर्चार्चितं जिनं कुर्वे ॥५५२॥
अवमं[11] तरुगहनदहनं निकामसुखसंभवामृतस्थानम् ।
आगमदीपालोकं कलमभवैस्तन्दुलैर्भजामि जिनम् ॥५५३॥
स्मररस[12] विमुक्तसूक्तिं विज्ञानसमुद्रमुद्रिताशेषम् ।
श्रीमानसकलहंसं कुसुमशरैरर्चयामि जिननाथम् ॥५५४॥

कल्पलता ! तुम मनुष्योंके आनन्दरूपी पल्लवोंसे उल्लासको प्राप्त होवो । हे धर्मरूपी उद्यान ! तुम फलोंसे अत्यन्त सुन्दर होकर भव्यजीवोंके सेवनीय बनो । और हे ज्ञानवान् आत्मा ! तुम अब दुष्कर्मरूपी घामके सन्तापको छोड़ो, अर्थात् बुरे कर्म करना छोड़ दो । और बुरे कर्मोंके फलसे मुक्त हो जाओ ॥५४८॥

अधिकाधिक सम्पत्तिके लिए विशुद्ध ज्ञानी जिनेन्द्र भगवान्‌का तालाब वगैरहसे लाये गये शुद्ध जलसे मैं अन्तिम स्नान कराता हूँ ॥५४९॥

इस सोलह पांखुड़ीके कमलपर तीनों लोकोंको मनवांछित वर देनेवाले जिनेन्द्र भगवान् को विधिपूर्वक स्थापित करके पूजना चाहिए ॥५५०॥ [ इस श्लोकके पूर्वार्धके पदोंका अर्थ स्पष्ट नहीं हो सका है । टिप्पणके अनुसार उस कमलकी कर्णिका पवर्गसे निर्मित होती है और उसके मध्यमें अपना नाम स्थापित किया जाता है ]

जो पुण्यके कमानेके लिए आश्रयभूत हैं, पुराण पुरुष हैं, जिनका आचरण स्तुतिके योग्य है, और इन्द्रने जिनकी सेवा की थी, उन प्रथम तीर्थङ्कर आदिनाथकी मैं जलसे पूजा करता हूँ ॥५५१॥ जो अत्यधिक मदशाली कामका दमन करनेवाले हैं, सुमेरु पर्वतके शिखरपर जिनका अभिषेक हुआ है तथा जो यशरूपी बेलकी जड़ है उन जिनदेवकी चन्दनसे पूजा करता हूँ ॥५५२॥ दोषरूपी वृक्षोंके जङ्गलको जलानेवाले, उत्तम सुखकी उत्पत्तिके लिए मोक्षके समान तथा आगमरूपी दीपकके प्रकाशक जिनेन्द्रदेवकी सुगन्धित तन्दुलोंसे पूजन करता हूँ ॥५५३॥ जिनकी सूक्तियाँ श्रृङ्गार रससे रहित हैं, जिन्होंने अपने ज्ञानरूपी समुद्रसे सबको आच्छादित किया है और जो लक्ष्मीरूपी मानसरोवरके राजहंस हैं, उन जिनेन्द्रदेवकी पुष्पोंसे पूजा करता हूँ ॥५५४॥ अनन्त-

१. हे आत्मन् । २. श्रेष्ठजलैः । ३. यज्ञान्तस्नानम् । ४. पवर्णः । ५. षोडश । पकारेण कर्णिका क्रियते, तन्मध्ये स्वकीयं नाम निक्षिप्यते, षोडशदलेषु अकारादयः स्वराः लिख्यन्ते । ६. गृहं । ७. इन्द्र । ८. आदिभगवन्तम् । ९. प्रचुरदर्पसहितकामदमनम् । १०. कीर्ति । ११. दोष । १२. रागादिविमुक्ता सूक्ति अर्चनं; यस्य स तम् ।

अर्हन्तममितनीतिं निरञ्जनं मिहिरमाधिदावाग्नेः[1]।
आराधयामि हविषा मुक्तिस्त्रीरमितमानसमनङ्गम् ॥५५५॥
भक्त्यानतामराशयकमलवनारालतिमिरमार्तण्डम् ।
जिनमुपचरामि दीपैः सकलसुखारामकामदमकामम् ॥५५६॥
अनुपमकेवलवपुषं सकलकलाविलयवर्तिरूपस्थम्[2] ।
योगावगम्यनिलयं यजामहे निखिलगं[3] जिनं धूपैः ॥५५७॥
स्वर्गापवर्गसंगतिविधायिनं व्यस्तजातिमृतिदोषम् ।
व्योमचरामरपतिभिः स्मृतं फलैर्जिनपतिमुपासे ॥५५८॥
अम्भश्चन्दनतन्दुलोद्गमहविर्[4]दीपैः सधूपैः फलै-
र्चित्वा त्रिजगद्गुरुं जिनपतिं स्नानोत्सवानन्तरम् ।
तं स्तौमि प्रजपामि चेतसि दधे कुर्वे श्रुताराधनं
त्रैलोक्यप्रभवं च तन्महमहं कालत्रये श्रद्दधे ॥५५९॥
[5]यज्ञैर्मुदावभृथभाग्भिरुपास्य[6] देवं पुष्पाञ्जलिप्रकरपूरितपादपीठम् ।
श्वेतातपत्रचमरीरुहदर्पणाद्यैराराधयामि पुनरेनमिनं जिनानाम् ॥५६०॥

[ इति पूजा ]

ज्ञानशाली, निर्विकार, दुराशारूपी दावाग्नि ( जङ्गलकी आग ) के लिए मेघके समान, निराकार तथा जिनका मन मुक्तिरूपी स्त्रीमें लीन है, उन अर्हन्त देवकी नैवेद्यसे पूजा करता हूँ ॥५५५॥

भक्तिसे विनम्र हुए देवोंके चित्तरूपी कमलवनका घोर अन्धकार दूर करनेके लिए जो सूर्यके समान हैं, और समस्त सुखोंके लिए उद्यानरूप तथा मनोरथको पूर्ण करनेवाले हैं उन कामरहित जिनेन्द्रदेवकी दीपोंसे पूजा करता हूँ ॥५५६॥

अनुपम केवलज्ञान ही जिनका शरीर है, समस्त भाव कर्मोंका विनाश हो जानेपर जो रूप रहता है उसी रूपमें जो स्थित हैं, जिनके स्थानको योगके द्वारा जाना जा सकता है और जो केवलज्ञानके द्वारा सर्वत्र व्यापक है, उन जिनदेवकी मैं धूपसे पूजा करता हूँ ॥५५७॥

जो स्वर्ग और मोक्षका दाता है, जन्म-मरणरूपी दोषोंसे रहित है, और विद्याधरों तथा देवोंके स्वामी जिनको स्मरण करते हैं, उन जिनेन्द्रदेवकी फलोंसे पूजा करता हूँ ॥५५८॥

अभिषेक समारोहके पश्चात् तीनों लोकोंके गुरु जिनेन्द्रदेवकी जल, चन्दन, अक्षत, पुष्प, नैवेद्य, दीप, धूप और फलोंसे पूजा करके मैं उनका स्तवन करता हूँ, उनका नाम जपता हूँ, उन्हें चित्तमें धारण करता हूँ, शास्त्रकी आराधना करता हूँ तथा तीनों लोकोंसे उत्पन्न हुए उनके (ज्ञानरूपी) तेजकी मैं तीनों कालोंमें श्रद्धा करता हूँ ॥५५९॥

**भावार्थ**—अभिषेकके पश्चात् अष्टद्रव्यसे जिनेन्द्रदेवका पूजन करना चाहिए। तथा पूजनके पश्चात् उनका स्तवन, उनके नामका जप, ध्यान वगैरह तथा शास्त्र स्वाध्याय करना चाहिए।

पुष्पाञ्जलिके समूहसे जिनका पादपीठ—चरणोंके पासका स्थान—भरा हुआ है उन जिनेन्द्रदेवकी अभिषेकपूर्वक पूजासे सहर्ष उपासना करके मैं पुनः उनकी श्वेतछत्र, चमर, दर्पण आदि

---

१. मेघः । २. कला भावकर्माणि, तासां विलये विनाशे सति सकल कलाविलये वर्तते यत् रूपं तत्सकलकलाविलयवर्तिरूपं तत्र तिष्ठतीति तत्स्थं केवलज्ञानरूपमित्यर्थः । ३. केवलज्ञानापेक्षया सर्वव्यापकम् । ४. पुष्पम् । ५. पूजाभिः । ६. अभिषेक ।

भक्तिर्नित्यं जिनचरणयोः सर्वसत्त्वेषु मैत्री
सर्वातिथ्ये मम विभवधीर्बुद्धिरध्यात्मतत्त्वे।
सद्विद्येषु प्रणयपरता चित्तवृत्तिः परार्थे
भूयादेतद्‌वसति भगवन्धाम्न यावत्त्वदीयम् ॥५६१॥
प्रातर्विधिस्तव पदाम्बुजपूजनेन मध्याह्नसन्निधिरयं मुनिमाननेन।
सायन्तनोऽपि समयो मम देव यायान्नित्यं त्वदाचरणकीर्तनकामितेन ॥५६२॥
धर्मेषु[1] धर्मनिरतात्मसु धर्महेतौ[2] धर्मादवाप्तमहिमास्तु नृपोऽनुकूलः[3]।
नित्यं जिनेन्द्रचरणार्चनपुण्यधन्याः कामं प्रजाश्च परमां श्रियमाप्नुवन्तु ॥५६३॥
[ इति पूजाफलम् ]
आलस्याद्वपुषो हृषीकहरणैर्व्याक्षेपतो वात्मन-
श्चापल्यान्मनसो मतेर्जडतया मान्द्येन वाक्सौष्ठवे।
यः कश्चित्तव संस्तवेषु समभूदेष प्रमादः स मे
मिथ्या स्तान्ननु देवताः प्रणयिनां तुष्यन्ति भक्त्या यतः ॥५६४॥
देवपूजामनिर्माय मुनीननुपचर्य च।
यो भुञ्जीत गृहस्थः सन् स भुञ्जीत परं तमः[4] ॥५६५॥
*इत्युपासकाध्ययने स्नपनार्चनविधिर्नाम षट्त्रिंशः कल्पः।*

---

मांगलिक द्रव्योंसे आराधना करता हूँ ॥५६०॥

*[ इस प्रकार पूजा समाप्त हुई। आगे पूजाका फल बतलाते हैं— ]*

## पूजाफल

हे भगवन् ! जबतक इस चित्तमें आपका निवास है तबतक सदा जिनभगवान्‌के चरणोंमें मेरी भक्ति रहे, सब प्राणियोंमें मेरा मैत्रीभाव रहे, मेरी ऐश्वर्यरत मति सबका आतिथ्य सत्कार करनेमें संलग्न हो, मेरी बुद्धि अध्यात्म तत्त्वमें लीन रहे, ज्ञानीजनोंसे मेरा स्नेह भाव रहे और मेरी चित्तवृत्ति सदा परोपकारमें लगी रहे ॥५६१॥

हे देव ! प्रातःकालीन विधि आपके चरण-कमलोंकी पूजासे सम्पन्न हो, मध्याह्न कालका समागम मुनियोंके आतिथ्यसत्कारमें बीते; तथा सायंकालका भी समय आपके चारित्रके कथन और कामनामें व्यतीत हो ॥५६२॥ धर्मके प्रभावसे राज्यपदको प्राप्त हुआ राजा धर्मके विषयमें, धार्मिकोंके विषयमें और धर्मके हेतु चैत्यालय आदिके विषयमें सदा अनुकूल रहे–उनका अहित न करके संरक्षण करे। तथा प्रतिदिन जिनेन्द्रदेवके चरणोंकी पूजासे प्राप्त हुए पुण्यसे धन्य हुई जनता यथेच्छ उत्कृष्ट लक्ष्मीको प्राप्त करे ॥५६३॥

शरीरके आलस्यसे या इन्द्रियोंके इधर-उधर लग जानेसे अथवा आत्माकी अन्यमनस्कतासे अथवा मनकी चपलतासे अथवा बुद्धिकी जड़तासे अथवा वाणीमें सौष्ठव ( शुद्ध स्पष्ट उच्चारण ) की कमीके कारण आपके स्तवनमें मुझसे जो कुछ प्रमाद हुआ है, वह मिथ्या हो। क्योंकि देवता तो अपने प्रेमियोंकी भक्तिसे सन्तुष्ट होते हैं ॥५६४॥ जो गृहस्थ होते हुए भी देवपूजा किये बिना तथा मुनियोंकी सेवा किये बिना भोजन करता है, वह महापापको खाता है ॥५६५॥

*इस प्रकार उपासकाध्ययनमें अभिषेक, पूजन विधि नामका छत्तीसवाँ कल्प समाप्त हुआ ॥ ३६ ॥*

---

१. धार्मिकेषु। २. चैत्यालय-मुनि-शास्त्र-संघेषु। ३. नृपः अनुकूलो हितो भवतु। ४. पापम्।

नमदमरमौलिमण्डलविलग्नरत्नांशुनिकरगगनेऽस्मिन् ।
अरुणायतेऽङ्घ्रियुगलं यस्य स जीयाज्जिनो देवः ॥५६६॥
सुरपतियुवतिश्रवसाममरतरुस्मेरमञ्जरीरुचिरम् ।
चरणनखकिरणजालं यस्य स जयताज्जिनो जगति ॥५६७॥

वर्णः—

दिविजकुञ्जर[2]मौलिमन्दारमकरन्दस्य[3]न्दकरविसरसारधूसरपदाम्बुज वैदग्धीपरमपद प्राप्तवादजय विजितमनसिज,

मात्रा—

यस्त्वाममितगुणं जिन कश्चित्स्तावधिबोधः स्तौति विपश्चित् ।
ननमसौ ननु काञ्चनशैलं तुलयति हस्तेनाचिरकालम्[4] ॥५६८॥
स्तोत्रे यत्र महामुनिपक्षाः सकलैतिह्याम्बुधिविधिदक्षाः ।
मुमुचुश्चिन्तामनवधिबोधास्तत्र कथं ननु मादृग्वेधाः ॥५६९॥
तदपि वदेयं किमपि जिन त्वयि यद्यपि शक्तिर्नास्ति तथा मयि ।
यदियं भक्तिर्मा मौनस्थं देव[5] न कामं कुरुते स्वस्थम् ॥५७०॥

चतुष्पदी—

सुरपतिविरचितसंस्तव दलिताखिलभव परमधामलब्धोदय ।
कस्तव जन्तुर्गुणगणमघहरचरण प्रवितनुतां हतनतभय ॥५७१॥

---

*[ पूजनके पश्चात् जिन भगवान्की स्तुति करना चाहिए । अतः स्तुति करते हैं— ]*

## स्तुति

नमस्कार करते हुए देवोंके मुकुटोंके समूहमें लगे हुए रत्नोंकी किरणोंके समूहरूपी इस आकाशमें जिनके चरणयुगल सन्ध्याकी लालीकी तरह प्रतीत होते हैं वे जिनदेव जयवन्त हों ॥५६६॥ जिनके चरणोंके नखोंकी कान्तिका समूह देवांगनाओंके कानोंमें धारण की गयी कल्पवृक्षकी पुष्पित लताके संस्पर्शसे सुन्दर प्रतीत होता है, वे जिन भगवान् जगत्में जयवन्त हों ॥५६७॥

देवेन्द्रोंके मुकुटोंमें लगे हुए मन्दार पुष्पके परागसे जिनके चरणकमल पाण्डुर हो गये हैं, जो पाण्डित्यके सर्वोत्कृष्ट स्थान हैं, जिन्होंने वादमें जयलाभ किया है, ऐसे कामजेता हे जिनेन्द्र देव !

जो अल्पज्ञानी विद्वान् तुम्हारे अपरिमित गुणोंका स्तवन करता है, वह निश्चय ही जल्दीमें हाथसे सुमेरु पर्वतको तोलनेका प्रयत्न करता है ॥५६८॥ समस्त शास्त्ररूपी समुद्रकी विधिमें चतुर, असीम ज्ञानधारी महामुनि भी जिसका स्तवन करनेमें समर्थ नहीं हो सके, मेरे समान अल्पज्ञानी उसका स्तवन कैसे कर सकते हैं ॥५६९॥ हे जिन! यद्यपि मेरेमें आपका स्तवन करनेकी शक्ति नहीं है, तथापि कुछ कहता हूँ । क्योंकि मेरे मौन रहनेपर आपकी यह भक्ति मुझे स्वस्थ नहीं रहने देती ॥५७०॥

इन्द्रने जिसका स्तवन किया, जिसने समस्त संसार-परिभ्रमणको नष्ट कर दिया, मोक्षके साथ ही जिसने आत्मिक गुणोंको प्राप्त किया, जिसके चरण पापके नाशक हैं, और जिसने विनत मनुष्यके भयको नष्ट कर दिया है ऐसे हे जिनेन्द्रदेव ! कौन प्राणी आपके गुणसमूहका विस्तारसे कथन कर सकता है ॥५७१॥

---

१. कर्णानाम् । २. प्रधान । ३. स्यन्दकारी विसरः प्रसारः । मन्दारपुष्पाणां समूह-प्रसारसारेण धूसरः ईषत्पाण्डुकृतः । ४. शीघ्रम् । ५. देव न मं—अ. ज. ।

जय निखिलनिलिम्पालोपकल्प[1] जगतीस्तुतकीर्तिकलत्रतल्प[2] ।
जय परमधर्महर्म्या[3]वतार लोकत्रितयोद्धरणैकसार ॥५७२॥
जय लक्ष्मीकरकमलार्चिताङ्ग सारस्वतरसनटनाटयरङ्ग ।
जय बोध[4]मध्यसिद्धाखिलार्थ मुक्तिश्रीरमणीरतिकृतार्थ ॥५७३॥
नमदमरमौलिमन्दरतटान्तराजत्पदनखनक्षत्रकान्त ।
विबुधस्त्रीनेत्राम्बुजविबोध मरकध्वजधनुरुद्भवनिरोध ॥५७४॥
बोधत्रयविदितविधेय[5]तन्त्र का नामापेक्षा तव परत्र ।
दधतः प्रबोधमसुभृज्जनस्य गुरुरस्ति कोऽपि किमिहारुणस्य[6] ॥५७५॥
निजबीज[7]बलान्मलिनापि महति धीः शुद्धिं परमामभव भजति ।
युक्तेः कनकाश्मा भवति हेम किं कोऽपि तत्र विवदेत नाम ॥५७६॥

हे समस्त देवोंकी स्तुतिके ग्रन्थरूप, और हे समस्त पृथिवीके द्वारा स्तुत कीर्तिरूपी स्त्रीके विश्रामके लिए शय्यारूप ! आपकी जय हो । हे परम धर्मरूपी महलके अवतार और हे तीनों लोकोंका उद्धार करनेमें समर्थ ! आपकी जय हो ॥५७२॥

जिनका अङ्ग लक्ष्मीके कर-कमलोंसे पूजित है, जो सारस्वत रसरूपी नटके लिए रंगमंचके तुल्य हैं, जिनके केवलज्ञानमें समस्त पदार्थ प्रतिभासित है तथा जो मुक्तिश्रीरूपी स्त्रीके साथ रमण करके कृतार्थ हो चुके हैं ऐसे हे जिनेन्द्र ! आपकी जय हो ॥५७३॥

नमस्कार करते हुए देवोंके मुकुटरूपी सुमेरुके प्रान्तभागमें जिनके पद नख चन्द्रमाकी भाँति शोभित होते हैं, जो देवांगनाओंके नेत्ररूपी कमलोंको विकसित करते हैं और जो कामदेवके धनुषके उत्सवको रोकते हैं। ऐसे काम-विजेता हे जिनेन्द्र देव ! आप जयवन्त हों ॥५७४॥

हे जिन ! आपने मति, श्रुत और अवधिज्ञानके द्वारा जानने योग्य वस्तुओंको जान लिया है। इस लिए आपको किसी गुरुकी आवश्यकता नहीं हुई । ठीक ही है प्राणियोंको जगानेवाले सूर्यका भी क्या कोई गुरु है ? हे भवरहित ! महापुरुषोंकी मलिन बुद्धि भी अपने ज्ञान ध्यान आदिके बलसे अत्यन्त शुद्ध हो जाती है । उपायसे स्वर्णपाषाण स्वर्णरूप हो जाता है इसमें क्या किसीको विवाद है ? ॥५७५-५७६॥

**भावार्थ**—आशय यह है कि तीर्थङ्कर जन्मसे ही तीन ज्ञानके धारी होते हैं, अतः अपने ज्ञानबलसे ही वे जानने योग्य वस्तुओंको जान लेते हैं, उन्हें किसी गुरुसे शिक्षा लेनेकी आवश्यकता नहीं होती। बादको दीक्षा लेकर और तपस्या करके वे चार घातिया कर्मोंका नाश करके पूर्णज्ञानी हो जाते हैं । अतः जैसे खनिसे सोना अशुद्ध ही निकलता है किन्तु उपाय करनेसे मलको दूर करके वही सोना शुद्ध हो जाता है, वैसे ही संसारी आत्मा अशुद्ध होते हुए भी तपस्याके द्वारा शुद्ध हो जाता है और शुद्ध होते ही उसके ज्ञानादिक गुण पूर्ण विकसित हो जाते हैं और तब वह सर्वज्ञ सर्वदर्शी बन जाता है ।

*[ किन्तु मीमांसक किसी पुरुषका सर्वज्ञ होना स्वीकार नहीं करता । उसका कहना है कि मनुष्यकी बुद्धिमें कुछ विशेषता मानी जा सकती है किन्तु उसका यह मतलब नहीं है कि वह अतीत और अनागतको भी जान सके, उसे उत्तर देते हुए कहते हैं— ]*

---

१. स्तुतिग्रन्थ । २. शय्या । ३. धर्मस्य प्रासादप्रायः । ४. केवलज्ञान । ५. परिच्छेद्यवस्तु । ६. सूर्यस्य । ७. ज्ञानध्यानादि ।

परिमाणमिवातिशयेन वियति मतिरुच्चैर्नरि गुरुतामुपैति ।
तद्भिन्नवेदिनिन्दा[1] द्विजस्य विश्राम्यति चित्ते देव[2] कस्य ॥५७७॥
कपिलो[3] यदि वाञ्छति वित्तिं[4] मचिति[5] सुरगुरुगीर्गुम्फेष्[6]वेष[7] पतति ।
चैतन्यं बाह्यग्राह्यरहितमुपयोगि[8] कस्य वद[9] तत्र[10] विदित[11] ॥५७८॥
भूपवनवनानल[12]तत्त्वकेषु धिषणो[13] निगृणाति[14] विभोगमेषु[15] ।
न पुनर्विदि[16] [17]तद्विपरीतधर्मधाम्नि ब्रवीति तत्तस्य[18] कर्म ॥५७९॥

---

जैसे परिमाणका अतिशय आकाशमें पाया जाता है वैसे ही बुद्धिका अत्यन्त विकास मनुष्यमें होता है। इसलिए मीमांसकने जो सर्वज्ञकी आलोचना की है वह हे देव! किसीके भी चित्तमें नहीं उतरती ॥५७७॥

**भावार्थ**—जिसमें उतार-चढ़ाव पाया जाता है उसका उतार-चढ़ाव कहीं अपनी अन्तिम सीमाको अवश्य पहुँचता है। जैसे परिमाण ( माप )में उतार-चढ़ाव देखा जाता है अतः उसका अन्तिम उतार परमाणुमें पाया जाता है और अन्तिम चढ़ाव आकाशमें; क्योंकि परमाणुसे छोटी और आकाशसे बड़ी कोई वस्तु नहीं है। वैसे ही ज्ञान भी घटता-बढ़ता है किसीमें कम ज्ञान पाया जाता है और किसीमें अधिक। अतः किसी मनुष्यमें ज्ञानका भी अन्तिम विकास अवश्य होना चाहिए और जिसमें उसका अन्तिम विकास होता है वही सर्वज्ञ है।

यदि सांख्य अचेतन प्रकृतिमें ज्ञान मानता है तो यह तो चार्वाकके वचनोंका ही प्रतिपादन हुआ; क्योंकि चार्वाक पञ्चभूतसे आत्मा और ज्ञानकी उत्पत्ति मानता है। और यदि चैतन्य बाह्य वस्तुओंको नहीं जानता तो हे विश्वप्रसिद्ध देव! आप बतलावें कि वह कैसे किसीके लिए उपयोगी हो सकता है? ॥५७८॥

**भावार्थ**—सांख्य आत्मा मानता है और उसको चैतन्य स्वरूप भी स्वीकार करता है किन्तु चैतन्यको ज्ञान-दर्शनरूप नहीं मानता। उसके मतसे ज्ञान जड़ प्रकृतिका धर्म है। इसीसे मुक्तावस्थामें चैतन्यके रहनेपर भी वह ज्ञानका अस्तित्व नहीं मानता। इसी बातको लेकर ऊपर ग्रन्थकारने सांख्यमतकी आलोचना की है।

चार्वाकगुरु बृहस्पति पृथ्वी, जल, अग्नि, और वायु तत्त्वसे ज्ञान बतलाता है किन्तु उनसे विरुद्ध धर्मवाले आत्मामें ज्ञान नहीं बतलाता। यह उस चार्वाकका महत्पाप है ॥५७९॥

**भावार्थ**—चार्वाक आत्मा नहीं मानता। उसका मत है कि पृथिवी जल आदि भूतोंके मिलनेसे एक शक्ति उत्पन्न हो जाती है जिसे लोग आत्मा कहते हैं और शरीरके नष्ट होनेपर उसके साथ ही वह शक्ति भी नष्ट हो जाती है। किन्तु पञ्चभूत और आत्माका स्वभाव बिलकुल अलग है। ऐसा नियम है कि जो जिससे उत्पन्न होता है उसके गुण उसमें पाये जाते हैं, मगर पञ्चभूतोंका एक भी गुण आत्मामें नहीं पाया जाता और जो गुण आत्मामें पाये जाते हैं उनकी गन्ध भी पञ्चभूतोंमें नहीं मिलती है। फिर भी ज्ञानको आत्माका गुण नहीं मानता और उसे पञ्चभूतका कार्य बतलाता है। यह उसका कथन ठीक नहीं है।

---

१. जिनविषये निन्दा। २. देवस्य अ०। ३. सांख्यः। ४. ज्ञानम्। ५. अचेतने प्रधाने। ६. चार्वाकवचनेषु चतुर्भूतस्थानेषु। ७. कपिलः। ८. कार्यकारकम्। ९. त्वं वद। १०. चैतन्ये। ११. हे विख्यात। १२. जल। १३. चार्वाकगुरुबृहस्पतिः। १४. कथयति। १५. विभेदनं ज्ञानम्। १६. आत्मनि ज्ञानं न कथयति। १७. तस्मात् अचेतनात् विपरीतधर्मशालिनि। १८. चार्वाकस्य पापं वर्तते।

विज्ञानप्रमुखाः सन्ति विमुक्ति[1] न गुणाः किल यस्य नयोऽत्र वाचि ।
तस्यैव पुमानपि[2] नैव तत्र दाहाद्दहनः[3] क इहापरोऽत्र ॥५८०॥
धरणीधरधरणिप्रभृति सृजति[4] न तु निपगृहादि[5] गिरिशः[6] करोति ।
चित्रं तथापि यत्तद्वचांसि लोकेषु भवन्ति महायशांसि ॥५८१॥
पुरुषत्रयमबलासक्तमूर्ति तस्मात्परस्तु[7] गतकार्यकीर्तिः[8] ।
एवं सति नाथ कथं हि सूत्रमाभाति हिताहितविषयमत्र ॥५८२॥
सोऽहं[9] योऽभूवं बालवयसि निश्चिन्वन्क्षणिकमतं जहासि ।
संतानोऽप्यत्र न वासनापि यद्यन्वयभावस्तेन नापि ॥५८३॥
चित्तं[10] न विचारकमक्षजनितमखिलं सविकल्पं स्वांशपतितम् ।
उदितानि[11] वस्तु नैव स्पृशन्ति शाक्याः कथमात्महितान्युशन्ति[12] ॥५८४॥

जिस सांख्यका यह सिद्धान्त है कि मुक्त आत्मामें ज्ञानादिक गुण नहीं हैं उसके मतमें आत्मा भी नहीं ठहरता; क्योंकि जैसे बिना उष्ण गुणके अग्नि नहीं रह सकती वैसे ही ज्ञानादिक गुणोंके बिना आत्मा भी नहीं रह सकता ॥५८०॥

[ *इस प्रकार सांख्य मतकी आलोचना करके ईश्वरकी आलोचना करते हैं—* ]

महेश्वर पृथ्वी, पहाड़ वगैरहको तो बनाता है किन्तु मकान, घट वगैरहको नहीं बनाता। आश्चर्य है फिर भी उसके वचन लोकमें प्रसिद्ध हो रहे हैं ॥५८१॥

**भावार्थ**—आशय यह है कि यदि ईश्वर पृथ्वी, पहाड़ वगैरहको बना सकता है तो घट, पट वगैरहको भी बना सकता है फिर उसके लिए कुम्हार और जुलाहे वगैरहकी जरूरत नहीं होनी चाहिए। जैसे उसने मनुष्योंके लिए पृथ्वी वगैरहकी सृष्टि की वैसे ही वह इन चीजोंको क्यों नहीं बना देता। इससे मालूम होता है कि जगत्का कोई रचयिता नहीं है, आश्चर्य है कि फिर भी मनुष्य उसकी बातको माने जाते हैं।

ब्रह्मा, विष्णु और महेश तो तिलोत्तमा, लक्ष्मी और गौरीमें आसक्त हैं तथा जो परम शिव है वह कायरहित है। हे नाथ! ऐसी स्थितिमें उनसे हित और अहितको बतलानेवाले सूत्रोंका उद्गम कैसे हो सकता है ॥५८२॥

[ *इस प्रकार वैदिक मतकी आलोचना करके बौद्ध मतकी आलोचना करते हैं—* ]

जो मैं बचपनमें था वही मैं हूँ ऐसा निश्चय करनेसे क्षणिक मत नहीं ठहरता। यदि कहा जाये कि सन्तान या वासनासे ऐसी प्रतीति होती है कि मैं वही हूँ तो न तो सन्तान ही बनती है और न वासना ही सिद्ध होती है। यदि ऐसा मानते हो कि पूर्व क्षणका उत्तर क्षणमें अन्वय पाया जाता है तो आत्माको ही क्यों नहीं मान लेते। तथा इन्द्रियोंसे उत्पन्न होनेवाला निर्विकल्प

१. मुक्तजीवे विज्ञानादयो गुणा न वर्तन्ते। २. जीवोऽपि नास्ति तस्मिन् मते। ३. उष्णत्वं विना यथाऽग्निर्नास्ति तथा विज्ञानादिगुणान् विना आत्माऽपि नास्ति। ४. गिरिप्रभृति यदि वस्तु सृजति तर्हि घटादयोऽपि सृजति। ५. घट। ६. शिवः। ७. परः परम एव शिवः। ८. कायरहितः। ९. 'सोऽहम्' इति मन्यसे चेत्तर्हि त्वं क्षणिकमतं जहासि। यो जीवः प्रथमसमये विध्वंसं प्राप्तः तस्माज्जीवादन्यो जीवो नोत्पद्यते एवंविधः सन्ताननिषेधोऽस्ति तव मते। यथा सन्तानो नास्ति तथा वासनाऽपि नास्ति। तर्हि कथमुच्यते वासनाया ज्ञानमुत्पद्यते। १०. ज्ञानम्। 'तच्च निर्विकल्पकमिव सविकल्पमपि न विचारकम्, पूर्वापरपरामर्शशून्यत्वादभिलापसंसर्गरहितत्वात्।'—अष्टसह० पृ० ७४। ११. बौद्धोक्तानि। १२. वदन्ति।

अद्वैतं तत्त्वं वदति कोऽपि सुधियां धियमातनुते न सोऽपि ।
यत्पक्षहेतुदृष्टान्तवचनसंस्थाः कुतोऽत्र शिवशर्मसदन ॥५८५॥
हेतावनेकधर्मप्रवृत्तिराख्याति जिनेश्वरतत्त्वसिद्धिम् ।
अन्यत्पुनरखिलमतिव्यतीतमुत्क्राति सर्वमुरुनयनिकेत ॥५८६॥

---

ज्ञान तो विचारक नहीं है और जो सविकल्प ज्ञान है वह निर्विकल्पके द्वारा गृहीत वस्तुमें ही प्रवृत्ति करता है। तथा वचन वस्तुको नहीं कहते। ऐसी स्थितिमें बौद्ध मतानुयायी कैसे आत्म-हितका कथन करते हैं ॥५८३-५८४॥

**भावार्थ**—बौद्ध क्षणिकवादी हैं। उनके मतसे प्रत्येक वस्तु क्षण-क्षणमें नष्ट होती है। किन्तु वस्तुके प्रथम क्षणके नाश हो जानेपर दूसरा क्षण और दूसरे क्षणके नष्ट हो जानेपर तीसरा क्षण उत्पन्न होता रहता है और इस तरहसे क्षणसन्तान चलती रहती है, ऐसा वे मानते हैं। किन्तु यदि वस्तुके पूर्व क्षण और उत्तर क्षणमें एकत्व नहीं माना जाता है तो वह सन्तान बन नहीं सकती और यदि एकत्व माना जाता है तो वस्तु स्थायी सिद्ध हो जाती है। उसी एकत्वके कारण बड़े होनेपर भी हमें बचपनकी बातोंकी स्मृति रहती है और हममें-से प्रत्येक यह अनुभव करता है कि जो मैं बच्चा था वही मैं अब युवा या वृद्ध हूँ। यह तो हुई बौद्धके क्षणिकवादकी आलोचना। बौद्ध ज्ञानको निर्विकल्पक मानता है और उसे ही वस्तुग्राही कहता है। तथा निर्विकल्पकके बाद जो सविकल्पक ज्ञान होता है उसे अवस्तुग्राही कहता है। निर्विकल्पकका विषय क्षणिक निरंश वस्तु है जो बौद्धकी दृष्टिसे वास्तविक है और सविकल्पक स्थिर स्थूलाकार वस्तुको ग्रहण करता है जो उसकी दृष्टिसे अवास्तविक है। चूँकि शब्द भी स्थिर स्थूलाकार वस्तुको ही कहता है, निरंश वस्तुको वह कह ही नहीं सकता। अतः बौद्ध शब्दको भी अवस्तुग्राही मानता है, इसी लिए बौद्धमतमें शब्दको प्रमाण नहीं माना गया। ऐसी स्थितिमें जब निर्विकल्पक और सविकल्पक अविचारक हैं और शब्द वस्तुग्राही नहीं है तब बौद्ध मतमें हिताहितका विचार और उपदेश कैसे सम्भव हो सकता है?

*[अब अद्वैतवादकी आलोचना करते हैं—]*

हे शिव सुखके मन्दिर! जो अद्वैत तत्त्वका कथन करता है वह भी बुद्धिमानोंके विचारोंको प्रभावित नहीं करता; क्योंकि अद्वैतवादमें पक्ष, हेतु और दृष्टान्त वगैरह कैसे बन सकते हैं? अद्वैतकी सिद्धिके लिए हेतुको मान लेनेसे उसके साथमें हेतुके पक्षधर्मत्व सपक्ष-सत्त्व आदि अनेक धर्म मानने पड़ते हैं और उनके माननेसे जिनेश्वरके द्वारा कहे गये द्वैत तत्त्वकी ही सिद्धि होती है—अद्वैतकी नहीं। अतः हे अनेकान्त नयके प्रणेता! तुम्हारे द्वारा कहे गये तत्त्वोंके सिवा शेष सब बुद्धिसे परे प्रतीत होता है, वह बुद्धिको नहीं लगता ॥५८५-५८६॥

---

१. पक्षधर्मत्वसपक्षसत्त्वादि। 'हेतोरद्वैतसिद्धिश्चेद्द्वैतं स्याद्धेतुसाध्ययोः। हेतुना चेद्विना सिद्धिर्द्वैतं वाङ्मात्रतो न किम् ॥ २६ ॥—आप्तमीमांसा। २. हे अनेकान्तनयनिकेत।

मनुजत्वपूर्वनयनायकस्य भवतो भवतोऽपि गुणोत्तमस्य[1] ।
ये द्वेषकलुषधिषणा भवन्ति ते अड्जं मौक्तिकमपि रहन्ति[2] ॥५८७॥
मान्तेषु बहुत्वं यः सहेत पर्यायैविभूतिष्वपि महेत[4] ।
नूनं द्रुहिणादिषु दैवतेषु कं[5] तस्य स्फुटति तथाविधेषु[6] ॥५८८॥
दीक्षासु[7] तपसि वचसि त्वयि[8] नयदिहैक्यं सकलगुणैरहीन[9] ।
तस्माद्वेमि[10] जगतां त्वमेव नाथोऽसि बुधोचितपादसेव ॥५८९॥
देव त्वयि कोऽपि तथापि विमुखचित्तो यदि विदलितमदनविशिख[11] ।
निन्द्यः स एव घूके दिवापि विहशीन[12]मुपालभते न कोऽपि ॥५९०॥
निष्किञ्चनोऽपि जगते न कानि जिन दिशसि[13] निकामं कामितानि ।
नैवात्र चित्रमथवा समस्ति वृष्टिः किमु खादिह नो[14] चकास्ति ॥५९१॥

भावार्थ—अद्वैतवादी केवल एक ब्रह्म तत्त्व ही मानते हैं किन्तु विना द्वैतके अद्वैतकी सिद्धि नहीं हो सकती; क्योंकि अद्वैतकी सिद्धि बिना प्रमाणके तो हो नहीं सकती और प्रमाण माननेसे अनुमान वगैरह प्रमाण मानने पड़ेंगे। तथा बिना पक्ष हेतु और दृष्टान्तके अनुमान नहीं होता और इन सबके माननेसे अद्वैत नहीं ठहरता।

हे देव ! आप गुणोंसे श्रेष्ठ हैं, फिर भी चूँकि आप अनेकान्त नयके नायक होनेसे पूर्व मनुष्य थे इसलिए जिनलोगोंकी मति द्वेषसे कलुषित है वे मोतीको इसलिए छोड़ देते हैं चूँकि वह जड़ या जलसे पैदा हुआ है ॥५८७॥ हे पूज्य ! जिन्हें अनुक्रमसे होनेवाले बहुत आप्तोंकी मान्यता सह्य नहीं है निश्चय ही अवतार रूप ब्रह्मादि देवताओंके सामने वे अपना सिर फोड़ते हैं। अर्थात् अनेक देवताओंको जब वे नहीं मानते और फिर भी ब्रह्मादिक देवताओं को सिर नवाते हैं अतः उनका उन्हें सिर नवाना सिर फोड़ना ही जैसा है ॥५८८॥

हे सकलगुणशाली ! आपके चारित्रमें, तपमें और वचनमें एकरूपता पायी जाती है अर्थात् जैसा आप कहते हैं वैसा ही आचरण भी करते हैं। इस लिए हे देवताओंसे पूजित चरण ! आप ही तीनों लोकोंके स्वामी हैं, ऐसा मैं मानता हूँ ॥ ५८९ ॥

कामके बाणोंको चूर्ण कर डालनेवाले हे देव ! फिर भी यदि कोई तुमसे विमुख रहता है तो वही निन्दाका पात्र है, क्योंकि दिनके समय उल्लूके अन्धे हो जानेपर कोई भी सूर्यको दोष नहीं देता ॥ ५९० ॥

हे जिन ! आपके पास कुछ भी नहीं है फिर भी आप जगत्‌की किन इच्छित वस्तुओं-को नहीं देते ? अर्थात् सभीको इच्छित वस्तु देते हैं। किन्तु इसमें कोई अचरजकी बात नहीं है, क्योंकि आकाशके पास कुछ भी नहीं है फिर भी क्या आकाशसे वर्षा होती नहीं देखी जाती ॥ ५९१ ॥

---

१. अयं जिनः पूर्वं नरः। २.'तस्यात्मजस्तस्य पितेति देव त्वां येऽवगायन्ति कुलं प्रकाश्य। तेऽद्यापि नन्वा-श्मनमित्यवश्यं पाणौ कृतं हेम पुनस्त्यजन्ति ॥२३॥'—विषापहार। हरन्ति आ.। त्यजन्ति। ३. अनुक्रमेणोत्पन्नेषु। ४. हे पूजाप्राप्त। ५. मस्तकम्। ६. बहुषु हरिहरादिषु। ७. चारित्रेषु। ८. त्वयि विषये निश्चयेन चारित्रादी-नामैक्यं वर्तते। ९. परिपूर्ण। १०. अहं जानामि। ११. हे चूर्णीकृत मदनवाण। १२. घूके अन्धे सति इनं सूर्यं न कोऽपि निन्दति। १३. अपि तु सर्वाणि वाञ्छितवस्तूनि त्वं ददासि। १४. किं न भवति। 'तुङ्गात् फलं यत्तदकिंचनाच्च प्राप्यं समृद्धान्न धनेश्वरादेः। निरम्भसोऽप्युच्चतमादिवाद्रेर्नैकापि निर्याति धुनी पयोधेः ॥ १९ ॥—विषापहार।

पद्धतिका—

इति तदमृतनाथ[1] स्मरशरमाथ[2] त्रिभुवनपतिमतिकेतन।
मम दिश जगदीश प्रशमनिवेश त्वत्पदनुतिहृदयं जिन ॥५९२॥

घत्ता—

अमरतरुणीनेत्रानन्दे महोत्सवचन्द्रमाः
स्मरमद[3]मयध्वान्तध्वंसे मतः[4] परमोऽर्यमा[5]।
अदयहृदयः कर्मारातौ नते[6] च कृपात्मवा-
निति विसदृश[7]व्यापारस्त्वं तथापि भवान्महान् ॥५९३॥

अनन्तगुणसंनिधौ[8] नियतबोध[9]संपन्निधौ
श्रुताब्धिबुधसंस्तुते परिमितोक्तवृत्तस्थिते।
जिनेश्वर सतीदृशे त्वयि मयि स्फुटं तादृशे
कथं सदृशनिश्चयं तदिदमस्तु वस्तुद्वयम् ॥५९४॥

[10]तदलमतुल[11]त्वादृग्वाणीपथस्तवनोचिते
त्वयि गुणगणापात्रैः[12] स्तोत्रैर्जडस्य हि मादृशः।
प्रणतिविषये व्यापारेऽस्मिन्पुनः सुलभे जनः
कथमयमवागास्तां[13] स्वामिन्नतोऽस्तु नमोऽस्तु ते ॥५९५॥

---

इसलिए हे मोक्षपति ! हे कामके नाशक ! हे तीनों लोकोंके स्वामियोंकी बुद्धिके धाम ! हे शान्तिके आगार ! हे जगत्‌के स्वामी जिनेन्द्रदेव ! मुझे अपने चरणोंमें नमस्कार भाव रखने वाला हृदय प्रदान करें अर्थात् मेरा हृदय सदा आपके चरणोंमें लीन रहे ॥ ५९२ ॥

हे जिनदेव ! देवांगनाओंके नेत्रोंको आनन्दित करनेके लिए आप आनन्ददायक चन्द्रमा हैं और कामके मदरूपी अन्धकारको नष्ट करनेके लिए उत्कृष्ट सूर्य हैं। कर्मरूपी शत्रुके लिए आपके हृदयमें थोड़ी भी दया नहीं है किन्तु जो आपको नमस्कार करता है उस पर आप कृपालु हैं। इस प्रकार विपरीत आचरण करनेपर भी आप महान् हैं ॥ ५९३ ॥

आप अनन्त गुण युक्त हैं और मैं थोड़ेसे परिमित ज्ञानका स्वामी हूँ। श्रुतके समुद्र विद्वानोंने आपका स्तवन किया है और मेरे पास परिमित शब्द हैं और परिमित छन्द हैं। हे जिनेश ! आपमें और मुझमें इतने स्पष्ट अन्तरके होते हुए हम दोनों समान कैसे हो सकते हैं। इस लिए मैं और आप दोनों दो वस्तु हैं ॥ ५९४ ॥ अतः हे अनुपम ! जब आप उस प्रकारके विद्वानोंके द्वारा स्तवन करनेके योग्य हैं, तो मुझ मूर्खका उन स्तवनोंसे, जो तुम्हारे गुण-समूहको छूते भी नहीं, आपका स्तवन करना व्यर्थ है। किन्तु स्तवन करना कठिन होते हुए भी आपको नमस्कार करना तो सरल है उसमें मैं मूक कैसे रह सकता हूँ। अतः हे स्वामिन्! मैं आपको नमस्कार करता हूँ ॥ ५९५ ॥

---

१. मोक्ष। २. कामविध्वंसक। ३. काममदमयो योऽसौ अन्धकारः तस्य विनाशे। ४. कथितः। ५. सूर्यः। ६. नम्रे नरे। ७. विपरीत। ८. त्वयि। ९. मयि। १०. स्तोत्रैर्मादृशो जडस्य। ११. भवत्सदृशवाणीमार्गयोग्ये। १२. अस्थानभूतैः स्तोत्रैरलम्। १३. मौनवान् कथं तिष्ठतु अयं मल्लक्षणः।

जगन्नेत्रं पात्रं निखिलविषयज्ञानमहसां[1]
महान्तं त्वां सन्तं [2]सकलनयनीतिस्मृतगुणम् ।
महोदारं सारं विनतहृदयानन्दविषये
ततो याचे नो चेद्भवसि भगवन्नर्थिविमुखः ॥५१६॥
मनुजदिविजलक्ष्मीलोचनालोकलीला-[3]
श्चिरमिह [4]चरितार्थास्त्वत्प्रसादात्प्रजाताः ।
हृदयमिदमिदानीं स्वामिसेवोत्सुकत्वात्
[5]सहवसतिसनाथं [6]छात्रमित्रे विधेहि ॥५१७॥

*इत्युपासकाध्ययने स्तवनविधिर्नाम सप्तत्रिंशत्तमः कल्पः ।*

[7]सर्वाक्षरनामाक्षरमुख्याक्षराद्यै[8][9][10]कवर्णविन्यासात् ।
[11]निगिरन्ति जपं केचिदहं तु [12]सिद्धकमैरेव ॥५१८॥
पातालमर्त्यखेचरसुरेषु सिद्धकमस्य मन्त्रस्य ।
[13]अधिगानात्संसिद्धेः [14]समवाये देवयात्रायाम्[15] ॥५१९॥

---

हे भगवन्! आप जगत्के नेत्र हैं, समस्त पदार्थोंके ज्ञानरूपी तेजके स्थान हैं, महान् हैं, समस्त शास्त्रोंमें आपके गुणोंका स्मरण किया गया है, विनत मनुष्योंके हृदयोंको आनन्द देनेके विषयमें आप महान् उदार हैं अतः मैं आपसे प्रार्थना करता हूँ। आशा है आप याचकसे विमुख नहीं होंगे अर्थात् मेरी प्रार्थना पूरी करेंगे ॥ ५९६ ॥

भगवन्! आपके प्रसादसे मानवीय और दैवीय लक्ष्मीके नेत्रोंके द्वारा मेरे देखे जानेकी शोभा तो बहुत काल हुआ तभी चरितार्थ हो चुकी है। अब तो मेरा हृदय आपकी सेवाके लिए उत्सुक है इसलिए अब मेरे हृदयको अपने निवाससे सनाथ करो–मेरे हृदयमें बसो ॥५९७॥

*इस प्रकार उपासकाध्ययनमें स्तवन विधि नामक सैंतीसवाँ कल्प समाप्त हुआ।*

*[ अब जप करनेकी विधि बतलाते हैं—]*

## जप विधि

कोई 'णमो अरहंताणं' आदि पूरे नमस्कार मन्त्रसे जाप करना बतलाते हैं। कोई अरहन्त सिद्ध आदि पंच परमेष्ठीके नामाक्षरोंसे जप करना बतलाते हैं। कोई पंच परमेष्ठीके वाचक 'अ सि आ उ सा' इन मुख्य अक्षरोंसे जप करना बतलाते हैं। कोई 'ओं' अथवा 'अ' आदि एक अक्षरसे जप करना बतलाते हैं, किन्तु मैं (ग्रन्थकार) तो अनादि सिद्ध पञ्चनमस्कार मन्त्रसे ही जप करना बतलाता हूँ ॥५९८॥

पाताल लोकमें अर्थात् भवनवासी और व्यन्तर देवोंमें, मनुष्योंमें, विद्याधरोंमें, वैमानिक देवोंमें, जनसमाजमें और देवयात्रामें सिद्धिदायक होनेसे पञ्चनमस्कारमन्त्रका सर्वत्र अति आदर है ॥५९९॥

---

१. तेजसां पात्रं स्थानम्। २. समस्तसिद्धान्तचिन्तितगुणम्। ३. शोभाः। ४. सत्यार्थाः ५. सह निवाससहितं मदीयं हृदयं कुरु। ६. छात्रा एव मित्राणि यस्य। ७. 'णमो अरहंताणं' इत्यादि पञ्चत्रिंशत्। ८. अरहंत सिद्ध इत्यादि। ९. अ सि आ उ सा। १०. ॐ अथवा अ। ११. कथयन्ति। १२. अनादिसंसिद्धपञ्चत्रिंशदक्षरैः। १३. अधिकप्रतिपत्तेः–आदरात्। अविगानात्' इत्यपि पाठः। अविगानात्–अविप्रतिपत्तेः। १४. समाजे–संघमेलापके। १५. तीर्थंकरपूजायाम्।

पुष्पैः पर्वभिरम्बुजबीजस्वर्णार्क[1][2]कान्तरत्नैर्वा ।
निष्कम्पिताक्षवलयः पर्यङ्कस्थो जपं कुर्यात् ॥६००॥
अङ्गुष्ठे मोक्षार्थी तर्जन्यां (न्या) साधु बहिरिदं नयतु ।
इतरास्वङ्गुलिषु पुनर्बहिरन्तश्चैहिकापेक्षी ॥६०१॥
वचसा वा मनसा वा कार्यो जाप्यः समाहितस्वान्तैः[3] ।
शतगुणमाद्ये पुण्यं सहस्रसंख्यं द्वितीये तु ॥६०२॥
नियमितकरणग्रामः स्थानासनमानसप्रचारज्ञः ।
पवनप्रयोगनिपुणः सम्यक्सिद्धो भवेदशेषज्ञः ॥६०३॥

---

पर्यङ्क आसनसे बैठकर, इन्द्रियोंको निश्चल करके पुष्पोंसे या अँगुलीके पर्वोंसे या कमल-गट्टोंसे या सोने अथवा सूर्यकान्त मणिके दानोंसे अथवा रत्नोंसे नमस्कारमन्त्रका जप करना चाहिए ॥६००॥

मोक्षके अभिलाषी जपकर्ताको अँगूठेपर मालाको रखकर अंगूठेके पासवाली तर्जनी अंगुलीके द्वारा सम्यक् रीतिसे बाहरकी ओर जप करना चाहिए। और इस लोकसम्बन्धी किसी शुभ कामना-की पूर्तिके अभिलाषीको शेष अंगुलियोंके द्वारा बाहर या अन्दरकी ओर जप करना चाहिए ॥६०१॥

मनको स्थिर करके वचनसे या केवल मनसे जप करना चाहिए। बोल-बोलकर जप करने-से सौगुना पुण्य होता है, किन्तु मन-ही-मनमें जप करनेसे हजारगुना पुण्य होता है ॥६०२॥

जो अपनी इन्द्रियोंको वशमें कर लेता है और स्थान, आसन व मनके संचारको जानता है तथा श्वासोच्छ्वासके प्रयोगमें सिद्धहस्त होता है, वह सर्वज्ञ होकर सिद्ध पद प्राप्त करता है ॥६०३॥

**भावार्थ**—आशय यह है कि जपके लिए इन्द्रियोंको वशमें करना आवश्यक है, उसके बिना जपमें मन नहीं लग सकता और बिना मन लगाये जप हो भी नहीं सकता। क्योंकि यदि मुँहसे मन्त्र बोलते रहने और हाथोंसे गुरिया सरकाते रहनेपर भी मन कहीं और भटकता है तो वह जाप बेकार है। ऊपर जो मनसे और वचनसे जाप करना बतलाया है उसका यह मतलब नहीं है कि वचनसे किये जानेवाले जापमें मनको छुट्टी रहती है। मन तो हर हालतमें उसीमें लगा रहना चाहिए। किन्तु मनसे किये जानेवाले जापमें वचनका उच्चारण नहीं किया जाता और मन-ही-मनमें जप किया जाता है। अतः प्रत्येक प्रकारके जपके लिए इन्द्रियोंपर काबू होना आवश्यक है। दूसरे, स्थान कैसा होना चाहिए, आसन किस प्रकार लगाना चाहिए, मन्त्रोंमें मनका संचार किस प्रकार करना चाहिए—ये सब बातें भी जप करनवालेको ज्ञात होनी चाहिए। तथा जप करते समय श्वासकी गति कैसी होनी चाहिए, कितने समयमें श्वास लेना चाहिए और

---

१. कमलगट्टा। २. सूर्यकान्त। ३. सव्याहितस्वान्तैः अ. आ. ज. मु.। 'विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः। उपांशुः स्याच्छतगुणैः साहस्रो मानसः स्मृतः ॥—मनस्मृतिः २-८५। 'वाचाप्युपांशु व्युत्सर्गे कार्यो जप्यः स वाचिकः। पुण्यं शतगुणं चैत्तः सहस्रगुणमावहेत् ॥ २४ ॥—अनगारधर्मा० अ. ९।

इममेव मन्त्रमन्ते पञ्चत्रिंशत्प्रकारवर्णस्थम् ।
मुनयो जपन्ति विधिवत्परमपदावाप्तये नित्यम् ॥६०४॥
मन्त्राणामखिलानामयमेकः कार्यकृद्भवेत्सिद्धः ।
[1]अस्यैकदेशकार्य[2] परे तु कुर्युर्न ते सर्वे ॥६०५॥
कुर्यात्करयोर्न्यासं कनिष्ठिकान्तः[3] प्रकारयुगलेन ।
तदनु हृदाननमस्तककवचाख्यविधिर्विधातव्यः ॥६०६॥
संपूर्णमतिस्पष्टं सनादमानन्दसुन्दरं जपतः ।
सर्वसमीहितसिद्धिर्निःसंशयमस्य जायेत ॥६०७॥

---

कब छोड़ना चाहिए, इस क्रियाका अच्छा अभ्यास होना चाहिए। जो इन सब बातोंका अभ्यासी होकर जप करता है वह सच्चा ध्यानी बन कर मोक्ष प्राप्त कर लेता है।

मुनि भी मोक्षकी प्राप्तिके लिए इसी पैंतीस अक्षरोंके नमस्कारमन्त्रको सदा विधिपूर्वक जपते हैं ॥६०४॥ यह अकेला ही सब मन्त्रोंका काम करता है किन्तु अन्य सब मन्त्र मिलकर भी इसका एक भाग भी काम नहीं करते ॥६०५॥

*[ जप प्रारम्भ करनेसे पूर्व सकलीकरण विधान ]*

दोनो हाथोंकी अँगुलियोंपर अँगूठेसे लेकर कनिष्ठिका अंगुलीतक दो प्रकारसे मन्त्रका न्यास करना चाहिए। उसके पश्चात् हृदय, मुख और मस्तकका सकलीकरण विधि करना चाहिए ॥६०६॥

**भावार्थ**—'ॐ ह्रां णमो अरहंताणं ह्रां अंगुष्ठाभ्यां नमः, यह मन्त्र पढ़कर दोनों अंगूठोंको पानीमें डुबोकर शुद्ध करे। 'ॐ ह्रीं णमो सिद्धाणं ह्रीं तर्जनीभ्यां नमः' इस मन्त्रको पढ़कर दोनों तर्जनी अँगुलियोंको शुद्ध करे। 'ॐ ह्रूं णमो आइरियाणं ह्रूं मध्यमाभ्यां नमः' इस मन्त्रको पढ़कर दोनों बीचकी अंगुलियोंको शुद्ध करे। 'ॐ ह्रौं णमो उवज्झायाणं ह्रौं अनामिकाभ्यां नमः' इस मन्त्रको पढ़कर दोनों अनामिका अँगुलियोंको शुद्ध करे। 'ॐ ह्रः णमो लोए सव्वसाहूणं, ह्रः कनिष्ठिकाभ्यां नमः' इस मन्त्रको पढ़कर दोनों कनिष्ठिका अँगुलियोंको शुद्ध करे। फिर 'ॐ ह्रीं ह्रूं ह्रौं ह्रः करतलकरपृष्ठाभ्यां नमः' इस मन्त्रको पढ़ दोनों हथेलियोंको दोनों तरफसे शुद्ध करे। 'ॐ ह्रां णमो अरहंताणं ह्रां मम शीर्षं रक्ष रक्ष स्वाहा' इस मन्त्रको पढ़कर मस्तकपर पुष्प डाले। 'ॐ ह्री णमो सिद्धाणं ह्रीं मम वदनं रक्ष रक्ष स्वाहा' इस मन्त्रको पढ़कर अपने मुखपर पुष्प डाले। 'ॐ ह्रूं 'णमो आइरियाणं ह्रूं हृदयं रक्ष रक्ष स्वाहा' इस मन्त्रको पढ़कर छातीपर पुष्प डाले। 'ॐ ह्रौं णमो उवज्झायाणं ह्रौं मम नाभिं रक्ष रक्ष स्वाहा' इस मंत्रको पढ़कर नाभिका स्पर्श करे। 'ॐ ह्रः णमो लोए सव्वसाहूणं ह्रः मम पादौ रक्ष रक्ष स्वाहा' इस मंत्रको पढ़कर पैरोंपर पुष्प डाले। इस तरह यह सकलीकरण क्रिया मन्त्र जपनेसे पूर्व करना चाहिए।

*[ नमस्कार मन्त्रके जपका फल तथा माहात्म्य ]*

जो आनन्दपूर्वक प्राणवायुके साथ सम्पूर्णमन्त्रका अत्यन्त स्पष्ट जप करता है उसके सब मनोरथ पूर्ण होते हैं। इसमें कोई सन्देह नहीं है ॥६०७॥

---

१. मन्त्रस्य। २. 'णमो अरहंताणं' एतावन्मात्रेण। ३. 'कनिष्ठिकातः—अ. ज.।

मन्त्रोऽयमेव सेव्यः परत्र मन्त्रे फलोपलम्भेऽपि ।
यद्यप्यग्रे विटपी फलति तथाप्यस्य सिच्यते मूलम् ॥६०८॥
अत्रामुत्र च नियतं कामितफलसिद्धये परो मन्त्रः ।
नाभूदस्ति भविष्यति गुरुपञ्चकवाचकान्मन्त्रात् ॥६०९॥
अभिलषितकामधेनौ दुरितद्रुमपावके हि मन्त्रेऽस्मिन् ।
दृष्टादृष्टफले सति परत्र मन्त्रे कथं सजतु ॥६१०॥
इत्थं मनो मनसि बाह्यमबाह्यवृत्ति कृत्वा हृषीकनगरं मरुतो नियम्य ।
सम्यग्जपं विदधतः सुधियः प्रयत्नाल्लोकत्रयेऽस्य कृतिनः किमसाध्यमस्ति ॥६११॥

*इत्युपासकाध्ययने जपविधिर्नामाष्टत्रिंशत्तमः कल्पः ।*

आदिध्यासुः[1] परंज्योतिरीप्सुः[2] स्तद्धाम शाश्वतम् ।
इमं ध्यानविधिं यत्नादभ्यस्यतु समाहितः ॥६१२॥
तत्त्वचिन्तामृताम्भोधौ दृढमग्नतया मनः ।
बहिर्व्यासौ जडं कृत्वा द्वयमासनमाचरेत् ॥६१३॥
सूक्ष्मप्राणैर्यमायामः[3] सन्नः[4] सर्वाङ्गसंचरः ।
ग्रावोत्कीर्ण[5] इवासीत ध्यानानन्दसुधां लिहन् ॥६१४॥

---

अन्य मन्त्रोंसे फल प्राप्ति होनेपर भी इसी नमस्कारमन्त्रकी आराधना करनी चाहिए। क्योंकि यद्यपि वृक्षके ऊपरके भागमें फल लगते हैं फिर भी उसकी जड़ ही सींची जाती है। अर्थात् यह मन्त्र सब मन्त्रोंका मूल है इसलिए इसीकी आराधना करनी चाहिए ॥६०८॥

पंच परमेष्ठीके वाचक इस णमोकार मन्त्रके सिवा इस लोक और परलोकमें इच्छित फलको नियमसे देनेवाला दूसरा मन्त्र न था, न है और न होगा ॥६०९॥ जब यह मन्त्र इच्छित वस्तुके लिए कामधेनु और पापरूपी वृक्षके लिए आगके समान है तथा दृष्ट और अदृष्ट फलको देता है तो अन्य मन्त्रोंमें क्यों लगा जाये। अर्थात् इसी एक मन्त्रका जप करना उचित है ॥६१०॥

इस प्रकार मनको मनमें और इन्द्रियोंके समूहको आभ्यन्तरकी ओर करके तथा श्वासोच्छ्वासका नियमन करके जो बुद्धिमान् प्रयत्नपूर्वक सम्यग् जप करता है उस कर्मठ व्यक्तिके लिए तीनों लोकोंमें कुछ भी असाध्य नहीं है ॥६११॥

*इस प्रकार उपासकाध्ययनमें जपविधि नामका अड़तीसवाँ कल्प समाप्त हुआ।*

[ *अब ध्यानकी विधि बतलाते हैं* ]

## ध्यानविधि

जो अर्हन्त भगवान्का ध्यान करनेका इच्छुक है और उस स्थायी मोक्ष स्थानको प्राप्त करना चाहता है, उसे सावधान होकर प्रयत्नपूर्वक आगे बतलायी गयी ध्यानकी विधिका अभ्यास करना चाहिए ॥६१२॥ तत्त्वचिन्तारूपी अमृतके समुद्रमें मनको ऐसा डुबा दो कि वह बाह्य बातोंमें एकदम जड़ हो जाये और फिर पद्मासन या खड्गासन लगाओ ॥६१३॥

ध्यानरूपी आनन्दामृतका पान करते समय श्वासवायुको बहुत धीमेसे अन्दरकी ओर ले जाना चाहिए और बहुत धीमेसे बाहर निकालना चाहिए। तथा समस्त अंगोंका हलन-चलन एकदम बन्द होना चाहिए। उस समय ध्यानी पुरुष ऐसा मालूम हो मानो कोई पत्थरकी

---

१. आध्यातुमिच्छुः । २. वाञ्छन् । ३. सूक्ष्मउच्छ्वासनिश्वासः, तस्य यमः प्रवेशः आयामो निर्गमः । ४. सन्नः निश्चलः । ५. पाषाणघटितः ।

यदेन्द्रियाणि पञ्चापि स्वात्मस्थानि समासते ।
तदा ज्योतिः स्फुरत्यन्तर्[1] चित्ते[2] निमज्जति ॥६१५॥

चित्तस्यैकाग्रता[3] ध्यानं ध्याताऽत्मा तत्फलप्रभुः ।
ध्येयमात्मागमज्योतिस्तद्विधिर्देहयातना[4] ॥६१६॥

तैरश्चमामरं मार्त्यं नाभसं भौममङ्गजम् ।
[5]सहतु समधीः सर्वमन्तरायं [6]द्वयातिगः ॥६१७॥

[7]नाक्षमित्वमविघ्नाय न [8]क्लीबत्वममृत्यवे ।
तस्मादक्लिश्यमानात्मा परं ब्रह्मैव चिन्तयेत् ॥६१८॥

[10]यत्रायमिन्द्रियग्रामो [11]व्यासङ्गस्तेनाग्रविप्लवम् ।
नाश्नुवीत तमुद्देशं भजेताध्यात्मसिद्धये ॥६१९॥

---

मूर्ति है ॥६१४॥ जब पाँचों इन्द्रियाँ बाह्य व्यापारको छोड़कर आत्मस्थ हो जाती हैं और चित्त अन्तरात्मामें लीन हो जाता है तब अन्तरात्मामें ज्योतिका उदय होता है ॥६१५॥

## ध्यान आदिका स्वरूप

चित्तकी एकाग्रताको ध्यान कहते हैं। आत्मा ध्याता यानी ध्यान करनेवाला है। वही ध्यानके फलका स्वामी है। आत्मा और श्रुतज्ञान ध्येय हैं, ध्यानमें उन्हींका चिन्तन किया जाता है और शरीर तथा इन्द्रियोंपर काबू रखना ध्यानका उपाय है ॥६१६॥

ध्यान करते समय यदि कोई पशुकृत उपसर्ग उपस्थित हो जैसे सुकुमाल मुनिपर शृगालीने किया था, या देवकृत उपसर्ग उपस्थित हो, जैसे भगवान् पार्श्वनाथके ऊपर कमठके जीव व्यन्तर-ने किया था, या मनुष्यकृत उपसर्ग उपस्थित हो जैसे पाण्डवोंपर उनके शत्रुओंने किया था, या आकाशसे अचानक बिजली, पानी और ओला बरसने लगे, या जमीन चुभने लगे अथवा शरीरम ही कोई पीड़ा उत्पन्न हो जाये तो ध्यानी पुरुषको राग-द्वेष न करके सब प्रकारकी बाधाओं-को शान्तिपूर्वक सहना चाहिए ॥६१७॥ ऐसे समय असहनशीलता दिखानेसे विघ्न दूर नहीं हो सकता और न कायरता दिखलानेसे जीवन ही बच सकता है। अतः किसी प्रकारका दुःख न मानकर परमात्माका ही ध्यान करना चाहिए ॥६१८॥

## ध्यानके योग्य स्थान कैसा होना चाहिए

जहाँपर इन्द्रियोंको अन्य पदार्थमें आसक्तिरूपी चोरके द्वारा कोई बाधा प्राप्त न हो अर्थात् इन्द्रियाँ इधर-उधर न भटक कर अपनेमें ही आसक्त रहें, आत्माकी सिद्धिके लिए ऐसे ही स्थानपर ध्यान करना चाहिए ॥ ६१९ ॥

---

१. अन्तरात्मनि। २. मनसि। ३. 'गुप्तेन्द्रियमना ध्याता ध्येयं वस्तु यथास्थितम्। एकाग्रचिन्तनं ध्यानं निर्जरासंवरौ फलम् ॥ ३८ ॥'–तत्त्वानुशासन।–४. त्मा जगज्ज्योति–आ.। ५. करणग्रामनियंत्रणा। ६. सहत अ. ज.। ७. रोषतोषाभ्यां रहितः। ८. असमर्थत्वम्। ९. कातरत्वम्। १०. स्थाने। 'देशः कालश्च सोऽन्वेष्य सा चावस्थानुगम्यताम्। यदा यत्र यथाध्यानमपविघ्नं प्रसिद्धयति ॥ ३९ ॥'–तत्त्वानुशासन। ११. व्यासङ्ग एव स्तेनः चौरस्तस्य विघ्नं न प्राप्नोति।

फल्गुजन्माप्ययं देहो यदलाबुफलायते।
संसारसागरोत्तारे [1]रक्ष्यस्तस्मात्प्रयत्नतः ॥६२०॥
नरेऽधीरे वृथा [2]वर्म क्षेत्रेऽसस्ये[3] वृतिर्वृथा।
यथा तथा वृथा सर्वो ध्यानशून्यस्य तद्विधिः ॥६२१॥
बहिरन्तस्तमोवातैरस्पन्दं[4] दीपवन्मनः।
यत्तत्त्वालोकनोल्लासि तत्स्यात्ध्यानं सबीजकम् ॥६२२॥
निर्विचारावतारासु चेतःस्रोतःप्रवृत्तिषु।
आत्मन्येव [5]स्फुरन्नात्मा भवेद्ध्यानमबीजकम्[6] ॥६२३॥

*[ शायद कोई यह सोचे कि यह शरीर तो अपना नहीं है और नष्ट होनेवाला है। इस लिए इसे जल्दी नष्ट कर डालना चाहिए, तो उसके लिए कहते हैं— ]*

यद्यपि इस शरीरका जन्म निरर्थक है फिर भी संसाररूपी समुद्रसे पार उतरनेके लिए यह तुम्बीकी तरह सहायक है। इसलिए प्रयत्नपूर्वक इसकी रक्षा करनी चाहिए ॥ ६२० ॥

**भावार्थ**—यद्यपि तुम्बीका जन्म निरर्थक होता है, वह खाने आदिके योग्य नहीं होती फिर भी नदी वगैरहको पार करनेमें वह सहायक होती है, इसीलिए लोग उसे नष्ट न करके पास रखते हैं। वैसे ही शरीर भी व्यर्थ है वह न होता तो आत्माको बारम्बार जन्म-मरणका दुःख क्यों उठाना पड़ता। फिर भी शरीरके बिना धर्म साधन नहीं हो सकता। ध्यानके लिए तो सुदृढ़ संहननवाले शरीरकी आवश्यकता होती है। अतः उसे यूँ ही नष्ट नहीं कर डालना चाहिए, किन्तु उसकी रक्षा करनी चाहिए, परन्तु यदि वह रक्षा करनेपर भी न बच सकता हो तो उसकी चिन्ता नहीं करनी चाहिए। सारांश यह है कि धर्म सेवनके लिए शरीरको स्वस्थ बनाये रखना जरूरी है किन्तु धर्म खोकर शरीरको बनाये रखना मूर्खता है।

जैसे कायर मनुष्यको कवच पहनाना व्यर्थ है और बिना धान्यके खेतमें बाड़ लगाना व्यर्थ है, वैसे ही जो मनुष्य ध्यान नहीं करता उसके लिए ध्यानकी सब विधि व्यर्थ है ॥ ६२१ ॥

*[ध्यान दो प्रकारका होता है–एक सबीज ध्यान और दूसरा अबीज ध्यान। दोनोंका स्वरूप बतलाते हैं—]*

## सबीज ध्यान और अबीज ध्यानका स्वरूप

जैसे वायुरहित स्थानमें दीपककी लौ निश्चल रहती है वैसे ही जिस ध्यानमें मन अन्तरंग और बहिरंग चंचलतासे रहित होकर तत्त्वोंके चिन्तनमें लीन रहता है उसे सबीज ध्यान कहते हैं और मनमें किसी विचारके न होते हुए जब आत्मा आत्मामें ही लीन होता है उसे निर्बीज ध्यान कहते हैं ॥ ६२२-६२३ ॥

**भावार्थ**—कर्मोंके क्षय होनेसे ही मोक्ष होता है। और कर्मोंका क्षय ध्यानसे होता है अतः जो मुमुक्षु हैं उन्हें ध्यानका अभ्यास अवश्य करना चाहिए। ध्यान करनेके लिए मोहका त्याग आवश्यक है; क्योंकि जिसका मन स्त्री पुत्र और धनादिमें आसक्त है वह आत्माका ध्यान कैसे कर सकता है। इसलिए जो कामभोगसे विरक्त होकर और शरीरसे भी ममता छोड़कर

---

१. 'न धर्मसाधनमिति स्थास्नु नाश्यं वपुर्बुधैः। न च केनापि नो रक्ष्यमिति शोच्यं विनश्वरम् ॥ ५ ॥'—सागारधर्मामृत अ. ८। २. कवच। ३. धान्यरहिते। ४. निश्चलम्। ५. चमत्कुर्वन्। ६. एकत्ववितर्कावीचाराख्यं शुक्लध्यानम्।

निर्ममत्ववाला हो जाता है वही पुरुष ध्याता हो सकता है। ध्यान शुभ भी होता है और अशुभ भी होता है। वस्तुके यथार्थ स्वरूपका चिन्तन करना शुभ ध्यान है और मोहके वशीभूत होकर वस्तुके अयथार्थ स्वरूपका चिन्तन करना अशुभ ध्यान है। शुभ ध्यानसे स्वर्गादिकी प्राप्ति होती है और अशुभ ध्यानसे नरकादिकमें जन्म लेना पड़ता है। एक तीसरा ध्यान भी है जिसे शुद्ध ध्यान कहते हैं। रागादिके क्षीण हो जानेसे जब अन्तरात्मा निर्मल हो जाता है तब जो अपने स्वरूपकी उपलब्धि होती है वह शुद्ध ध्यान है। इस शुद्ध ध्यानसे ही स्वाभाविक केवलज्ञानलक्ष्मीकी प्राप्ति होती है। सारांश यह कि जीवके परिणाम तीन प्रकारके होते हैं–अशुभ, शुभ और शुद्ध। अतः अशुभसे अशुभ, शुभसे शुभ और शुद्धसे शुद्ध ध्यान होता है। आर्त और रौद्र ध्यान अशुभ होते हैं, अतः उन्हें नहीं करना चाहिए। धर्मध्यान शुभ है और शुक्ल ध्यान शुद्ध है। ये दो ही ध्यान करनेके योग्य हैं। इनमें पहले धर्म ध्यान ही किया जाता है। उसके लिए ध्यान करनेवालेको उत्तम स्थान चुनना चाहिए; क्योंकि अच्छे और बुरे स्थानका भी मनपर बड़ा प्रभाव पड़ता है। जहाँ दुष्ट लोग उपद्रव कर सकते हों, स्त्रियाँ विचरण करती हों वहाँ ध्यान नहीं करना चाहिए। तथा जहाँ तृण, काँटे, बाँबी, कंकड़, खुरदरे पत्थर, कीचड़, हाड़, रुधिर आदि हो वहाँ भी ध्यान नहीं करना चाहिए। सारांश यह है कि जहाँ किसी बाह्य निमित्तसे मनमें क्षोभ उत्पन्न हो सकता है वहाँ ध्यान नहीं हो सकता। इस लिए ध्यान करनेवालेको ऐसे स्थान त्याग देने चाहिए। सिद्धिक्षेत्र, तीर्थङ्करोंके कल्याणकोंसे पवित्र तीर्थस्थान, मन्दिर, वन, पर्वत, नदीका किनारा, गुफा आदि स्थान जहाँ किसी तरहका कोलाहल न हो, समस्त ऋतुओंमें सुखदायक हों, रमणीक हों, उपद्रवरहित हों, वर्षा, घाम, शीत और वायुके प्रबल झकोरोंसे रहित हों, ध्यान करनेके योग्य होते हैं। ऐसे शान्त स्थानोंमें काष्ठके तख्तेपर, शिलापर या भूमिपर अथवा बालूमें आसन लगाना चाहिए। पर्यंक आसन, अर्द्धपर्यङ्कासन, वज्रासन, वीरासन, सुखासन, कमलासन और कायोत्सर्ग ये ध्यानके योग्य आसन माने गये हैं। इस समय चूँकि जीवोंके शरीर उतने दृढ़ और शक्तिशाली नहीं होते, इसलिए पर्यंकासन और कायोत्सर्ग ये दो आसन ही उत्तम माने जाते हैं। स्थान और आसन ध्यानकी सिद्धिमें कारण हैं। इनमें-से यदि एक भी ठीक न हो तो मन स्थिर नहीं हो पाता। ध्यानीको चाहिए कि वह चित्तको प्रसन्न करनेवाले किसी रमणीक स्थानमें जाकर पर्यंकासनसे ध्यान लगाके पालथी लगाकर दोनों हाथोंको खिले हुए कमलके समान करके अपनी गोदमें रखे। दोनों नेत्रोंको निश्चल, सौम्य और प्रसन्न बनाकर नाकके अग्र भागमें ठहरावे। भौंहें विकाररहित हों और दोनों होठ न तो बहुत खुले हों और न बहुत मिले हों। शरीर सीधा और लम्बा हो मानो दीवारपर कोई चित्राम बना है। ध्यानकी सिद्धि और मनकी एकाग्रताके लिए प्राणायाम भी आवश्यक माना जाता है। प्राणायाम वायुकी साधनाको कहते हैं। शरीरमें जो वायु होती है वह मुख नाक वगैरहके द्वारा आती जाती है। इसके कारण भी मन चंचल रहता है। जब वह वशमें हो जाती है तब मन भी वशमें हो जाता है। किन्तु जैनशास्त्रोंमें प्राणायामको चित्तशुद्धिका प्रबल साधन नहीं माना गया है; क्योंकि उसको हठपूर्वक करनेसे मन स्थिर होनेके बदले व्याकुल हो उठता है। अतः मोक्षार्थीके लिए प्राणायाम उपयुक्त नहीं है। किन्तु ध्यानके समय श्वासोच्छ्वासका मन्द होना आवश्यक है, जिससे उसके कारण ध्यानमें विघ्न न पड़ सके। अतः ध्यान करनेके लिए इन्द्रियों

चित्तेऽनन्तप्रभावेऽस्मिन्प्रकृत्या [1]रसवच्चले ।
तत्तेजसि [2] स्थिरे सिद्धे न किं सिद्धं जगत्त्रये ॥६२४॥

को वशमें करके और राग-द्वेषको दूर करके अपने मनको ध्यानके दस स्थानोंमेंसे किसी एक स्थान पर लगाना चाहिए। नेत्र, कान, नाकका अग्र भाग, सिर, मुख, नाभि, मस्तक, हृदय, तालु और दोनों भौंहोंका बीच—ये दस स्थान मनको स्थिर करनेके योग्य हैं। इनमें-से किसी एक स्थान पर मनको स्थिर करके ध्येयका चिन्तन करनेसे ध्यान स्थिर होता है। ध्यान करनेसे पहले ध्यानी को यह विचारना चाहिए कि देखो, कितने खेदकी बात है कि मैं अनन्त गुणोंका भण्डार होते हुए भी संसाररूपी वनमें कर्मरूपी शत्रुओंसे ठगाया गया। यह सब मेरा ही दोष है। मैंने ही तो इन शत्रुओंको पाल रखा है। यदि मैं रागादिक बन्धनोंमें बँधकर विपरीत आचरण न करता तो कर्मरूपी शत्रु प्रबल ही क्यों होते ? ख़ैर, अब मेरा रागरूपी ज्वर उतर चला है और मैं मोह नींदसे जाग गया हूँ। अतः अब ध्यानरूपी तलवारकी धारसे कर्म-शत्रुओंको मारे डालता हूँ। यदि मैं अज्ञानको दूर करके अपनी आत्माका दर्शन करूँ तो कर्म-शत्रुओंको क्षणभरमें जलाकर राख कर दूँ तथा प्रबल ध्यानरूपी कुठारसे पापरूपी वृक्षोंको जड़मूलसे ऐसा काटूँ कि फिर इनमें फल ही न आ सके। किन्तु मैं मोहसे ऐसा अन्धा बना रहा कि मैंने अपनेको नहीं पहचाना। मेरा आत्मा परमात्मा है परंज्योतिरूप है, जगत्में सबसे महान् है। मुझमें और परमात्मामें केवल इतना ही अन्तर है कि परमात्मामें अनन्तचतुष्टयरूप गुण व्यक्त हो चुके हैं और मेरेमें वे गुण शक्तिरूपसे विद्यमान हैं। अतः मैं उस परमात्मस्वरूपकी प्राप्तिके लिए अपनी आत्माको जानना चाहता हूँ। न मैं नारकी हूँ, न तिर्यञ्च हूँ, न मनुष्य हूँ, और न देव हूँ। ये सब कर्मजन्य अवस्थाएँ हैं। मैं तो सिद्धस्वरूप हूँ। अतः अनन्त ज्ञान, अनन्त दर्शन, अनन्त सुख और अनन्तवीर्यका स्वामी होनेपर भी क्या मैं कर्मरूपी विषवृक्षोंको उखाड़ कर नहीं फेंक सकता ? आज मैं अपनी शक्तिको पहचान गया हूँ और अब बाह्य पदार्थोंकी चाहको दूर करके आनन्दमन्दिरमें प्रवेश करता हूँ। फिर मैं कभी भी अपने स्वरूपसे नहीं डिगूँगा। ऐसा विचारकर दृढ़ निश्चयपूर्वक ध्यान करना चाहिए। जिसका ध्यान किया जाता है उसे ध्येय कहते हैं। ध्येय दो प्रकारके होते हैं—चेतन और अचेतन। चेतन तो जीव है और अचेतन शेष पाँच द्रव्य हैं। चेतन ध्येय भी दो हैं–एक तो देहसहित अरि-हन्त भगवान् हैं और दूसरे देहरहित सिद्ध भगवान् हैं। धर्मध्यानमें इन्हीं जीवाजीवादिक द्रव्योंका ध्यान किया जाता है। जो मोक्षार्थी हैं वे तो और सब कुछ छोड़कर परमात्माका ही ध्यान करते हैं। वे उसमें अपना मन लगाकर उसके गुणोंको चिन्तन करते-करते अपनेको उसमें एक रूप करके तल्लीन हो जाते हैं। 'यह परमात्माका स्वरूप ग्रहण करनेके योग्य है और मैं इसका ग्रहण करने-वाला हूँ, ऐसा द्वैत भाव तब नहीं रहता। उस समय ध्यानी मुनि अन्य सब विकल्पोंको छोड़कर उस परमात्मस्वरूपमें ऐसा लीन हो जाता है कि ध्याता और ध्यानका विकल्प भी न रहकर ध्येय रूपसे एकता हो जाती है। इस प्रकारके निश्चल ध्यानको सबीज ध्यान कहते हैं। इससे ही आत्मा परमात्मा बनता है। और जब शुद्धोपयोगी होकर मुनि अपनी शुद्ध आत्माका ध्यान करता है तो उस ध्यानको निर्बीज ध्यान कहते हैं।

यह चित्त अनन्त प्रभावशाली है किन्तु स्वभावसे ही पारेकी तरह चंचल है। जैसे आक

१. पारदवत् । २. अग्नौ ज्ञाने च ।

निर्मनस्के[1] मनोहंसे पुंहंसे सर्वतः स्थिरे।
बोधहंसोऽखिलालोक्यसरोहंसः प्रजायते ॥६२५॥
यद्यप्यस्मिन्मनःक्षेत्रे क्रियां तां तां [2]समाचरन्।
कंचिद्वेदयते[3] भावं तथाप्यत्र न विभ्रमेत्[4] ॥६२६॥
[5]विपक्षे क्लेशराशीनां यस्मान्नैष विधिर्मतः।
तस्मान्न विस्मयेतास्मिन् परंब्रह्म समाश्रितः ॥६२७॥
प्रभावैश्वर्यविज्ञानदेवतासंगमादयः।
योगोन्मेषाद्भवन्तोऽपि नामी तत्त्वविदां मुदे ॥६२८॥
भूमौ जन्मेति रत्नानां यथा सर्वत्र नोद्भवः।

---

के द्वारा पारा सिद्ध हो जाता है उसी तरह यदि यह आत्मज्ञानमें स्थिर होकर सिद्ध हो जाये तो इसके सिद्ध होनेसे तीनों लोकोंमें ऐसी कौन-सी वस्तु है जो सिद्ध यानी प्राप्त न हो ॥६२४–६२५॥

**भावार्थ**—पारा स्वभावसे ही चंचल होता है, किन्तु यदि आगमें आँच देकर विधिपूर्वक उसे सिद्ध कर लिया जाये तो उसके सिद्ध होनेसे अनेक रससिद्धियाँ प्राप्त हो जाती हैं। वैसे ही चञ्चल मन यदि आत्मस्वरूपमें स्थिर हो जाये तो फिर ऐसी कौन-सी सिद्धि है जो प्राप्त नहीं हो सकती। अतः मनको स्थिर करना आवश्यक है।

यदि यह मनरूपी हंस अपना व्यापार छोड़ दे और आत्मारूपी हंस सर्वथा स्थिर हो जाये तो ज्ञानरूपी हंस इस समस्त ज्ञेयरूपी सरोवरका हंस बन जाये अर्थात् मन निश्चल होनेके साथ यदि आत्मा, आत्मामें सर्वथा स्थिर हो जाये तो विश्वको जाननेवाला केवलज्ञान प्रकट होता है ॥६२५॥

यद्यपि इस मनरूपी क्षेत्रमें अनेक क्रियाओंको करता हुआ मुनि किसी पदार्थको जान लेता है, फिर भी उसमें धोखा नहीं खाना चाहिए। क्योंकि विपक्षमें नाना क्लेशोंके रहते हुए ऐसा करना उचित नहीं है। अतः परब्रह्म परमात्मस्वरूपका आश्रय लेनेवालेको इस विषयमें अचरज नहीं करना चाहिए ॥६२६–६२७॥

**भावार्थ**—आशय यह है कि मनोनिग्रह करनेसे यदि कोई छोटी-मोटी ऋद्धि या ज्ञान प्राप्त हो जाये तो मोक्षार्थी ध्यानीको उसीमें नहीं रम जाना चाहिए क्योंकि उसका उद्देश्य इससे बहुत ऊँचा है। वह तो संसारके दुःखोंका समूल नाश करके परमात्मपदकी प्राप्तिके लिए योगी बना है, अतः उसे प्राप्त किये बिना उसे विश्राम नहीं लेना चाहिए और मामूली लौकिक ऋद्धि-सिद्धिके चक्करमें नहीं पड़ जाना चाहिए। क्योंकि उसके प्राप्त हो जानेपर भी अनन्त क्लेश राशिसे छुटकारा नहीं हो सकता। यही आगे स्पष्ट करते हैं—

ध्यानका प्रादुर्भाव होनेसे प्रभाव, ऐश्वर्य, विशिष्ट ज्ञान और देवताका दर्शन आदिकी प्राप्ति होनेपर भी तत्त्वज्ञानी इनसे प्रसन्न नहीं होते ॥६२८॥

## ध्यानकी दुर्लभता

जैसे भूमिसे रत्नोंकी उत्पत्ति होनेपर भी सब जगह रत्न पैदा नहीं होता, वैसे ही

---

१ मनोव्यापाररहिते। 'निर्व्यापारे मनोहंसे पुंहंसे सर्वथा स्थिरे। बोधहंसः प्रवर्तेत विश्वत्रयसरोवरे ॥१८६॥'–प्रबोधसार। २. मुनिः। ३. जानाति। ४. हेयमुपादेयतया उपादेयं हेयतया न पश्येत्। ५. 'मोहादिशत्रुसैन्यानां यस्मान्नैव विधिर्मतः। तस्मान्न विस्मयेतास्मिन् परं ब्रह्मसमाश्रितः ॥ १८७ ॥'–प्रबोधसार।

तथात्मजमिति ध्यानं सर्वत्राङ्गिनि नोद्भवेत् ॥६२९॥
तस्य कालं वदन्त्यन्तर्मुहूर्तं मुनयः परम् ।
जो बुरे कामोंको नहीं करता और न बुरे मनुष्योंकी संगति ही करता है तथा सब प्राणियोंका हित चाहता है वह वास्तवमें श्रोत्रिय है, जो केवल बाह्य शुद्धि पालता है वह श्रोत्रिय नहीं है ॥ ८८० ॥ जो आत्मारूपी अग्निमें दयारूपी मन्त्रोंके द्वारा कर्मरूपी काष्ठ-समूहसे हवन करता है वह होता है; जो बाह्य अग्निमें हवन करता है वह होता नहीं है ॥ ८८१ ॥ जो

---

१. प्रवृत्ता–अ०, ज०, मु० । २. संसारे श्रेय–अ०, ज०, मु० । ३. "स सोमवति दीक्षितः" इत्यमरः । ४. छागादीनां घातकः । ५. होमकर्ता ।

भावपुष्पैर्यजेद्देवं व्रतपुष्पैर्वपुर्गृहम् ।
क्षमापुष्पैर्मनो वह्निं यः स यष्टा सतां मतः ॥८८२॥
षोडशानामुदारात्मा यः प्रभुर्भावनर्त्विजाम्[१] ।
सोऽध्वर्युरिह बोद्धव्यः शिवशर्माध्वरोद्धुरः ॥८८३॥
विवेकं वेदयेदुच्चैर्यः शरीरशरीरिणोः ।
स प्रीत्यै विदुषां वेदो नाखिलक्षयकारणम् ॥८८४॥
जातिर्जरा मृतिः पुंसां त्रयी संसृतिकारणम् ।
एषा त्रयी यतस्त्रय्याः क्षीयते सा त्रयी मता ॥८८५॥
अहिंसः सद्व्रतो ज्ञानी निरीहो निष्परिग्रहः ।

---

भावरूपी पुष्पोंसे देवताकी पूजा करता है, व्रतरूपी पुष्पोंसे शरीररूपी घरकी पूजा करता है और क्षमारूपी पुष्पोंसे मनरूपी अग्निकी पूजा करता है उसे सज्जन पुरुष यष्टा अर्थात् यज्ञ करनेवाला कहते हैं। जो महात्मा सोलह कारण भावनारूपी यज्ञ करानेवाले ऋत्विजोंका स्वामी ह, मोक्ष-सुखरूपी यज्ञके उद्धारक उस पुरुषको अध्वर्यु जानना चाहिए ।।८८२–८८३।।

**भावार्थ**—दीक्षित, श्रोत्रिय, होता, यष्टा, अध्वर्यु ये सब वैदिक यज्ञसे सम्बन्ध रखते हैं। वेदोंमें मन्त्रोंके द्वारा जो हवन किया जाता है उसे यज्ञ कहते हैं। पुराने युगमें वैदिक यज्ञोंका बड़ा चलन था और उनमें बकरे वगैरहका बलिदान किया जाता था तथा उनके अनेक भेद थे। जो सोमयज्ञ करता था उसे दीक्षित कहते थे। इस यज्ञमें सोमरस पिया जाता था तथा बलिदान होता था। जो वेदका ज्ञाता होता था उसे श्रोत्रिय कहते थे। यह बाह्य शुद्धिका बड़ा ध्यान रखता था। जो होम करता था उसे होता कहते थे। जो यज्ञका प्रधान होता था सबको अपने-अपने कामकी आज्ञा देता था उसे यष्टा या यजमान कहते थे। जो यजुर्वेदका ज्ञाता होता था उसे अध्वर्यु कहते थे। ये सब क्रियाकाण्डी होते थे। वैदिक क्रियाकाण्डमें बाह्य आचरण ही सब कुछ है। अतः ग्रन्थकारने आत्म-यज्ञको ही सच्चा यज्ञ बतलाकर जो उसीको करता है उसे ही दीक्षित आदि नामोंसे पुकारनेके लिए कहा है।

जो आत्मा और शरीरके भेदको जोरदार शब्दोंमें बतलाता है वही सच्चा वेद है और विद्वान् लोग उससे ही प्रेम करते हैं। किन्तु जो सब पशुओंके विनाशका कारण है वह वेद नहीं है ॥ ८८४ ॥

जन्म, बुढ़ापा और मृत्यु ये तीनों संसारके कारण हैं। इस त्रयी अर्थात् तीनोंका जिस त्रयीसे नाश हो वही त्रयी है। आशय यह है कि ऋक्वेद, सामवेद और यजुर्वेदको त्रयी कहते हैं। किन्तु ग्रन्थकारका कहना है जो संसारके कारण जीवन, मृत्यु और बुढ़ापेको नष्ट कर दे, जिससे संसारमें न जन्म लेना पड़े और न मृत्युका दुःख उठाना पड़े वही सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्र ही सच्ची त्रयी है ॥ ८८५ ॥

जो अहिंसक है, समीचीन व्रतोंका पालन करता है, ज्ञानी है, सांसारिक चाहसे दूर है और

---

१. षोडशा भावना एव ऋत्विजः, तेषां मध्येऽध्वर्युः यजुर्वेदज्ञाता मुख्यः ।

यः स्यात्स ब्राह्मणः सत्यं न तु[1] जातिमदान्धलः ॥८८६॥
सा जातिः परलोकाय यस्याः सद्धर्मसंभवः ।
न हि सस्याय जायेत शुद्धा भूर्बीजवर्जिता ॥८८७॥
स शैवो यः शिवज्ञात्मा स बौद्धो योऽन्तरात्मभृत् ।
स सांख्यो यः प्रसंख्यावान्स द्विजो यो न जन्मवान् ॥८८८॥
ज्ञानहीनो दुराचारो निर्दयो लोलुपाशयः ।
दानयोग्यः कथं स स्याद्यश्चाक्षानुमतक्रियः[2] ॥८८९॥
अनुमान्या[3] समुद्देश्या[4] त्रिशुद्धा भ्रामरी तथा ।
भिक्षा चतुर्विधा ज्ञेया यतिद्वयसमाश्रया ॥८९०॥

*इत्युपासकाध्ययने यतिनामनिर्वचनश्चतुश्चत्वारिंशः कल्पः ।*

---

काम, क्रोध, मोह आदि तथा जमीन–जायदाद, धन आदि अन्तरंग और बहिरंग परिग्रहसे रहित है वही सच्चा ब्राह्मण है। जो जातिके मदसे अन्धा है, अपनेको सबसे ऊँचा और दूसरोंको नीच समझता है वह ब्राह्मण नहीं है ॥ ८८६ ॥

वही जाति परलोकके लिए उपयोगी है जिससे सच्चे धर्मका जन्म होता है, जमीन शुद्ध भी हो किन्तु यदि उसमें बीज न डाला गया हो तो अनाज पैदा नहीं हो सकता। अर्थात् ब्राह्मण जाति शुद्ध भी हो किन्तु उसमें यदि समीचीन धर्मके पालनकी परिपाटी न हो तो वह शुद्ध जाति भी व्यर्थ है ॥ ८८७ ॥

जो शिव अर्थात् अपने कल्याणरूप मुक्तिको जानता है वही सच्चा शैव—शिवका अनुयायी है। जो अपनी अन्तरात्माका पोषक है वही वास्तवमें बौद्ध है। जो आत्मध्यानी है वही सांख्य है और जिसे फिर संसारमें जन्म नहीं लेना है वही द्विज अर्थात् ब्राह्मण है ॥ ८८८ ॥

जो अज्ञानी है, दुराचारी है, निर्दय है, विषयोंका लोलुपी है तथा इन्द्रियोंका दास है वह दानका पात्र कैसे हो सकता है ? अर्थात् ऐसे आदमीको कभी भी दान नहीं देना चाहिए ॥ ८८९ ॥

## भिक्षाके भेद

देशविरत और सर्वविरतकी अपेक्षासे भिक्षा चार प्रकारकी होती है– अनुमान्या, समुद्देश्या, त्रिशुद्धा और भ्रामरी ॥ ८९० ॥

**भावार्थ**—मुनिसम्बन्धी भिक्षाके लिए तो भ्रामरी शब्द शास्त्रोंमें अति प्रसिद्ध है। किन्तु श्रावकसम्बन्धी भिक्षाके इन भेदोंका उल्लेख अन्यत्र हमारे देखनेमें नहीं आया। टिप्पणकारने अनुमान्या भिक्षाको दस प्रतिमापर्यन्त बतलाया है और आमन्त्रणपूर्वक भोजनको समुद्देश्य बतलाते हुए छठी प्रतिमापर्यन्त बतलाया है। छठी प्रतिमापर्यन्त गृही संज्ञा है। छठीके पश्चात् नवीं प्रतिमा पर्यन्त ब्रह्मचारी संज्ञा है और भिक्षुक संज्ञा केवल अन्तिम दो प्रतिमाधारियोंकी है। दसवीं प्रतिमाका धारी घर छोड़कर बाहर रहने लगता है और आमन्त्रणदाताके घर भोजन करता है। अतः

---

१. न जातु अ०, ज०। २. पञ्चेन्द्रियवशः। ३. दशप्रतिमापर्यन्तम्। ४. आमन्त्रणपूर्विका षट्प्रतिमापर्यन्तम्।

**तरुदलमिव परिपक्वं स्नेहविहीनं प्रदीपमिव देहम् ।**
**स्वयमेव विनाशोन्मुखमवबुध्य करोतु विधिमन्त्यम् ॥८९१॥**
**[1]गहनं न शरीरस्य हि विसर्जनं किं तु गहनमिह वृत्तम् ।**
**तन्न स्थास्नु[2] विनाश्यं न नश्वरं शोच्यम्[3]इदमाहुः ॥८९२॥**
**प्रतिदिवसं विजहद्बलमुज्झद्भुक्तिं त्यजत्प्रतीकारम् ।**
**वपुरेव नृणां निगिरति[4] चरमचरित्रोदयं समयम् ॥८९३॥**
**सविधा[5] पापकृतेरिव [यापकृतिरिव] जनिताखिलकायकम्पनातङ्का ।**

वह उद्दिष्ट भोजन करता है क्योंकि दाता उसके उद्देश्यसे भोजन तैयार करता है । इसलिए उसकी भिक्षा समुद्देश्या होनी चाहिए । वह अनुमति-त्यागी होता है अतः भोजनके विषयमें किसी प्रकारकी अनुमति नहीं दे सकता । किन्तु नौवीं प्रतिमा तकके धारी भोजनके विषयमें अनुमति दे सकते हैं, अतः उनकी भिक्षा अनुमान्या होनी चाहिए । ग्रन्थकारने भिक्षाके भेदोंका जो क्रम रखा है उससे भी यही ध्वनित होता है कि प्रारम्भिक प्रतिमावाले अनुमान्या भिक्षा करते हैं, दसवीं प्रतिमावाले समुद्देश्या और अन्तिम प्रतिमावाले त्रिशुद्धा भिक्षा करते हैं, तथा साधु भ्रामरी-भिक्षा करते हैं । हमारी दृष्टिसे तो छठी प्रतिमा तकके लिए भिक्षा भोजनका व्यवहार ही उचित नहीं है । वे तो गृही होते हैं ।

*इस प्रकार उपासकाध्ययनमें, मुनिके नामोंकी व्युत्पत्ति बतलानेवाला चौवालीसवाँ कल्प समाप्त हुआ ।*

[ *अब समाधिमरणकी विधि बतलाते हैं—* ]

वृक्षके पके हुए पत्तेकी तरह या तेलरहित दीपककी तरह शरीरको स्वयं ही विनाशोन्मुख जानकर अन्तिम विधि ( समाधिमरण ) करना चाहिए ॥ ८९१ ॥ किन्तु यह ध्यान रखना चाहिए कि शरीरको त्याग देना कठिन नहीं है किन्तु उसमें संयमका धारण करना कठिन है । अतः यदि शरीर ठहरने योग्य हो तो उसे नष्ट नहीं कर डालना चाहिए और यदि वह नष्ट होता हो तो उसका रंज नहीं करना चाहिए ॥ ८९२ ॥

[ *यह कहा जा सकता है कि यह हमें कैसे मालूम हो कि समाधिमरणका समय आ गया है ? इसका उत्तर ग्रन्थकार स्वयं देते हैं—* ]

जब शरीरकी शक्ति प्रतिदिन घटने लगे, खाना-पीना छूट जाये और कोई उपाय कारगर न हो तो स्वयं शरीर ही मनुष्योंको यह बतला देता है कि अब समाधिमरण करनेका समय आ गया है ॥ ८९३ ॥

जब सन्निकटवर्ती अपकारकी तरह समस्त शरीरमें कँपकँपी पैदा करनेवाला बुढ़ापा

---

१. "गहनं न तनोर्हानं पुंसः किन्त्वत्र संयमः । योगानुवृत्तेर्व्यावृत्य तदात्मात्मनि युज्यताम्" ॥२४॥ —सागारधर्मा० ८ अ० । २. "न धर्मसाधनमिति स्थास्नु नाश्यं वपुर्बुधैः । न च केनाऽपि नो रक्ष्यमिति शोच्यं विनश्वरम्" ॥५॥– सागारधर्मा०, अ०, ८ । ३. 'शोच्यमित्याहु.'—सागारधर्मामृत टोका ८-५ में उद्धृत । ४. निगदति—सागा० टी० ८-१२ मे उद्धृत । ५. समीपवर्तिनी अपकृतिरिव या सविधा–धर्मरत्ना० पृ० १३२ ।

यमदूतीव जरा यदि समागता जीवितेषु कस्तर्षः[1] ॥८९४॥
कर्णान्तकेशपाशग्रहणविधेर्बोधितोऽपि यदि जरया।
स्वस्य हितैषी न भवति तं किं मृत्युर्न संग्रसते ॥८९५॥
उपवासादिभिरङ्गे[2] कषायदोषे च बोधिभावनया।
कृतसल्लेखनकर्मा प्रायाय यतेत गणमध्ये ॥८९६॥
यमनियमस्वाध्यायास्तपांसि देवार्च[3]नाविधिर्दानम्।
एतत्सर्वं निष्फलमवसाने चेन्मनो मलिनम् ॥८९७॥
द्वादशवर्षाणि नृपः शिक्षितशस्त्रो रणेषु यदि मुह्येत्।
किं [4]स्यात्तस्यास्त्रविधेर्यथा तथान्ते यतेः पुराचरितम् ॥८९८॥

---

यमके दूतकी तरह आकर खड़ा हो गया तो फिर जीनेकी क्या लालसा ? ॥ ८९४ ॥

बुढ़ापेके द्वारा कानके समीपके बालोंको पकड़कर समझाये जानेपर भी अर्थात् बुढ़ापेके चिह्नस्वरूप कानके पासके बालोंके सफेद हो जानेपर भी जो अपने हितमें नहीं लगता है क्या उसे मौत नहीं खाती ? ॥ ८९५ ॥

**भावार्थ**--आशय यह है कि बुढ़ापा आ जानेपर जीवनमें कोई ऐसा रस नहीं रहता जिसके लिए मनुष्य जीनेकी इच्छा करे। अतः बुढ़ापा आनेपर आत्म-कल्याणमें लगना ही हितकर है; क्योंकि उसके बाद मौतके मुँहमें जाना सुनिश्चित है।

## समाधिमरणकी विधि

जो समाधिमरण करना चाहता है, उसे उपवास वगैरहके द्वारा शरीरको और ज्ञानभावनाके द्वारा कषायोंको कृश करके किसी मुनिसंघमें चला जाना चाहिए ॥ ८९६ ॥

**भावार्थ**—समाधिमरणको सल्लेखना व्रत कहते हैं। सल्लेखनाका अर्थ है योग्य रीतिसे शरीर और कषायोंका कृश करना। यदि शरीर मलसे भरा हो और मनमें कुटुम्बवालोंका मोह समाया हो तो समाधिमरण हो नहीं सकता। अतः शरीर और आत्मा दोनोंको शुद्ध करके समाधिमरण करना चाहिए और उनके लिए घरवालोंके फन्देसे निकलकर त्यागी जनोंमें चले जाना चाहिए।

यदि मरते समय मन मैला रहा तो जीवन-भरका यम, नियम, स्वाध्याय, तप, देवपूजा और दान निष्फल है ॥ ८९७ ॥ जैसे एक राजाने बारह वर्ष तक शस्त्र चलाना सीखा। किन्तु जब युद्धका अवसर आया तो वह शस्त्र नहीं चला सका। उस राजाकी शस्त्रशिक्षा किस कामकी, वैसे ही जो व्रती जीवन-भर धर्माचरण करता रहा, किन्तु जब अन्त समय आया तो मोहमें पड़ गया। उस व्रतीका पूर्वाचरण किस कामका ॥ ८९८ ॥

---

१. का तृष्णा। २. "उपवासादिभिः कायं कषायं च श्रुतामृतैः। संलिख्य गणिमध्ये स्यात् समाधिमरणोद्यमी ॥"—सागारधर्मा० ८-१५। ३. –चर्नादिवि–धर्मरत्ना० पृ० १३३। ४. किं तस्य शस्त्रविधिना–धर्मरत्ना० पृ० १३३। "नृपस्येव यतेर्धर्मो चिरमभ्यस्तिनोऽस्त्रवत्। युधीव स्खलितो मृत्यौ स्वार्थभ्रंशोऽयशः कटु ॥१७॥"—सागारधर्मा० अ० ८।

स्नेहं विहाय[1] बन्धुषु मोहं विभवेषु कलुषतामहिते ।
गणिनि च निवेद्य निखिलं दुरीहितं तदनु भजतु विधिमुचितम् ॥८९९॥
अशनं[2] क्रमेण हेयं स्निग्धं पानं ततः खरं चैव ।
तदनु च सर्वनिवृत्तिं कुर्याद्गुरुपञ्चकस्मृतौ निरतः ॥९००॥
कदलीघातवदायुः[3] कृतिनां सकृदेव विरतिमुपयाति ।
तत्र पुनर्नैष[4] विधिर्यद्दैवे क्रमविधिर्नास्ति ॥९०१॥
सूरौ[5] प्रवचनकुशले साधुजने यत्नकर्मणि प्रवणे ।
चित्ते च समाधिरते किमिहासाध्यं[6] यतेरस्ति ॥९०२॥

---

कुटुम्बियोंसे स्नेह, सम्पत्तिसे मोह और जिन्होंने अपना बुरा किया है उनके प्रति कलुषपनेको छोड़कर आचार्यसे अपने सब अपराधोंको कह दे, और उसके बाद समाधिमरणके योग्य विधिका पालन करे ॥ ८९९ ॥

धीरे-धीरे भोजनको छोड़ दे और दूध, मठा वगैरह रख ले। फिर उन्हें भी छोड़कर गर्म जल रख ले। उसके बाद पञ्च नमस्कार मन्त्रके स्मरणमें लीन होकर सब कुछ छोड़ दे ॥ ९०० ॥ यदि किसी पुण्यशाली पुरुषकी आयु कटे हुए केलेकी तरह एक साथ ही समाप्त होती हो तो वहाँ समाधिमरणकी यह विधि नहीं है, क्योंकि दैववश अचानक मरण उपस्थित होनेपर क्रमिक विधि नहीं बन सकती ॥ ९०१ ॥

यदि समाधिमरण करानेवाले आचार्य आगममें कुशल हों और साधुसंघ प्रयत्न करनेमें कुशल हो तथा समाधिमरण करनेवालेका मन ध्यानमें लगा रहे तो फिर कुछ भी असाध्य नहीं है ॥ ९०२ ॥

**भावार्थ**—समाधिमरणके इच्छुक मनुष्यको किसी पवित्र तीर्थ-स्थानपर चले जाना चाहिए, यदि ऐसा करना शक्य न हो तो जिनालय या मुनिसंघ वगैरहमें चले जाना चाहिए। यदि तीर्थक्षेत्रके लिए कोई घरसे चले और रास्तेमें ही उसका मरण हो जाये तो उसका मरण समाधिमरण ही कहा जाता है क्योंकि समाधिमरणकी भावना भी फलदायक है। जानेसे पहले सबसे अपने अपराधोंकी क्षमा माँगे और जिसने अपना अपराध किया हो उसे क्षमा कर दे। फिर समाधिमरणके योग्य स्थानपर पहुँचकर आचार्यके सामने अपने सब दोष निवेदन कर दे और

---

१. "स्नेहं विहाय······विधिमन्त्यम् ।" –धर्मरत्नाकर पृ० १३३ । विधाय अ०, ज०, मु० । "स्नेहं वैरं सङ्गं परिग्रहं चापहाय शुद्धमनाः । स्वजनं परिजनमपि च क्षान्त्वा क्षमयेत् प्रियैर्वचनैः ॥१२४॥ आलोच्य सर्वमेनः कृतकारितमनुमतं च निर्व्याजम् । आरोपयेन्महाव्रतमामरणस्थायी निश्शेषम् ॥१२५॥"––रत्नकरण्ड श्रा० । २. "आहारं परिहाप्य क्रमशः स्निग्धं विवर्धयेत् पानम् । स्निग्धं च हापयित्वा खरपानं पूरयेत् क्रमशः ॥१२७॥ खरपानहापनामपि कृत्वा कृत्वोपवासमपि शक्त्या । पञ्चनमस्कारमनास्तनुं त्यजेत् सर्वयत्नेन ॥१२८॥" —रत्नकर० । ३. –वदायुषि अ०, ज०, मु० । "भृशापवर्तकवशात् कदलीघातवत् सकृत् । विरमत्यायुषि प्रायमविचारं समाचरेत् ॥११॥"—सागारधर्मा०, अ० ८ । ४. –नैव–धर्मरत्ना० पृ० १३३ । ५. "समाधिसाधनचणे गणेशे च गणे च न । दुर्दैवेनापि सुकरः प्रत्यूहो भावितात्मनः ॥२६॥"––सागारधर्मामृत ८ अ० । ६. –ध्यं समस्तीति–धर्मरत्ना० पृ० १३३ ।

जीवितमरणाशंसे सुहृदनुरागः सुखानुबन्धविधिः ।
एते सनिदाना स्युः सल्लेखनहानये पञ्च ॥९०३॥
आराध्य रत्नत्रयमित्थमर्थी समर्पितात्मा गणिने यथावत् ।
समाधिभावेन कृतात्मकार्यः कृती जगन्मान्यपदप्रभुः स्यात् ॥९०४॥

*इत्युपासकाध्ययने सल्लेखनाविधिर्नाम पञ्चचत्वारिंशः कल्पः ॥४५॥*

## अथ प्रकीर्णकम्

विप्रकीर्णार्थवाक्यानामुक्तिरुक्तं प्रकीर्णकम् ।
उक्तानुक्तामृतस्यन्दबिन्दुस्वादनकोविदैः ॥९०५॥

आचार्य जो प्रायश्चित्त बतलायें उसे करके समाधिमरण करनेके लिए पूरब या उत्तरको सिर करके शान्तिके साथ चटाईपर विराजमान हो जाये। और यदि वह महाव्रत धारण करनेकी प्रार्थना करे तो आचार्य उसे समस्त परिग्रहका त्याग कराकर महाव्रत धारण करा दे। इसके बाद वह नग्न होकर महाव्रत अङ्गीकार करके महाव्रतकी भावना भाये और जो महाव्रत धारण न कर सकता हो तो वह बिना ही महाव्रत अङ्गीकार किये महाव्रतकी भावना भाये। संघमें जो श्रेष्ठ मुनि हों उन्हें उसकी सेवामें देकर आचार्य उसे सम्बोधते रहें। पहले उससे यह मालूम करें कि तुम्हारी कुछ खानेकी इच्छा है क्या! यदि वह कुछ खाना चाहे तो उसे खिला दें, जिससे उसका मन किसी खाद्यमें उलझा न रहे। और यदि वह उसीमें आसक्त हो तो उसे समझाकर उसका मन उधरसे हटाये। इस तरह उससे भोजनका त्याग कराकर दुग्ध वगैरह देते रहें। फिर धीरे-धीरे भोजन भी छुड़ाकर गर्म जल देते रहें। उसके बाद जब आचार्य आज्ञा दें, तो वह जीवन-भरके लिए सब प्रकारका आहार छोड़ दे। यदि उसे कोई ऐसा रोग हो जिसके कारण उसे बार-बार प्यास लगती हो तो पानी रख सकता है और जब मृत्यु निकट मालूम दे तब उसे छोड़ सकता है।

### समाधिमरणके अतीचार

जीनेकी इच्छा करना, मरनेकी इच्छा करना, मित्रोंको याद करना, पहले भोगे हुए भोगोंका स्मरण करना और आगामी भोगोंकी इच्छा करना, ये पाँच बातें समाधिमरणव्रतमें दोष लगानेवाली हैं ॥९०३॥ इस प्रकार आचार्यके ऊपर विधिवत् अपना भार सौंपकर तथा रत्नत्रयकी आराधना करके जो समाधिमरण करता है वह संसारमें पूजनीय पदका स्वामी होता है ॥९०४॥

*इस प्रकार उपासकाध्ययनमें सल्लेखनाविधि नामक पैंतालीसवाँ कल्प समाप्त हुआ।*

*[ अब कुछ फुटकर बातें बतलाते हैं। ]*

उक्त—जिन्हें कह चुके और अनुक्त—जिन्हें नहीं कहा, उन सब विषयरूपी अमृतसे टपकनेवाली बूँदोंका स्वाद लेनेमें चतुर पण्डितजनोंने फुटकर बातोंका कथन करनेको प्रकीर्णक कहा है ॥ ९०५ ॥

---

१. यदि स्तोकं कालं जीव्यते तदा भव्यमिति जीविताशंसा। यदि शीघ्रं म्रियते तदा भव्यमिति मरणाशंसा। आशंसा वाञ्छा। "जीवितमरणाशंसा मित्रानुरागसुखानुबन्धनिदानानि ॥" तत्त्वार्थसूत्र ७-३७। "जीवितमरणाशंसे भयमित्रस्मृतिनिदाननामानः। सल्लेखनातीचाराः पञ्च जिनेन्द्रैः समादिष्टाः ॥१२९॥"—रत्नकरंडश्रा०। "जीवितमरणाशंसे सुहृदनुरागः सुखानुबन्धश्च। सनिदानः पञ्चैते भवन्ति सल्लेखनाकाले ॥१९५॥"—पुरुषार्थसि०। अमित०श्राव० ७-१५ सागारधर्मा० ८।४५।

अदुर्जनत्वं विनयो विवेकः परीक्षणं तत्त्वविनिश्चयश्च ।
एते गुणाः पञ्च भवन्ति यस्य स आत्मवान्धर्मकथापरः स्यात् ॥९०६॥
असूयकत्वं शठताऽविचारो दुराग्रहः सूक्तविमानना च ।
पुंसाममी पञ्च भवन्ति दोषास्तत्त्वावबोधप्रतिबन्धनाय ॥९०७॥
पुंसो यथा संशयिताशयस्य दृष्टा न काचित्सफला प्रवृत्तिः ।
धर्मस्वरूपेऽपि[1] विमूढबुद्धेस्तथा न काचित्सफला प्रवृत्तिः ॥९०८॥
[2]जातिपूजाकुलज्ञानरूपसंपत्तपोबले ।
उशन्त्यहंयुतोद्रेकं मदमस्मयमानसाः ॥९०९॥
यो मदात्समयस्थानामवह्लादेन मोदते ।
स नूनं धर्महा यस्मान्न धर्मो धार्मिकैर्विना ॥९१०॥
देवसेवा [3]गुरूपास्तिः स्वाध्यायः संयमस्तपः ।
दानं चेति गृहस्थानां षट् कर्माणि दिने दिने ॥९११॥

## धर्मकथा करनेका अधिकारी

सज्जनता, विनय, समझदारी, हिताहितकी परीक्षा और तत्त्वोंका निश्चय जिसमें ये पाँच गुण होते हैं वही विशिष्ट आत्मा, धर्म कथा, धार्मिक चर्चा या धर्मोपदेशका अधिकारी है ॥९०६॥

## तत्त्वको समझनेमें प्रतिबन्धक बातें

किसीके गुणोंमें दोष लगाना, ठगना, विचारहीनता, हठीपना और अच्छी बातका निरादर करना, मनुष्योंके ये पाँच दोष तत्त्वको समझनेमें रुकावट डालते हैं। अर्थात् जिसमें ये दोष होते हैं वह तत्त्वको समझनेका प्रयत्न नहीं करता और अपनी ही हाँके जाता है ॥ ९०७ ॥

जैसे प्रत्येक बातको सन्देहकी दृष्टिसे देखनेवाला संशयालु मनुष्य किसी भी काममें सफल होता नहीं देखा जाता, वैसे ही जो मनुष्य धर्मके स्वरूपके विषयमें भी मूढबुद्धि है उसकी कोई प्रवृत्ति सफल नहीं होती ॥ ९०८ ॥

## मदोंका निषेध

गर्वसे रहित गणधरादिक देव, जाति, प्रतिष्ठा, कुल, ज्ञान, रूप, सम्पत्ति, तप और बलका सहारा लेकर अहंकार करनेको मद या घमंड कहते हैं। अर्थात् लोकमें इन आठ बातोंको लेकर लोग घमंड करते देखे जाते हैं॥९०९॥ जो मनुष्य घमण्डमें आकर अपने साधर्मी भाइयोंका अपमान करके प्रसन्न होता है वह निश्चयसे धर्मघातक है; क्योंकि धार्मिकोंके बिना धर्म नहीं है ॥९१०॥

## गृहस्थके छह कर्म

देवपूजा, गुरुकी सेवा, स्वाध्याय, संयम, तप और दान ये गृहस्थोंके छह दैनिक कर्म हैं। प्रत्येक गृहस्थको प्रतिदिन ये छह काम अवश्य करने चाहिए ॥ ९११ ॥

---

१. "धर्मस्वरूपेऽपि तथाविधस्य कीदृक् कथं क्वासु कदा प्रवृत्तिः।"—धर्मरत्ना० प० १३९। २. "ज्ञानं पूजां कुलं जातिं बलमृद्धिं तपो वपुः। अष्टावाश्रित्य मानित्वं स्मयमाहुर्गतस्मयाः ॥२५॥ स्मयेन योऽन्यानत्येति धर्मस्थान् गर्विताशयः। सोऽत्येति धर्ममात्मीयं न धर्मो धार्मिकैर्विना ॥२६॥"—रत्नकरण्डश्रा०। ३ अयं श्लोकः पद्मनन्दिपञ्चविंशतिकायामपि विद्यते।

स्नपनं पूजनं स्तोत्रं जपो ध्यानं श्रुतस्तवः[1]।
षोढा क्रियोदिता सद्भिर्देवसेवासु गेहिनाम् ॥९१२॥

आचार्योपासनं श्रद्धा शास्त्रार्थस्य विवेचनम् ।
तत्क्रियाणामनुष्ठानं श्रेयःप्राप्तिकरो गणः ॥९१३॥

शुचिर्विनयसंपन्नस्तनु[2]चापलवर्जितः ।
अष्ट[3]दोषविनिर्मुक्तमधीतां गुरुसंनिधौ ॥९१४॥

अनुयोगगुणस्थानमार्गणास्थानकर्मसु ।
अध्यात्मतत्त्वविद्यायाः पाठः स्वाध्याय उच्यते ॥९१५॥

---

## देवपूजाकी विधि

सुज्ञ जनोंने गृहस्थोंके लिए देवपूजाके विषयमें छह क्रियाएँ बतलायी हैं—पहले अभिषेक, फिर पूजन, फिर भगवान्‌के गुणोंका स्तवन, फिर पञ्च नमस्कार मन्त्र वगैरहका जाप, फिर ध्यान और अन्तमें जिनवाणीका स्तवन। इसी क्रमसे जिनेन्द्र देवकी आराधना करनी चाहिए ॥ ९१२ ॥

## कल्याणकी प्राप्तिके साधन

आचार्यकी उपासना, देवशास्त्र गुरुकी श्रद्धा, शास्त्रके अर्थका विवेचन, उसमें बतलायी गयी क्रियाओंका आचरण ये सब कल्याणकी प्राप्ति करनेवाले हैं ॥९१३॥

अपने कल्याणके इच्छुक शिष्यसमुदायको पवित्र होकर तथा शारीरिक चपलताको छोड़कर विनयपूर्वक गुरुके समीपमें आठ दोषोंसे रहित अध्ययन करना चाहिए ॥ ९१४ ॥

**भावार्थ**—आचार्य परमेष्ठी या उपाध्याय परमेष्ठी गुरु कहलाते हैं। उनसे विनयपूर्वक अध्ययन, शास्त्रचर्चा, उनकी आज्ञाका पालन आदि करना चाहिए। ज्ञानाराधनके आठ दोष होते हैं—स्वाध्यायके समयका ध्यान न रखना पहला दोष है। शुद्ध उच्चारण न करना, अक्षरादिको छोड़ जाना दूसरा दोष है। शास्त्रका अर्थ ठीक न करना तीसरा दोष है। न उच्चारण ठीक करना और न अर्थ ठीक करना चौथा दोष है। जिनसे पढ़ा है या विचारा है उनका नाम छिपाना पाँचवाँ दोष है। जो पढ़ा है उसको अवधारण न करना छठा दोष है। विनयपूर्वक अध्ययन न करना सातवाँ दोष है। और गुरुका आदर न करना आठवाँ दोष है। इन आठ दोषोंको टालकर गुरुसे अध्ययन करना चाहिए।

## स्वाध्यायका स्वरूप

चारों अनुयोगोंके शास्त्र तथा गुणस्थान और मार्गणास्थानका और अध्यात्म तत्त्वरूप विद्याका पढ़ना स्वाध्याय है ॥ ९१५ ॥

---

१. श्रुताराधनम्। २. शरीर। ३. अकाल १, अविनय २, अनवग्रह ३, अबहुमान ४, निह्नव ५, अव्यंजन ६, अर्थविकल ७, अर्थव्यञ्जनविकल ८, इत्यष्टौ दोषाः।

गृही यतः स्वसिद्धान्तं साधु बुध्येत धर्मधीः ।
प्रथमः सोऽनुयोगः स्यात्पुराणचरिताश्रयः ॥९१६॥[1]
अधोमध्योर्ध्वलोकेषु चतुर्गतिविचारणम् ।
शास्त्रं[2] करणमित्याहुरनुयोगपरीक्षणम् ॥९१७॥
ममेदं स्यादनुष्ठानं तस्यायं रक्षणक्रमः ।
इत्थमात्मचरित्रार्थोऽनुयोगश्चरणाश्रितः[3] ॥९१८॥
जीवाजीवपरिज्ञानं धर्माधर्मावबोधनम् ।
बन्धमोक्षज्ञता चेति फलं द्रव्यानुयोगतः[4] ॥९१९॥
जीवस्थान[5]गुणस्थान[6]मार्गणा[7]स्थानगो विधिः ।

## प्रथमानुयोगका स्वरूप

धर्मात्मा गृहस्थ जिससे अपने सिद्धान्तोंको अच्छी तरह समझ सकता है वह प्रथमानुयोग है। उसमें त्रेसठ शलाकापुरुषोंका वृतान्त या प्रसिद्ध पुरुषोंका चरित्र पाया जाता है ॥ ९१६ ॥

## करणानुयोगका स्वरूप

अधोलोक, मध्यलोक और ऊर्ध्वलोकमें चारों गतियोंका विचार जिसमें किया गया हो उसको करणानुयोग कहते हैं। यह करणानुयोग अन्य अनुयोगोंकी परीक्षा करनेकी कसौटी है। अर्थात् इसीपरसे अन्य सबके प्रामाण्यकी परीक्षा की जाती है ॥ ९१७ ॥

## चरणानुयोगका स्वरूप

यह मेरा अनुष्ठान–कर्तव्यकर्म है और उसके पालनका यह क्रम है। इस प्रकार आत्माके चरित्रका वर्णन जिसमें किया गया हो उसे चरणानुयोग कहते हैं ॥ ९१८ ॥

## द्रव्यानुयोगका स्वरूप

द्रव्यानुयोगसे जीव और अजीव द्रव्यका ज्ञान होता है, धर्म और अधर्म द्रव्यका ज्ञान होता है तथा बन्ध और मोक्षका ज्ञान होता है ॥ ९१९ ॥

जीवसमास, गुणस्थान और मार्गणा प्रत्येक चौदह-चौदह प्रकारके होते हैं। इनका स्वरूप

---

१. "पुराणचरितादिकः"— धर्मरत्ना० प० १४० । "प्रथमानुयोगमर्थाख्यानं चरितं पुराणमपि पुण्यम् । बोधिसमाधिनिधानं बोधति बोधः समीचीनः ॥४३॥"—रत्नकरंडश्रा० । २. "लोकालोकविभक्तेर्युगपरिवृत्तेश्चतुर्गतीनां च । आदर्शमिव तथामतिरवैति करणानुयोगं च ॥४४॥"–रत्नकरंड० । ३. "इत्थमात्मा चरित्रार्थेऽनुयोगश्चरणाभिधः ।"—धर्मरत्ना० प० १४० । "गृहमेध्यनगाराणां चारित्रोत्पत्तिवृद्धिरक्षाङ्गम् । चरणानुयोगसमयं सम्यग्ज्ञानं विजानाति ॥४५॥"—रत्नकरंड० । ४."जीवाजीवसुतत्त्वे पुण्यापुण्ये च बन्धमोक्षौ च । द्रव्यानुयोगदीपः श्रुतविद्यालोकमातनुते ॥४६॥"—रत्नकरंड० । ५. "बायरसुहुमेगिंदिय बिति चउरिंदिय असण्णी सण्णी य । पज्जत्तापज्जत्ता एवं ते चोद्दसा होंति ॥३४॥—प्रा० पंचसंग्रहः । ६. 'मिच्छो सासण मिस्सो अविरदसम्मो य देसविरदो य । विरदो पमत्तइयरो अपुव्व अणियट्टि सुहुमो य ॥४॥ उवसंत खीणमोहो सयोगिकेवलिजिणो अजोगी य । चोद्दस गुणठाणाणि य कमेण सिद्धा य णायव्वा ॥५॥—प्रा० पंचसंग्रहः । ७. 'गइ इंदियं च काए जोए वेए कसास णाणे य । संजम दंसण लेस्सा भविया सम्मत्त सण्णि आहारे" ॥५७॥—प्रा० पञ्चसंग्रह ।

चतुर्दशविधो बोध्यः स प्रत्येकं यथागमम् ॥९२०॥
आदितः[1] पञ्च तिर्यक्षु चत्वारि श्वभ्रिनाकिनोः।
गुणस्थानानि मन्यन्ते नृषु चैव चतुर्दश ॥९२१॥

आगमोंसे जानना चाहिए। तिर्यञ्चोंमें पहलेके पाँच गुणस्थान होते हैं। देव और नारकियोंमें पहलेके चार गुणस्थान होते हैं और मनुष्योंमें चौदहों गुणस्थान होते हैं ॥ ९२०-९२१ ॥

**भावार्थ**—साधारण तौरपर तो जो कुछ मनोयोगपूर्वक पढ़ा जाता है वह स्वाध्याय है किन्तु वस्तुतः जो स्व यानी आत्माके लिए पढ़ा जाता है वही स्वाध्याय है। इसीलिए अध्यात्मविद्याके ग्रन्थोंका अध्ययन करनेको स्वाध्याय बतलाया है। आत्मा क्या है, उसका वास्तविक स्वरूप क्या है, यह संसार कैसे होता है, मुक्ति कैसे होती है, आत्माके गुण कौन हैं आदि बातोंका जानना ही सच्चा ज्ञान है। अपनेको न जानकर यदि सबको जान भी लिया तो उससे क्या ? सब शास्त्र चार विभागोंमें बँटे हुए हैं। उन विभागोंको अनुयोग कहते हैं। जिन शास्त्रोंमें महापुरुषोंका जीवन-वृत्तान्त तथा कथानकोंके द्वारा पुण्य और पापका फल बतलाया गया हो वे सब प्रथमानुयोगमें आ जाते हैं। जिनमें लोकका स्वरूप चारों गतियोंका वर्णन वगैरह हो वे करणानुयोगमें आ जाते हैं। जिनमें आचारका वर्णन हो ये चरणानुयोगमें आ जाते हैं और जिनमें जीव अजीव आदि द्रव्योंका या सात तत्त्वोंका वर्णन हो वे सब द्रव्यानुयोगमें आ जाते हैं। इनमें-से सबसे पहले गृहस्थको प्रथमानुयोगके शास्त्रोंका स्वाध्याय करना चाहिए। उनसे रोचकता भी बनी रहती है और सब सिद्धान्तोंका ज्ञान भी सुगम रीतिसे हो जाता है। उसके बाद फिर अन्य अनुयोगोंके शास्त्रोंका स्वाध्याय करना चाहिए। और जब सिद्धान्तोंका अच्छा ज्ञान हो जाये तो गोम्मट्टसार आदि ग्रन्थोंसे गुणस्थान, मार्गणास्थान तथा जीवस्थानका अनुगम करना चाहिए। सारांश यह कि प्रत्येक गृहस्थको स्वाध्याय अवश्य करना चाहिए। जैन सिद्धान्तमें संसारके सब जीवोंका लेखा-जोखा रखनेके लिए जीव समास, गुणस्थान और मार्गणाओंका वर्णन विस्तारसे मिलता है। इनमें-से प्रत्येकके चौदह-चौदह भेद हैं। एकेन्द्रिय जीव बादर और सूक्ष्मके भेदसे दो प्रकारके होते हैं। दो इन्द्रिय, त्रीन्द्रिय, चतुरिन्द्रिय, पञ्चेन्द्रियअसंज्ञी और पञ्चेन्द्रियसंज्ञी जीव बादर ही होते हैं, ये सातों पर्याप्तक और अपर्याप्तकके भेदसे चौदह होते हैं। जिन जीवोंके केवल एक स्पर्शन इन्द्रिय होती है उन्हें एकेन्द्रिय कहते हैं, जैसे—पृथ्वीकायिक, जलकायिक आदि जीव। जिनके स्पर्शन और रसना दो इन्द्रियाँ होती हैं उन्हें दो इन्द्रिय जीव कहते हैं जैसे—लट। जिनके स्पर्शन, रसना, घ्राण तीन इन्द्रियाँ होती हैं उन जीवोंको त्रीन्द्रिय कहते हैं, जैसे चिऊँटी। जिन जीवोंके स्पर्शन, रसना, घ्राण और चक्षु चार इन्द्रियाँ होती हैं, उनको चतुरिन्द्रिय कहते हैं, जैसे मक्खी। और जिनके उक्त इन्द्रियोंके साथ कान भी होते हैं, उन्हें पञ्चेन्द्रिय कहते हैं जैसे मनुष्य। जिन पञ्चेन्द्रियोंके मन भी होता है, उन्हें संज्ञी पञ्चेन्द्रिय कहते हैं और जिनके मन नहीं होता है उन्हें असंज्ञी पञ्चेन्द्रिय कहते हैं। इनमें सब संसारी जीव गर्भित हो जाते हैं, इसलिए उन्हें जीवसमास कहते हैं। इसी तरह गुण

१. "सुरणारएसु चत्तारि होंति तिरिएसु जाण पंचेव। मणुयगईए वि तहा चोद्दस गुणणामधेयाणि ॥५७॥"—प्रा० पञ्चसंग्रह १।

अनिगूहितवीर्यस्य कायक्लेशस्तपः[१] स्मृतम् ।
तच्च मार्गाविरोधेन गुणाय गदितं जिनैः ॥९२२॥

अथवा—

अन्तर्बहिर्मलप्लोषादात्मनः शुद्धिकारणम् ।
शारीरं मानसं कर्म तपः प्राहुस्तपोधनाः ॥९२३॥
कषायेन्द्रियदण्डानां विजयो व्रतपालनम् ।

स्थान भी चौदह हैं। सब कर्मोंमें मोहनीय कर्म प्रबल है। इसीके कारण आत्माके स्वाभाविक गुण विकृत हो रहे हैं। गुणस्थानोंकी रचना जोवोंके मोहके हीन और अधिक होनेके आधारपर की गयी है। मिथ्यादृष्टि, सासादन सम्यग्दृष्टि, सम्यग्मिथ्यादृष्टि, असंयतसम्यग्दृष्टि, संयतासंयत, प्रमत्त-संयत, अप्रमत्तसंयत, अपूर्वकरण, अनिवृत्तिबादरसाम्पराय, सूक्ष्मसाम्पराय, उपशान्तकषाय, क्षीणकषाय, सयोगकेवली और अयोगकेवली ये चौदह गुणस्थान हैं। संसारके सब जीव अपने-अपने आध्यात्मिक विकासकी कमी-वेशीके कारण इन चौदह गुणस्थानोंमें बँटे हुए हैं। इनमें-से प्रारम्भ के चार गुणस्थान तो नारकी, तिर्यञ्च मनुष्य और देव सभीके होते हैं। पाचवाँ गुणस्थान केवल समझदार पशु-पक्षियों और मनुष्योंके ही होता है। आगेके सब गुणस्थान संयमी मनुष्योंके ही होते हैं। चौदहवें गुणस्थानसे जीव सिद्धि या मुक्ति प्राप्त करता है। गति, इन्द्रिय, काय, योग वेद, कषाय, ज्ञान, संयम, दर्शन, लेश्या, भव्यत्व, सम्यक्त्व, संज्ञा और आहार ये चौदह मार्गणाएँ हैं। इनके द्वारा भी संसारी जीवोंको जाना जाता है। जीवस्थान, गुणस्थान और मार्गणास्थानोंका कथन गोमट्टसार जीवकाण्ड तथा धवला टीकाके प्रथम भागसे जानना चाहिए ।

## तपका स्वरूप

अपनी शक्तिको न छिपाकर जो कायक्लेश किया जाता है, शारीरिक कष्ट उठाया जाता है उसे तप कहते हैं। किन्तु वह तप जैनमार्गके अविरुद्ध यानी अनुकूल होनेसे ही लाभदायक हो सकता है। अथवा अन्तरङ्ग और बाह्य मलके संतापसे आत्माको शुद्ध करनेके लिए जो शारीरिक और मानसिक कर्म किये जाते हैं उसे तपस्वीजन तप कहते हैं ॥ ९२२-९२३ ॥

**भावार्थ**—उपवास करना, भूखसे कम खाना, रस आदि छोड़ना ये सब ऐसे तप हैं जिन्हें गृहस्थ पाल सकता है। इनसे मनका भी नियमन होता है और शरीरको कष्ट भी होता है। शरीरको कष्ट देनेका प्रयोजन इतना ही है कि मनुष्य कष्टसहिष्णु बना रहे और कभी अचानक कष्ट आ पड़नेपर एकदम घबरा न उठे। किन्तु मनको वशमें किये बिना शरीरको ही कष्ट देना व्यर्थ है।

## संयमका स्वरूप

आत्माका कल्याण चाहनेवालोंके द्वारा जो कषायोंका निग्रह, इन्द्रियोंका जय, मन, वचन

१. "अनिगूहितवीर्यस्य मार्गाविरोधिकायक्लेशस्तपः ।"—सर्वार्थसिद्धि ६-२४ ।

संयमः[1] संयतैः प्रोक्तः श्रेयः श्रयितुमिच्छताम् ॥९२४॥

अस्यायमर्थः—कषन्ति संतापयन्ति दुर्गतिसंगसंपादनेनात्मानमिति कषायाः[2] क्रोधादयः। अथवा यथा विशुद्धस्य वस्तुनो नैयग्रोधादयः कषायाः कालुष्यकारिणः, तथा निर्मलस्यात्मनो मलिनत्वहेतुत्वात्कषाया इव कषायाः। तत्र स्वपरापराधाभ्यामात्मेतरयोरपायोऽपायानुष्ठानमशुभपरिणामजननं वा क्रोधः। विद्याविज्ञानैश्वर्यादिभिः पूज्यपूजाव्यतिक्रमहेतुरहंकारो युक्तिदर्शनेऽपि दुराग्रहापरित्यागो वा मानः। मनोवाक्कायक्रियाणामयाथातथ्यात्परवञ्चनाभिप्रायेण प्रवृत्तिः ख्यातिपूजालाभाद्यभिनिवेशेन वा माया। चेतनाचेतनेषु वस्तुषु चित्तस्य महान्ममेदं भावस्तदभिवृद्धिविनाशयोर्महान्सन्तोषो असन्तोषो वा लोभः।[3]

सम्यक्त्वं घ्नन्त्यनन्तानुबन्धिनस्ते कषायकाः।

---

और कायकी प्रवृत्तिका त्याग तथा व्रतोंका पालन किया जाता है उसे संयमी पुरुष संयम कहते हैं ॥ ९२४ ॥

इसका खुलासा इस प्रकार है—

जो आत्माको दुर्गतियोंमें ले जाकर कष्ट दें उन्हें कषाय कहते हैं। अथवा जैसे वटवृक्ष वगैरहका कसैला रस साफ़ वस्तुको भी काला कर देता है वैसे ही जो निर्मल आत्माको मलिन करनेमें कारण हो उसे कसैले रसके समान होनेसे कषाय कहते हैं। वे कषाय चार हैं—क्रोध, मान, माया और लोभ।

अपनी या दूसरोंकी गलतीसे अपना या दूसरोंका अनिष्ट होना या अनिष्ट करना अथवा बुरे भावोंका उत्पन्न होना क्रोध है। विद्या, ज्ञान या ऐश्वर्य वगैरहके घमंडमें आकर पूज्य पुरुषोंका आदर-सत्कार नहीं करना अथवा युक्ति देनेपर भी अपने दुराग्रहको नहीं छोड़ना मान है। दूसरोंको ठगनेके अभिप्रायसे अथवा ख्याति, आदर-सत्कार या धनलाभ वगैरहके अभिप्रायसे मन, वचन और कायकी मिथ्याप्रवृत्ति करना अर्थात् सोचना कुछ, कहना कुछ और करना कुछ, इसे माया कहते हैं। चेतन स्त्री-पुत्रादिकमें और अचेतन जमीन-जायदाद वगैरहमें 'यह मेरे हैं' इस प्रकारकी जो अत्यन्त आसक्ति होती है अथवा इन वस्तुओंकी वृद्धि होनेपर जो महान् संतोष या इनकी हानि होनेपर जो महान् असन्तोष होता है वह लोभ है।

इस प्रकार ये चार कषाय हैं। इन चारोंमें-से प्रत्येककी चार-चार अवस्थाएँ होती हैं—अनन्तानुबन्धि क्रोध, मान, माया, लोभ, अप्रत्याख्यानावरण क्रोध, मान, माया, लोभ, प्रत्याख्यानावरण क्रोध, मान, माया, लोभ और संज्वलन क्रोध, मान, माया, लोभ। इनमें से जो

---

१. "वय-समिदि-कसायाणं दंडाणं इंदियाण पंचण्हं। धारणपालणणिग्गहचायजओ संजमो भणिओ ॥१२७॥"—प्रा० पञ्चसंग्रह १। २. "क्रोधादिपरिणामः कषति हिनस्त्यात्मानं कुगतिप्रापणादिति कषायः।........अथवा यथा कषायो नैयग्रोधादिः श्लेषहेतुस्तथा क्रोधादिरप्यात्मनः कर्मश्लेषहेतुत्वात् कषाय इव कषाय इत्युच्यते।"—तत्त्वार्थवार्तिक पृ० ५०८। ३. "तदभिवृद्ध्याशयो वा महानसंतोषः क्षोभो वा लोभः"—धर्मर० पृ० १४१। ४. "कषायाः क्रोधमानमायालोभाः। तेषां चतस्रोऽवस्थाः अनन्तानुबन्धिनोऽप्रत्याख्यानावरणाः प्रत्याख्यानावरणाः संज्वलनाश्चेति। अनन्तसंसारकारणत्वान्मिथ्यादर्शनमनन्तं तदनुबन्धिनोऽनन्तानुबन्धिनः क्रोधमानमायालोभाः। यदुदयाद्देशविरतिं संयमासंयमाख्यामल्पामपि कर्तुं न शक्नोति, ते देशप्रत्याख्यानमावृण्वन्तोऽप्रत्याख्यानावरणाः क्रोधमानमायालोभाः। यदुदयाद्विरतिं कृत्स्नां संयमाख्यां न शक्नोति कर्तुं ते कृत्स्नं प्रत्याख्यान-

**अप्रत्याख्यानरूपाश्च देशव्रतविघातिनः ॥९२५॥**
**प्रत्याख्यानस्वभावाः स्युः संयमस्य विनायकाः[1] ।**
**चारित्रे तु यथाख्याते कुर्युः संज्वलनाः क्षतिम् ॥९२६॥**
**पाषाणभूरजोवारिलेखाप्रख्यत्वभाग्भवन्[2] ।**
**क्रोधो यथाक्रमं गत्यै श्वभ्रतिर्यङ्नृनाकिनाम् ॥९२७॥**
**शिलास्तम्भास्थिसार्द्रद्रुमवेत्रवृत्तिर्द्वितीयकः[3] ।**

कषाय सम्यग्दर्शनको घातती हैं अर्थात् सम्यग्दर्शनको नहीं होने देतीं उन्हें अनन्तानुबन्धी कषाय कहते हैं। जो कषाय सम्यग्दर्शनको तो नहीं घाततीं किन्तु देशव्रतको घातती हैं उन्हें अप्रत्याख्यानावरण कषाय कहते हैं ॥ ९२५ ॥ जो कषाय न तो सम्यग्दर्शनको रोकती हैं और न देशचारित्रको रोकती हैं किन्तु संयमको रोकती हैं, उन्हें प्रत्याख्यानावरण कषाय कहते हैं। और जो कषाय केवल यथाख्यात चारित्रको नहीं होने देतीं उन्हें संज्वलनकषाय कहते हैं ॥ ९२६ ॥

चारों क्रोध आदि कषायोंमें-से प्रत्येकके शक्तिकी अपेक्षासे भी चार-चार भेद होते हैं। पत्थरकी लकीरके समान क्रोध, पृथिवीकी लकीरके समान क्रोध, धूलिकी लकीरके समान क्रोध और जलकी लकीरके समान क्रोध। जैसे पत्थरकी लकीरका मिटना दुष्कर है वैसे ही जो क्रोध बहुत समय बीत जानेपर भी बना रहता है वह उत्कृष्ट शक्तिवाला होता है और ऐसा क्रोध जीवको नरक गतिमें ले जाता है। जैसे पृथ्वीकी लकीर बहुत समय बाद मिटती है वैसे ही जो क्रोध बहुत समय बीत जानेपर मिटे वह अनुत्कृष्ट शक्तिवाला क्रोध है ऐसा क्रोध जीवको पशुगतिमें ले जाता है। जैसे धूलमें की गयी लकीर कुछ समयके बाद मिटती है वैसे ही जो क्रोध कुछ समयके बाद मिट जाये वह अजघन्य शक्तिवाला क्रोध है। ऐसा क्रोध जीवको मनुष्य गतिमें उत्पन्न करता है। जैसे पानीमें की गयी लकीर तुरन्त ही मिट जाती है वैसे ही जो क्रोध तुरन्त ही शान्त हो जाये वह जघन्य शक्तिवाला क्रोध है। ऐसा क्रोध जीवको देवगतिमें उत्पन्न करानेमें निमित्त होता है ॥ ९२७ ॥

मान कषायके भी शक्तिकी अपेक्षा चार भेद हैं—पत्थरके स्तम्भके समान, हड्डीके समान, गीली लकड़ीके समान और बेतके समान। जैसे पत्थरका स्तम्भ कभी नमता नहीं है वैसे ही जो मान जीवको कभी विनयी नहीं होने देता वह उत्कृष्ट शक्तिवाला मान है, ऐसा मान जीवको नरक-गतिमें जानेका निमित्त होता है। जैसे हड्डी बहुत काल बीते बिना नमने योग्य नहीं होती वैसे ही जो बहुत काल बीते बिना जीवको विनयी नहीं होने देता वह अनुत्कृष्ट शक्तिवाला मान है। ऐसा

---

मावृण्वन्तः प्रत्याख्यानावरणाः क्रोधमानमायालोभाः। समेकीभावे वर्तते। संयमेन सहावस्थानादेकीभूय ज्वलन्ति संयमो वा ज्वलत्येषु सत्स्वपीति संज्वलनाः क्रोधमानमायालोभाः।"—सर्वार्थसिद्धि ८-१०। "सम्मत्त देससंजम-संसुद्धीघाइकसाइं पढमाइं। तेसिं तु भवे नासे सड्ढाईं चउहं उप्पत्ति ॥११०॥"—प्रा० पंचसंग्रह १।

१. विनाशकाः—धर्मरत्ना० प० १४१। २ "सिलभेय पुढविभेया धूलीराई य उदयराइसमा। णिर-तिरि-णर देवत्तं उविंति जीवा हु कोहवसा ॥१११॥"—प्रा० पञ्चसंग्रह १। ३. "सलसमो अट्ठिसमो दारुसमो तह य जाणवेत्तसमो। णिर-तिरि-णर-देवत्तं उविंतो जीवा हु माणवसा ॥११२॥"—पं० सं० १।

अधः पशुनरस्वर्गगतिसंगतिकारणम् ॥९२८॥

[1]वेणुमूलैरजाशृङ्गैर्गोमूत्रैश्चामरैः[2] समा।
माया तथैव जायेत चतुर्गतिवितीर्णये ॥९२९॥

[3]क्रिमिनीलीवपुर्लेपहरिद्रारागसंन्निभः।
लोभः कस्य न संजातस्तद्वत्संसारकारणम् ॥९३०॥

मान जीवको पशुगतिमें उत्पन्न होनेका निमित्त होता है। जैसे गीली लकड़ी थोड़े कालमें ही नमने योग्य हो जाती है वैसे ही जो थोड़े समयमें ही शान्त हो जाता है वह अजघन्य शक्तिवाला मान है। ऐसा मान जीवको मनुष्यगतिमें उत्पन्न कराता है। जैसे बेत जल्दी ही नम जाता है वैसे ही जो जल्दी ही शान्त हो जाये वह जघन्य शक्तिवाला मान है ऐसा मान जीवको देवगतिमें उत्पन्न कराता है ॥ ९२८ ॥

इसी प्रकार बाँसकी जड़, बकरीके सींग, गोमूत्र और चामरोंके समान माया क्रमशः चारों गतियोंमें उत्पन्न करानेमें निमित्त होती है। अर्थात् जैसे बाँसकी जड़में बहुत-सी शाखा-प्रशाखा होती है वैसे ही जिसमें इतने छल-छिद्र हों कि उनका कोई हिसाब ही न हो, उसे उत्कृष्ट शक्तिवाली माया कहते हैं। जैसे बकरीके सींग टेढ़े होते हैं उस ढंगका टेढ़ापन जिसके व्यवहारमें हो वह अनुत्कृष्ट शक्तिवाली माया है। जैसे बैल कुछ मोड़ा देकर मूतता है उतना टेढ़ापन जिसमें हो वह अजघन्य शक्तिवाली माया है और जैसे चामर ढोरते समय थोड़ा मोड़ा खा जाते हैं किन्तु तुरन्त ही सीधे हो जाते हैं वैसे ही जिसमें बहुत कम टेढ़ापन हो जो जल्द ही निकल जाये वह जघन्य शक्तिवाली माया है। चारों प्रकारकी माया क्रमसे जीवको चारों गतिमें उत्पन्न करानेमें कारण है ॥ ९२९ ॥

किरमिचके रंग, नीलके रंग, शरीरके मल और हल्दीके रंगके समान लोभ शेष कषायोंकी तरह किस जीवके संसार-भ्रमणका कारण नहीं होता। जैसे किरमिचका रंग पक्का होता है वैसे ही जो खूब गहरा और पक्का हो वह तो उत्कृष्ट शक्तिवाला लोभ है। जैसे नीलका रंग किरमिचसे कम पक्का होता है मगर होता वह भी गहरा ही है वैसे ही जो कम पक्का और गहरा राग होता है वह अनुत्कृष्ट शक्तिवाला लोभ है। जैसे शरीरका मल हलका गहरा होता है वैसे ही जो हलका गहरा राग होता है वह अजघन्य शक्तिवाला लोभ है। तथा जैसे हल्दीका रंग हलका होता है और जल्दी ही उड़ जाता है वैसे ही जो बहुत हलका राग होता है वह जघन्य शक्तिवाला लोभ है। ये चारों प्रकारके लोभ जीवको क्रमशः चारों गतियोंमें उत्पन्न करानेमें निमित्त होते हैं ॥ ९३० ॥

---

१. "वंसीमूलं मेसस्स सिगं गोमुत्तियं च खोरुप्पम्। णिरि-तिरि-णर-देवत्तं उविंति जीवा हु मायवसा ॥११३॥"—पञ्चसं० १। २. –र्गोमूत्र्या—धर्मर० प० १४१। ३. "किमिराय चक्कमल कद्दमोय तह चेय जाण हारिद्दं। णिर-तिरि-णरदेवत्तं उविंति जीवा हु लोहवसा ॥११४॥"—पंचसं० १।

किञ्च—

यथौषधक्रिया रिक्ता रोगिणोऽपथ्यसेविनः ।
क्रोधनस्य तथा रिक्ताः समाधिश्रुतसंयमाः ॥९३१॥

मानदावाग्निदग्धेषु मदोषर[1]कषायिषु ।
नृद्रुमेषु प्ररोहन्ति न सच्छायोचिताङ्कुराः ॥९३२॥

यावन्मायानिशालेशोऽप्यात्माम्बुषु कृतास्पदः ।
न प्रबोधश्रियं तावद्धत्ते चित्ताम्बुजाकरः[2] ॥९३३॥

लोभकीकस[3]चिह्नानि चेतःस्रोतांसि दूरतः ।
गुणाध्वन्या[4]स्त्यजन्तीह चण्डालसरसीमिव ॥९३४॥

तस्मान्मनोनिकेतेऽस्मिन्निदं शल्यचतुष्टयम् ।
यतेतोद्धर्तुमात्मज्ञः क्षेमाय शमकीलकैः ॥९३५॥

षट्स्वर्थेषु विसर्पन्ति स्वभावादिन्द्रियाणि षट् ।
तत्स्वरूपपरिज्ञानात्प्रत्यावर्तेत सर्वदा ॥९३६॥

---

जैसे अपथ्य सेवन करनेवाले रोगीका दवा सेवन व्यर्थ है वैसे ही क्रोधी मनुष्यका ध्यान, शास्त्राभ्यास तथा संयम सब व्यर्थ हैं ॥ ९३१ ॥

मानरूपी वनकी आगसे जले हुए और मदरूपी खारी मिट्टीसे सने हुए मनुष्यरूपी वृक्षोंमें अच्छी छाया देनेवाले नये अंकुर नहीं उगते । अर्थात् जैसे वनकी आगसे जले हुए और खारी मिट्टीसे सने हुए वृक्षमें नये अंकुर पैदा नहीं होते वैसे जो मनुष्य घमंडी और अहंकारी है उनमें भी सद्‌गुण प्रकट नहीं हो सकता ॥ ९३२ ॥

## मायाकी बुराई

जैसे थोड़ी-सी भी रातके रहते हुए जलाशयमें कमल नहीं खिलते वैसे ही आत्मामें थोड़ी-सी भी मायाके रहते हुए चित्त बोधको प्राप्त नहीं होता । अर्थात् मायाचारीके हृदयमें ज्ञानका प्रवेश नहीं होता ॥९३३॥

## लोभकी बुराई

जैसे गुणी पथिक चाण्डालोंके तालाबको दूरसे ही छोड़ देते हैं क्योंकि उसके सोतोंमें हड्डियाँ पड़ी होती हैं वैसे ही जिसके चित्तमें लोभका वास होता है उसे गुण दूरसे ही छोड़ देते हैं । अर्थात् लोभी मनुष्यके सभी गुण नष्ट हो जाते हैं ॥९३४॥

अतः आत्मदर्शी मनुष्यको अपने कल्याणके लिए संयमरूपी कीलके द्वारा अपने मनरूपी मन्दिरसे इन चारों शल्योंको निकालनेका प्रयत्न करना चाहिए ॥९३५॥ छहों इन्द्रियाँ स्वभावसे ही अपने-अपने विषयोंमें प्रवृत्त होती हैं । अतः उन विषयोंके स्वरूपको जानकर सदा उन इन्द्रियोंको

---

१. क्षारः । २. कमलसमूहः । ३. अस्थि । ४. पथिकाः ।

आपाते सुन्दरारम्भैर्विपाके विरसक्रियैः।
विषैर्वा विषयैर्ग्रस्ते कुतः कुशलमात्मनि ॥९३७॥

दुश्चिन्तनं दुरालापं दुर्व्यापारं च नाचरेत्।
व्रती व्रतविशुद्ध्यर्थं मनोवाक्कायसंश्रयम् ॥९३८॥

अभङ्गानतिचाराभ्यां गृहीतेषु व्रतेषु यत्।
रक्षणं क्रियते शश्वत्तद्भवेद् व्रतपालनम् ॥९३९॥
वैराग्यभावना नित्यं नित्यं तत्त्वविचिन्तनम्।
नित्यं यत्नश्च कर्तव्यो यमेषु नियमेषु च ॥९४०॥

**तत्र दृष्टानुश्राविकविषयवितृष्णस्य मनोवशीकारसंज्ञा वैराग्यम्। प्रत्यक्षानुमानागमानुभूतविषयाऽसंप्रमोषस्वभावा स्मृतिस्तत्त्वविचिन्तनम्। बाह्याभ्यन्तरशौचतपःस्वाध्यायप्रणिधाना नियमाः। अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा नियमाः।**

*इत्युपासकाध्ययने प्रकीर्णकविधिर्नाम षट्चत्वारिंशत्तमः कल्पः।*

---

उनके विषयोंमें फँसनेसे बचाना चाहिए॥९३६॥ ये विषय विषके समान हैं। जब प्राप्त होते हैं तो अच्छे मालूम होते हैं किन्तु जब वे अपना फल देते हैं तो अत्यन्त विपरीत हो जाते हैं। जो आत्मा इन विषयोंके चक्करमें फँसा हुआ है उसकी कुशल कैसे हो सकती है ? ॥९३७॥

व्रती पुरुषको अपने व्रतोंको शुद्ध रखनेके लिए मनमें बुरे विचार नहीं लाना चाहिए। वचनसे बुरी बात नहीं कहनी चाहिए और शरीरसे बुरी चेष्टा नहीं करनी चाहिए। जो व्रत ग्रहण किये हों उनमें न तो अतिचार लगने दे और न व्रतको खण्डित होने दे। इस प्रकार जो व्रतोंकी रक्षा की जाती है इसे ही व्रतोंका पालन करना कहा जाता है ॥९३८-९३९॥

**भावार्थ**—जब व्रतका ध्यान रखते हुए उसका एकदेश खण्डित हो जाता है उसे अतिचार कहते हैं। और व्रतका कतई ध्यान न रखकर उसे तोड़ डालना भंग कहलाता है। जो व्रत लो उसे खूब सोच-समझकर लो, जो कुछ सोचना-विचारना हो वह व्रत लेनेसे पहले ही सोच-विचार लो। और जब व्रतको ले लो तो उसे पूरे प्रयत्नके साथ पालो, न तो उसमें कोई दोष लगने दो और न व्रतको छोड़नेकी कोशिश करो। यदि कभी अज्ञान या प्रमादसे व्रत खण्डित हो जाये तो यह सोचकर कि अब तो यह टूट ही गया उसे छोड़ मत बैठो बल्कि प्रयत्नपूर्वक उसे फिर धारण करो। ऐसी सावधानता रखनेसे ही व्रतोंका पालन हो सकता है।

अतः सदा वैराग्यको भाना चाहिए। सदा तत्त्वोंका चिन्तन करते रहना चाहिए और सदा यम और नियमोंमें प्रयत्न करते रहना चाहिए ॥ ९४० ॥

देखे हुए और सुने हुए विषयोंकी तृष्णाको छोड़कर मनको वशमें करनेको वैराग्य कहते हैं। प्रत्यक्षसे, अनुमानसे और आगमसे जाने हुए पदार्थोंका जो भ्रान्तिरहित स्मरण है उसे तत्त्व-चिन्तन कहते हैं। बाह्य और आभ्यन्तर शौच तथा सन्तोष, तप, स्वाध्याय और ध्यानको यम कहते हैं और अहिंसा, सत्य, अचौर्य, ब्रह्मचर्य और अपरिग्रहको नियम कहते हैं।

*इस प्रकार उपासकाध्ययनमें विविध विधियोंको बतलानेवाला छियालीसवाँ कल्प समाप्त हुआ।*

**इत्येष गृहिणां धर्मः प्रोक्तः क्षितिपतीश्वरः।**
**यतीनां तु श्रुतात् ज्ञेयो मूलोत्तरगुणाश्रयः ॥९४१॥**

*समाप्तोऽयं ग्रन्थः*

---

इस प्रकार हे राजन्! यह गृहस्थोंका धर्म कहा। यतियोंका धर्म-उनके मूल गुण और उत्तरगुण-आगमसे जानना चाहिए ॥ ९४१ ॥

श्री:

पं० जिनदासविरचिता

# उपासकाध्ययनटीका

जितदोषं नतदेवं दातारं सकलभव्यजीवेभ्यः।
मुक्तिसुखानां वन्दे वीरजिनं सकलसद्गुणोपेतम् ॥१॥
श्रीसोमदेवविरचितमुपासकाध्ययनमस्ति हितकथकम्।
गृहिणामुपासकानां जिनदासेनास्य तन्यते टीका ॥२॥

[ पृष्ठ १ ] **धर्मादिति**—किलेति निश्चये। हे भगवन् पूज्य, एष जन्तुः एष प्राणी। किल निश्चयेन। धर्मात्सुखी भवति। जगति लोके। स च धर्मः पुनः किंरूपः किंलक्षणः। किंभेदः किंप्रकारः। किमुपायः कैः उपायैः उत्पद्येत। किंफलश्च जायेत—अस्य धर्मस्य आराधनात् इहलोकसुखं परलोकसुखं वा जायेत उत्पद्येत ॥१॥ **यस्मादिति**—यस्मात् सम्यक्त्वज्ञानचारित्रत्रयात्। पुंसां नराणाम्। निःश्रेयसफलाश्रयः। अतिशयेन प्रशस्यं निःश्रेयसं मोक्षः तदेव फलं तस्य आश्रयः आधारः। अभ्युदयाधारो विना तस्मात् स न लभ्यते। इन्द्रपदतीर्थंकरपदादिजं सांसारिकसुखं विशिष्टम् अविशिष्टं च अभ्युदय उच्यते। विदितास्नायाः ज्ञातागमाः। धर्मसूरयः धर्माचार्याः। तं धर्म वदन्ति ॥२॥ **स इति**—स गृहस्थेतरगोचरः गृहस्थयतिविषयो धर्मः। प्रवृत्तिनिवृत्त्यात्मा प्रवृत्तिश्च निवृत्तिश्च ते आत्मा स्वरूपं यस्य सः। स धर्मः प्रवृत्तिस्वरूपः निवृत्तिस्वरूपश्च अस्ति। मुक्तिहेतौ मोक्षप्राप्तिकारणे रत्नत्रये तत्परता प्रवृत्तिः। भवकारणात् संसारहेतोः मिथ्यात्वादेः निवृत्तिः त्यागः। इति धर्मस्य द्विविधस्यापि स्वरूपम् ॥३॥ **सम्यक्त्वेति**—सम्यग्दर्शनम्, सम्यग्ज्ञानम्, सम्यक्चारित्रं च एतत्त्रयं मोक्षस्य सकलकर्मणाम् अत्यन्तक्षयस्य कारणं भवति। मिथ्यात्वम् अविरतिः कषायाः योगाश्च मिथ्यात्वादिचतुष्टयम् उच्यते। एतच्चतुष्कं संसारस्य चतुर्गतिपरिवर्तनरूपस्य भवस्य हेतुरूपं मीमांस्यं विमर्शनीयं विचारणीयम् इति ॥४॥ **सम्यक्त्वमिति**—युक्तियुक्तेषु प्रत्यक्षादिप्रमाणसिद्धेषु, नयसिद्धेषु च। वस्तुषु जीवादिनवपदार्थेषु भावना दृढं श्रद्धानं सम्यक्त्वं सम्यग्दर्शनम् आहुः। युक्तमेतत् लक्षणम्। '**तत्त्वार्थश्रद्धानं सम्यग्दर्शनम्**' [ तत्त्वार्थसू० १।२ ] इति उमास्वामिवचनात्। मोहसंदेहविभ्रान्तिवर्जितं मोहः इदं किंचित् स्यात् इति पदार्थानवबोधः। इदं रजतं स्यादुत शुक्तिशकलम् इति चलन्ती प्रतीतिः संदेहः संशयः। विभ्रान्तिः विभ्रमः विपर्ययः शुक्तिकाशकले रजतज्ञानम्। एतत् त्रयम् अज्ञानम् उच्यते सत्यपदार्थानवबोधनात्। एभिः त्रिभिः अज्ञानैः वर्जितं यत् ज्ञानं तत् सम्यग्ज्ञानम् उच्यते ॥५॥ **कर्मादानेति**—कर्मादाने ज्ञानावरणादिकर्मणाम् आदाने ग्रहणे। निमित्तायाः हेतुभूतायाः वाचः मनसः च क्रियायाः प्रवृत्तेः शमः निरोधः, उपशान्तिः नाशो वा। चारु उत्तमं चारित्रम् ऊचिरे बभाषिरे। के चारित्रोचितचातुर्याः चारित्रे चारित्रधारणे उचितं योग्यं चातुर्यं येषां ते गणधरदेवादयः। एतत् चारित्रं त्रियोगरहिते अयोगिकेवलिनि यथाख्यातसंज्ञकं लभ्यते ॥६॥

[ पृष्ठ २ ] **सम्यक्त्वेति**—सम्यक्त्वे ज्ञाने चारित्रे च विपर्ययपरं विपरीतभावयुक्तं मनः। सर्ववेदिनः सर्वज्ञाः भाषन्ते ब्रुवते। त्रिषु सम्यक्त्वादिषु। अतत्त्वे तत्त्वम् इति भावना सम्यक्त्वे मिथ्यात्वम्। मोहसंदेहविभ्रान्तिः ज्ञाने मिथ्यात्वम्। अहिंसादेः विपरीतम् आचरणं चारित्रे मिथ्यात्वम्। इति मिथ्यात्वं त्रिप्रकारम् ॥७॥ **अत्रेति**—परवादिनां प्रवृत्तयः बहुवृत्तयः नानाविधाः सन्ति। कथंभूतानाम्। **दुरागमेति**—दुरागमो मिथ्याम्नायस्तस्य वासना संस्कारः सैव विलासिनी मोहयन्ती नारी तया वासितं विह्वलं चेतो मनो येषां तेषाम्। पुनः कथंभूतानाम्। **प्रवर्तितेति**—प्रवर्तितानि प्रचारितानि प्राकृतलोका अज्ञजना एव अनोकहा वृक्षास्तेषाम् उन्मूलने उत्पाटने

समया दुर्मतानि एव स्रोतांसि जलप्रवाहाः यैस्तेषाम् । पुनः कथंभूतानाम्-सदाचारेति-सदाचाराः अहिंसानुवर्तिनः दानतपोग्रतादयः न तु अश्वमेधादिकाः । तेषाम् आचरणस्य या चातुरी निपुणता तस्याः विदूरवर्तिनः अतिदूरगामिनः तेषां मुक्तेः उपाये मोक्षाप्तिसाधने मोक्षस्वरूपे च बहुवृत्तयः अनेकरूपाः खलु प्रवृत्तयः । तथा हि—सकलेति—सकलः कलाभिः शरीरावयवैः सहितः आप्तः सकलाप्तः । सैद्धान्तवैशेषिकैः कैश्चनाप्तः ईश्वरः सशरीरः कैश्चन अशरीरश्च मन्यते । ईदृशात् ईश्वरात् प्राप्तानि यानि मन्त्रतन्त्राणि तैः उपेतायाः दीक्षायाः मोक्षो भवतीति । दीक्षालक्षणाच्छ्रद्धानुसरणात् मोक्षप्राप्तिः इति सैद्धान्तवैशेषिका मन्यन्ते । द्रव्यमिति—साधर्म्यं सादृश्यम् । वैधर्म्यं विसदृशता । सदृशविसदृशधर्मसहित-द्रव्यादिपदार्थावबोधकशास्त्रज्ञानमात्रात् ज्ञानात् मोक्षो भवति । त्रिकालेति-प्रातः मध्याह्ने सायं च शरीरे भस्मलेपनम् । इज्या शिवलिङ्गपूजनम् । गडुकप्रदानं शिवलिङ्गस्य पुरतः जलपात्रस्थापनम् । शिवलिङ्गं परितः प्रदक्षिणीकरणम् । आत्मविडम्बनादिक्रियाकाण्डमात्राधिष्ठानं पञ्चाग्नितपश्चरणादिक्रियासमूहाश्रयात् कार्यात् मोक्षः इति पाशुपतमतावलम्बिनो निगदन्ति । पय इति—पयः पेयं मदिरा न पेया इति विचारम् अकृत्वा उभयत्र निःशङ्का प्रवृत्तिः करणीया । मांसम् अभक्ष्यम् अन्नं भक्ष्यम् इति विमर्शम् अकृत्वा उभययोः असंशया प्रवृत्तिः । आदिशब्देन गम्यागम्यादिकं ग्राह्यम् । एतेषु कृतेषु पापं भवेत्पुण्यं वेति अविमृश्य प्रवृत्तिं कुर्वतो मुक्तिर्भवतीति कुलाचार्यका जल्पन्ति ।। तथा च त्रिकमतोक्तिः—मदिरेति—मदिरायाः आमोदेन अत्यन्तसमाकर्षिणा गन्धेन वासितमुखः, तरसस्य मांसस्य भक्षणेन सरसहृदयः मुदितमनाः, वामपार्श्वस्थापितस्त्रीशक्तिः, शक्तिमुद्रायाः योनिमुद्रायाः आसनस्य च धारकः । स्वयमिति—स्वयं पार्वतीपरमेश्वर इव आचरन्, कृष्णया मदिरया शर्वाणीश्वरं पार्वत्या धवं महादेवम् आराधयेत् उपासीत । सांख्या एवं वदन्ति—अहं पुरुषः इदं शरीरादिकं प्रकृतेः उद्भूतम् । न तन्मे स्वरूपम् इति विवेकज्ञानात् पुरुषः प्रकृतेः पृथग्जायते । तदा तस्य मोक्षो भवति इति । नैरात्म्यादीति —नैरात्म्यस्य भावनायाः रागद्वेषौ विनश्यतः ततश्च मोक्षो भवतीति सौगतानां मतम् ।

[ पृष्ठ ३ ] अङ्गाराञ्जनादिवदिति—अङ्गारवत् अथवा अञ्जनवत् स्वभावादेव कालुष्यस्य कोपादिमालिन्यस्य उत्कर्षात् प्रवृत्तस्य चित्तस्य न कुतश्चिद्विशुद्धिः कुतश्चित्तपोध्यानादेः चित्तनैर्मल्यं न जायते इति जैमिनीया वदन्ति । सति धर्मिणीति—सति विद्यमाने धर्मिणि चैतन्यवदात्मनि धर्माः ज्ञानसुखादयः चिन्त्यन्ते विमृश्यन्ते । ततः परलोकिनः जीवस्य अभावात् परलोकस्य स्वर्गनरकादेः तत्कारणस्य पुण्यपापादेः अभावे कस्यासौ मोक्षः । इति समवाप्त लब्धं समस्तानां नास्तिकानाम् अधिकम् आधिपत्यं स्वामित्वं यैस्ते बार्हस्पत्याः बृहस्पतेः शिष्याश्चार्वाकाः एवं वदन्ति । परमब्रह्मेति—परमब्रह्मणो दर्शने अनुभवे जाते सति अशेषभेददर्शिन्या अविद्याया विनाशो जायते ततश्च मोक्षो लभ्यते इति वेदान्तवादिनो वदन्ति । शाक्यविशेषाः पश्यतोहराः दृश्यमानं विश्वम् अपलपन्तः प्रकाशितशून्यैकान्ततिमिराः प्रकटीकृतशून्यैकान्ततमसः शाक्यविशेषा बौद्धविशेषाः एवं वदन्ति—नैवेति—अन्तस्तत्त्वम् आत्माख्यं नास्त्येव । बहिस्तत्त्वं घटादिकम् अञ्जसा परमार्थतः नैवास्ति न विद्यते एव । उभावपि चेतनाचेतनौ पदार्थौ विचारविषयौ न भवतः यतः ततः शून्यता सर्वं शून्यं शून्यम् इति वादः श्रेयान् ।

काणादाः योगा एवं वदन्ति 'ज्ञानसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराणां नवसंख्यावसराणां नवसंख्यायुक्तानाम् आत्मगुणानां जीवगुणानाम् अत्यन्तविनाशः मुक्तिः' इति । पुनस्तैरेव उक्तम्—बहिरिति—देहाद् बहिः जीवस्य यद्रूपं ज्ञायते तदेव कणभोजिना मुनिना वैशेषिकदर्शनस्य प्रणेत्रा मुक्तस्य नवगुणरहितस्य जीवस्य अचेतनघटादितुल्यस्य उक्तमिति ।।९।।

[ पृष्ठ ४ ] ताथागता बौद्धाः एवं मुक्तेः स्वरूपम् आचक्षते । 'निरास्रवचित्तोत्पत्तिलक्षणो मोक्षः' रागद्वेषरहितता निरास्रवता तया अन्वितस्य चित्तस्य उत्पादो मोक्षः । तदुक्तम्—दिशमिति—यथा प्रदीपः तैलक्षयात् केवलं शान्तिम् अभावम् एव याति । स कांचन दिशं, विदिशं, पृथ्वीं, नभो वा नैव याति तथा जीवः क्लेशक्षयात् मुक्तः शान्तिम् अभावं प्रतिपद्यते ।। १०-११ ।। कापिला एवं वर्णयन्ति मुक्तिम्—'बुद्धिमनो-

ऽहंकारविरहादखिलेन्द्रियोपशमावहात्तदा द्रष्टुः स्वरूपेऽवस्थानं मुक्तिः' इति । बुद्ध्यादीनाम् इन्द्रियाणां च प्रशमे जाते द्रष्टुः आत्मनः स्वरूपे अवस्थानं स्थितिः मुक्तिः । तथा ब्रह्माद्वैतवादिनः यथा घटविघटने घटस्य कुम्भस्य विघटने नाशे घटाकाशं घटरहितं भूत्वा निजस्वरूपे तिष्ठति, केवलम् आकाशमयम् एव जायते तथा देहोच्छेदात् देहस्य शरीरस्य आत्यन्तिकविनाशात् सर्वः प्राणी जीवः परे ब्रह्मणि परपुरुषे लीयते इति वदन्ति । **अज्ञातेति**—अज्ञातः परमार्थो यैः तेषां यथार्थवस्तुस्वरूपानभिज्ञानां मिथ्यादृष्टीनां ये दुर्णयाः उपरि प्रदर्शिताः तेभ्यो अन्येऽपि बहवः सन्ति ते सर्वे न गणयितुं शक्यन्ते । यथा अज्ञातगजस्वरूपाणां जन्मना अन्धानां दुर्णयाः सर्वे गणयितुं न शक्या भवन्ति ॥१२॥ **प्राय इति**—यथा कृत्तघ्राणस्य नरस्य निर्मलदर्पणदर्शनं कोपाय भवति, तथा परमार्थपथप्रतिपादनं दुराग्रहं बिभ्रति नरे बहुशः कोपहेतुर्भवति ॥१३॥

[ पृष्ठ ५ ] **दृष्टान्तेति**—निदर्शनानि बहूनि भवन्ति । तैः बुद्धिर्जनानां वशीक्रियते धूर्तैः । ते इमां महीं पृथ्वीं ( आधारे आधेयोपचारात् ) विवेकरहितां किं न कुर्वन्ति । अपि तु कुर्वन्त्येव ॥१४॥ **दुराग्रहेति**—यथा तोयदः तोयं जलं ददाति इति तोयदः मेघः स श्यामाश्मशकलेषु मार्दवं मृदुत्वं नोत्पादयति तथा दुराग्रहग्रहग्रस्ते विपरीताग्रहपिशाचाविष्टे पुंसि नरे विद्वान् किं करोतु । तत्र पुरुषे परमार्थपदार्थप्रतिपादनं तेन विदुषा क्रियमाणं विफलं भवति ॥१५॥ **ईर्ते इति**—अत्र अस्मिन्विषये । यदेव वस्तु युक्तिम् ईर्ते गच्छति तदेव सत् परमार्थरूपम् । यतः भानुदीप्तिवत् सूर्यप्रकाश इव । तस्याः युक्तेः क्वचित्पक्षपातो न भवति । सूर्यप्रकाशो हीनानि उत्तमानि च वस्तूनि प्रकाशयति विना पक्षपातम् । तथा युक्त्या सदसत्त्वं वस्तुनः सिद्ध्यतीति ज्ञेयम् ॥१६॥ **श्रद्धेति**—केवला श्रद्धा श्रेयोऽर्थिनां मुमुक्षूणां श्रेयःसंश्रयाय मोक्षदानाय हेतुर्न भवति । बुभुक्षितवशात् भोक्तुम् इच्छुकस्य नरस्य इच्छया उदुम्बरफले पाकः उत्पद्येत किम् । इच्छा यदि सफला स्यात् जगत् अदरिद्रं भवेत् अतः इच्छा मोक्षदाने न क्षमा ॥१७॥ मन्त्रोऽपि न मोक्षकारणम् इति निगदति—**पात्रेति**—यथा पात्रे नरे नार्यां वा पिशाचः प्रविशति तथा यदि मन्त्रात् आत्मनो रागादिदोषनाशो दृश्येत को नाम कृती विद्वान् संयमैः तपोव्रतादिभिः आत्मानं क्लिश्येत पीडयेत् ॥१८॥ दीक्षापि न मुक्तिकारणम्—**दीक्षेति**—यस्मिन्क्षणे दीक्षा गृहीता तत्क्षणात्पूर्वं ये भवसंभवाः संसारोद्भूताः दोषाः ते दीक्षायाः पश्चात् अपि दृश्यन्ते । अतः सा मोक्षहेतुर्न भवति ॥१९॥ ज्ञानात् मोक्षः इत्यपि वचनम् अनुचितम्—

[ पृष्ठ ६ ] **ज्ञानादिति**—ज्ञानात् वस्तूनां बोधो भवति परं तेषां प्राप्तिः तस्मान्न भवति । वस्तुनः यत् कार्यं जायते तस्य प्राप्तिः ज्ञानान्न भवति । यदि ज्ञानादेव कार्यलाभोऽपि भवेत् तर्हि दृष्टमेव पयः जलं दर्शनसमकालं तर्षापकर्षयोगि तृष्णाविनाशकं स्यात् । अतः ज्ञानादेव मोक्षो न भवति इति ज्ञेयम् ॥२०॥ ज्ञानेन विना क्रियापि न कार्यकारिणी । **ज्ञानहीने इति**—ज्ञानहीने बोधशून्ये । पुंसि पुरुषे । विद्यमाना क्रिया फलं न आरभते । सा निष्फला भवति । दृष्टान्तम् आह–नष्टदृष्टिभिः नष्टे दृष्टी लोचने येषां ते नष्टदृष्टयः अन्धाः तैः तरोः वृक्षस्य छायेव फलश्रीः लभ्या किम् । छायां तु अन्धाः प्राप्नुयुः परं वृक्षे फलशोभा तैः न द्रष्टुं शक्या ॥ २१ ॥ ज्ञानक्रियाश्रद्धाभ्य एव फलोत्पत्तिरिति प्रतिपादयति—**ज्ञानमिति**—पङ्गौ पादहीने नरि ज्ञानं पदार्थावगमः व्यर्थं विफलम् । अन्धे क्रिया गमनं विफला ज्ञानाभावात् । निःश्रद्धे श्रद्धाहीने । द्वयं ज्ञानं क्रिया च अर्थकृत् अर्थं प्रयोजनं करोति इति अर्थकृत् न भवति इत्यर्थः । ततः ज्ञानक्रियाश्रद्धात्रयं तत्पदकारणं मुक्तिपददानहेतुः भवति । नैकैकं न द्वे द्वे प्रत्युत त्रयं मिलित्वा एव अर्थकृद् भवति । उक्तं च—**हतमिति**—क्रियाशून्यं ज्ञानं न फलप्रापकम् । अज्ञानिनो मूर्खस्य क्रिया च अर्थलाभहेतुः न भवति । कथम् । धावन् अपि पलायमानोऽपि अन्धः नष्टः अग्निदग्धः अभवत् । पश्यन् अपि च पङ्गुकः अग्निम् अवलोकमानोऽपि पादहीनः नरः तेन अग्निना दग्धः ॥२३॥ भक्ष्याभक्ष्यादिषु निःशङ्कां प्रवृत्तिं कुर्वाणस्य मोक्षः इति कौलवचनम् अपि दूषयति—**निःशङ्केति**—निःशङ्काम् अकुतोभीतिं प्रवृत्तिं कुर्वाणस्य नरस्य । यदि मोक्षसमीक्षणं मोक्षस्य अवलोकनं मुक्तिप्राप्तिः स्यात् तर्हि पूर्वं टङ्कसूनाकृतां टङ्कः खड्गः तस्मात् सूनां हिंसां कुर्वन्ति इति टङ्कसूनाकृतः जीवघातकाः तेषाम् । पूर्वं प्रथमं मुक्तिः स्यात् । यतः तत्र निःशङ्कात्मप्रवृत्तेः दर्शनात् । ठकसूनाकृताम् इति पाठे तु ठकाः खारपटिकाः ते तु निःशङ्कं सधनगर्भिण्यादीनां वधं कुर्वन्ति अतः तेषां

प्रथमं मोक्षो भवेत् । पश्चात् तदनन्तरम् । असौ मुक्तिः । कौलेषु कौलमतानुयायिषु भवेत् । हिंसादिना मोक्षो न लभ्यते इत्यर्थः ॥२४॥ सांख्यमतं दूषयति । अव्यक्तेति—नित्यं नित्यव्यापिस्वभावयोः नित्यं सततम् । नित्ययोः व्यापिस्वभावयोः अव्यक्तनरयोः प्रकृतिपुरुषयोः । विवेकेन प्रकृतेः पुरुषो भिन्नः इति ज्ञानं विवेकः तेन । ख्याति मुक्तिम् । सांख्यमुख्याः कपिलादयः । कथं प्रचक्षते ब्रुवन्ति । 'अप्रच्युतानुत्पन्नस्थिरैकस्वभावं कूटस्थनित्यम्' इति नित्यस्य लक्षणम् । कूटस्थनित्ये अर्थक्रिया न भवति । क्रमयौगपद्येनापि परिणामो न जायते । अतः पूर्वस्वरूपत्यागोऽन्यस्वरूपप्राप्तिश्च तयोर्न भवति । अतः तयोर्मुक्तिकल्पना व्यर्था ॥ २५ ॥

[ पृष्ठ ७ ] नैरात्म्यादिभावनातो मुक्तिरिति मतं निराकुरुते । सर्वमिति—सर्वं वस्तु जीवादिकम् । भावनया शुभाशुभया तत्स्वरूपस्य पुनः पुनश्चेतसि चिन्तनेन । स्फुटं व्यक्तम् । भासेत ज्ञायेत । तावन्मात्रेण स्पष्टावलोकनेनैव । यदि मुक्तत्वे मोक्षप्राप्तौ । विप्रलम्भिनां वञ्चकानाम्, विरहिणां वा मुक्तिः स्यात् ॥२६॥ उक्तं च—पिहिते इति—कारागारे बन्धनालये । पिहिते कपाटनिरुद्धे सति । सूचीमुखाग्रनिर्भेदे सूचीमुखाग्रेण व्यधनीवदनाग्रेण निर्भेदे निर्गतो भेदो यस्य एवंविधे तमसि विद्यमाने । मयि च निमीलितनयने मयि च चौरे जारे वा पिहितलोचने सति । तथापि कान्ताननं व्यक्तम् कान्ताया रमण्याः मुखं व्यक्तं विशदतयाहम् अवलोकयामीत्यर्थः॥२७॥ अङ्गाराञ्जनवच्चित्तशुद्धिर्न भवतीति अयुक्तम्—स्वभावेति—यत्र यस्मिन् वस्तुनि । स्वभावान्तरसंभूतिः अन्यः स्वभावः स्वभावान्तरम् । पूर्वस्वभावत्यागः उत्तरस्वभावप्राप्तियोग्यता । सा यत्र अस्ति तत्र मलक्षयो भवति कर्तुं शक्यः । केभ्यः स भवेत् । स्वहेतुभ्यः स्वकारणतः । मणिमुक्ताफलेष्विव रत्नमौक्तिकेषु यथा मलनिर्मुक्तिर्जायते । तदहर्ज इति पद्यं व्याख्यायते—तच्च अहः तदहः तदहनि तद्दिने जायते स्मेति तदहर्जः तद्दिनजातबालकः तस्य स्तनहा स्तनपानाभिलाषः तस्मात् हेतोः अयम् आत्मा सनातनः नित्यः वर्तते । यदि क्षणिक आत्मा स्यात्तर्हि जातबालको जननक्षणे एव विनष्टोऽपरस्तत्स्थाने स्थितस्तस्य स्तनाभिलाषो जातः, एवं यदि कल्पना क्रियते तदा कृतनाशाकृताभ्यागमदोषौ भवेताम् । अतस्तद्दिनजबालकस्तनाभिलाषतो हेतोः अभिलाषसंस्कारो न मद्यस्तनः स प्राक्तन एवेति अभ्युह्यताम् । अस्माद्धेतोश्च आत्मनः सनातनत्वं सिद्धयति । रक्षोदृष्टेः रक्षसो दर्शनात्—मानवो मृत्वा रक्षो जातः तस्य दर्शनात् आत्मा नित्यो मन्तव्यः । भवस्मृतेः—पूर्वभवे अहं देव आसम्, अधुना अहं मानवो जात इत्यादि पूर्वभवस्य स्मरणात् सनातनत्वमात्मनः । भूतानन्वयनात्—चैतन्याख्यो गुणो भूतेषु पृथिव्यादिषु नोपलभ्यते स जीव एव विद्यते । तस्य भूतेषु अनुगमनम् अन्वयः स न दृश्यते । भूताननुगमनात् जीवः प्रकृतिज्ञः प्रकृति स्वभावं घटपटादीनां जानातीति प्रकृतिज्ञः आत्मा स च सनातनः अनादिनिधनः ज्ञेयः ॥२९॥ एवं परलोकिनोऽभावात् परलोकाभावे कस्यासौ मोक्षः इति चार्वाकमतं प्रतिविहितम् ॥ वेदान्तिनाम् अभेदवादो निरस्यते—

[ पृष्ठ ८ ] भेदोऽयमिति—मानवर्तिभिः प्रत्यक्षानुमानादिप्रमाणसिद्धैः । जन्ममृत्युसुखप्रायैः पुनरुत्पत्तिर्जन्म । प्राणापानादिक्रियाविशेषव्युच्छेदो मृत्युः मरणम् । प्रीतिरूपपरिणामः सुखम् । इत्यादि परिवर्तैः पर्यायैः अवस्थाभिः । जगतः त्रिलोकस्य । वैचित्र्यं नानाविधत्वम् कुतः स्यात् । यदि अयं भेदः अविद्या गोयेत मायेति कथ्येत । अतो जगतो वैचित्र्याद्भेदः सत्य एव ॥३०॥ शून्यवादिनां मतनिरसनम् । शून्यमिति—अहं वादी शून्यं तत्त्वं प्रमाणतः प्रत्यक्षादिभ्यः साधयामि इति आस्थायां प्रतिज्ञाया तेन ( वादिना ) कृताया सर्वशून्यता विरुध्येत । वादिनः साध्यसाधनादीना च विद्यमानत्वात् अशून्यवाद एव सिध्येत् । कथं वादी शून्यवादं साधयेत् । वस्तुनि निजस्वरूपे अन्यवस्तुनः अभावो यदि तर्हि तदपेक्षया शून्यत्वं न केनापि अवमन्येत । सर्वे भावाः परस्वभावेन रहितत्वाच्छून्या इत्यभ्युपगमः निर्दोष एव ॥३१॥ नवानां गुणानां नाशान्मुक्तिरिति काणादमतमुच्छिनत्ति—बोधो वेति—मुक्तौ मोक्षे । आत्मनः भवोद्भवः ससारे जायमानः बोधः ज्ञानम् । इन्द्रियज्ञानम् । संसारोद्भवो वा आनन्दः इन्द्रियविषयसुखं वा । यदि नास्ति तर्हि अस्माकमपि जैनानाम् अपि सिद्धसाध्यतया न काचिद्धानिः । वयमपि जैनाः मुक्तौ इन्द्रियज्ञानसुखे न स्तः इति मन्यामहे । एतदभिमतौ नास्माकं काचित् हानिः अवलोक्यते ॥३२॥

[ पृष्ठ ९ ] न्यक्षेति—न्यक्षवीक्षाविनिर्मोक्षे निर्गतानि अक्षाणि यस्याः सा अथवा निर्गता अक्षेभ्यो या सा न्यक्षा अतीन्द्रिया सा चासौ वीक्षा विशिष्टा ईक्षा वीक्षा। इन्द्रियवीक्षाया भिन्ना अतीन्द्रियज्ञप्तिरित्यर्थः। तस्याः विनिर्मोक्षे तस्माद्रहिते मोक्षे यदि मते तर्हि किं मोक्षिलक्षणम्। मोक्षः अस्य अस्तीति मोक्षी तस्य लक्षणं किं स्यात्। न किमपि। यतः ज्ञानम् आत्मलक्षणं तस्य सर्वथा उच्छेदे मोक्षिणः आत्मनो लक्षणं नश्येत्। यथा अग्नौ उष्णत्वात् अन्यत् इतरत् लक्ष्यलक्षणं विचक्षणैः विद्वद्भिः न लक्ष्यं लक्षयितुं न योग्यम्। औष्ण्यमेव अग्नेर्लक्षणं तदभावे अग्नेः अभावः। तथा चैतन्यम् एव आत्मनः लक्षणम्। तदभावे अभावः आत्मनः स्यात् ॥३३॥ किं चेति—किं च, सदा शिवेश्वरादयः संसारिणः मुक्ता वा। संसारित्वे कथमाप्तता। संसारिषु दोषा रागादयः सन्ति। तेषां सद्भावे सर्वज्ञता न स्यात्। विना सार्वज्ञ्यं मोक्षमार्गप्रणीतेः असंभवात्। मुक्तत्वे 'क्लेशकर्मविपाकाशयैः अपरामृष्टः पुरुषविशेष ईश्वरः तत्र निरतिशयं सर्वज्ञबीजम्' इति पतञ्जलिजल्पितम्। क्लेशदायकानां कर्मणाम् अज्ञानादीनां विपाकः उदयस्तस्मात् जातैः आशयैः रागद्वेषपरिणामैः अपरामृष्टः रहितः पुरुषविशेषः ईश्वरः, तत्र निरतिशयं तारतम्यरहितं सर्वज्ञबीजम् इति पतञ्जलिभाषितम्। ऐश्वर्येत्यादि—ऐश्वर्यम् अप्रतिहतम् अणिमामहिमादिरूपम् अष्टविधं केनापि अप्रतिरुद्धम्। सहजो विरागः स्वाभाविकी विषयविरक्तिः। निसर्गजनिता तृप्तिः स्वभावाज्जातः संतोषः। इन्द्रियेषु वशिता जितेन्द्रियत्वमिति भावः। आत्यन्तिकं सुखम् अन्तं विनाशम् अतिक्रान्तम् अत्यन्तं विनाशरहित तत्र भवम् आत्यन्तिकं सुखम् अविनाशिसुखम्। वैषयिकसुखव्यतिरिक्तमात्मानन्दजं सुखम्। अनावरणा आवरणरहिता शक्तिः अप्रतिहतवीर्यम्। तथा सर्वविषयं ज्ञानं सूक्ष्मान्तरितदूरार्थेषु प्रत्यक्षं ज्ञानम्। हे भगवन्, त्वयि एव विद्यते। इत्येतदाप्तलक्षणं रागादिभिः उपद्रुते रुद्रे आप्तत्वप्रक्लृप्तौ विरुध्यते ॥३४॥ अनेकेति—अनेकजन्मसंतुतेः अनेकानि च तानि जन्मानि च अनेकजन्मानि तेषां संततिः परंपरा तस्याः अनेकजन्मसंततेः। अस्य पुंसः संसारे चतुर्गतिषु भ्रमतः अनन्तानि जन्मानि व्यतीतानि। तथापि यावदद्य अक्षयः क्षयरहितः असौ जीवः अस्ति यदि। मुक्त्यवस्थायां कुतो हेतुतः कस्मात्कारणात् क्षीयेत क्षयः तस्य जीवस्य स्यात्। पुंसः अनादिनिधनत्वात् तस्य मुक्त्यवस्थायां नाशाभिमननं मलक्षयात् सुवर्णनाशाभिमननवत् अयुक्तं प्रतिभाति ॥३५॥

[ पृष्ठ १० ] कापिला द्रष्टुः स्वरूपेऽवस्थानं मुक्तिरिति मन्यन्ते तदभिमतं दूषयति—बाह्ये ग्राह्ये इति—मलापायात् वातपित्तकफादीनां वैषम्याभावात् बाह्ये ग्राह्ये बाह्ये वस्तुनि यथा सत्यस्वप्नो भवति तथा मलापायात् कर्ममलविनाशात् बाह्ये ग्राह्ये इव द्रष्टुः आत्मनः स्वरूपे अवस्थानं भवति। परं द्रष्टुः स्वरूपे एव अवस्थानं अनुभवो भवति न बाह्ये इति कथनम् अमानकं प्रमाणरहितम्। चैतन्यं खलु स्वपरावभासकम्। मलापगमे तु सकलं वस्तुजातम् अन्तर्बाह्यं तद्वेत्त्येव प्रतिबन्धकापायात् ॥३६॥ न चायमिति—न चायं सत्यस्वप्नः अप्रसिद्धः, स्वप्नाध्यायेऽनीव सुप्रसिद्धत्वात्। तथा हि—यस्त्विति—रात्र्यन्ते निशायाः चरमे यामे यो नरः नृपं राजानम्। कुञ्जरं गजम्। हयं अश्वम्। सुवर्णं बलीवर्दं धेनुं महीं च पश्यति तस्य कुटुम्बं वर्धते ॥३७॥ यत्रेति—यत्र यस्मिन् मुक्तात्मनि नेत्रादिकं नेत्रादिकानि इन्द्रियाणि न सन्ति तत्र मुक्तात्मनि मतिः ज्ञानं नास्ति इति सांख्ये वदति सति सूरिभिरुच्यते तन्न, यतः अन्धोऽपि स्वप्नं वीक्षते पश्यति। नेत्राभ्यां विनापि अन्धो यथा स्वप्ने पश्यति तथा इन्द्रियाभावेऽपि अशरीरः मुक्तात्मा सचराचरं जगत् जानाति पश्यति च ॥३८॥ पुरुषत्वात् पाण्यादिमत्त्वात् नरः सर्वज्ञो न भवतीति मीमांसकमतं निरस्यति—जिमिन्यादेः इति—जिमिन्यादेः पुरुषत्वेऽपि यदि तस्य मतिः ज्ञानं प्रकृष्येत प्रकर्षं यायात् तर्हि तस्या मतेः क्वचिन्नरि मानवे सर्वक्लेशकर्मरहिते महात्मनि प्रकर्षः पराकाष्ठापि स्यात्। यथा परिमाणं परमाणुम् आरभ्य खे विश्राम्यति। आकाशे परिमाणस्य प्रकर्षः समाप्तिं याति ॥३९॥

[ पृष्ठ ११ ] तुच्छाभाव इति—कस्यापि वस्तुनः तुच्छाभावः सर्वथा अभावः विनाशः न। हानिः न। दीपः सर्वथा नश्यति इत्यपि न युक्तम्। दीपे वायुना प्रशान्तिमिते तस्य सर्वथा नाशो जातः इति वचनं न युक्तम्। दीपस्तदा तमसा अन्वयी तमःस्वरूपं याति दीपः। धरादिषु पृथिव्यप्पवनादिषु धियः बुद्धेः हानौ सत्यां विश्लेषो भवति इति सिद्धसाध्यता भवेत्। यावत्कालं धरादयः जीवेन शरीररूपेण गृहीतास्तावत्कालं

तेषु धियः सन्ति परं यदा जीवेन धरादिरूपं शरीरं त्यज्यते तदा ते धरादयः बुद्धया विश्लिष्यन्ते तदा बुद्धेः हानिः तारतम्येन भवन्ती अचेतनेषु धरादिषु तस्याः हानेः पराकाष्ठा भवति तदा सिद्धसाध्यता भवेत्। जैनैः अचेतनेषु धरादिषु बुद्धेः अभावः मन्यते ॥४०॥ **तदावृतिहतौ इति**—यथा तपनस्य सूर्यस्य दीधितिः प्रकाशः तदावृतिहतौ प्रकाशावरणस्य मेघादेः हतौ विनाशे सर्वं वस्तु प्रकाशयति तथा शेमुषी बुद्धिः तदावृतिहतौ तस्याः आवृतेः ज्ञानावरणकर्मणः विघाते सति सा बुद्धिः यत् वस्तु चराचरं कथं न सर्वं प्रकाशयति। अपि तु निखिलं वस्तुजातं सा प्रकाशयति एव ॥४१॥ ब्रह्माद्वैतवादिनो मुक्तितत्त्वं निराकुर्वन्ति—**ब्रह्मेति**—यदि ब्रह्म परमपुरुषः एकम् अभेदरूपं विद्यते तर्हि तत् ब्रह्म कुतः कस्मात् कारणात् प्रमाणात् निस्तरङ्गं विवर्तरहितं न सिद्धयति। यदि विवर्तरहितं स्यात् एकं तत् सिद्धयेत्। यथा घटाकाशम् आकाशे लीयते तथा इदं जगत् तत्र परब्रह्मणि लीयताम् अपृथग्रूपेण वर्तताम्। परं तथा अपृथग्रूपं न दृश्यते ॥४२॥ अथ मतम् **एक एवेति**—देहे देहे प्रतिशरीरम् एक एव हि भूतात्मा परमपुरुषः व्यवस्थितः विद्यते। परं जलचन्द्र इव एकधापि अनेकधा नानारूपेण दृश्यते ॥४३॥

[ पृष्ठ १२ ] तदयुक्तम्। **एकः खे इति**—जनैः खे आकाशे इन्दुः चन्द्रः एकः वेद्यते ज्ञायते। अन्यत्र जलादौ अनेकधा वेद्यते तथा ब्रह्म भेदेभ्यो अन्यत् अभेदरूपं कुत्रापि न वेद्यते न ज्ञायते ॥४४॥ अलम् अति-विस्तरेण। **आनन्द इति**—आनन्दः अनन्तं सुखम्। ज्ञानं क्षायिकं केवलज्ञानम्। ऐश्वर्यम् सकलगुणानाम् आत्यन्तिकी निर्मलता। वीर्यम् अनन्तशक्तिः। परमसूक्ष्मता अमूर्तत्वम्। एतत् आनन्दादिपञ्चकम् आत्यन्तिकम् अन्तम् अतिक्रान्तम् अविनाशि। यत्र विद्यते स मोक्षः परिकीर्तितः कथितः ॥ ४४ ॥ एतत् आनन्दादिपञ्चकम् आत्यन्तिकं अन्तमतिक्रान्तमविनाशि यत्र विद्यते स मोक्षः परिकीर्तितः कथितः ॥४५॥ **ज्वालेति**—ज्वाला अग्निशिखा, उरुवूकबीजादेः एरण्डबीजादेः आदिशब्देन व्यपगतलेपालाब्वादीनां ग्रहणम्। एतेषां यथा स्वभावादूर्ध्वगतिः। नियता यथा निश्चिता—तथा मुक्तस्यापि आत्मनः स्वभावादूर्ध्वगतिर्दृष्टा ॥ ४६ ॥ **तथाप्यत्रेति**—कर्मक्षये जातेऽप्यत्र तदावासे मुक्तजीवस्यात्रैवावस्थाने निवासे अभिमते चेत् पुण्यपापात्मनां पुण्योपेतात्मनां पापोपेतात्मनां च स्वर्गश्वभ्रागमो न स्यात् स्वर्गे देवलोके श्वभ्रे नरके च आगमो गमनं मा भवतु अत्रैव तेषां वसतिर्भवतु। तथा च ते तवालोकान्तरेण अन्यो लोको लोकान्तरं स्वर्गादिकं तेन अलं स्यात् तद्वार्तया न किमपि प्रयोजनम् ॥४७॥

इत्युपासकाध्ययने समस्तसमयसिद्धान्तावबोधनो नाम प्रथमः कल्पः।

## २. आप्तस्वरूपमीमांसनो द्वितीयः कल्पः।

[ पृष्ठ १२-१३ ] अहो धर्माराधनैकमते वसुमतीपते धर्माराधने एका केवला मतिर्बुद्धिर्यस्य तत्संबोधनं हे धर्माराधनपरायणबुद्धे वसुमतीपते भूपते, हि निश्चयेन सम्यक्त्वं नाम नराणा पुरुषाणां संज्ञिपञ्चेन्द्रियजीवानां महती अनन्यसाधारणा पुरुषदेवता सामर्थ्यदेवतास्ति। अस्याः पौरुषं व्यनक्ति यद्यस्मात्कारणात् सकृत् एकदा एकमेव असहायमेव। यथोक्तगुणमेव यथागमं तस्य गुणाः प्रोक्तास्तथैव प्रगुणतया तथैव गुणसहितत्वेन संजातं लब्धात्मलाभं, अशेषकल्मषकलुषधिषणतया सकलपापपरिणामैः मलिनबुद्धित्वात्। नरकतिर्यङ्मनुष्यगतिषु न भवति संभूतिहेतुः न जायते जनने कारणम्। पुण्यदायुषामपि मनुष्याणां पुष्टं व्रजदायुर्येषां तेषामपि नराणां येषां नृसुरनारकतिर्यगायुर्बन्धो जातस्तेषामपि नराणामित्यर्थः। येषां नरकायुर्बन्धो जातस्ते सम्यग्दृष्टयः षट्सु तलपातालेषु प्रथमां नरकभूमिं विहाय अन्यासु षट्सु नारकभूमिषु न जायन्ते। तत्सम्यक्त्वं तत्र संभूतिहेतुर्जन्म-कारणं न भवति। अष्टविधेषु व्यन्तरेषु किंनरकिंपुरुषमहोरगगन्धर्वयक्षराक्षसभूतपिशाचेषु न संभूतिहेतुः। दशविधेषु भवनवासिषु असुरनागविद्युत्सुपर्णाग्निवातस्तनितोदधिद्वीपदिक्कुमारेषु न संभूतिहेतुः। पञ्चविधेषु ज्योतिष्केषु 'सूर्याचन्द्रमसौ ग्रहनक्षत्रप्रकीर्णकतारकाश्चेति' सूत्रोक्तेषु न संभूतिहेतुः। त्रिविधासु स्त्रीषु नृतिर्यग्देवस्त्रीषु, विकलकरणेषु द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियेषु विकलत्रयजीवेषु असंज्ञिपञ्चेन्द्रियेषु

च, पृथ्वीजलाग्निवायुकायिकेषु वनस्पतिषु च न भवति जन्मकारणम्। (इदं सम्यक्त्वं) सावधि समर्यादं विदधाति करोति आजवंजवीभावं संसारभावम्। नियमेन संपादयति कंचित्कालं (जीवस्य संसारसुखम्) साधुत्वसंपादनसार: साधुगुणानां भाव: साधुत्वं तस्य संपादनमेव सारो यस्मिन्स संस्कार: यथा जीवेषु जन्मान्तरेऽपि अन्यजन्मन्यपि आत्मन: स्वस्य अनुवृत्तिम् अनुयायित्वं न जहाति। तथा चारित्रे चार्वी निर्दोषां अनुवृत्तिम् अनुगमनम् उपलभ्य लब्ध्वा जन्मान्तरेऽपि न जहाति न त्यजति सम्यक्त्वम्। सिद्ध: मन्त्राराधनादिभिर्लब्धश्चिन्तामणिर्यथा सम्यक्त्वं असीमम् अतिमर्यादं कामितानि स्वयाचितानि फलति ददाति। व्रतानि अहिंसादीनि पुनर्यथा ओषध्य: व्रीह्यादय: फलपाकावसानानि फलपाकान्तानि फलं दत्त्वा नश्यन्ति, पाथेयवन्नियतवृत्तीनि च पथि हितं पाथेयं तदिव पाथेयवत् संबलवत् मार्गे क्षुत्परिहारार्थं यदशितव्यमन्नं तद्वत्। नियतवृत्तीनि कंचित्कालं सुखजनकानि। यथा सिद्धरसवेधसंबन्धात् सिद्धपारदव्यधसंपर्कात्। उषर्बुधसंनिधानमात्रजन्मनि अग्निसांनिध्येनैव जन्म उत्पत्तिर्यस्य तस्मिन् जाम्बूनद इव सुवर्णे यथा परिश्रम आयासो न समाश्रयणीयो नावलम्बनीय:। तथा अत्र सम्यक्त्वे पदार्थयाथात्म्यसमवगमात् जीवादिनवपदार्थानां यत्स्वरूपम् आगमे प्रोक्तं तथा तस्यावगमाज्ज्ञानात्। मनोमननमात्रतन्त्रे मनसा मननं चिन्तनम् एव मनोमननमात्रं तस्य तन्त्रे आधीने केवलं मन:श्रद्धानाधीने सम्यग्दर्शने। न श्रुतश्रवणपरिश्रम: आगमाकर्णनायास: आश्रयणीय: अवलम्ब्य:। एतत्सम्यक्त्वप्राप्तये शरीरं नायासयितव्यं शरीरखेदं विनापि सम्यक्त्वमुत्पद्यते इति भाव:। न देशान्तरं गन्तव्यम्। देशान्तरे केनापि तत्सम्यक्त्वं वस्तु न हि स्थापितं यत् तत्र गत्वा तदानीयेत। न कालक्षेपकुक्षि: अपेक्षितव्य: न कालयापनापेक्षा कर्तव्या। तस्मात् प्रासादस्य राजगृहस्य अधिष्ठानमिव गर्तपूरणमिव। रूपसंपद: सौन्दर्यसंपत्ते: कारणं सुभगत्वं यथा। भोगायतनस्य शरीरस्य उपचार: स्थानगमनादिकं तस्य कारणं प्राणितं श्वासोच्छ्वास:। विजयप्राप्ते: कारणं यथा मूलबलं मुख्यं सैन्यम्। आभिजात्यस्य कुलीनत्वस्य विनीतत्वं विनय: शास्त्रसंस्कारो वा। नयानुष्ठानमिव राज्यस्थिते: राज्यस्थिरताया: नयस्य सामाद्युपायचतुष्टयस्य अनुष्ठानम् आचरणं यथा। अखिलस्यापि परलोकोदाहरणस्य सकलस्यापि परलोकप्राप्तेरुदाहरणं निदर्शनमिव गरीयांस: महापुरुषा: ननु निश्चयेन सम्यक्त्वमेव प्रथमं कारणं गृणन्ति कथयन्ति। तस्य चेदं लक्षणम्। **आप्तेति**—आप्त: सर्वज्ञ:, आगम: सर्वज्ञस्यार्हतो मुखान्निर्गत: दिव्यध्वनिराचारादिद्वादशाङ्गरूप उपदेश:। पदार्था: जीवाजीवास्रवबन्धसंवरनिर्जरामोक्षपापपुण्यात्मका:। एतेषां कारणद्वयात् श्रद्धानं सम्यक्त्वम्। अन्तरङ्गं कारणं दर्शनमोहस्य उपशम:, क्षय: क्षयोपशमो वा। तस्मिन् प्राप्ते सति यद्बाह्योपदेशाद्विना प्रादुर्भवति तन्नैसर्गिकसम्यग्दर्शनम्। यच्च परोपदेशपूर्वकम् आप्तागमपदार्थश्रद्धानं जायते तदधिगमजम्। आसन्नभव्यता[1], कर्महानि:,[2] [3]संज्ञित्वम्, शुद्धि:—विशुद्धपरिणाम: एते सम्यग्दर्शनप्राप्तेरन्तरङ्गहेतव:। सम्यग्गुरूपदेश:, जातिस्मरणं, जिनप्रतिमादर्शनादि: एते बाह्यहेतव:। एतान् हेतूनासाद्य जीवे सम्यक्त्वं जायते। तच्च मूढाद्यपोढं देव-लोक-गुरुमूढताभी रहितम् नि:शङ्कितावष्टाङ्गोपेतम्, प्रशमादिभाक् च। प्रशमसंवेगानुकम्पास्तिक्याद्यभिव्यक्तिलक्षणम्। प्रशमा गतीति प्रशमादिभाक्। प्रशमादीनां लक्षणानि ग्रन्थकारोऽग्रे वक्ष्यति ॥४८॥ आप्तलक्षणम्—

[१५] **सर्वज्ञेति**—आप्तमतोचिता: अर्हन्मतप्रतिपादने उचिता: योग्या विद्वांस आप्तं सर्वज्ञं त्रिकालगोचरानन्तपर्यायपरिनिष्ठितं जगत् सर्वशब्देनोच्यते तत् जानातीति सर्वज्ञस्तम्। सर्वलोकेशं, सर्वे च ते लोकाश्च सर्वलोका: ऊर्ध्वा-ऽधो-मध्यलोकास्तेषामीशस्तम्। सर्वदोषविवर्जितं सर्वे च ते क्षुत्पिपासादयोऽष्टादश दोषास्तैर्विवर्जित: विशेषेण वर्जितो रहित: ते दोषा: कदाचनापि तं यथा न स्पृशन्ति तथा स तै रहितस्तम्। सर्वसत्त्व-

---

१. आसन्नभव्यता भव्यो रत्नत्रयाविर्भावयोग्यो जीव: आसन्न: कतिपयभवप्राप्यनिर्वाणपद:। आसन्नश्चासौ भव्यश्च आसन्नभव्यस्तस्य भाव आसन्नभव्यता। २. कर्महानि: मिथ्यात्वादीनां सम्यक्त्वप्रतिबन्धकर्मणां यथासंभवमुपशम: क्षयोपशम: क्षयो वा। ३. संज्ञित्वम्—संज्ञा-शिक्षाक्रियालापोपदेशग्राहित्वम्। संज्ञा अस्य अस्तीति संज्ञी संज्ञिनो भाव: संज्ञित्वम्। सा० ध०, अ० १, श्लो० ६।

हितम् दुष्कर्मविपाकवशाज्ञानायोनिषु सीदन्तीति सत्त्वा जीवास्तेभ्यो हितः मोक्षमार्गदर्शक इत्यर्थः ॥ चतुर्विशेषण-निर्दिष्ट आप्तो भवतीत्यर्थः ॥४९॥ आप्तेन सर्वज्ञेनैव भवितव्यमिति कथयति । **ज्ञानवानिति**—अज्ञेन उपदेशस्य करणे विप्रलम्भनं वञ्चनं प्रतारणं स्यादिति शङ्कां कुर्वद्भिर्विद्वद्भिः कश्चित् नरो ज्ञानवान् मृग्यते अन्विष्यते । ज्ञानं तु सर्वेषां जीवानां विद्यते, प्रशस्तं तु नास्ति अतो यस्य प्रशस्तं विरोधादिदोषरहितं विद्यते ज्ञानं सोऽत्र ज्ञानवान् कथ्यते । तेन ज्ञानवता उक्तं तदुक्तं शास्त्रम् आगमः तस्य प्रतिपत्तये सर्वज्ञवचनाङ्गीकारार्थम् । अन्यथा मूर्खवचनप्रमाणकरणे विप्रलम्भ उपालम्भो भवति ॥५०॥ सर्वलोकेशत्वं विवृणोति—**यः इति**—यः आप्तस्तत्त्वोपदेशनात् जीवादिसप्ततत्त्वोपदेशं कृत्वा । दुःखवार्धेः दुःखसमुद्रात् । जगत् लोकम् उद्धरति उत्तारयति । प्रह्वीभूतजगत्त्रयः नम्रीभूतलोकत्रितयः । सः सर्वलोकेशः कथं न । स एव लोकाधिपः परमार्थतो भवति ॥५१॥ आप्तस्य दोषरहितत्वं त्रिभिः पद्यैः निगद्यते । **क्षुत्पिपासेति**—क्षुत् क्षुधा, पिपासा जलं पातुम् इच्छा तृषा । भयं भीतिः । द्वेषो वैरम् । चिन्तनं चिन्ता । मूढतागमः मूर्खत्वम् । रागः प्रीतिः । जरा वृद्धत्वम् । रुजा रोगः । मृत्युः मरणम् । क्रोधः कोपः । खेदः श्रमः । मदो गर्वः । रतिः आसक्तिः । विस्मयः आश्चर्यम् । जननं जन्म । निद्रा स्वापः । विषादः विषण्णता । एते अष्टादश दोषाः ध्रुवाः नित्यं सन्ति । केषाम् । त्रिजगत्सर्वभूतानां त्रिलोके सकलजन्तूनां संसारिणाम् । इमे साधारणा दोषाः सर्वसंसारिषु संभूतत्वात् । परमेभिर्दोषैर्विनिर्मुक्तः सर्वथा रहितः । सोऽयमाप्तो निरञ्जनः निर्गतानि अञ्जनानि दूषणानि यस्मात्स निरञ्जनोऽष्टादशदोषरहितः । स एव दोषरहितः । केवलज्ञानलोचनः केवलज्ञानं चराचर-पदार्थनिवहं प्रत्यक्षं कुर्वत् ज्ञानमेव लोचनं चक्षुर्यस्य सः आप्तः सूक्तीनां पूर्वापरविरोधादिदोषरहितानां वाचां हेतुरुत्पत्तिकारणमस्ति ॥ ५२–५४ ॥ किमनृतभाषणकारणम् । उच्यते—**रागाद्वेति**—रागाद्वा प्रीति-कारणात् वा, द्वेषाद्वा, मोहाद्वा अज्ञानाद्वा अनृतम् असत्यं वाक्यमुच्यते । यस्य तु एते रागद्वेषमोहादयो दोषाः न सन्ति तस्यानृतकारणम् असत्यभाषणं कारणं नास्ति ॥५५॥ जगत्पतित्वं व्यनक्ति—

[१६] **उच्चावचेति**—उदक् उत्कृष्टा अवाक् अपकृष्टा प्रभूतिर्जनिः उत्पत्तिर्येषां तेषां सत्त्वानां प्राणिनां सदृशाकृतिः समानभाव बिभ्राणः ये उत्कृष्टकुलोद्भवाः ये चापकृष्टवंश्यास्तेषां प्राणिनां रागद्वेषरहितः, आदर्श इव दर्पणो यथा यो भाति दृश्यते स एव जगतां पतिः स्वामी ज्ञेयः ॥५६॥ सतामनुमतस्याप्तस्य स्वरूपं निर्दिशति—**यस्येति**—यस्य आत्मनि शुद्धजीवतत्त्वे । श्रुते आगमे तत्त्वे जीवाजीवादिसप्ततत्त्वस्वरूपे । चरित्रे सामा-यिकादिपञ्चविधे चारित्रे । मुक्तिकारणे सम्यग्दर्शनज्ञानचारित्ररूपे । एकवाक्यतया एकादृशार्थप्रतिपादकत्वेन वृत्तिः प्रवृत्तिरस्ति । स सतां गणधरादीनां आप्तः अनुमतः प्रशस्यः । उपर्युक्तेषु भावेषु यस्य वचनपङ्क्तिः पूर्वापरविरोधदोषरहिता विद्यते स आप्तः ज्ञेयः ॥५७॥ **अत्यक्षेऽपि इति**—अक्षाणि इन्द्रियाणि अतिक्रान्तः अत्यक्षः तस्मिन् अत्यक्षे अतीन्द्रियज्ञानगम्येऽपि पुंसि पुरुषे सर्वज्ञे इत्यर्थः । आगमात् आप्तवचनेन विशिष्टत्वं हरिहरादिभ्यो विशिष्टत्वं प्रतीयते ज्ञायते । हरिहरादीनां रागादिदोषयुक्तत्वमग्रे वक्ष्यते । यथा ध्वनेः शब्दं श्रुत्वा पक्षिणाम् उद्यानमध्यवृत्तीनां उपवनमध्ये वृत्तिः स्थितिर्येषां ते उद्यानमध्यवृत्तयस्तेषाम् । उपवने स्थिता-नां नगौकसां नगे ओकांसि येषां तेषां पक्षिणामित्यर्थः । 'नगौकोवाजिविकिरविविष्किरपतत्त्रयः' इत्यमरः । विशिष्टत्वं प्रतीयते ज्ञायते । यथा अयं मयूररवोऽयं सारसरव इति तथा आगमात् हरिहरादेरपि जिनपतेर्विशिष्ट-त्वं प्रतीयते ॥ ५८ ॥ **स्वगुणैरिति**—जनो लोकः स्वगुणैः सत्यवक्तृत्वादिभिः श्लाघ्यतां स्तुतिभाजनतां याति गच्छति । तथा जनो लोकः स्वदोषैर्निन्द्यवचनादिदोषैर्दूष्यतां दोषदुष्टत्वावस्था याति गच्छति तत्र सुजने दुर्जने च कलधौतायसोरिव सुवर्णलोहधात्वोरिव रोषतोषौ द्वेषरागौ वृथा ॥५९॥ **द्रुहिणेति**—द्रुहिणो ब्रह्मा, अधो-क्षजो विष्णुः, ईशानः महादेवः, शाक्यो बुद्धः, सूरपुरःसराः सूरः सूर्यः ते पुरःसराः येषां ते देवाः । यदि रागा-द्यधिष्ठानं रागादिदोषाणां भाजनं सन्ति । कथं तत्र आप्तता भवेत् । सर्वज्ञत्वं, मोक्षमार्गप्रणेतृत्वं, कर्मपर्वतभे-दकत्वं च कथं भवेत् । ॥६०॥ **रागादीति**—अमीषु हरिहरादिषु रागादिदोषोत्पत्तिस्तदागमात् तत्प्रणीत-शास्त्रादेव तच्चरितपुराणादिकात् ज्ञातव्या । यतः अविद्यमानस्य परदोषस्य गृहीतौ ग्रहणे पातकं महत् बृहत् भवेत् । अवर्णवादेन दर्शनमोहनीयकर्मबन्धो जायते ॥६१॥ **अजेति**—अजः न जायते इति अजः ब्रह्मा

तिलोत्तमायाम् आसक्तः। श्रीपतिर्विष्णुः श्रीरतः लक्ष्म्यां लम्पटः। शंभुः अर्धनारीश्वरः अर्धाङ्गे या नारी तस्या ईश्वरः पतिः। स्मृतः तत्कृतादागमादेव। तथापि किलेत्यरुचौ आप्तता एषां प्रणिगद्यते ॥६२॥ वसुदेवेति—यस्य हरेर्विष्णोः पिता जनकः वसुदेवः। देवकी सवित्री माता। स्वयं च राजधर्मस्थः नृपतिधर्मस्थितः। तथापि स देवः आप्तश्चित्रम् आश्चर्यम् ॥६३॥

[पृष्ठ १७] त्रैलोक्यमिति—यस्य जठरे उदरे त्रैलोक्यं वर्तते। यश्च सर्वत्र व्याप्य विद्यते वर्तते। तथापि तस्य क्वचित् मथुरायाम् उत्पत्तिः वने च विपत्तिर्मरणं स्तो भवतः इति चिन्त्यतां भवद्भिः। लोकत्रयम् अभिव्याप्य तिष्ठतस्तस्य जन्ममरणे युक्त्या नैव घटेते इत्यर्थः ॥६४॥ कपर्दी—एष कपर्दी कपर्दो जटाजूटः स यस्यास्तीति कपर्दी शंकरः दोषवान्। सदाशिवो निःशरीरः देहरहितः। दोषवत्त्वात्तत्र कपर्दिनि प्रामाण्यानुपपत्तेः। तत्र कथम् आगमागमः आगमस्य आगमः उत्पत्तिः। यो रागादिदोषवान् शिवः संसारी स तावत् अप्रमाणम्। तत्कृत आगमोऽपि न प्रमाणम्। यस्तु सदाशिवः स आगमं कर्तुमशक्तः जिह्वाकण्ठाद्युपकरणाभावात्। यथा अहस्तः कुलालः कुम्भकरणे ॥६५॥ परस्परेति—ईश्वरः सदाशिवः पञ्चभिर्मुखैः परस्परविरुद्धार्थम् अन्योन्यविरुद्धाभिप्रायं शास्त्रम् आगमं शास्ति उपदिशति भक्तान्। तत्र तेषु अभिप्रायेषु कतमार्थविनिश्चयः कतमस्य अभिप्रायस्य संवादित्व ज्ञातव्यम् ॥६६॥ सदाशिवेति—यदि युगे युगे कृतत्रेताद्वापरयुगादिषु। सदाशिवकला ईश्वरस्यांशो यदि रुद्रे आयाति आगच्छति तत्र कथं स्वरूपभेदः स्यात् सुवर्णस्य या कला अंशः तस्याम् अंशिनः सुवर्णात् भेदो न दृश्यते। तथैव अंशिनः सदाशिवात् अंशरूपे रुद्रे भेदो न भवेत् सदाशिववत्। तथा च रुद्रेणापि अशरीरेण भूयेत। सदाशिवो विरागः रुद्रः सराग इति भेदो न भवेत् कारणसदृशं कार्यं भवतीति ॥६७॥

[पृष्ठ १८] भैक्षेति—भिक्षाणां समूहो भैक्षम्, नर्तनम्, नग्नत्वं, दैत्यानां नगरत्रयविनाशित्वम्, ब्रह्मणो मस्तककर्तनम्, तथा हस्ते कपालधारणम् एताः क्रीडाः किल ईश्वरे विद्यन्ते इति। तथापि तत्राप्तत्वाभिमननमद्भुतं प्रतिभाति ॥६८॥

[पृष्ठ १९] सिद्धान्तेति—शैवदर्शनं विचित्रं विस्मयावहम्। कथं विस्मयावहम् सिद्धान्ते आगमे तत्त्वं च आप्तस्वरूपम् अन्यत् भिन्नं प्रतिपादितम्। प्रमाणे न्यायशास्त्रे च अन्यत् प्रतिपादितम्। काव्ये अन्यत्। ईहिते लौकिके च अन्यत् पृथक् प्रतिपादितम्। अतः परस्परविसंवादाद्विचित्रं तज्ज्ञातव्यम् ॥६९॥ एकान्त इति—तत्त्वपरिग्रहे वस्तुस्वरूपपरामर्शसमये एकान्तः इदं तत्त्वं भेदरूपमेवाभेदरूपमेव वेत्यादिककल्पनम् एकान्तः। स च वस्तुनिर्णये वृथा भवति। शपथश्च विश्वासश्च वृथा। यया युक्त्या अनुमानादिप्रमाणेन तत्त्वसिद्धिर्निर्दोषा स्यात्तयैव तेन च वस्तुस्वरूपं संवादि ज्ञातव्यम्। तत्र एकान्तः शपथश्च वृथा तत्त्वज्ञानप्रतिघातित्वात्। सन्तः विद्वांस आर्हताः परप्रत्ययमात्रतः अनार्हतोक्तयुक्त्या एव तत्त्वं न हीच्छन्ति न मन्यन्ते तद्युक्त्या वस्तुनिर्णयाभावात् सर्वथा एकान्तपरिग्रहात् ॥७०॥ दाहेति—दाहः अग्नौ सुवर्णस्य निक्षेपः, छेदः सुवर्णशलाकायां सुवर्णपट्टिकायां वा रन्ध्रजननं तथा तदंशकर्तनं वा। कषोपले तद्घर्षणं वा एभिरुपायैः सुवर्णस्य शुद्धौ प्रतीतायां तस्मिन् का शपथक्रिया विश्वासजननोपायस्य नावश्यकता। यद्येभिरुपायैः परीक्षिते सति हेम्नि अशुद्धावुपलब्धायां विश्वासजननोपायो व्यर्थ एव ॥७१॥ यद्दृष्टमिति—यत्तत्त्वं दृष्टं प्रत्यक्षं भजेत् तस्मात् तस्य संवादो जायेत, यत् अनुमानं च भजेत् तेनापि तस्य निर्णयो भवेत्। यच्च लौकिकीं प्रतीतिं च अवलम्बेत। लोकविश्वासेनापि अविरोधं भजेत्। विदः ज्ञातारः पण्डितास्तत्तत्त्वमाहुर्ब्रुवन्ति स्म। तदेव रहोवर्जितं प्रच्छन्नतया रहितम्। सर्वेषां विदुषां पुरतो निःशङ्कतया प्रतिपादयितुमुचितमिति भावः। कुहकवर्जितं च कपटरहितं च ॥७२॥

[पृष्ठ २०–२१] निर्बीजतेवेति—यथा अग्नेः स्पर्शमासाद्य बीजं निर्बीजं भवति। अङ्कुरोत्पादनशक्तिविकलं जायते तथा तन्त्रेण यदि प्राणिनो मुक्तिः भवेत् तर्हि मोक्षाभिलाषवति नरि अग्निस्पर्शो विधेयः। येन सोऽपि नरः बीजवत् विपत्युत्पत्तिभ्यां विमुक्तो भवेत् ॥७३॥ विषसामर्थ्येति—इह मन्त्रात् विषसामर्थ्यक्षयवत्कर्मणः क्षयश्चेत् तर्हि तन्मन्त्रमान्यस्य स मन्त्रो मान्यो यस्य स तन्मन्त्रमान्यस्तस्य नरस्य भवोद्भवाः सांसारिका रागादयो दोषा न स्युर्न भवेयुः। मन्त्राद्विषक्षयो भवति न कर्मक्षयः स तदुपायो नैव ॥७४॥ ग्रहगोत्रेति—

ग्रहाणां रव्यादिनवग्रहवंशे गतोऽपि भूतोऽपि पूषा सूर्यः पूज्यः अर्चनीयो न चन्द्रमाः अत्र का युक्तिः। सूर्यो यदि जनानां पूज्यस्तर्हि चन्द्रः कथं न। अविचारिततत्स्वस्य अविमृष्टवस्तुस्वरूपस्य जन्तोः वृत्तिः प्राणिनः प्रवृत्तिः निरङ्कुशा अविचारितरमणीया भवति ॥७५॥ **द्वैताद्वैतेति**—शंकरानुकृतागमः शंकरेण अनुकृतः अनुसृतः आगमः यस्य सः शंकरानुकृतागमः शाक्यः बुद्धः। तस्य आगमो द्वैताद्वैताश्रयः। बौद्धमतं द्वैतमप्याश्रयते यतः तन्मते संयमः तपांसि इन्द्रियविनिग्रहश्च समुपदिष्टः। ततः आस्रवनिरोधः, वासनाक्षयश्च जायते इति कथनमस्ति तत्र। तथा विज्ञानाद्वैतप्रतिपादकोऽप्यस्ति तदागमः। तथा सर्वत्र प्रवृत्तिर्निरङ्कुशत्वम् अद्वैतम्। तदपि शाक्ये संभवति यतः स तरसासवसक्तधीः तरसे मांसे, आसवे मदिरायाम् आसक्ता लुब्धा धीः बुद्धिः यस्य एवंभूतः कथं मनीषिभिः बुधैः मान्यः ॥७६॥ अधुना जैनमतं प्रतिचिकीर्षवः एवं वदन्ति—**अथैवमिति**—अथैवं वयं प्रत्यवतिष्ठासवः भवन्मतस्य प्रतिविधानं कर्तुमिच्छामः। भवतां जैनानां मते किल निश्चयेन मनुजः सन् न आप्तः न सर्वज्ञो भवति। तस्य च आप्तता अतीव दुर्घटा। युक्त्या नैव सिद्धिम् अञ्चति। संजातजनवद्वा आधुनिकमनुष्यो यथा सर्वज्ञो न भवति। तथा तस्य अभिलषिततत्त्वावबोधो न स्वतो भवति तथा दर्शनाभावात्। गुरुं विना तत्त्वज्ञानं न भवतीत्यर्थः। परश्चेत् कोऽसौ परः। तीर्थकरोऽन्यो वा। तीर्थकरश्चेत् तत्राप्ययं पर्यनुयोगः। अर्थात् तीर्थकरस्यापि स्वतोऽभिलषिततत्त्वावबोधो न स्यात् परश्चेत् कोऽसौ परं इति पुनः पुनः पर्यनुयोगे अनवस्था। सोऽपि तीर्थकरो यदि मनुष्यः सोऽपि स्वतः सर्वज्ञो न भवति। तस्मात् तद्भावम् आप्तसद्भावं च वाञ्छद्भिः तद्भावम् अभिलषिततत्त्वावबोधं सर्वज्ञसद्भावं च इच्छद्भिः सदाशिवः शिवापतिः शंकरो वा तस्य मनुष्यस्य तत्त्वोपदेशकः प्रतिश्रोतव्यः प्रतिज्ञातव्यः। तदाह पतञ्जलिः "स पूर्वेषामपि गुरुः कालेन अनवच्छेदात्।" स सदाशिवः पूर्वेषाम् अपि चिरन्तनानाम् अपि महर्षीणां गुरुः कालेन अवच्छिन्नत्वाभावात्। अमुकस्मिन्काले सः अभवत्, ततः पूर्वं स नासीत् इति कालेन मर्यादीकृतः तथा हि—**अदृष्टविग्रहादिति**—अदृष्टविग्रहात् न दृष्टो विग्रहः कायो यस्य स अदृष्टविग्रहः तस्मात् देहरहितादित्यर्थः। शान्तात् सकलकर्मरहितात् पापपुण्यरहितात् इत्यर्थः। परमकारणात् सकलजगतोऽसाधारणहेतुभूतात् शिवात् परमदुर्लभं नादरूपं ध्वनिरूपं शास्त्रं समुत्पन्नम् ॥७७॥ **तथाप्तेनैकेनेति**—तथा आप्तेन एकेन भवितव्यम्। एक एव आप्तः सर्वज्ञो भवति। नहि आप्तानाम् इतरप्राणिवद्गणः समस्ति। संसारिप्राणिनां यथा गणः वृन्दं भवति तथा आप्तानां सर्वज्ञानां गणो न भवति। संभवे वा चतुर्विंशतिरिति नियमः कौतस्कुतः कुतः कुतो भवः कौतस्कुतः। इति ईश्वरवादिनो ब्रुवते। तत्खलु वन्ध्यास्तनंधयधैर्यव्यावर्णनम्। वन्ध्यासुतधीरतावर्णनमिव फल्गु विफलम्। उदीर्णमोहार्णवविलयनं च परेषाम्। उत्थितमोहसागरे विलयनं विलीनीभवनम् एव परेषाम् ईश्वरवादिनां ज्ञातव्यम्। यतः—**वक्तेति**—विकरणः अनादित एव कर्मबन्धनरहितः अत एव सदाशिवः। विगतानि करणानि स्पर्शनादीनि इन्द्रियाणि यस्य सः अशरीरः सदाशिवो वक्ता नैव मुखाद्यवयवाभावात्। कथमेतादृक्षात्सदाशिवात् आगम उत्पद्येत। विकरणात्सदाशिवात्परः स शंभुः रागवान् रागद्वेषाद्युपहतस्तस्मिन् सदोषे शंभौ सार्वज्ञं नास्ति। ततस्तस्मादागमोत्पत्तिर्दुर्घटा अन्यथा रथ्यापुरुषादपि सा स्यात्। सदाशिवात् शभोः च अपरं तृतीयम् अभूत्। द्वाभ्यां मिलित्वा तृतीयं शास्त्रं विरचितं चेत् तत् कस्य हेतोः अजायत। आगमरचनाकारणभूतया शक्त्या शिव आगमं रचयति चेत् सा शक्तिः ततः शिवात्परा भिन्ना तया स शिवः कथं तद्वान् भवेत् असंबन्धात्। तेन तस्याः संबन्धोऽपि न जाघटीति नैव घटते। अतो भवतां वैशेषिकाणां शास्त्रं निरालम्बनं निराश्रयम् आप्तप्रणीतं न भवतीति भावः ॥७८॥

[ पृष्ठ २२-२३ ] **संबन्ध इति**—संबन्धो हि सदाशिवस्य शक्त्या सह न भवति। संबन्धो भिन्नस्य द्रव्यस्य भवति। न शक्तिर्द्रव्यम्। नवसु द्रव्येषु शक्तेः अनिर्देशाद् शक्तेः अद्रव्यत्वात्। "द्रव्ययोरेव संयोगः" इति योगसिद्धान्तः। समवायलक्षणोऽपि न संबन्धः शक्तेः पृथक् सिद्धत्वात्। शक्तिर्गुणरूपापि नास्ति। गुणानां द्रव्येण संबन्धः अयुतसिद्धोऽभिमतः। तथा च वैशेषिकमतेतिह्यम्—"अयुतसिद्धानां गुणगुण्यादीनां समवायः संबन्ध." परं शक्त्या सह द्विधापि संबन्धो नास्ति इति सदाशिवो वक्ता न भवति। विकरणत्वाच्च तस्मिन् वक्तृत्वं न विद्यते। रागवान् पार्वतीपतिस्तु सर्वज्ञो नैव भवितुमर्हति रथ्यापुरुषवत्। जिनानां सर्वज्ञत्वं मनुष्यत्वेऽ-

पि न परतः प्राप्तं यतोऽनवस्था स्यात्। ते तु ज्ञानत्रयेणैव सह जन्म लभन्ते। एतदेव व्यनक्ति—तत्त्वभावनयेति—यस्य जिनस्य जन्मान्तरसमुत्थया। प्राक् तृतीयजन्मनः समुत्था यस्याः सा एवंरूपया तत्त्वभावनया, जीवादितत्त्वभावनया दर्शनविशुद्ध्यादिषोडशभावनान्तर्गतया अभीक्ष्णज्ञानोपयोगाख्यया तत्त्वभावनया उद्भूतं परं ज्ञानत्रयम् अन्यजनसुदुर्लभं हिताहितविवेकाय भवति। तेन हिते रत्नत्रयरूपे मोक्षमार्गे प्रवृत्तिर्भवति। अहिताच्च भववर्धनकारणान्मिथ्यात्वादेर्निवृत्तिर्भवति ॥ ७९ ॥ जिने ज्ञानत्रयसद्भावात् न तस्य परापेक्षतेति निगदति। दृष्टादृष्टमिति—असौ जिनः दृष्टम् अदृष्टम् अर्थं पदार्थम् अवैति ज्ञानत्रयेण मत्या, श्रुतेन, अवधिना च जानाति। अवधेः अवधिज्ञानमालम्ब्य जिनः रूपवन्तम् अर्थम् एव जानाति। अथ देशावधिज्ञानावरणक्षयोपशमप्रकर्षात् जिनो रूपवन्तं द्रव्यक्षेत्रकालभावमर्यादीभूतम् अतीन्द्रियं पदार्थनिवहं जानाति। श्रुतज्ञानावरणक्षयोपशमप्रकर्षात् श्रुतेः आचाराङ्गादिद्वादशाङ्गज्ञानं यत् श्रुतिसमाश्रेयं श्रुतिः आगमस्तया समाश्रेयम् अवलम्बनीयम्। एवंरूपं तस्य जिनस्य ज्ञानं भवति ततः क्वासौ परम् अपेक्षतां क्व कस्मिन्विषये। असौ जिनः अन्यं ज्ञानिनम् अवलम्बते ॥८०॥ न चैतदसार्वत्रिकम्—एतज्ज्ञानं सर्वत्र नोपलभ्यते इति न, अन्यथा कथमेतद्वचो वक्ष्यमाणं संगच्छेत। वाराणस्यां स्वत एव संजातषट्पदार्थावसायप्रसरे कणचरे संजातः षट्पदार्थानां द्रव्यगुणकर्मसामान्यसमवायविशेषाणाम् अवसायप्रसरः ज्ञानसमूहो यस्य एवंरूपे कणचरमहर्षौ कणादऋषौ अक्षपादे उलूकसायुज्यसरस्य महेश्वरस्य उलूकावतारेण सायुज्यम् ऐक्यं सरतीति सरः तस्य सरस्य गच्छतः उलूकावतारवतः महेश्वरस्य इदं वचनं स्तुतिवचनं कथं संगच्छेत् युक्तियुक्तं भवेत्। किं तद्वचनम्। उच्यते। अह्नेति—महेश्वरः कणचरर्षिमेवमुवाच—हे विद्वन्, त्वयि दिवौकसां दिवं स्वर्ग आकाशो वा ओको गृहं येषां ते दिवौकसः तेषां स्वर्गिणां देवानामित्यर्थः। दिव्यं नरपश्वादिदुर्लभम् अत एव अद्भुतं विस्मयजनकं अह्नतुला नामेदं जगत्तोलने परिज्ञाने तुलाप्रायं ज्ञानं त्वयि प्रादुर्भूतम् इह वाराणस्याम्। तत् तस्मात् कारणात् हे वत्स, तत् ज्ञानं विप्रेभ्यः द्विजेभ्यः वितरस्व देहि। उपाये इति—उपाये सति उपेयस्य लब्धव्यस्य पदार्थस्य प्राप्तेः का प्रतिबन्धिता प्राप्तिप्रतिरोधः कथं स्यात्। यन्त्रात् यन्त्रसाहाय्यात्। पातालस्थं जलं करस्थं क्रियते, हस्तेन ग्रहीतुं शक्यते यतः ॥८१॥ अश्मेति—अश्मा पाषाणः। हेम सुवर्णं भवति। तद्धेतुप्राप्तेः सुवर्णभवनकारणप्राप्तेः। एवं मुक्तावह्निमणिष्वपि योज्यम्। तद्यथा—जलं मुक्ता मौक्तिकं संजायते तादृक्कारणलब्धेः। स्वात्या शुक्तिपुटे पतितं मेघजलं मौक्तिकं संपद्यते इति विदितमेव। द्रुमो वृक्षो वह्निर्भवति शाखानां घर्षणात् अग्नेरुद्भूतिरवलोक्यते। क्षितिर्भूमिर्मणिः रत्नं जायते। तत्तद्धेतुतया तत्तत्कारणतालब्धेः। भावाः पदार्थाः। अद्भुतसंपदः विस्मयजनकसंपद्युक्ताः भवन्तीति भावः। इति पद्यद्वयेन मनुष्योऽपि तत्त्वभावनया सर्वज्ञः आप्तो भवत्येवेति ज्ञातव्यम् ॥ ८२ ॥ सर्गेति—सर्ग उत्पत्तिः। अवस्थितिः अवस्थानं ध्रुवत्वम्। संहारः प्रलयः। उत्पादव्ययध्रौव्यमित्यर्थः। तथा ग्रीष्म उष्णकालः। वर्षा पर्जन्यकालः। तुषारो हिमकालः। एतेषां षण्णां यथा अनाद्यन्तभावः आदिभावः अन्तभावश्च नास्ति। अनादिकालम् एतेषां प्रवृत्तिरस्ति। तथैव आप्तश्रुतसमाश्रयः अनाद्यन्तभावः श्रुतसमाश्रयात् आप्तो जायते। आप्तश्च श्रुतम् उत्पादयति। एवम् आप्तश्रुतयोर्जन्यजनकभावोऽनादिनिधनोऽस्ति। अतः आप्तः न परम् आश्रयित्वा ज्ञानं लभते येनानवस्थादूषणं स्यात् ॥ ८३ ॥ आप्तानां बहुत्वं न दोषायेति प्रतिपादयति—नियतमिति—बहुत्वम्, चतुर्विंशतिः जिनेश्वराः इति जिनसंख्याया बहुत्वं नियतं नियमितं न चेत् एते पञ्चदश तिथयः, नव ग्रहाः, चतुरुदधयः, षट् कुलाचलाः इत्यादयः पदार्थाः बहवोऽपि नियतसंख्याः कथम् ॥ ८४ ॥

[पृष्ठ २४-२५] अनयैवेति—अनयैव दिशा उपर्युक्तप्रकारेणैव सांख्यशाक्यादिशासनं कपिलसौगतचार्वाकादिदर्शनं चिन्त्यम् विचारणीयम्। तेषां तत्तदागमानाम् आप्तानां च नानात्वस्य बहुत्वस्य अविशेषत्वात् ॥८५॥ जैनेति—एकं जैनमतं मुक्त्वा सर्वाभ्युपगमागमाः द्वैताद्वैतसमाश्रयौ मार्गौ समाश्रिताः इत्यन्वयः। सांख्यशाक्यादिदर्शनेषु कानिचिद् द्वैतं कानिचिद् अद्वैतम् अवलम्बन्ते। तथा तेषु दर्शनेषु कानिचित्तत्त्वानि सर्वलोकाभिमतानि सन्ति। अतः सर्वे सर्वाभ्युपगमागमाः इति उक्तम् ॥८६॥ वामेति—शंभोः आगमः शैवागमः। शाक्यस्य सुगतस्य आगमः सिद्धान्तः। द्विजस्य याज्ञिकस्य वेदान्तिनश्च आगमः द्विजागमः। एतेषां त्रयाणाम् आगमाः वामदक्षिणमार्गयोः तिष्ठन्ति। वाममार्गः मन्त्रतन्त्रप्रधानः। तथा क्रियाकाण्डप्रतिपादकश्च। न तथा

दक्षिणमार्गः शैवमतं वाममार्गप्रधानम् । याज्ञिकागमोऽपि पश्वादियज्ञप्रवर्तकः । अतः कर्मगतः । वेदान्तिनामागमः ज्ञानगतः ब्रह्माद्वैतप्रतिपादकः । शाक्यागमोऽपि वाममार्गस्थः मन्त्रतन्त्रप्रधानत्वात् । सुगतः खलु तरसासवसक्तधीरासीत् । महायानसंप्रदायाद्वाममार्गो जातः ॥८७॥ यच्चैतत्—श्रुतिमिति—इह शंभ्वादिदर्शनेषु वेदं श्रुतिम् आहुः । वेदः श्रुतिरिति नामद्वयं शंभ्वादीनामागमानाम् । स्मृतिस्तु धर्मशास्त्रमिति कथ्यते । श्रुतिस्मृती सर्वार्थेषु यज्ञादिषु अमीमांस्ये अविचारणीये । ताभ्यां श्रुतिस्मृतिभ्यां हि यस्मात् धर्मो निर्बभौ नितरां शुशुभे । श्रुतौ स्मृतौ च यत्प्रतिपादितं तत्सर्वं प्रमाणमेवेति मन्तव्यम् ॥८८॥ ते त्विति—यः द्विजः हेतोः शास्त्राद्यागमात् ते श्रुतिस्मृती अवमन्येत तिरस्कुर्वीत, स साधुभिः बहिः कार्यो यतो वेदनिन्दको नास्तिको भवति ॥८९॥ तदपि न साधु तदपि वचनं साधु सुन्दरं न । यतः यस्मात्कारणात् । समस्तेति—समस्तयुक्तिनिर्मुक्तः प्रत्यक्षादिप्रमाणरहितः केवलागमलोचनः केवलं श्रुतिस्मृतिनेत्रः यदि केवलेनागमेनैव तत्त्वमिच्छन् स वादी इह कस्य जयावहो भवेत् । न कस्यापि । युक्ति हेतुवादं त्यजन् वादी केवलेन आगमेन तत्त्वसिद्धिं न कर्तुं शक्नोति । युक्ति विना केवलम् आगमादेव तत्त्वसिद्धिं इच्छन् वादी जयं न लभते प्रत्युत पराभवपदं याति ॥९०॥ सन्त इति—सन्तो विद्वांसो गुणेषु तुष्यन्ति यन्मतं गुणवत्प्रमाणसिद्धं तत्रैव तुष्यन्ति, न अविचारेषु प्रमाणेन सिद्धिमनधिगतेषु वस्तुषु न तुष्यन्ति । यतो निर्गुणो ग्रावा अश्मा पादेन क्षिप्यते दूरमस्यते । परं रत्नं मणिः मौलौ किरीटे निधीयते स्थाप्यते ॥९१॥ श्रेष्ठ इति—गृहस्थः गुणैः अहिंसादिभिरणुव्रतैः श्रेष्ठः पूज्यः स्यात् । ततः गृहस्थादपि श्रेष्ठतरः पूज्यतरो यतिर्भवेत् महाव्रतधारकत्वात् । यतेः श्रेष्ठतरो देवः, यतेः मुनेरपि पूज्यतरः देवः जिनपतिः । रत्नत्रयस्य परमप्रकर्षं गतत्वात् । देवादधिकं परं श्रेष्ठं लोके किमपि न ॥९२॥ गेहिनेति—गेहिना गृहस्थेन समवृत्तस्य समानाचरणस्य । यतेः तपस्विनोऽप्यधरस्थितेः मुनेः सदृशं चरित्रं यस्य नैव भवति एवंविधस्य देवस्य यदि देवत्वं न देवो दुर्लभो भवेत् । यदि देवोऽपि गृहस्थसदृशः स्यात्तर्हि सर्वेऽपि जना देवा भवेयुर्येन देवानां दुर्लभता न स्यात् ॥९३॥

इत्युपासकाध्ययने आप्तस्वरूपमीमांसनो नाम द्वितीयः कल्पः ।

## ३. आगमपदार्थपरीक्षणो नाम तृतीयः कल्पः ।

[पृष्ठ २५-२६] देवमिति—आदौ प्रथमं देवं परीक्षेत, क आप्तो भवितुमर्हति इति विचारः कार्यः । पश्चात्तद्वचनक्रमं देवस्वरूपविचारानन्तरं तस्य वचनक्रमम् आगमस्य क्रमो विचारणीयः । ततस्तद्विचारेण आगमे निर्णीते तस्य अनुष्ठानम् एतदागमप्रोक्ताचरणं परीक्षेत । एतत्प्रोक्तम् आचरणं पापानुबन्धि पुण्यानुबन्धि वेति परीक्षणीयम् । तत्पश्चात् तत्र बुधः मतिं कुर्यात् । तत्स्वीकारपरां मतिं बुद्धिं विदध्यात् ॥९४॥ येऽविचार्येति—ये नराः देवम् अविचार्य देवमपरीक्ष्य तद्वाचि रुचिं कुर्वते तत्प्रोक्ते वेदाद्यागमे रुचिं श्रद्धानं कुर्वते विदधति तेऽन्धा विचारशून्यमतयस्तत्स्कन्धविन्यस्तहस्तास्तत्स्कन्धे देवभुजे स्थापितहस्ताः कृतश्रद्धानाः सद्गतिं वाञ्छन्ति ततो मोक्षमभिलषन्ति । यथा अन्धस्कन्धे हस्तं स्थापयन्तोऽन्धाः सद्गतिं वाञ्छन्तो न तां लभन्ते तथा देवस्वरूपमविमृशन्तो नराः तदागमं श्रद्दधतः सद्गतिं सतीं शोभनां कर्मक्षयजां मुक्तिगतिं न प्राप्नुवन्ति ॥ ९५ ॥ पित्रोः शुद्धौ इति—जननीजनकयोः कुलशुद्धौ विद्यमानायां यथाऽपत्ये पुत्रे पुत्र्यां वा विशुद्धिरिह दृश्यते । तथाप्तस्य विशुद्धत्वे अष्टादशदोषराहित्ये, मुक्तिमार्गनेतृत्वे, कर्मभेदकत्वे एतद्रूपे विशुद्धत्वे सति तन्मुखनिर्गतागमस्यापि शुद्धता भवति ॥ ९६ ॥ वाग्विशुद्धेति—विशुद्धापि वाक् जिनमुखोत्पन्नमपि श्रुतं पात्रदोषतः दर्शनमोहाक्रान्तपुरुषचित्तस्था यदि भवेत् तर्हि सा दुष्टा भवेत् अहितकरं भवेत् । किंवत् वृष्टिवत् मेघोद्गीर्णजलधारा यथा पात्रदोषतः विषवृक्षवनराजीं प्राप्य दुष्टा प्राणिप्राणहरणपट्वी भवति । परं तीर्थसश्रयं पवित्रजलाशयाश्रितं तदेव जलं वन्द्यं भवति तथा तदेव जिनवचनम् अदुष्टपुरुषचित्ताश्रितं वन्द्यं भवेत् ॥ ९७ ॥ दृष्टेऽर्थे इति—दृष्टे प्रत्यक्षप्रमाणग्रहणयोग्ये अर्थे जीवादिवस्तुनि अध्यक्षतः प्रत्यक्षेण वचसः प्रमाणता प्रामाण्यं भवति । दृष्टार्थप्रतिपादकस्य वचसः प्रामाण्यम् अध्यक्षात्प्रमाणाज्जायते अनुमेये अनुमानग्रहणयोग्ये अर्थे वचसः प्रमाणत अनुमानतः साधनात् साध्यविज्ञानेन प्रमाणता ज्ञातव्या । तथा परोक्षे अस्मदादिप्रत्यक्षलैङ्गिक-

ग्रहणामोष्येऽर्थे अतीन्द्रियविषये वचसः पूर्वापराविरोधेन प्रमाणता प्रामाण्यं भवति ॥ ९८ ॥ आगमाभासस्याप्रमाणतां वदति—**पूर्वापरेति**—स आगमः किं प्रमाणं भवति। अपि तु न भवति। कीदृशः आगमः न प्रमाणम् उच्यते यः पूर्वापरविरोधेन दोषेण युक्तः स नागमः प्रमाणम्। यस्तु युक्त्या प्रत्यक्षादिप्रमाणेन बाध्यते सोऽप्रमाणमागमः। एवंविध आगमो मत्तोन्मत्तवचःप्रख्यः मत्तः सुराधत्तूरादिप्राशनात्। कामादिविकारादुन्मत्तस्तस्य वचसा प्रख्यस्तुल्यः स न प्रमाणं भवति ॥ ९९ ॥ आगमस्य निर्दोषत्वं कथयन्ति सूरिपादाः—**हेयोपादेयेति**—चतुर्वर्गसमाश्रयात् धर्मार्थकाममोक्षाः चतुःपुरुषार्थवर्गः तस्य समाश्रयणात् अवलम्बनात्। हेयोपादेयरूपेण जीवादिसप्तपदार्थेषु जीवः, संवरः, निर्जरा मोक्षश्चेति ग्राह्या उपादेयाः पदार्थाः मुक्तिकारणत्वात्। अजीवः, आस्रवो बन्धश्च हेयार्थाः संसारकारणत्वात्। एतान् भूतभाविभवत्कालगतान् हेयोपादेयार्थान् गमयज्ज्ञापयन्नागमः स्मृतः प्रतिपादितो ज्ञातव्यः ॥ १०० ॥ **आत्मानात्मेति**—तत्त्ववेदिभिः तत्त्वं विदन्तीति तत्त्ववेदिनः विद्वांसस्तैः आगमस्य पदार्था एवं निगद्यन्ते भाष्यन्ते—आत्मानात्मस्थितिः आत्मा च अनात्मा च तयोः स्थितिः जीवाजीवयोः स्थितिर्यत्र स लोकः लोक्यन्ते जीवपुद्गलधर्माधर्माकाशकाला यत्र स लोकः, बन्धश्च मोक्षश्च बन्धमोक्षौ सहेतुकौ कारणसहितौ बन्धस्य कारणानि मिथ्यात्वादीनि मोक्षस्य कारणानि सम्यग्दर्शनज्ञानचारित्राणि एते पदार्था निगद्यन्ते कथ्यन्ते ॥ १०१ ॥

[ पृष्ठ २७-३५ ] **उत्पत्तिस्थितिरिति**—उत्पत्तिरुत्पादो जननं स्थितिर्ध्रौव्यम्, विनाशः संहारो एतैः साराः बलवन्तः सर्वे पदार्थाः स्वभावत एव। यथा तोयधेः समुद्रस्य तरङ्गाः कल्लोलाः तद्द्वयाश्रिताः भवन्ति तथैते पदार्था नयद्वयाश्रिताः द्रव्यार्थिकपर्यायार्थिकनयौ आश्रित्य वर्तन्ते। तत्र वस्तुनि ध्रौव्यं द्रव्यार्थिकनयाश्रितम्, उत्पत्तिव्ययौ च पर्यायार्थिकनयाश्रितौ ॥ १०२ ॥ **क्षयाक्षयैकपक्षत्वे इति**—क्षयश्च अक्षयश्च क्षयाक्षयौ। एकपक्षत्वशब्दः क्षयेण अक्षयेण च क्रमशो योज्यः। तेन क्षयैकपक्षत्वम्, अक्षयैकपक्षत्वम् इति भवति। क्षयैकपक्षत्वे अङ्गीक्रियमाणे वस्तु सर्वथा विनाशि एव स्यात् ततश्च बन्धक्षयस्य आगमः प्राप्तिः भवेत्, मोक्षक्षयस्य आगमः प्राप्तिर्भवेत्। ततो बन्धो मोक्षश्च नैव सिद्ध्यतः। वस्तु उत्पद्य पश्चात् अनन्तरसमय एव विपद्येत तर्हि तस्य वस्तुनः न केनापि संयोगो भवेत्। सर्वथा विनाशशीलस्य आत्मनः कर्मबन्धो न भवेत्। सर्वथा वस्तु अक्षयि एव यदि तर्हि परिणामित्वाभावात् मोक्षक्षयागमः भवेत्। बद्ध आत्मा बन्धनपर्यायपरिणत एव सर्वदा भवेत्। तस्य मुक्तिः कदापि न स्यात्। अतः तात्त्विकैकत्वसद्भावो भवेत् यदि स्वभावान्तरहानिः स्यात्। सर्वथा एकरूपता वस्तुनः स्याद्यदि तत्र स्वभावान्तरप्रादुर्भावः कदापि न भवेत्। यः आत्मा क्रुद्धः स क्रोधे गते प्रसक्तिभाक् दृश्यते। अतः वस्तुनि तात्त्विकैकत्वसद्भावे अङ्गीक्रियमाणे स्वभावान्तरदर्शनं न स्यात्। कथंचित् जीवादिवस्तु पर्यायापेक्षया क्षयि। द्रव्यापेक्षया तत् अक्षयि मन्यताम्। एवं वस्तुस्वरूपाभिमनने स्वभावान्तरहान्याख्यो दोषः न संसक्तो भवेत् ॥ १०३ ॥ आत्मनः स्वरूपं निगदति—**ज्ञातेति**—पुमान् आत्मा ज्ञाता द्रष्टा च अत एव ज्ञानदर्शनलक्षण आत्मा गीयते। महान् आत्मा केवलसमुद्घातापेक्षया लोकव्यापको भवति अतः महान्। सूक्ष्मः स्पर्शादिगुणरहितत्वात् अमूर्तः सूक्ष्मः उच्यते। कृतिभुक्त्योः स्वयं प्रभुः "स्वयं कर्म करोत्यात्मा स्वयं तत्फलमश्नुते।" अतः स्वयं प्रभुत्वात् स कर्ता भोक्ता च भवति। ईश्वरप्रेरितो न गच्छति स्वर्गं श्वभ्रं वा। भोगायतनमात्रोऽयं शरीरं भोगायतनम्। शुभाशुभकर्मोदयप्राप्तयोः सुखदुःखयोः शरीरम् आयतनं गृहम् अस्ति। तत् तद्भोगे साधनं संपद्यते। आत्मा यच्छरीरं लभते तत्प्रमाणो भूत्वा आमृति तिष्ठति। यदा च स कर्मक्षयं करोति तदा स्वभावादेव स ऊर्ध्वं गच्छति अतः स ऊर्ध्वगः पुमानिति कथ्यते ॥ १०४ ॥ **ज्ञानदर्शनेति**—ज्ञानदर्शनशून्यस्य आत्मनः अचेतनात् भेदोऽन्यता न स्यात्। तथा च अयं जीवः इमौ घटपटौ इति भेदो न भवेत्। ज्ञानमात्रस्य जीवस्य न एकधीः। स एव अहम् इति प्रत्यभिज्ञानात् आत्मा ज्ञानी न ज्ञानमात्रं तस्य स्वरूपम्। ज्ञानमात्रस्य जीवत्वे मन्यमाने सा एकधीः नश्येत्। केवलं ज्ञानसामान्यं स्यात्। विशेषधर्माभावात्। इदं चित्रज्ञानम्, इदं पटज्ञानम्, इदं मित्रज्ञानम् इति नानात्वं ज्ञानानां न स्यात्। विशेषधर्मेणैव भेदा ज्ञानेषु भवन्ति ॥१०५॥ जीवकर्मणोः अन्योन्यसंबन्धं निगदति—**प्रेर्यते इति**—नौनाविकसमानयोः एतयोः जीवकर्मणोः अन्यो न प्रेरकः। यथा नौः नाविकेन प्रेर्यते स च तया प्रेर्यते तथा जीवेन कर्म प्रेर्यते तेन च जीवः प्रेरितो भवति ॥१०६॥ मन्त्र-

वदिति—यथा मन्त्रः नियतोऽपि परिमिताक्षरोऽपि स्वभावतः अचिन्त्यशक्तिको भवति तथा अयम् आत्मा नियतः शरीरप्रमाणोऽपि स्वभावतः अचिन्त्यशक्तिको वेदितव्यः। अतः स्वशरीरात् अन्यत्र नानुभूयते न च वर्तते। शरीरप्रमाणत्वात् स व्यापको न भवति ॥१०७॥ जीवद्वैविध्यं निगदन्त्याचार्याः—**त्रसस्थावरेति—** त्रसस्थावरभेदेन केचित् जीवाः चतुर्गतिसमाश्रयाः नारकतिर्यङ्नरदेवगतीः अवलम्ब्य संसारे स्थिता दृश्यन्ते। तथा अन्ये च केचित् पञ्चमीं गतिं मोक्षगतिम् आश्रिताः मुक्ता भवन्ति कर्मक्षयं कृत्वा इति द्वैविध्यं जीवानाम्। संसारिणो जीवाः त्रसस्थावरभेदेन द्विविधाः। परं मुक्ता जीवाः कर्मणः अभावेन भेदरहिता ज्ञेयाः ॥१०८॥ **धर्माधर्माविति—**धर्मः, अधर्मः, नभः, कालः पुद्गलश्चेति पञ्च पदार्था अजीवशब्देन वर्ण्यन्ते। एते विविध-पर्यायाः एते नानावस्थायुता भवन्ति ॥१०९॥ **गतिस्थितीति—**धर्मद्रव्यं जीवपुद्गलयोर्गतिपरिणतिकारणम्। अधर्मद्रव्यं तयोरेव स्थितिपरिणतिकारणम्। नभ आकाशं द्रव्यम् अप्रतीघातकारणं जीवपुद्गलयोः प्रतीघातं प्रतिरोधं न करोति तत्तयोरवगाहं ददाति। कालः जीवपुद्गलयोः वर्तनाक्रियापरिणामपरत्वापरत्व-परिणतिनिबन्धनं भवति। एवं सर्ववस्तूनां लक्षणं प्रोक्तम्। रूपाद्यात्मा च पुद्गलः "स्पर्शरसगन्धवर्णवन्तः पुद्गलाः" इति पुद्गलस्य लक्षणम् ॥११०॥ बन्धस्य लक्षणम्—**अन्योन्येति—**अन्योन्यानुप्रवेशेन जीवप्रदेशेषु कर्मप्रदेशाः प्रविशन्ति। कर्मप्रदेशेषु च जीवप्रदेशाः प्रविशन्ति, एवं कर्मात्मनोर्बन्धो भवति। स बन्धोऽनादिः सान्तश्च भवति कालिकास्वर्णयोरिव खनौ उत्पन्नं सुवर्णं कालिकासहितमेवास्ति तत्र आदौ सुवर्णम्, कालिका तदनन्तरम् इति कालभेदो नास्ति परं ततः उपायैः सुवर्णात्कालिकापनयः क्रियते येन तयोः सावसानता भवति तथादौ शुद्ध आत्मा ततस्तस्य प्रदेशेषु कर्मप्रदेशानां सश्लेषो जात इति न, अनयोः संश्लेषस्यानादिता वर्तते। परं रत्नत्रयं प्रकृष्यते यदा तदा जीवकर्मणोरत्यन्तं विश्लेषो भवति येन जीवः शुद्धः संपद्यते ॥१११॥ बन्धस्य चातुर्विध्यम्—**प्रकृतीति—**सर्वेषामेव देहिनां संसारिजीवानां प्रकृतिबन्धः, स्थितिबन्धः, अनुभागबन्धः, प्रदेश-बन्धः इति भेदात् चतुर्धा बन्धो भिद्यते, चतुःप्रकारो भवतीत्यर्थः। ज्ञानावरणादिकर्मणा ज्ञानादिप्रतिहननं स्वभावः प्रकृतिबन्धः। तत्स्वभावादप्रच्युतिः स्थितिबन्धः। ज्ञानावगमनादिस्वभावादप्रच्युतिः स्थितिबन्धः। तद्रसविशेषोऽनुभवः, कर्मभावपरिणतपुद्गलस्कन्धानां परमाणुपरिच्छेदेनावधारणं प्रदेशबन्धः ॥११२॥ मोक्ष-लक्षणम्—**आत्मेति—**जीवस्य अन्तर्मलक्षयात् जीवस्य रागादिरूपपरिणतीनाम् अन्तर्मलरूपाणां क्षयाद्विश्लेषात् या निर्मलता अनन्तशुद्धस्वाभाविकचैतन्यसुखादिपरिणतेः प्रकर्षतमता तस्याः आत्मलाभं मोक्षं विदुः जानन्ति। जीवस्य अभावो मोक्षो न, नापि अचैतन्यं चेतनारहितत्वं मोक्षः, न च चैतन्यम् अनर्थकम् अर्थो घटादिः तज्ज्ञानविरहितं चैतन्यं कदापि न तिष्ठति। मुक्तात्मनां ज्ञाने प्रतिसमयम् अनन्तपदार्थमालिका फलतीति ज्ञेयम् ॥११३॥ बन्धमोक्षयोः कारणानि—**बन्धस्येति—**मिथ्यात्वासंयमादिकं बन्धस्य कारणं प्रोक्तम्। आप्तागमपदार्थानाम् अश्रद्धानं मिथ्यात्वम्। इन्द्रियसंयमप्राणिसंयमयोरभावः असंयमः। आदिशब्देन कषायादिकं गृह्यते। एतत्कर्मबन्धस्य कारणं निदानं प्रोक्तम्। रत्नत्रयं तु मोक्षस्य मुक्तेः कारणं प्रोक्तं कथितम् ॥११४॥ मिथ्यात्वभेदाः प्रतिपाद्यन्ते—**आप्तेति—**आप्तागमपदार्थानाम् अर्हत्सिद्धान्तजीवादिनवपदार्थानाम् अश्रद्धान-रूपम् एकं मिथ्यात्वम्, विपर्ययरूपं द्वितीयम्, संशयरूपं तृतीयम्। इति मलिनात्मनां गाढदर्शनमोहोदयवतां त्रिधा मिथ्यात्वं प्रोक्तम्। अथवा—**एकान्तेति—**एकान्तसंशयाज्ञानम्-एकान्तमिथ्यात्वम्, संशयमिथ्यात्वम् अज्ञानमिथ्यात्वं च, तथा व्यत्यासविनयाश्रयं व्यत्यासो विपर्यय आश्रय आधारो यस्य विपर्ययाश्रयोत्पन्नं विपरीतमिथ्यात्वम्। विनयाश्रयं विनयाधारं, विनयमिथ्यात्वमित्यर्थः। मिथ्यात्वमेतत् भवपक्षाविपक्षत्वात् संसारपक्षस्य अविपक्षत्वात् अनुकूलत्वात् पञ्चधा पञ्चप्रकारं स्मृतम् ॥११५-११६॥ असंयमं विशदयति—**अव्रतित्वमिति—**हिंसादीनि पापानि न सेवेऽहमित्यभिसंधिकृतो नियमो व्रतम्। तदस्यास्तीति व्रती तस्य भावो व्रतित्वम्, न व्रतित्वमव्रतित्वम्। हिंसादिभ्योऽविरमणमव्रतित्वमित्यर्थः। प्रमादित्वं पुण्यकर्मसु अनादरः प्रमादः सोऽस्ति यस्य स प्रमादी तस्य भावः प्रमादित्वम्। तच्च पञ्चसमितित्रिगुप्तिशुद्ध्यष्टकोत्तमक्षमादिविषयभेदात् अनेकविधम्। निर्दयत्वम्—प्राणिदुःखं दृष्ट्वा मनसोऽनार्द्रतारूपं क्रूरता इति भावः। अतृप्तता इष्टविषयेषु लब्धे-ष्वपि मनसोऽसंतोषो गृध्नुता। इन्द्रियेच्छानुवर्तित्वम्-इन्द्रियाणां येषु येषु विषयेषु स्पृहा जायते तदानुकूल्येन वर्तनम्। सन्तः ज्ञानिनः असंयमं असंयमलक्षणं प्राहुः वदन्ति स्म ॥११७॥ कषायभेदान् ब्रुवन्ति—**कषाया इति—**

कषन्ति हिंसन्ति आत्मानं दुर्गतिं प्रापयन्ति इति कषायाः । ते क्रोधाद्याः क्रोधमानमायालोभाश्चत्वारः पुनस्तेषामपि एकैकस्य चातुर्विध्यमेवम् अनन्तानुबन्धिनः क्रोधमानमायालोभाः । अप्रत्याख्यानावरणाः क्रोधमानमायालोभाः । प्रत्याख्यानावरणाः क्रोधमानमायालोभाः । संज्वलनाश्च क्रोधमानमायालोभाः । एते प्राणिनां जीवानां संसारसिन्धुसंपातहेतवः-भवसागरप्रवेशे हेतवो मताः ॥११८॥ **मनोवाक्कायेति**—शुभाशुभविभेदतः मनोवाक्कायकर्माणि शुभं मनःकर्म शुभा मनोभावना, शुभं वाक्कर्म, शुभा वचनप्रवृत्तिः, शुभं कायकर्म, शुभा शरीरचेष्टा, अशुभं मनःकर्म, अशुभा मनोभावना, अशुभा वचनप्रवृत्तिः, अशुभा शरीरचेष्टा एताः शुभाशुभमनोवाक्कायानां प्रवृत्तयः आत्मनि जीवे पुण्यपापानां क्रमशो बन्धहेतुत्वं प्रतिपद्यन्ते ॥११९॥ लोकस्वरूपं प्रोच्यते—**निराधार इति**—निराधारः शेषकच्छपाद्याधाररहितः । निरालम्बः आकाशे सर्वतोऽनन्ते क्वापि न संलग्नः, पवमानसमाश्रयः पवमानाः घनवाताम्बुवाततनुवातानाम् आधारेण तिष्ठन्, नभोमध्यस्थितः आकाशमध्ये स्थितः । सृष्टिसंहारवर्जितः उत्पत्तिव्ययरहितः ॥१२०॥ अथ मतम्—**नैवेति**—जगत् क्वापि न लग्नम् । जगत् लोकोऽयं क्वापि कस्मिन् अपि न लग्नम् न संश्लिष्टम् । कथंभूतम् । भूभृद्भाम्भोधिनिर्भरं भूः भूमिः, भूभ्राः पर्वताः, अम्भोधिः समुद्रः तैः । निर्भरं भृतम् । धातारश्च धारकाः, के । मत्स्यकूर्माहिपोत्रिणः मत्स्यो मत्स्यावतारधारी विष्णुः, कूर्मः कच्छपः, अहिः शेषः, पोत्री वराहः न युज्यन्ते अनवस्थापत्तेः ॥१२१॥ **एवमिति**—एवमालोच्य इत्थं विचार्य । लोकस्य जगतः । कथंभूतस्य निरालम्बस्य आश्रयविहीनस्य । धारणे जैनैः पवनः वायुविशेषः कल्प्यते समर्थ्यते । इत्येतन्महत्साहसम् ॥१२२॥ **यो हीति**—हि यस्मात्कारणात्, यो वायुः अत्र अस्मिल्लोके प्रत्यक्षीभूते । लोष्टकाष्ठादिधारणे लोष्टं मृत्तिकाखण्डम्, काष्ठं दारु, आदिशब्देन घटपटादयः तेषां धारणे न शक्तो न समर्थः । स त्रैलोक्यस्य जगत्त्रयस्य कथं धारणावसरक्षमः धारणावसरे धारणकार्ये क्षमः समर्थः स्यात् ॥१२३॥ तदसत्—उपर्युक्तमाक्षेपं प्रतिविदधाति—**ये इति**—ये मेघाः पानीयैर्जलैः । सचराचरं चराः जङ्गमाः पदार्थाः । अचराः स्थिराः पदार्थाः धराधराधरादयः । तैः सहितं सचराचरं विष्टपं जगत् प्लावयन्ति पूरयन्ति । ते वातसामर्थ्यात् वायुशक्तेः । व्योम्न्याकाशे । किं न समासते किं न तिष्ठन्ति । अपि तु तिष्ठन्त्येव ॥१२४॥ आप्तागमपदार्थेषु अर्हति जिने, आगमे तदुक्तसिद्धान्ते, जीवादिनवपदार्थेषु च अपरं दोषम् अपश्यन्तोऽन्यमतीया **अमज्जनेत्यादि**दोषचतुष्टयं ब्रुवते—अमज्जनम् अस्नानम्, अनाचामः अदन्तधावनम्, नग्नत्वम्, स्थितिभोजिता उद्भीभूय भोजनं मुनेः एतद्दोषचतुष्टयं मिथ्यादृशो वदन्ति ॥१२५॥ अत्र समाधिः एतद्दोषचतुष्टयस्य निरसनम्—यथा—**ब्रह्मचर्येति**—ब्रह्मचर्योपपन्नानां मैथुनम् अब्रह्म तत्त्यागो ब्रह्मचर्यम्, तदुपपन्नं स्वीकृतं यैस्ते ब्रह्मचर्योपपन्नास्तेषाम् । पुनः कथंभूतानाम् । अध्यात्माचारचेतसाम् आत्मानम् अधिकृत्य ये आचाराः जपध्यानतपांसि तेषु चेतो मनो येषां ते अध्यात्माचारचेतसः तेषाम् । मुनीनां स्नानम् अप्राप्तं स्नानस्यावश्यकता न । तु परंतु स्पर्शे अयोग्यजनस्पर्शे । अस्य स्नानस्य विधिर्मतः मान्यः ॥१२६॥ **संगे इति**—कापालिकात्रेयीचाण्डालशबरादिभिः कपालेन नृकपालेन चरति अभ्यवहारादिकं भोजनपानादिकं करोतीति कापालिकः वर्णसंकरजातिविशेषः । आत्रेयी पुष्पवती स्त्री । चाण्डालः ब्राह्मण्यां वृषलेन शूद्रेण जातः । शबरो म्लेच्छजातिः, "भेदाः किरातशबरपुलिन्दा म्लेच्छजातयः" इति, आदिशब्देन शुनकगर्दभनापितस्पर्शे । वमने, विष्टोपरि पादपतने, शरीरोपरि काकविण्मोचने इत्यादिस्नानोत्पत्तौ सत्यां दण्डवदुपविश्यते श्रावकादिकच्छात्रादिको वा जलं नामयति । सर्वाङ्गप्रक्षालनं क्रियते, स्वयं हस्तमर्दनेनाङ्गमलं न दूरीक्रियते । स्नाने सति उपवासो गृह्यते । पञ्चनमस्कारं शतमष्टोत्तरं वा कायोत्सर्गेण जप्यते एवं शुद्धिर्भवति ॥१२७॥ व्रतिकस्त्रीणां कथं शुद्धिर्भवति । **एकान्तरमिति**—ऋतौ रजस्वलावस्थायाम् । व्रतगताः स्त्रियः आर्यिकाः क्षुल्लिकाः श्राविकादयश्च । एकान्तरम् एकदिवसम् उपोषितम्, त्रिरात्रं वा त्रिदिनोपवासं वा कृत्वा । चतुर्थके दिने स्नात्वा स्नानं कृत्वा । असंदेहं निरारेकं निश्चयेन । शुद्ध्यन्ति रजोदोषदूरा भवन्तीत्यर्थः ॥१२८॥ **यदेवेति**—यदेव आगमेन शुद्धं भवतीति निगदितं तदेव शोध्यम् । केन । अद्भिर्जलेन । हि यतः अङ्गुलौ करशाखायां सर्पदष्टायां न हि नासा नासिका निकृत्यते छिद्यते ॥१२९॥ **निष्पन्दादिविधौ**—निष्पन्दादिविधौ मुखाल्लालाकफादिनिर्गमने सति मुखे यदि चेत् अपूतत्वम् अपवित्रत्वम् इष्यते मन्यते तर्हि वक्त्रापवित्रत्वे मुखस्य अशुचित्वे शौचं

पूतत्वं कुतः नारभ्यते आगमे मुखशुद्धिरुदाहृता न तु गुदशुद्धिः तस्य सर्वदा अपवित्रत्वात् । मुखशुद्धिर्जलेन भवति । गुदशुद्धिस्तेनापि न भवति ॥१३०॥ विकारे इति—विकृतौ विदुषां मतिमतां द्वेषः । परम् अविकारानुवर्तने निर्विकारानुवर्तने रागद्वेषादिभावरहितस्य नग्नत्वस्य अनुवर्तने अनुसरणे द्वेषो न । मतिमन्तः रागद्वेषादिविषये विधौ कार्ये द्वेषं कुर्वन्ति । परम् अविकारकार्यकरणे तद्विषये वा द्वेषं न कुर्वन्ति । तस्मात्कारणान्नग्नत्वं मुनीनां निसर्गोत्थं स्वाभाविकम् । रागद्वेषविप्लुतं कामविकारेण विकृतं वा नास्ति । अतस्तत्र को नाम द्वेषकल्मषः द्वेषेण कल्मषः अशुभपरिणतिः का नाम कर्तव्या । विवेकं कृत्वा नग्नत्वे द्वेषस्त्याज्यः ॥१३१॥ वस्त्रधारणे दोषाः—नैष्किंचन्यमिति—यदि ते संयमिनो मुनयो वल्कलाजिनवाससां तरुत्वङ्निर्मितवस्त्रं वल्कलमुच्यते । अजिनं हरिणव्याघ्रादीनां चर्म । कार्पासवस्त्रं वासः एतेषां संगाय ग्रहणाय यदि ईहन्ते स्पृहयन्ति तर्हि नैष्किंचन्यं निष्परिग्रहत्वम् अहिंसा च संयमिनां कुतो भवेत् । न कस्मादपि हेतोः । रागद्वेषाद्युत्पत्तिः संगाज्जायते यतः ॥१३२॥ स्थितिभोजितां वर्णयति—नेति—स्थितेः उद्भीभूत्वा भुक्तिः भोजनं न स्वर्गाय । पुनः अस्थितेर्भुक्तिः उपविश्य भोजनं न श्वभ्राय नरकप्राप्तिहेतुर्न । किंतु अस्मिन्संयमिजने सा स्थितिभोजिता प्रतिज्ञार्थम् इष्यते । उपविष्टः सन् भाजनेन अन्यहस्तेन वा न भुञ्जेऽहमिति प्रतिज्ञार्थं च ॥१३३॥ पाणिपात्रमिति—यावत्कालम् एतत्पाणिपात्रं पाणी हस्तावेव पात्रं भाजनं मिलति तयोः पाण्योः संयोजनं भवति । यावत्कालं स्थितिभोजने शक्तिः सामर्थ्यम् अस्ति तावत्कालं भुञ्जे भोजनं कुर्वे । अन्यथा यदा पाण्योः संयोजनं न भवेत्, पादयोः शक्तिश्च उद्भाहारग्रहणे नश्येत् तदाहारं रहामि त्यजामि ॥१३४॥ केशलोचवर्णनम्—अदैन्येति—अदैन्यम् अयाचनम् । असंगः निर्ग्रन्थता । वैराग्यं संसारशरीरभोगेभ्यः विरक्तिः । परीषहो दुःखसहनम् एतदर्थं यतीशानां मुनीन्द्राणाम् । केशोत्पाटनसद्विधिः श्मश्रुमूर्धजानां केशाना हस्तेन उत्पाटनसद्विधिः अपनयनविधिः कृतः ॥१३५॥

इत्युपासकाध्ययन आगमपदार्थपरीक्षणो नाम तृतीयः कल्पः ।

## ४. मूढतोन्मथनो नाम चतुर्थः कल्पः ।

[पृष्ठ ३६] सूर्यार्घ इति—सूर्याय अर्घ्यदानम् । मिथ्यादृष्टयः खलु सूर्योऽयं नारायण इति मत्वार्घ्यं ददति । तद्बुध्या अर्घं ददतः सम्यक्त्वनाशः स्यात् । ग्रहणस्नानम्—ग्रहणं सूर्यचन्द्रमसोरुपरागः, संक्रान्तौ द्रविणव्ययः सूर्यस्य राश्यन्तरसंक्रमणम्, पुण्यार्थत्वेन मिथ्यादृष्टिभिःसमर्थितायां संक्रान्तौ द्रव्यदानम् । सम्यग्दर्शनघातकम् । संध्यासेवा संध्यासमये विष्ण्वादिदेवतानां तर्पणम् । अग्निसत्कारः अग्नौ देवतात्वं संकल्प्य तत्पूजनं लोकमूढता गेहार्चनं गेहपूजनं देहार्चनं देहपूजनम् ॥१३६॥ नदीति—नदीनदसमुद्रेषु धर्मचेतसा मज्जनम् अत्र स्नाने कृते पुण्यं लभ्यते परलोके च सुखी जीवो भवति इति कल्पनया स्नानम् । तरुस्तूपाग्रभक्तानां वन्दनं तरोरश्वत्थस्य वन्दनम्, स्तूपाग्रस्य सिकताश्मनाम् उच्चयाग्रस्य वन्दनम् । भक्तानाम् अन्नानां वन्दनम् । भृगुसंश्रयःपर्वतात्पतनस्थानं भृगुः तस्य संश्रयोऽवलम्बनम् । भृगोरघोदर्यादिषु पतित्वा मरणं पुण्यायेति मत्वा तथाकरणम् ॥१३७॥ गोपृष्ठेति—गोपृष्ठान्तनमस्कारः गोः धेनोः पृष्ठस्य अन्तस्य योनेश्च नमस्कारो वन्दन तन्मूत्रस्य निषेवणं पानम् । रत्नवाहनभूयक्षशस्त्रशैलादिसेवनं रत्नानां वाहनानाम् अश्वादीनां भूमेः यक्षाणां शास्त्राणां पर्वतादीनां च सेवनम् ॥१३८॥ समयेति—जिनदर्शनं मुक्त्वा नैयायिकवैशेषिकबौद्धादिदर्शनानि समयान्तराणि पाखण्डाः रक्तपटकापालिकादयः, वेद—ऋग्वेदादयः, लोक—पञ्चपाण्डवानामेका योषित्, कुन्ती पञ्चभर्तृका विष्णुश्च सारथिः इत्यादिलोकसंश्रयमूढत्वम् । समयसंश्रितं मूढत्वम्, पाखण्डसंश्रितं मूढत्वम्, वेदसंश्रितमूढत्वम् । इत्याद्यनेकधा मूढत्वं ज्ञेयम् । समयादिकेषु ये आचारा विवेकरहिताः प्रतिपादितास्तेषां समाचरणेन विमूढानाम् अविवेकिनाम् ॥१३९॥ देवमूढत्वं प्रतिपाद्यते—वरार्थमिति—पुत्रसंपदादिप्राप्त्यर्थं याचना वरः तस्मै इति वरार्थम् । लोकवार्तार्थं कृष्यादिषडाजीवनकर्माणि लोकवार्ता तस्यै लोकवार्तार्थम् । उपरोधार्थं मित्रसंबन्धिजनाग्रहार्थम्, अमीषां कुदेवानाम् उपासनं सेवनं सम्यग्दर्शनहानये कारणं स्यात् ॥१४०॥ क्लेशायैवेति—अमीषु उपर्युक्तेषु

समयादिषु या क्रिया पूजादिका क्रियते सा क्लेशायैव संसारभ्रमणायैव स्यात्—फलावाप्तिकारणं न स्यात्। सम्यक्त्वादिफलावाप्तिहेतुर्न भवेत्। केषां मुग्धबोधानां मूर्खाणाम् अज्ञानिनामित्यर्थः। कथम्। ऊषरे क्षारमृद्विशिष्टे क्षेत्रे कृषिकर्मवत् बीजवपनकार्यवत् निष्फलं स्यात् ॥१४१॥ जिनादिषु भक्तिः सफला भवति—वस्तुनीति—प्रकृतत्वात् जिनादिष्वेव भक्तिः। भाक्तिके भक्तिः पूज्ये गुणानुरागः सा प्रयोजनं यस्य स भाक्तिकस्तस्मिन् भाक्तिके शुभारम्भाय पुण्यप्राप्तये भवेत्। रत्नाय रत्नप्राप्तिहेतवे अरत्नेन रत्नस्वरूपरहितेन पाषाणेन रत्नाय रत्नमिदं भवति इति कुतो भावः भूतये वैभवाय नहि भवति। 'नह्यरत्नेषु' इत्यपि पाठः रत्नस्वरूपरहितेषु पाषाणेषु रत्नानि इमानि इति कुतो भावः भूतये वैभवाय नहि भवति इति अभिप्रायो गृहीतव्यः ॥१४२॥

[पृष्ठ ३७] मिथ्यात्वं त्याज्यमिति कथयति—अदेवे इति—अदेवे आप्तत्वरहिते हरिहरादिषु देवताबुद्धि सर्वज्ञोऽयमिति भावम्। अव्रते व्रतभावनाम्, मिथ्यात्वयुक्ते तप आदौ व्रतभावनां व्रतपरिणामम्। अतत्त्वे एकान्तनित्यादिषु तत्त्वविज्ञानं तत्त्वकल्पनं मिथ्यात्वं तत् उत्सृजेत् त्यजेत् ॥१४३॥ तथापि इति—तथापि यदि कोऽपि नरः सर्वथा मूढत्वम् अदेवादिषु देवतादिभावं न त्यजेत् तर्हि असौ मिश्रत्वेन अर्हदादिषु अदेवादिषु च भक्तिं कुर्वाणोऽसौ मिश्रत्वेन अनुमान्यः अनुमत्यर्हः। यतः सर्वनाशः सुन्दरः न। कालान्तरेण स जैनो भवेत् इति मत्वा स आदरणीयः ॥१४४॥ न स्वत इति—जन्तवः स्वतः न प्रेर्याः आप्तादिश्रद्धाने न प्रवर्तितव्याः तथा प्रवर्तने कृते ते जिनागमे दुरीहाः स्युः दुर्भावनायुक्ता भवेयुः। स्वत एव आप्तादिश्रद्धाने प्रवृत्तानां तद्योग्यानुग्रहो मतः आप्तादिश्रद्धानादिषु अनुग्रहः उपकारः कर्तव्यः ॥१४५॥

इत्युपासकाध्ययने मूढतोन्मथनो नाम चतुर्थः कल्पः।

## ५. जमदग्नितपःप्रत्यवसादनो नाम पञ्चमः कल्पः।

[पृष्ठ ३७] शङ्केति—शङ्का जिनोक्तम् इदं धर्मादितत्त्वं स्यादन्यद्वा वैशेषिकाद्युक्तं धर्मादितत्त्वं स्यादिति चञ्चलं श्रद्धानं शङ्का। मदीयतपोमाहात्म्यान्ममेन्द्रपदं संसारसौख्यं वा भवतु इति इच्छा काङ्क्षा। कोपादिवशात् रत्नत्रयसाधने शरीरादौ जुगुप्सा विनिन्दा। अन्यश्लाघा—सर्वथा क्षणिकादितत्त्ववादिनो मिथ्यादृष्टयोऽन्ये तेषां श्लाघा प्रशंसा अन्यश्लाघा एते दोषा मनसा गिरा वचसा भवन्ति तदा सम्यक्त्वविनाशकारणं भवन्ति ॥१४६॥

[पृष्ठ ३८] तत्र शङ्कादोषस्य विशदं स्वरूपं प्ररूपयति—अहमिति—अहमेकः असहायः, जगत्त्रये मे मम कश्चित् त्राता रक्षको नास्ति। इति एवंरूपां व्याधीनां रोगाणां व्रजः समूहः तेन उत्क्रान्तिः आक्रमणं तस्या जायमानां भीतिं भयं शङ्कां प्रचक्षते ब्रुवते—अथवा शङ्काया अपरं लक्षणम्—एतदिति—एतत्तत्त्वं जिनोक्तं धर्मादितत्त्वं वा इदं तत्त्वं वैशेषिकाद्युक्तं तत्त्वम्, एतद्व्रतं जिनोक्तं तपोव्रतादिकं वा इदं व्रतं मिथ्यादृष्ट्युक्तं पञ्चाग्नितपोव्रतादिकं वा, एष जिनो देवः, हरिहरादिको वा देवः इति परां शङ्कां विदुः ॥१४७–१४८॥ इत्थं शङ्कितचित्तस्य—इत्थं संशयितमनसः जनस्य दर्शनविशुद्धता न स्यात्। दर्शनं निर्मलं निर्दोषं न भवेत्। चित्ते शङ्किते ईप्सितावाप्तिर्न स्यात्। अभिलषितप्राप्तिर्न भवेत्। यथा उभयवेतने पुरुषे अभिलषितलाभो न भवति। स्वामिद्वयेनापि त्वया आवयोः सेवा न सुष्ठु कृता इति दोषारोपणं क्रियते तस्मात् उभयलाभादपि स वञ्चितो भवति सेवकः। अथवा पाठान्तरम् 'उभयवेदने' नपुंसकवेदे उभयाभिलाषा भवति परंतु उभययोरपि वाञ्छितयोः अर्थयोः प्राप्तिर्न भवति। स्त्रियं पुरुषं वा भोक्तुं न क्षमो भवति नपुंसकः। तथा शङ्कितचित्तस्य नुरपि सम्यग्दर्शननिर्मलता न जायते ॥१४९॥ निःशङ्कितधियो जनस्य स्वरूपमाह—एष एव भवेद्देवः—अर्हन्नेव देवो भवेत्। तदुक्तमेवानेकान्तरूपं जीवादिकं तत्त्वम्, एतत्तदेव व्रतम् अहिंसादिकं मुक्त्यै मोक्षाय भवेत् इति निश्चयं कुर्वाणो नरोऽशङ्कधीः निःशङ्कितबुद्धिः स्यात् ॥१५०॥ तत्त्वे इति—जीवादितत्त्वस्वरूपे ज्ञाते सति। रिपौ अरौ दृष्टे सति। पात्रे वा मुन्यादिके आगते सति यस्य चित्तं दोलायते संशययुक्तं स्यात्

स नरः इहलोके परलोके च रिक्त एव भवति। संशयादिदं न लभ्यते परं च विनश्यति। अतः संशयो न कर्तव्यः ॥१५१॥

[ पृष्ठ ३९-४१ ] श्रूयतामत्रोपाख्यानम्—आकर्ण्यतामत्र निःशङ्किताङ्गे संशये च कथा—इहैवेति—अनेकानि आश्चर्याणि कुतूहलोत्पादकानि वृत्तानि समीपानि यस्य तस्मिन् जम्बूद्वीपे। जनपदाभिधानास्पदे जनपदनामके जनपदे देशे इत्यर्थः। भूमितिलकनामनगराधिपतेः नरपालनामनृपस्य श्रेष्ठी सुनन्दनामास्ति। कथंभूतस्य नृपस्य। गुणमालामहादेवीरतिकुसुमशरस्य सा महादेवी एव रतिः कामजाया तस्याः कुसुमशरस्य मदनस्य। अस्य श्रेष्ठिनः पत्नी सुनन्दा नामास्ति। कथंभूता सा जनितेति—जनितः उत्पादितः निखिलपरिजनानां हृदयेषु आनन्दो यया सा। अनयोः दम्पत्योः, धन्वन्तरिर्नाम सूनुः। कथंभूतः। धनबन्ध्वादिभ्रातृषट्कजन्मानन्तरम् अनुजः अनु पश्चात् जातस्तेभ्यः सर्वेभ्यः कनिष्ठः इति भावः। पुनः कथंभूतः सः। सकलेति—सकलानि सर्वाणि कूटानि असत्यभाषणानि कपटानि दम्भाः, तद्युक्तानि च यानि चेष्टितानि कृत्यानि तत्करणे हरिरिवेति कृष्ण इवेति। तथा नरपालनामनृपस्य पुरोहितः सोमशर्माऽग्निलाभार्यया सह सुखेनास्थात्। तयोर्दम्पत्योः विश्वानुलोमो नाम विश्वरूपादिपुत्रेभ्योऽनवरजः ज्येष्ठः सकलसदाचारविरुद्धः सुतः आसीत्। सुनन्दश्रेष्ठिनः कनिष्ठस्तनयो धन्वन्तरिर्विश्वानुलोमश्च पुरोहितपुत्रः उभावपि सहधूलिकेलिकरणात्, समानस्वभावगुणदोषवत्त्वात्, दुग्धजलवदाचरितसुहृद्भावौ, द्यूतसुरापानपरस्त्रीसेवनचौरिकाद्यसभ्यजनोचितकार्येषु। तत्पर्यायेषु तत्सदृशेषु च कार्येषु प्रवर्तने मुख्यभावं गतौ सन्तौ तेन अवनीपतिना अवन्याः पृथ्व्याः पतिरवनीपतिः नरपालनामा राजा तेन सनिकारं धिक्कारं कृत्वा निर्वासितौ स्वदेशान्निर्घाटितौ। कुरुजाङ्गलदेशेषु वीरमतिमहादेवीवरेण वीरनरेश्वरनाम्ना भूभुजाधिष्ठितम् अध्युषितम्, यमदण्डतरवालेन कोट्टपालेन संश्रितं सकलभवसारसीमन्तिनीभिः ललनाभिर्मनोहरं चेतोलुण्टाकम्, हस्तिनागपुरं प्राप्य तत्र तौ धन्वन्तरिविश्वानुलोमौ अवसियतौ। कदाचित्तौ नित्यमण्डितं नाम चैत्यालयम् आसादयामासतुः प्रापतुरित्यर्थः। कस्मिन् समये संध्यासमये। कथंभूते। अस्तेति—अस्तगिरिशिखरभूषणभूतसूर्योष्णतासमूहे संध्यासमये मद एव सखी तया कलुषितगण्डस्थलकोटिनिलीननिभृतस्थितभृङ्गसमूहलिह्यमानवदनवस्त्रविस्ताररचनाविस्तारयुक्तात्, नीलगिरिगजात् स्वैरं संमुखं निवृत्य परावृत्य आगच्छन्तौ श्रीधर्माचार्येण उच्चैरुच्यमानधर्मश्रवणाय उचितं योग्यं नित्यमण्डितं नाम चैत्यालयं जिनमन्दिरम् आसादयामासतुः प्रापतुः। तत्रेति—तत्र जिनमन्दिरे धन्वन्तरिं वक्ष्यमाणमुक्त्वा विश्वानुलोमः सुष्वाप। किमुक्तं तेन। उच्यते—"धन्वन्तरे, चेत् सुरामांसरोचकभक्ष्यद्रव्यप्रभृतीनि भवसुखानि निरर्गलमनुभवितुम् आस्वादितुमिच्छसि तदा वा अयम् अम्बराम्बरावृतवपुषाम् अम्बरम् आकाशं तदेव अम्बरं वास तेन आवृतं पिहितं वपुः शरीरं येषां तेषां जैनाचार्याणां धर्मो न श्रोतव्यः नाकर्णनीयः" इत्यभिधायोक्त्वा पिधाय च आच्छाद्य च कर्णयुगम्, अतिनिर्भरम् अतिशयेन गाढं प्रमीलावलम्बिलोचनायामः निद्रालस्याश्रितनेत्रदैर्घ्यः विश्वानुलोमः सुष्वाप निदद्रौ। किं तदाऽऽचार्यवचनं यच्छ्रुत्वा धन्वन्तरिरुवाच तत्कथ्यते—"प्राणिना हि नियमेन किमपि स्वल्पमपि व्रतम्, अचलितात्मतया दृढस्वभावेन उपात्तं गृहीतम् उदर्के उत्तरकाले लप्स्यमाने निश्चयेन स्वःश्रेयसि शिवे निमित्तं निदानं स्यात्।" इति प्रसंगवशादागतम् उदितं भाषणं श्रुत्वा नमस्कृत्य च, एवं तर्हि यदि भगवन्, पूज्य, अयमपि जनः कस्यापि व्रतस्य प्रदानेन वितरणेन अनुगृह्यतामुपक्रियताम् इत्यवोचत् अब्रवीत्। तदनु धन्वन्तरिणा कृतविज्ञप्तेः अनन्तरं सूरेः आचार्यात् "खलतिविलोकनात् त्वया अत्तव्यम्" खलतेः खल्वाटस्य नष्टमस्तककेशस्य नरस्य विलोकनात् दर्शनात् त्वया अत्तव्यम् अन्नं भक्षणीयम् इति दत्तव्रतग्रहणेन कुलालात् कुम्भकारात् लब्धनिधानः प्राप्तधनकुम्भः। पयःपुराविष्टपिष्टकशकटपरित्यागात् दुग्धपूरभृतपिष्टकभक्ष्ययुक्तस्य शकटस्य स धन्वन्तरिः त्यागं कृतवान् यतस्तत्र पिष्टकभक्ष्ये उरगः सर्पो निजं गरलं विषम् उद्गीर्य वमित्वा गत आसीत् तेन स अजनितमरणसंगम आसीत्। अज्ञातवृक्षत्यागेन उल्लङ्घितकिम्पाकफलभक्षणापत्तिः। पुनः अविमृश्य किमपि कार्यं नाचरणीयम् इति गृहीतव्रतविधिः। एकदा निशायां नगरनायकनिलये नगरस्य नायकः नृपस्तस्य निलये प्रासादे नटनृत्यनिरीक्षणात्कृतकालक्षेपणः नटानां नृत्यस्य निरीक्षणेनावलोकनेन कृतकालव्ययः, स्वावासं निजगृहम् अनुसृत्य शनैः विघटितकपाटपुट-

संधिबन्ध: उद्घाटितारत्युगसंधिबन्धन:, स्वकीयया निजया सवित्र्या मात्रा सह विहितगाढावगुण्ठनम् दत्तदृढालिङ्गनाम् आत्मकलत्रं निजां भार्यां जातनिद्रातन्त्रं समागतस्वापायत्ताम् अवलोक्य, उपपतिशङ्कया जारसंशयेन मुहुरुत्खातखड्गो, पुन:पुन: कोषाद्बहिर्निष्कासितासि:, भगवता श्रीधर्माचार्येण उपपादितं दत्तं व्रतं नियमम् अनुसस्मार स्मरणमार्गम् आनीतवान् । शुश्राव च आकर्णयामास च दैवात् तदैव "मनागत: परत: सर, ईषत् अत: स्थानात् परत: पुरत: सर । खरं तीक्ष्णं मे शरीरसंबाध: देहपीडा", इति गृहिणीगिरम् पत्नीवचनम् । ततश्च "यदीदं व्रतमहमद्य नाग्रहीषं नागृह्णाम् (अविचार्य पुन: किमपि कार्यं मया क्रियेत) तर्हि इमां जननीम् इदं च प्रियकलत्रं प्रियां जायाम् असंदेहं विशस्य हत्वा इहलोके दुरपवादरजसां अननिन्दापांसूनाम् अमुत्र परलोके च दुरन्तैनसां नारकादिदु:खानां दातॄणां पापानां च भागी भवेयम् ।" इति जातनिर्वेद: उद्भूतवैराग्यभाव:, सर्वमपि ज्ञातिलोकं बान्धवजनं यथायथं यथोचितं मनोरथोत्सेकं तदीयेच्छापूरणात् सर्वम् अवस्थाप्य "यत्रैव देशे दु:खदनिन्दापीडितं चेतो मनस्तत्रैव देशे अवलम्ब्यमानं व्रतं दीक्षा वा न भवति निरपवादं निर्दोषं गर्हारहितं वा" इति प्रकाशितोपदेशस्य प्रकटीकृतधर्मज्ञानस्य तस्य भगवतो निदेशात् आदेशमनुसृत्य धरणीभूषणभूधरोपकण्ठे धरणीभूषणनामगिरिसमीपे तपस्यतो वरधर्माचार्याद्दीक्षामादाय इति वितर्काम्यर्णो बभूव । कथंभूताद्वरधर्माचार्यात् कान्तारदेवताविहितसपर्यात् वनदेवताकृतपूजनात् । कीदृशीं दीक्षाम् आदाय । सुरसुन्दरीकटाक्षविपक्षाम् अमरललनापाङ्गसपत्नदीक्षां निर्ग्रन्थलिङ्गं धृत्वा विदितवेदितव्यसंप्रदाय: ज्ञातज्ञेयागम: सन्नम्बरे आकाशे स्तम्बाडम्बरितोपात्तपलाशिमालायां स्तम्बकान्तियुतधृतपलाशिमालायां स्तम्बकान्तिधृतसपर्णवृक्षपङ्क्तियुक्ते पर्वततटे आतापनयोगस्थित: ग्रीष्मकाले रविकरतप्तशिलातले ध्यानसंधारणम् आतापनयोग:, तेन स्थित:, अनवरतप्रवर्धमानाध्यात्मध्यानावन्ध्यबोधनिरत:, सततं वर्धमानात्मविषयध्यानामोघज्ञेयनिरत: स धन्वन्तरि: "किमयं कर्कूरोत्कीर्ण:, किं वा अस्मादेव पर्वतान्निरूढ:" इति वितर्काम्यर्णो बभूव । किमयं धन्वन्तरिर्मुनि: कर्कूरोत्कीर्ण: पर्वतोत्कीर्ण: किं वा अस्मादेव गिरे: निरूढ: निश्चयेन रूढ: अङ्कुरित: इति वितर्काम्यर्ण: इत्यूहसमीपवर्ती अभवत् ।

[ पृष्ठ ४२ ] सूरिवरोऽधुना विश्वानुलोमस्य वृत्तं कथयति—कथंभूत: स: । संजातेति—संजात: उत्पन्न: सुहृदि मित्रे समालोकनकाम: दर्शनाभिलाषो यस्य स: विश्वानुलोमोऽपि तदिति—तस्य धन्वन्तरे: परिजनात् ज्ञातिवर्गात् परिज्ञातोऽवगत: एतद्धन्वन्तरे: प्रव्रजनस्य जिनदीक्षाया व्यतिकर: उदन्तो येन, मित्रेति—"मित्रमेव मित्रधेयं तस्य सख्यु: धन्वन्तरेर्या गतिर्भाविनी स्थिति: सा ममापि" इति प्रतिज्ञाप्रवर: कृतप्रतिज्ञ इत्यर्थ: तत्र धरणीधरगिरौ आगत्य जैनेति—जिनो देवता यस्य स जैन: स चासौ जनश्च जैनजन: तस्य समत्रस्थितिं सदाचारम् अनवबुध्यमानो अजानन् "हंहो मनोहरवयस्य चिरान्मिलितोऽसि बहुना कालेन दृष्टोऽसि । किमिति न मे गाढाम् अङ्कपालीं दृढमाश्लेषं ददासि । किमिति न कामं विपुलं भाषसे । किमिति आदरेण वार्ताम् उदन्तं न आपृच्छसे" इत्यादि बहुसप्रश्रयं नम्रतया आभाष्य निजव्रताचरणतत्परचित्ते निरागसि निरपराधे निष्पापे वा धन्वन्तरिमुनीश्वरे प्ररुष्य क्रोधं कृत्वा सविधाशिव्रताति: समीपासुखविस्तार:, प्रादुर्भवदप्रीति: प्रकटीभूतरोष:, रमणीयधरणीधरसंनिधिनिर्मितपर्णशालस्य, सहस्रजटनामधेयस्य जटिन: परिव्राजकस्य निकटे शतजटनामधेय: परिव्राजकोऽभवत् ।

[ पृष्ठ ४३ ] धन्वन्तरिणा कृतोपदेशो विफलोऽभूत्—धन्वन्तरिरपि—आतापनयोगान्ते तस्य संबोधनाय जिनधर्मोपदेशदानाय समन्ते निकटे समुपसद्य गत्वाऽवददेवम्—"मत्प्रणयपान्थविश्रामारामविश्वानुलोम मत्प्रणय: मदीय: स्नेह: स एव पान्थ: पथिकस्तस्य विश्रामाय मार्गश्रमापनोदाय, आराम इव उद्यानमिव, जिनधर्मस्थितिं जिनधर्माचारम् अजानन् किमित्यकाण्डे किमर्थमनवसरे चण्डभावम् अत्यन्तकोपम् आदाय धृत्वा दुराचारप्रधान: पञ्चाग्नितप आदिके जीवहिंसाबहुले मिथ्याचारे तत्पर: समभूरजायथा: । तदेहि तत: आगच्छ विहायेमं दु:पथकथासनाथं कुमार्गाचारयुक्तं शमथावसथमनोरथं शम एव शमथ: तस्य आवसथो गृहं तस्य मनोरथम् इमं विहाय त्यक्त्वा सहैव युगपदेव तपस्याव:" इति बहुश: अनेकधा कृतप्रयत्नप्रकाशोऽपि स धन्वन्तरिमुनि: प्रतिबोधयितुं तं विश्वानुलोमं नाशक्नोत् । कथंभूतं विश्वानुलोमम् । दु:शिक्षावशात् दु:खदमिथ्योपदेशवशात् तम् ओतुपोतरुतभीतपतङ्गपाकमिव ओतुर्मार्जारस्तस्य पोत: शिशुस्तस्य रुतं शब्दस्तच्छ्रवणाद् भीत-

श्चासौ पतङ्गस्य पक्षिणः पाकः अर्भकस्तमिव, मुधामौनमूकतोत्तरङ्गितचित्तोत्सेकं मुधामौनं विफलमौनं तेन मूकता अभाषणं तेन उत्तरङ्गितनानासंकल्पयुक्तं चित्तं तेन उत्सेको गर्वो यस्य तम्। तितउपात्र इति—यथा तितउपात्रे इव चालिनीभाजने यथा तन्मनोऽमत्रे तस्य विश्वानुलोमस्य मनोऽमत्रे चित्तभाजने अप्राप्तसदुपदेशपयोऽवस्थानः यथा चालिन्यां पयोऽवस्थानं जलस्य स्थितिर्न भवति ततस्तत्कृत्स्नम् निर्गलति तथा तस्य चित्तभाजने उपदेशपयसो अनवस्थितेः तम् उपदेष्टुमक्षमो धन्वन्तरिः गुरुचरणमूलम् अनुशील्य सेवित्वा कालेन समाधिमरणयोग्ये वार्द्धक्यसमये, प्रवचनोचितं भगवत्याराधनाद्यागमयोग्यं चरमाचरणाधिकृतम् अन्तिमाचरणं सल्लेखनाभिख्यं तेन अधिकृतं कायकषायौ संलिख्य क्रियमाणं समाधिमरणविधिं विधाय कृत्वा, विबुधेति—विबुधा देवास्तेषामङ्गनाजनस्तेन उच्चार्यमाणा पठ्यमाना चासौ मङ्गलपरम्परा "स्वस्त्यस्तु जीव जय नन्देति" आशीर्वचो घोषणं तया अनल्पे प्रचुरे अच्युतकल्पे तन्नामके षोडशस्वर्गे। समस्तेति—समस्ताः सकलाश्च ते सुरास्तेषां समाजः समूहस्तेन स्तूयमानं यन्महातपस्तस्मिन् परायणा तत्परा प्रतिभा मतिर्यस्य स्वपूर्वजन्मन्याचरितस्य तपसो विमर्शं कुर्वती प्रतिभा यस्येति अमितप्रभो नाम देवोऽभवत्। विश्वानुलोमोऽपि पुरोपार्जितेति—पूर्वजन्मनि बद्धस्य जीवितस्यायुषोऽवसाने चरमदशायां विपद्य मृत्वा, उत्पद्य च जनित्वा च व्यन्तरेषु द्वितीयनिकायदेवेषु गजानीकमध्ये हस्तिरूपधारिसैनिकमध्ये विजयनामधेयस्य देवस्य विद्युत्प्रभाभिधो वाहनदेवो बभूव। अमितप्रभविद्युत्प्रभयोरन्योन्यं संलापः—पुनरेकदा पुरन्दरपुरःसरेण पुरन्दर इन्द्रः स अग्रसरः अग्रणीर्यस्य तेन दिविजवृन्देन दिवि स्वर्गे जायन्त इति दिविजास्तेषां वृन्दं समूहस्तेन देवसमूहेन सह नन्दीश्वरद्वीपात्तत्र चैत्यालयाश्रयां जिनबिम्बमन्दिराधिष्ठानाम् अष्टाह्नपर्वक्रियाम् अष्टदिनसंबन्धिनीम् उत्सवक्रियां जिनाभिषेकपूजादिक्रियां निर्वर्त्यागच्छन्, प्रवर्तयित्वा पुनः स्वर्गं प्रत्यागच्छन् असौ अमितप्रभो देवस्तं विद्युत्प्रभं देवं गजानीकम् अवेक्ष्य आह्लादमानमानसः प्रयुज्यावधिम् अवधिज्ञानेन ज्ञात्वेत्यर्थः। अवबुद्धः ज्ञातः पूर्ववृत्तान्तः पूर्वजन्मोदन्तः सः धन्वन्तरिचरः देवः इत्यभाषत—विद्युत्प्रभ, किं स्मरसि जन्मान्तरोदन्तं किं ज्ञायते पूर्वभवभवा प्रवृत्तिः त्वया। अमितप्रभ, बाढं स्मरामि भृशम् अत्यर्थं स्मरामि। किंतु सकलश्चरित्राधिष्ठानात् कलत्रेण पत्न्या सह चरित्रं तपस्तस्य अधिष्ठानात् अवलम्बनात् ममैवंविधः कर्मविपाकानुरोधः कर्मोदयाद्भवप्राप्तिः। तव तु ब्रह्मचर्यवशात्कायक्लेशादीदृशः। ब्रह्मचर्यमाश्रित्य कृतात् कायक्लेशात् तपसः महती दैवी संपदिति भावः। ये च मदीये समये सिद्धान्ताचारे प्रवृत्तिं कुर्वाणा जमदग्नि-मतङ्ग-पिङ्गल-कपिञ्जलादयः महर्षयस्ते तपोविशेषादिहागत्य भवतोऽपि अभ्यधिका महान्तो भविष्यन्ति। ततो न विस्मेतव्यम् न गर्वः करणीयः।

[ पृष्ठ ४४-४५ ] अमितप्रभः—विद्युत्प्रभ, संप्रत्यपि अधुनापि न मुञ्चसि न त्यजसि दुराग्रहम्। तदेहि तर्ह्यागच्छ। तव मम च लोकस्य परीक्षावहे चित्तं मनःपरीक्षणं कुर्वहे। इति विहितविवादौ कृतमिथः प्रतिज्ञौ। तौ द्वावपि देवौ करहाटदेशस्य पश्चिमदिग्भागमाश्रित्य काश्यपीतलं भूमितलम् अवतेरतुः नभसो भूतलम् अवतीर्णाविति भावः। तत्रेति—दण्डकावने। कथंभूते। वनेचरेति—वने चरन्तीति वनेचराः शबराः तेषां सैन्यस्य सौजन्यं युद्धं सुजन्यम् एव सौजन्यं तेन अशून्यं सहितं तस्मिन्। तन्निकटदण्डकावने तस्य करहाटदेशस्य निकटे समीपस्थिते दण्डकावने। बदरिकाश्रमे बदरिकाश्रमनामधेये मुनीनां वासस्थाने जमदग्निम् अवलोक्य। कथंभूतम्। बहुलकालेति—अनेकवर्षशतसमयं यावत् कृतं कृच्छ्रं कठिनं तीव्रं तपो येन तम्। पुनः कथंभूतम्। चन्द्रेति—चन्द्रश्चन्द्रमाश्चण्डरुचिः सूर्यश्चण्डास्तीव्राः रुचयः किरणा यस्येति सूर्याचन्द्रमसौ तयोर्मरीचयः किरणास्तेषां पानं तत्किरणसेवनमित्यर्थः, तत्र परायणं मानसं मनो यस्य तम्। पुनः कथंभूतम्। ऊर्ध्वबाहुम् ऊर्ध्वीकृतकरम्। पुनः कथंभूतम्—एकेति—एकपादेन अवस्थानं स्थितिः तस्य आग्रहे राहुमिव, पुनः कथंभूतम्, अनल्पेति—अनल्पाश्च ते उल्लसन्तः सत्पल्लवाश्च किसलयानि तैर्युक्ताः अविरलाः घनाः याः वल्लयः गुल्माश्च अप्रकाण्डवृक्षाः, वल्मीकाः वामलूराः तैः अवरुद्धं व्याप्तं वपुः शरीरं यस्य, अतिप्रवृद्धेति—अतिप्रकर्षेण प्रवृद्धा या वृद्धता जरठभावः सैव सुधा प्रासादधवलीकरणचूर्णं तेन धवलितं शुभ्रितं च तत् शिरो मस्तकम्, श्मश्रुकूर्चम्, जटाजालं जटासमूहश्च तेषां त्विषा कान्त्या युक्तम्, कश्यपस्य ऋषेः शिष्यं जमदग्निम्

अवलोक्य वीक्ष्य ( तौ देवौ पक्षिद्वयवेषेण जमदग्निकूर्चे निविष्टौ इति कथा ) पत्त्रेति—पत्त्ररथयोः पक्षिणोर्मिथुनं युगलं तस्य कथा वार्ता तस्या उचितः योग्यः आश्लेषः संबन्धः यत्र तं वेषं रूपं विरचय्य तदिति तस्य कूर्चे श्मश्रुणि कुलायकुटीरकोटरे नीडगृहरन्ध्रे निविष्टौ प्रविष्टौ (अन्योन्यं संलापं कुरुतः) कान्ते, प्रिये, काञ्चनेति—काञ्चनाचलो मेरुः, तस्य चमूसदृशी या मेखला शैलनितम्बस्तस्याम्, अशेषेति—सकलपक्षिचक्रपतेः वैनतेयस्य गरुडस्य, वातराजसुतया मदनकन्दलीति नामधेयं बिभ्रत्या समं महान् विवाहोत्सवो वर्तते । तत्र मयाऽवश्यं गन्तव्यम्, त्वं तु सखि प्रिये समासन्नप्रसवसमया अद्य श्वो वा प्रसविष्यसि डिम्भान् अतः न शक्यसे नेतुम् । कालस्य वेलायाः क्षेपो व्ययः यथा न स्यात्तथा अविलम्बम् अहं पुनस्तद्विवाहोत्सवानन्तरम् अकालक्षेपं शीघ्रमेवागमिष्यामि, यथा चाहं तत्र चिरं दीर्घकालं नावस्थास्ये न वसामि तथा मातुः पितुश्चोपरि महान्तः शपथाः ( मयोच्यन्ते इति भावः ) किं च बहुनोक्तेन, यद्यहमन्यथाऽसत्यं वदामि "तदास्य पापकर्मणस्तपस्विनो दुरितभागी पातकभाजनं स्याम्" इत्यालापं चक्रतुः । तं च जमदग्निः कर्णकटुमालापं भाषणम् आकर्ण्य श्रुत्वा प्रवृद्धक्रोधः इद्धकोपः कराभ्यां तत्कदर्थनार्थं तयोः पीडार्थं कूर्चं श्मश्रु मलितवान् मर्दितवान् । अमरचरौ भूतपूर्वसुरौ तौ विकिरौ अपि विहगावपि उड्डीय उत्पत्य तदग्रविटपिनि जमदग्निपुरतःस्थितवृक्षे संनिविश्य उपविश्य पुनरपि तं तापसं तपस्विनम् अवलोहलालापौ कृतनिन्दाभाषणौ व्यक्तस्वरौ वा निकामम् अत्यर्थम् उपजहसतुः उपहासं निन्यतुः । "तापसो जमदग्निः साध्वसं भयं विस्मयोऽद्भुतं तौ प्रति उपसृतं गतं मानसं यस्य स एवं विमर्शं चकार ।" नैतौ खलु पक्षिणौ भवतः, किंतु रूपान्तरौ कृतवेषपरिवर्तनौ उमामहेश्वराविव पार्वतीपरमेश्वराविव कौचिद्देवविशेषौ तदुपगम्य तत्समीपं गत्वा प्रणम्य च पृच्छामि तावत् प्रथमं स्वस्य पापकर्महेतुम् । ( वक्ष्यमाणोऽनुयोगस्तेन कृतः ) अहो इति—मत्पूर्वपुण्येति मम पूर्वं पुण्यं मत्पूर्वपुण्यं तेन संपादितं लम्भितम् अवलोकनं दर्शनं यस्य, द्विजेषु पक्षिषु उत्तमाः द्विजोत्तमाः दिव्याश्च ते द्विजोत्तमाः दिव्यद्विजोत्तमास्तेषाम् अन्वयो वंशः स एव संभवसदनम् उत्पत्तिगृहं यस्य एतादृशं यत् पतङ्गयोः पक्षिणोर्मिथुनयुगलं तत्संबोधनम् "कथयतां भवन्तौ महानुभावौ कथमहं पापकर्मा इति ।" पतत्त्रिणौ पक्षिणौ, आकर्णय—अपुत्रस्येति—यस्य पुत्रो नास्ति योऽविद्यमानपुत्रः पुरुषः तस्य गतिर्नास्ति पुनर्मनुष्यो न जायते । स्वर्गस्तु तस्य नैव । ततः पुत्रमुखं दृष्ट्वा पश्चाद्भिक्षुकश्चतुर्थाश्रमी भवति ॥१५२॥ अधीत्येति—यथाशास्त्रं वेदान् पठित्वा पुत्रांश्च युक्तितो ब्राह्मणेन ब्राह्मण्याम्, क्षत्रियेण क्षत्रियायाम्, वैश्येन वैश्यायां जनयित्वा धर्मपत्न्यां योग्यकाले समागमं कृत्वा यज्ञैः इष्ट्वा देवान् पूजयित्वा ततः यथाकालं चतुर्थे वयसि नरः प्रव्रजितो भवेत् । गृहं त्यक्त्वा वने दीक्षां गृहीत्वा वसेत् ॥१५३॥ इति स्मृतिकारकीर्तितं वृत्तम् अप्रमाणीकृत्य तद्विरुद्धाचरणेन त्वं तपस्यसि । कथं तर्हि मे शुभाः परलोकाः स्वर्गादयः । उत्तरमाह-परिणयनकरणादौरसपुत्रोत्पादनेन उद्वाह्य धर्मपत्न्याम् औरसपुत्रम् उत्पादयेत् । किमत्र दुष्करम् इत्यभिधाय मातुलस्येति मातुर्भ्राता तु मातुलः तस्य विजयामहादेव्याः भर्तुः इन्द्रनगरवैभवधारकस्य काशिराजस्य भूपालस्य भवनभाग्भूत्वा प्रासादं गत्वा, तद्दुहितरं तत्सुतां रेणुकां परिणीय विवाह्य, अविरलेति—अविरलाः सान्द्राः कलापाः गुच्छा उलपाः प्रतानिन्यः ताभिः युक्तेन पुलिनेन असराले वक्रे मन्दाकिनीकूले गङ्गातटे, महान्तम् आश्रमस्थानं संपाद्य परशुरामपिताभवत् । भवति चात्र श्लोकः ।

[ पृष्ठ ४६ ] अन्त इति—अन्तस्तत्त्वविहीनस्य अज्ञातात्मतत्त्वस्वरूपस्य अज्ञानिनः व्रतपालनपरिश्रमः वृथा विफलो भवति । केन हेतुना व्रतानां पालनं क्रियते तं हेतुमज्ञात्वा व्रताचरणं निष्फलं भवति । स्वभावभीरोः प्रकृत्यैव भयवतः नरस्य आयुधग्रहः शस्त्रग्रहणं वृथा विफलो भवति । स शौर्याय न स्यात् ॥१५४॥

इत्युपासकाध्ययने जमदग्नितपःप्रत्यवसादनो नाम पञ्चमः कल्पः ।

## ६. प्रतिज्ञानिर्वाहसाहसो नाम षष्ठः कल्पः ।

[ पृष्ठ ४६-४८ ] पुनस्ताविति—पुनस्तौ त्रिदशौ देवौ मगधदेशेषु कुशाग्रनगरोपान्तापातिनि, कुशाग्रनगरं राजगृहनगरं तस्य उपान्ते समीपे आपातः अस्तित्वं यस्य तस्मिन् पितृवने श्मशाने कृष्णचतुर्दशीरात्रौ,

निशाप्रतिमाशयवशं सकलायां रात्रौ प्रतिमावज्जिनबिम्बवत् आशयः शरीरममतात्यागाभिप्रायः तस्य वशम् अधीनं रात्रिप्रतिमायोगधारिणम् एकाकिनम् अद्वितीयं जिनदत्ताभिधम् उपासकं श्रावकं विलोक्य साक्षेपं सनिन्दम् "अरे दुराचारस्य आचरणं तत्र मतिर्यस्य तत्संबोधनम्, निराकृते निर्गता आकृतिः शृङ्गारवेषो यस्मात्तस्य संबोधनम्, अज्ञातं परमात्मनः पदं येन तत्संबोधनम्, मनुष्यापसद मनुष्येषु अपसीदति निकृष्टं गच्छतीति मनुष्यापसदः तत्संबोधनं हे नराधम, शीघ्रमिमाम् ऊर्ध्वशोषम् ऊर्ध्वं शुष्यतीति ऊर्ध्वशोषो यथा स्यात्तथा शुष्ककीलकसदृशीं प्रतिमां कायोत्सर्गेणावस्थानं त्यक्त्वा पलायस्व न श्रेयस्करं हितकरं तवात्र श्मशाने अवसरं क्षणं पश्याव: । यस्मादावां हि एतस्या: अस्याः परेतपुरस्य श्मशानस्य भूयस्याः प्रभूतायाः भूमेः पिशाचपरमेश्वरौ स्वः । तस्मात्कारणात् अत्र श्मशाने कालसर्पावलोकनं कृत्वा प्रस्थानेन अवस्थानेन अलम् अस्मात् स्थानादन्यत्र गम्यताम् इति भावः । मा हीति–अतुच्छा विपुलाश्च ताः स्वच्छन्दकेलयः यथा मनोभिलषितक्रीडास्तासां कुतूहलानि कौतुकानि तान्येव बहुलानि अन्तःकरणे मनसि प्रसवानि पुष्पाणि ययोः तयोः आवयोः अन्तरायं मा कार्षीः मा कुरु । इत्युक्तमपि प्रकामप्रणिधानोद्युक्तमवेक्ष्य प्रकामम् अतिशयेन प्रणिधानं ध्यानैकाग्रता तस्मिन् उद्युक्तं तत्परम् अवेक्ष्य (तौ देवौ तस्योपसर्गं प्रत्यूहप्रबन्धैः चक्रतुः) न्यक्षतः सर्वासु दिक्षु । कीनाशेति-कीनाशो यमस्तस्य कासराः महिषास्तेषां निकायः समूहस्तस्य कायाः शरीराणि तद्वत् आकारो येषां ते घोरा भयानकाश्च ते घना मेघास्तेषां घस्मरो भक्षकः भयङ्कर इत्यर्थः । आडम्बरः एकत्रसंनिवेशः तस्य प्रथमं प्रारम्भम् आवहन्ति इति तैः प्रारम्भावहैः । पुनः कथंभूतैः । प्रचण्डेति—तडितः दण्डा इवेति तडिद्दण्डाः प्रचण्डाश्च ते तडिद्दण्डाः भीषणविद्युद्यष्टयः तेषां संघट्टः अन्योन्यसंघर्षणं तस्मात् उच्छलन्त उद्भवन्तश्च ते शब्दाश्च तेषां संदोहः समूहस्तस्माद् दुस्सहैः । निःसीमेति—निःसीमः मर्यादाम् अतिक्रामंश्चासौ समीरश्च वातः तस्य असराला महान्तश्च ते सूत्कारशब्दास्तैः सहासारः मेघानां सततं धारापातस्तेन धवलैः शुभ्रैः । पुनः कथंभूतैः । प्रत्यूहप्रबन्धैः, करालेति—करालाः क्रूराश्च ते वेताला व्यन्तरदेवविशेषास्तेषां कुलं समूहस्तस्य काहलाः वाद्यविशेषास्तेषां कोलाहलाः शब्दास्तैरनुकूलास्तैः अन्यसामान्यैः इतरसदृशैः अन्यैश्च प्रत्यूहप्रबन्धैः विघ्नपरम्पराभिः । कथंभूतैः । परिगृहीतेति—परिगृहीतः अवलम्बितो गृहदाहः गृहस्य आसमन्तात् दाहः अग्निप्रज्वलनम्, बान्धवानां धनानां च विध्वंसानुबन्धस्तैः विनाशप्रबन्धैः विघ्नसमूहैः, सबहुमानैः प्रभूतादरसहितैः तैस्तैर्वरप्रदानैः मनोभिलषितवस्तुदानैश्च । विहितविघ्नौ अपि कृतान्तरायौ कियत्कालं विहितविघ्नौ । निःशेषामप्युषां रात्रेरन्तं यावत्, अध्यात्मेति—आत्मानम् अधिकृत्य वर्तते इति अध्यात्म स चासौ समाधिश्च अध्यात्मसमाधिः अध्यात्मस्वरूपैकाग्रता तस्य निरोधस्तस्मिन् निघ्नौ अधीनौ । कथंभूतं जिनदत्तश्रेष्ठिनं देवौ चालयितुं न शेकतुः । तमिति—एकाग्रभावस्य अभ्यासेन आत्मसात्कृतं निजाधीनं कृतम् अन्तःकरणस्य मनसः, बहिःकरणानां स्पर्शनादीनां च ईहितम् अभिप्रायो येन तम्, शर्मेति—शर्म सुखं तदेव हर्म्यं प्रासादः तस्य निर्माणे रचनायां क्षमा ये कार्मणपरमाणवः तेषां प्रबन्धनात् धर्मध्यानात् प्रबन्धनं यस्माद् भवति तस्मात् धर्मध्यानात् । ( प्रभातसमये देवाभ्यां जिनदत्ताय विद्या दत्तेति वर्णयति ) संजाते च प्रभातसमये सूर्योदयसमये । कथंभूते । खरेति—खरास्तीक्ष्णाः किरणाः रश्मयो यस्य स खरकिरणः सूर्यस्तस्य विरोकाः करास्तेषां निकरः समूहस्तस्मान्निराकृतः अन्धकारस्य उदयः येन तस्मिन्, समुपहृतोपसर्गवर्गौ समुपहृतः अपाकृतः उपसर्गाणाम् उपद्रवाणां वर्गः समूहः याभ्यां तौ पुनः कथंभूतौ, प्रकाशं प्रकट प्रसन्नः सर्गः स्वभावो ययोस्तौ । तैस्तैर्महाभागोचितैः महाभाग्यवतां योग्यैः प्रणयोदितैः प्रेमभाषणैः, तं जिनदत्तम् आश्लाघ्य प्रशस्य, तस्मै विहायोपविहाराय आकाशे विहरणाय, पञ्चत्रिंशद्वर्णां पञ्चत्रिंशदक्षरसहितां विद्यां वितेरतुर्ददतुः । इयं हि यस्मात्कारणात् तव अस्मदनुग्रहात् अस्मन्मनःप्रसादात् अम्बरविहाराय नभोगमनाय असंसाधितापि विधिपूर्वकं विनापि साधिता तव भविष्यति । परं परेषां तु अस्माद्विधेः एतस्मादुपायात् ( वक्ष्यमाणात् ) लभ्येत । ( जिनदत्तोऽपि तां विद्यां प्रतिपद्य वरसेनाय प्रादादिति दर्शयति ) कथंभूतो जिनदत्तः । कुलेति—कुलं जनपदः जनपदविभाजकाः शैलाः कुलशैला उच्यन्ते । तेषां कुलशैलानां शिखण्डानीव मयूरशिखा इव मण्डनभूतानि भूषणभूतानि जिनायतनानि तेषाम् अवलोकने कुतूहलितः कुतूहलं संजातमस्मिन् इति आश्चर्यभूतः आशयोऽभिप्रायो यस्य । पुनः

कथंभूतः समाचरितेति—समाचरितः विहितः अमरानुवर्तनसमयः देवप्रतिपादितसंकेतो येन सः, पुनः कथंभूतः । तां विद्यां प्रतिपद्य अङ्गीकृत्य, हृदयेति—हृदये दर्शनस्य उत्सवाय समानीताः निखिलाः सकलाः अचलाः अकृत्रिमाः चैत्यालयाः येन स जिनदत्तः, तेषाम् अवलोकनस्य प्रेक्षणस्य कौतुकं यस्य तस्मै धरसेनाय, परमेति—परमः उत्कृष्टः निर्दोषः स चासावाप्तश्च तस्य उपासने पटवे निपुणाय पुष्पबटवे तां प्रादात् ददौ । (अमितप्रभः विद्युत्प्रभं वदति) विद्युत्प्रभ, अयं जिनदत्तः अतीव अर्हदभिमतवस्तुपरिणतचित्तः, अर्हतो जिनेन्द्र-भगवतः अभिमतानि मान्यानि यानि वस्तूनि तेषु परिणतचित्तः दृढम् अभिनिविष्टमनाः स्वभावादेव च स्थिरमतिः निश्चलबुद्धिः अशेषोपसर्गसहनप्रकृतिश्च सकलचतुर्विधोपसर्गसहनस्वभावश्च । ततस्मात्कारणात् अत्र जिनदत्ते महदपि अकृतम् अकृत्यं कुलिशे वज्रे घुणकीटचेष्टितमिव काष्ठकृमिव्यापार इव न भवति समर्थम् । अतोऽन्यमेव कंचन अभिनवजिनोपासनायतनचैतन्यम् अभिनवा नूतना या जिनोपासना जिनभक्तिः तस्या आयतनं गृहं चैतन्यं यस्य एतादृशं कंचन जनं निकषावः आवां परीक्षावहे । अन्यं कंचन परीक्षावहे इति विमृश्योच्चलिताभ्यां ताभ्यां पद्मरथो नाम राजा दृष्ट उपसृष्टश्चेति कविर्वर्णयति । कथंभूतः नृपः । मगधमण्डलमण्डनसनाथः मगधदेशभूषणः प्रभुत्वविशिष्टश्च मिथिलापुरीनाथः पद्मरथो नाम नरपतिः ( स च सुधर्माचार्यात् साणुव्रतं सम्यग्दर्शनं बभारेति वर्णयति ) कथंभूतादाचार्यात् । निजेति—निजमिथिलानगरसमीपपर्वते वृत्तो निसर्गरचितो देहः शरीरं यस्याः तस्यां कालाभिधायां गुहायां निवासे प्रोतं चित्तं यस्य तस्मात् । पुनः कथंभूतात् । दीप्तं तपो यस्य दीप्ततप-ऋद्धिधारिणः, पुनः कथंभूतात् ? निःशेषेति—निःशेषाः सकलास्ते च ते अनिमिषा देवास्तेषां परिषत् सभा तया निषेव्यमाणम् आद्रियमाणम् आचरणचातुर्यं यस्य स तस्मात् सुधर्माचार्यात्, तदङ्गेति—तस्य सुधर्माचार्यस्य अङ्गानां हस्तपादमुखाद्यवयवानाम् अद्भुतप्रभायाः विस्मयकारिण्याः कान्तेः प्रभावस्य माहात्म्यस्य दर्शनेन उपशा-न्ताभिप्रायः संजातभक्तितराशयः, अणुव्रताधारं सम्यग्दर्शनम् आदाय गृहीत्वा तस्मिन्नेव दिने सुधर्माचार्योपदेशात् निश्चितेति—निश्चितः अर्हत्परमेश्वरशरीरस्य निरतिशयः तारतम्यरहितः प्रकाशमहिमा कान्तिमाहात्म्यं येन सः, कृतनियमः धृतव्रतप्रतिज्ञः वासुपूज्यभगवन्तं तन्नामकं द्वादशं जिनं वसुपूज्यनृपतिसुतं भगवन्तं पूज्यं केवल-ज्ञानिनम्, कथंभूतम् ? सकलेति—सकलाश्च ते भुवनपतयः इन्द्रधरणेन्द्रचक्रवर्तिनः तैः स्तूयमानाः ईड्यमानाश्च ते गुणगणाः क्षायिकसम्यग्दृष्ट्यादिनवकेवललब्धयस्तेषाम् उदन्तः प्रवृत्तिर्यस्य तम् उपासितुं यष्टुं पूजयितुं प्रतिष्ठमानःप्रयाणं कुर्वन्, प्रमदेति—प्रमदो मोदस्तेन युक्तो नादः प्रमदनादः आनन्दजनकनादेन सुन्दराणां दुन्दुभीनाम् आनकानां रवैः शब्दैः आकारिता आहूता निरवशेषाः निःशेषाः परिजनाः बन्धुभृत्यादयो येन सः, समासजत् इति समासजन्तो संबन्धम् आयान्ती समस्तविष्टपे निखिलभुवने इति समस्तविष्टपविशिष्टदृष्टचेष्टः विशिष्टा अनन्यजनसाधारणा दृष्टा चेष्टा प्रवृत्तिर्यस्य सः । स च दृष्टः कदाचिदपि कस्मिंश्चित्समये क्षुद्रोपद्र-वात् क्षुद्रबाधायाः विप्रलब्धः वञ्चितः, रहितः । (अतो देवाभ्यां महोपद्रवैरुपद्रोतुं प्रारब्धः ।) पुरेति-पुरप्लोषो अग्निना नगरदाहः, अन्तःपुरविध्वंसः अन्तःपुरे निशान्ते स्थितानां राजस्त्रीणां विध्वंसः मृत्यादिना नाशः, वरूथिन्याः सेनायाः मथनं वधबन्धनादिकम्, प्रसभस्तीव्रः स चासौ प्रभञ्जनश्च वायुस्तेन ऊर्जितः प्रबलश्चासौ पर्जन्यः जलवृष्टिः, परुषाः कठोराः वर्षोपलाः करकाः आसारः जलधारासंपातः, आदीनां वसतिर्निवासो यासु ताभिः, दुर्दमाः दुःखेन दमो वशीकरणं येषां ते च ते शार्दूला व्याघ्रास्तेषाम् उत्तराकृतयः ताभिः विकृतिभिः उत्तरविक्रियाभिरित्यर्थः । उपद्रोतुं पीडयितुं प्रारब्धो नृपः । तथापि अविचलितं निर्भयं चेतो मनो यस्य तम् अवसाय ज्ञात्वा, सनरवरं सनृपं कुञ्जरं करिणं मायामयप्रतिघे, मायामयः प्रतिघः क्रोधो विघ्नं वा यस्मिन्, अस्ताघे अस्तं नष्टम् अघं गाधं यस्मात् तस्मिन्, व्याप्ता निरुद्धाः अखिलाः दिशः आरामा उपवनानि, तेषां संगमो यस्मिन्, एतादृशे कर्दमे पङ्के निमज्जयद्भ्यां निमज्जनं कारयद्भ्यां ताभ्यां देवाभ्याम् । नभ इति—सुरा देवाः असुरा भवनत्रिकवासिनो देवाश्च तैः कृताः ये उपसर्गा उपद्रवास्तेषां संगस्य संबन्धस्य सूदनं विनाशस्तस्य अभिधानमात्रं शब्दमात्रं स एव मन्त्रः तस्य माहात्म्यं प्रभावस्तस्य साम्राज्यं यस्य तस्मै "श्रीवासु-पूज्याय नमः" इति एवं तत्र कर्दमे निमज्जतः बुडतः भूभृतो भुवं बिभर्ति इति भूभृत् तस्य नृपस्य वचनम् आकर्ण्य । तदिति—तस्य नृपस्य धैर्योत्कर्षात् उन्मिषंश्चासौ तोषश्च प्रादुर्भवदानन्दः मनीषा च बुद्धिस्तयोः

प्रसरः ययोः ताभ्यां देवाभ्याम्। पुनः कथंभूताभ्याम् ? लघ्विति—लघु झटिति परिमुषितः विनाशितः अशेषाः सकलाः विघ्नाः तेषां व्यतिकरः प्रसंगः याभ्याम्। पुनः कथंभूताभ्याम्। आचरितेति—कृतादराभ्याम्। ( देवाभ्यां वक्ष्यमाणं वचनम् उक्त्वा ततः प्रास्थायि ) अहो राजन् नूतनस्य सम्यग्दर्शनमणेः अच्छस्य निर्मल-सदनमार्ग पद्मरथ, नैतदाश्चर्यम् अत्र यद्यस्मात्कारणात् संधाः प्रतिज्ञा सत्त्वं धैर्यं ताभ्यां युक्तेषु असदृशेषु अनुपमेषु भवादृशेषु अखिलैरपि लोकैः क्रियमाणाः न प्रभवन्ति क्षमा न भवन्ति प्रसभप्रसवाः तीव्रोत्पत्तयः क्षुद्रो-पद्रवाः। यतः। एकापीति—इयम् एकापि जिनभक्तिः कृतिनः कृतं प्रशस्तं कर्म अस्यास्तीति कृती तस्य कृतिनः निपुणस्य पण्डितस्य, दुर्गतिं निवारयितुं समर्था, पुण्यानि च पूरयितुं संचेतुं समर्था कुशला। मुक्तिश्रियं च दातुं समर्था दक्षा ॥१५५॥

[ पृष्ठ ४९ ] इति निगोर्य उक्त्वा, जिनमताराधनाधीने भवद्वंशे सर्वरोगापनोदं कुर्वन्नयं हारः, सकलशत्रुसंततिं च्छेत्तुं योग्यं चैतदातोद्यं वाद्यं च प्रेषणं सेवां करिष्यतीति कृतसंकथाभ्यां कृतसंभाषणाभ्यां ताभ्याम् अभीष्टस्थानं प्रास्थायि अगम्यत। त्रिदशेश्वरेति—त्रिदशानां तृतीया यौवनाख्या दशा येषां ते त्रिदशा देवाः तेषाम् ईश्वरः त्रिदशेश्वरः तस्य वदनान्मुखात् जृम्भमाणा वर्द्धमाना गुणानां संकथा स्तुतिर्यस्य स पद्मरथोऽपि तत्तीर्थंकृतो वासुपूज्यस्य गणधरपदाधिकारी भूत्वा कृत्वा चात्मानम् अनूनं पूर्णं च तद्रत्नत्रयं सद्दृष्टिज्ञानवृत्तानि तत्तन्त्रं तदधीनं मोक्षामृतपात्रम् अजायत। भवति चात्र श्लोकः—उररीकृतेति—उररीकृते स्वीकारिते च ते निर्वाहसाहसे तयोर्विषये उचितं चेतः येषाम् ते उररीकृतनिर्वाहसाहसोचितचेतसः तेषाम्। प्रारब्धस्यान्तगमनं निर्वाहः, धैर्येण यत् क्रियते कार्यं तत्साहसमिति। निर्वाहसाहसगुणधारिणाम् इहपरलोकौ कामदुघौ इष्टदानदक्षौ स्याताम्। कीर्तिश्च कामधुग् भवति। तेषां नराणां जगत्त्रयमेतत् अल्पं प्रतिभाति। "कीर्तेश्चाल्यं जगत्त्रयम्" इत्यपि पाठः। कीर्तेः एतत् जगत्त्रयं चाल्यं चालयितुं योग्यं भवति इति भावः।

इत्युपासकाध्ययने जिनदत्तस्य पद्मरथपृथ्वीनाथस्य च प्रतिज्ञानिर्वाहसाहसो नाम षष्ठः कल्पः।

## ७. निःशङ्कितत्वप्रकाशनो नाम सप्तमः कल्पः।

[ पृष्ठ ४९ ] इतश्च संगमितसकलोपकरणसेनः संगमिता एकत्रीकृता सकलानाम् उपकरणानां साधनानां सेना समूहो येन सः धरसेनोऽपि, अतुच्छेति—अतुच्छा विपुला भूरुहच्छाया वृक्षानातपः तेन अवन्ध्ये सफले आनन्दप्रदे पर्वदिवसेति चतुर्दशीरात्रिमध्ये सर्वतः सर्वदिग्भ्यः। यातुधानेति—यातुधाना रक्षांसि तेषां धावनं प्रवर्धते यासु तासु श्मशानभूमिषु। प्रवर्तितेति—प्रवर्तितं संपादितं तदाराधनोचितमण्डलं येन, न्यक्षासु सर्वासु दिक्षु दिशासु, निक्षिप्तरक्षाबलः स्थापितरक्षामण्डलः अवगणः एककः, कृतसकलीकरणः कृत-दिग्बन्धनाङ्गशुद्ध्यादिकार्यः भागधेयोविधानसमये बल्यर्पणसमये वटविटपाग्रे वटवृक्षशाखाग्रे पतिंवरेति—पतिंवरा कन्या तया निजकरेण कर्तितानि यानि सूत्राणि तन्तवः तेषां सहस्रं तेन संपादितं रचितम्। पुनः कथंभूतं सिक्यम्। आत्मेति—आत्मासनं निजोपवेशनं तेन समानं सदृशं यत् अन्तरालं मध्ये स्थानं तत्र उचितं योग्यम् सिक्यं निबध्य, अन्तरिति—अन्तः मनसि यो जल्पः पठनं तेन संकल्पितानि विमृशितानि मन्त्रवाक्यानि येन सः, पुनः कथंभूतो धरसेनः। प्रबन्धनात् सिक्यादधस्तात् ऊर्ध्वेति—ऊर्ध्वमुखानि उपरि वदनानि कृत्वा विन्यस्तानि स्थापितनि निशितानि तीक्ष्णानि अशेषशस्त्राणि सकलप्रहरणानि येन सः। पुनः कथंभूतः। बहिरिति—बहिर्मण्डलाद्बाह्ये निवेशिताः स्थापिता अष्टविधाः इष्टिसिद्धयः पूजासिद्धयो येन सः, अमुना प्रकारेण स धरसेनः यथाशास्त्रं मन्त्रशास्त्रमनुसृत्य तद्विद्याराधनसमृद्धिः सा चासौ विद्या च तद्विद्या आकाशविहारविद्या तस्या आराधने समृद्धबुद्धिः परिपूर्णमतिर्बभूव। सन्नद्धो जज्ञे इति भावः। अत्रान्तरे एत-स्मिन् प्रस्तावे कथान्तरं वर्तते। तद्यथा—

[पृष्ठ ५०–५२] अञ्जनसुन्दर्याञ्जनचौरः किलैवमुक्तः—निष्कारणेति निष्कारणं विना हेतुं कलिं करोतीति कलिकारिणी कलहं कुर्वन्ती या अञ्जनसुन्दरी नाम वेश्या तया स अञ्जनचौर एवं भाषितः।

कस्मिन्समये भाषितः । निशीथेति—निशीथो अर्धरात्रः तस्य पथवर्ति मार्गवर्ति वीक्षणं यत्र तस्मिन् क्षपाक्षणे निशासमये । अञ्जनचोरः कस्य सुतः । विजितेति—मध्यदेशे प्रसिद्धविजयपुरस्वामिनः, कथंभूतस्य । सुन्दरीमहादेव्या विलासी पतिः तस्य, स्वकीयेति–स्वकीयो निजः स चासौ प्रतापो विक्रमः स एव बहुलवाहनोऽग्निः तस्मिन् आहुतीकृता प्रक्षिप्ता अरातीनां शत्रूणां समितिः समूहो येन तस्य, अरिमन्थमहीपतेः ललितो नाम सुतः पुत्रः, पुनः कथंभूतः । समस्तेति—सकलद्यूतादिव्यसनसप्तकलम्पटत्वात् दायादाः सपिण्डाः ते च ते क्रव्यादा राक्षसास्तैः संपादितः साम्राज्यपदे अपायो यस्य सः । परम् उपायं परां गतिम् अवीक्षमाणः । अदृश्येति–अदृश्यो येन अक्तेन नरो भवति तदञ्जनम् अदृश्याञ्जनमुच्यते तेन अदृश्याञ्जनेन आवर्जिता लब्धा ऊर्जिता बलवती उन्नतिं प्राप्ता प्रज्ञा मतिर्यस्य सः । प्रतीतेति—प्रसिद्धाञ्जनचोरापरनामा किलैवम् अञ्जनसुन्दर्या भाषितः—कुशाग्रपुरेति—कुशाग्रपुरं राजगृहं तस्य परमेश्वरस्य स्वामिनो या अग्रमहिषी प्रधानराज्ञी स्ताविषी नाम तस्याः सौभाग्यरत्नाकरं नाम कण्ठालङ्कारं ग्रीवाभूषणं यदि चेत् आनीय मह्यं प्रयच्छसि तदा त्वं मे कान्तः प्रियः, अन्यथा नो चेत् प्रणयान्तः प्रीतिविनाशः स्यादिति । सोऽपि कियद्गहनमेतत् । न किमपि कठिनम् इत्युदाहृत्य उक्त्वा प्रियतमाया वल्लभतमाया मनोरथम् अभिलाषम् अन्वर्थकं सफलं चिकीर्षुः कर्तुमिच्छुः । निजेति—निजा चासौ छाया प्रतिबिम्बं तस्या अदृश्यताकरणं शीलं यस्य तत्कज्जलं बहुलं यत्र तथावस्थितं लोचनयोर्नेत्रयोर्युगलं युगं विधाय कृत्वा, प्रयाय च गत्वा च तन्महीश्वरगृहम् तन्नृपतिप्रासादम् । गृहीतेति—मुषिततद्भूषणः। तत्प्रभेति—तत्कान्तिप्रसरणेन अवगतपदसंचारः, शब्दैः शस्त्रैश्च उत्तालं वाचालम् आननं कराश्च येषां तैः तलवरस्य कोट्टपालस्य अनुचरैः किङ्करैः अभियुक्तो अभिद्रुतः । निस्तरीतुं तान् वञ्चयित्वा गन्तुम् अक्षमः, परित्यज्य तद्रत्नाभरणम् इतस्ततो नगरबाह्ये प्रदेशे विहरन्, प्रदीपेति—प्रदीपकान्तिवशात् अधःस्थापितास्त्ररचनाभीतेः पुनः पुनः उत्तरणावतरणे आवहतीति तादृशा देहेन खिन्नं धरसेनं वीक्ष्य, गत्वा च तं देशम् एवं निर्दिदेश अकथयत् । अहो प्रलयेति—कल्पान्तकालतमोव्याप्तायाम् अस्यां वेलायां समयेऽस्मिन् महासाहसिकवृषन् महासाहसं कुर्वत्सु वृषन् प्रधान, दुष्कर्मकारिन्, कठिनकार्यकारिन्, को नाम भवान् । धरसेनः–कल्याणमित्र महाभाग्ययुक्तं वृत्तं चारित्रं यस्य तस्य जिनदत्तस्य विदितः पुष्पबटुरिति नियोगस्य संबन्धो यत्र, पूजासमये पुष्पानयनकार्ये नियुक्तिसंबन्धो यस्य सोऽहम् एतदुपदेशात् आकाशविहारव्यवहारे निषद्या प्रवृत्तिर्यस्याः तां विद्यां साधयितुमिच्छन् अत्र अयासिषम्—अहम् आगतः । अञ्जनचौरः—कथमियं साध्यते । धरसेनः—कथयामि । पूजोपचारनिषेक्ये शिक्ये पूजोपचारस्य गन्धाक्षतादेः निषेकस्य क्षेपणस्य योग्ये अस्मिन् शिक्ये निःशङ्कं निर्भयम् उपविश्य इमां विद्याम् अकुण्ठकण्ठम् अविरामं कण्ठेन पठन्, एकैकं धारप्रवेकं शिक्यकदर्भग्रथितसूत्रं स्वच्छधीः निर्मलमतिः छिन्द्यात् । अवसाने गगनगमनेन युज्यते । यद्येवम् अपसर अपसर एतत्कार्यात् विरम विरम । त्वं हि तलोन्मुखेति—तले भूमितले उपरि अग्राणि कृत्वा विन्यस्ततीक्ष्णशस्त्रावलोकनजातभीतबुद्धिः न खलु विद्यां साधयितुं समर्थो भवसि । यतो यज्ञोपवीतदर्शनेन धनसंपादनकृतार्थः धनार्जनकार्ये त्वं समर्थः । तस्मात् कारणात् भाषस्व मे यथार्थोपायमनोरमां विद्याम् । साधयामि एनाम् । ततस्तेनेति—आत्महिताय अरोचमाणेन पुष्पबटुना सम्यग् उपायैः सह दत्तविद्यः सम्यग्ज्ञातज्ञातव्यः, संपत्त्या सम्यग्ज्ञानेन, निकटमुक्तिगृहः अञ्जनचौरः (एवं निश्चितवान्) स्वप्नेऽपि अन्यप्रतारणाचारपरावृत्तमनाः जिनदत्तः, स खलु महताम् अपि महान्, आदरणीयानामपि आदरणीयः, स्वीकृतश्रावकव्रतपालनतत्परः, प्राणिमात्रस्यापि नान्यथा चिन्तयति, किं पुनः विहितप्रीतेः पुत्रसाधारणतया पालितस्य धरसेनस्य अस्य अन्यथा चिन्तयेत् । इति निश्चित्य उपविश्य च सोत्कण्ठं शिक्ये । निःशङ्केति—निःसंशयमतिः स्वकीयेति—निजसाहसोद्योगप्रमोदितसुरासुरसमूहः युगपदेव तद्दर्भसूत्रसमूहं छिनत्ति स्म, आससादेति—संप्राप च नभश्चरपदम् । पुनर्यत्र जिनदत्तस्तत्र मे गतिर्भूयादिति कृताभिलाषः, काञ्चनाचलेति—सुवर्णपर्वततटनिवासिनि सौमनसवनशालिनि जिनगृहे जिनदत्तस्य धर्मश्रवणकृतः गुरुदेवाभिधस्य भगवतः पूज्यस्य सन्निधौ तपो गृहीत्वा अञ्जनचौरो मुक्तो बभूव । कथंभूतः सः । विज्ञातसकलाप्तोपदेशस्वरूपः ऐतिह्यं नाम आप्तोपदेशः जिनागमः । हिमवदिति—हिमवत्पर्वतशिखरे प्रादुर्भूतकेवलबोधः । कैलासेति—कैलासकेसरवनगतः मुक्तिरमासमागमासक्तभोगगृहं बभूव । भवति चात्र श्लोकः—क्षत्रपुत्रेति—

अक्षविक्षिप्तः इन्द्रियविषयलम्पटः, शिक्षितेति—अधीतादृश्यकज्जलविद्यः, क्षत्रपुत्रः राजपुत्रः निशङ्कः निर्भयः संदेहरहितदृढसम्यग्दर्शनः अञ्जनचोरः अन्तरिक्षगतिं नभोगमनं प्राप ॥ १५७ ॥

इत्युपासकाध्ययने निःशङ्कितत्त्वप्रकाशनो नाम सप्तमः कल्पः ॥७॥

## ८. निष्काङ्क्षिततत्त्वावेक्षणो नामाऽष्टमः कल्पः ।

[पृष्ठ ५२-५४] ( निष्कांक्षिताङ्गलक्षणम् ) स्यामिति—यदि सम्यग्दर्शनस्य माहात्म्यं प्रभावो विद्येत तर्हि अहं देवः स्यां भवेयम् । यक्षः स्यां भवेयं वा वसुमत्याः पृथ्व्याः पतिर्नृपो भवेयम् इतीच्छां वर्जयेत् ॥१५८॥ उदश्विता तक्रेण माणिक्यं यथा भवजैः सांसारिकैः सुखैः सम्यक्त्वस्य विक्रयं कुर्वाणः नरः केवलं स्वस्य वञ्चकः प्रतारकः भवेत् ॥१५९॥ यस्य चित्ते मनसि चिन्तामणिः, यस्य हस्ते सुरद्रुमः कल्पतरुः । यस्य धने कामधेनुस्तस्य कः याचनाक्रमः । सम्यक्त्वं खलु चिन्तामणिः, कल्पतरुकामधेनुसमं विद्यते अतः विनापि प्रार्थनां सर्वं सम्यग्दृष्टिर्लभते इति ज्ञात्वा तेन इच्छा त्याज्येति तात्पर्यम् ॥१६०॥ उचिते स्थानके धर्मलक्षणे यस्य मनोवृत्तिः अनाकुला भवजसुखेषु च निःस्पृहा विद्यते तस्य सा स्थानके स्थितेति उच्यते अनाकुलं सम्यग्दृष्टिजनं प्रति समुद्रं नद्य इव श्रियः स्वयमायान्ति॥१६१॥तदिति—मिथ्यादर्शनोदयान्मनस्युद्भूताम् । इह परलोके च समुद्भूतां त्रिविधाम् आकाङ्क्षां देवयक्षराजोद्भवाम् । सम्यग्दर्शननिर्मलतायै परित्यजेत् ॥१६२॥ श्रूयतामत्रोपाख्यानम्—अत्र निष्कांक्षिताङ्गे उपाख्यानं सम्यग्दृष्टिकथा आकर्ण्यताम् । अङ्गमण्डलेषु अङ्गाख्यदेशेषु, चम्पायां पुरि नगर्यां कथंभूतायाम् । समस्तेति—समस्ताश्च ते सपत्नाः शत्रवस्तेषां समरो युद्धं तस्य समारम्भे प्रारम्भे जाते सति निष्प्रकम्पायां वेपथुरहितायाम् निर्भयायाम्, वस्विति—वसुवर्धन इति उचितम् अन्वर्थं नाम यस्य तस्य वसुधापतेः वसु धनं रत्नादिनिधानं तद्दधातीति वसुधा तस्याः पतिर्वसुधापतिर्नृपस्तस्य, पुनः कथंभूतस्य । लक्ष्मीति—लक्ष्मीमतिमहाराज्ञी नामधेया तस्याः दयितस्य वल्लभस्य, प्रियदत्तनामा श्रेष्ठी आसीत् । कथंभूतः । निरवशेषेति—निरवशेषाः सकलाः ते च वैदेहका वैश्याः तेषु वरिष्ठः श्रेष्ठः, ( स अङ्गवतीनाम्ना पत्न्या सह जिनालयं यियासुः अनङ्गमतिमेवम् अपृच्छत् । ) अङ्गवतीनाम्ना पत्न्या सह कथंभूतया । गृहेति—गृहलक्ष्म्याः सपत्नी तया, पुनः कथंभूतया । सकलेति—समस्तस्त्रीगुणगृहभूतया, अह्नाय शीघ्रम् । प्राह्णे पूर्वाह्णे । अष्टाहीति—अष्टानाम् अह्नां समाहारः अष्टाह्नी तस्याम् क्रियाणां पूजाभिषेकधर्मोपदेशादिकानां करणाय। अभ्रेति—अभ्राणि कषन्ति इति अभ्रङ्कषाणि मेघस्पर्शीनि तानि च तानि कूटानि च शिखराणि तेषां कोटयोऽग्राणि तेषु घटिताः स्थापिता याः पताकाः क्षुद्रध्वजाः, तासां पटानां वस्त्राणां प्रतानाञ्चला विस्तृता अञ्चलाः वस्त्रान्तास्तेषां जालाः समूहाः तैः स्खलितं प्रतिहतं निलिम्पानां देवानां विमानवलयं येन तत् सहस्रकूटचैत्यालयं यियासुः गन्तुमिच्छुकः । स्वकीयसुतावयस्यां निजपुत्रीसखीम् अनङ्गमतिम् एवम् अपृच्छत् अब्रवीत् । वत्सेति, अभिनवेति च बाले अभिनवानि नूतनानि विवाहभूषणानि तैः सुभगौ सुन्दरौ हस्तौ यस्यास्तत्संबोधनम्, क्वास्ते कुत्र तिष्ठति । समुल्लिखितेति—समुल्लिखितं प्रोज्झितं लाञ्छनं यस्मात् स चासौ इन्दुश्चन्द्रस्तद्वदिव सुन्दरं मुखं यस्याः सा प्रियसखी वल्लभाली तव अतीव केलिशीलप्रकृतिः क्रीडापरायणा प्रकृतिः स्वभावो यस्याः सा अनन्तमतिः । अनङ्गमतिः—तात, वणिगिति—वणिक्षु वैश्येषु वृन्दारको मुख्यस्तस्य दारिका कन्या तया उद्गीयमानम् उच्चैरुच्यमानं मङ्गलं यदर्थं सा, कृत्रिमपुत्रकरूपो वरस्तस्य व्याजेन निमित्तेन । आत्मेति—आत्मनः स्वस्य परिणयस्य विवाहस्य आचरणं विधानं तस्य परिणामेनाभिप्रायेण पेशला सुन्दरा । पञ्जरेति—पञ्जरेषु आस्थिताः अध्युषिता ये शुकास्सारिकाश्च तेषां वदनशब्दा एव वाद्यानि तैः सुन्दरे मनोहरे वासावासपरिसरे निवासगृहप्राङ्गणे समास्ते तिष्ठति । समाहूयतामितः, यथादिशति तातः । प्रियदत्तश्रेष्ठी—वृद्धभावात् परिहासो नर्म तद्विषयकः आलापः भाषणं तत्र परमेष्ठी चतुरः, समागतां सुतामवलोक्य पुत्रि, तव हृदये सम्प्रत्येव अधुनैव मन्मथपथाः काममार्गाः, परिणयनमनोरथाः विवाहाभिलाषाः । कथंभूते हृदये । निसर्गेति—निसर्गेण प्रकृत्या विलासः वल्लभावलोकनम् तस्य रसेन शृङ्गारेण

उत्तरङ्गा उच्छलन्तः ये अपाङ्गाः कटाक्षाः तैः अपहसितं च तदमृतं तस्य सरणिर्मार्गस्तस्य विषयस्तस्मिन्, सदा पाञ्चालिका कृत्रिमपुत्रिका तया सह केलिः क्रीडा तस्यां किल रतं हृदयं तस्मिन् । तद्गृह्यतां तावत् सकलव्रतेषु ऐश्वर्येण प्रभावेण वर्यं। श्रेष्ठं ब्रह्मचर्यम् । अत्र अस्मिन् व्रते, भगवान् पूज्यः । अशेषेति—सकलागमप्रकाशनाभिप्रायभूरिः धर्मकीर्तिसूरिः । अनन्तमतिः—तात नितान्तं सर्वथा गृहीतवत्यस्मि एतद्ब्रह्मचर्यव्रतम् । न केवलमत्र विषये मे भगवानेव साक्षी, किंतु भवान् अम्बा च माता च। अन्यदा तु–उद्भिन्ने इति—स्तनकुड्मले कुचकोशे उद्भिन्ने सति उन्मीलिते सति, विलासालसे हास्ये स्फुटरसे विलासेन अलसे सुन्दरे हास्ये स्फुटरसे प्रीत्युत्पादके सति, वचःप्रक्रमे वचनस्य प्रक्रमे प्रारम्भे किंचित् ईषत् कम्पितं वेपितं तदेव कैतवं निमित्तं यत्र तदधरदलं प्रायो यत्र, नेत्राश्रिते विभ्रमे कटाक्षसंचारे, कन्दर्पस्य मदनस्य अभिभवकारकं यदस्त्रं तस्य वृत्तिः स्वभावस्तद्वच्चतुरे कुशले । मध्यस्य यौवनस्य गौरवगुणं महत्त्वगुणं प्रादायेव गृहीत्वेव नितम्बे श्रोण्यां वृद्धे सति पीवरायां जातायाम् ॥१६३॥

[ पृष्ठ ५५-५७ ] कथंभूते वसन्तसमयावसरे समायाते। मुहुरिति—मुहुर्वारं वारं उत्पथे उन्मार्गे यत् प्रयाणं गमनं येन स चासौ मन्मथः स्मरस्तेन उन्माथो विभ्रमस्तेन मन्थरं चञ्चलं समस्तसत्त्वानां प्राणिनां स्वान्तं हृदयं यत्र । सद्यः प्रसूतेति—सद्यः प्रसूताः नूतनोत्पन्ना ये सहकाराङ्कुराः आम्रमञ्जर्यः तेषां कवलनेन भक्षणेन कषायकण्ठा यासां ताः कोकिलकामिन्यस्तासां कुहारावाः कुहकुहेति ध्वनयः तैः असरालितः प्रसारितः मनसि जायते इति मनोजः मदनस्तस्य विजयो यत्र । मलयाचलेति—मलयाचलस्य मेखला तटः तत्र निलीनानि प्रविष्टानि यानि किन्नरमिथुनानि किन्नरदेवदेवीयुगलानि तेषां मोहनं संभोगस्तस्मादुद्भूतः आमोदः अतिनिर्हारी गन्धस्तेन मेदुरः परिपूर्णः परि आसमन्ततः सरन् गच्छन् यः समीरस्तस्य समुन्नय उन्नतिर्यत्र। विकसदिति—विकसन्तः प्रस्फुटन्तः कोशाः कलिकाः येषां तानि कुरबकप्रसवानि अरुणानि पुष्पाणि तेषां परिमलस्य पाने लुब्धा या मधुकर्यः भ्रमर्यस्तासां निकरो वृन्दं तस्य झङ्कारो गुञ्जारवस्तस्य सारप्रसर उत्तमं प्रसरणं यत्र, तस्मिन् वसन्तसमयप्रसंगे प्राप्ते, ('आन्दोलनक्रीडायै उपवनं गतां तामनन्तमतिं कुण्डलमण्डितो नभश्चरपतिर्दृष्टवान्' इति वर्णयति कविः ) कथंभूता सानन्तमतिः। प्रसरदिति—प्रसरन् प्रादुर्भवन् स्मरविकारो यस्यां सा । पुनः कथंभूता । स्मरेति—स्मरेण मन्मथेन स्खलन्ती मतिर्गतिश्च यस्याः सा अनन्तमतिः सह सहचरीसमूहेन सह वयस्याजनेन मदनोत्सवदिवसे दोलेति—दोलया आन्दोलनं वारं वारं इतश्चेतश्चलनं तत्र लालसं सोत्कं मानसं यस्याः सा। पुनः कथंभूता सा । स्वकीयेति—स्वकीयं निजं च तत् रूपं तस्यातिशयः उत्कर्षः स एव संपत् तया तिरस्कृतः सकलानां भवनस्थितानाम् अङ्गनानां नारीणाम् अङ्गविलासो यया सा। कथंभूतेन कुण्डलमण्डितेन दृष्टा सा । सुकेशीति–सुकेश्यभिधया प्रियतमया भार्यया अनुगतेन, पुनः कथंभूतेन । कृतेति—कृतं विहितं कामचारप्रचारे यथेष्टसंचारे चेतो मनो येन तेन, पुनः कथंभूतेन पूर्वापरेति—पूर्वापरौ पूर्वपश्चिमौ च तौ अकूपारौ च समुद्रौ तत्र या पालिन्द्रीसुन्दरी पालिन्द्री वेला एव सुन्दरी स्त्री तया सहितम् उत्सङ्गं तटं तया सनाथं धरतीति तस्य। विजयेति—विजयार्धश्चासौ अवनीं पृथ्वीं धरतीति विजयार्धावनीधरस्तस्य । विद्येति—विद्याः प्रज्ञप्त्यादिविद्याः धरन्तीति विद्याधराः नभश्चरास्तेषां विनोदरूपाः पादपा वृक्षास्तेषाम् उत्पादे उत्पत्तौ क्षोणिः भूमिस्तस्यां दक्षिणश्रेण्यां दक्षिणपङ्क्तौ, किन्नरेति—किन्नरगीतनामनगरस्य पुरस्य इन्द्रेण स्वामिना कुण्डलमण्डितनाम्ना अम्बरचरेण अम्बरे आकाशे चरतीति अम्बरचरस्तेन विद्याधरेण नभोविहारिणा निचायिता दृष्टा । शृङ्गारेति—नूनं सत्यम्, आत्मभुवा विधिना इयं बाला जगत्त्रयवशीकरणाय लोकत्रयं स्ववशे विधातुं प्रयत्नात् सृष्टा निर्मितेति । कानादाय निर्मितेति व्याचष्टे—शृङ्गारेति—शृङ्गारस्य सारम्, अमृतद्युतिं सुधाजलम्, इन्दुकान्तिं चन्द्रप्रभाम्, इन्दीवरद्युतिं नीलकमलस्य कान्तिम्, सर्वान् अनङ्गशरान् मदनस्य कुसुमबाणान् आदाय गृहीत्वा ॥१६४॥ इति विचिन्त्याभिलषिता च । ततस्ताम् अपजिहीर्षुधिषणेन अपहरणकरणेच्छामतिना, मुहुर्निवृत्य पुनः परावृत्य । निर्वर्तितेति—निर्वर्तितः कृतः निजे निलये गृहे सुकेश्या निजपत्न्याः निवेशः स्थितिर्येन, प्रत्यागत्य पुनरागम्य अपहृत्य ताम् अनन्तमतिं हृत्वा च, पुनर्नभश्चरपुरं प्रत्यनुसरता प्रत्यनुगच्छता गगनमार्गात् आकाशपथात् । प्रतीति—प्रतिनिवृत्ता परावृत्य आगता कुपिता च सा सुकेशी

निजभार्या तस्या वर्णनात् । शङ्किताशयेन शङ्कितः भीतः अभिप्रायः यस्य तेन । तत्कायेति—तस्याः अनन्तमत्याः काये शरीरे संक्रमिता प्रवेशिता अवलोकिनी च पर्णलघुविद्या च तयोर्द्वयेन युगलेन शङ्खपुरस्य अभ्यर्णं समीपं भजतीति अभ्यर्णभाक् तस्मिन्, भीमवननामनि कानने वने मुक्ता त्यक्ता । तत्र च मृगयेति—मृगया आखेटं तस्य प्रध्वंसनमभिलषणं तदर्थं समागतेन भीमनाम्ना किरातराजेन अवलोकिता, कथंभूतेन । किरातेति—किरातानां भिल्लानां राजा किरातराजः तस्य लक्ष्मीस्तस्य सीम्ना मर्यादाभूतेन अवलोकिता नीता च पल्लिं शबरग्रामम् । उपान्तेति—उपान्ते समीपे प्रकीर्णानाम् इतस्ततः विकीर्णानाम् इङ्गुदीफलानां तापसतरुफलानां छल्लयस्त्वचो यत्र ताम् । एतदिति—एतस्या अनन्तमते रूपदर्शनेन दीप्तौ प्रज्वलितौ मदमदनौ यस्य स तेन । स्वतः परतश्च तैस्तैरुपायैः निजसंभोगसहायैः प्रार्थितापि याचितापि अनुत्पन्नकामा हठाद् बलात्कारेण कृतः कठोरः कामोपक्रमो येन । तदिति—तस्याः परिगृहीतानां स्वीकृतानां व्रतानां स्थैर्यं स्थिरत्वं तस्मात् आश्चर्यिता विस्मिताश्च ताः कान्तारदेवताः वनदेवतास्ताभिः कृतात्प्रातिहार्यात् माहात्म्यात् पर्याप्तः सकलः पक्वणः शबरालयस्तस्य प्लोषेण ज्वलनेन । मृत्युरिति—मृत्युर्मरणं हेतुर्यस्य मृत्युहेतुकः स चासौ आतङ्कश्च रोगः स एव पावकोऽग्निस्तेन पच्यमानं विक्लिद्यमानं शरीरं देहो यस्य तेन किरातराजेन, 'मातः, क्षमस्व एकमिममपराधम् ।' इत्यभिधाय इत्युक्त्वा, वनेचरेति—वनेचराणां शबराणाम् उपचारः प्रेम तेनोपचीयमाना सहचरीचित्तानां सखीमनसाम् उत्कण्ठा यत्र तस्य शङ्खपुरस्य पर्यन्तः सीमारूपः पर्वतः तस्य उपकण्ठे समीपे परिहृता त्यक्ता । तदिति—तस्य समीपे समावासितोऽध्युषितः स चासौ सार्थो वणिक्समूहस्तस्य अनीकेन सैनिकेन वणिजां पतिर्वणिक्पतिर्वणिक्स्वामी, तस्य पाकेन पुत्रेण पुष्पकनाम्ना अवलोकिता दृष्टा सती, तेन स्त्रीकृता च । तेन तेन चार्थेन धनादिना स्वस्य वशम् आनेतुम् असमर्थेन कोशलदेशस्य मध्ये वर्तमानायाम् अयोध्यायां पुरि व्यालिकाभिधानकामपल्लवकन्दल्याः शम्फल्याः समर्पिता । व्यालिका नाम मदनकिसलयानाम् अङ्कुररूपायाः शम्फल्याः कुट्टिन्याः दत्ता । तयापि मदनः कामः मदो दर्पस्तयोः संपादने आवसथाभिः गृहवदाश्रयरूपाभिः कथाभिः क्षोभयितुमशक्यायाः तद्राजधानीविनिवेशस्य सा चासौ राजधानी च तद्राजधानी सैव विनिवेशो यस्य तस्य सिंहमहीशस्य उपायनीकृता प्राभृतीकृता । तेनाप्यलब्धतन्मनःप्रवेशेन तेन सिंहमहीशेन अपि अलब्धः अप्राप्तः तस्या मनसि प्रवेशो येन तेन । विलक्षितेति—विशेषेण लक्षितः आक्षिप्तः गृहीतः दुरभिसंधिः दुष्टोऽभिप्रायो येन, तत्कन्येति—सा चासौ कन्या च तत्कन्या तस्याः पुण्यप्रभावेण प्रेरिताः पुरदेवतास्ताभिः आपादितः अन्तःपुरस्य पुरीपरिजनस्य च अपकारविधिर्यस्य तेन, साधु संबोध्य उपदिश्य नियमेति—इदं हिंसादिकं पापम् अहं न सेविष्ये इति अभिप्रायो नियमः तस्मिन् समाहितम् एकाग्रभावं नीतं यद्धृदयं तस्य चेष्टा यस्याः सा अनन्तमतिः तेन सिंहमहीशेन विसृष्टा त्यक्ता । (सा अनन्तमतिश्चैत्यालयं गत्वा तत्र न्यवसत् ।) सुदेवीनामधेयायाः जनकस्य स्वसुः पत्युश्च जिनेन्द्रदत्तस्य उदवसितसमीपवर्तिनं गृहस्य संनिधौ स्थितं विरतिचैत्यालयं विरतयः आर्यिकाः यत्र निवसन्ति तच्चैत्यालयं जिनमन्दिरम् अवाप्य, कथंभूतस्य जिनेन्द्रदत्तस्य । गृहीतेति—गृहीतं नाम, वृत्तं च चारित्रं येन तथाभूतस्य अर्हद्दत्तस्य पितुः । तत्र विरतिचैत्यालये निवसन्ती वासं कुर्वती । यमेति—हिंसादेर्यावज्जीवस्त्यागो यमः परिमितकालस्त्यागो नियमः उपवासश्च चतुर्विधाहारत्यागः ते पूर्वं येभ्यस्तैर्विधिभिः करणीयैराचरणैः । क्षपितेति क्षपिता विनाशं प्रापिता इन्द्रियाणां मनसश्च वृत्तिः स्वभावो यया सा,भवन्ती मान्या सती विरतिरत्नत्रयमभजत् इति संबन्धः । तस्मादङ्गदेशनगराच्चम्पातः जिनेन्द्रदत्तं निजभगिनीपतिम् । कथंभूतम् । चिरेति—चिरं विरहः दीर्घकालवियोगस्तेन उत्तालः उत्कण्ठितस्तं श्यालं विलोकितुमागतेन प्रियदत्तश्रेष्ठिना । वीक्ष्य, विषयेति—विषयाणां पञ्चेन्द्रियार्थानाम् अभिलाषः स्पृहा तस्य मोषः परिहारस्तस्मात् परुषाः रूक्षाः कचाः केशा यस्याः सा । विहितेति—विहिता कृता बह्वी शुक् येन तेन प्रियदत्तश्रेष्ठिना, पुनः प्रत्याय्य प्रतीतिं निश्चयं समुत्पाद्य, तस्मै जिनेन्द्रदत्तासुताय अर्हद्दत्ताय दातुम् उपक्रान्ता प्रारब्धा ( अनन्तमतिः पितरमेवम् उवाच आर्यिकादीक्षां चाभजत् ) 'तात, तं भदन्तं पूज्यं भगवन्तं ज्ञानिनं धर्मकीर्तिसूरिं त्वां मातरं च प्रमाणीकृत्य साक्षीकृत्य कृतेति—कृतः निरवधि आजन्म चतुर्थव्रतस्य ब्रह्मचर्यस्य परिग्रहो यया सा । ततः कथमहम् इदानीं संप्रति विवाहविषये परिकल्पनीया दातुं योग्या इति निगीर्य उक्त्वा, कमलश्रीसकाशे तन्नामधेयाया विरत्याः

समीपे, विरतीति—विरतीनाम् आर्यिकाणां विशेषस्तस्य वशो तेन परिपाल्यमानं रत्नत्रयकोषं सद्दृष्ट्यादित्रयनिधिम् अभक्तत् सेवते स्म । भवति चात्र श्लोकः—हासादिति—पितुर्जनकस्य हासात् नर्मभाषणात् चतुर्थेऽस्मिन् व्रते स्थिता अनन्तमतिः, निष्काङ्क्षा विषयाभिलाषाया दूरं गता त्यक्तविषयेच्छा, तपः कृत्वा द्वादशं कल्पम् अच्युतं स्वर्गम् आविशत् प्रवेशं कृतवती ॥१६५॥

इत्युपासकाध्ययने निष्काङ्क्षितत्वावेक्षणो नामाष्टमः कल्पः ॥८॥

## ९. निर्विचिकित्सासमुत्साहनो नाम नवमः कल्पः ।

[पृष्ठ ५७] ( निर्विचिकित्साङ्गस्य वर्णनम् ) तप इति—जिनेन्द्राणाम् इदं तीव्रं तपः संवादमन्दिरं न सम्यक् वादः संवादः प्रशंसा तस्य मन्दिरं गृहम् न सत्यताया गृहं न समीचीनफलप्रदं न । अदः अपवादि च स्यात् अपवादो निन्दा तेन युक्तं स्यात् । इत्येवं चेतोऽभिप्रायः विचिकित्सना जुगुप्सालक्षणं भवति ॥१६६॥

[पृष्ठ ५८-५९] स्वस्येति—यो नरः श्रुताशयम् आगमस्याभिप्रायं निबोधितुं न शक्तः स स्वस्यैव आत्मन एव दोषः । शीलं सदाचारं व्रतपरिरक्षणात्मकम् आश्रयितुं ग्रहीतुं न शक्तः, तदर्थं शीलार्थम् आचरणप्रयोजनं ज्ञातुम् असमर्थो वा ॥१६७॥ स्वत इति—स्वतः प्रकृत्यैव शुद्धमपि निर्मलमपि व्योमाकाशं यन्नरो मलीमसं कृष्णं वीक्षते पश्यति नासौ अस्य नभसो दोषः किंतु स दोषश्चक्षुराश्रयः नेत्राश्रित एव ज्ञेयः ॥१६८॥ दर्शनादिति—देहस्य रोगादिसंजातमालिन्यादिदोषाणां दर्शनात् यः तत्त्वाय आत्मनो रत्नत्रयस्वरूपाय जुगुप्सते निन्दति तत्र दोषानापादयति स नरः लोहे कालिकायाः कृष्णत्वस्य दर्शनात् नूनं सत्यम्, काञ्चनं सुवर्णं न मुञ्चति ॥१६९॥ स्वस्येति—आत्मनः अन्यस्य च परजनस्य च अयं कायः शरीरं बहिश्छायामनोहरः बाह्यस्य चर्मणः कान्त्या मनो हरति । अन्तःशरीरस्य मध्ये स्थितानां पदार्थानां रक्तादीनां विचारे कृते औदुम्बरफलसदृशः उदुम्बरतरुफलसमानः स्यात् । उदुम्बरफलानि जन्तुसहितत्वात् जन्तुफलानि इति अन्वर्थनाम लभन्ते ॥१७०॥ ऐतिह्येति—तत्तस्मात् ऐतिह्ये आप्तोपदेशे श्रुते, देहे च याथात्म्यं यथार्थत्वं पश्यताम् अवलोकमानानां सतां चित्तवृत्तिः मनोऽभिप्रायः उद्वेगाय जुगुप्सायै कथं नाम प्रवर्तताम् भवतु । यस्य स्वरूपं यादृग् वर्तते तत्र कृतापि जुगुप्सा तत्स्वरूपपरिवृत्तये न क्षमा भवति अतो देहस्य जुगुप्सा न कार्येति भावः ॥ १७१ ॥ सौधर्मेन्द्रो निर्विचिकित्साङ्गस्य कथां कथयति श्रूयतामत्रोपाख्यानम्—मतिश्रुतेति—मतिश्रुतावधिज्ञानान्येव मार्गत्रयं तेन प्रवृत्तया मतिमन्दाकिन्या ज्ञानगङ्गया सान्द्रः निबिडः सौधर्मेन्द्रः किल । सकलेति—सर्वसुरैः सेव्यमानायां सभायाम् अवसरसमये प्रसंगमुद्दिश्योचिते काले गीर्वाणानां देवानाम् अनुग्रहाय तानुपकर्तुं सम्यक्त्वमणिगुणान् वर्णयन् इदानीं इन्द्रकच्छदेशेषु मायापुरीत्यन्यनामावसरस्य । मायापुरीति—अन्याभिधां दधानस्य रौरुकपुरस्य प्रभोः स्वामिनः उद्दायनात् भूपतेः पुनः कथंभूतात् । प्रभावती महादेव्याः क्रीडायतनात्, अपरः कोऽपि सद्दर्शनमेव शरीरं देहः तस्य गदचिकित्सायां रोगपरीक्षायाम् अन्यः कोऽपि क्षान्तिमतिप्रसरः क्षमाज्ञानयुक्तप्रसारः । मोक्षेति—मोक्ष एव लक्ष्मीः मुक्तिरमा तस्याः कटाक्षा नेत्रापाङ्गास्तेषामवेक्षा अव समन्तात् ईक्षा अवलोकनं तस्य अक्षूणपात्रम् अखण्डभाजनं तस्मिन्, मर्त्यक्षेत्रे नरलोके नास्ति, इत्येतच्च वासवसंज्ञायाः नाम्नः ईशः स्वामी त्रिदशः वासवनामा देवः पुरन्दरस्य इन्द्रस्य उदितं भाषणं तत् असहमाना सोढुमक्षमा प्रज्ञा मतिर्यस्य सः, तत्र नगरे मायापुरे । कथंभूते । महामुनिसमूहप्रचारेण प्रवरे श्रेष्ठे, अवतीर्य स्वर्गादागत्य (कुष्ठादिपीडितमुनिवेषम् आदाय नृपतिगृहमविशत्) कथंभूतं मुनिवेषम् आदाय प्राविशद्राजगृहमिति विग्रियतेऽमुना । सर्वाङ्गेति—सर्वाङ्गान्यधिकृत्य प्रतितिष्ठतीति प्रतिष्ठं तच्च तत्कुष्ठं च तस्य कोष्ठकं संग्रहागारम् । पुनः कथंभूतम् । निष्ठ्यूतेति—निष्ठ्यूतं खात्कृत्य बहिर्वान्तो यो द्रवः कफः तस्य उद्रेकः आधिक्यं तेन उपद्रुतः पीडितो देहो यस्य तम् । पुनः कथंभूतम् । अखिलेति— अखिलाश्च ते देहिनः प्राणिनस्तेषां संदोहः समूहस्तस्य उद्वेजनानि जुगुप्सोत्पादकानि यानि श्रवणेक्षणघ्राणगरणानि कर्णनेत्रनासिकाकण्ठास्तेभ्यो विनिर्गलन् स्रवन् अनर्गलः अप्रतिबद्धः सततं प्रवर्तमानः दुर्गन्धः पूतिः पूयप्रवाहः दूषितरुधिरस्रावः

स च मूर्धस्फुटितस्फोटाश्च मस्तकोद्भवपिटकाश्च तत्र या स्फुटचेष्टा हस्तनखादिभिः खर्जनं तस्मिन् अनिष्टा आरोग्यविघातका या मक्षिकास्ताभिराक्षिप्तम् आवृतम् अशेषं शरीरं यस्य । पुनः कथंभूतम् । अभ्यन्तरेति—अभ्यन्तरं शरीरस्य अन्तः इति अभ्यन्तरम् अभ्यन्तरादेव उद्भूतः श्वयथुः शोथः तेन जातो यः कोथः दुर्गन्धभावस्ततश्च उत्तरङ्गाश्च वलीयुताश्च ताः त्वचश्चर्माणि तासाम् अन्तराले प्रलीनानि अखिलानि यानि नखानि नासीरं नासिका च तम् । पुनः कथंभूतम् । अविच्छिन्नेति—अविच्छिन्ना संततं प्रवर्तमाना उन्मूर्च्छन्ती उद्भवन्ती अतुच्छा महती सर्वाङ्गव्यापिनी या कच्छूः कण्डूरोगः तया च्छन्ना ये सृक्का अवयवप्रान्तास्ता एव सारिण्यो निर्गमद्वाराणि ताभ्यः सरन्निर्गच्छन् सततं लालास्रावो दुरभिरसविशेषो यस्मात् तम् । पुनः कथंभूतम् । अनवरतेति—अनवरतं सततं यत् स्रोतः सृतम् अशुचिजलपरिणतविष्ठानिर्गमस्तस्माज्जातो योऽतीसारः प्रवाहिकारोगविशेषः तस्मात्संभूता या बीभत्सा भयानका भावना आकृतिर्यस्य तम् । पुनः कथंभूतम् । अनेकश इति—अनेकशो बहुवारं विशिखा रथ्या तस्या शिखा अग्रं तत्र उत्पातः पतनं तेन नियतः निश्चितः आश्रितः संचितः यो अशुचिराशिः पूतिगन्धिपदार्थोत्करः तद्वत् दुर्दर्शं जुगुप्साजनकत्वात् द्रष्टुम् अक्षमं वपुः शरीरं यस्य तम् । एतादृशम् ऋषिवेषं मुनिरूपम् आदाय गृहीत्वा अदनाय आहारार्थम् अवन्याः पृथ्व्याः पतिः स उद्दायननृपः तस्य भवनं गृहम् अभजत् आश्रयत् गतवान् । भूपतिरपि सप्तेति—सप्ततलानि भूमयो आरब्धा निर्मिता यस्य स चासौ सौधः प्रासादस्तस्य मध्यम् अध्यासीनः तिष्ठन् आकण्ठम् आगलं भोजयामासेति संबन्धः । कथंभूतम् ऋषिं भोजयामासेति निरूप्यते—तम् असाध्या ये व्याधयो रोगाः तैर्विधुरा पीडिता धिषणा बुद्धिस्तस्या अधीनम् । विश्राणस्य आहारस्य अध्येषणा याचना तस्यै निजनिलयं निजगृहम् आलीयमानम् आगच्छन्तम् अवलोक्य सौत्सुक्यं सादरम् आलोक्य दृष्ट्वा स्वीकृत्य च तम् ऋषिवेषं देवम् उदानीय बाहुना उत्थाप्य आनयत् । कथंभूतं तमानयत् स इति विवियते । कृत्रिमेति—कृत्रिमश्चासौ आतङ्कश्च रोगः स एव पावकोऽग्निः तेन परवशं पीडितम् आस्त्रनितं चित्तं यस्य तम् । मुहुर्मुहुः पुनः पुनः महीतले निपतन्तम् । कथंभूत उद्दायनः । अन्विति—अनुद्विग्नम् अजुगुप्साभावं गतं मनः चरित्रं च यस्य स नृपः । मुनिवेषं देवम् उदानीय भोजयामास । पुनः कथंभूतम् । प्रकामेति—प्रकामम् अतिशयेन दुर्जयं च तत् खर्जनं कण्डूयनं तस्य अर्जनं पुनः पुनः कण्डूयनं तेन जर्जरितं गात्रं शरीरं यस्य तमृषिवेषम् । काश्मीरेति—काश्मीरस्य कुङ्कुमस्य पङ्कः लेपः तेन पिञ्जरेण पीतेन भुजपञ्जरेण उदानीय उत्थाप्य आनीय च अशनवेश्मोदरं रसवतीगृहमध्यं स्वयमेव समाचरितोपचारः कृतपूजनः उद्दायनः । तदिति—तस्य अभिलाषा इच्छा तस्या उन्मेषः प्रादुर्भावः तत्र सारभूतैः आहारैः उपशान्ता सौहित्यं प्राप्ता अशनायाया बुभुक्षायाः उत्कण्ठा यथा स्यात्तथा आकण्ठम् आगलं भोजयामास आहारं कारयामासेत्यर्थः ।

[ पृष्ठ ६० ] मायामुनिरिति—(मायामुनिर्भुक्तेरनन्तरं अवमीत्) पुनरपि तस्य उद्दायनस्य मनः जिज्ञासमानं मानसं यस्य सः प्रसभं वेगात् अति—अतिगम्भीरा चासौ गलगुहा च सैव कुहरं विवरं तस्मात् उज्जिहानः बहिरागच्छन् यः घोरो भयङ्करः घोषः शब्दः तस्य अभिघातस्तेन घनम् अतिशयेन घूर्णितं कम्पितम् अपघनं शरीरं यथा स्यात्तथा अप्रतिघम् अप्रतिबद्धम् अवमीत् वान्तिं चकार । भूमिपतिरपि—आः खेदोद्गारे कष्टं जातम् । यद्यस्मात्कारणात् मन्दभाग्यस्य मम गृहे गृहीताहारोपयोगस्य भुक्तभोजनस्य अस्य मनसः खेद एव पादपो वृक्षस्तस्य वितर्दिरिव वेदिकेव छर्दिः वमनं समभूत् । इति एवं प्रकारेण । उपक्रुष्टेति—उपक्रुष्टं निन्दितं अनिष्टम् अहितकृत् चेष्टितं चरितं तस्य वर्त्म मार्गस्वरूपम् आत्मानं विनिन्दन् गर्हमाणः । मायेति—मायामयाः विक्रिया सामर्थ्येन निर्मितास्ता मक्षिकास्तासां मण्डलितेन समूहेन कृता कपोले गण्डे रेखा यत्र तस्मात् तदिति—तस्य एतस्य मायामुनेर्मुखात् असराला विपुला या लाला तया क्लिन्नम् आर्द्रम् अन्नम् । इन्दिरेति—इन्दिरा लक्ष्मीस्तस्या अरविन्दं निवासकमलं तस्य उदरम् अन्तःप्रदेशस्तस्य यत्सौन्दर्यं तस्य निकटेन तत्सदृशेनेत्यर्थः । अञ्जलिपुटेन प्रसृतिपुटेन आदायादाय गृहीत्वा गृहीत्वा मेदिन्यां भूमौ उदसृजत् अमुञ्चत् । पुनश्चेति—उद्गीर्णः वान्तः उदीर्णः प्रकटीभूतः दुर्वर्णः जुगुप्स्यकान्तियुक्तः क्रूराणाम् अन्नानां निकरः समूहः तस्मिन् । भर्मीति—भर्मिः माया तया युक्ता या भ्रमिः पित्तप्रकोपेन यः मस्तकभ्रमः तस्य निर्भरः आधिक्यम् अतिशयो

वा तस्य आरम्भः तेन पतितं शरीरं यस्य, तं मायामुनिम् । सप्रयत्नेति—सप्रयत्नौ च तौ करौ हस्तौ तयोः स्थाम्नः बलस्य सीमा मर्यादा यथा स्यात्तथा तं मायामुनिं समुत्थाप्य । जलेति—जलात् जनितः क्षालनस्य प्रसङ्गो यस्य तम् । पुनः कथंभूतम् । उत्तरीयेति—उत्तरीयं देहस्योपरि उत्तरभागे धार्यमाणं वस्त्रम् उत्तरीयं तच्च तत् दुकूलं पट्टवस्त्रं तस्य अञ्चलं प्रान्तभागः तेन विलुप्तः निराकृतः सलिलस्य जलस्य संगः स्पर्शो यस्य तम्, अङ्गसंवाहनेन शरीरविमर्दनेन, अनुकम्पनस्य दयायाः विधानं प्रदर्शनं येषु तादृग्वचनानां रचनेन दयावचनानां उच्चारणेन साधु समाश्वासयत् आश्वासं सन्तोषमजनयत् । ( मायामुनिरात्मरूपं प्रकटीकृत्य स्तुत्वा चोद्दायनं स्वर्गं जगाम ) कथंभूतो मायामुनिः । प्रमोदेति—प्रमोद एव हर्ष एव अमृतं सुधा तेन अमन्दं परिपूर्णं यद्धृदयं तदेव आलवालवलयं अम्भसो धारणार्थं यद्वेष्टनं तस्य वलयं तत्र उल्लसन्ती विकसन्ती या प्रीतिः सा एव लता तदर्थम् अवनिरिव भूमिरिव स सुरचरः भूतपूर्वः सुरः स मुनिः यथैवायम् उद्दायनभूपो वर्णितः तथैवायं मया निर्वर्णित इति कथयति । कुत्र वर्णितः । परिषदि सभायाम्, कथंभूतायां त्रिदिवोत्पादि त्रिदिवे स्वर्गे उत्पादो यस्याः सा तस्याम् पुनः कथंभूतायाम् । सद्दर्शनेति—सद्दर्शनस्य सम्यक्त्वगुणस्य श्रवणाय उत्कण्ठितं हृद् मनो यस्याः तस्यां परिषदि, ( इन्द्रेण यथायमुपवर्णितस्तथायं मया निर्वर्णितः ) कथंभूतेन इन्द्रेण । विबुधप्रधानेन विबुधेषु देवेषु प्रधानेन श्रेष्ठेन पुनः कथंभूतेन गुणेति—गुणानां सम्यक्त्वादीनां ग्रहणं तत्र रुचिः प्रदर्शनं तस्य आग्रहोऽभिनिवेशः तत्र निधानेन निधिस्वरूपेण । प्राज्येति—प्राज्यं समृद्धं यत् राज्यं तदेव समज्या सभा तत्र अर्जुन इव सर्जिता उत्पादिता जगत्त्रय्यां त्रिलोक्यां निजनामधेयस्य स्वनाम्नः स्वकीर्तेः प्रसिद्धिः प्रख्यातिर्येन सः पुनः कथंभूतः । यथोक्तेति—यथोक्तम् आगमे यथा प्रतिपादितं सम्यक्त्वं सम्यग्दर्शनस्वरूपं तथा तस्य अधिगमात् प्राप्तेः, अवधेया जीवादिपदार्थेषु समाहितुं योग्या बुद्धिर्यस्य स उद्दायनो नृपः यथा उपवर्णितः व्यावर्णितः स्तुतो वा तथैव मया ( वासवनामधेयेन देवेन ) निर्वर्णितः परीक्षितः, इति विचिन्त्य प्रकटितेति—( आविष्कृतनिजरूपाडम्बरः, तम् उद्दायनम् अवनीश्वरं नृपं संभाव्य संमान्य स्वर्गं जगामेति संबन्धं कथयति कविः ) कैः संभाव्य अमरेति—अमराणां तरवः कल्पवृक्षाः तेषां प्रसूनानि पुष्पाणि तेषां वर्षा वृष्टिः, आनन्ददुन्दुभीनां प्रमोदभेरीणां नादो ध्वनिः तस्य उपघातेन मिश्रणेन शुचिभिः निर्मलैः । साधुकारेति—साधुकारः साधुकृतं साधुकृतमिति उच्चारणं साधुकारः, तस्मिन् परः साधुकारपरः स चासौ व्याहारो भाषणं तस्यावसरो वेला तेन शुचिभिः सुन्दरैः उदारैः महद्भिः उपचारैः पूजनैः आदरैः संभाव्य, पुनः कैः संभाव्येति उच्यते—अनिमिषेति—अनिमिषा देवास्तेषां विषयो देशः स्वर्गः तत्र संभूष्णवः भवनशीलास्तैः । मन इति—चित्तेप्सितप्राप्तौ विष्णुभिः जित्वरैः समर्थैः क्षमैरिति यावत्, तैस्तैः पठितमात्रेण विधेयैः साध्यैः विद्योपदेशगर्भैः विद्योपदेशो गर्भे येषां तैः मन्त्रैः तथा वस्त्रसंदर्भैश्च वसनानां संदर्भैः रचनाभिश्च संभाव्य संपूज्य सुरसेव्यं देशमाविवेश स्वर्गं जगामेत्यभिप्रायः ।

[ पृष्ठ ६१ ] भवति चात्र श्लोकः—बालेति—बालवयसो यतीन्, वृद्धयतीन् गदेन रोगेण ग्लानान् पीडितान्, मुनीन् औद्दायनो नृपः स्वयं प्रेरणया विना स्वकर्तव्यमेतदिति बुद्धया भजन् सेवमानः निर्विचिकित्सात्मा जुगुप्सां मनागपि अकुर्वाणः पुरन्दरात् इन्द्रात् स्तुतिं प्रशंसां प्रापत् लेभे ॥१७२॥

इत्युपासकाध्ययने निर्विचिकित्सासमुत्साहनो नाम नवमः कल्पः ॥९॥

## १०. अमूढदृष्टिगुणोपाख्यानं नाम दशमः कल्पः ।

[ पृष्ठ ६१ ] अन्तरिति—आत्मनि दुरन्तो दुःखदायकः संचारो भवभ्रमणं यस्मात् बहिरिति—बाह्यस्वरूपे सुन्दरं शोभावहम्, एतत्कुदृष्टीनां बौद्धनैयायिकादीनां मतं किंपाकसंनिभम् कुत्सितः पाकः परिणामो यस्य तस्य विषफलस्य संनिभं तुल्यम् मतं न श्रद्दध्यात् न विश्वस्यात् ॥१७३॥ श्रुतीति—श्रुत्याम्नायः वैदिकमतम् । शाक्याम्नायः सौगतमतम् । शिवाम्नायः शिवमतम् । क्षौद्रं मधु, मांसं प्रतीतम् । आसवो मदिरा एते आधारा अधिष्ठानानि येषां ते । वैदिका मधु ग्राह्यं वदन्ति । सौगता मांसभक्षणमामनन्ति । शैवाम्नाये मद्यपान-

मगर्हणीयम् । अत्र वैदिकशिवाम्नाये मलमोक्षाय विधिः यज्ञे मोक्षप्राप्तौ च यो विधिः क्रियते तत्र उक्तानां मद्यादीनां प्रयोगो विद्यते इति ॥१७४॥ भर्मिभस्मेति—भर्मिः मायापरबन्धनम्, भस्मलेपनम् । जटाजूटधारणम् योगपट्टो वस्त्रविशेषधारणम् । कटासनं दर्भासनम् । मेखला दर्भकटिसूत्रम् । प्रोक्षणं भूमिशुद्धयै जलदुग्धादि-सिञ्चनम् । मुद्रा शङ्खमुद्रामुक्ताशुक्तिमुद्रादिकं हस्ताङ्गुलीनाम् आकारविशेषः । बृसी कुशादिमयासनम् चट्टकः । दण्डः पालाशवेणवादिकाष्ठविशेषः । आषाढो व्रतिना दण्डः । करण्डकः वंशादिरचितः समुद्गकः ॥१७५॥ शौचम् अङ्गावयवानां पवित्रीकरणम्, मज्जनं नद्यादिषु स्नानम्, आचामः आचमनम्, पितॄणां पूजनं श्राद्धेन संत-र्पणम्, अनलार्चनम् अग्निपूजनम्, इयं प्रक्रिया एतानि कर्माणि अन्तस्तत्त्वविहीनानाम् आत्मानात्मविचारशून्यानां विराजन्ते शोभन्ते ॥१७६॥ को देव इति—आप्तः को भवितुमर्हति, किमिदं ज्ञानम्, येन परमात्मबोधो भवति तज्ज्ञानम्, किं वा कुटुम्बपोषणोपयोगिबोधो ज्ञानम्, किं तत्त्वम् एकान्तवस्तुस्वरूपम् उतानेकान्तवस्तुस्वरूपं तत्त्वम् । को बन्धः कर्मात्मनोरन्योन्यं दृढाश्लेषो बन्धः उत रज्ज्वादिना बन्धनम्, कश्च मोक्षः कारागारान्मुक्तिरुत कर्मजीवयोरत्यन्तविश्लेषो मुक्तिः इत्यादि विचारस्तत्र न विद्यते । मिथ्यादृष्टिमतानि एकान्तप्रतिपादकान्य-तस्तत्र बन्धमुक्त्यादीनामसंभवः स च प्राक्प्रतिपादितः ॥१७७॥ आप्तेति—आप्तस्य आगमस्य च अविशुद्धत्वे सदोषत्वे आप्तो यदि रागादिदूषितः स्यात्, आगमश्च यदि पूर्वापरविरोधादिदोषयुक्तो यज्ञादिविधानानां च प्रतिपादकः स्यात्तर्हि तत्र विशुद्धत्वं न संभवेत् । तथा देहिषु प्राणिषु क्रिया शुद्धापि आचारविशुद्धिरपि अभि-जातफलप्राप्त्यै उत्तमवीतरागसुखप्राप्त्यै न भवति । यथा विजातिषु व्यभिचारादिदोषदूषितेषु मानवेषु सद्गोत्र-भूषितपुत्रादिफलप्राप्तिर्न भवति ॥१७८॥

[ पृष्ठ ६२ ] तत्संस्तवेति—तेषां कुदृष्टीनां संस्तवं मिथ्याज्ञानचारित्रगुणोद्भावनं वचसा न कुर्वीत । तत्प्रशंसां वा, भूताभूतगुणोद्भावनं मनसा न कुर्वीत । तथा विपश्चित् विबुधः तेषां ज्ञानविज्ञानयोः मन्त्रवादादि-विषये ज्ञाने विज्ञाने च निर्बीजकरणादि शुक्रस्य नेत्रादौ निःकाशनम् । एकान्ततत्त्वज्ञाने कलादिज्ञाने च न विभ्रमेत् विभ्रमं विस्मयभ्रान्तिं च न गच्छेत् ॥१७९॥ (अमूढताङ्गे रेवतीराज्ञी–कथा) श्रूयतामत्रोपाख्यानम्–(देशयतिश्चन्द्रप्रभः उत्तरमथुरां गन्तुकामः श्रीमुनिगुप्तमपृच्छत्) कथंभूतेषु पाण्ड्यमण्डलेषु । मुक्ताफलेति—मुक्ताफलानि मौक्तिकानि तेषां मञ्जरी पङ्क्तिः तया विराजितानि शोभितानि विलासिनीनां कर्णकुण्डलानि येषु तेषु पाण्ड्यमण्डलेषु पाण्ड्यदेशेषु इत्यर्थः । दक्षिणमथुरायां कथंभूतायाम् । पौरेति—पुरे भवाः पौरा नागरिकाः तेषां पुण्याचाराः देवपूजादिषट्कर्माणि । तैः विदूरितानि विनाशितानि विधुराणि कष्टानि यया सा तस्याम् । ( श्रीमुनिगुप्तनामव्याहारं भदन्तं चन्द्रप्रभो देशयतिरपृच्छत् ) कथंभूतम् भदन्तं भन्दते इति भदन्तः भदि कल्याणे पूजितः तम्, भगवन्तं महाज्ञानिनम्, तमेव विवृणोति—अशेषेति—अशेषं च तत् श्रुतं द्वादशाङ्गश्रुतज्ञानं तदेव पारावारः समुद्रः तं गच्छतीति तम्, अवधिबोधः अवधीति—अव दधातीति अवधिः स चासौ बोधश्च अधस्ताद्बहुतरविषयाणां ग्रहणादवधिरुच्यते, तृतीयमतीन्द्रियज्ञानं रूपि-विषयकम् । स एव अम्बुधिः समुद्रः तस्य मध्ये साधितः सकलभुवनभागः येन तम् । अष्टाङ्गेति—अष्टौ अङ्गानि यस्य तत् अष्टाङ्गं कानि तानि चेदुच्यन्ते—अन्तरिक्ष-भौम-अङ्ग-स्वर-व्यञ्जन-लक्षण-छिन्न-स्वप्ननामानि ) तच्च तन्महानिमित्तं शास्त्रं तस्य संपत्त्या समधिका प्रकर्षं प्राप्ता या धिषणा बुद्धि-स्तस्या अधिकरणम् अधिष्ठानम् । अखिलेति—अखिलाः सकलाः श्रमणा यतयः तेषां संघः स एव सिंहस्तेन उपास्यमानौ पूज्यमानौ चरणौ यस्य सः तम्, अत्याश्चर्येति—अत्याश्चर्येण युक्तं तत्तपश्चरणं तस्य गोचरो विषयीभूतः स चासौ आचारस्तस्य चातुरी नैपुण्यं तया चमत्कृतं विस्मयभावं नीतं चित्तं येषां ते च ते खेचरा विद्याधराः तेषाम् ईश्वराः स्वामिनः तैर्विरचिता कृता या चरणयोः अर्चना पूजा तस्या उपचारः सेवा यस्य तं चन्द्रप्रभो देशयतिरपृच्छत् । अधुना चन्द्रप्रभदेशयतेः संबन्धः प्रदर्श्यते—कथंभूतस्य विजयार्धमेदिनीध्रस्य । गगनेति—गगने आकाशे गमनं येषां ते गगनगमनाः विद्याधरास्तेषाम् अङ्गनाः ललनाः तासाम् अपाङ्गाः नेत्रान्ताः कटाक्षाः तेषाम् अमृतसारणी सुधाकुल्या तस्याः संबन्धेन वीध्रस्य शुक्लतां प्राप्तस्य, विजयार्धपर्वतस्य दक्षिणश्रेणौ । रतिकेलीति—रतिकेलिः संभोगक्रीडा तत्समये यो विलासः रामानयनवदनभ्रूप्रभृतीनां यः

कश्चिदुत्पद्यते विशेषः स विलासः तत्प्रसंगे विगलिता निलिम्पललनानां देवस्त्रीणां मेखलानां काञ्चीनां मणयो रत्नानि यत्र तस्यां दक्षिणश्रेणौ मेघकूटपट्टनाधिपत्योपान्तः मेघकूटनगरस्य आधिपत्यं स्वामित्वम् उपान्त्ये समीपे यस्य सः, सोमश्रिनी नामधेया कान्ता यस्य सः। संसारसुखेभ्यः पराङ्मुखा प्रतिभा बुद्धिर्यस्य स चन्द्रप्रभः खगेशः चन्द्रशेखराय पुत्राय निजैश्वर्यं वितीर्य दत्वा पर्यवसितेति—पर्यवसितेन निश्चयेनाधिगतक्षुल्लकव्रतिरूपः सकला चासौ अम्बरचरविद्या आकाशगामिनी विद्या तस्याः परिग्रहः स्वीकृतिः समीपे यस्य, सप्रश्रयं सविनयं अभिवन्द्य प्रणम्य अनवद्येति—अनवद्या निर्दोषा मुक्तिदातृत्वात् या विद्या अध्यात्मज्ञानं तया महन् श्रेष्ठ, भगवन् अहम् उत्तरमथुरायां जिनमन्दिराणि वन्दितुकामोऽस्मि। कथंभूतायाम् उत्तरमथुरायाम्। पौराङ्गनेति—नागरस्त्रीणां भृङ्गारयुक्ता उत्तरङ्गा तरङ्गवत् उन्नतिं प्राप्ता ये अपाङ्गाः नेत्रान्तास्तैः पुनरुक्ताः स्मरशराः मदनबाणा यत्र तस्याम् उत्तरमथुरायाम्। जिनेन्द्रमन्दिराणि वन्दते स्तौति अभिवादयते इति वन्दारु वन्दनशीलं तच्च तद्धृदयं च तस्य दोहदः इच्छा वर्तते यस्य स अहं वर्ते। अतस्तन्नगरीगमनाय भगवतानुज्ञातोऽस्मि। किं च कस्य तस्यां पुरि कथयितव्यम् इति। अपृच्छत्।

[ पृष्ठ ६३ ] मुनिसत्तमः—प्रियतम यथा ते मनोरथस्तथा अभिमतपथः इष्टमार्गः समस्तु भवतु। संदेष्टव्य पुनस्तत्रैतावदेव कथितव्यं पुनस्तत्र इदमेव, यदुत तत्पुरोपुरन्दरस्य उत्तरमथुरापुर्याः इन्द्रस्य स्वामिन इत्यर्थः, वरुणधरणीश्वरस्य वरुणभूमिपतेः शचीदृशः इन्द्राणीतुल्यायाः सुदृशः सुदृष्टेः सम्यग्दर्शनधारिण्याः, जिनपतेः चरणयोः चित्तेन मनसा य उपचारः सेवा तस्य पदव्याः मार्गभूतायाः महादेव्याः रेवतीतिनामधेयायाः मदीया आशीः आशीर्वादो वाच्यः वक्तव्यः। तथा आवश्यकविशेषवशचित्तवतः आवश्यकानि सामायिकादीनि तेषां विशेषे वश्यं चित्तम् अस्ति यस्य तस्य सुव्रतभगवतः वन्दना च वाच्या। देशयतिवरः—किम् अपरस्तत्र भगवन् जैनो जनो नास्ति। भगवान्—देशव्रतिन्, अलं विकल्पेन विचारणेन पर्याप्तम्। तत्र गतस्य भविष्यति समस्ताप्यार्हतेतरशरीरिसपक्षासमक्षा स्थितिः। ये जिनानुयायिनो ये चान्ये जनाः तेषां स्थितिः अस्तित्वं तत्रास्ति न वेति सर्वमेव तव गतस्य व्यक्तीभविष्यति। ये जैना जना ये च तत्सदृशाः तेषां अस्तित्वं समक्षं प्रत्यक्षं भवति। खचरविद्याबीजमल्लकः क्षुल्लको यथादिशति दिव्यज्ञानसंगवान् भगवान्। नभश्चरविद्याबीजवपने मृत्पात्रसदृशः क्षुल्लको देशयतिरब्रवीदेवं भगवान् खलु दिव्यज्ञानस्य अतीन्द्रियज्ञानस्य संगेन युक्तः। अतः यदादिशति तत्र भवान् तत्सर्वं सत्यमेव। इति निगीर्य एवं भाषित्वा। गगनचर्यया आकाशगमनेन अवतीर्य उत्तरमथुरायां परोक्षेय परोक्षां कुर्वीय तावत्प्रथमम् एकादशाङ्गनिधानम् आचाराद्येकादशाङ्गानां निधीभूतस्य भव्यसेनमुनेः। तदनु भव्यसेनपरीक्षणात्पश्चात् सम्यक्त्वरत्नवती सम्यग्दर्शनमणिभूषितां रेवतीं परीक्षेय इति कृतकुतूहलः ( क्षुल्लकः बटुवेषेण भव्यसेनस्य मुनेराश्रममगच्छत्। ) कथंभूतं कपटबटुवेषम् आश्लिष्य तदाश्रममगच्छत्। कलमेति—शालिविशेषशस्यमञ्जरीणाम् अग्रसदृशकेशमनोहरविपुलचूडम्। उत्तप्तेति—अग्नितप्तसुवर्णकान्तिमनोज्ञदेहगौरतामनुसृत्य कमलमधुरजोवत् कपिशलोचनम्, अतिस्पष्टेति—अतिविशदविस्तराक्षरवर्णनाय उदीर्णमुखं मुखं व्यादाय ब्रुवन्तमिति भावः। एकादशवर्षजातकुमारसदृशम् अत्याश्चर्यविषयभूतम्, कपटेन विद्यासामर्थ्येन कुमारवेषं गृहीत्वा भव्यसेनस्य उटवसितम् आश्रमम् अयासीत् प्राविशत्। वेषमुनिः वेषेण द्रव्यलिङ्गेन मुनिः भव्यसेनः तम् ईक्षणकमनीयं नेत्रप्रियतामावहन्तं द्विजेति—विप्रतनयसमानं तम् आलोक्य किलैवं स्नेहाधिक्यं स्नेहातिशयेन अलोलपत् अब्रवीत्। "हंहो बटो हे कुमार निखिलेति—निखिलाः सकलाश्च ते द्विजाः विप्रास्तेषां वंशस्तस्मात् अव्यतिरिक्तम् अभिन्नं च तत् सुकृतं पुण्यं तेन कृतं यत्कल्याणं हितं तत्प्रकृतितया तत्स्वभावतया। समस्तेति—समस्ताश्च ते लोकाश्च सकलजनाश्च तेषां लोचनानि नेत्राणि तेषाम् आनन्दस्य प्रमोदस्य उत्पादने निर्मापणे पटुश्चतुरः तत्संबोधनं हे बटो इति। कुतः खलु समागतोऽसि। बटुराह—

[पृष्ठ ६४] अभिनवेति—अभिनवा नूतनाश्च ते जनाश्च तेषां मनसाम् आह्लादनानि तानि वचनानि तान्येवागदा औषधानि तेषां प्रयोगे चरकभट्टारक इव तत्संबोधनम्। सकलेति—सकलकलानां विलासगृहरूपा ये विद्वज्जनास्तैः पवित्रात्पाटलिपुत्रात् तन्नामधेयात् नगरात्। किमर्थं समागतोऽसि। अध्ययनार्थम्। क्वाधिजिगांसेति—क्व कस्मिन्विषये अधिजिगांसा ज्ञातुमिच्छा तस्या अधिकरणम् आधारभूतं भवतः अन्तःकरणं

मनः अस्ति श्रूयताम् । वाङ्मलेति—वाचां मलः वाङ्मलः अशुद्धवचनप्रयोगः तस्य क्षालनं करोतीति क्षालनकरं तस्य प्रकरणं तस्मिन् व्याकरणे । यद्येवमिति—मदन्तिके मत्समीपे । स्वाध्यायध्याने एव सर्वस्वं सम्पूर्णं धनं यस्य तत्संबोधनम् हे स्वाध्यायध्यानसर्वस्व । समास्व सम्यक्-विनयेन तिष्ठ । परवादीति—परवादिगर्वविनाशिनीनां वाचां प्रक्रमः आरम्भ एव असिः खड्गः यस्य तत्संबोधनम् । हे भगवन्, साधु तिष्ठामि भवतः सन्निधौ । तदनु तदनन्तरम् । अतीतेति—अवसानं यातेषु कियत्सु समयविभागेषु । बटो इति—बटो मार्तण्डः भालप्रदेशं बाधते । तद्गृहाण इमं कमण्डलुम् । पर्यटाव आगच्छावः । बटुः यथाज्ञापयति भगवान् । पुनरिति—पुनः पुरबाह्यप्रदेशे निर्गते याते सत्यसंयते वेषमुनौ । स कपटबटुरिति—स बटुवेषी विक्रिया-दर्शितधान्याङ्कुरवृन्दव्याप्ताम् अवनिं भूमिम् अकार्षीत् अकरोत् । तद्दर्शनादिति—तदवलोकनात् द्रव्यलिङ्गी-मुनिः ईषत्कालं व्यलम्बिष्ट विलम्ब्य अतिष्ठत् । भगवन् इति—भगवन् किमिति अनवसरे अस्थाने च विलम्बः क्रियते । बटो, आगमे किल एते धान्याङ्कुराः स्थावराः एकेन्द्रियाः प्राणिनः पठ्यन्ते प्रतिपाद्यन्ते । भगवन्-श्वासादिष्विति—अमीषां धान्याङ्कुराणां प्राणः दशसु प्राणेषु मध्ये कियतिथगुणः कतितमः प्राणः । केवलमिति—यथा मणिमयाङ्कुराः पृथ्वीविकाराः अचेतनास्तथेमे धान्याङ्कुराः अचेतनाः भूमिविकाराः ।

[ पृष्ठ ६५ ] वेषमुनिः—साध्वयमभिदधाति । शोभनमयं बटुर्ब्रवीति । इति विचिन्त्य विहृत्य च विहारं कृत्वा च निःशङ्कं संशयं मनसि अधृत्वा निष्पादितनीहारः निष्पादितः विहितः नीहारः शौचविधिर्येन । तथा विरहितव्याहारः विरहितस्त्यक्तो व्याहारः भाषणविधिर्येन स भव्यसेनः करेण किमपि अभिनयन् संज्ञां कुर्वन् अनेन बटुना एवं उक्तः "भगवन्, किमिदं मौनेनाभिनीयते । जिनरूपाजीवः जिनरूपेण नग्नताधारणेन आजीवतीति उदरपोषणं करोतीति जिनरूपाजीवः । सः 'अभिमानस्य रक्षार्थं प्रतीक्षार्थं श्रुतस्य च । ध्वनन्ति मुनयो मौनम् अदनादिषु कर्मसु ॥१८०॥ अभिमानस्य अयाचनायाः रक्षणहेतोः, श्रुतस्य प्रतीक्षार्थं विनयार्थम् आदरार्थम् अदनादिकर्मसु भोजने, स्नाने, सामायिकादिकषट्कर्मसु, हदने, मूत्रणे इत्यादिकार्येषु मुनयो मौनम् अभाषणं ध्वनन्ति ब्रुवन्ति । इति मौनफलम् अविकल्प्य असंकल्प्य जातजल्पः कृतभाषणः, द्विजात्मज, विप्रबटो, समन्विष्य संशोध्य समानीयताम् आवायत्कायो गोमयो यस्मिन् जीवोत्पत्तिर्नास्ति स गोमयः शुष्कः भसितपटलं भस्मसमूहः, इष्टकाशकलम् अग्निपक्वमृत्तिकाखण्डो वा । भगवन्, अखिललोक-शौचोचितप्रवृत्तिकायां सकलजनैः शुद्धये क्रियते उचिता प्रवृत्तिः यस्यां तस्यां मृतिकायां को दोषः ? बटो, प्रवचनलोचननिचायिकाः प्रवचनलोचनेन आगमनयनेन निचीयन्ते अवलोक्यन्ते इति प्रवचन-लोचननिचायिकाः तत्कायिकाः पृथ्वी एव कायः शरीरं येषां ते जीवाः किल तत्र सन्ति । भगवन्, ज्ञानदर्शनो-पयोगलक्षणो जीवगुणः, न च तेषु तद्गुणद्वयम् उपलभ्यते । मृत्तिकायां ज्ञानं दर्शनं च न विद्यते इति भावः । यद्येवं यदि तत्र जीवगुणो नोपलभ्यते तर्हि आनीयतां मृत्सा कृत्स्ना सकला प्रशस्ता मृत्तिका असुमत्सेव्या प्राणिभिः सेवनीया बटुस्तथाचर्य—बटुस्तथा कृत्वा कुण्डिकां कमण्डलुमर्पयति । मुधामुनिर्जलविकलां कमण्डलुं करेण आकलय्य ज्ञात्वा, बटो, रिक्तोऽयं कमण्डलुः । भगवन्, इदमुदकं अचिरवल्ले अचिरं नूतनं वल्लं संवरणं यस्य तस्मिन् तल्ले तडागे समास्ते विद्यते । बटो, पटापूतपानीयादाने पटेन वस्त्रेण अपूतम् अगालितं तच्च तत्पानीयं जलं तस्यादाने ग्रहणे महदादीनवं महादोषः यतस्तत्र जन्तवः सन्ति । तदसत्यम् इह स्वच्छतया निर्मलतया विहायसीव आकाश इव पयसि जले तदनवलोकनात् जन्तूनामदर्शनात् । इति वचनात् बहुभाषणात्, बहिस्तन्त्र-संयमिनि बाह्यतन्त्रेण बाह्यप्रवृत्त्या संयमिनि यतौ तत्त्वाभिनिवेशवशिकाशयवेश्मनि तत्त्वानां जीवादीनाम् अभिनि-वेशः यथार्थश्रद्धा तत्र वशिको वन्ध्यः आशयोऽभिप्रायस्तस्य वेश्म इव तस्मिन्मुधामुनौ तद्देशम् उद्दिश्य अवलम्ब्य आश्रितशौचे कृतपावित्र्ये खचरेण विद्याधरेण चिन्तितम् । अत एव भगवान् अतीन्द्रियपदार्थप्रकाशनशेमुषीम् अतीन्द्रियाः पदार्थाः पापपुण्यानि, अणवः इत्यादीनां प्रकाशने प्ररूपणे शेमुषीं बुद्धिं प्राप्तः ।

[ पृष्ठ ६६ ] श्रीमुनिगुप्तः अस्य किमपि वाचिकं संदेशं न प्राहिणोत् न प्रेषयति स्म । यस्मात् अस्मिन् भव्यसेने प्रदीपवर्तिवदनमिव प्रदीपस्य दशामुखमिव अन्तस्तत्त्वसर्गे अन्तस्तत्त्वम् अध्यात्मतत्त्वं तस्य सर्गे उत्पत्तौ निसर्गमलीमसं स्वभावमलिनं मानसं च बहिःप्रकाशने सरसं प्रीतियुक्तं च । भवति चात्र श्लोकः—

**जले तैलमिवेति**—रसवत् पारद इव यथा पारदः धातुषु लोहादिषु वेधाय भवति लोहादिकं स्वस्पर्शेन अन्तः प्रविश्य वा सुवर्णीकरोति तथा यत्र ऐतिह्यं श्रुतज्ञानम् अध्यात्मज्ञानं रसवत् अन्तः प्रविश्य मुन्यादिकं रत्नत्रयवन्तं न करोति तत्र स अन्तर्बोधः जले तैलमिव वृथा तत्र केवलं बहिर्द्युतिरेव ।

इत्युपासकाध्ययने भवसेनदुर्विलसनो नाम दशमः कल्पः ॥१०॥

## ११. अमूढताप्रौढिपरिवृढो नामैकादशः कल्पः

परीक्षितस्तावत्प्रसभाविर्भविष्यद्भवसेनो भवसेनः । प्रसभं हठात् आविर्भविष्यन्ती प्रकटं भविश्री भवस्य संसारस्य सेना यस्य सः भवसेनः परीक्षितस्तावत् । इदानीम् अधुना **भगवदिति**—भगवतः श्रीमुनिगुप्तस्य आशीर्वाद एव पादपो वृक्षस्तस्य उत्पादाय वसुमतिमिव भूमिमिव रेवतीं राज्ञीं परीक्षे, इति आक्षिप्तं विमृष्टम् अन्तःकरणे मनसि येन स विद्याधरः ब्रह्मण आकारं गृहीत्वा सकलं पुरं क्षोभयामास । कस्यां दिशि पुरस्य नगरस्य पुरन्दरदिशि इन्द्रदिशायाम् । कथंभूतं ब्रह्मण आकारम् । **हंसेति**—हंसानाम् अंसाः भुजशिरांसि तेषाम् उपरि उत्तंसः भूषणभूतश्चासौ आवासः विमानं तस्य वेदिका वितर्दिः तस्याः अन्तराले मध्ये या कमलकर्णिका कमलकोषः तस्याः उपरि आस्तीर्णम् प्रसारितं यन्मृगाजिनं हरिणचर्म तदेव पर्यङ्कपर्यायः मञ्चकतुल्यता यस्य तम् । पुनः कथंभूतम् **अमरेति**—अमरसरसि देवतडागे संजातानि यानि सरोजानि कमलानि तेषां सूत्राणि तैः वर्तितं विहितं यदुपवीतं यज्ञसूत्रं तेन पूतः कायः शरीरं यस्य तम् । पुनः कथंभूतम् ? **अमृतेति**—अमृतमयाः करा यस्य स अमृतकरश्चन्द्रः तस्य कुरङ्गकुले हरिणवंशे जातो यः कृष्णसारो मृगविशेषः तस्य कृत्तिश्चर्म तेन कृतः विहितः उत्तरासंगस्य वामस्कन्धे धार्यमाणस्य वस्त्रस्य संनिवेशो रचना येन तम् पुनः कथंभूतम् । **अनवरतेति**—अनवरतं सततम् यो होमस्यारम्भः तस्मात् संभूतं यद्भसितं भस्म तेन विहिता ये पाण्डवाः शुभ्राः पुण्ड्रकास्तिलकाः तेन उत्कटो उद्दीप्तः निटिलदेशो ललाटदेशो यस्य तम् । पुनः कथंभूतम् । **अम्बरेति**—अम्बरे आकाशे चरन्ति विहरन्ति ये ते अम्बरचरा देवाः तेषां तरङ्गिणी नदी तस्या जलं तेन क्षालितानि धौतानि यानि कल्पकुजानाम् कल्पतरूणाम् वल्कलानि त्वचस्तैर्वलितानि यानि उत्तरीयाणि ऊर्ध्वदेहाच्छादकानि वस्त्राणि तेषां प्रतानं जालं तेन परिवेष्टितं जटावलयं जटामण्डलं येन स तम् । पुनः कथंभूतम् । **अमृतेति**—अमृतम् अन्धः अन्नं येषां ते अमृतान्धसः देवाः तेषां सिन्धुर्नदी गङ्गा तस्या रोधसि तटे संजाता ये कुतपाङ्कुराः कुशतृणाङ्कुराः, अक्षमाला जपमाला, कमण्डलुः, योगमुद्रा च एभिश्चतुर्भिः अङ्कितम् चिह्नितम् करचतुष्टयं हस्तचतुष्कम् यस्य तम् । पुनः कथंभूतम् । **उपासनेति**—उपासनार्थं समायाताः समागता ये मतङ्ग-भृगु-भर्ग-भरत-गौतम-गर्ग-पिङ्गल-पुलह-पुलोम-पुलस्ति-पराशर-मरीचि-विरोचना एव चञ्चरीकानीकं भृङ्गसमूहः तेन आस्वाद्यमानो लिह्यमानो यत् वदनारविन्दस्य मुखकमलस्य कन्दरात् विनिर्गलन्तः बहिरागच्छन्तो ये वेदास्त एव मकरन्दसंदोहो यस्य तम् । पुनः कथभूतम् ।

[ पृष्ठ ६७ ] **उभयेति**—उभययोः पार्श्वयोः अवस्थिता मूर्तिं तनुं धृत्वा समागताः निखिलाः कला इव या विलासिन्यः तासां समाजेन समूहेन संचार्यमाणो वीज्यमानश्चामराणां प्रवाहः यत्र तम् । पुनः कथंभूतम् । **उदारेति**—उदारो महान् नादो रवो यस्य स चासौ नारदो मुनिस्तेन मन्यमानः स्वीक्रियमाणः प्रतीहारव्यवहारः द्वारपालनकर्म यस्य तम् । अम्भोजोद्भवाकारम् अम्भोजं कमलं तत् उद्भवः उत्पत्तिस्थानं यस्य ब्रह्मणः आकारं स्वरूपम् आसाद्य प्राप्य स विद्याधरः समस्तमपि नगरं क्षोभयामास क्षुब्धम् अकरोत् । सापि रेवती कथंभूता । **जिनेश्वरेति**—जिनेश्वरस्य चरणयोः पादयोः प्रणयः प्रीतिः स एव मण्डपः तस्य मण्डनं भूषणस्वरूपा माधवीलतेव, वरुणधरणीश्वरवरुणनामधेयस्य धरण्याः पृथ्व्याः ईश्वरस्य पत्युर्महादेवी नृपतेः वरुणराजस्य पुरोहितात् तम् उदन्तं ब्रह्मणो वार्ताम् आकर्ण्य, त्रिषष्टिशलाकासु उत्तमेषु पुरुषेषु मध्ये ब्रह्मा नाम न कोऽपि श्रूयते । तथा—**आत्मनीति**—ब्रह्मेति गीः शब्दः आत्मनि जीवे, मोक्षे सकलकर्मविश्लेषणलक्षणे, ज्ञाने, वृत्ते, चारित्रे, भरतचक्रवर्तिन आद्यस्य पितरि वृषभनाथे, प्रगीता प्रवृत्ता । अत एतान्मुक्त्वा न चान्यो ब्रह्मा विद्यते । ॥१८२॥ इति च अनुस्मृत्य विमर्शं कृत्वा अविस्मयबुद्धिः गर्वरहितमतिः अतिष्ठत् (पुनः दक्षिण-

दिशि चन्द्रप्रभः क्षुल्लकः विष्णुरूपं बभारेति) पुनः कीनाशदिशि कीनाशो यमः तस्य दिक् दक्षिणाशा तस्याम्, अधोक्षजवेषं विष्णुवेषं कथंभूतम्। **पवनाशनेति**—पवनाशनानां सर्पाणाम् ईश्वरः शेषः सर्पराजस्तस्य शरीरं तदेव शयनं शय्या तत् आश्रितम् अवलम्बितम् अपघनं शरीरं (विष्णोः) यस्य तम्। इतस्ततः प्रकामम् अतिशयेन प्रसरन्ती चासौ तदङ्गस्य शेषाङ्गस्य उत्तरङ्गा उन्नतलहरीवत् या कान्तिः प्रभा तस्याः प्रकाशस्तेन परिकल्पितम् अमृताम्बुधेः सुधासागरस्य संनिधानं समीपभावो येन तम्। पुनः कथंभूतमधोक्षजम्। **उल्लेखेति**—उल्लेखेन घर्षणेन उल्लसन्तः शोभमाना ये फणामणीनां मरीचयः किरणाः तेषां निचयः समूहः स एव सिचयः वस्त्रं तेन आचरितो विहितो निरालम्बे अम्बरे आकाशे वितानभावः उल्लोचभावो येन तम्। **अमर्त्येति**—अमर्त्या देवास्तेषाम् उद्यानं वनं नन्दनवनमित्यर्थः, तत्र यानि प्रसूनानि पुष्पाणि मञ्जरीजाल च अभिनवनिर्गता आयता सुकुमारा सकुसुमा अकुसुमा च मञ्जरी कथ्यते मञ्जरीणां जालं तेन जालेन जटिला प्रताना विस्तीर्णा या वनमाला "आजानुलम्बिनी माला सर्वर्तुकुसुमोज्ज्वला। मध्ये स्थूलकदम्बाढ्या वनमालेति कीर्तिता" तस्या निर्गतमकरन्देन मधुना मण्डितः कौस्तुभस्य रत्नविशेषस्य प्रभावो यस्य तम्। पुनः कथंभूतम्। **असितेति**—असितानि कृष्णकान्तीनि सितानि धवलद्युतीनि यानि रत्नानि तन्निर्मितकुण्डलयोर्द्योतेन संपादितौ शोभमानौ च तौ पक्षौ पार्श्वौ तौ एव विभावितौ यौ पक्षौ शुक्लकृष्णपक्षाविव वा ताभ्याम् आक्षेपो ग्रहणं यस्य तम्। पुनः कथंभूतम्। **अनेकेति**—अनेकानि च तानि माणिक्यानि च पद्मरागरत्नानि तेषाम् आधिक्यं विपुलता तेन आघटितो रचितश्चासौ किरीटश्च तस्य कोटयो अग्राणि तेषु विन्यस्ताः स्थापिता अस्तोका विपुलाः स्तवका गुच्छरूपाः पारिजातप्रसवाः पारिजातकुसुमानि तेषां परिमलस्य सुरभिगन्धस्य जनमनोहरस्य पानपरिचयेन चटुला लुब्धाः चञ्चला वा चञ्चरीका भ्रमरास्तेषां चयैः समूहैः रच्यमानोऽपरोऽन्यो इन्दीवराणां नीलकमलानां शेखराः शिखाविन्यस्तमालास्तेषां कलापो वृन्दं यस्य तम्। पुनः कथभूतम् **गम्भीरेति**—गम्भीरा निम्ना या नाभी तुन्दकूपी सा एव नदः तस्मान्निर्गतो यः उन्नालो दीर्घनालस्तस्य यत् नलिनं कमलं तदेव निलयं गृहं तत्र निलीनः स्थितो योऽसौ हिरण्यगर्भः ब्रह्मा तेन संभाष्यमाणानाम् उच्यमानानां नाम्नां सहस्रेण कलो मनोहरस्तम्। पुनः कथंभूतम्। आखण्डल इन्द्रः जलधिसुता क्षीरोदतनया लक्ष्मीश्च ताभ्यां संवाह्यमानौ सेव्यमानौ क्रमौ चरणौ कमले इव यस्य तम्। पुनः कथंभूतम्।

[पृष्ठ ६८] **अन इति**—अनश्चरणं शकटचक्रम्, सुदर्शनचक्रमित्यर्थः, शङ्खः पाञ्चजन्यः, शार्ङ्गं चापः, नन्दकः खड्गः तैः संकीर्णाः व्यापृताः करा यस्य तम्। पुनः कथंभूतम्। **असुरेति**—असुराणां दैत्यानां वृन्दं समूहः तस्य बन्दीकृता कारागारनिक्षिप्ता याः सुन्दर्यः अङ्गनाः ताभिः संपाद्यमानाः क्रियमाणाश्चामरैर्ये उपचारास्तेषां व्यतिकरो मिश्रणं यस्य तम्। पुनः कथंभूतं तम्। **अरुणेति**—अरुणस्य सूर्यसारथेः अनुजो लघुभ्राता गरुडः तेन विनीयमानाः शिक्ष्यमाणाः सेवागताः आदरकरणार्थं समागताः सुरा देवाः तेषां समाजो यस्य तम्। तथाभूतम् अधोक्षजवेषं विशिष्य विष्णुवेषं गृहीत्वेत्यर्थः। स विद्याधरचरः दीक्षाग्रहणात् पूर्वं विद्याधरत्वं दधानः विद्याधरचरः भूतपूर्वे चरट् विधानात्। समस्तमपि नगरं क्षोभयामास। सापि जिनसमयस्य जिनागमस्य रहस्यस्य गूढतत्त्वस्य अवमायो निश्चयस्तस्मिन् सरस्वतीवेति सरस्वती रेवती कर्णपरम्परया किवदन्तीं वार्ताम् उपश्रुत्य 'सन्ति खलु अर्धचक्रवर्तिनो नवनारायणा नवकौमोदकयास्तन्नामधेयाया गदायाः स्वामिनः। ते तु सम्प्रति न विद्यन्ते। अयं पुनः अपर एव कश्चिदिन्द्रजालिकः इन्द्राणाम् इन्द्रियाणां जालिकः आवारकः मायाकर्म कुर्वाणः कोऽपि लोकानां विप्रलम्भनाय वञ्चनार्थम् अवतीर्णः। इति निर्णीय विनिश्चित्य अविचलितचित्ता दृढचित्ता समासीत् समभवत्। पुनः पाशभृद्दिशि पाशं बिभर्तीति पाशभृत् वरुणः तस्य दिशि पश्चिमदिशि स पश्चिमदिक्पालोऽस्ति। **शिशिरेति**—शिशिरः शीतलः स चासौ गिरिश्च शिशिरगिरिः हिमगिरिरिति भावः तस्य शिखरं तद्वदाकारो यस्य कायस्य स चासौ शाक्वरः बलीवर्दः तम् आश्रितः शरीरस्य (महादेवस्य देहस्य) आभोगः विस्तारो यस्य तम्। पुनः कथंभूतं महादेवम्। **अन्वगिति**—अन्वग्भूता अनु पश्चात् अञ्चति सरति इति अन्वग्भूता महादेवाङ्कोपरि निवासित्वादन्वग्भूता चासौ नगनन्दना हिमालयपुत्री पार्वती, तस्याः निबरीशः पीवरः स चासौ स्तनः कुचः तेन तुङ्गिमउन्नतः स्तिमितः स्तब्धः पृष्ठभागो यस्य तम्। पुनः कथंभूतम्।

**अनिमिषेति**—अनिमिषाः देवाः तेषां वनं नन्दनं तत्र विसर्पिणः प्रसरन्तः ते च ते कर्पूरोद्भिदानां कर्पूरवृक्षाणां गर्भतः सम्भवानां परागाः रजांसि तैः पाण्डुरितः शुभ्रीकृतः पिण्डस्य देहस्य परिकरोऽवयवसमूहो यस्य तम्। पुनः कथंभूतं तम्। **अचिरेति**—अचिरा सूक्ष्मा या गोरोचना गोपित्तमणिः तस्या भङ्गः मर्दनं तस्माज्जातो यः रागः कान्तिः तद्वत् पिङ्गलं पिशङ्गं तत् अम्बकम् नेत्रं तदेव भालसरसो ललाटसरोवरस्य स्वर्णसरोजाकरं हेमकमलवृन्दं यस्य तम्। पुनः कथंभूतं तम्। **अबालेति**—अबालानि महान्ति तानि कपालानि नृकरोटयः तेषां दलकलापाः दलसमूहाः त एव आलवालवलयानि तत्र विलसन्तः मौलयः शिरांसि तेषां मूलानां व्यतिकरो मिश्रणं यस्य तम्। पुनः कथंभूतं तम्। **अतिविकटेति**—अतिविकटानाम् अतिविस्तीर्णानां जटानाम् अन्योन्य-संलग्नकेशानां जूटाः समूहास्तेषां कोटरेषु गर्तासु पर्यटन्ती प्रवहन्ती चासौ गगनाटनतटिनी गगनाटना देवास्तेषां तटिनी गङ्गानदीत्यर्थः, तस्याः तरङ्गा वीचयः त एव करा हस्तास्तेषां केलिः क्रीडा तस्यां कुतूहलितः आश्चर्यविषयीभूतः बालप्रालेयाकरः बालचन्द्रो यस्य तम्। पुनः कथंभूतं तम्। **आभरणेति**—आभरणानि भूषणानि तेषां भङ्गी रचना तया संदर्भिता ग्रथिता ये अनर्भका अशिशवः महान्त इत्यर्थः भुजङ्गाः सर्पाः तेषां भोगाः शरीराणि तेषु संगतानि खचितानि च तानि माणिक्यानि च पद्मरागरत्नानि तेषां विरोकानि तेजांसि तेषां निकरः समूहः तस्य अतिशयस्तेन शाराणि शबलानि च तानि शार्दूलाजिनानि व्याघ्रचर्माणि तैर्विराजमानः शोभमानस्तम्। पुनः कथंभूतं तम्। **उड्डमरेति**—उड्डमरं श्रेष्ठं यत् डमरुकं वाद्यविशेषः (महादेवस्य नर्तनसमये तेन वाद्यमानो वाद्यविशेषः) अजकावं नाम धनुः, कृपाणम् असिः, परशुः परश्वधः, त्रिशूलखट्वाङ्गौ अस्त्रविशेषौ, एते आदौ येषां तेषां संगः संयोगः तेन संकटा व्याप्ताः ये सकोटाः हस्ताः तेषां कोटिविस्तारः अग्रविस्तारः यस्य तम्। पुनः कथम्भूतं तम्। **स्तम्बेरमेति**—स्तम्बेरमो हस्ती तन्नामकोऽसुरः गजासुर इति तस्य वर्मणस्तनुत्रात् द्रवत् गलत् यद्रुधिर रक्तं तेन दुर्दिनीकृतं वृष्टिप्लुतं नर्तावनीप्रतानं नृत्यभूमिपरिसरो यत्र तम्। अनलोद्भव-निकुम्भ-कुम्भोदर-हेरम्ब-भिङ्गिरिटचादयो ये पारिषदः परिषदि साधवः पारिषद्याः सभासदः प्रमथादयः तेषां परिषत् सभा तया परिकल्प्यमानम् बलिविधानं उपहारविधिः यस्य तम्। पुनः कथंभूतम्—**अहिर्बुध्नेति**—अहिर्बुध्नस्य शिवस्य अवसरो अवतरणं तस्य निधानं स्थानम् आकारम् अनुकृत्य स विद्याधरः समस्तमपि नगरं क्षोभयामास।

[ पृष्ठ ६९ ] सापि स्याद्वादसरस्वती एव सुरभिर्धेनुः तस्याः संभावने आदरकरणे बल्लवीव गोपीव वरुणमहीशमहादेवो वरुणनृपालस्य कृताभिषेका राज्ञी इमां जनश्रुति लोकोक्ति कुतश्चित् पश्चिमप्रतोली-सृतात् पश्चिमरथ्याया निर्गतात् विपश्चितः विदुषः निश्चित्य निर्णीय 'निशम्यन्ते श्रूयन्ते खलु प्रवचने तपः-प्रत्यवायवार्ताभद्रा तपोविघ्नस्य वार्तया अभद्रा अकल्याणयुक्ताः रुद्रा एकादश ते पुनः संप्रति स्वकीयाशुभ-कर्मणां विपाकात् उदयात् कालिन्दीसोदरोदरगर्तवर्तिनः कालिन्दी यमुना तस्याः सोदरो यमः तस्य उदरं जठरं तदेव गर्तम् अवटः बिलं तद्विर्वतिनः संजाताः। तस्मात् अयम् अपर एव कश्चित् अन्य एव नरेन्द्रविद्याविनो-दाविदग्धहृदयमर्दी इन्द्रजालिकविद्याचातुर्येण अविदग्धा मुग्धास्तेषां हृदयव्यामोहकः कपर्दी महादेवः इति च प्रपद्य ज्ञात्वा निःसंदिग्धबोधा निरारेकज्ञाना समासिष्ट सम्यक्तया स्वगृह एवोपविष्टाः। पुनः स्वापतेयेश-दिशि स्वापतेयं धनं तस्य ईशः स्वामी कुबेरः तस्य दिशि दिशायाम् उत्तरस्यां दिशायामित्यर्थः। विश्वम्भरात-लादूर्ध्वं समवसरणं विश्वम्भराया भूमेस्तलादूर्ध्वम् उपरि अयोमुखासनदशसहस्राधविकृष्टम्, अयः लोहं मुखे अग्रे येषां ते अयोमुखा बाणाः तेषाम् आसनानि धनूंषि तेषां दशसहस्रं तस्य अर्ध पञ्चसहस्रं धनूंषि तावतान्तरेण दूरनभसि स्थितम्, एकेन्द्रनीलशिलावर्तुलाधिष्ठानोत्कृष्टम् एका अखण्डा चासौ इन्द्रनीलमणिशिला तया निर्मितम् यत् वर्तुलं वृत्तम् अधिष्ठानम् आधारः तेन उत्कृष्टम् उत्तमम्, पुनः कथंभूतम्। अखिलागतिगर्तोत्तरण-मार्गैरिव अखिलाश्च ता गतयः देवमानवतिर्यङ्नारकाश्चतस्रो गतयस्ता एव गर्तास्ताभ्य उत्तरणमार्गैरिव उत्थानमार्गैरिव सोपानसर्गैः आरोहणरचनाभिः चतुर्दिशम् चतुर्षु दिक्षु यथा स्यात्तथा उपाहितावतारं गृहीता-वतारम्, पुनः कथंभूतम्। **अनर्घेति**—अनर्घा विघ्नाः तन्नाशका द्रुघणा इव परशव इव ये मणयः रत्नानि तैः श्लाघ्याः प्रशस्या ये उन्नता नवप्राकारास्तेषामन्तः आचरिता निर्मिता स्पष्टा अष्टविधा अष्टप्रकारा

वसुन्धरा भूमयो यत्र पुनः कथंभूतम् । अनवधीति—अनवधि अमर्यादरूपा निर्माणं रचना येषां तानि माणिक्यानि तैः सूत्रिता खचिता या त्रिमेखला कटनीत्रयं तस्य अलंकाररूपा ये कण्ठीरवाः सिंहाः तैर्युक्तं यत्पीठमासनम् तत्र प्रतिष्ठा उपवेशनं यस्य स चासौ परमेष्ठी च तद्वत्प्रतिमा आकृतिर्यस्य तत् पुनः कथंभूतम् । अशेषत इति—अशेषतोऽभितः समासीना या द्वादशसभाः तासाम् अन्तराले मध्ये विलसन्ति शोभमाना निलिम्पानां देवानाम् आनका वाद्यानि, अशोकानोकहः अशोकवृक्षः प्रमुखानि मुख्यानि प्रातिहार्याणि सुरपुष्पवृष्टिदिव्यध्वनिचामरादीनि अष्टौ तैः शोभितम् । पुनः कथंभूतम् । ईषदिति—ईषत् स्तोकं उन्मिषन्ति स्फुटन्ति विकसन्ति यानि अनिमिषाणां देवानाम् उद्यानस्य नन्दनवनस्य प्रसूनानि पुष्पाणि तेषाम् उपहारः अर्चनम् तस्य हरिचन्दनस्य तन्नामककल्पवृक्षस्य आमोदोऽतिनिर्हारी गन्धः तेन सनाथा युक्ता या गन्धकुटी तदाख्या सभा तया समेतं युक्तम् । पुनः कथंभूतम् । अनेकेति—अनेके मानस्तम्भाः जिनेन्द्रदर्शनार्थं समागतभव्यजनमानहरणे समर्था ये रत्नस्तम्भास्ते मानस्तम्भा उच्यन्ते, तडागाः सरांसि,तोरणानि वन्दनमालाः, स्तूपाः ध्वजा, धूपनिपा धूपघटाः निधानानि नवनिधयस्तैर्निर्भरं भरितम् । पुनः कथंभूतम् । उरगेति—उरगा नागदेवाः नरा मनुष्याः, अनिमिषा देवाः तेषाम् नायकाः स्वामिनः तेषां अनीकानि सैन्यानि तैः आनीतः विहितः स चासौ महामहोत्सवस्तस्य प्रसरो यत्र तत् । अमित इति—भवसेनः प्रभृतिः आदौ येषां ते भवसेनप्रभृतयः ते च ते आर्हताभासाश्च जैनाभासाश्च तैः प्रभाविता यात्रा प्रभुदर्शनार्थं गमनं तस्य अधिकरणम् आधारः तथाभूतं समवसरणं विस्तार्य स विद्याधरः समस्तमपि नगरं क्षोभयामास ।

[पृष्ठ ७०]—सापि जिनसमयोपदेशरसैरावती जिनशास्त्रोपदेशजला ऐरावतनदीव रेवतीराज्ञी इमं वृत्तान्तोपक्रमं जनोदन्तस्य उद्भूतिं कुतोऽपि जैनाभासजनमतेर्ज्ञात्वा, 'सिद्धान्ते खलु चतुर्विंशतिरेव तीर्थंकराः ते चाधुना सिद्धवध्वाः सिद्धकामिन्याः सौधस्य प्रासादस्य मध्ये विहारः क्रीडा येषां ते तस्मात् एष अपरः एव कोऽपि मायाचारी तस्य जिनेन्द्रस्य रूपधारी । इति चावधार्य विनिश्चित्य अविपर्यस्तमतिः यथार्थमार्गे प्रवर्तितबुद्धिः परि सर्वतः आत्मधामन्येव स्वगृहे एव आत्मरूपे गृहे वा प्रवर्तितम् आचरितम् धर्मकर्मणां चक्रं वृन्दं यत्र तस्मिन् सुखेन आसांचक्रे उवास । (पुनः स क्षुल्लकः मुनिवेषं धृत्वा रेवतीं परीक्ष्यामूढतावतीं निश्चित्य तामभ्यनन्दयत्) पुनः स बहुकूटकपटमतिः बहुकूटा बहुस्थिरा कपटे मतिर्यस्य स दर्शयतिस्ताभिः विविधस्वभावाभिः आकृतिभिः ब्रह्माहरिहरजिनाकृतिभिः तदास्वनितं तस्या रेवत्या आस्वनितं मनः अक्षुभितं निश्चलम् अवगत्य ज्ञात्वा उपात्तो गृहीतः मासोपवासिनो मुनेर्वेषो येन स क्षुल्लकः, क्रियेति—लोकानाम् आचरणं दृष्ट्वा अनुमातुं योग्यः सकलेन्द्रियप्रवृत्तिर्येन तथाभूतः क्षुल्लकः गोचराय आहारार्थं तदालयं रेवत्या गृहं प्रविष्टः तया स्वयमेव यथाविधि प्रतिग्रहादिनवविधीन् कृत्वा अनतिक्रम्य प्रतिपन्नचेष्टः कृतादरक्रियः तथापि विद्याबलात् कथंभूतात् । अनलनाशः अग्निपाचनशक्तिस्तम्भनम्, वमनादिप्रकारः ताभ्यां प्रबलात् कृतेति—कृतम् अनेकं नानाविधं मानसस्य उद्वेजनकारकं पीडाकरं वैयात्यम् औद्धत्यं येन स रेवत्याः क्वचिद् कस्मिन्नपि कार्ये मनोमौर्ख्यम् अवीक्षमाणः, रेवतीमेवमवदत् । 'अम्ब मातः, सर्वाम्बरचरेति—सर्वे च ते अम्बरचरा विद्याधराः तेषां चित्तानाम् अलंकारभूतं भूषणभूतं यत्सम्यक्त्वरत्नं तस्य आकरभूमे हे रेवति मातः, दक्षिणमथुरायां प्रसिद्धाश्रमपदः सर्वगुणरत्ननिर्माणकारणविदूरपर्वतरत्नभूमिः, श्रीमुनिगुप्तमुनिः, मदर्पितरचनैः वचनैः मम अर्पिता रचना येषां तथाभूतैः वचनैः पुनः कथंभूतैः । परिमुषितेति—परिमुषितानि विनाशितानि अशेषाणि कल्मषाणि पापानि यैस्तैः सवनैरिव जिनाभिषेकैरिव, पुनः कथंभूतैः ? अखिलेति—अखिलाश्च ते कल्पाः सकलभूषणानि तेषां परम्परा संमूहस्तस्याः विरोचनभूतैः किरणैरिव भवतीं पूज्यां रेवतीम् अभिनन्दयति धर्मवृद्ध्याशिषा सत्करोतीति भावः । रेवती कथंभूता, भक्तिरसेति—भक्तिरसवशेन उल्लसद् विकसत् च तल्लपनं मुखं तस्य रागः कान्तिस्तेनाभिरामं यथा स्यात्तथा ससंभ्रमं सादरं च सप्तप्रचारोपसदैः सप्त च ते प्रचाराः सप्तप्रचाराः सप्तगमनानि सप्तचरणन्यासाः तानि उपसीदन्ति इति सप्तप्रचारोपसदानि तैः पदैः पदनिक्षेपैः तां दिशमाश्रित्य श्रीमुनिगुप्तमुन्यधिष्ठितदिशमवलम्ब्य श्रुतविधानेन आगमोक्तविधिना विहितप्रणामा कृतवन्दना प्रमोदमानाः आह्लादं प्राप्नुवन्तः मनःपरिणामाश्चेतोवृत्तयो यस्याः

सा तदर्पितानि क्षुल्लकमुखेन श्रीमुनिगुप्तमुनिना दत्तानि आशीर्वचनान्यापादिता ग्राहितवती । भवति चात्र श्लोकः—एषा रेवती कादम्बताक्ष्यंगो-सिंहपीठाधिपतिषु कादम्बाः हंसाः, ताक्ष्यों गरुडः, गौः बलीवर्दः, सिंहः प्रतीतः तैर्युक्तानां पीठानाम् आसनानाम् अधिपतयः स्वामिनः क्रमेण ब्रह्माहरिहरजिनेन्द्राः तेषु आगतेष्वपि एषा रेवती मूढतावती मौढ्ययुक्ता नाभूत् न भवति स्म ॥१७३॥

इत्युपासकाध्ययने अमूढतापरिवृढो नामैकादशः कल्पः ॥११॥

## १२. धर्मोपबृंहणार्हणो नाम द्वादशः कल्पः

[ पृ० ७१ ] उपगूहेति—धार्मिकजनदोषझम्पनम् उपगूहः, दर्शनात् चरणाद्वा चलतां प्रत्यवस्थापनं तत्र स्थितीकारः उपगूहश्च स्थितीकारश्च उपगूहस्थितीकारौ । यथाशक्ति अज्ञानतिमिरम् अपसार्य जिनशासनमाहात्म्यप्रकटनं यथाशक्ति प्रभावनम् । वात्सल्यं च साधर्मिकान् प्रति निष्कपटं यथायोग्यमादरकरणम् । एते गुणाः सम्यक्त्ववैभववृद्धयं भवन्ति ॥१७४॥ तत्र—क्षान्त्येति—क्षान्त्या क्षमया क्रोधाभावेन, सत्येन प्राणिहितवचसा, शौचेन लोभाभावेन, मार्दवेन विनयेन मदाभावेन, आर्जवेन च अकपटभावेन, तपोभिः संयमैः दानैश्च समयबृंहणं शासनवृद्धि कुर्यात् ॥१७५॥ सवित्रीवेति—माता यथा तनूजानां पुत्राणाम् अपराधं निगूहेत् आच्छादयेत् तथा सधर्मसु समानधर्मवत्सु गृहिषु मुनिषु वा दैवात् प्रमादाचरणात् सम्पन्नं प्राप्तं अपराधं दोषं गुणसंपदा निगूहेत् आच्छादयेत् ॥१७६॥ अशक्तस्येति—अशक्तस्य असमर्थस्य अपराधेन दोषेण धर्मः मलिनः दूषितः भवेत् किम् । भेके मण्डूके मृते सति पयोधिः समुद्रः पूतिगन्धितां दुर्गन्धितां न हि याति न गच्छतीति । यस्तु जनः जातं दोषं न गूहति, यस्तु धर्मम् न बृंहयेत् न वर्धयेत् तत्र जिनागमबहिःस्थिते जिनशास्त्रबहिर्भूते जने । सम्यक्त्वं सम्यग्दर्शनं दुष्करं दुर्लभम् ॥१७७॥

[ पृ० ७२ ] ( उपगूहनाङ्गकथा ) श्रूयतामत्रोपाख्यानम्—अत्र सम्यग्दर्शनस्य उपगूहनाङ्गे उपाख्यानं पूर्वमहापुरुषस्य प्रथितस्य चरितं श्रूयताम्—सुराष्ट्रदेशेषु पाटलिपुत्रे कथंभूते । मृगेक्षणेति—मृगस्येव ईक्षणे नयने यासां ता मृगेक्षणा हरिणनेत्रा युवतयः तासां पक्ष्मभिः सहितानि पक्ष्मलानि तानि च तानि मूलानि अग्राणि येषां तानि च अवलोकितानि कटाक्षाः तैः अपहसितं तिरस्कृतम् अनङ्गास्त्राणां मदनबाणानां तन्त्रम् कार्यम् कामिपुरुषमनोवेधनम् यत्र [यशोध्वजस्य भूभुजः सुवीरो नामसूनुः पुत्रः वीरपुरिषदमवादीदिति संबन्धः] कथंभूतस्य यशोध्वजस्य राज्ञः । सुसीमेति—सुसीमाख्या या कामिनी राज्ञी तस्याः मकरध्वजस्य इव मदनस्येव सुवीरः पुत्रोऽभूत् । कथंभूतः सः । पराक्रमेति—पराक्रमेण निजशौर्येण अक्रमेण युगपत् आक्रान्ताः वशीकृताः सकलाः प्रवीराः महाभटा येन सः पुनः कथंभूतः नृपसूनुः । अनासादितेति—विद्याभिः वृद्धाः विद्यावृद्धाः अनासादितः अलब्धं विद्यावृद्धसंयोगात् समयत्वम् आगमाध्ययनं तस्मात् अप्राप्तविद्यावृद्धजनसमागमशास्त्रत्वात्, विटेति—विटाः कामुकाः विदूषकाः पीठमर्दाः वैहासिकाः तैः दूषित-मलिनचित्तत्वात्, प्रायेण बहुशः परेति—परेषां द्रविणं धनम् दाराः स्त्रियश्च तस्य तासां चादानं ग्रहणम् तत्र उदारा महती क्रिया यस्य तथाभूतः स यशोध्वजसूनुः सुवीरः क्रीडार्थं क्रीडावने गतः । कितवेति—कितवा वञ्चकाः किराताः म्लेच्छाः पश्यतोहराः पश्यन्तं जनम् अनादृत्य हरन्तीति पश्यतोहराश्चौराः ते च ते वीराः भटास्तेषां परिषदम् सभाम् एवम् अवादीत् [ यदवादीत् तदुच्यते ]—अहो जनाः, विक्रमेति—विक्रमः शौर्यम् स एव एकः मुख्यो रसः अस्ति येषां ते विक्रमैकरसिकाः शौर्यैककार्यकारिणः, तेषु महासाहसिकेषु अतीव बलात्कारेण धनहरणादिकार्यकारिणः तेषु भवत्सु मध्ये किं कोऽपि मम प्रार्थनेति—मम प्रार्थनाया याञ्चायाः अतिथिरूपायाः मनोरथस्य सारथिः मम याचनाभिलाषपूरणप्रवीण इत्यर्थः किं कोऽपि अस्ति । यः खलु पूर्वदेशस्य वेशः वेश्याजनसमाश्रयः तेन अवाप्तं कीर्तनं येन तस्मिन् तामलिप्तिनगरे पुण्येति—पुण्यं सुकृतम्, पुरुषकारः प्रयत्नस्ताभ्याम्, आत्मेति—आत्मसात्कृतः स्वायत्तीकृतः रत्नाकरः मणिसमूहः रत्नखनिर्वा येन तस्य जिनेन्द्रभक्तनाम्ना अवतारो यस्य वणिक्पतेः वैश्यस्वामिनः, जिनसद्मनि जिनगृहे कथंभूते । सप्ततलेति—

सप्ततलानि भूमयो यस्य स चासौ अगारः गृहं तस्य अग्रिमा सप्तमा या भूमिः सप्तमं यत्तलं तां भजतीति भाक् तस्मिन् भामिनि, ( अगारे गत्वा यः वैडूर्यमणि आनयति, स पारितोषिकं लभेत ) तत्र स्थितं वैडूर्यमणि आनयति, कथम्भूतं । छत्रेति—छत्राणां त्रयं छत्रत्रयं तस्य शिखण्डं शिखाग्रं तस्य मण्डनीभूतम् अलंकाररूपम् अद्भुतम् विस्मयावहम् अद्भुतश्चासौ उद्योतश्च प्रकाशः तेन सनीडं सहितं वैडूर्यमणिम् इन्द्र-नीलमणिम्, आनयति तदानेतुः तम् आनयतः पुनः अभिलाषविषयस्य स्वेप्सितवस्तुनः निषेकः दानं तदेव पारि-तोषिकम् परितोषस्य संतोषस्य मूल्यमिव। तत्र च सदर्पः साहङ्कारः सूर्यो नाम समस्तमलिम्लुचानाम् सकल-चोराणाम् अग्रेसरः पुरोगामी चोरः किलैवम् अलापीत् अब्रवीत् । 'देव कियद्गहनमेतत् यतः योऽहं देवप्रासादात् प्रभोः प्रसादमुपलभ्य वियदवसाने नभसः अवसाने अन्ते इतोऽतिदूरे विरचितामरावतीपुरपरमेश्वरस्य नभसोऽन्ते निर्मितामरावतीनगरस्वामिनः पुरन्दरस्य इन्द्रस्यापि चूडालङ्कारनूतनं शिखाभूषणनवं मणिम्, पातालस्य अधोभुवनस्य मूले निलीनभोगवतीनगरस्य स्थितभोगवतीपुरस्य उरगेश्वरस्यापि उरगाणां नागदेवानाम् ईश्वरस्य स्वामिनः फणगुम्फनाधिक्यं फणानां स्फटानां गुम्फनाधिक्यं ग्रथनात् आधिक्यं यस्य, फणानामुपरि अधिकतया भासमानं माणिक्यं शोणरत्नम् आहरामि तस्य मे मनुष्यमात्रपरित्राणं मनुजैरेव रक्ष्यमाणधरण्याः मणि रत्नम् । कथंभूतं लोचनेति—लोचनयोः गोचरं विषयं अगारविहारं अगारे गृहे विहारो यस्य गृहे वर्तमानं तं वैडूर्यमणि अपहरतश्चोरयतः कियन्मात्रं महासाहसम् एतत्साहसं लीलयाहं करिष्यामीति भावः सूर्यचोरस्य । इति शौर्यं गर्जित्वा प्रघुष्य निर्गत्यागत्य च गौडमण्डलं गौडदेशम् । अपरमुपायं अपश्यन् मणिमोषाय रत्नाप-हरणाय, गृहीतक्षुल्लकवेषश्चान्द्रायणव्रताचरणक्रमैः पक्षपारणाकरणैः पक्षोपवासानन्तरं पारणाचरणैः, मासोप-वासप्रारम्भैः अपरैरपि अन्यैरपि तपःसंरम्भैः तपसां उद्यमैः क्षोभिताः नगाः पर्वताः नगराणि पुराणि, ग्रामाः प्राकारपरिखादिरहिताः हट्टादिशून्या वसतयः ग्रामाः, तेषु निवासशीला ये ग्रामणीगणाः अग्रेसरजनास्ते येन क्षोभं नीताः स सूर्यचोरः क्रमेण जिनेन्द्रभक्तभावस्य आधारस्थानमभवत् । जिनेन्द्रभक्तः श्रेष्ठी तद्गुणेष्वनु-रक्तमतिरभवत् ।

[ पृष्ठ ७३-७४ ] एकान्तभक्तिसक्तः एकान्ता चासौ भक्तिस्तस्यां सक्तः अविचलभक्तियुक्त इति भावः, स जिनेन्द्रभक्तः तं मायेति—मायया कपटेन आत्मसात्कृतः स्वायत्तीकृतः प्रियतमाकारः क्षुल्लकवेषो येन एवंभूतं तम् अपरमार्थाचारम् अपरमार्थोऽसत्यो मायापरिप्लुतः आचारो यस्य तम् अजानन्, तं चोरं श्रेष्ठी एवमवदत्—आर्यवर्य आर्येषु व्रतिषु वर्यः श्रेष्ठः तत्सम्बोधनं हे आर्यवर्य, अवश्यम् अनेकेति—अनेकानि च तानि अनर्घ्याणि अमूल्यानि रत्नानि तैः रचितो जिनदेहानां संदोहः समूहो यत्र एवंविधे अस्मद्देवगृहे त्वया तावत्कालम् आसितव्यम् उषितव्यं निवासः कार्यः यावत्कालम् अहं बहिः अन्येषु देशेषु यात्रां विधाय समायामि, इत्थं याचतः याचनां कुर्वतः श्रीजिनभक्तस्य स क्षुल्लक एवम् अवदत् अप्रकटकूटकपटक्रम अप्रकटः अज्ञातः कूटः दाहकः कपटक्रमः येन तत्सम्बोधनं हे अप्रकटकूटकपटक्रम प्रियतम श्रेष्ठिन्, मैवं भाषिष्ठाः मैवं वादीः । यस्मात्कारणात् अङ्गनाजनसंकीर्णेषु स्त्रीजनव्याप्तेषु द्रविणोदीर्णेषु द्रविणं धनम् उदीर्णं प्रकटं दृश्यते येषु धनसमृद्धेषु देशेषु विहितौकसां कृतवसतीनाम् उषितानां इति भावः प्रायेण अमलिनमनसामपि बहुशः स्वच्छमतीनामपि निर्मोहानामपीत्यर्थः, सुलभोदाहाराः सुलभजल्पाः खलु खललोकावज्ञाः । श्रेष्ठी-देश-यतीश, न सत्यमेतत्, अपरिज्ञातपरलोकव्यवहारस्य, स्वर्गनरकादिः परलोकः तत्प्राप्तिः सदाचारेण असदा-चारेण च क्रमशो भवतीति व्यवहाराभिज्ञस्य, अवशेन्द्रियव्यापारस्य अजितेन्द्रियस्य इन्द्रियव्यापारा यत्र नयन्ति तत्र तदधीनो भूत्वा गच्छतः पुरुषस्य बहिः संगे बाह्यपरिग्रहे कनककामिन्यादौ स्वान्तं मनो विकृतताम् नाम विकारं प्राप्नोतु नाम न पुनर्यथार्थदृशां परमार्थावलोकिनाम् अनन्यसामान्यसंयमस्पृशाम् अनितर-साधारणसंयमं पालयताम्, भवादृशां युष्मादृशां पूज्यानां मुनिवर्याणाम् । इति बह्वाग्रहं देवगृहपरिग्रहाय देवगृहे भवान्निवसत्विति तम् अयथार्थं मुनिं कपटिनं मुनिवेषं संप्रार्थ्य प्रार्थयित्वा, कलत्रपुत्रमित्रबान्धवेषु पत्नीतनयसुहृज्ज्ञातिषु अकृतविश्वासः अविहितविस्रम्भः, मनःपरिजनदिनशाकुनपवनानुकूलतया नगरबाहिरिकायां पुरबाह्यप्रदेशे प्रस्थानम् अकार्षीत् प्रस्थानं प्रयाणम् अकरोत् । मायामुनिस्तस्मिन्नेव अवसरे तस्मिन्नेव

क्षणे तदगारं तद्गृहम् आकुलपरिवारं स्वस्वकार्यकरणतत्परपरिजनम् अवबुध्य ज्ञात्वा अवशिष्टायां रात्रौ विहितमणिचौर्यः तन्मरीचिप्रचारात् तद्रत्नकिरणप्रसरणात्, आरक्षकैः तलवरैः अनुद्रुतशरीरः तीव्रेण जवेन अनुगतदेहः, पलायितुमशक्तः तस्यैव धर्महर्म्यनिर्माणपरमेष्ठिनः धर्म एव हर्म्यं गृहं तस्य निर्माणे रचनायां परमेष्ठिनः ब्रह्मणः इव वर्तमानस्य श्रेष्ठिनः प्रस्थानावासनिवेशम् आविवेश प्रयाणगृहप्रवेशम् अकरोत् । श्रेष्ठ्यपि दुरालापबहलात् गालिप्रदानादि-दुर्भाषणप्रचुरात् तत्तलवरादिकलकलात्, द्रागृविद्राणनिद्रः शीघ्रम् अपगतस्वापः, तदैव मुषामुनिमुद्रम् अवसाय धृतमायायतिरूपं निश्चित्य, स्वभावतः शुद्धाप्तागमपदार्थ-समाचारनयस्य निर्दोषपरमजिनशासनजीवादिवस्तुसार्थसम्यगाचारनयव्यवहारस्य निःशेषान्यदर्शनव्यतिरिक्ता-न्वयस्य सकलान्यमतभिन्नसम्प्रदायस्य जिनशासनस्य, अविदितपरमार्थजनापेक्षया अज्ञातयथार्थलोका-पेक्षया दुरपवादो जिनमतनिन्दा माभूत् मा जायताम् इति विचिन्त्य समस्तमपि आरक्षकलोकम् एवमभणीत्—सकलमपि तलवरवृन्दम् इत्थमभाषत । अहो दुर्वाणीका अहो दुर्वाचाटाः, किमित्येनं संयमिनम् अभल्लेन अभद्रभाषणेन संभावयन्ति तिरस्कुर्वन्ति भवन्तः । यतः एष खलु महातपस्विनामपि महातपस्वी, परमनिःस्पृहा-णामपि परमनिःस्पृहः, प्रकृत्यैव स्वभावत एव महापुरुषः मायामोहरहितचित्तवृत्तिः, अस्मदभिमतेन अस्माकं संमतिं लब्ध्वा मणिमेनम् आनयन् कथं नाम तेन भावेन मायामोहादिदिग्धचित्तेन संभावनीयः संकल्प्यः । तस्मात् प्रतूर्णं शीघ्रम् अभ्यर्णीभूय समीपं गत्वा प्रसन्नवपुषः प्रशान्तशरीराः प्रणमद्देहाः भवन्तः सदाचारकैर-वार्जनज्योतिषं सम्यगाचारकुमुदविकसने चन्द्रम् एनं क्षमयत, स्तुत प्रशंसत, नमस्यत नमत, वरिवस्यत च पूजयत च । भवति चात्र श्लोकः—भक्तवाक्परः भक्त इति—वाक्शब्दः परः अग्रे यस्य स जिनेन्द्रः जिनेन्द्रभक्तश्रेष्ठी इत्यर्थः । मायासंयमनोत्सूर्पे कपटसहितसंयमस्य वृद्धिं कुर्वाणे सूर्ये सूर्पचौरे रत्नापहारिणि वैडूर्यमणेश्चौर्यं कुर्वाणे, दोषम् अपवादम् अयं चोर इति निन्दां निषूदयामास निरस्तां चक्रे ॥१८९॥

इत्युपासकाध्ययने धर्मोपबृंहणार्हणो नाम द्वादशः कल्पः ॥१२॥

## १३. वारिषेणकुमारप्रव्रज्याव्रजनो नाम त्रयोदशः कल्पः

परीषहेति—परीषहात् क्षुदादिद्वाविंशतिपरीषहेषु एकस्मात्कस्मादपि परीषहात् पीडायाः उद्विग्नं भीतम्, व्रतात् अहिंसादिमहाव्रतपालनाच्च उद्विग्नं खिन्नम्, अजातागमसंगमम् आगमस्य जिनशास्त्रस्य संगमो-ऽध्ययनम् अजातः आगमसंगमो यस्य स अनधीतजिनागमः एवंरूपं समयस्थितं कथंभूतं भ्रश्यदात्मानं भ्रश्यन् जिनधर्मत्यागं कुर्वन् आत्मा यस्य तं समयी धार्मिकः स्थापयेत् ॥१९०॥

[पृष्ठ ७५] तपस इति—तपसः प्रत्ययवस्यन्तं भ्रश्यन्तं संयतं संयमिनं यः समयी न रक्षति । नूनं सत्यमेव स समयस्थितिलङ्घनात् जिनमतस्थितेः लंघनात् । सद्दर्शनबाह्यः सम्यग्दर्शनाद्बाह्यः मिथ्यात्विजनतुल्यः ज्ञेयः ॥१९१॥ नवैरिति—नवैः सन्दिग्धनिर्वाहैः सन्दिग्धः संशययुक्तः निर्वाहः जिनधर्मप्रतिपालनं येषां ते सन्दिग्धनिर्वाहास्तैः जनैः गणवर्धनं नवैः जनैः गणवर्धनं स्वसङ्घजनसंख्यावृद्धिं कुर्यात् । एकदोषकृते एकस्मिन्दोषे जाते सति प्राप्ततत्त्वः ज्ञाततत्त्वार्थो नरः कथं त्याज्यः । दोषे जातेऽपि तस्य उपगूहनं कार्यमिति भावः ॥१९२॥ यस्मात् समयकार्यार्थः शासनसाध्यार्थः नानापञ्चजनाश्रयः बहुजनसन्दोहाधारः अतः उपदिश्य यो यस्मिन् कार्ये धर्मप्रभावनादिकार्ये योग्यः तं जनं तत्र योजयेत् ॥१९३॥ उपेक्षायामिति—सधर्मणो जनस्य उपेक्षायां कृतायां स समयी तत्त्वात् जिनशासनात् अधिकं दूरं गच्छेत् तं त्यजेत् तथा तद्विनाशं कर्तुमिच्छेत् । एवम् अनिष्टमाचरतस्तस्य संसारो दीर्घो भवेत् समयश्च जिनशासनं हीयते क्षीणो भवति ॥१९४॥

[ पृष्ठ ७६ ] ( स्थितिकरणे वारिषेणस्य कथा ) श्रूयतामत्रोपाख्यानम्—अत्र स्थितिकरणगुणे कथां शृण्वन्तु । वारिषेणराजसूनोः कथा—मगधाभिधेषु देशेषु राजगृहेति अपरनाम्नः अन्याभिधाया अवसरः प्रसंगो यस्य एवंभूते पञ्चशैलपुरे चेलिनी महादेव्याः प्रणयं स्नेहं क्रीणातीति क्रेणिकः तस्य श्रेणिकस्य कथंभूतस्य । गोत्राकलत्रस्य गोत्रा पृथ्वी एव कलत्रं भार्या यस्य 'गोत्रा कुः पृथिवी पृथ्वी' इत्यमरः ।

पृथ्वीभार्यस्य, पुत्रः सकलवैरिपुराभिषेणः समस्तशत्रुनगराणि प्रतिसेनया सहितोऽभिषेणो अभिद्रवः 'यस्य स वारिषेणो नाम। स किल कुमारकाल एव संसारसुखसमागमविमुखमानसः परमवैराग्योद्गूर्णः परमं वैराग्यं संसारभीतिजातविरक्तिभावः उद्गीर्णः प्रकटीभूतो यस्य, पुनः कथंभूतो वारिषेणः। पूर्णनिर्णयरसः पूर्णः अध्यात्मविषये निर्णयरसः निश्चयरसो यस्य, पुनः कथंभूतः। श्रावकधर्मस्याराधनेन धन्या समृद्धा या धिषणा बुद्धिस्तया, गुरूपासनसंवीणतया च गुरूणां निर्ग्रन्थाचार्याणाम् उपासनासु पूजासु संवीणतया तत्परतया च सम्यगवसितोपासकाध्ययनविधिः सम्यक्तया अवसितः निश्चितः उपासकाध्ययनानां श्रावकाचरणविषयभूतानाम् अध्ययनानां ज्ञानपाठानां विधिर्येन सः, पुनः कथंभूतः आश्चर्यशौर्यनिधिः विस्मयावहपराक्रमाणां निधानम्, स वारिषेण एकदा प्रेतभूमिषु प्रेतानां शवानां भूमिषु भूतवासरविभावर्यां कृष्णचतुर्दशीनिशायां रात्रिप्रतिमास्थितो बभूव। रात्रिप्रतिमायोगेन श्मशाने अध्यात्मध्यानरतोऽभवत्। अत्रावसरे अस्मिन्प्रसंगे क्षपायाः निशायाः परिणतः आभोगः गाढान्धकारत्वादिर्यत्र खलु निशाया मध्यभागे मगधसुन्दरीनामया पण्याङ्गनया पण्या पणेन मूल्येन लभ्या या अङ्गना स्त्री पण्याङ्गना तया वेश्ययेत्यर्थः। आत्मनि स्वस्मिन् विषये अतीवासक्तचित्तवृत्तिप्रसरो अतीव सुतराम् आसक्ता लम्पटा या चित्तवृत्तिः मनोवृत्तिः तस्याः प्रसरो यस्य एवंभूतो मृगवेगनामा वीरः शयनतलम् आपन्नः आगतः सन् एवमुक्तः—राजश्रेष्ठिनो धनदत्तनामनिष्ठस्य कीर्तिमतीनामायाः प्रियतमायाः स्तनमण्डलोदारम् अलङ्कारसारं हारमिदानीमेव आनीय यदि विश्राणयसि तदा त्वं मे रतिरामः अन्यथा प्रणयविराम इति। प्रियतमायाः अत्यन्तवल्लभायाः, स्तनमण्डलयोः कुचमण्डलयोः उदारं शोभामापादयन्तम्, अलङ्कारेषु भूषणेषु सारं श्रेष्ठं विश्राणयसि ददासि, त्वं मे रतिरामः रतौ रतिसुखे रमयतीति रामः अन्यथा प्रणयविरामः प्रणयस्य प्रेम्णः विरामः अवसानम् इति। सोऽपि अवशानङ्गवेगो मृगवेगः न वशो अधीनः अनङ्गवेगः कामस्य तीव्रता यस्य, कामवेगम् असहमानः इति भावः। तद्वचनादेव तस्याः मगधसुन्दर्या भाषणादेव तदायतनात् तस्या गृहात् निःसृत्य निर्गत्य, धनदत्तस्यागारं धनदत्तश्रेष्ठिनो हर्म्यम् अभिसृत्य आगत्य च निजकलाबलात् स्वकलाचातुर्यात् आचरितहारापहारः आचरितो विहितं हारस्य अपहारः मोषणं येन, तद्दिति—तस्य हारस्य किरणानां रश्मीनां निकरः समूहः तेन निश्चितश्चरणयोश्चारः यैः सः तलारानुचरैः आरक्षकपुरुषैः अनुसृतः अनुगतः मृगायितुं मृग इव आचरितुम् असमर्थः पलायितुं अक्षमः व्युत्सर्गावेगं व्युत्सर्गस्य शरीरममत्वत्यागस्य आवेगम् उत्कटतां उपेयुषः जग्मुषः तस्य वारिषेणस्य पुरतः हारम् अपहाय त्यक्त्वा तिरोदधे अन्तर्हितोऽभवत्।

[पृष्ठ ७७] तदनुचराः तलवरसेवकाः तत्प्रकाशविशेषवशात् तस्य हारस्य कान्तिविशेषवशात् "वारिषेणोऽयं ननु राजकुमारः पलायितुम् अक्षमः पित्रोः चेलनाश्रेणिकयोः श्रावकत्वात् उपासकत्वात् इमां जिनेश्वरबिम्बसदृशीम् आकृतिं स्वीकृत्य पुरोऽग्रतः स्थापितहारः ममास सम्यक् आस स्थितः इत्येवममुष्य विचारं कृत्वा प्रविश्य च विश्वंभराधीशवेश्मनिवेशं विश्वंभरायाः पृथिव्याः अधीशः स्वामी श्रेणिकनृपः तस्य वेश्मनः गृहस्य निवेशम् अन्तःस्थानं एतत्पितुः एतस्य वारिषेणस्य पितुः श्रेणिकस्य प्रतिपादितवृत्तान्ताः कथितप्रवृत्तयः—दण्ड इति—दण्डो हि अपराधिशासनोपायः स केवलः एक एव इमं लोकम् इहलोकम्, परं च परलोकं च स्वर्गादिकं रक्षति इहलोके प्रजासु विनियुक्तो राज्ञा दण्डोपायोऽनीतेस्तां रक्षति ततश्च प्रजानाम् अनीते रक्षणात् स्वर्गप्राप्तिर्जायते इति भावः। राज्ञा नृपेण शत्रौ पुत्रे च यथादोषं दोषम् अनतिक्रम्य धृतः यस्य यादृग्दोषः तादृगेव तस्य शासनं क्रियेत चेत् राज्ञा स दण्डः उभयोः समं धृत इति भवति। तथा समदण्डो राजा उभयलोकरक्षको भवतीति भावः ॥१९५॥ इति वचनात्, न हि महीभुजां गुणदोषाभ्याम् अन्यत्र मित्रामित्रव्यवस्थितिः राज्ञां गुणदोषौ मुक्त्वा मित्रशत्रुव्यवस्था न भवति। यत्र गुणाः सन्ति स एव नरो मित्रं यत्र च दोषाः स शत्रुरिति व्यवस्था राजकृता भवति। तत् तस्मात् अस्य वारिषेणस्य रत्नहारापहारोपहतचरित्रस्य रत्नहारस्य अपहारो मोषणं तेन उपहतं नष्टं चरित्रं सदाचारप्रवृत्तिर्यस्य पुत्रशत्रोः पुत्ररूपेण शत्रोः न प्राणप्रयाणादपरश्चण्डो दण्डः समस्ति। अस्य प्राणघात एव समुचितं शासनं विद्यते इति न्यायनिष्ठुरतायाः आवेशो यस्मिन् तथाभूतात्पितुरादेशात् आज्ञायाः आगत्य तं सदाचारमहान्तं सदाचारेण समीचीनेन आचारेण श्रावकव्रतादि-

पालनेन महास्त्रं पूर्व्यं प्रहरन्तः ते तलवरानुचराः देवताभिः कृतानि प्रातिहार्याणि श्रेणिकभूपाय न्यवेदयन्। शरविसरान् बाणसमूहान्, प्रसूनशेखरतां पुष्परचितशिखामालात्वम्, भ्रमिलमण्डलानि चक्रमण्डलानि कर्ण-कुण्डलताम्, कृपाणनिकरान् खड्गसमूहान् मौक्तिकहारत्वम् एवम् अपराण्यपि अन्यान्यपि अस्त्राणि भूषणताम् अलङ्कारताम् अनुसरन्ति भजन्ते। निबुध्य ज्ञात्वा तद्ध्यानेति—तस्य वारिषेणस्य ध्यानधैर्येण ध्यानस्य स्थैर्येण प्रवृद्धानन्दतया स्वयमेव पुरदेवतानां करैः विकीर्यमाणामरतरुप्रसवोपहारं नगरदेवीनां हस्तैः प्रवृष्यमाण-सुरवृक्षपुष्पबलिर्यत्र तम्। अम्बरेति—अम्बरे नभसि चरन्तीति अम्बरचरा आकाशगामिनस्ते च ते कुमारा देवविशेषाः तैः आस्फाल्यमानाश्च वाद्यमानाश्च ते आनकाश्च दुन्दुभयः तेषां निकरः समूहो यत्र तम्। अनिमिषेति—अनिमिषा देवाः तेषां निकायः समूहः तेन कीर्त्यमानाश्च प्रशस्यमानाश्च ताः स्तुतयस्तासां व्यतिकरो मिश्रणं यत्र, तम् इतस्ततो महामहोत्सवावतारं च निचाय्य अवलोक्य, सत्वरम् अतिभीतिविस्मि-तान्तःकरणाः अतिशयभयेन विस्मितानि आश्चर्यं प्राप्तानि अन्तःकरणानि मनांसि येषां ते तलवरानुचराः श्रेणिकधरणीश्वरायेदं निवेदयामासुः।

[ पृ० ७७ ] नरवरः सोत्तालं सत्वरं तत्रागतः सन् कुमारेति—कुमारस्याचारः कुमारस्य सत्प्रवर्तनं तस्माज्जातो योऽनुरागः स्नेहः तस्य रसेन उत्कटतया उत्सारितमृतिभीतिसंगात् उत्सारितो निराकृतः मृति-भीतिसंगः, मरणभयसम्पर्को येन तस्मात् मृगवेगात् वीरात् अवगतो ज्ञातः आमूलं मूलमारभ्य आदित इति भावः वृत्तान्तः प्रवृत्तिः येन स श्रेणिकः तं कुमारं साधुं क्षमयामास। क्षमाम् अयाचतेति भावः। नृपनन्दनोऽपि श्रेणिकपुत्रो वारिषेणोऽपि प्रतिज्ञातसमयावसाने इयन्तं कालं रात्रिप्रतिमायोगं बिभर्मीति प्रतिज्ञातस्य समयस्य कालस्य अवसाने अन्ते, ( वारिषेणः सुरदेवस्यान्तिके तपो जग्राह ) एवं विचार्य दीक्षा जग्राह। कं विचारं कृत्वा। 'प्राणिनां सुलभसम्पाताः खलु संसारे व्यसनविनिपाताः' खलु अस्मिन् संसारे व्यसननिपाताः संकटानाम् आघाताः सुलभागमाः जीवानाम्। 'तदलमत्र कालकवलनावलम्बेन विलम्बेन' तस्मात् अत्र भवे विलम्बेन कालयापनेन अलं कालयापनं मया न क्रियते। यतः तत्कालयापनं कालकवलनालम्बनं कालस्य यमस्य कवलनाय भक्षणाय अवलम्बनम् अधिकरण भवेत्। 'एषोऽहमिदानीम् अवाप्तयथार्थमनीषोन्मेषः तावदात्महितस्योपस्करिष्ये'। एषो अहं ( वारिषेणः ) इदानीमधुना अवाप्तायाः लब्धायाः यथार्थमनीषायाः परमार्थभूतायाः मनीषायाः मतेः उन्मेषः उदयो जन्म येन स तथाभूतोऽहम् अभवम्। अधुना मम यथार्थात्मस्व-रूपग्राहिण्या बुद्धेर्जन्म जातमिति भावः। तावत् प्रथमम् आत्महितस्य उपस्करिष्ये आत्महिते पुनः पुनर्यत्नं करिष्ये इति भावः। इति निश्चयमुपश्लिष्य इति निश्चयं कृत्वा। आभाष्य च पितरं जनकस्य श्रेणिकस्य अनुमतिं लब्ध्वा च, बाह्याभ्यन्तरपरिग्रहाग्रहम् आपिष्य आसमन्तात् पिष्ट्वा परित्यज्येत्यर्थः, आचार्यस्य सुरदेवस्य अन्तिके समीपे तपो जग्राह। भवति चात्र श्लोकः—विशुद्धमनसामिति—निर्मलचित्तानाम् परिच्छेदपरा-त्मनां परिच्छेदे यथार्थात्मस्वरूपनिर्णये तत्पराणां सदाचारखिलैः समीचीनाचारैः खिलाः अप्रहताः रहिता इत्यर्थः। 'द्वे खिलाप्रहते समे' इत्यमरः। तैः खलैर्दुर्जनैः कृता विघ्नाः किं कुर्वन्ति कां हानिं जनयितुं प्रभवन्ति। न कामपि ॥१९६॥

इत्युपासकाध्ययने वारिषेणकुमारप्रव्रज्याव्रजनो नाम त्रयोदशः कल्पः ॥१३॥

## १४. स्थितिकारकीर्तनो नाम चतुर्दशः कल्पः

[ पृष्ठ ७८-७९ ] पुनः 'इष्टं धर्मे नियोजयेत्' इष्टं प्रियं जनं मित्रं बन्धुं वा धर्मे संसारदुःखतः सत्त्वान् उत्तमे सुखे धरति इत्येवं स्वरूपवति धर्मे नियोजयेत् स्थापयेत् तथा आतुरस्य व्याधितस्य अगदंका-रोपयोग इव गदो रोगः करोतीति कारः अगदं नीरोगं करोतीति अगदंकारः औषधं तस्य उपयोग इव प्राशनम् अनिच्छतोऽपि जन्तोः कुशलैः हितकार्मैकचतुरैः क्रियमाणः आयत्याम् उत्तरकाले श्रेयसे हितायावश्यं भवति तथा धर्मम् अनिच्छतोऽपि जन्तोर्धर्मसंबन्धः क्रियमाणः आयत्याम् उत्तरभवे अवश्यं निःश्रेयसाय मोक्षाय

भवति इति जातमतिः इत्युदन्तबुद्धिः ( वारिषेणमुनिः स्वसुहृदं पुष्पदन्तं सुरदेवपार्श्वे दीक्षां ग्राहयामास ) तपःपरिग्रहेऽपि तपसः स्वीकारेऽपि, सहपांसुक्रीडितत्वात्, पुष्पदन्तेन अयस्येन सह बाल्ये आत्मनः धूलिक्रीडाकरणात्, चिरपरिचयरूढप्रणयत्वाच्च दीर्घकालपर्यन्तं परिचयः अन्योन्यस्वभावपरिज्ञानं तेन रूढप्रणयत्वाच्च संजातदृढस्नेहत्वात् । आत्मनः प्रियसुहृदं स्वस्य प्रियं मित्रम्, कस्य नन्दनं शाण्डिल्यायनस्य शाण्डिल्यस्य अपत्यं शाण्डिल्यायनः तस्य नन्दनं पुत्रं कथंभूतस्य शाण्डिल्यायनस्य **पुष्पवतीति**—पुष्पवती भट्टिन्याः पुष्पवत्याख्याया ब्राह्मण्याः भर्तुः अमात्यस्य नन्दनं पुत्रं हस्तेन अवलम्ब्य, कथंभूतम् अमात्यनन्दनम् **अभिनवेति**—अभिनवो नूतनः स चासौ विवाहश्च तस्मिन् कृतकरसूत्रबन्धनं पुष्पदन्ताभिधानम् एतदायतनानुगमनेन एतस्यायतनं गृहं तत् अनुसृत्य गमनेन, स्वामिपुत्रत्वात् स्वामिनः श्रेणिकनृपस्य पुत्रत्वात्, प्रतिपन्नमहामुनिरूपत्वाच्च स्वीकृतमहाव्रतियतिरूपत्वात्, आचरिताभ्युत्थानम् आचरितं विहितम् अभ्युत्थानं गौरवेण आसनादुत्थाय पूज्यं प्रति गत्वा तं स्वीकार्य आसने स्थापनादिकरणं येन तं पुष्पदन्तं हस्तेन गृहीत्वा, पुनः अस्मात् अस्मात्प्रदेशात् मां व्यावर्तयिष्यत्ययं भगवान् अधुना स्वगृहं याहीति वदिष्यति पूज्योऽयमिति तेन सह अनुसरन्तम् अनुयान्तम् गुरूपान्तं गुरोर्दीक्षाचार्यस्य समीपम् अवाप्तवन्तम् आगतवन्तं ( तं दर्शयित्वा गुरोः दीक्षादाने सूचनां करोति स्म । ] "भदन्त, हे पूज्य एष खलु महानुभावतालतालम्बतरुः महासज्जनता एव लता तस्या आधारभूतो वृक्ष इव, स्वभावेनैव भवभीरुः संसारादुद्विग्नः भोगानुभवने स्रक्कान्ताद्युपभोग्यपदार्थानुभवे विरक्तचित्तः, सर्वे च ते संयताः जैनमुनयः तेषां वृत्तं महाव्रतादिकं तस्य याचनार्थं भगवतः पूज्यस्य भवतः पादमूलं चरणसमीपम् आयातः आगतः ।" इति सूचयित्वा भगवतोऽभ्यर्णे भगवतो दीक्षाचार्यस्य समीपे कामकरिकदालिकाबर्हभारमिव कामो मदनः स एव करी गजस्तस्य कदलिका ध्वजः तस्य बर्हभारः परिवारसमूहमिव मूर्धजनिकरं मूर्धनि मस्तके जायन्ते इति मूर्धजाः शिरोरुहाः तेषां निकरं समूहम् अपनाय्य लोचं कारयित्वा दीक्षां ग्राहयामास अजीग्रहत् । सोऽपि पुष्पदन्तः तदुपरोधाक्षेपात् तस्य वारिषेणमुनेः उपरोधाक्षेपात् आग्रहवशात् दीक्षामादाय, हृदयस्य मनसः अविदितवेदितव्यात् अविदितम् अज्ञातं च तद्वेदितव्यं जीवादितत्त्वरूपं ज्ञेयं यस्य मनसः, अनङ्गग्रहग्रसितत्वाच्च कामपिशाचेन ग्रसितत्वाच्च पीडितत्वाच्च । ( स वारिषेणर्षिणा रक्ष्यमाणोऽपि कान्तां ध्यायन् द्वादशसमा अनैषीत् ।) पञ्जरपात्रः पतत्त्रीव पञ्ज्यते रुध्यते पक्ष्यादिर्यत्र तत्पञ्जरं पक्ष्यादिबन्धनगृहम् । तदेव पात्रम् आधेयधारणवस्तु तत्र पतत्त्रीव पक्षीव, यथा पक्षी पञ्जरे रुद्ध्वा रक्ष्यते यथा पृदाकुः सर्पः स मन्त्रशक्तिकीलितप्रतापो रक्ष्यते मन्त्रशक्त्या मन्त्रसामर्थ्येन कीलितः स्तम्भितः प्रतापः विक्रमो यस्य । गाढबन्धनालानितो गाढबन्धनेन दृढबन्धनेनन आलानितः स्तम्भे बद्धः व्यालशुण्डाल इव क्रूरगज इव चाहर्निशं रात्रिन्दिवं वारिषेणर्षिणा रक्ष्यमाणः स निजकान्तां ध्यायति स्मैवम् । **अलकेति**—स्मेरबिम्बाधरायाः ईषद्धसनयुतो बिम्बफलसमानो रक्तोऽधरो यस्याः सा तस्याः प्रियायास्तन्मुखं पुरत इव समास्ते । कथंभूतं मुखम्, अलकवलयरम्यम् अलकाश्चूर्णकुन्तलाः ललाटसमीपस्थाः केशा अलकाः प्रोच्यन्ते, तेषां वलयेन मण्डलेन मे मम प्रियाया वदनं रम्यं सुन्दरं प्रतिभाति । पुनः कथंभूतं भ्रूलतानर्तकान्तं भ्रुवौ लते इव भ्रूलते तयोः नर्तः नर्तनं तेन कान्तं सुन्दरम् । पुनः कथंभूतं नवनयनविलासं नवो नूतनः नयनयोर्नेत्रयोर्विलासः शृङ्गारजो भावः यत्र तत् । पुनः कथंभूतं चारुगण्डस्थलं च चारुणी गण्डस्थले यस्य तत् पुनः कथंभूतं मधुरवचनगर्भं मधुराणि वचनानि गर्भे यस्य तत् ॥१९७॥ **कर्णावतंसेति**—ये भूपा राजानः प्रणयिनीषु प्रेमवतीषु कान्तासु कर्णयोः श्रोत्रयोः अवतंसौ भूषणे तन्वन्ति रचयन्ति, मुखमण्डनकं च कपोलयोरङ्गवल्लीं च रचयन्ति । रागात् प्रेम्णः वक्षोजयोः स्तनयोः पत्रवल्लीलेखनम्, जघने कटौ आभरणानि रशनादिकं च रचयन्ति, पादेषु अलक्तकरसेन च यावकरसेन च चर्चनानि लेपनानि कुर्वन्ति त एव धन्या भाग्यवन्तः ॥१९८॥

[पृष्ठ ८०] **लीलेति**—प्रियस्यानुकृतिर्लीला, प्रियागमने स्त्रियो योऽङ्गे विशेषो जायते स विलासः आभ्यां विलसन्ती शोभमाने नयने एव उत्पले नीलकमले यस्याः सा तस्याः पुनः कथंभूता सा । **स्फारेति**—स्फारः महान् यः स्मरः कामः तस्मात्तरलितश्चञ्चलः अधरपल्लवः ओष्ठकिसलयं यस्याः सा तस्याः, पुनः कथंभूता । **उत्तुङ्गेति**—उत्तुङ्गौ उन्नतौ पीवरौ पुष्टौ च तौ पयोधरौ स्तनौ तयोर्मण्डलं यस्याः सा तस्याः । मया

सह तस्याः कदा संगमः स्यात् ननु वितर्के ॥१९९॥ किं च—चित्रेति—कानने उत्कण्ठितः वेषमुनिः इत्थं दिनानि गमयति। दिनगमनव्यापारान् वर्णयति—चित्रालेखनकर्मभिः निजमनसि निखातायाः इव प्रियाया वस्त्रे चित्र-लेखनकार्यैः, मनसिजेति—मनसिजो मदनः तस्य व्यापाराः मधुरप्रवृत्तयः तेषां साराणां स्मरणैः, गाढेति—सन्ततं मनसा दृढभावनया अप्रस्थितायाः प्रियतमायाः पादयोः असकृत् मूर्ध्ना प्रणामकरणक्रमैः स्वप्न इति सहवासवियोगविषये स्नेहदुःखागमैः वेषमुनिः दिनानि कानने समुत्कण्ठितः यापयति स्म ॥२००॥ इति निर्बन्धेन अनवरतं ध्यायन् चिन्तयन् द्वादशवर्षाणि समानैषीत् यापयति स्म। शूरदेवभट्टारकोऽप्याभ्यां सह तेषु विषयेषु शूरदेवाचार्योऽपि वारिषेणपुष्पदन्तमुनियुगलेन सह तेषु तेषु विषयेषु विविधदेशेषु तीर्थकृताम् ऋषभादिवर्ध-मानान्तानां चतुर्विंशतेर्जिनवराणां पञ्चकल्याणैर्मङ्गलानि मङ्गं पुण्यं लान्तीति यच्छन्ति भक्तेभ्य इति मंगलानि मं पापं गालयन्तीति वा मंगलानि पुण्योत्पादीनि पापविनाशीनि च स्थानानि जन्मादिनिर्वाण-पर्यन्तानि स्थानानि तीर्थभूमीर्वन्दित्वा पुनर्विहारवशात्तत्रैव जिनायतनोत्तंसितोपान्तशैलचूले पञ्चशैलपुरे जिनानाम् आयतनानि गृहाणि तैः उत्तंसिता भूषिता उपान्ता समीपस्था शैलस्य पर्वतसंबन्धिनी चूला शिखरं यस्य तस्मिन् पञ्चशैलपुरे राजगृहे, समागत्य आत्मनः ( शूरदेवमुनेः ) वारिषेणऋषेश्च तद्दिवसे पर्युपासितोपवासत्वात् स्वीकृतचतुर्विधाहारत्यागात्, तं पुष्पदन्तम् एकाकिनम् एव प्रत्यवसानाय आहाराय आदिदेश आज्ञां ददाविति भावः। 'भक्षित-चर्वित-लीढ-प्रत्यवसित-गिलित-खादितरसातम्' इत्यमरः। तदर्थम् आदिष्टेन तेन च चिन्तितम्। 'चिरात् कालात् खल्वेकस्मादपमृत्योर्जीवन्नुद्धरितोऽस्मि। दीर्घः कालोऽतीतः खलु अद्य एकस्मादपमरणात् जीवन् उत्तीर्णोऽभवम् ( संप्रति हि मेऽन्यूनानि विपुलानि पुण्यानि अवेक्ष्य दृष्ट्वा दीक्षां मुमुक्षुणा दीक्षां त्यक्तुम् इच्छा यस्य तथाभूतेन तेन मङ्क्षु शीघ्रं पाशपरिक्षे-पक्षरितेनेव, पाशस्य जालस्य परि सर्वतः क्षेपः आवरणं तस्मात् क्षरितेन च्युतेन पक्षिणा विहगेन इव पलायितुम् आरब्धम्। वारिषेणः तथाप्रस्थानात् कृतोदर्कं वितर्क्य ज्ञातोत्तरफलं यथा स्यात्तथा तस्य शीघ्रं गमनमवलोक्य दीक्षाया अनेन जलाञ्जलिर्दत्तेति ऊहं कृत्वा 'अवश्यमयं जिनरूपं जिहासुरिव सौत्सुक्यं विक्रमते जिनरूपं जिन-दीक्षां जिहासुरिव त्यक्तुमिच्छन्निव उत्कण्ठितः विक्रमते अश्ववद्वेगेन याति। 'तदेष कषायमुष्यमाणधिषणः समयप्रतिपालनाधिकरणैर्न भवत्युपेक्षणीयः' तस्मात् एष पुष्पदन्तमुनिः कषायैः क्रोधादिभिः मुष्यमाणा अपह्रि-यमाणा धिषणा बुद्धिः यस्य सः समयस्य जिनशासनप्रतिपालने रक्षणे अधिकरणैः आधारभूतैः जिनशासन-रक्षणभारवाहिभिः न भवत्युपेक्षणीयः न त्याज्यः इति अद्धा यथार्थम् अञ्जसा अनुध्याय विचिन्त्य तमनुरुध्य तं पुष्पदन्तम् अनुसृत्य एतत्स्थापनाय जनकनिकेतं पितुः श्रेणिकभूपस्य निकेतं गृहं जगाम। चेलिनी महादेवी पुत्रं मित्रेण सत्रं सह उपढौकमानम् आगच्छन्तम् अवेक्ष्य तदभिप्रायपरीक्षार्थं सरागं वीतरागं चासनमयच्छत्। वारिषेणस्तेन समं चरमोपचारं चरमः अन्तिमः उपचारः शमः अस्मिन् तत् चरमोपचारं वीतरागोपशमयुक्तं विष्टरं सिंहासनम् अलंकृत्य भूषयित्वा अम्ब, समाहूयतां समस्ता अपि आत्मीयाः स्नुषाः।

[पृष्ठ ८१] ( तदनु वारिषेणजायाः श्वश्र्वा आज्ञया तत्रागताः ) कथंभूतास्ताः वनदेवता इव यथा वन-देवताः प्रसूनोत्तंसोत्तरङ्गितकुन्तलारामाः भवन्ति। पुष्पभूषितोत्तराङ्कितकुन्तलैः केशैः आसमन्तात् रामा रमणीया भवन्ति। तथा ता वध्वोऽपि कल्पलताः इव मणिभूषणरमणीयाङ्गनिर्गमाः यथा कल्पलताः कल्पवल्लयः रत्नालङ्कारमनोहरावयवोत्पत्तयः तथा वध्वोऽपि। प्रावृष इव समुन्नद्धपयोधराविद्धमध्यभागाः यथा वर्षाः समुन्नतजलधरावृतनभोमध्यभागास्तथा समुन्नतस्तनावर्जितावलग्नभागाः। सकलजगल्लावण्यलवलिपिलिखिता इव समस्तलोकसौन्दर्यांशरूपलिपिना लिखिता इव सुभगभोगायतनाभोगाः सुभगानि रमणीयानि तानि तानि भोगा-यतनानि शरीराणि तेषाम् आभोगः विस्तारो यासां ताः। पुनः कथंभूताः। कङ्केलिकाननक्षितय इव पाद-पल्लवोल्लासितविहारविषयाः अशोकवनभूमयो यथा पादा मूलानि तानारभ्य पल्लवैः किसलयैः उल्लासिताः शोभिताः विहारविषयाः उद्यानप्रान्ता याभिस्ताः तथा इमा वध्वोऽपि पादपल्लवाः चरणकिसलयाः तैः उल्लसिताः शोभिताः विहारविषयाः लीलाप्रदेशा याभिस्ताः। कमलिन्य इव मणिमञ्जीरमणितोन्मदमराल-मण्डलस्खलितचलनजलेशयाः यथा कमलिन्यः कमललता रत्नजडितनूपुररवमिव शब्दं कुर्वाणा उन्मदा उन्मत्ता

ये मराला हंसाः तेषाम् मण्डलं समूहः तस्य स्खलितानि यानि प्रमादेन चलनानि पादाः त एव जलेशयानि कमलानि तथा मणिमञ्जीराणि रत्ननूपुराणि तेषां मणितं शब्दः पुनः कथंभूताः । स्वकीयरूपसंपत्तितिरस्कृतत्रिभुवनरामणीयकाः, स्वसौन्दर्यसम्पदा अवगणितत्रिलोकललनासौन्दर्याः सलीलं अहमहमिकोत्सुकाः अहम् अग्रे गच्छामि अहम् अग्रे गच्छामीति भावेनोत्कण्ठिताः ता वध्वः समागत्य सर्वतः परिवव्रुः परिरुरुधुः पुण्यदेवता इव ताः सुवासिन्यः । पुष्पदन्तभार्या सुदत्याप्याकारिता अम्ब, मद्भ्रातृजाया सुदती अपि आकार्यताम् । हे मातः मद्भ्रातृजाया ( पुष्पदन्तभार्या ) मम भ्रातुः पुष्पदन्तस्य भार्या सुदती नामधेयापि आकार्यताम् आहूयताम् । ततः संध्येव धातुरक्ताम्बरचराटोपा यथा संध्या रक्ताम्बरं लोहितवर्णाकाशं तत्र चरतीति रक्ताम्बरचरः स आटोपः आडम्बरो यस्याः तथा सा सुदती अपि धातुर्गैरिकं तेन रक्तं यत् अम्बरं वस्त्रं तेन चरतीति चरा तस्या आटोपेन युक्ता, तपसः श्रीरिव विलुप्तकुन्तलकलापा, यथा तपसः श्रीः शोभा विलुप्ताः कुन्तलानां केशानां कलापाः समूहा यत्र लोचेन भूषिता भाति तथा इयं सुदत्यपि विलुप्तकुन्तलकलापासीत् । भव्यजनमतिरिव विभ्रमभ्रंशिदर्शना, भव्यजनानां मतिर्बुद्धिः विभ्रमस्य विपरीतज्ञानस्य भ्रंशो नाशो यस्मिन् तादृग्दर्शनोपेता विपरीतज्ञानरहितदर्शनेन सम्यक्त्वेन युक्ता भवति तथा इयं सुदत्यपि भ्रमरहितदर्शना निर्मलसम्यक्त्वोपेता अथ च विभ्रमरहितनेत्रा कटाक्षक्षेपरहितनेत्रेत्यर्थः । हिमोन्मथिता कमलिनीव क्षामच्छायापघना हिमेन नीहारेण उन्मथिता पीडिता कमलिनी कमललता यथा क्षामच्छायापघना कृशकान्तिशरीरा भवति तथा सुदत्यपि क्षामच्छाया क्षीणकान्तिदेहाभवत् । शरदिव दीनपयोधरभरा यथा शरदृतुस्थितिः दीना विरला ये पयोधरा मेघास्तेषां भारः समूहो यस्याम्, तथा सुदत्यपि दीनः कृशः पयोधरयोः स्तनयोः भारो यस्याः सा । खट्वाङ्गकरङ्काकृतिरिव यथा खट्वायाः मञ्चकस्य अङ्गानि अवयवाः तद्रूपा ये करङ्का अस्थी चरणादयः तेषाम् आकृतिरिव प्रकटकीकसनिकरा इय सुदती प्रकटा कीकसानाम् अस्थ्नां निकरो यस्याः सा । सकलसंसारसुखव्यावृत्तिनीतिर्मूर्तिमती वैराग्यस्थितिरिव विवेश । सकलसंसारसुखेभ्यः व्यावृत्तिः पराङ्मुखता तस्याः मूर्तिमती सदेहा वैराग्यस्थितिरिव विवेश तत्र श्रेणिकनृपप्रासादे आजगाम । पुष्पदन्तेति—पुष्पदन्तस्य मुनेः हृदयम् एव कन्दलं अङ्कुरः तस्य उल्लासे विकसने वसुमतीव पृथ्वीव सा सुदती ( पुष्पदन्तस्य जायाचरी ) तां वारिषेणोऽवधार्य विमृश्य ( अवदत् ) मित्र, सेय तव प्रणयिनी सेयं तव वल्लभा यन्निमित्तम् अद्यापि न संपद्यसे मनोमुनिरिति । यस्या निमित्तेन अद्यापि द्वादशवर्षाण्यतीतानि मुनित्वे तथापि मनसा मुनिरिति भावयतिर्न जातस्त्वमिति । एताश्चैवंविधकायास्तव भ्रातृजायाः एताः पुरतो दृश्यमानाः तव भ्रातृजायाः ते भ्रातुः वारिषेणस्य पत्न्यः एवंविधकायाः उक्तवर्णना अनिन्द्यलावण्यशरीराः । तथैते च वयं तव समक्षोदयं समाचरिताभिजातजनोचितचरिताः । तव समक्षोदयं तव प्रत्यक्षे एव उदय (श्चारित्रस्य ) यथा स्यात्तथा वयं समाचरितं निर्दोषं पालितं अभिजातजनोचितं कुलीनपुरुषयोग्यं चरितं वृत्तं यैस्ते । ( मम भार्या अतीव रमणीयास्तथापि ताः परित्यज्याहं सम्यागाचरितमुनिचारित्रोऽभवम् । त्वं तु असुन्दरां जायामपि मनसा देवाङ्गनासदृशीं मत्वा हीनचारित्रोऽभवः । इति तर्जनवचनैः निर्भर्त्सितः पुष्पदन्तः ।

[ पृ० ८२ ] स्नानानुलेपनेति—अङ्गनानां वपुः शरीरम् आधेयभावसुभगं आधेयभावैः संसृज्यमानचन्दनमृगमदपङ्कादिभिः सुभगं दृश्यते । केन विधिना आधेयभावसुभगम् स्नानादिविधिना—स्नानं सुगन्धितैलेन देहं संमर्द्य सुगन्धिजलेनाभ्यङ्गस्नानम् अनुलेपनं चन्दनादिपङ्केन देहलेपनं कौशेयादिवस्त्रधारणम्, ग्रैवेयकादिभूषणधारणम्, पुष्पमालादिभिः कण्ठाद्यवयवानां शोभामुत्पादनम्, ताम्बूलवाससेवनम् इत्यादिविधिना नारीदेहः सुन्दरः प्रतिभाति । तु परम् अस्य देहस्य नैसर्गिकी स्वाभाविकी स्थितिः स्वाभाविकं रूपं किमिव किम् उपमानमासाद्य वर्णनीयं भवेत् ॥२०१॥ इत्यसंशयम् आशय्य ज्ञात्वा विचिन्त्य वा स्त्रैणेषु स्त्रीसंबन्धिषु सुखकारणेषु विचिकित्सासज्जां जुगुप्सायुक्तां लज्जाम् अभिनीय सम्प्राप्य, हंहो इति सम्बोधनार्थकम् अव्ययं 'भो' इत्यर्थे ज्ञेयम् । निकामेति—निकामम् अतिशयेन निरुद्धः विनाशितः मकरध्वजस्य मदनस्य उद्धव उत्सवो येन तत्सम्बोधनम् । विधुराणां दुःखार्तानां बान्धव, साहाय्यकारिन् । संसारेति—संसारसुखमेव सरोजं कमलं तस्य उत्साराय विनाशाय नीहारायमाणौ हिमतुल्यौ चरणौ पादौ यस्य तस्य संबोधनम्, हे

वारिषेण, पर्याप्तम् अवावस्थानेन, अत्रालम् उपवेशनेन । प्रकामम् अतिशयेन शकलितं खण्डितं कुसुमास्त्रस्य मदनस्य रहस्यं गूढस्वरूपं येन तत्सम्बोधनम्, हे वयस्य हे सखे, इदानीमधुना, यथार्थनिर्वेदावनिः यथार्थः वस्तुभूतः निर्वेदः विरक्तिभावः तस्य अवनिः स्थानम् अहं मनोमुनिरस्मीति मनसा मुनिः भावेन मुनिरस्मि इति च अवधाय विज्ञाय, विशुद्धहृदयौ तौ द्वावपि चेलिनीमहादेवीम् अभिनन्द्य, उपसद्य च गुरुपादोपशल्यं गुरुचरणसमीपम् उपसद्य स्थित्वा च निःशल्याशयौ मायामिथ्यात्वनिदानशल्यरहिताभिप्रायौ साधु तपश्चक्रतुः । भवति चात्र श्लोकः—सुदतीति—कृतत्राणः कृतं त्राणं रक्षणं येन स वारिषेणः सुदतीसंगमासक्तं । तपस्विनं पुष्पदन्तं संयमे स्थापयामास ॥२०२॥

इत्युपासकाध्ययने स्थितिकारकीर्तनो नाम चतुर्दशः कल्पः ॥१४॥

## १५. वज्रकुमारस्य विद्याधरसमागमो नाम पञ्चदशः कल्पः

[ पृष्ठ ८२ ] चैत्यैरिति—चैत्यैः जिनबिम्बैः, चैत्यालयैः जिनमन्दिरैः विविधात्मकैः ज्ञानैः व्याकरण-काव्यन्यायधर्मशास्त्राणां ज्ञानैः, विविधात्मकैः तपोभिः अनशनादिद्वादशविधैस्तपोभिः, पूजामहाध्वजाद्यैश्च नित्यपूजा, अष्टाह्निकपूजा, इन्द्रमहपूजा महामहपूजादिभिः मार्गप्रभावनां कुर्यात् जिनधर्मं प्रभावयेत् ॥२०३॥

[ पृष्ठ ८३ ] ज्ञाने, तपसि, पूजायाम् । केषां यतीनां यः असूयति मत्सरं करोति मुनीनां ज्ञानम्, तपः उपासनां च दृष्ट्वा यो दुर्धीः असूयति तेषां गुणेभ्यः द्रुह्यति नूनं सत्यमेव तस्यापि स्वर्गापवर्गभूलक्ष्मीः सुरेन्द्रलक्ष्मीः तथा अपवर्गभूलक्ष्मीः मोक्षभूमिलक्ष्मीः असूयति मत्सरं करोति उभे ते लक्ष्म्यौ तस्मान्नराद् दूरं तिष्ठतः इति भावः ॥२०४॥ समर्थ इति—यो धार्मिको नरः चित्तेन धैर्यादिना ज्ञानेन वा, वित्तेन धनधान्यवस्त्रादिदानेन इह अस्मिन्देशे समर्थः सन्नपि अशासनभासकः शासनस्य जिनधर्मस्य भासकः प्रभावनाकारको न स्यात् स चित्तवित्ताभ्यां समर्थः सन्नपि अमुत्र परलोके न भासकः भासको न भवति । तस्य स्वर्गादिलक्ष्मीर्वशा न भवतीति भावः ॥ २०५ ॥ तद्दानेति—तस्मात् दानैश्चतुर्विधैः, ज्ञानैः आध्यात्मिकैरागमजैश्च विज्ञानैः, चतुःषष्टिकलानां ज्ञानैः, महामहमहोत्सवैः महामहादिपूजाविशेषैः धनिकैः राजभिश्च क्रियमाणैः ऐहिकापेक्ष-योज्झितः अहं देवः स्यामहं वसुमतीपतिः स्यामिति इहलोकसंबन्धिधनाद्यभिलाषया मुक्तः धार्मिकः दर्शनोद्योतनं कुर्यात् दर्शनस्य प्रकाशनप्रभावनां कुर्यात् ॥२०६॥

[ पृष्ठ ८४-८५ ] श्रूयतामत्रोपाख्यानम्—अत्र प्रभावनागुणे आख्यानं प्रसिद्धा कथा श्रूयताम् आकर्ण्यताम् वज्रकुमारस्य कथां शृण्वन्तु जना इति भावः । पञ्चालदेशेषु श्रीमदिति—श्रियानन्तचतुष्टयलक्ष्म्या युक्तस्य पार्श्वनाथपरमेश्वरस्य यशःप्रकाशनपात्रे अहिच्छत्रनामनगरे चन्द्राननारूपा या अङ्गना नारी सा एव रतिः तस्याः कुसुमचापस्य मदनस्य द्विषन्तपस्य तन्नामधेयस्य भूपतेः सोमदत्तो नाम पुरोहितोऽभूत् । कथंभूतः सः उदितोदित-कुलशीलः प्रति पुरुषम् अधिकाधिकतया प्राप्तोदये उन्नतिं प्राप्ते कुलशीले वंशसदाचारौ यस्य सः षडङ्गे वेदे शिक्षा-कल्प-व्याकरण-निरुक्त-ज्योतिष-च्छन्दांसि वेदस्य षडङ्गानि तदात्मके वेदे दैवे दैवविषये, निमित्ते अष्टांग-निमित्ते, दण्डनीत्यां च अभिविनीतमतिः कुशलधीः । दैवीनां देवताप्रकोपजातानाम्, मानुषीणां मनुष्यैर-रिभिरुत्पादितानाम् आपदां प्रतिकर्ता निवारकः, यज्ञदत्ताभट्टिनीभर्ता तन्नामधेयाया ब्राह्मण्या भर्ता पतिः, सोमदत्तो नाम पुरोहितोऽभूत् । एकदा तु सा किल यज्ञदत्ता अन्तर्वत्नी अन्तः गर्भमध्यस्थम् अपत्यं विद्यतेऽस्या इति गर्भिणीत्यर्थः, सती माकन्दमञ्जरीकर्णपूरेषु माकन्द आम्रतरुः तस्य मञ्जर्याः कर्णपूरेषु तन्नामकालङ्कारेषु तत्परिणतफलाहारेषु च समासादितदोहला लब्धेच्छावती अभूत् । व्यतिक्रान्तरसालवल्लरीफलकालतया व्यती-ताम्रमञ्जरीफलसमयत्वात्, कामितम् अभिलषितं अनाप्नुवती अलभमाना, शिफासु व्यथमाना प्रतानिनीव शिफासु मूलेषु पीडायुक्ता वल्लीव तनुतानवं देहकार्श्यं उपेयुषी जग्मुषी तेन पुरोहितेन ज्ञातिजनेन बन्धुगणेन च प्रबन्धेन आग्रहेण पृष्टा हृदयेष्टं मनोऽभिलाषम् अभाषिष्ट अब्रूत । भट्टस्तन्निशम्य श्रुत्वा "कथम् एतन्मनोरथम् अयथार्थपथम् अस्मन्मनोमथं अव्यर्थप्रार्थनं कथं करिष्यामि" एतन्मनोरथं अस्या यज्ञदत्तायाः

मनोरथं अयथार्थवथं पूरयितुं अशक्योपायम् अस्माकं मनो दुन्वत् अभ्यर्था सफला प्रार्थनस्य स्पृहायाः कथा यस्मिन् सः तं कथं करिष्यामि । अस्या दोहदपूर्तिः अकाले उद्भूतत्वात् कथं मया कर्तुं शक्येति भावः । इत्याकुलमनाः परिच्छदच्छात्रतन्त्रानुपदः परिच्छदः परिवाररूपः स चासौ छात्रः शिष्यः स एव तन्त्रं अर्थसाधकः तम् अनुसृत्य पदानि यस्य सः । पुनः कथंभूतः सातपत्रपदत्राणः, आतपत्रं छत्रं पदत्राणे उपानहौ तेषां समाहारः आतपत्रपदत्राणं तेन सहितः सातपत्रपदत्राणः, पुनः कथंभूतः । तदिति-तासां माकन्दमञ्जरीणां तत्फलानां च गवेषणे अन्वेषणे या धिषणा बुद्धिः तस्यां परायणः सन् इतस्ततः व्रजन् गच्छन् **जलेति**—जलवाहिनी नाम नद्यास्तटसमीपे निविष्टं स्थितं प्रतननं विस्तारो यस्य तस्मिन् महति कालिदासकानने ( सुमित्रेण मुनिना अध्यासितमूलतलश्चूतवृक्षः सोमदत्तेन विलोकितः प्रथमं तावत् सुमित्रं मुनिं वर्णयति कविः ) कथंभूतेन सुमित्रेण । **परमेति**—परमतपश्चरणाचरणेन शुचि पवित्रं शरीरं यस्य तेन । पुनः कथंभूतेन । **निःशेषेति**—निःशेषम् अखिलं तच्च तच्छ्रुतं द्वादशांगम् श्रुतज्ञानं तस्य श्रवणेन । गुरुमुखात् प्रसृतः प्रकटीभूतः मनस्कारो निश्चयो यस्य तेन । पुनः कथंभूतेन । **समस्तेति**—समस्तानि सकलानि तत्त्वानि जीवाजीवादीनि सप्त तेषां निरूपणं यस्मिन् स चासौ स्वाध्यायस्तस्य ध्वनिः स एव सिद्धौषधिः तस्याः सविधतया सामीप्येन साधितः वशीकृतः वनदेवतानां निकरः समूहो येन । मूर्तिमतेव शरीरवतेव धर्मेण, पुनः कथंभूतेन । **विनेयेति**—विनेयाः विनेतुं शिक्षितुं योग्याः विनेयाः उपासकाः त एव दैर्घिकेयानि दीर्घिकायां जातानि दैर्घिकेयानि कमलानि तेषां मित्रेण सूर्येण उपासककमलसूर्येणेत्यर्थः । सुमित्रेण मुनिना 'सुमित्र' नामवता यतिना अलंकृतालवालवलयम् अलंकृतं शोभितं आलवालवलयं वृक्षमूले जलधारणार्थं यन्मृद्वेष्टनं तस्य वलयं मण्डलं यस्य तम् एकं चूतम् आम्रतरुम् अवलोक्य दृष्ट्वा, कथंभूतम् । एतद् ब्रह्मवर्चसमाहात्म्यात् ब्रह्मणः ब्रह्मचर्यपूर्वकतपसो वर्चसं तेजस्तन्माहात्म्यात् आमूलचूलं वृक्षतलमारभ्याग्रावधियावत् उल्लसल्लवलीफलगुलुच्छस्फीतम् उल्लसन्ती विकसन्ती या लवली लताविशेषस्तस्याः फलानां गुलुच्छानि गुच्छाः तद्वत् स्फीतं समृद्धं आम्रफलगुच्छसमृद्धं विलोक्य, च्छेकच्छात्रहस्ते च्छेको विदग्धः चतुरः स चासौ छात्रश्च शिष्यस्तस्य हस्ते कलत्रस्य भार्यायाः पिकप्रियप्रसवफलप्रतोलीं पिकानां कोकिलानां प्रियाः पिकप्रियाः प्रसवाः पुष्पाणि यस्य स आम्रतरुः तस्य फलानि तेषां प्रतोली गुच्छं प्रहृत्य आदाय, ततो भगवतः पूज्यस्य सुमित्रमुनेः धर्मश्रवणावसरप्रयत्नात् कथंभूतात्प्रयत्नात् । **अवधीति**—अवधिः अवधिज्ञानं स एव पयोधिः समुद्रः तस्य मध्ये संनिधीयमानाः निधिरूपेण भासमानाः सकलाश्च ते कलापाः समूहाः तैर्युक्तानि रत्नानि सम्यग्दर्शनादीनि यत्र तस्मात् धर्मश्रवणावसरप्रयत्नात् धर्माकर्णनसमयप्रयत्नात् ( जातजातिस्मरणः सोमदत्तो मुनिर्बभूव ) भवान्तरं पूर्वजन्म आकर्ण्य । कथंभूतम् धर्मश्रवणसमये प्रसंगात् समायातं प्राप्तम्, पुनः कथंभूतं । सहस्रारकल्पे द्वादशस्वर्गे सूर्यविमानसंभूतं सूर्याख्यविमाने जातं सूर्यचराभिधानानुगतं सूर्यचरदेव इति नामानुसृतम् अत्यल्पविभवपरिप्लुतम् अतिस्तोकसंपद्युतम् आत्मगोचरं स्वविषयं भवान्तरं जन्मान्तरं श्रुत्वा उदीर्णजातिस्मरभावः उद्भूतपूर्वभवस्मरणः स्वप्नसमासादितसाम्राज्यसमानसारात् संसाराद्विरज्य स्वप्ने समासादितं लब्धं यत्साम्राज्यं तेन समानः सारः बलं यस्य तस्मात् संसाराद्विरज्य विरक्तो भूत्वा, मनोजविजयप्राज्यां मनोजो मदनः तस्य विजयः तेन प्राज्याम् उत्कृष्टां प्रव्रज्यां जिनदीक्षाम् आसज्य संप्राप्य, प्रबुद्धसिद्धान्तहृदयः ज्ञातसिद्धान्तरहस्यः मगधविषये सोपारपुरस्य पर्यन्ते समीपे धाम निवासो यस्य तस्मिन् नाभिगिरिनाम्नि महीधरे पर्वते सम्यग्योगो निर्दोषः योगो मनोवाक्कायैकाग्र्यं यस्मिन् तथाभूतो च आतापनयोगः ग्रीष्मर्तौ रविकरसंतप्तशिलायां कायोत्सर्गेण स्थित्वा आत्मचिन्तनं तं धरतीति सम्यग्योगातापनयोगधरो बभूव । तदनु सोमदत्तस्य दीक्षाग्रहणदिनमारभ्य तद्वियोगातङ्कोद्वृत्तचित्ता तस्य सोमदत्तस्य वियोगो विरहः स एव आतङ्को रोगो ज्वरो वा तस्मात् उद्वृत्तम् अनवस्थितं चित्तं यस्याः सा, यज्ञदत्ता तदन्तेवासिभ्यः तस्य सोमदत्तस्य अन्तेवासिभ्यः शिष्येभ्यः आत्मखेदकरं सोमदत्तव्रतव्यतिकरं सोमदत्तस्य व्रतग्रहणस्य व्यतिकरं वार्ताम् अनुभूय श्रुत्वा, प्रसूय च समये स्तनन्धयं बालकम्, पुनस्तमादाय गृहीत्वा प्रयाय च गत्वा च तं भूमिभृतं पर्वतं नाभिगिरिम्, [यज्ञदत्ता तं मुनिं वचनैर्निर्भर्त्स्य तस्य पुरो देशे शिलातले बालकं मुक्त्वा गृहं जगाम] 'अहो कूटकपट कूटयति दम्भीकरोति कपटं यस्य तत्संबोधनं हे कूटकपट, कपिकट कपिवत् मर्कटवत् कटौ कपोलौ यस्य तत्संबोधनं हेक पिकट इति,

मन्मन इति—मम मनः मन्मनः तदेव वनम् अरण्यं तस्य दाहे दहने दावपावकः, दावोऽरण्यं तस्य पावकः अग्निरिव तत्संबोधनम्, निःस्निग्ध दुर्विदग्ध मत्प्रीते दुर्विदग्ध खलचतुर, यदि चेत् इमं पुरोऽवस्थितं डिम्भकरप्रतिच्छन्दं नवकम्पम् अवक्षिप्य त्यक्त्वा, स्वच्छया निर्मलया इच्छया आगच्छ, नो चेत् गृहाण स्वीकुरु एनम् इमम् आत्मनो नन्दनं पुत्रम्। इति व्याहृत्य भाषित्वा अस्य ऊर्ध्वज्ञोः उत्थितकायोत्सर्गस्य भगवतः पुरतः शिलायां बालकम् उत्सृज्य मुक्त्वा विजहार निजं निवासम्। अगमत् स्वकीयमावासम्। भगवानपि तेन सुतेन दुर्गेण दूरतः शिलायाः प्लोषोत्कर्षकलुषत्वात् प्लोषस्य दाहस्य उत्कर्षः तीव्रता तेन कलुषत्वं श्यामीभूतता तस्मात्, विहरीकृतचरणवर्गः आसनीकृतपदयुगः सोपसर्गः सोपद्रवः तथैव पूर्ववदेव अवतस्थौ तिष्ठति स्म।

[ पृष्ठ ८६ ] अत्रान्तरे अस्मिन् प्रसंगे ( त्रिशङ्कुर्नाम खगपतिः भास्करदेवाय राज्यं दत्त्वा संयमी अजायत ) कथंभूतः स त्रिशङ्कुर्नृपः। विजयार्धोत्तरश्रेण्याममरावतीनगरीपतिः। कथंभूतस्य विजयार्धपर्वतस्य। सहेति—सहचरैः सखीजनैः, अनुचरैः दास्यादिभिः सह संचरन्त्यस्ताः खेचर्यः विद्याधराङ्गनास्तासां चरणानां पादानाम् अलक्तकेन यावकेन रक्तानि लोहितानि रन्ध्राणि यस्य, तथाभूतस्य विजयार्ध इति तटीध्रः पर्वतः तस्य विजयार्धतटीध्रस्य, उत्तरश्रेण्याम्, कथंभूतायाम्। दयितेति—दयितात् पत्युः अविदूरा समीपवर्तिनी या विद्याधरी खचराङ्गना तस्या विनोदेन नर्मभाषणेन विहारेण च परिमण्डिता सुगन्धीभूता कान्तारधरणी वनभूमिः यस्याः तस्याम् उत्तरश्रेण्याम् अमरावतीनगरीपरमेश्वरः सुमङ्गलाभिधाना या अबला ललना तस्या वरः भर्ता। कथंभूतः त्रिशङ्कुर्नृपः। प्रकामेति—प्रकामं यथेप्सितं विख्याता राज्याच्च्याविताश्च ते अरातयः शत्रवश्च तेषां कान्ताः सुन्दर्यः तासाम् आशयविवर्त तत्र यः शोकजनने शङ्कुरिव शल्य इव त्रिशङ्कुर्नाम नृपतिः। समरेति—समरावसरे युद्धसमये अभिसरन्तोऽभिद्रवन्तः ये सपत्नाः शत्रवस्तेषां संतानो वंशस्तस्य अवसानं विनाशः तत्करणे साराः बलीयांसः ये शिलीमुखा बाणाः यस्य, तथाभूतः स नृपः राज्यसुखम् अनुभूय, जिनागमादवगतसंसारशरीरभोगवैराग्यस्थितिः यतिः साधुर्बुभूषुः, भूगोचरसंचाराय भूमिविषये संचारो भ्रमणं यस्य तस्मै हेमपुरेश्वराय हेमपुराधीशाय कथंभूताय। समस्तेति—समस्ताः सकलाश्च ते महीशाः राजानः तैः मान्यं शासनं यस्य तस्मै बलवाहननामधेयाय नृपाय सुदेवीं सुताम्, ज्येष्ठाय पुत्राय च भास्करदेवाय च राज्यं प्रदाय वितीर्य सुप्रभसूरिसमीपे संयमी यतिरजायत। ततो गतेषु कतिपयेषु चिद्दिवसेषु विहितः कृतः राज्यापहारो यस्य। केन राज्यापहारः कृतः पुरंदरदेवेन कथंभूतेन। समुत्साहितः धनादिदानेन उन्नतिं नीतः आत्मीयानां स्वसंबन्धिनां वीराणां समूहो येन तेन, पुनः कथंभूतेन। स्वदोरिति—निजभुजयोर्दर्पेण विद्यासामर्थ्ययुतसैन्यवृन्देन, दुर्विनीताः दुःशिक्षिताः खलास्तेषु वरिष्ठेन ज्येष्ठेन लघिष्ठेन भ्राता पुरंदरदेवेन विहितराज्यापहारः परिजनेन समं स भास्करदेवः तत्र बलवाहनपुरे अमरावतीपुरे शिबिरं स्वसैन्यं संस्थाप्य मणिमालया राज्ञ्या सह तं सोमदत्तं भगवन्तम् उपासितुं पूजयितुम् आगतः। तत्पादमूले स्थलकमलमिव तं बालकमवलोक्य 'अहो महदाश्चर्यं महदद्भुतम्, यतः कथमिदम् अरत्नाकरमपि रत्नं रत्नाकरे समुद्रे अजातमपि रत्नमिव, अजलाशयमपि कुशेशयं जलाशये तडागे अजातमपि कुशेशयमिव कमलमिव, अनिन्धनमपि तेजःपुञ्जम् इन्धनरहितमपि तेजःपुञ्जम् अङ्गकान्तिसहितम्, अचण्डकरमपि उग्रत्विषं न चण्डाः तीक्ष्णाः कराः किरणा यस्य तथाभूतमपि उग्रत्विषं तीव्रकान्तिम्। अनिलामातुलमपि कमनीयम् ( ? ) न इलामातुलः अनिलामातुलः इलामातुलश्चन्द्रः इला चन्द्रस्य स्नुषा। चन्द्रस्तस्या मातुलः इलामातुलश्चन्द्रः स वज्रकुमारोऽचन्द्रोऽपि चन्द्रवत् कमनीयः इति भावः। अपि च कथमयं बालपल्लव इव पाणिस्पर्शेनापि म्लायमानलावण्यः बालकिसलय इव करस्पर्शेनापि म्लायमानं कान्तिहीनं लावण्यं सौन्दर्यं यस्य तथाभूतः। कठोरोष्मणि तीव्रातपतप्ते पाषाणे वज्ररचित इव रिरंसमानमानसः क्रीडमानमनाः, मातुरुत्संगगत इव सुखेनास्ते जनन्या अङ्कगत इव आमोदेन वर्तते इति। एवं कृतमतिविहितविमर्शः स भास्करदेवः "प्रियतमे वल्लभे कामम् अतिशयेन स्तनंधयधृतमनोरथायाः स्तनं धयति पिबतीति स्तनंधयो बालः तस्मिन्धृतो मनोरथोऽभिलाषो यया सा तस्यास्तव अयं भगवतः सोमदत्तमुनेः प्रसादात् कृपायाः सकाशात् लब्धः सर्वलक्षणोपपन्नः सकलसामुद्रिकशुभलक्षणलक्षितः वज्रकुमारो नाम

अस्माकम् इति अस्मदीयः स चासौ वंशश्च तस्य विशालतां विस्तृतिं विदधातीति विशालताविधायि तच्च तस्मात् च अस्मदीयान्वयस्य प्रसिद्धिविधाने पात्रं योग्योऽस्तीति अभिधायोक्त्वा, विधाय च यथावत्तस्य भगवतः पर्युपासनम्, पूजनम्, पुनस्तत एव अस्मादेव सोमदत्तगुरोः महतः माहात्म्यवतः अधिगतं लब्धं च एतदपत्यं बालोऽयमिति वृत्तान्तः येन स नभश्चरपतिः भावपुरं निजभगिनीपतिनगरम् अनुससार ययाविति भावः ।

[ पृष्ठ ८७ ] भवति चात्र श्लोकः—अन्तःसारेति—अन्तः आत्मनि सारो बलम् उपसर्गसहनसामर्थ्यं येषु तानि अन्तःसाराणि तादृशि शरीराणि येषां ते अन्तःसारशरीराः तेषु महापुरुषेषु । अहितेहितम् अहितानाम् अरीणाम् ईहितं चेष्टितम् उपसर्गादिकं दुष्कृत्यं हितायैव भवति । महापुरुषाणां गुणप्रादुर्भावकारणं भवति । अग्निसंयोगः तदश्मनि स्वर्णपाषाणे स्वर्णत्वाय हेमप्रादुर्भूत्यै किं न स्यात् । अपि तु स्यादेव ॥२०७॥

इत्युपासकाध्ययने वज्रकुमारस्य विद्याधरसमागमो नाम पञ्चदशः कल्पः ॥१५॥

## १६. वज्रकुमारस्य तपोग्रहणो नाम षोडशः कल्पः

[ पृष्ठ ८७-८८ ] वज्रकुमारो यौवनेनालंचक्रे इति संबन्धः । कथंभूतः सः । पुनरिति—पुनः बालभावात् शैशवात् शोणा ताम्रा छाया कान्तिः यस्य कायस्येति, क इव कङ्केल्लिपल्लव इव अशोकतरुकिसलय इव, धातकीति—पुष्पिताभिनवतरुपुष्पगुच्छ इव, अरुणमणिभिः पद्मरागमणिभिः निर्मितः कन्दुक इव गेन्दुक इव बन्धूनां संबन्धिजनानाम् । पुनः कथंभूतः । आनन्दितेति—आनन्दितम्, निरीक्षितम् इतस्ततो वीक्षां कुर्वत्, अमृतपोषम् अमृतं जलम्, दुग्धं घृतं च तत्पानं कुर्वाणम्, मन्थरं मन्दं मन्दं वलितं कुर्वाणं मुखं यस्य, सखेलं क्रीडया हस्तपरम्परया संचार्यमाणः नीयमानः, क्रमेण उत्तानशयः उन्मुखशयनम्, दरहसितम् ईषत्स्मितम्, जानुभ्यां चंक्रमणं रिङ्खनम् ऊरुजङ्घयोर्मध्यभागाभ्याम्, गद्गदालापः अस्पष्टभाषणम्, स्पष्टक्रिया च अस्खलितगमनभाषणादिकं च एतदर्भकस्थाम् अवस्थां दशाम् अनुभूय, स वज्रकुमारः यौवनेनालंचक्रे । क इव केन । यथा मरुमार्गः म्रियते पिपासया यस्मिन्मरुः स चासौ मार्गः निर्जलः पन्थाः छायावता पादपेन अलंक्रियते, छायापादपो यथा छायाप्रधानस्तरुर्यथा जलाशयेन शोभते, स च जलाशयो यथा कमलाकरेण कमलवनेन, स च कलहंसनिवहेन मरालविहगवृन्देन, कलहंसनिवहो यथा रामासमागमेन, स च रामासमागमः युवतिजनसंगः स्मरलीलायितेन मदनक्रीडनेन, तरुणीजनो युवतिसमूहः तस्य मन एव मृगो हरिणस्तस्य प्रमदवनेनेव आनन्ददेन उपवनेनेव यौवनेन तारुण्येन स वज्रकुमारः अलंचक्रे शुशुभे । ( तदनु वज्रकुमारः मामस्य दुहितरम् इन्दुमतीं परिणीय मायाविनम् अजगरं पवनवेगां पीडयन्तं वित्रासयामास इति संबन्धोऽत्र ज्ञेयः ) तदनु यौवनप्राप्त्यनन्तरं कथंभूतो वज्रकुमारः । बाढमिति—बाढम् अतिशयेन प्ररूढम् उद्भूतं तच्च तत् प्रौढं प्रवृद्धं यौवनं तारुण्यं तस्य अवतारसारो आगमनसामर्थ्यं यस्मिन् सः पुनः कथंभूतः । पितुर्मातुश्च वंशयोः निवेशः निवासो यासां तथाभूताभिः अनवद्याभिः निर्दोषाभिः विद्याभिः प्रबलितप्रतापगुप्तः प्रकृष्टसामर्थ्यविक्रमेण गुप्तः रक्षितः, ततश्च । प्राप्तेति—प्राप्तं लब्धं खचरलोकात् नभोगाभिजनात् आधिपत्यं श्रेष्ठत्वं येन सः, ( मामस्य कन्यां पर्यणयत् ) किं नामधेयस्य मामस्य । सुवाक्येति—पुवाक्यमूर्ति इति नाम्नः धामस्य गृहभूतस्य मामस्य जननीभ्रातुः । कथंभूतां दुहितरं पर्यणयत् । मदनेति—मदनस्य कामस्य यो मदः उद्रेकः तेन पण्यं स्तव्यं यत्तारुण्यं तस्य लावण्यमेव अरण्यं तत्र वनदेवतावतारस्य वसुमतीव भूमिरिव ताम् इन्दुमतीं दुहितरं सुतां परिणीय विवाह्य, मणिकुण्डलादयः पुरःसराः अग्रगा येषु तैः नभश्चरकुमारैः खचरपुत्रैः अनुगतः विजयार्धमहीधरम् अध्यास्तेति संबन्धः । कथंभूतं विजयार्धम् । पूर्वापरेति—पूर्वश्च अपरश्चामू पूर्वापरौ तौ च तौ अवारपारौ समुद्रौ पूर्वापरावारपारौ तयोस्तरङ्गा वीचयः तैः दन्तुरा उन्नता व्याप्ता वा कन्दराः गुहाः ताः धरतीति धरः तं पुनः कथंभूतम् । क्रीडेति—क्रीडायाः रसः प्रीतिः तस्या वर्धनेन उत्कुरम् उत्कटम् । विजयार्धमहीधरम् अध्यास्य उपविश्य, तस्य विजयार्धस्य नानास्थानानि निध्यायन् मायाशयु (वित्रासयामासेति संबन्धं दर्शयति ।) विहायश्चरीति—विहायः आकाशं तत्र चरो गमनं यासां ताः

विद्याधरवर्यः विद्याधरस्त्रियः ताभिः परिमलनेन मर्दनेन म्लानानि म्लानिं प्राप्तानि मृणालानि बिसानि कमल-नालानि जलजानि च यत्र, पुनः कथंभूतं स्थानम् । अशोकेति—अशोकतरोः पल्लवानां शय्यासु दर्पितेन पत्या आसाद्य प्राप्यं यद्विद्याधरीसुरतं तस्य परिमलेन सुगन्धेन बहुलं विपुलम् इदं लताकुञ्जस्थानम् इति निध्यायन्, पुनश्च कन्दुकेति—कन्दुकविनोदः गेन्दुकक्रीडा तस्मिन् परिणतास्तत्परा या अम्बरचर्यः खगाः तासां चरणालक्तकेन पादलिप्तयावकेन अङ्कितं चिह्नितम् अदः स्थानम् । तमालमूलानाम् आकलयं मण्डलीं यत्र तथाभूतमिदम् । इदं रमणीयम् मन्मनोहरमदः, अदश्च सुन्दरम् अटवीप्रतटं मेखलाचरतटस्थानं मनोहरम् । इति निध्यायन् पश्यन् चिन्तयन् वा । समेति—समाचरितः विहितः स्वैरविहारो येन, पुनः प्राप्तो हिमवद्गिरेः प्राग्भारः अग्रभागो येन सः । वज्रकुमारः मायाजगरेण निगीर्णां विद्याधरकन्यां पवनवेगां संरक्षितवान् । [ कस्य विद्याधरपतेरियं पवनवेगेति वर्ण्यते ] खचरीति—खेचरीलोचनानां चन्द्रवदाह्लादकस्य चन्द्रपुरेति नगरस्येन्द्रः स्वामी, यश्च अङ्गवती युवत्याः प्रीतेर्धाम गृहं तस्य गरुडवेगनाम्नः विद्याधरपतेः अतिशयरूपस्य पात्रीं भाजन-भूतां प्रियपुत्रीं पवनवेगां नाम असंगां सख्यादिपरिवाररहिताम् । प्रालेयेति—प्रालेयं हिमं तेन उपलक्षितः अचलः पर्वतः हिमाभिधः शैलः तस्य मेखलायां नितम्बे यत्खलतिकं नाम वनं तस्य लतालये निलीनाङ्गां निलीनं स्थितम् अङ्गं यस्याः सा ताम् । पुनः कथंभूतां तां बहुरूपिणी इति नाम्नः निषद्या स्थापना यस्यां सा ताम् अनवद्यां निर्दोषां विद्यामाराधयन्तीम्, अनयैव विघ्ननिघ्नया विघ्नं कुर्वत्या जातं अजगररूपं यस्यां तथा-भूतया विद्यया निगीर्णवदनां निगीर्णं गिलितं वदनं मुखं यस्यास्ताम् उपलक्ष्य दृष्ट्वा परोपकारचतुरः तार्क्ष्य-विद्यया गरुडविद्यया एतस्याः लपनं मुखं तेन आविलं भूतं तालु यस्य तं मायाशयालुं मायाजगरं वित्रासयामास पीडयामास । पवनवेगा तत्प्रत्यूहाभोगापगमानन्तरमेव तस्य मायाजगरस्य प्रत्यूहो विघ्नस्तस्याभोगो विस्तारः तस्य अपगमो विनाशस्तस्य अनन्तरमेव विघ्ननाशक्षण एव विद्यायाः सिद्धिं प्रपद्य प्राप्य 'अवश्यं इह जन्मनि अयमेव मे कृतप्राणत्राणावेशः कृतः विहितः प्राणत्राणस्य असुरक्षणस्य आवेशः प्रयत्नो येन स वज्रकुमार एव प्राणेशः प्राणनाथः' इति चेतसि अभिनिविश्य निश्चयं कृत्वा पुनः अस्यैव नीहारमहीधरस्य नीहारो हिमं तस्य महीधरः पर्वतः हिमाचलः तस्य नितान्तम् अतिशयेन तोरिणीपर्यन्ते नद्यास्तटे सूर्यप्रतिमाम् आतापनयोगं श्रित-वतः धृतवतः भगवतः पूज्यस्य । तप इति—तपोमाहात्म्येन कृतसकलप्राणिव्यसननाशस्य संयतस्य संयमिनो मुनेः पादपीठोपकण्ठे चरणासनसमीपे पठतः तव सेत्स्यति सिद्धिं यास्यति इत्युपदेशवशेन अभिनवमाराय अभिनवो नूतनः स चासौ मारो मदनः तस्मै वज्रकुमाराय गगनेति–गगने गमनं येषां तेषां विद्याधराणां या अङ्गनाः स्त्रियः तासां विद्याधरस्त्रीणां जीवितभूताम् अभिमतेति–अभिमतः अभिलषितः स चासौ अर्थश्च तस्य साधने पर्याप्तिः पूर्णता यस्यास्तां प्रज्ञप्तिं विद्यां वितीर्य दत्त्वा, निजनगर्यां पर्यटन् वज्रकुमारः तथैव तत्सूरिसमक्षं फेनमालिनी-नदीतटे विद्यां प्रसाध्य असाध्यसाधनेन प्रवृद्धविक्रमः अक्रमेति—अक्रमेण अन्याय्येन विक्रमेण शौर्येण अल्पी-भूतदैवं पुरंदरदेवं पितृव्यं पितुर्भ्रातरम् अव्याजम् अनिमित्तम् उच्छिद्य सद्यस्तत्क्षण एव तां विजयोत्सवपरम्परा-वतीम् अमरावतीं पुरं नगरीम् आत्मपितरं स्वतातम् अखिलगगनचरैः विहितपादसेवं भास्करदेवं स्थापयित्वा अस्मे-न्द्रियः स्वयंवरनिमित्तेन कृताभिलषितवल्लभसमागमाम्, मदनसमागमसंजातशृङ्गारसुन्दरां पवनवेगाम् अन्याश्च खेचरपतिकन्याः परिणीय भाग्यवतां धुर्यः नभोगामिनः संकल्पमात्रलब्धैस्तैस्तैः अलब्धपूर्वविलासैः समयं गमयामास ।

[ पृष्ठ ८६ ] अन्यदा पुनः इष्टा अभिप्रेता सुहृदादयस्तेषाम् प्रज्ञया तथा दुष्टा मत्सरिणः ये ज्ञातयः गोत्रिणो जनाः तेषां अवज्ञया अवहेलनेन आत्मनः स्वस्य परैधित्वं परेण एधित्वं वर्द्धनं पोषणं च अव-बुध्य ज्ञात्वा निजान्वयनिश्चये स्ववंशनिर्णये सति शारीरेषु उपचारेषु स्नानान्नपानादिव्यवहारेषु प्रवृत्तिरन्यथा निवृत्तिः इति विहितप्रतिज्ञः । ताभ्यां मातापितृभ्यां महेति—महान्तश्च ते मुनयः महामुनयः सप्तर्षयः तेषां माहात्म्ययुक्तः प्रभावसंपन्नः यो मन्त्रः तेन त्रिभासिताः भये प्रापिताः दुष्टा ईतयः रोगादिबाधाः ता एव निशाचरा राक्षसा यत्र तथाभूतायां मथुरायां तपस्यतः सोमदत्तस्य भगवतः सनीडे समीपे नीतः । तदङ्गमुद्राप्रायं मुनिशरीराकृतितुल्यम् आत्मकायं स्वदेहम् अवसाय निश्चित्य संजातानन्दनिकायः उद्भूतप्रमोदवृन्दः तौ

उभौ अपि उपनेतारौ मुनिसमीपं प्रापकौ मातापितरौ सादरं सस्नेहम् उक्तियुक्तिभ्यां प्रतिबोध्य उपदिश्य अव-धीरितोभयग्रन्थस्वयवस्वबाह्याभ्यन्तरग्रन्थः, निर्ग्रन्थः चारणर्द्धिबुद्धिः समपादि चारणर्द्धिधारकः समजायत। भवति चात्रार्या—कामविदूरे कामात् मदनात् विदूरे विशेषेण दूरे रहिते नरे जाते सति, नरे कामेभ्यः सकलपरिग्रहाभिलाषाभ्यो वा दूरे जाते सति, श्रीकल्पः लक्ष्मीसदृशः सुन्दरः कान्तालोकः स्त्रीणां समूहः तृण-कल्पः तृणवदुपेक्षणीयः त्यक्तुं योग्यो भवति। चितः संचितः मित्रगणः चितालोकः शवलोकवत् जायते। स्वजनः बन्धुवर्गः पुण्यजनश्च राक्षसजनो जायते ॥२०८॥

इत्युपासकाध्ययने वज्रकुमारस्य तपोग्रहणो नाम षोडशः कल्पः ॥ १६ ॥

## १७. बुद्धदास्याः पूतिकवाहनवरणो नाम सप्तदशः कल्पः

[ पृष्ठ ८९-९० ] पुनश्च एतस्यामेव किल मथुरायाम्, कथंभूतायां **महामहोत्सवेति**—महामहोत्सवे भक्त्या मुकुटबद्धैः क्रियमाणा या जिनपूजा सा महामहोत्सव उच्यते तस्मिन् उत्साहितानां नराणां आतोद्यानां वाद्यानां नादा ध्वनयः तैः मेदुराः प्रतिध्वनियुक्ता ये प्रासादास्ते एव कन्दरा यस्याः तस्याम्, गोचराय आहाराय चारणर्द्धियुगलं तद्बुद्धिसहितं मुनिद्वयं नगरमार्गे संगतगतिसर्गं संगतो गतेः गमनस्य सर्गो निश्चयो यस्य तत्, एकस्मिन्नेव समये समानगत्या आहाराय निर्गतमित्यर्थः। तत्र मथुरायां द्वित्रिपरिवत्सर एव द्वौ वा त्रयो वा परि अधिका हीना वा वत्सरा यस्मिन् तथाभूते अवस्थावसरे बालिकामेकां चिल्लचिकिनलोचनसनाथां चिल्लेन नेत्रमलेन चिकिने क्लिन्ने च ते लोचने नयने ताभ्यां सनाथां सहिताम् अनाथां पितृभ्यां रहिताम् आपणाङ्गण-चारिणीम् आपणानाम् अङ्गणं तत्र चारिणीं भ्रमन्तीं पण्यवीथिकायां भ्रमणं कुर्वतीम् स्खलद्गमनविहारिणीं स्खलता गमनेन विहरन्तीम् निरीक्ष्य विलोक्य प्रतीक्ष्य विमर्शं कृत्वा। पश्चाच्चरः पृष्ठतो गच्छन् सुनन्दना-भिधानगोचरः सुनन्दन इति नामविषयो यस्य स भगवान् पूज्यो मुनिः एवमवदत्। 'अहो दुरालोकः खलु प्राणिनां कर्मविपाकः, यदस्यामेव दशायां प्रभवति।' अहो प्राणिनां जीवानां खलु कर्मविपाकः कृतकर्मणः पापस्य पुण्यस्य वा फलानुभवः दुरालोकः, महता कष्टेन आलोको दर्शनं ज्ञानं यस्य तत्। यत् अस्यामेव दशायां शैशवावस्थायां प्रभवति स्वफलम् आस्वादयति। इति। पुरश्चारी भगवान् अभिनन्दननामधारी—अग्रे गच्छन् भगवान् पूज्यः अभिनन्दननामा मुनिः—तपःकल्पद्रुमोत्पादनन्दन सुनन्दनमुने मैवं वादीः—तपः एव कल्प-वृक्षस्तस्य उत्पादे उद्भावने नन्दनवनमिव, सुनन्दनमुने मैवं वादीः मा एवं अवोः। यद्यपीयं गर्भसम्भूता सती राजश्रेष्ठिपदप्रवृत्तं समुद्रदत्तं पितरम् अकाण्ड एव दशमीं दशाम् आनीय इदमवस्थान्तरम् अनुभवन्ती तिष्ठति। गर्भे समायाता सती राजश्रेष्ठिपदम् अधिष्ठितं समुद्रदत्तं जनकम् अनवसर एव दशमीं दशां मरणावस्थां नीत्वा इदं दुःखदं दशान्तरम् अनुभवन्ती तिष्ठति। जातमात्रतद्वियोगदुःखोपसदां धनदां मातरम् जननसमय एव तस्य पत्युर्विरहदुःखप्राप्तां धनदाख्यां जननीम् अनवसर एव मरणावस्थां नीत्वा इदं दशान्तरम् अनुभवन्ती तिष्ठति। प्रवर्धमाना च बन्धुजनम् अनवसर एव मृत्युमनयत् इति पूर्वोक्तः संबन्धोऽत्र ज्ञेयः। तथाप्यनया प्रौढयौवनया प्रौढं विशालं लोभनीयं यौवनं तारुण्यं यस्याः, सा तया। अस्य मथुरानाथस्य ऊर्विलादेवीविनोदावसथस्य ऊर्विलादेव्याः कृताभिषेकाया महिष्या विनोदावसथस्य क्रीडागृहभूतस्य पूतिकवाहनस्य महीनस्य पृथ्वीपतेः अग्रमहिष्या प्रधानराज्ञ्या भवितव्यम्। इत्यवोचत्। एतच्च तत्रैव प्रस्तावे पिण्डपाताय तत्रैव मथुरानगर्यां प्रस्तावे अवसरे समये पिण्डपाताय आहारग्रहणाय भिक्षार्थं हिण्डमानः भ्रमन् शाक्यभिक्षुः बुद्धसाधुः उपश्रुत्य आकर्ण्य 'नान्यथा मुनिभाषितम्' न भवेत् यतिवचनम् अनृतम् इति निर्विकल्पं निःसंशयं संकल्प्य विमृश्य। स्वीकृत्य चैनाम् अर्भिकां बालिकाम्। आहितविहारवसतिकाम् आहिता स्थापिता विहारवसतिकायां बौद्धमठस्थाने या ताम् बौद्धमठे तां संस्थाप्येति भावः, **अभिलषितेति**—अभिलषितानाम् अभिप्रेतानाम् अनुहारः आनयनं येषां तैः आहारैः अवीवृधत् तां बालिकां समवर्धयत् पोषयति स्म। परिजनपरिहासापेक्षेण गोत्रेण नाम्ना बुद्धदासीति आजुहाव आजहार। ( ततः गतेषु केषुचिद्वर्षेषु यौवने प्राप्ते तां राजा अपश्यत् इति वर्णयति ) कथंभूते यौवने। **भ्रमर-केलि**-भ्रमरको नाम नृत्यविशेषः तस्य भङ्गः पद्धतिः तस्य अभिनयप्रदर्शने भरते नाट्याचार्ये। पुनः कथंभूते।

भ्रूविभ्रमेति—भ्रुवोर्विभ्रमो विलासः वक्रीकरणादिकं तस्य आरम्भे विधाने उपाध्यायस्थानिनि शिक्षागुरुतुल्ये। लोचनेति—लोचनयोर्नेत्रयोर्विचारो भ्रमणं तस्य चातुर्ये आचार्य इव तस्मिन्। चतुरोक्तिः—चतुराणां वचनानाम् उक्तौ या चातुरी पटुता तस्याः प्रचारे प्रसारे गुरुरिव गुरुतुल्ये। बिम्बाधरेति—बिम्बवत् तुण्डिकाफलवत् रक्तौ तावधरौ तयोर्विकारस्य सौन्दर्ये कादम्बर्या मदिरायाः योनौ संभवे इव। निम्नोन्नतेति—निम्नानि जघनादीनि उन्नतानि स्तनादीनि तेषां प्रदेशानां प्रकाशने व्यक्तीकरणे शिल्पिनि सूत्रधारे। मनसिजेति—मनसिजो मदनः स एव गजः करी तस्य मदस्य उद्दीपने पिण्डिराहारः तेन पिण्डिते पुष्टे। शृङ्गारेति—शृङ्गारस्य या गर्भगतिः अन्तरात्मनि गतिः तस्या रहस्यस्य गूढस्वरूपस्य उपदेशके, समस्तेति—समस्तं च तद्भुवनं च तस्य मनश्चित्तं तस्य मोहने सिद्धौषधे प्रतिदिनं प्रादुर्भावस्य सामीप्यं प्राप्ते सति यौवने। सा रूपसंपन्महीयसी रूपसंपदा सौन्दर्यविभवेन महीयसी प्रवृद्धा गुर्वी बुद्धदासी सोत्तालं सोत्कण्ठम् उत्तुङ्गः उन्नतः तमङ्गः प्रासादः तस्य शृङ्गं शिखरं तस्य उत्संगो मध्यभागस्तं संगता। भ्रमणिकया भ्रमणहेतुना कृतं विहारस्य मठस्य उपान्ते समीपे गमनं येन तं पूतिकवाहनं राजानं सा अदर्शत् अपश्यत्। राजा च तामपश्यत्। राजा—अलकेति—इह हि बुद्धदासीरूपायां सरिति मदीया मम मतिः अलकाश्चूर्णकुन्तलाः कुटिलकेशाः तेषां वलयं मण्डलं तदेव आवर्तो जलभ्रमः तस्मिन् भ्रान्ता भ्रमणखिन्ना। विलोचनेति—विलोचने नेत्रे एव वीचिकास्तरङ्गाः तेषां प्रसरात् विधुरा पीडिता। स्तनद्वयसैकते कुचयुगलमेव सैकतं पुलिनं तस्मिन्। त्रिवलिवलने श्रान्ता त्रयाणां वलीनां समाहारस्त्रिवली तस्यां वलनेन भ्रमणेन श्रान्ता क्लान्ता पुनः नाभौ निमज्जनात् बुडनात् अपि श्रान्ता एवं मम मतिः प्रायेण मन्दोद्योगा शिथिलप्रयत्ना भवति खिन्ना भवतीति भावः वर्तते।

[ पृष्ठ ९१ ] इति राजा विचिन्त्य, चेतोभुवः मदनस्य विजृम्भप्रारम्भं बुद्धिप्रक्रमं निवार्य निरुध्य च, किमियं विहितविवाहोपचारा कृतपरिणयविधिः अथवा अद्यापि पतिंवरा वरीतुं योग्येति भिक्षुमापृच्छ्य, तत्र द्वितीयपक्षे यदि पतिंवरा तर्हि अस्मत्पक्षे अस्माकम् अधीना कर्तव्या। तया सह विवाहम् अहं करोमीति। समर्पितोऽभिलाषो यस्य तथाभूतम् आप्तपुरुषं विश्वस्तं नरं प्रेष्य प्रहित्य। रणरणकजडान्तःकरणः उत्कण्ठाजडचित्तः शरणमगात् गृहमगच्छत्। 'शरणं गृहरक्षित्रो'रित्यमरः। आप्तपुरुषोऽपि विश्वस्तनरोऽपि। अग्रमहिषीपदपणबन्धेन प्रधानराज्ञीपदप्रदानस्य व्यवहारं विनिश्चित्य साध्यसिद्धिं विधाय स्वामिनं राजानं तत्समागमिनं तया समागमवन्तम् अकरोत्। भवति चात्रार्या—पुण्यं वेति—जन्तुना प्राणिना यत्काले यस्मिन्काले पुरा यत् पुण्यं वा पापं वा आचरितं तत्समये तस्य पुण्यस्य पापस्य उदयकाले समागते सति तस्य जीवस्य सुखं च दुःखं च योजयति। तं जीवं तत्पुण्यं वा पापं वा सुखिनं दुःखिनं च करोति ॥२१०॥

इत्युपासकाध्ययने बुद्धदास्याः पूतिकवाहनवरणो नाम सप्तदशः कल्पः ॥१७॥

## १८. प्रभावनविभावनो नामाष्टादशः कल्पः

[ पृष्ठ ९१-९२ ] अथ समायाते इति—भव्यजनानन्दस्य संपादकानि कर्माणि पूजाभिषेकादीनि यत्र तथाभूते नन्दीश्वरपर्वणि समायाते सति। तया प्रतिप्रणयप्रेयस्या प्रतिषिद्धा या प्रणयप्रेयसी पूतिवाहनस्य राज्ञः प्रीतियुक्ता वल्लभा बुद्धदासी तया प्रतिचातुर्मास्यम् ओर्विलादेव्याः स्यन्दननिर्गमेण रथयात्रया भगवतः सकलभुवनोद्धरणस्थितेः सकलजगदुद्धारं कुर्वतः जिनपतेर्महामहोत्सवम् उच्छेत्तुं विनाशयितुम् अभिलषन्त्या, शुद्धोदनतनयस्य शुद्धोदननृपपुत्रस्य सुगतस्य इष्टपथं पूजार्थम् अष्टाहा अष्टदिनपर्यन्तं सकलपरिवारानुगतम् एतदुचितम् एतस्या रथयात्राया उचितं योग्यम् उपकरणजातं रथ-छत्र-चामरादिकम् अवनिपतिः राजा पूतिकवाहनः याचितः प्रार्थितः, स तथैव प्रत्यपद्यत अङ्गीकरोत्। उर्विलादेव्यपि सुभगभावात् पतिप्रियत्वात् सपत्नीप्रभवं सपत्न्याः प्रभवः उत्पत्तिर्यस्य तत् दौर्जन्यं दुष्टत्वम् अनन्यसामान्यम् असाधारणम् अप्रतीकारम् अनुपायं आकलय्य ज्ञात्वा सोमदत्ताचार्यम् उपसद्य प्राप्य 'भदन्त, यदि एतस्मिन् द्वित्रिदिनभाविनि द्वित्रिदिवसानन्तरं भविष्यति अष्टदिनोत्सवे पूर्वक्रमेण जिनपूजार्थं मथुरायां मदीयो रथो भ्रमिष्यति तदा मे देहस्थितिहेतुषु अन्नजलादिषु

पदार्थेषु साभिलाषं मनः इच्छायुक्तं मनः अन्यथा निरभिलाषं निरिच्छम्' इति प्रतिजिज्ञासमाना प्रतिज्ञां कर्तुम् इच्छन्ती तेन सोमदत्तेन भगवता पूज्येन मुनिना तन्मनोरथसमर्थनार्थं तच्चित्तेच्छासफलीकरणाय अवलोकितवक्त्रेण दृष्टमुखेन वज्रकुमारेण साधुना साधु संबोधिता आश्वासिता। 'मातः, सम्यग्दृशां सद्दर्शनवतीनाम् एणीदृशां हरिणनयनानां स्त्रीणाम् अवाप्तप्रथमकथे अवाप्ता लब्धा प्रथमकथा आद्यवर्णनं यया तत्संबोधनम्, हे मातः, अलम् अलम् आवेगेन खेदेन पूर्यतां मा स्म खेदिनी भूरित्यर्थः। यतः न खलु मयि समयसविध्याः जैनजनमातुः चिन्तावहे पुत्रके सति, अर्हतां जिनेश्वराणाम् अर्हणायाः पूजायाः प्रत्यवायः विघ्नः न खलु नैव भवेदित्यर्थः। तत् तस्मात् पूर्वस्थित्या यथापूर्वम् आत्मस्थाने स्वप्रासादे स्थातव्यम्। चिन्ता न कर्तव्येति। इति हृद्यं मनोहरम्, अनवद्यं निर्दोषम्, अमृषोद्यं न मृषा असत्यं तत् च तत् उद्यं वचनं सत्यं भाषणमिति भावः ; निगद्य उक्त्वा द्युगति—द्युगत्या आकाशगमनेन विद्याधरपुरम् आसाद्य प्राप्य गत्वा। महामुनितया, बान्धवधिषणतया च भ्रातृभावेन च, भास्करदेवो मुख्यो यस्मिन् तेन निखिलेन अम्बरचरचक्रेण विद्याधरसमूहेन क्रमशः कृताभ्युत्थानादिक्रियः सप्रश्रयं सविनयम् कृता अभ्युत्थानं ससंभ्रमम् आसनात् उत्थानम् अञ्जलिपुटं कृत्वा शिरसि संस्थापनम्, आदिक्रियाः यस्य, स वज्रकुमारमुनिः आगमनस्य आयतनम् आधारं पृष्टः स्पष्टम् आचष्ट अब्रूत। [ विद्याधरसमूहैः सह वज्रकुमारो मुनिः औविलाया रथं नगरे संचार्य महतीं प्रभावनां चकार ] कथंभूतैर्विहायोविहारैः विहायः आकाशं तत्र विहारः अस्ति येषां ते विहायोविहारास्तैः विद्याधरैरित्यर्थः। तानेव सविशेषं वर्णयति कविः—तदनन्तरम् आनकाः पटहाः, दुन्दुभयः 'दुं दुम्' इति अव्यक्तशब्दं कुर्वाणा वाद्यविशेषाः तेषां नादाः रवाः, उत्तालानि उत्कटानि च तानि क्ष्वेलितानि सिंहनादाः, तैः मुखराणि वाचालानि मुखमण्डलानि येषां ते तैः। पुनः कथंभूतैः सामयिकेति—समयः संकेतः अस्ति येषां ते सामयिकाः अयम् अलंकारो गजस्य अयं अश्वस्य, अयं बलीवर्दस्य इत्यादि संकेतयुताः सामयिकालंकारा उच्यन्ते। तेषु सारैः उत्तमैः अलंकारैः सज्जिता ये गजवाजयः विमानानि च तेषां गमनेन प्रचलन्ति कम्पमानानि कर्णकुण्डलानि येषां ते तैः, अनेकेति—अनेके बहवः अनणुमणयः महारत्नानि तैः निर्मिताः किंकिण्यः क्षुद्रघण्टिकाः तासां जालैः जटिलानि ग्रथितानि च यानि दुकूलानि क्षौमवस्त्राणि तैः कल्पिता ये पालिध्वजा महाध्वजास्तेषां राजिः पङ्क्तिः तया विराजितानि शोभितानि भुजपञ्जराणि येषां तैः, पुनः कथंभूतैः। करीति—करी गजः, मकरः नक्रः, सिंहः, शार्दूलः व्याघ्रः, शरभः अष्टापदः, कुम्भीरः जलचरविशेषः, शफरः मत्स्यः, शकुन्तानां पक्षिणाम् ईश्वरः गरुड इति, एतेषां पुरःसरा मुख्या आकारा येषां तादृश ताः पताकाः क्षुद्रध्वजाः तासां संतानाः समूहाः तैः स्तिमिताः स्तब्धाः करा येषां ते, तैः, मानस्तम्भेति—मानस्तम्भः, स्तूपः तोरणम्, मणिवितानं रत्नजटितं चन्द्रोपकः, दर्पणः, सितातपत्रं श्वेतच्छत्रम्, चामराः, विरोचनः सूर्यः, चन्द्रः भद्रकुम्भः मंगलकुम्भः एतैः पदार्थैः संभृताः शयाः हस्ता येषां तैः। करेषु एतान् पदार्थान् गृहीत्वाऽऽयातैः इति भाव.। पुनः कथंभूतैः। अतुच्छेति—अतुच्छो महान् स चासौ देवच्छन्दश्च हारविशेषः शतयष्टिकः तेन आच्छन्नः सर्वतो भूषितः स चासौ कर्णीरथः पुरुषस्कन्धनीयमानरथः, स्यन्दनः चक्रयुक्तयुद्धप्रयोजनवान् रथविशेषः। द्विपः करी, तुरगः अश्वः, नरा मनुष्यास्तैर्निकीर्णानि व्याप्तानि च तानि सैन्यानि तैः, इति। पुनः कथंभूतैः। जयघण्टया सहिताश्च ते पटुपटहाः महाभेर्यः करटा वाद्यविशेषाः मृदङ्गाः, शङ्खाः, काहलाः, त्रिविलाः, तालाः, झल्लर्यः भेर्यः भम्भाश्च एते आदौ येषां तानि वाद्यानि अनुगतानि यानि गीतानि तैः संगताश्च याः अङ्गनास्तासाम् आभोगः विस्तारः तेन सुभगः सुन्दरः संचारो येषां ते तैः। पुनः कथंभूतैः। कुब्जाः गडुलाः उन्नतपृष्ठाश्च, वामनाः ह्रस्वाः, किराताः घोटकरक्षकाः, कितवाः वञ्चकाः, नटाः नृपादिवेषधारिणः, नर्तका नृत्यशिक्षकाः, बन्दिनः वैतालिकाः, वाग्जीवनाः स्तुतिपाठकाः, तेषां विनोदेन आनन्दितः दिविजानां मनस्कारः यैस्ते तैः, पुनः कथंभूतैः। सखेलेति—सखेलाः क्रीडया सहिताः ये खेचरा विद्याधरास्तेषां सहचर्यः भार्याः ताभिः हस्तेषु विन्यस्ताः गृहीताः ते च ते स्वस्तिकाश्च, प्रदीपाश्च, धूपानां निपाः घटाश्च, प्रभृतीनि विचित्राणि अर्चनानां पूजनानाम् उपकरणानि साधनानि तेषां रमणीयः प्रसारो येषां तैः। पुनः कथंभूतैः। पिष्टातकेति—पिष्टातकः वस्त्रसुगन्धीकरणचूर्णं पटवासाय वस्त्रसुगन्धीकरणानि प्रसूनानि पुष्पाणि तेषाम् उपहारः बलिः तेन अभिरामाः

रमण्यः ललनास्तासां निकरो येषु तैः । पुनः कथंभूतैः । अपरैश्च तैस्तैः विधृतपूजापर्यायपरिवारैर्विहायोविहारैः विधृतः संधारितः पूजापर्यायाणां नित्यमहादिपूजानां परिवारो यैस्ते विहायोविहाराः नभश्चरजनाः तैः सह तं वज्रकुमारं तं भगवन्तम् अम्बरात् आकाशात् अवतरन्तम् उत्प्रेक्ष्य दृष्ट्वा भिक्षुदीक्षापटीयसी भिक्षूणां बौद्धसाधूनां दीक्षादाने पूजने पटीयसी चतुरा खलु बुद्धदासी पुण्यभूयसी पुण्यं भूयः प्रचुरं यस्याः सा प्रचुरपुण्यवतीति भावः । यस्याः सुगतसपर्यासमये बुद्धपूजावेलायां समायातं समागतं सकलमेतत्सुरसैन्यम् । इति धृतधिषणे धृता धिषणा मतिर्येन तस्मिन् पौरजनान्तःकरणे नागरिकमनसि सति, स भगवान्गगनगमनानीकैः सार्कं गगने नभसि गमनं येषां तानि अनीकानि सैन्यानि नभश्चराणां सैन्यैरित्यर्थः । औविलानिलये निलीय औविलाया महादेव्याः प्रसादे निलीय उषित्वा सावष्टम्भं सगर्वम् अष्टाह्नि नन्दीश्वरपर्वणि मथुरायां चक्रचरणं चक्राणि चरणा यस्य तं परिभ्रमय्य अर्हत्प्रतिबिम्बाङ्कितं जिनप्रतिमासनाथम् एकं स्तूपं तत्रातिष्ठिपत् स्थापितवान् । अत एवाद्यापि तत्तीर्थं देवनिर्मिताख्यया पप्रथे प्रसिद्धम् अभवत् । बुद्धदासी दासीवासीद्भग्नमनोरथा । किङ्करीव बुद्धदासी भग्नमनोरथा नष्टमनोऽभिलाषा बभूव । भवति चात्र श्लोकः—पूतिकस्य महीभुजः नृपस्य औविलाया महादेव्याः स्यन्दनं रथं वज्रकुमारको मुनिर्भ्रामयामास ॥ २११ ॥

इत्युपासकाध्ययने प्रभावनविभावनो नामाष्टादशः कल्पः ॥ १८ ॥

## १९. बलिनिर्वासनो नामैकोनविंशः कल्पः

[ पृष्ठ ९३-९४ ] अर्थित्वम् इति—अर्थित्वं प्रयोजनवत्त्वम् । भक्तिसंपत्तिः गुणानुरागसंपत् । प्रयुक्तिः जीवादितत्त्वेषु आत्मनो योजनं श्रद्धानम् इति भावः । सत्क्रिया सम्मानः । सधर्मणां सुविधेयता दासत्वम् । सधर्मसु समानधर्मिषु जनेषु सौचित्यकृतिः दानप्रियवचनाभ्यां तेषां संतोषोत्पादनम् । वत्सलता मता वात्सल्यगुणोऽभिहितः ॥२१२॥ स्वाध्याये इति—स्वाध्याये अध्यात्मादिविद्याविषये । संयमे प्राणिसंयमे इन्द्रियसंयमे च । सङ्घे श्रावकश्राविकार्यिकामुनिषु । गुरौ दीक्षाचार्ये शिक्षाचार्ये च । सब्रह्मचारिणि सहाध्यायिनि । यथौचित्यं दानमानाभ्यां यथा संतोषोत्पादनं भवेत्तथा । विनयम् आदरं प्राहुः ब्रुवन्ति स्म । के कृतात्मानः कृतः ज्ञातः आत्मा जीवस्वरूपं यैः ते ॥२१३॥ आधीति—आधिर्मानसी व्यथा । व्याधयो ज्वरादयो रोगाः तैः निरुद्धस्य पीडितस्य निरवद्येन कर्मणा पापरहितेन वैयावृत्येन औषधवचनादिना सौचित्यकरणं संतोषोत्पादनम्, वैयावृत्यं शुश्रूषा प्रोक्तम् । किमर्थम् । विमुक्तये कर्मराहित्याय अनन्तचतुष्टयप्राप्तये ॥२१४॥ जिने इति—दुर्जयकर्मठकर्मारातीन् जयतीति जिनः, अर्हन् तस्मिन् वीतरागसर्वज्ञे । जिनागमे अर्हत्प्रोक्ते द्वादशाङ्गप्रवचने । सूरौ आचार्ये । तपःश्रुतपरायणे तपःपरायणे साधौ, श्रुतपरायणे उपाध्याये । सद्भावशुद्धिसंपन्नः अनुरागः निष्कपटमनःशुद्धया तेषां गुणेषु अनुरागः प्रीतिः भक्तिरुच्यते ॥२१५॥ चातुर्वर्ण्यस्येति—चातुर्वर्ण्यस्य सङ्घस्य मुनि-ऋषि-यति-अनगारेति चतुर्भेदात्मकसङ्घस्य । यथायोग्यं तत्तद्गुणानतिवृत्त्या । प्रमोदवान् हृष्टेन मनसा वात्सल्यं प्रीतिं न कुर्यात् स समयी सधर्मा कथं स्यात् ॥२१६॥ तद्व्रतैरिति—तद्व्रतैः तत् तस्मात्कारणात् अहिंसादिभिः व्रतैः । विद्यया सम्यग्ज्ञानेन शास्त्रादिपाठनेन । वित्तैः धनैः । श्रीमदाश्रयैः, श्रीमतां धनिनाम् आश्रयैः आधारैः । शारीरैश्च शरीरसेवया च हस्तपादादिमर्दनेन मलमूत्राद्यपनयनेन च त्रिविधातङ्कसंप्राप्तान् आधिव्याधिवार्धक्यादिबाधाभिः क्लिष्टान् शारीरमानसागन्तुकाभिः पीडाभिर्दुःखितान् संयतान् मुनीन् उपकुर्वन्तु ॥२१७॥

[ पृष्ठ ९५ ] श्रूयतामत्रोपाख्यानम्—अस्मिन् वात्सल्यगुणे उपाख्यानं कथा श्रूयताम् । [ जयवर्मनामा नृपः शुक्रादिभिश्चतुर्भिर्मन्त्रिभिः सह सर्वजनानन्दनं वनं गत्वा अकम्पनाचार्यमभिवन्द्य धर्मकथां शुश्रावेति कथासंक्षेपः ] अवन्तिविषयेषु अवन्तिदेशेषु । सुधेति—सुधा अमृतमेव अन्धः अन्नं येषां ते सुधान्धसः देवाः, तेषां सौधाः विमानानि तानि स्पर्द्धन्ते शालाः गृहाणि यत्र तस्यां विशालायां पुरि उज्जयिनीनगरे । जयवर्मनामा काश्यपीश्वरः काश्यप्याः पृथिव्याः ईश्वरः अधिपतिः । कथंभूतः । प्रभावतीमहादेवीश्रितशर्मसीमा प्रभावती नाम महाराज्ञी तां श्रिता शर्मणः सुखस्य सीमा मर्यादा यस्य । [चतुर्भिर्मन्त्रिभिः सह राज्यं पालयन् प्रजाः अन्वशात्]

शाक्येति—शाक्यः सुगतस्तस्य वाक्यम् उपदेशः तदेव वारिधिः समुद्रः तस्मिन् क्रान्तिः प्रवेशः यस्य तथाभूतेन नक्रेणेव शुक्रेण । चार्वाकलोकानां नास्तिकानां दिवस्पतिना इन्द्रेण बृहस्पतिना मन्त्रिणा। रुद्रस्य महादेवस्य मुद्रा चिह्नं तेन अनुद्रिक्तो अनष्टो विवेको यस्य तेन प्रह्लादकेन मन्त्रिणा, अनुगतेन अनुसृतेन । वेदविद्याबलिना सचिवेन चिन्त्यमानराज्यस्थितिः चिन्त्यमाना विचार्यमाणा राज्यस्थितिः राज्यपालनं यस्य । एकदा एकस्मिन् समये, समस्तेति—सकलशास्त्राभ्यास एव वर्षः वृष्टिः तेन विस्फारिता प्रवृद्धिं गता सरस्वती शारदा एव नदी तस्यास्तरङ्गाः वीचयः नानाश्रुतज्ञानविषयाः तेषां परम्परा तस्यां प्लावनेन स्नानेन पवित्रिताः पूता ये विनेयजनाः शिष्यास्तेषां मनांस्येव नलिनानि कमलानि तेषां निकुरुम्ब समूहो येन तस्य । पुनः कथंभूतस्य । परमेति—परमाणि निर्दोषाणि तानि तपश्चरणानि तेषां गणः समूहः तस्य ग्रहणे अजिह्मं जहाति परित्यजति सारल्यमिति जिह्मं न जिह्मम् अजिह्मं तच्च तद्ब्रह्म च स एव स्तम्बः भुवनत्रयं यस्य, निष्कपटं यथा स्यात्तथा कृतेन तपसा संप्राप्तात्मस्वरूपस्य, महामुनिसप्तशतीवर्यस्य महामुनीनां सप्तशती तस्यां वर्यस्य श्रेष्ठस्य, भगवतोऽकम्पनाचार्यस्य महर्द्धिजुषः महर्द्धीः जुषते सेवते धारयते इति महर्द्धिजुट् तस्य महर्द्धिजुषः महर्द्धीः धारयतः । सर्वजनानन्दनं नाम नगरोपवनम् अधितस्थुषः कृतनिवासस्य, तस्य चरणार्चनोपचाराय पादपूजनविषये राजमार्गेषु महोत्सवस्य उत्साहः आनन्दः तस्य उत्सेकः अभिमानो यस्य स चासौ परिजनः परिवारः यस्य तथाभूतं पौरजनं नागरिकलोकम्, अभ्रंलिहगेहाग्रभागावसरे अभ्रं मेघं लेढि इति अभ्रंलिहं तत् गेहम् अभ्रंलिहगेहं मेघस्पर्शिगृहमित्यर्थः तस्य अग्रभागः तस्य अवसरः प्रदेशः तत्र । दिग्विलोकानन्दमन्दिरे दिशां विलोकनस्य आनन्दो यत्र तथाभूते मन्दिरे स्थितः जयवर्मनृपः समवलोक्य, 'कोऽयमकाण्डे प्रचण्डः पौराणामुद्यावोद्योगे नियोगः' 'कोऽयम् अनवसरे प्रचण्डः महान् पौराणां नगरनिवासिनाम् उद्यावः उत्सवः तस्मिन् उद्योगः प्रवृत्तिः तस्मिन् नियोगः निश्चयः' इति वितर्कयन् [नृपः वनपालेन आगत्य ससंघः अकम्पनसूरिः समायातः इति अकथ्यत] सकलसमयसंभविप्रसूनस्तिमितहस्तपल्लवान्तराद्वनपालात् सकलसमयाः सकलर्तवः तेषु संभवीनि च तानि प्रसूनानि पुष्पाणि तैः स्तिमितौ पूर्णौ हस्तौ तावेव पल्लवान्तरालं यस्य तस्मात् वनपालात् 'देव, भवद्दर्शनोत्सुकवनदेवतालोचने तवावलोकनोत्कण्ठितानि वनदेवतानयनानि यत्र तथाभूते । भगवत्तपःप्रभावप्रवृत्तसमस्तर्तून्मादितमेदिनीनन्दने भगवतो मुनेस्तपसां माहात्म्यादुद्भूतसकलर्तून्मादितपृथिवीनन्दने । निजलक्ष्मीविलक्ष्मीकृतगन्धमादने स्वस्य लक्ष्म्या शोभया विलक्ष्मीकृतो निःश्रीकृतो गन्धमादनो येन तस्मिन् पुरोपवने नगरोद्याने। सद्गुणश्रीसंपादितसमूहेन सद्गुणानां सम्यक्त्वादिगुणानां श्रिया लक्ष्म्या संपादितः लब्धः सम्यक् ऊहः येन तथाभूतेन महता मुनिसमूहेन अकम्पनसूरिः समायातः । कथंभूतः । सर्वसत्त्वेति—सर्वे च ते सत्त्वा आत्मानः तेषाम् आनन्दस्य प्रदाने उदाराभिधा महोपदेशः सा एव सुधा अमृतं तस्याः प्रबन्धेन अवधीरितं तिरस्कृतम् अमृतमरीचिमण्डलम् अमृतमया मरीचयः किरणा यस्य स अमृतमरीचिरिन्दुः तस्य मण्डलं बिम्बं येन । निखिलेति—सकलदिक्पालमुकुटरत्ननायकदर्पणीभवच्चरणनखमण्डलः, पुण्येति—पुण्यान्येव द्विपाः गजाः तेषां यूथं समूहः तस्य बन्धनवारिः बन्धनरज्जुः अकम्पनसूरिः समायातः । तदुपासनाय चास्य तस्य सूरेः उपासनाय पूजनाय च अस्य उज्जयिनीजनस्य महामहावहः महांश्चासौ महः महोत्सवः तम् आवहति इति महामहावहः चित्तोत्साहः । इत्याकर्ण्य प्रतूर्णं शीघ्रम् एतत्पादवन्दनोद्यतहृदयः एतस्य अकम्पनसूरेः पादयोर्वन्दने उद्यतं हृदयं यस्य स नृपः तत्र गमनाय मिथ्यात्वप्रबलतालताश्रयकलिं तं बलिम् अपृच्छत् । मिथ्यात्वस्य प्रबलता प्राचुर्यं स एव लता तस्याः आश्रयकलिम् आधारभूतं बिभीतकवृक्षं बलिम् अपृच्छत् पृष्टवान् ।

[ पृष्ठ ९६ ] सद्धर्मधुरोद्धरणगलिर्बलिः, देव—सद्धर्मः अहिंसाधर्मस्तस्य धूर्युगं तस्या उद्धरणं निराकरणं तत्र गलिः शक्तोऽप्यधूर्वहो बलीवर्दः । बलिः एवमवदत् । देव—नेति—न वेदादपरम् अन्यत्तत्त्वम् । न श्राद्धादपरो विधिः अन्यत् धर्मकार्यं न विद्यते । यज्ञात् प्राणिहिंसनात्मकात् अपरः अन्यः धर्मो न विद्यते । तथा द्विजाद् ब्राह्मणादपरोऽन्यः यतिर्न विद्यते ॥२१८॥ सन्मार्गसर्गोच्छेदकः प्रह्लादकः—रत्नत्रयात्मको मोक्षमार्ग एव सन्मार्गः तस्य सर्ग उत्पत्तिः तस्य उच्छेदकः प्रह्लादकः एवम् अवदत्—अद्वैतेति—अद्वैतात् न परं तत्त्वम् । अद्वैतम् एकमेवाद्वितीयं ब्रह्म इत्येवं तत्त्वम् । परं द्वैतादिकं मायारूपत्वात् तत्त्वं न भवति ।

न देव: शंकरात्पर: अन्य:। शिवेन प्रणीतं शैवं तच्च तच्छास्त्रं च शैवशास्त्रं तस्मात्परम् अन्यत् भुक्तिमुक्तिप्रदं वच: नास्ति। शिवशास्त्रादेव भोगादिकं लब्ध्वा अवसाने मुक्तिं च लभते जीव: ॥२१९॥ तथा नास्तिक्याधिक्यवाचस्पती नास्तिक्यं नास्ति जीव: न परलोकवार्ता, न पापं पुण्यं च इत्यादि-मानसिको विमर्श: नास्तिक्यम् तस्याधिक्ये वाचस्पती इव देवगुरू इव शुक्रबृहस्पती अपि राज्ञे जयवर्मणे स्वप्रज्ञां स्वबुद्धिं विज्ञापयामासतु: प्रकटयांचक्रतु:। मनागन्त:क्षुभितमति: क्षितिपति: ईषत् चित्ते कोपकलुषितबुद्धि: भूपति:—अहो दुर्जनतालतालम्बनकुजद्विजा: दुर्जनता खलता सा एव लता वल्ली तस्या आलम्बने आधारदाने कुजा वृक्षा इव द्विजा: हे ब्राह्मणा:। किं ममैव पुरतो भवतां भारती वाणी प्रवर्तते प्रगल्भते मत्ता भवति समर्था भवति। किं वा बुधप्रवेकस्य लोकस्यापि। बुधेषु विद्वत्सु प्रवेक: श्रेष्ठ: महाविद्वान् तस्यापि महाविदुषोऽपि लोकस्यापि पुरत: भवतां वाणी प्रगल्भते। सन्नीतिवसुमतीविदारणहलिर्बलि:—सती प्रशस्ता नीति: सदाचार: सा एव वसुमती भूमि: तस्या विदारणे हल इव लाङ्गल इव बलिर्मन्त्री अभाषत—इलापाल, इलां पृथ्वीं पालयतीति इलापालस्तत्संबोधनं हे इलापाल, यदि तव अस्मन्मनीषोत्कर्षविषये सेर्ष्यं मन: अस्माकं मनीषा मति: तस्या: प्रकर्षविषये तव चित्तं यदि असूयापरं विद्यते। तदास्ताम् तावदभ्यस्तशास्त्रप्रवीणप्रज्ञ: परं प्राज्ञ:, अभ्यस्तानि वाचनापृच्छनाम्नायानुप्रेक्षादिभि: मलितानि यानि शास्त्राणि तेषु प्रवीणा प्रज्ञा यस्य स प्राज्ञ: परं तावदास्ताम्, किं तु सर्वज्ञस्यापि वादिन: पुरस्ताद्वादे परिगृहीतविद्यानवद्या एव, अभ्यस्तविद्यासु अनवद्या एव पराजयदोषरहिता एव भवेम। स्थिरप्रकृति: क्षोणीपति: स्थिरा धैर्यवती प्रकृति: स्वभावनिर्मितिर्यस्य क्षोण्या: भूमे: पति: स्वामी जयवर्मनृप: 'यद्येवं शूराणां कातराणां च रणे व्यक्तिर्भविष्यति।' इत्याद्यभिधाय आनन्ददुन्दुभिरवोपार्जितपरिजनपूजोपकरणो आनन्दपटहध्वनिना आनायितपरिच्छदजनपूजा-द्रव्यसाधन: विजयशेखरं नाम करिणं गजम् आरुह्य, अन्त:पुरानुगमग्राह्य: अन्त:पुरस्त्रीणाम् अनुगम: अनुयानं तेन ग्राह्य: अङ्गीकार्य: सन्। अतिवाह्य नगरमार्गम् उल्लङ्घ्य। उपगतारामसीमसंसर्ग: संप्राप्तोपवनमर्यादा-संबन्ध:। तत: करिण: गजात् अवरुह्य अवतीर्य गृहीतार्यवेषपरिकर: राजवेषं परित्यज्य स्वीकृतविनीतजन-वेषव्यतिकर:, कतिपयाप्तपरिवारपुर:सर: कतिचनविश्वस्तपरिच्छदाग्रगत:। तं व्रतविद्यानवद्यं भगवन्तं व्रतानि अहिंसादीनि पञ्चमहाव्रतानि, विद्याश्च मतिश्रुतावधिज्ञानानि तै: अनवद्य: निर्दोष: परिपूर्ण इत्यर्थ: तम्। भगवन्तं यथावत् अष्टाङ्गसहितं नमस्कारं कृत्वा, समाचरितनीचासनपरिग्रह: समाचरितो विहित: नीचासनस्य परिग्रह: स्वीकारो येन, गुरो: पुरत: शिष्येण विनयेन उपवेष्टव्यम्, उच्चस्थाने गुरौ तिष्ठति शिष्येण नीचै: स्थाने स्थातव्यम् इति नियमात्, सविनयाग्रहं विनयाग्रहेण सहितो भूत्वा स्वर्गापवर्गस्वरूपनिरूपणपरायण: सद्धर्मसनाथां कथां प्रथयामास। स्वर्गमोक्षयो: स्वरूपस्य निरूपणे परायण: तत्पर: समीचीनर्हिसा-धर्मोपेतां कथाम् आख्यातवान्।

[ पृष्ठ ६७-६८ ] सत्कर्मवंशप्रभिदलिर्बलि:—सन्ति च तानि कर्माणि अहिंसासत्याचौर्यादीनि तान्येव वंशो वेणु: तं प्रभिनत्ति इति प्रभित् स चासौ अलिर्भ्रमर: स इव बलिरवदत्—स्वामिन्, कोऽयं स्वर्गापवर्गा-स्तित्वसङ्ग्रहे देवस्य दुराग्रह:। आचार्य, देवस्य नृपस्य स्वर्गमोक्षयो: अस्तित्वकल्पनायां कोऽयं दुरभिनिवेश:। अयं विफलाग्रहोऽस्ति। यतो द्वादशवर्षा स्त्री, षोडशवर्ष: पुरुष: तयोरन्योऽन्यम् अनन्यसामान्यस्नेहरसोत्सेक-प्रादुर्भूति: प्रीति:। तयो: उक्तवयसोर्नारीपुरुषयो: अन्यजनासाधारणस्नेहप्रकर्षोत्पत्ति: प्रीतिरुच्यते। सा एव प्रत्यक्षसमधिसर्ग: स्वर्ग: न पुन: न अदृष्ट: कोऽपीष्ट: स्वर्ग: समस्ति। सा प्रीतिरेव प्रत्यक्षेण सम्यक् निश्चयो यस्य स स्वर्गो ज्ञातव्य:, न पुन: अदृष्ट: केनापि मत: स्वर्ग: विद्यते। गुणभूरि: सूरि:—सकले प्रमाणबले बले, किं प्रत्यक्षताधिकरणम् एकमेव प्रमाणं समस्ति। सह कलिना वर्तते इति सकलिस्तत् संबोधनं हे सकले, अखिले प्रमाण-समूहे विद्यमानेऽपि हे बलिमन्त्रिन्, प्रत्यक्षताश्रयं किमेकमेव प्रमाणं विद्यते। नास्तिकेन्द्रमनोरथरथमातलिर्बलि:—अखिलश्रुतधरोद्धारादिपुरुषविदुष, एकमेव। नास्तिक एव इन्द्र: तस्य मनोरथ: मनोऽभिलाष: नास्ति परलोक:, नास्ति पुण्यं पापं चेत्यादिरूप: स एव रथ: तस्य मातलि: तन्नामा शक्रसारथि: तद्रूप: बलिरवदत् 'अखिलं श्रुतं सकलम् आगमज्ञानमेव धरा पृथ्वी तस्या उद्धारे आदिपुरुषविद्वुष प्रथमपुरुष: विद्वान् तत्संबोधनम्।

भगवान्—कथं तर्हि भवतः पित्रोर्विवाहाद्यस्तित्वतन्त्रम्। यदि त्वम् एकमेव प्रमाणं मन्यसे तर्हि तव पित्रोः मातुः पितुश्च विवाहादेः अस्तित्वे च तन्त्रं कारणं किं नु स्यात्। कथं वा तवादृश्यानां वंश्यानाम् अवस्थितिः। तव ये पूर्वजाः ये तु अधुना न दृश्यन्ते ते पुरा आसन् इति कथं निर्णयः स्यात्। स्वयमप्रत्यक्षप्रमेयत्वादाप्त-पुरुषोपदेशाश्रितौ स्वपक्षपरिक्षतिः परमतोत्सवकृतिश्च। हे बले, तव पूर्वजादयः अप्रत्यक्षप्रमेयाः प्रत्यक्षेण प्रमेयाः ज्ञेया नैव भवन्ति। ततः आप्तपुरुषोपदेशाश्रयः कर्तव्यः स्यात्। ये विश्वस्ताः पुरुषास्तेषां पूर्वजादिवार्ता-कथने प्रामाण्यम् अङ्गीकर्तव्यं स्यात्। ततश्च स्वपक्षस्य हानिर्भवेत् परस्य च आस्तिकानां मतोत्सवविधानं भवेत्। बलिभट्टो भट्ट इव इतस्ततटमितो मदोत्कटः करटीति संकटकप्रघटकमापतितः। बलिमन्त्री भट्ट इव वेदज्ञ इव, पण्डित इव इतस्ततं गिरि-भित्तिरितो मदोत्कटः दानोदकेन क्लिन्नगण्डस्थलो गजः इति संकटप्रघटकं दुःख-प्रकर्षमायातः। परं सभाजनकरम् उत्तरं आनन्दप्रदमुत्तरम् अपश्यन् अश्लीलं ग्राम्यम् असभ्यसर्गं खलजनोचितं निरर्गलमार्गम् उच्छृंखलपथं किमपि भाषणं तं भगवन्तं प्रत्युवाच। क्षितिपतिः जयवर्मनृपः अतीवमन्दाक्ष-बिक्षिप्तवीक्षणो अतिशयेन लज्जानम्रलोचनः मुमुक्षुसमक्षम् आत्मानं कर्मबन्धनान्मोक्तुम् इच्छावतां प्रत्यक्षम् आसन्नाशिवताशनिसंघट्टं समीपीभूताकल्याणवज्रपातं बलिभट्ट प्रतिष्ठाभङ्गभयात् किमप्यनभिलप्य किमपि अनुक्त्वा। भगवन्, संपन्नतत्त्वसंबन्धस्य लब्धतत्त्वसंपर्कस्य, निजस्खलितप्रवृत्तचित्तमहामोहान्धस्य स्वापराध-सन्निविष्टमनस्त्वान्महामोहान्धस्य सद्धर्मध्वंसहेतोः जिनधर्मविनाशकारणस्य जन्तोः प्राणिनः निसर्गस्थैर्यमेरुषु गुणगुरुषु प्रकृत्यैव धीरतायां मेरुतुल्येषु, गुणैर्महापुरुषतां प्राप्तेषु सत्पुरुषेषु न खलु दुरपवादकरणात्परं दोषारोपकरणादन्यत् अवसाने परिणामे प्रहरणमस्ति शस्त्रं भवति। इति वचनपुरःसरं कथान्तरम् अनुबध्य अन्या कथा कथान्तरम् अन्यविषयिणीं कथाम् अनुबध्य प्रसंगेन संचाल्य साधु निष्कपटं समाराध्य भक्त्या संपूज्य प्रशान्तिहैमवतीप्रभवगिरिम् अकम्पनसूरिं प्रकर्षेण या शान्तिः स्वस्वरूपचिन्तनाज्जातः परमाह्लादः सा एव हैमवती हिमवतः प्रभवति प्रकाशते प्रथमं दृश्यते इति हैमवती गङ्गानदी तस्याः प्रभवगिरिं हिमवन्तमिव अकम्पनसूरिम् विनेयजनसंभावनौचित्यज्ञया तदनुज्ञया विनेयजनाः शिष्याः तेषां संभावना आदरः तस्याः औचित्यं योग्यता तज्जानातीति तया शिष्यादरयोग्यतां विदन्त्या तदनुज्ञया सूरिसम्मत्या आत्मसदनं स्वहर्म्यम् आसाद्य, अपरेद्युः अन्यस्मिन् दिवसे अपरदोषमिषेण अन्यापराधनिमित्तेन सनिकारकरणं निकारो धिक्कारः तस्य करणं विधानं तेन सहितं सनिकारकरणम् अनुजैः शुक्रप्रह्लादबृहस्पतिभिः सह कर्मस्कन्धबन्ध-[1]बाद्धलिम् बलिं निजदेशान्निर्वासयामास स्वमण्डलान्निर्घाटयामास। भवतश्चात्र श्लोकौ—सन्नेति—यदि चित्तं मलीमसम् अशुभविमर्शदूषितं स्यात् तर्हि स सन् सज्जनो असन्नसज्जनः समावेव न तयोः किमप्यन्तरम्। पूर्वः सज्जनः अक्षान्तेः पराभ्युदयासहनात् क्षयं विनाशं याति। परश्च अशुभचेष्टितात् परः दुर्जनः अशुभकार्य-करणात् क्षयं लभते ॥२२०॥ स्वमेवेति—सज्जनं द्विषन् दुर्जनः स्वमेव आत्मानमेव हन्तुं ईहेत इच्छेत्। यः एकातुलां तुलायाः एकं पार्श्वम् आरोहेत्। असौ अधः न व्रजेत् किम्। अवश्यमधः व्रजेदेव ॥२२१॥

इत्युपासकाध्ययने बलिनिर्वासनो नामैकोनविंशः कल्पः ॥१९॥

## २०. वात्सल्यरचनो नाम विंशः कल्पः

[पृष्ठ ६८-६६] बलिमन्त्री लघुभिर्भ्रातृभिः सह हस्तिनापुरे पद्मराजानमाश्रयत्। बलिद्विजः सानुजः सकलजनसमक्षं सर्वजनप्रत्यक्षम् असूक्ष्मसूक्ष्मणपूर्वकम् असूक्ष्मं महान् सूक्ष्मणं पराभवः तत्पूर्वकं निर्वासितः निर्घाटितः सन् मुनिविषयरोषोन्मेषकलुषितः अकम्पनसूरिमुद्दिश्य यो रोषस्तस्य उन्मेषः उदयः तेन कलुषितः संतप्तचित्तः भूत्वा। कुरुजाङ्गलमण्डलेषु तद्विलासिनीति—तेषां कुरुजाङ्गलानां तन्नामकदेशानाम् विलासिन्यः ललनाः तासां जलकेलयः नीरक्रीडाः ताभिः विगलितं कालेयकं कुङ्कुमं सुगन्धिद्रव्यपङ्कं तेन पाटलाः श्वेतरक्ताः ये कल्लोलास्तरङ्गाः तान् धरति वहतीति धरा सा चासौ सुरसरित् गङ्गानदी सा एव सीमन्तिनी कामिनी तथा

१. बाद्धलिर्गजागमाचार्यः इति, टिप्पण्याम्।

चुम्बितः संश्लिष्टः पर्यन्तप्रसर आसमन्तप्रवेशो यस्य तस्मिन् हस्तिनापुरे । साम्राज्यलक्ष्मीमिव लक्ष्मीमतीं महादेवीम् अवहाय कृताभिषेकां लक्ष्मीमतीं महिषीं त्यक्त्वा । सरस्वतीरसावगाहसागरस्य सरस्वत्याः वाचां देव्याः रसः आस्वाद्यमानः प्रीतिविशेषः तस्य अवगाहे स्थानदाने सागरस्य समुद्रस्येव श्रुतसागरस्य भगवतः अभ्यर्णे समीपे पितृविनयविष्णुना पितुर्जनकस्य संबन्धिनं विनयं वेवेष्टि व्याप्नोतीति विष्णुः तेन विष्णुना निजजनके विनयातिशयं धारयता, विष्णुना तन्नामधारकेण लघुभूतं जन्म यस्य तेन तथाभूतेन सूनुना पुत्रेण सार्धं सह प्रवर्धितदीक्षापद्मस्य प्रवर्धितं विकासं नीतं दीक्षा एव पद्मं कमलं येन तस्य महापद्ममहीपतेः महापद्मेति नामवतो भूपतेः पद्मनामनिलयं तनयम् अशिश्रयत् आश्रयदित्यर्थः बलिर्मन्त्री निजानुजैः सह पद्मनामानं राजानम् आश्रयदित्यर्थः । पद्मोऽपि चारसञ्चारात् चाराणां गूढपुरुषाणां सञ्चारात् भ्रमणात् विदितवंशविद्याप्रभावाय ज्ञातान्वयज्ञानमाहात्म्याय तस्मै बलिसचिवाय सर्वाधिकारिकं स्थानमदात् । सर्वे अधिकारिणः यस्मिन् वशा भवन्ति तत् महास्थानम् अयच्छत् । बलिः—देव, गृहीतोऽयं स्वीकृतोऽयम् अनन्यसामान्यसंभावनाह्लादः प्रसादः इतरजनासाधारणादरप्रमोदः प्रसादः । किं तु कर्णेजपवृत्तीनां कर्णे लगित्वा परापकारजपनरूपा वृत्तिर्येषां ते कर्णेजपवृत्तयः परापकारोक्तिस्वभावानां खलानामित्यर्थः । पुनः कथंभूतानां लञ्चलुञ्चेति—लञ्चस्य उत्कोचस्य लुञ्चनं ग्रहणं तस्य उचिता योग्या चेतसः मनसः प्रवृत्तिर्येषां तेषां पुरुषाणां प्रायेण नियोगिपदम् अधिकारिपदं हृदयास्पदं तेषां हृदयानुरूपं न प्रतिभाति । परं शौर्येण ऊर्जितम् उन्नतं चित्तं यस्य, उदारं दानशीलं चित्तं यस्य तस्य च इदं नियोगिपदं नोचितम् अपि तु उचितमेव तत् तस्मात् असाध्यसाधनेन यत्कार्यं साधयितुं दुःशकं तस्य साधनेन साधनभूतेन ननु अयं जनः निदेशदानेन आज्ञाप्रदानेन अनुगृहीतव्यः उपकार्य इत्यर्थः । पद्मः—सत्यमिदम् । किं तु स्वामिसमीहितसुमनःसंवीणेषु स्वामिनो नृपस्य समीहितम् इष्टं कार्यं तस्मिन् सुमनसा संवीणेषु तत्परेषु भवद्विधेषु भवादृशेषु सचिवेषु सहायकमन्त्रिषु विद्यमानेषु किं नामासाध्यम् अस्ति । अन्यदा तु अन्यस्मिन्काले तु कुम्भपुराधिकृतमूर्तिः कुम्भपुरनामनगरे अधिकृतमूर्तिः स्वामित्वेन अधिष्ठिता मूर्तिः देहो यस्य कुम्भपुरस्य यो राजा अस्ति स तथाभूतः सिंहकीर्तिर्नाम नृपतिः । अनेकयोधनेषु नानायुद्धेषु लब्धम् आप्तं यशःप्रसाधनं कीर्तिभूषणं येन । सन्नद्धं युद्धोद्यतं सारसाधनं बलवत्सैन्यं यस्य । हस्तिनागपुरावस्कन्दप्रदानाय हस्तिनागनगराक्रमणप्रदानाय आगच्छन् एतन्नगरच्छन्नावसर्पनिवेदितागमनः अस्य नृपस्य कुम्भपुरे छन्नाः गूढतयावस्थिता ये अवसर्पाः चारास्तैर्निवेदितम् आगमनं यस्य, स बलिसचिवः पद्मनिदेशात् पद्मनृपादेशमनुरुध्य अभ्यमित्रीणप्रयाणपरायणेन विद्विषन्तं प्रति जेतुं गमनं यत्तदभ्यमित्रीणप्रयाणमुच्यते तस्मिन् परायणेन तत्परेण कूटं वञ्चनापूर्णं प्रकामं कदनम् अतिशयेन रोपेण कदनं युद्धं तस्मिन् कोविदा निपुणा धिषणा बुद्धिः यस्य तेन बलिना सचिवेन । अध्वमध्ये मार्गम् अवरुध्य युध्यमानः, नामनिर्गमविधानैः स्वकीयनामविरुदावलीसहितैः प्रधानैः युद्धसिद्धान्तोपान्तैः सामन्तैश्च नम्रीभूय ततो निर्गमोपायवद्भिः मुख्यैः युद्धस्य समरस्य सिद्धान्तानाम् उपान्तं समीपं गतैः सामन्तैः स्वविषयानन्तरराजभिः सं संलग्नोऽन्तः एकदेशो यस्याः सा समन्ता स्वविषयानन्तरा भूमिः तस्या अधिपतयः सामन्ताः । तैश्च सार्धं प्रबध्य तस्मै हृदयशल्योन्मूलनप्रमदमतये क्षितिपतये प्राभृतीकृतः । हृदयस्य मनसः शल्यस्य पीडायाः उन्मूलनात् निःशेषतया नाशात् प्रमदयुक्ता सानन्दा मतिर्यस्य तस्मै क्षितिपतये भूमिपतये पद्मनृपाय प्राभृतीकृतः उपायनीकृतः । क्षितिपतिः—शस्त्रशास्त्रेति—शस्त्राणि च शास्त्राणि च तेषां विद्यानाम् अधिकरणम् आश्रयरूपं व्याकरणं तस्य व्याकर्ता पतञ्जलिरिव तत्संबोधनं हे बले, निखिलेऽपि बले सकलेऽपि सैन्ये चिरकालमनेकशः कृतकृष्णवदनच्छायस्यास्य कृता कृष्णा श्यामा वदनच्छाया मुखकान्तिर्येन तस्य अस्य द्विष्टस्य शत्रोः विजयात् नितान्तम् अत्यन्तं तुष्टोऽस्मि प्रीतोऽस्मि । तद्याच्यतां मनोऽभिलाषवरो वरः, तस्मात्कारणात् यं वरं ते मनोऽभिलष्यति स याच्यतां व्रियताम् । बलिः—यदाहं याचे तदायं प्रसादीकर्तव्यः । इत्युदारम् उदीर्य निःस्पृहतां प्रदर्शयन्निव उदीर्य उक्त्वा, पुनश्चतुरङ्गबलप्रबलः चत्वारि अङ्गानि हस्त्यश्वरथपादातरूपाणि यस्य तेन बलेन सैन्येन प्रबलः महाशक्तिमान् बलिः प्रतिकूलभूपालविनयाय प्रतिकूलाः विरुद्धा ये भूपाला राजानः तेषां विनयाय आनुकूल्योत्पादनाय । पद्मम् अवनीपतिम् अवन्याः पतिं पृथ्वीशम् आदेशम् आज्ञां याचित्वा गृहीत्वा सत्वरं शीघ्रम् अशेषेति—अशेषाः सकलाः ताश्च ता आशा दिशः तासु वशाः निजाधीनाः कृताः निवेशाः स्थानानि ग्राम-

नगरादीनि येन तेन अनीकेन सैन्येन सूत्रितं व्याप्तं सकलं महीतलं येन तथाभूतः स बलिर्मन्त्री दिग्विजयार्थम् चचाल प्रतस्थे ।

[ पृष्ठ १००-१०१ ] अत्रान्तरे अस्मिन्प्रस्तावे । विहारवशात् भगवान् अकम्पनाचार्यः तेन महता मुनिनिकायेन साधुसमूहेन सार्धं हास्तिनपुरम् अनुसृत्य, उत्तरदिग्विलासिन्यवतंसकुसुमतरौ हेमगिरौ उत्तरा चासौ दिक् सैव विलासिनी स्त्री तस्याः अवतंसरूपाणि भूषणरूपाणि यानि कुसुमानि तैर्युतास्तरवो यत्र तस्मिन्हेमगिरौ । महावगाहायां महान् अवगाहो विस्तारेण अवकाशदानं यस्यां तथाभूतायां गुहायां चातुर्मासीनिमित्तं स्थितिं बबन्ध । चतुर्णां मासानां समाहारः चातुर्मासी तस्या निमित्तेन तत्र स्थितिं बबन्ध निवासं तेने ( बलिरपि हेमगिरिगुहायां ससंघम् अकम्पनसूरिमवलोक्य तं पीडयितुम् अग्निहोत्रमारेभे) बलिरपि निखिलेति—निखिलाश्च ते जलधयश्च समुद्राः तेषां रोधांसि तटानि तेषां सविधे समीपे यानि वनानि तेषु विनोदितानि वीरवधूनां हृदयानि येन सः । दिग्विजयं विधाय आगतस्तं भगवन्तम् अवबुध्य प्रत्यभिज्ञाय, चिरकालव्यवधानेऽपि दीर्घकालान्तरितेऽपि अलर्कविषनिषेक इव उन्मत्तः श्वा अलर्क उच्यते तस्य विषम्, अलर्कविषम् तस्य निषेकः क्षरणं दीर्घकालेनापि उन्मत्तश्वविषं जनं नितरां व्यथयति तथा जातप्रकोपोत्कर्षः स बलिस्तदपराधविधानाय पूर्वापराधशुद्धये वैरप्रतिनिर्यातनाय धराधीश्वरं पद्मं नृपं प्राग्दत्तवरनिमित्तेन समाशाखार्धं समा वत्सरः तस्य शाखा षण्मासकालः तस्य अर्धम् यस्मिंस्तत् । त्रिमासावधिकमिति भावः । किं तत् राज्यम्, कथंभूतम् आत्मैकशासनप्राज्यम् आत्मना एकेनैव शास्यते परिपाल्यते इति आत्मैकशासनं तस्मात् प्राज्यं प्रचुरम् । अन्तःपुरप्रचारैश्वर्यमात्रसधतः पद्मतोऽभ्यर्थ्य । भूभुजां स्त्र्यगारमन्तःपुरं तत्र प्रचारः सञ्चारः तद्योग्यमैवैश्वर्यं वैभवं यत्र तत् च तत्सद्म यस्य तस्मात् पद्मतः पद्मनृपात् अभ्यर्थ्य वरोपलिप्सां कृत्वा मखमिषेण यज्ञव्याजेन मुनिसैन्याजन्योत्कर्षं चिकीर्षुः मुनीनां सैन्यं सङ्घः तेन सह आ समन्तात् जन्योत्कर्षं युद्धोत्कर्षं चिकीर्षुः मुनिसमूहं नितरां पीडयितुमित्यर्थः । मदनद्रव्याधिकरणैः उपकरणैः अग्निहोत्रमारेभे । मदनद्रव्यं धुस्तूरकः अधिकरणं खदिरो वा अधिकरणम् आधारो येषु तैः उपकरणैः साधनैः अग्निहोत्रं यज्ञम् आरेभे चकार । (मिथिलापुरे जिष्णुसूरेः शिष्यो भ्राजिष्णुर्नाम नभसि कम्पमानं श्रवणनक्षत्रं वीक्ष्य क्वचिन्महामुनीनाम् उपसर्गो वर्तते इति जज्ञौ) अत्रावसरे अस्मिन्प्रसङ्गे निजनिवासेन निजेनाश्रमेण पवित्रीकृते मिथिलापुरे जिष्णुसूरेः जिष्णुनामधेयस्याचार्यस्य अन्तेवासी शिष्यः भ्राजिष्णुर्नाम तमीमध्यसमये तस्या निशायाः मध्यः समयः वेला तस्याम् निशामध्यवेलायाम् । बहिर्विहितविहारः आश्रमाद्बाह्यप्रदेशे कृतगमनः समीरस्य वायोर्मार्गे पथि नभसीत्यर्थः । नक्षत्रवीथीं ताराणां पङ्क्तिम् । लोचनालोकनसनाथां लोचनयोर्नेत्रयोरालोकनेन वीक्षणेन सनाथां युक्तां विदधानः । नेत्राभ्यां नक्षत्रवृन्दं वीक्षमाणः । चमूरुसञ्चारचकितगात्रं चमूरोर्मृगविशेषस्य सञ्चारः आगमनं तेन चकितं भीतं गात्रं शरीरं यस्य कुरङ्गकलत्रमिव हरिणभार्येव तरलतारकाश्रयणं चञ्चलकनीनिकाधारं पक्षे चञ्चलोडूनाम् आधारं श्रवणं तन्नामकं नक्षत्रम् । अन्तरिक्षे नभसि अवेक्ष्य लक्ष्यं बध्वा किलैवमुच्चैरवोचत् । "अहो न जाने क्वचिन्महामुनीनां महानुपसर्गो वर्तते ।" एतच्च श्रमणशरणगणी श्रमणानां श्राम्यन्ति बाह्यम् अभ्यन्तरं च तपश्चरन्तीति श्रमणाः साधवस्तेषां शरणं रक्षकः स चासौ गणी आचार्यः जिष्णुसूरिः समाकर्ण्य प्रयुक्तावधिबोधः उपयुक्तावधिज्ञानः । तन्नगरगिरिगुहायाम् अकम्पनाचार्यस्य बलिदुर्विलसितमवधार्य बलिना कृतं दुर्विलसितं दुष्टविधानं निश्चित्य, गगनगमनप्रभावम् आकाशगमने प्रभावो माहात्म्यं यस्य तं पुष्पकदेवं देशव्रतसेवं देशव्रतधारिणं क्षुल्लकम् आकार्य आमन्त्र्य हंहो पुष्पकदेव, तव विक्रियर्द्धेर्वैधुर्यान्न तदुपसर्गविसर्गे सामर्थ्यमस्ति । तव विक्रियर्द्धेरभावात् ससंघाकम्पनसूरिणः उपद्रवमोचने न क्षमतास्ति । ततस्तथाविधर्द्धिवृद्धिरोचिष्णवे विष्णवे उपसर्गमोचनसमर्थर्द्धिवृद्ध्या रोचिष्णवे भ्राजिष्णवे शोभमानाय तामदृष्टविशिष्टताभिवर्त्मस्थिताम् अपि अविदुषे अदृष्टविशिष्टता शुभदैवविशेषः तस्य अभिवर्त्मनि अभिमार्गे स्थितां शुभदैवविशेषेण प्राप्तामपि अविदुषे अजानते । निवेद्य कथयित्वा तदुपसर्गापवर्गायतस्योपसर्गविनाशाय । अस्मत्सर्गात् अस्माकमादेशात् । नियोजयितव्यः प्रयोजयितुं योग्यः ।" पुष्पकदेवः त्रिदशोचितचरणसेवस्य त्रिदशा देवास्तैः उचिता कर्तुं योग्या चरणसेवा यस्य तस्य महर्षेः भाषिताद्वचनात् तं देशमासाद्य विष्णुमुनये तथाविधर्द्धिवृत्तिं तादृशीं विक्रियर्द्धिप्रवृत्तिम्, गुरुनिदेशवृत्तिं च गुरोर्निदेश आज्ञा तस्य वृत्तिं प्रवृत्तिं च प्रतिपादयामास

कथयामास । विष्णुमुनिः प्रदीप इव स्फाटिकभित्तिमध्यलब्धप्रसरेण किरणनिकरेण यथा प्रदीपः स्वच्छमणि-रचितकुड्यमध्यादाप्तप्रचारेण रश्मिसमूहेनेव, कथंभूतेन करेण । उच्यते, वारिधिवज्रवेदिकानिर्भेदनेन मानु-षोत्तरगिरिपर्यन्तसंवेदनेन सागरस्य वज्रतटस्फेटनं कुर्वता करेण हस्तेन, पुनः कथंभूतेन मानुषोत्तरो नाम गिरिः पुष्करद्वीपस्य बहुमध्यभागे वलयाकारो वर्तते तस्य पर्यन्तं यावत् संवेदनम् अनुभवो यस्य तेन । पुनः कथंभूतेन करेण मनुष्यक्षेत्रसूत्रपातविडम्बनकरेण करेण मनुष्यक्षेत्रस्य यो मानदण्डस्तस्य विडम्बनकरेण अनुकरणं कुर्वता करेण ऊर्णनाभ इव तन्तुनिकाये काये स्ववशाश्रयया व्याससमासक्रियया च तामवगम्य । यथा ऊर्ण-नाभस्तन्तुवायनामा कीटविशेषः स तन्तुसमूहे व्यासो विस्तारः समासः संक्षेपः तयोः क्रियया निजवशाधारया स्वशक्ति जानाति तथा स्ववशाश्रयया निजाधीनाधारया विस्तारसंक्षेपक्रियया स्वकाये स्वशरीरे च तामवगम्य ज्ञात्वा । उपगम्य च हास्तिनपुरं गत्वा च हस्तिनागपुरम् । 'न खल्वनिवेद्य निखिलवर्णिवर्णाश्रमपालाय मध्य-मलोकपालाय आमर्षप्रवृत्ततन्त्रेण हुङ्कारमात्रेणापि कम्पितजगत्त्रया प्रसंख्यानवनविध्वंसदावे तपःप्रभावे दुर्जनविनयनार्थमभिनिविशन्ते यतीशाः' न खलु अनिवेद्य अकथयित्वा । कस्मै । निखिलेति—निखिलाश्च ते वर्णिनः ब्राह्मणक्षत्रियवैश्यशूद्राः तेषां वर्णाः आचारविशेषाः आश्रमाश्च ब्रह्मचर्य-गार्हस्थ्य-वानप्रस्थता भिक्षुकत्वं चेति चत्वारश्चाश्रमाः तान् पालयतीति तस्मै । मध्यमलोकपालाय मध्यमो लोकः नृलोकः तं पालयतीति तस्मै नृपतये । आमर्षप्रवृत्ततन्त्रेण आमर्षः क्रोधस्तेन प्रवृत्तं तन्त्रं कार्यं यस्य तेन हुङ्कारमात्रेणापि कम्पितजगत्त्रयाः प्रसंख्यानं ध्यानं तदेव वनं तस्य ध्वंसो नाशस्तस्मै दावोऽग्निः तत्सदृश इति भावः तस्मिन् तपःप्रभावे सत्यपि दुर्जनविनयनार्थं दुर्जनान् सन्मार्गेऽवतारयितुं यतीशा मुनीश्वराः न अभिनिविशन्ते न प्रयतन्ते । मुनयो महाप्रभावास्तथापि भूपालमनिवेद्य स्वतपःप्रभावं न दर्शयन्ति इति भावः । इति च परामृश्य मनसि विमर्श कृत्वा, प्रविश्य च पुरैव प्रथममेव चिरपरिचितकञ्चुकिसूचितप्रचारः अन्तःपुरं दीर्घकालमारभ्य विज्ञातसौविदल्लानुज्ञातप्रवेशः । प्रविश्य च अन्तःपुरम्, पद्ममहीपते, राजधानीषु अरण्यानीषु वा 'महारण्यं अरण्यानी' इति महावनेषु इत्यर्थः । तपस्यतः संयतलोकस्य मुनिजनस्य । न खलु नरेश्वरान्नृपात् परोऽन्यः प्रायेण बहुशः गोपायिता रक्षिताऽस्ति । तत्कथं नाम तृणमात्रेऽपि अनपराधमतीनां तृणमात्र-स्यापि हिंसाम् अकुर्वतां यतीनाम् आत्मनि अशुभलोकनिषेकसर्गम् अशुभो लोकः नरकतिर्यग्गतिषु जन्म तस्य निषेकः प्राप्तिः तस्य सर्गः प्रादुर्भावः यस्माद्भवेत् तम् उपसर्गं सहसा अविचारेण कथं करोषीति भावः इति उक्तं । भगवन् सत्यमेवैतत् । किं तु कतिचिद्दिनानि बलिरत्र राजा नाहम् ।' इति प्रत्युक्तियुक्तिस्थितं प्रतिवचनयुक्तौ स्थितं पद्मनृपतिम् अवमत्य अवज्ञाय । छलेन निमित्तेन खलु परेषु प्रायेण बहुशः अन्येषु तपःप्रभवर्द्धिलीलाः तपोजाताः ऋद्धीनां लीलाः फलोल्लासनशीलाः फलप्रकटनस्वभावाः, इति वा अवगत्य विज्ञाय । शालाजिर-सम्पुटकोटरावकाशप्रदीपप्रकाश इव संजातवामनाकृतिः । शालाजिरस्य वर्धमानस्य शरावस्य वा 'शालाजिरो वर्धमानः शरावः स्मर्यते बुधैः' इति हलायुधः । सम्पुटस्य च कोटरे मध्यभागे अवकाशोऽवगाहो यस्य तथाभूतस्य प्रदीपस्य प्रकाश इव संजातवामनाकृतिः प्रकटीकृतह्रस्वनराकारः । सप्ततन्तुवसुमतीमनुसृत्य सप्तभिरग्नि-जिह्वाभिस्तन्यते विस्तार्यते इति सप्ततन्तुर्यज्ञः तस्य वसुमतीं भूमिम् अनुसृत्य अनुगम्य । मधुरध्वनितृतीयेन सवनेन मधुरध्वनिना सह तृतीयेन सवनेन उदात्तेन स्वरेण प्राध्ययनम् उच्चैरध्ययनं वेदस्य व्यधात् अकरोत् ।

[ पृष्ठ १०२-१०३ ] बलिरिति—बलिः मेघशब्दसुन्दरं वाक्प्रसरं वचनप्रवाहं सिन्धुर इव गज इव निभृतकर्णः वशीभूतश्रोत्रः निवर्ण्य दृष्ट्वा कोऽयं खलु वेदवाचि विरिञ्च इव उच्चारचतुरः वेदवचने ब्रह्म इव उच्चारणकुशलः, इति कुतूहलितहृदयः कुतुकितमनाः, सत्रनिलयान्निर्गत्य सतः सज्जनान् त्रायते इति सत्रं यज्ञः तस्य निलयाद् गृहात् निर्गत्य । वयसि च निश्चिताश्चर्यसौन्दर्यं द्विजवर्यम् एनमवादीत् । वयसि तारुण्ये विज्ञाताद्भुतसौन्दर्यम् एनं विप्रश्रेष्ठम् अवादीत् अब्रवीत् । 'भट्ट, किमिष्टं वस्तु, चेतसि निधाय प्राधीषे' हे विद्वन्, कम् ईप्सितं पदार्थं धनादिकं हृदये संकल्प्य प्राधीषे उच्चैर्वेदवचनानि ब्रूषे । 'बले दायादविलुप्तालयत्वात् तदर्थं पादत्रयप्रमाणकलमवनितलम् । हे बलिमन्त्रिन्, सनाभिह्रुतगृहत्वात् चरणत्रयमानसुन्दरं भूमितलं चेतसि निधायाहं वेदवचनानि प्रोच्चैर्ब्रुवे । द्विजोत्तम ब्राह्मणश्रेष्ठ मया ते निकामं यथेप्सितं दत्तम् । यद्येवं बहुमान-

यजमान, विधीयतामुदकधारोत्तरप्रवृत्तिर्वृत्तिः। चेदेवं ब्रवीषि, महादरपात्र यजमान, उदकधारया हस्ते जलधारापातादनन्तरं प्रवृत्तिर्यस्या एतादृशी वृत्तिः संकल्पितदानं विधीयताम् क्रियताम्। बलिः प्रबलां महतीम् आलूं कमण्डलुम् आदाय गृहीत्वा। 'द्विजाचार्य, प्रसार्यतां हस्तः इत्युक्तवति, शुक्रः संक्रन्दनमिव कुलिशनिकेतनम्, यथा संक्रन्दनः इन्द्रः कुलिशनिकेतनम्, कुलिशं वज्रम्, निकेतनं ध्वजो यस्य एवंभूतो वर्तते। तथा, हस्तोऽपि कुलिशनिकेतनः कुलिशं वज्रं निकेतति निवसति अस्मिन्निति कुलिशनिकेतनस्तम्। पुनः कथंभूतं हस्तम्। प्रासादमिव कलशाह्लादम, प्रासादो यथा कलशेन ह्लादते तथा हस्तोऽपि कलशेन कुम्भाकाररेखाभिर्ह्लादते। जलाश्रयमिव मत्स्याश्रयम्, यथा जलाशयः मत्स्यानाम् आश्रयः आधारभूतः तथा हस्तोऽपि मत्स्याकाररेखाभिर्युतः, सरिन्नाथमिव शङ्खसनाथम्, सरिन्नाथः समुद्रः स शङ्खैः भृतस्तिष्ठति तथा हस्तोऽपि शङ्खचिह्नेन शोभते। विरहिणीवासरगणनकुड्यप्रदेशमिव ऊर्ध्वरेखावकाशम्, यथा विरहिणी स्ववल्लभवियोगदिनगणनाय कुड्यप्रदेशे भित्तौ ऊर्ध्वरेखा रचयति तथायं हस्तोऽपि ऊर्ध्वरेखाणाम् अवकाशेन शोभते। नारायणमिव चक्रलक्षणम् यथा नारायणः कृष्णः चक्रलक्षणेन सुदर्शनचक्रेण लक्ष्यते तथा हस्तोऽयं चक्राभिधेन सामुद्रिकचिह्नेन विराजते। यज्ञोपकरणमिव यवाधिकरणम्, यथा यवाः यज्ञोपकरणं साधनमभिधीयते यज्ञे यवा अग्नौ हूयन्ते तथा हस्तोऽपि अङ्गुष्ठमध्ये यवाकाररेखायुतो भवति। जलयानपात्रमिव निश्छिद्रतामत्रम्, जलयानपात्रं नौका तद्यथा नीरन्ध्रतापात्रं भवति तथा हस्तोऽपि निश्छिद्राङ्गुलियुतो भाति। स्तम्बेरमकरमिव दीर्घाङ्गुलिप्रसरम् यथा स्तम्बेरमो गजः तस्य करः शुण्डा स करो यथा दीर्घो भवति तथा हस्तोऽपि दीर्घाणां पञ्चाङ्गुलीनां प्रसरेण शोभते। वंशकिसलयमिव आनुपूर्व्या प्रवृत्तपर्वसञ्चयम्, यथा वंशस्य वेणोः किसलयं पल्लवः आनुपूर्व्यं पूर्वम् अग्रम् अनुसरतीति आनुपूर्व्यं तेन प्रवृत्तः पर्वणां वेणुग्रन्थीनां सञ्चयो यस्मिन् वेणौ यत्र यत्र ग्रन्थयो वर्तन्ते ताभ्यः किसलयोत्पत्तिर्भवति तथा अत्र हस्तकिसलयमपि अङ्गुलिग्रन्थिसहितं भवति। कमलकोशमिव अरुणप्रकाशनिवेशम्। यथा कमलस्य कोशः कर्णिका अरुणप्रकाशस्य निवेशेन पाटलायाः कान्त्याः निवेशेन स्थित्या शोभते तथा हस्तोऽपि ताम्रया कान्त्या कमलकोश इव विराजते। विद्रुमभङ्गाभोगमिव स्निग्धपाटलनखराग्रं विद्रुमाणां भङ्गो रचना तस्या आभोगः विस्तारः स यथा स्निग्धस्ताम्रश्च भवति तथा स्निग्धानि मसृणानि पाटलानि ताम्राणि नखराग्राणि यस्य एतादृशो वामन-विप्रस्य हस्तः शोभते, पुनः कथंभूतं हस्तं लक्ष्मीलताविर्भावोदयं लक्ष्मीः श्रीरेव लता वल्ली तस्याः आविर्भावस्य उत्पत्तेः उदयो उन्नतिर्यत्र। एतादृशं हस्तं शुक्र उपलक्ष्य दृष्ट्वा। खलु अयम् एवंविधपाणितलसंबन्धो गोत्रः पुरुषः परेषाम् अन्येषां याचिता। अन्येभ्यः पुरः याचनार्थं हस्तं न प्रसारयेत् किं तु अयम् इतरैर्याच्यो भवेत् इति वचनवक्रं वक्रोक्त्या ब्रुवन्तं शुक्रम् अवगणय्य बलिः स्वकीयां दत्तिं दानं पादत्रयप्रमाणाया भूमेः उदकधारोत्तरां जलधाराया हस्तेऽर्पणानन्तरम् अकार्षीत् अकरोत्। तदनु स विष्णुमुनिः विरोचनविरोकनिकर इव विरोचनः सूर्यः तस्य विरोकाः किरणाः तेषां निकरः समूह इव अक्रमेण ऊर्ध्वम् अधश्च अनवधिवृद्धिपरः अनवधिः न अवधिर्मर्यादा यस्यां सा चासौ वृद्धि तस्यां परः अमर्यादोपचयतत्परः, सर्वतश्च उभयतः प्रवृत्तापगाप्रवाह इव प्रसृतनदी जलविस्तार इव तिरः आसमन्ततः प्रसरत् वृद्धिं प्राप्नुवद्देहो यस्य स विष्णुमुनिः एकं कायधरं कायं शरीरं धरतीति कायधरः पाद इति भावः एकं पादम् अकूपारवज्रवेदिकायाम् अकूपारो लवणसमुद्रः तस्य वज्रमय्यां वेदिकायां निधाय स्थापयित्वा परं च क्रमम् अन्यं पादं चरणं चक्रवालपर्वतशिखरे। पुनस्तृतीयस्य चरणस्य मेदिनीं भूमिम् अलभमानः तपनरथस्खलनसेतुना सुरसरित्तुरीयस्रोतोहेतुना इत्यादिविशेषणानि तृतीयपादस्यावगन्तव्यानि। कथंभूतेन पादेन सूर्यस्यन्दनभ्रंशे सेतुना आलिना सूर्यरथमार्ग-प्रतिबन्धकेनेत्यर्थः। पुनः कथंभूतेन पादेन **सुरेति**—सुराणां सरिद् गङ्गानदी तस्याः तुरीयश्चतुर्थः स्रोतः प्रवाहः तस्य हेतुना तदुत्पादकेनेव गङ्गा विष्णुपदोद्भूतेति पौराणिकी कथा। **संपादितेति**—संपादितः उत्पादितः दिविजसुन्दरीणां देवाङ्गनानां चरणमार्गस्य निश्रेण्याः विभ्रमः संशयो येन। पुनः कथंभूतेन पादेन। **समाचरितेति**—समाचरितः उत्पादितः खेचरीणां नभोगाङ्गनानां चेतःसंभ्रमो मनःसंशयो येन। पुनः कथंभूतेन भूगोलगौरवपरिच्छेदे तुलादण्डविडम्बनेन भूगोलस्य गौरवं गुरुता तस्याः परिच्छेदे माने तुलादण्डविडम्बनेन मानदण्डम्

अनुकुर्वता चरणेन पादेन। क्षोभितान्तरिक्षचरपुरकक्षः क्षोभिताः क्षोभं प्रापिताः अन्तरिक्षचराणां नभोगानां पुरकक्षाः नगरविभागा येन। किन्नरामरखचरचारणादिवृन्दैः किन्नरामराः व्यन्तरदेवविशेषः। खचराः नभोगा विद्याधराः। चारणादयो देवविशेषाः तेषां वृन्दैः समूहैः, वन्द्यपादारविन्दः प्रणम्यमानचरणकमलः। संयतजनोपकारसारस्वकीयर्द्धिवृद्धिपरितोषितमनीषैः व्यन्तरानिमिषैः संयतजनो निर्ग्रन्थमुनिगणः तेषु उपकारे सारभूता समर्था या स्वकीया ऋद्धिवृद्धिः वैक्रियिकशरीरर्द्धिवृद्धिः, तया परितोषिता आह्लादं नीता मनीषा बुद्धिर्येषां तैः। व्यन्तरानिमिषैः व्यन्तरसुरैः। अकारणखलतास्थलिं निर्हेतुकदुष्टतायाः स्थानभूतं बलिं सबान्धवं शुक्रबृहस्पतिप्रह्लादसहितम् अबन्धयत्। प्रावेशयच्च सदेहं रसातलगेहम्। भवति चात्र श्लोकः—वत्सलः संयतजनस्नेहलः महापद्मसुतो महापद्मनृपतनयः विष्णुः हास्तिननगरे बलिमन्त्रिविहितं विघ्नं शमयामास निषूदयाञ्चकार॥ २२२॥

इत्युपासकाध्ययने वात्सल्यवर्णनो नाम विंशतितमः कल्पः॥ २०॥

## २१. रत्नत्रयस्वरूपनिरूपणो नामैकविंशतितमः कल्पः

[ पृष्ठ १०४-१०५ ] एवं सम्यग्दर्शनस्याष्टाङ्गानां स्वरूपं तत्कथाश्च सूरिवरेण कथिताः। अधुना सम्यग्दर्शनोत्पत्तिकारणानि तद्भेदाश्च निगद्यन्ते सूरिणा **निसर्ग इति**—तदाप्तौ सम्यग्दृष्टेः आप्तौ प्राप्तौ। निसर्गः इति—एकं कारणम्। अधिगमो वा तत्प्राप्तौ कारणम्। इति कारणयुगलं तत्प्राप्तेर्भवति। यदा अल्पप्रयासात् पुरुषश्चतुर्गतिजः संज्ञी पञ्चेन्द्रियो जीवः सम्यक्त्वभाग् भवति तदा तस्य तत्सम्यक्त्वं निसर्गात् जातमिति। यदा च अनल्पप्रयासतः सम्यक्त्वं लभ्यते तेन तदा तस्य तत् अधिगमजं ज्ञेयम्॥ २२३॥ उक्तं च-**आसन्नभव्यतेति**—रत्नत्रयाविर्भावयोग्यो जीवो भव्यः, कतिपयभवप्राप्यनिर्वाणपदः आसन्नः। आसन्नश्चासौ भव्यश्चासन्नभव्यस्तस्य भाव आसन्नभव्यता। कर्महानिः मिथ्यात्वादीनां सम्यक्त्वप्रतिबन्धककर्मणां यथा सम्भवमुपशमः, क्षयोपशमः क्षयो वा। संज्ञित्वं शिक्षाक्रियालापोपदेशग्राहित्वम्। संज्ञा अस्यास्तीति संज्ञी संज्ञिनो भावः संज्ञित्वम्। शुद्धपरिणामाः एते अन्तरङ्गहेतवः सम्यक्त्वस्य। बाह्योऽपि उपदेशकादिश्च सम्यगुपदेशको गुर्वादिः। आदिशब्देन जातिस्मरणजिनप्रतिमादर्शनादिकानि गृह्यन्ते। एतान् हेतूनवाप्य जीवः सम्यग्दृष्टिर्भवति॥ २२४॥ एतदुक्तं भवति—अस्यैवं विवरणं भवति—कस्यचिदासन्नभव्यस्य **तन्निदानेति**—सम्यक्त्वप्राप्तियोग्यद्रव्यक्षेत्रकालभावभवसंपदासेव्यस्य सनाथस्य। **विधूतेति**—सम्यक्त्वप्रतिबन्धकमिथ्यात्वतिमिराद्दूरनिर्गतस्य। **आम्निम्नेति**—गृहीत शिक्षाक्रियालापचतुरेन्द्रियान्तःकरणसंबन्धस्य। नवं मृत्तिकादिभाण्डं लशुनादिदुर्वासनागन्धरहितं भवति तथा मिथ्यात्ववासनासंभृतपाषण्डिजनगन्धरहितस्य शीघ्रमेव यथावस्थितपदार्थस्वरूपज्ञानकारणयुगलात्, स्फाटिकरत्नरचितदर्पणसदृशस्य। पूर्वभवश्रवणात् संजातजातिस्मरणेन वा। वेदनानुभवनेन वा। धर्मश्रवणेन वा। जिनप्रतिमादर्शनेन वा। महामहोत्सवावलोकनेन वा। महर्द्धिप्राप्तमुनीश्वरनिहालनेन वा। नरेषु देवेषु वा सम्यग्दर्शनप्रभाववैभवदर्शनेन वा। अन्येन केनचिद्धेतुना, विचारवनेषु मनोविहारेणापि खेदम् अप्राप्नुवन्, यदा जीवादिवस्तुषु याथात्म्यं ज्ञात्वा श्रद्धानं भवति तदा प्रयोक्ता आयासं कष्टं नानुभवति। यथा शुष्काः शालयः अनायासेन लूयन्ते स्वयमेव, शिक्ष्यन्ते चतुरमतयः स्वयमेव, इत्यादिवत्तन्निसर्गात्सम्यक्त्वं जातमिति प्रोच्यते। यदा तु अव्युत्पन्नता, संशयः विपर्ययश्च ज्ञाने उद्भवन्ति, तदा अधिमुक्तियुक्तिसूक्तिसंबन्धसविधस्य मुक्तौ मुक्तिविषये मुक्तिम् अधिकृत्य वा अधिमुक्ति तस्मिन् जीवस्य कर्माष्टकरहितशुद्धस्वरूपे युक्तियुक्ताः सूक्तीः श्रुत्वा, तच्छ्रवणात् जातसम्यग्ज्ञानसंबन्धस्य प्रमाणनयनिक्षेपानुयोगोपयोगावगाह्येषु सकलजीवादिषु वस्तुषु ऊहापोहरूपेण परीक्षणात्, अतिक्लेशं प्राप्य निःशेषदुराशयविनाशात्, सकलमिथ्याज्ञानविनाशात्, सम्यग्ज्ञानसूर्यकरैः तत्त्वेषु रुचिः श्रद्धानं संजायते, तदा विधातुरायासहेतुत्वात् कार्यकारिणः संक्लेशकारणत्वात् मया निर्मापितोऽयं हारः सूत्रानुसारेण, मयेदम्, संपादितम् आभूषणं रत्नरचनाश्रयम् इत्यादिवत् तदा अधिगमात्प्रादुर्भूतं सम्यग्दर्शनम् इत्युच्यते। उक्तं च **अबुद्धिपूर्वापेक्षायामिति**—अतर्कितोपस्थितम् अनुकूलं प्रतिकूलं वा दैवकृतम्। तत्र

बुद्धिपूर्वापेक्षापायात् तत्र पुरुषकारस्य प्रयत्नस्य अप्राधान्यात् । तद्विपरीतं पौरुषापादितं तत्र दैवस्य गुणभावात् पौरुषस्य प्रधानभावात् । अधिगमजसम्यग्दर्शनं पौरुषात् भवति । निसर्गजसम्यग्दर्शनं दैवाज्जायते इत्यर्थः ॥ २२५ ॥

[ पृ० १०६-१०६ ] सम्यक्त्वभेदानाहुः सूरयः—द्विविधमिति—आत्महितमतयः आत्महिते मतिर्येषां ते आत्महितमतयः सम्यग्ज्ञानिनः । सम्यक्त्वं द्विविधम् आहुः, निसर्गजमधिगमजं चेति । त्रिविधम्—औपशमितकम्, क्षायोपशमिकम्, क्षायिकं चेति । दशविधं च तत् पुरस्ताद्वक्ष्यते—तत्त्वश्रद्धानविधिः सम्यक्त्वम् । सर्वत्र च जीवादिषु समवृत्तिः रागद्वेषाभावः उपेक्षावृत्तिः ॥२२६॥ पुनरपि सम्यक्त्वस्य द्वैविध्यमन्येन प्रकारेण निगदति—सरागेति—सरागः आत्मा विषयो यस्य तत् सरागसम्यक्त्वं स्मृतम् । वीतराग आत्मा विषयो यस्म तत् वीतरागसम्यक्त्वं मतम् । सरागसम्यक्त्वं प्रशमादिगुणं प्रशमादयो गुणा यस्य तत् प्रशम-संवेग-अनुकम्पा-आस्तिक्यगुणचतुष्टययुतम् ! तत् पूर्वं प्रथमं कथ्यते । आत्मविशुद्धिमात्रत्वं द्वितीयं वीतरागसम्यक्त्वं भवति । तत्तु उपशान्तकषायादिगुणस्थानवर्ति भवति तत्र हि चारित्रमोहस्य सहकारिणोऽपायान्न प्रशमाद्यभिव्यक्तिः स्यात्केवलं स्वसंवेदनेनैव तद्वेद्येत ॥२२७॥ यथा हि पुरुषस्य पुरुषशक्तिरियम् अतीन्द्रियापि अङ्गनाजनाङ्गसंभोगेन अपत्योत्पादनेन च । विपदि धैर्यविलम्बनेन वा । प्रारब्धवस्तुनिर्वहणेन वा । यत्कार्यम् आरब्धं तस्यान्तगमनेन वा निश्चेतुं शक्यते, तथा आत्मस्वभावतया अतिसूक्ष्मयत्नमपि सम्यक्त्वरत्नं प्रसमसंवेगानुकम्पास्तिक्यैरेव वाक्यैराकलयितुं शक्यम् । नरस्य पौरुषं यथा नेत्रादिभिर्द्रष्टुं नालं तथापि नारीसंभोगादिकार्यैः निश्चेयं भवति तथा सम्यक्त्वमिदम् आत्मस्वभावत्वात् अतीन्द्रियमपि प्रशमादिभिरेव ज्ञातुं सुशकं भवति ।

[ पृष्ठ ११०-१११ ] १. प्रशमलक्षणम्—यद्रागादिष्विति—रागद्वेषादिदोषेषु मनोवृत्तेः निबर्हणं निवर्तनं तेभ्यः दूरतः स्थापनम् प्राज्ञाः तं प्रशमं ब्रुवन्ति । एनं प्रशमं विना सकलव्रताना पालनम् अशक्यम् । अत एनेन सर्वव्रतानि भूष्यन्ते ॥२२७॥ २. संवेगलक्षणम्—शारीरेति—शारीरदुःखं ज्वरादिकम् । मानसं दुःखम् अपमानादिकम् । आगन्तुकं च दुःखं विद्युदादिना जायते । एतद्दुःखत्रयं वेदनाशब्देनात्र ज्ञेयम् । एतासां वेदनानां प्रभवात् उत्पादकात् भवति संसारात् भीतिः संवेगः कथ्यते । अयं च भवः संसारः स्वप्नेन इन्द्रजालेन च संकल्पः सदृशो वर्तते ॥२२९॥ ३. अनुकम्पालक्षणम्—सत्त्वे इति—सर्वस्मिन् सत्त्वे प्राणिनि चित्तस्य दयार्द्रत्वं दयालवः कृपावन्तो नराः धर्मस्य परमं मूलं वृक्षस्य मूलमिव अनुकम्पां करुणाम् दयाम् कृपां च प्रचक्षते आख्यान्ति॥२३०॥ ४. आस्तिक्यमाह—आप्ते इति—सर्वज्ञे भगवति जिने । श्रुते द्वादशाङ्गेषु । व्रते अहिंसादिषु । यस्य चित्तं मनः अस्तित्वपरिचितं भवति तत् आस्तिक्यम् । उक्तिः वचनं युक्तिः प्रमाणनयात्मिका ते धरतीति उक्तिमुक्तिधरः तस्मिन्नरे उक्तम् । अथवा मोक्षसंयोगधरे मुक्तिगामिनि नरे आस्तिक्यम् उक्तम् ॥२३१॥ ५. निर्दयस्य संसारदीर्घता—रागेति—रागद्वेषवति, नित्यं निर्व्रते सततम् अहिंसादिव्रतरहिते । निर्दयात्मनि निर्दय आत्मा यस्य तादृशे निष्कृपे नास्तिकनीतियुक्ते नरे संसारो दीर्घसारः स्यात् दीर्घभ्रमणरूपः भवेत् । नास्तिको निर्दयश्च नरः दीर्घकालं संसारे परिभ्रमेत् इति भावः ॥२३२॥

[ पृष्ठ ११२-११५ ] ६. सम्यक्त्वस्य उत्पत्तिः प्रकाराश्च—अनन्तानुबन्धिचतुष्टयस्य, सम्यक्त्वप्रकृतेः सम्यङ्मिथ्यात्वस्य, मिथ्यात्वस्य च समूलात्क्षयात् जीवादिवस्तुनि यच्छ्रद्धानं भवति तत्क्षायिकं सम्यक्त्वम् । एतासां सप्तप्रकृतीनां शान्तेः उपशमात् औपशमिकम् । एतासु सप्तसु सम्यक्त्वस्य उदयेन अन्यासाम् उपशमनेन क्षयेण च जायमानं श्रद्धानं क्षायोपशमिकं ज्ञेयम्, एतत्त्रिविधं सम्यक्त्वं सर्वत्र गतिषु नारकतिर्यङ्नरदेवगतिषु संज्ञि-पञ्चेन्द्रियजन्तुषु बोध्यं ज्ञेयम् ॥ २३३ ॥ दशविधं सम्यक्त्वम्—आज्ञेति—अस्यायमर्थः ॥ २३४ ॥ १. आज्ञासम्यक्त्वम्—भगवता अर्हता सर्वज्ञेन रचितागमे जीवादिपदार्थवर्णने यथार्थम् अनुज्ञायाः आदेशस्य स्वीकरणात् जायमाना संज्ञा सम्यग्ज्ञानम् आज्ञासम्यक्त्वम् । २. मार्गसम्यक्त्वम्—रत्नत्रयं मोक्षमार्गः तस्य विचारात् सम्यग्दर्शनस्य विमर्शात् सर्ग उत्पत्तिर्यस्य तन्मार्गसम्यक्त्वम् । ३. उपदेशसम्यक्त्वम्—तीर्थंकर-चक्रवर्ति-नारायण-प्रतिनारायण-बलभद्राः पुराणपुरुषास्त्रिषष्टिः, तेषां, चरितानां श्रवणाज्जायमानः अभिनिवेशः श्रद्धाविशेषः उपदेशसम्यक्त्वम् । ४. सूत्रसम्यक्त्वम्—यतिजनानां महाव्रतादिचारित्रनिरूपणभाजनप्रायं सूत्र-

श्रद्धानं सूत्रसम्यक्त्वम् । बीजसम्यक्त्वम्—सकलसमयाः सकलसंकेताः तेषां दला विभागाः समूहाः तेषां सूचनाया व्याजं निमित्तं यस्य तत् बीजसम्यक्त्वम् । संक्षेपसम्यक्त्वम्—आप्तश्रुतव्रतपदार्थानां संक्षेपेण आलापो वर्णनं तच्छ्रुत्वा आक्षेपः रुचिग्रहणं श्रद्धानम् । विस्तारसम्यक्त्वम्—द्वादशाङ्गानाम् आचारादीनाम् चतुर्दशपूर्वाणाम् उत्पादादीनाम्, प्रकीर्णकानां सामायिकादीनाम्, अङ्गबाह्यानां विस्तीर्णश्रुतानाम् अर्थस्य समर्थनं श्रुत्वा प्रस्तारः हृदि रुचेः विस्तारो जायते । अर्थसम्यक्त्वम्—प्रवचनविषये आगमविषये स्वप्रत्ययसमर्थः स्वप्रत्ययः अर्थानुभवः तद्वितरणसमर्थः जीवादिरर्थः तच्छ्रद्धानम् अर्थसम्यक्त्वम् । अवगाढसम्यक्त्वम्—द्वादशाङ्गागमः, चतुर्दशपूर्वागमः, चतुर्दशप्रकीर्णकागमः एते त्रय आगमत्रयं कथ्यन्ते । एतेषां निःशेषतया साकल्येन अन्यतमदेशेन वा अवगाहनं कृत्वा आलीढम् उत्पन्नं यच्छ्रद्धानं तदवगाढम् । परमावगाढसम्यक्त्वम्—अवधिमनःपर्ययकेवलज्ञानिमहापुरुषाणां प्रत्ययेन उपदेशेन जातं सम्यक्त्वं परमावगाढम् इति सम्यग्दृष्टिर्दशविधा ज्ञेया । अधुना गृहस्थमुन्योर्भेदाः प्रतिपाद्यन्ते—**गृहस्थ इति**—सम्यक्त्वस्य आधारभूतो गृहस्थो वा यतिरपि वा । पूर्वः गृहस्थः एकादशविधः—मूलव्रती ( दर्शनिकः ), व्रतिकः, अर्चा ( सामयिकी ), पर्वकर्मा, ( प्रोषधोपवासी ), अकृषिक्रियाः ( आरम्भत्यागी ), दिवाब्रह्मा ( दिवाब्रह्मचारी ), नवविधब्रह्मा ( ब्रह्मचारी ), सचित्तत्यागी, परिग्रहपरित्यागी, भुक्तिमात्रानुमान्यता भुक्तिमात्रे चतुर्विधाहारे अनुमान्यता संमतिदानम् । अन्यत्र आरम्भादिषु अनुज्ञाया अदानम् ( अनुमतित्यागी ), उद्दिष्टाहारत्यागी । यतिश्च चतुर्विधः—मुनिः, ऋषिः, जिनयतिः, अनगारश्चेति येषां धर्मः चरमः मुनिधर्म इत्यर्थः ॥२३५॥ **मायेति**—माया वञ्चना, निकृतिः, निदानं विषयभोगाकाङ्क्षा, मिथ्यात्वम् अतत्त्वश्रद्धानम् एतानि त्रीणि शारीरमानसबाधाहेतुत्वात् कर्मोदयविकारः शल्यमित्युपचर्यन्ते । एतच्छल्यत्रयम् आर्जवम् अवञ्चकत्वम् अकाङ्क्षणाभावः निःस्पृहत्वम्, तत्त्वभावनं च जीवादितत्त्वेषु परमार्थरूपा श्रद्धा । एतैरेव कीलकैः शङ्कुभिः कृत्वा उपर्युक्तं शल्यत्रयम् उद्धरेत् हृदयादपसारयेत् ॥२३६॥

[ पृष्ठ ११६-११७ ] **दृष्टिहीन इति**—यथा दृष्टिहीनः नेत्रान्धः पुमान् ईप्सितं स्वेष्टं स्थानं न एति न प्राप्नोति तथा दृष्टिहीनः पुमान् सम्यक्त्वरहितो नरः ईप्सितं स्वाभिलषितं कर्मक्षयादिकं न एति न प्राप्नोति ॥२३७॥ **सम्यक्त्वमिति**—अङ्गहीनं निःशङ्कादिगुणरहितं सम्यग्दर्शनम् अङ्गहीनं दण्डकोशस्वामिसुहृदादिसप्ताङ्गरहितं राज्यमिव प्राज्यभूतये विपुलवैभवप्राप्तये न भवति ततः सम्यग्दर्शनस्याङ्गानां निःशङ्कितादीनाम् अष्टानां संगत्याम् एकीभूतायाम् अङ्गी जीवः निःसंगं निरपेक्षम् अष्टाङ्गपूर्णसम्यक्त्वोपेतं चारित्रं वाञ्छतु भव्यः ईहताम् ॥२३८॥ **विद्येति**—विद्या सम्यग्ज्ञानम्, विभूतिः ऐश्वर्यम्, रूपाद्याः सौन्दर्यम्, सज्जातिः सत्कुलादिकं सम्यग्दर्शनहीने अङ्गिनि जीवे कुतः भवन्ति बीजव्यपाये बीजाभावे सस्यसंपत्तिः धान्यानां निष्पत्तिर्न हि भवति ॥२३९॥ यस्य नरस्य दर्शनं निर्दोषं तस्य चक्रिश्रीः त्रिखण्डाधिपतेः षट्खण्डाधिपतेश्च राज्यविभूतिः, सत्रपोत्कण्ठा तम् अवलम्बितुमभिलष्यति । नाकिश्रीः नाकिनां स्वर्गिणां श्रीर्लक्ष्मीः तं द्रष्टुमुत्सुकीभवति । तस्य मुक्तिश्रीः निर्वाणलक्ष्मीः सकलकर्मक्षयरूपा अनन्तज्ञानाद्यनन्तगुणरूपा च दूरे नैव ॥२४०॥ **मूढत्रयमिति**—दृग्दोषाः दृशः सम्यग्दृष्टेः दोषाः दूषणानि मलाः पञ्चविंशतिः तान् कथयति—मूढत्रयं लोकदेवपाषण्डिमूढतास्तिस्रः, मदाः गर्वा अष्टौ ज्ञान-पूजा-कुल-जाति-बल-ऋद्धि-तपो-वपूंषि अष्टौ आश्रित्य मानवहनम् अष्टौ मदाः । तथा अनायतनानि षट्-सम्यग्दर्शनस्य आश्रयभूतानि निवासतुल्यानि आयतनानि यानि न भवन्ति तानि अनायतनानि, तानि चैवम्—मिथ्यादर्शनज्ञानचारित्राणि त्रीणि, त्रयश्च तद्वन्तः पुरुषा इति षडनायतनानि । अथवा असर्वज्ञः, असर्वज्ञायतनम्, असर्वज्ञज्ञानम्, असर्वज्ञज्ञानसमवेतः पुरुषः, असर्वज्ञानुष्ठानम्, असर्वज्ञज्ञानानुष्ठानसमवेतपुरुषश्चेति । अष्टौ शङ्कादयश्च शङ्का काङ्क्षा विचिकित्सा मूढदृष्टिता अनुपगूहनम् अस्थितीकरणम् अवात्सल्यम् अप्रभावना चेति सम्यग्दर्शनस्य पञ्चविंशतिर्दोषाः ॥२४१॥ **निश्चयोचितेति**—सुदृष्टिः सम्यग्दृष्टिः तत्त्वकोविदः तत्त्वानां जीवाजीवादिसप्तपदार्थानां कोविदः ज्ञाता । निश्चयोचितचारित्रः निश्चयः आत्मनः शुद्धस्वरूपं तत्प्राप्तये उचितं योग्यं चारित्रम् आत्मनि स्थितिरूपं तद्यस्यास्ति स निश्चयोचितचारित्रः भवति । सम्यग्दृष्टिर्जनः सम्यग्ज्ञानं चारित्रं च लभते इत्यर्थः । स सम्यग्दृष्टिः अव्रतस्थोऽपि मुक्तिस्थो भवति । परं व्रतस्थोऽपि अदर्शनः मिथ्यादृष्टिः मुक्तिस्थः न

भवति। मिथ्यादृष्टेर्ज्ञानानि मुक्तये न भवन्ति ॥२४२॥ **बहिःक्रियेति**—बाह्या क्रिया बाह्यज्ञानचारित्रादिकम्, बहिःकर्म केवलं रत्नत्रयसमृद्धेः सद्दृष्टिज्ञानवृत्तानां समृद्धेः उन्नतेः केवलं कारणं निमित्तं शरीरेण क्रियमाणं गमनादिकं देवपूजनादिकं च भवेत् घटोत्पत्तौ मृदादेः कुलालादिवत्। परम् आत्मा स्वयं रत्नत्रयसमृद्धिं कृत्वा रत्नत्रयात्मको भवति। रत्नत्रयम् आत्मानं मुक्त्वा अन्यद्रव्ये न वर्तते। अतः स एव रत्नत्रितयपरिणतावुपादानम्। तत्त्रिकमय आत्मा मोक्षस्य कारणं भवति ॥२४३॥ रत्नत्रयस्वरूपमाह—**विशुद्धेति**—भूतार्थनयवादिनां निश्चयनयवादिनाम्। वस्तुनः अनर्थान्तरत्वेन कर्तृकर्मकरणादीनाम् अभेदेन प्रतिपादनं कुर्वाणो नयो भूतार्थनयः तस्य वादिनः भूतार्थनयवादिनः तेषाम्। विशुद्धवस्तुधीः दृष्टिः विशुद्धं ज्ञानादिभ्योऽभिन्नं वस्तु आत्मा इति धीः बुद्धिः सा एव दृष्टिः दर्शनम्। अभिन्नो ममात्मा ज्ञानादिभिः इति श्रद्धा दर्शनम्। साकारगोचरो बोधः। आकारः अर्थविकल्पः। अयं घटः अयं पटः इत्यादिवस्तुभेदः आकारः वस्तुनो वर्णसंस्थानादयोऽपि। आकारेण सहितः साकारः पदार्थः स गोचरो विषयो यस्य स गुणः बोध उच्यते। अप्रसंगः तयोः अप्रसंगः वृत्तम्। तयोः सम्यग्दर्शनसम्यग्ज्ञानयोः अप्रसंगः रागद्वेषमोहादिभिः अप्रसक्तत्वं रहितत्वं वृत्त चारित्रम् इति निश्चयनयेन रत्नत्रयलक्षणम् उक्तम् ॥२४४॥

[ पृष्ठ ११८-१२२ ] **अक्षात् इति**—यत् यस्मात् आत्मनि मोक्षं प्राप्ते सति अक्षात् षडिन्द्रियात् ज्ञानं न भवति मोहात् जीवे मोहनीयकर्मणः रुचिर्न किं तु आत्मरुचेरेव रुचिर्भवति। देहाच्छरीरात् चारित्रं न किं तु आत्मन्येकलोलीभावश्चारित्रम्। अथवा अक्षात् इन्द्रियषट्कात् घटपटादेर्ज्ञानं नास्ति। मोहात् अदेवे देवताबुद्धिः, अगुरौ गुरुकल्पना, अतत्त्वे तत्त्वधीः मोहः दुरभिनिवेशः तस्मात् रुचिः यथार्थतत्त्वश्रद्धा नास्ति। यत् देहात् वृत्तं चारित्रं च नास्ति तस्मात् निश्चयनयेन शिवीभूते शुद्धस्वरूपधारिणि अस्मिन्नात्मनि तज्ज्ञानं रुचिः वृत्तं च विद्यते यतः तत् आत्मैव तत्त्रयं ज्ञेयः ॥२४५॥ **नात्मेति**—आत्मा कर्म न, ज्ञानावरणादिरूपं न, कर्म आत्मरूपं न, यत् यस्मात् तयोर्महदन्तरं स्वरूपवैलक्षण्यम्। तत् तस्मात् आत्मा आत्मैव, सत्ता, आत्मा केवलं व्योमेव आकाशमिव कर्मरहितः आत्मा निर्लेपं व्योमेव, कर्मरहितत्वात् शुद्धत्वात् आत्मा सत्तेव महासत्तेव ॥२४६॥ **क्लेशायेति**—आत्मनि जीवे स्वयं विशुद्धे सति तन्निर्मलीकरणाय क्रियमाणं तपश्चरणादिकं कर्म क्लेशाय कारणं स्यात्। किंचित् अम्बु जलं स्वतः स्वभावेन उष्णं न किं तु वह्निसंश्रयं अग्निसांनिध्येन तत् उष्णं भवति ॥२४७॥ कर्मण आत्मनश्च कर्तृत्वं स्वस्वविषय एवेति दर्शयति—**आत्मेति**—आत्मा स्वपर्याये ज्ञानदर्शनादिगुणानाम् अवस्थानिवहे कर्ता भवति तथा कर्म च स्वपर्यये कर्तृ ज्ञानावरणादिपर्याये, परं मिथः अन्योन्यम् अनयोः कर्तृत्वम् उपचारात्, अपरत्र कर्मणः आत्मनि, आत्मनश्च कर्मणि ज्ञेयम्। जातु उपचारं विमुच्य अन्योऽन्ययोः कर्तृत्वं नास्ति। आत्मनः पर्याये कर्म निमित्तकारणम्, कर्मणः पर्यायपरिणतौ आत्मा निमित्तं परम् उभे अपि आत्मकर्मणी स्वस्वपर्याये उपादानकारणं भवत इति ज्ञेयम् ॥२४८॥ **स्वत इति**—इदं षड्द्रव्यमयं जगत् सचराचरं विद्यते तत्र जीवपुद्गलौ चरौ शेषं द्रव्यचतुष्कम् अचरम् सर्वं जगत् स्वभावेषु सक्रियम्। क्रिया द्विविधा—परिस्पन्दात्मिका अपरिस्पन्दात्मिका च। उभयनिमित्तवशादुत्पद्यमानः पर्यायो द्रव्यस्य देशान्तरप्राप्तिहेतुः क्रिया सा क्रिया जीवपुद्गलयोर्वर्तते तयोरेकस्मात् स्थानादन्यत्र गमनावलोकनात्। अपरा क्रिया अपरिस्पन्दात्मिका वर्तते। द्रव्यस्य पर्यायो धर्मान्तरनिवृत्तिधर्मान्तरोपजननरूपः अपरिस्पन्दात्मकः परिणामाभिधानो यथा जीवस्य क्रोधादिः। पुद्गलस्य वर्णादिः। धर्माधर्माकाशानाम् अगुरुलघुगुणवृद्धिहानिकृतः। यथा सरिणि मत्स्ये वाः जलं गतेर्निमित्तं भवति मत्स्यः स्वयं गच्छति जलं तद्गतेः बलाधाननिमित्तं भवति। तथा सर्वं सचराचरं स्वतः स्वभावेषु सक्रियं भवति परम् अन्यद्द्रव्यं तत्क्रियायां निमित्तं भवति ॥२४९॥ जीवस्य हिंसकत्वं निगदति प्राणिनः स्वकर्मतः जीवन्तु जीवनं प्राणधारणं कुर्वन्तु म्रियन्तां वा मरणं वा प्राप्नुवन्तु। परं स्वं विशुद्धं निर्मलं मनः हिंसन् रागद्वेषवशीभूतं कुर्वन् जन्तुः हिंसकः पापभाग् भवेत्। यदा मनो रागद्वेषवशं जायते तदा मलिनं पापयुक्तं संपद्यते ॥२५०॥ कीदृश आत्मा हिंसकोऽपि न हिंसक इत्यनुयुक्ते उत्तरं ददाति—**शुद्धमार्गेति**—शुद्धमार्गे गुप्तिसमितिधर्मादिषु मतः उद्योगः प्रवृत्तिर्यस्य स शुद्धमार्गमतोद्योगः, शुद्धचेतोवचोवपुः शुद्धं चेतो मनः, वचो वाणी, वपुः शरीरं यस्य यो मनसा वचसा शरीरेण च आत्मस्वरूपे स्थिरो भवति। परपदार्थेषु त्रिविधेन मनोवचोवपुषा रागद्वेषवशो न भवतीत्यर्थः।

शुद्धान्तरात्मनि शुद्धे निजे अन्तरात्मनि स्वस्वरूपे संपन्नः प्रवृत्तिं कुर्वन् आत्मा हिंसकोऽपि न हिंसकः। अयत्नाचारस्य नरस्य निश्चिता हिंसा प्रयतस्य समितस्य हिंसामात्रेण बन्धो नास्ति हिंसाध्यवसायरहितत्वात्, निष्प्रमादप्रवृत्तिकत्वात् ॥२५१॥ मनःसंकल्पात् पापं वा पुण्यं वा जायते। पुण्यायेति—स्वस्मिन् स्वजीवे, अन्यत्र अन्यस्मिन् जीवे नीतं कृतं दुःखं पुण्याय भवेत्। तत्कथमिति चेदुच्यते–यदि स्वस्य हिताय व्रत-तप आदिकं क्रियमाणं दुःखरूपं सदपि दयादिसद्भावनारूपत्वात् पुण्यायैव भवेत्। अन्यत्र वा शिष्यादिषु प्रतिपाद्यमानं व्रततप आदिकं तैर्वा कार्यमाणं दुःखरूपं सदपि पुण्याय भवेत् तथा स्वजीवे अन्यत्र वा शिष्यादिजीवे नीतं कृतं सुखं पापाय भवेत्। यथा विषयेषु स्वस्य निरतत्वात् सुखं भवेत् तथापि तत्र कृता रतिस्तीव्ररागभावात् पापबन्धाय भवेत्। यद्यपि संप्रति कृता प्रवृत्तिः सुखाय जातेति प्रतिभाति तथापि आयत्याम् अध्यवसानानां मलिनत्वात् पापायैव सा प्रवृत्तिर्भवेत्। अतः चित्तस्य चेष्टितं प्रवृत्तिः अचिन्त्यम् अतर्कगोचरम् ॥२५२॥ सुखेति—सुखस्य विधानम् अकुर्वन्, दुःखस्यापि विधानम् अकुर्वन् नरः पापसमाश्रयो भवेत् पापेन लिप्येत। संक्लेशपरिणामत्वात् नरः अन्यं सुखिनं दुःखिनं वा कुर्वन् पापभाजनं भवेत्, पेटीमध्ये मञ्जूषायां विनिक्षिप्तं स्थापितं वासः वस्त्रं मलिनं न स्यात् किम्। बहिःस्थितं वस्त्रं रजसा मलिनं भवति परं मञ्जूषायां तन्मलिनं किं न स्यात् क्रोधादिकषायावेशात् सुखम् अददानो दुःखं वा पापभागेव भवति मानवः ॥२५३॥

[ पृष्ठ १२३-१२४ ] अध्यवसानानां त्रित्वं प्रतिपादयति—बहिरिति–बाह्येन देहादिना हिंसापरोपकारादि-शुद्धाशुद्धकार्यकरणेऽक्षमोऽपि हृदि मनसि हृद्येव मनसि संस्थिते परं पापं तीव्रतमं पापम्, विशुद्धतमं पुण्यं परमं पदम् अनन्तगुणचतुष्टयात्मकं मोक्षपदं च भवेत् जीवस्य। मनसि तीव्रसंक्लेशपरिणामसंतप्ते जीवस्य तीव्रतमपापबन्धो भवति। परोपकारादिविमर्शैः सम्यग्दर्शनादिगुणप्रापकैः परं पुण्यं भवति। तथा नितरां रागद्वेषरहितेषु शुद्धोपयोगेषु सलीने हृदि सकलकर्मक्षयो भवति ततश्च परमं पदं मोक्षो भवति। जीवस्य अशुभध्यानेन पापं स्यात्, शुभेन पुण्यम् परमशुक्लेन परं पदं चित्तमेव स्यात् ॥२५४॥ प्रकुर्वाण इति–तास्ताः क्रियाः प्रकुर्वाणः अनशनादितपांसि, सामायिकादीनि षडावश्यककर्माणि कुर्वाणः नरः केवलं क्लेशभाजनः संसार-क्लेशानां पात्रं स्यात् उचितमेवैतत्तस्य यतो यश्चित्तप्रचारज्ञः न, यः धर्मध्याने जीवादितत्त्वचिन्तने मनः न प्रचारयति, कषायमवलम्ब्य जीवादितत्त्वस्वरूपे मनसः प्रचारः कर्तव्यः, तत्र का युक्तिरिति यो न जानाति तस्य मोक्षपदलाभः कुतो भवेत् ॥२५५॥ सम्यग्ज्ञानस्य स्वरूपम्—यदिति–यत् यथावस्थं यस्य या या यथार्थाः अवस्थाः सन्ति तास्ता अनतिक्रम्य अञ्जसा अविसंवादित्वेन वस्तुसर्वस्वम् वस्तुनः सर्वस्व सर्वधनं गुणपर्यायादिरूपं सर्वधर्मान् वा जानाति तत्सम्यग्ज्ञानम् उच्यते तत् नृणां नराणां तृतीयं लोचनं नयनं ज्ञेयम् ॥२५६॥ यष्टिवदिति—जनुषान्धस्य जन्मान्धस्य नुः यष्टिवत् यष्टिरिव दण्ड इव प्रवृत्तिविनिवृत्त्यङ्गं यथा यष्टिः तस्यान्धस्य प्रवृत्तौ गमने अङ्गं कारणं भवति, विनिवृत्त्यङ्गं च मार्गं निम्नोन्नतं ज्ञापयित्वा ततो निवृत्तौ अङ्गं कारणं जायते तथा तत्सम्यग्ज्ञानं सुकृतचेतसः पुण्यवन्मनसो नरस्य हिताहितविवेचनात् हितं सुखं तत्साधनं रत्नत्रयम्, अहितं दुःखं तत्साधनं मिथ्यात्वादिकं तयोर्विवेचनात् संशयादिदोषाभावप्रकारेण प्रतिपादनात् ॥२५७॥ मतिरिति–मतिः इन्द्रियानिन्द्रियनिमित्तम् अवग्रहादिज्ञानम् सा दृष्टेऽर्थे जागर्ति इन्द्रियानिन्द्रियपरिच्छेदनयोग्ये वस्तुनि जागर्ति प्रकटीभवति। आगमः दृष्टे अदृष्टे च वस्तुनि सूक्ष्मान्तरितदूरार्थेऽदृष्टे वस्तुन्यागमः जागर्ति। यदि मनः जैनदर्शने निर्मत्सरं द्वेषरहितं स्यात्तस्य दुर्लभं तत्त्वं न। स्याद्वादाद्वस्तुयाथात्म्यं ज्ञायते सम्यग्दृष्टिनेति भावः ॥२५८॥ यदि आगमेन मत्या च अर्थे जीवादिवस्तुसंदोहे दर्शितेऽपि प्रतिपादितेऽपि जन्तोः मतिः संतमसा अज्ञानबहुला स्यात् तर्हि तस्य नरस्य ज्ञानं वृथा स्यात्। यथा रविरिणोः घूकस्य आलोकः दिनकरप्रकाशः व्यर्थः स्यात् ॥२५९॥ ज्ञातुरिति—यत् अबाधेऽपि वस्तुनि बाधारहितेऽपि पदार्थे कथंचिन्नित्यानित्यात्मके कथंचिद्भेदाभेदात्मके वस्तुन्यपि मतिः बुद्धिः विपर्ययं सर्वथा नित्यात्मकं सर्वथा अनित्यात्मकं सर्वथैकान्तस्वरूपं वस्तु इति विपरीतावस्थां धत्ते तत्र ज्ञातुः आत्मनः प्रमातुरेव स दोषः यतः स मिथ्यात्वतमसावृतः यथा इन्दौ चन्द्रे मन्दचक्षुषः तिमिरोपहतनयनस्य मतिः बुद्धिः विपर्ययं धत्ते नभसि सा चन्द्रद्वयं पश्यति वा चन्द्रं नीलं कृष्णादिकं वा पश्यति ॥२६०॥

[ पृ० १२५-१२८ ] ज्ञानभेदान् कथयति—**ज्ञानमेकमिति**—ज्ञायते अनेन वस्तुतत्त्वमिति ज्ञानम् इति लक्षणात् ज्ञानम् एकम्। पुनः तद्द्वेधा प्रत्यक्षपरोक्षभेदात्। पुनः पञ्चधा अपि मतिश्रुतावधिमनःपर्ययकेवलानि ज्ञानमिति तद्भवेत्। केवलज्ञानात् अन्यत्र केवलज्ञानं विना तत्प्रत्येकं मतिमारभ्य मनःपर्ययान्तम् अनेकधा भवति। अनेकभेदभिन्नं भवति। केवलज्ञानं तु सर्वद्रव्यपर्यायविषयत्वादेकमेव ॥२६१॥ चारित्रलक्षणम्—**अधर्मेति**—अधर्मकर्माणि हिंसा, अनृतम्, स्तेयम्, मैथुनसेवा, ममत्वम् एतेभ्यः पञ्चपापेभ्यः अधर्मकर्मभ्यः निर्मुक्तिः रहितत्वं चारित्रलक्षणम्, तथा धर्मकर्मविनिर्मितिः धर्मकर्मणां संसारदुःखतः उद्धृत्य उत्तमसुखे धारयतां कर्मणां निर्मितिः आचरणम् अहिंसापालनम्, सत्यभाषणम्, चुरात्यागः, ब्रह्मचर्यम्, ममत्वत्याग, एतदाचरणं चारित्रम् तच्च सागारानगारयतिमंश्रयं गृहस्थैर्मुनिभिश्च चार्यमाणम् ॥२६२॥ **देशत इति**—यस्य नरस्य स्वर्गापवर्गयोः स्वर्गमोक्षयोः अन्यतरयोग्यता नास्ति स्वर्गगमनपात्रता मुक्तिगमनपात्रता वा नास्ति स नरः देशतः व्रतम् अणुव्रतस्वरूपं सर्वतो वा व्रतं महाव्रतस्वरूपं न लभते ॥२६३॥ **देशत इति**—चारुचारित्रविचारोचितचेतसां चारु सुन्दरं निर्दोषं तच्च तच्चारित्रं तस्य विचारे विमर्शे उचितं योग्यं मनो येषां तेषां निर्दोषचारित्रपालनेन स्वहितं कर्तुमिच्छतां जनानां गृहस्थानां मुनीनां च। प्रथमं चारित्रं देशतः स्यात् अणुव्रतरूपं तद्गृहस्थानां भवति। द्वितीयकं महाव्रतरूपं चारित्रं स्यात्तच्च मुनीनां स्यात्। हिंसादिभ्यो देशतो विरतिरूपम् अणुव्रतम्। तेभ्यश्च सर्वतो विरतिरूपं महाव्रतं भवति। गृहस्थानां देशचारित्रम्, मुनीनां च सर्वचारित्रमिति ॥२६४॥ **तुण्डेति**—सम्यक्त्वविधुरे नरे सम्यग्दृष्टिरहिते मनुष्ये शास्त्रं तुण्डकण्डूहरं मुखखर्जुविनाशकम् एव भवति। ततस्तस्य स्वात्मानुभवो न भवतीति भावः। तु ज्ञानहीने चारित्रं दुर्भगाभरणोपमं दुर्दुष्टं भगं भाग्यं यस्याः सा तस्याः आभरणधारणोपमम्। यस्या उपरि पतिस्नेहो नास्ति तस्या आभरणधारण यथा विफलं भवति तथा ज्ञानहीनस्य चारित्रधारणं विफलं भवति ॥२६५॥ सम्यक्त्वादीनां प्रत्येकं फलमभिलपति—सम्यक्त्वात् सुगतिः स्वर्गगतिरुक्ता। ज्ञानात् इहलोके कीर्तिः उदाहृता कथिता। वृत्तात्पूजाम् अवाप्नोति चारित्रधारणात् पूजां लोकादरं लभते। त्रयाच्च एकलोलीभावं प्राप्तात्रत्नत्रयाच्छिवं मोक्षं लभते जीवः॥२६६॥ सम्यक्त्वादीनां लक्षणानि—**रुचिरिति**—तत्त्वेषु जीवादिषु रुचिः प्रीतिः सम्यक्त्वम्। तत्त्वनिरूपण स्याद्वादेन जीवादितत्त्वकथनं ज्ञानम्। सर्वक्रियोज्झितं सकलकायवाङ्मनोयोगरहिताम् आत्मनि स्थितिम् उदासीनरूपां परम् उत्तमं वृत्तं प्राहुः ब्रुवन्ति ॥२६७॥ आत्मपारदसिद्धेरुपायः—**वृत्तमिति**—वृत्तं चारित्रम् अग्निः अग्नितुल्यम्, धीः सम्यग्ज्ञानम् उपायः साध्यसाधने हेतुः, च सम्यक्त्वम्, रसौषधिः पारदसिद्धिकरणे विशिष्टवनस्पतिरूपम् पारदौषधम्, तल्लाभात् तेषां त्रयाणां प्राप्तेः आत्मा एव पारदः सूतः स साधु समीचीनरूपेण सिद्धः प्राप्यः लभ्यः भवेत् ॥२६८॥ सम्यक्त्वादीनाम् आश्रयादीन् वर्णयति—**सम्यक्त्वस्येति**—चित्तं मनः सम्यक्त्वस्य आश्रयः आधारः। मतिसंपदः ज्ञानसंपत्तेः आश्रयः अभ्यासस्तस्माद् ज्ञानं वर्धते इति। चारित्रस्य आधारः शरीरं देहः स्यात्। दानादिकर्मणः दानम् आदौ यस्य कर्मणः देवपूजादेः तस्य वित्तं धनम् आधारः स्यात् ॥२६९॥

इत्युपासकाध्ययने रत्नत्रयस्वरूपनिरूपणो नाम एकविंशतितमः कल्पः ॥२१॥[1]

## २२. मद्यप्रवृत्तिदोषदर्शनो नाम द्वाविंशः कल्पः

[ पृष्ठ १२८-१२९ ] **पुनरिति**—यथा गुणमणिकटक, गुणा एव मणयो रत्नानि तेषां कङ्कणभूत हे मारिदत्त नृप। यथा माणिक्यस्य पद्मरागमणेः यत् वेकटकर्म अग्निशोधनलेखनादिकर्म तत्तस्य उपबृंहकं गुणवर्धकं भवति। यथा प्रासादस्य महाहर्म्यस्य सुधाविधानं सुधया चूर्णेन विविधरङ्गाणां लेपनेन क्रियमाणं कर्म-

---

१. अत्र यशस्तिलकचम्पूकाव्यस्य षष्ठ आश्वासः समाप्यते, यथा—इति सकलतार्किकलोकचूडामणेः श्रीमन्नेमिदेवभगवतः शिष्येण सद्योनवद्यपद्यगद्यविद्याधरचक्रवर्तिशिखण्डमण्डनीभवच्चरणकमलेन श्रीसोमदेवसूरिणा विरचिते यशोधरमहाराजचरिते यशस्तिलकापरनाम्न्यपवर्गमहोदयो नाम षष्ठ आश्वासः ॥६॥

प्रासादस्य उपबृंहकं शोभासंवर्धकं भवति । यथा पुरुषकारानुष्ठानं पौरुषशक्तिकर्तव्यम् उद्यमविधानं दैवसंपदः पूर्वोपार्जितपुण्यस्य उपबृंहकं पोषणकरं भवति । यथा नीतिमार्गस्य सदाचारस्य पराक्रमावलम्बनम् उपबृंहकं समृद्धिकरं भवति । सेव्यस्वस्य आराध्यस्य पूज्यस्य विशेषवेदित्वं विशेषेण विवेकविमर्शादिसहितं वेदित्वं विद्वत्त्वम् उपबृंहकम् उन्नतिकरं वर्तते । तथा हि यस्मात् व्रतं खलु सम्यक्त्वरत्नस्य उपबृंहकं गुणोत्कर्षविधायकं भवति । तच्च व्रतं देशयतीनां द्विविधं मूलोत्तरगुणाश्रयात् मूलगुणावलम्बनात् उत्तरगुणावलम्बनाच्च । तत्र—**मद्येति**—सहोदुम्बरपञ्चकाः उदुम्बराणां पञ्चकम् उदुम्बरपञ्चकम् उदुम्बरपञ्चकेन सह वर्तमानाः सहोदुम्बरपञ्चकाः पिप्पलफलानि, उदुम्बरफलानि, प्लक्षफलानि, वटफलानि, फल्गुफलानि 'अञ्जीर' इत्याख्यानि इति पञ्चफलैः सह मद्यमांसमधुत्यागाः एते अष्टौ मूलगुणाः गृहस्थानाम् उक्ताः । क्व । श्रुते जिनागमे । मूलगुणाः उत्तरगुणप्ररोहणनिमित्तत्वात् संयमार्थिभिः प्रागनुष्ठेयत्वात् मूलगुणाः ते चाष्टौ श्लोकेऽस्मिन्प्रदर्शिताः ॥२७०॥ **सर्वदोषेति**—मद्य तु सर्वदोषोदयः सर्वेषां हिंसासत्यस्तेयमैथुनादिदोषाणामपराधानाम् उदय उत्पत्तिर्भवति । कथंभूतान्मद्यात् महामोहकृतः महामोहं करोतीति महामोहकृत् तस्मान्महामोहकृतः । अहिते हितबुद्धिर्हिते चाहितभावना मोहात् जायते । स च मोहो मद्यादुद्भवति अतः सर्वेषां पातकानाम् अग्रणीत्वेन स्थितं मद्यम ॥२७१॥ मद्यात्संसारपरिभ्रमणम्—हिताहितयोर्यदा मोहो अज्ञानं देहिषु प्राणिषु जायते तदा ते देहिनो जीवाः संसार एव कान्तारं वनं तत्र परिभ्रमणम् अटनं तस्य कारणं निदानं किं पातकं न कुर्युः । मद्यात्सर्वपापानि जायन्ते इति भावः ॥२७२॥ मद्येन यादवाः नष्टाः, नष्टा द्यूतेन पाण्डवाः, इति अस्मिन् लोके सर्वत्र सर्वदेशेषु कथानकं प्रसिद्धमस्ति ॥२७३॥ **समुत्पद्येति**—इह मद्ये देहिनः जीवाः अनेकशः बहुकृत्वः । समुत्पद्य जनित्वा विपद्य मृत्वा च कालेन देहिनां मनोमोहाय मद्यीभवन्ति । मृतोत्पन्नजीवानां कलेवराणि मद्यरसतया परिणमन्ते ॥२७४॥

[ पृष्ठ १३०-१३१ ] **मद्यैकेति**—मद्यैकबिन्दुसंपन्नाः मद्यस्य एकस्मिन् बिन्दौ संपन्ना उत्पन्नाः प्राणिनो जीवा बिन्दोर्निर्गत्य बहिः प्रचरन्ति भ्रमन्ति चेत् समस्तमपि विष्टपं जगत् पूरयेयुः व्याप्नुयुः न संदेहं तत्र संशयो नास्ति ॥२७५॥ मद्यस्य त्याज्यताकारणानि—**मनोमोहस्येति**—मद्यं सद्भिः सज्जनैः सदा त्याज्यं मनोमोहस्य हेतुत्वात् । दुर्गतेर्दुर्भवान्तरे निदानत्वाच्च कारणत्वाच्च । तन्मद्यम् इहलोके, अमुत्र परलोके च दोषकृत् दोषोत्पादकमस्ति ॥२७६॥ श्रूयतामत्र मद्यप्रवृत्तिदोषस्य उपाख्यानम्—**तदुर्वीश्वरेति**—स चासौ उर्वीश्वरश्च पृथ्वीपतिश्च तदुर्वीश्वरः, तस्य अखर्वः महान् स चासौ गर्वश्च स एव और्वानलो वडवानलः तस्मिन् आहुतीभूताः देवोद्देशेनाग्नौ यथा मन्त्रोच्चारणं कृत्वा हविर्निक्षिप्यते तथा आहुतिवत् निक्षिप्ता ये अहिताः शत्रवस्तेषामन्वया वंशास्त एव नक्रा यादांसि यत्र तस्मात्, एकचक्रात्पुरात् एकपान्नाम परिव्राजको परित्यज्य विषयान् व्रजतीति परिव्राजकः कश्चित् साधुः, जाह्नव्या गङ्गाया जलेषु मज्जनाय स्नानाय व्रजन् गच्छन् मातङ्गैः उपबध्य किल एवमुक्तः । क्व एवमुक्तः । विन्ध्याटवीविषये विन्ध्यारण्यदेशे कथंभूते **निजच्छायेति**—निजा चासौ छाया प्रतिबिम्बं सा एव अपरद्विपः अन्यः करी तस्य आशङ्का संशयस्तस्मात् अतिक्रुद्धा ये मदान्धगन्धसिन्धुराः मदेन दानजलेन अन्धाः विवेकरहिता ये गन्धसिन्धुराः उन्मत्तद्विपाः येषां गन्धं समाघ्राय अन्ये द्विपाः समदाः भवन्ति, तेषां उद्धुरा दीर्घा ये विषाणा दन्तास्तैर्विदार्यमाणं मेदिन्याः पृथिव्या हृदयं मध्यप्रदेशो यत्र तस्मिन्, विन्ध्याटवीविषये । महतो मातङ्गसमूहस्य मध्ये निपतितः चाण्डालवृन्दस्य मध्ये आपतितः पुनः कथंभूतस्य **प्ररूढेति**—प्ररूढं च तत् प्रादुर्भूतं च तत् प्रौढम् उत्कटं यौवनं तारुण्यं तदेव आसवो मदिरा तस्य आस्वादो रसानुभवः पुनरुक्तं च कादम्बरीपानं मदिराप्राशनं तस्मात् प्रसूतः प्रादुर्भूतः स चासौ असरालः उत्कटो यो विलासः तेन ग्रहिलाभिः उन्मत्ताभिः महिलाभिः नारीभिः सह पलोपदंशवश्यकश्यं पलं मांसं तस्य उपदंशभूतं रुच्युत्पादकं व्यंजनभूतं यदावश्यकं कश्यं मद्यं तत् आसेवमानस्य भजमानस्य महतो मातङ्गसमूहस्य मध्ये निपतितःसन् सीधुसंबन्धविधुरसंगैः सीधुर्मदिरा तस्याः संबन्धेन पानेन विधुरो विह्वलः संगं आसक्तिर्येषां तथाभूतैः मातङ्गैश्चाण्डालैः उपबध्य निरुध्य असौ एकपान्नामा परिव्राजकः किल एवमुक्तः—त्वया मद्यमांसमहिलासु मध्ये अन्यतमसमागमः कर्तव्यः अन्यथा जीवन्न पश्यसि मन्दाकिनीम् । मन्दकिनीं गङ्गानदीम् । सोऽपि परिव्राजको एवं भाषितः मनसि एवं वक्ष्यमाणप्रकारेण

व्यमृशत् । तिलसर्षपप्रमितस्यापि हि पिशितस्य तिलप्रमाणस्य सर्षपप्रमाणस्य तन्तुभः प्रमाणस्यापि मांसस्य प्राशने भक्षणे स्मृतिषु महाव्रतविपत्तयः श्रूयन्ते । स्मृतिग्रन्थेषु महाव्रतस्य अहिंसाव्रतस्य विपत्तयः दोषाः प्रतिपाद्यन्ते । मातङ्गीसंगे च मृतिनिकेतनं मरणचिह्नं प्रायश्चेतनम् । देहान्ताख्यं प्रायश्चित्तम् । य एवंविधां सुरां पिबति न तेन सुरा पीता भवति इति निखिलमखशिखामणौ सकलयज्ञेषु चूडामणिरिव श्रेष्ठे सौत्रामणिनामयज्ञे मदिरास्वादाभिसंधिरनुमतविधिरस्ति । मद्यप्राशनस्य अभिलाषा चेत् तत्पानं विधेयम् इति आगमस्य वेदस्य अनुमतिरस्ति । यैश्च पिष्टोदकगुडधातकीप्रायैः गोधूमादिकं चूर्णं पिष्टम्, उदकं जलम्, गुडः इक्षुपाकः धातकीसीधुपुष्पीप्रभृतिभिः वस्तुकार्यैः वस्तूनां कार्यैः अवयवैः सुरा मद्यं संधीयते निर्मीयते । तान्यपि वस्तूनि विशुद्धान्येव शुचिन्येव इति चिरं दीर्घकालं विचार्य अनार्यविद्याविधानः अनार्या अक्षरम्लेच्छास्तेषां विद्या वेदः तस्य विधानम् अनुसरणं यस्य सः विहितमदिराभक्षणः तन्माहात्म्यात् मदिरामदप्रभावात् । आविर्भूतमनोमहामोहः प्रकटीभूतचित्तमहामोहभावः कौपीनं पुरुषलिङ्गाच्छादनवसनम् अपहाय त्यक्त्वा हारहूरव्यवहारातिलङ्घितमातङ्गिकागीतानुगतकरतालिकाविडम्बनावसरो हारहूराव्यवहारेति द्राक्षासंजातमद्यविशेषस्य व्यवहारेण पानेन अतिलङ्घिता मदमत्ताः या मातङ्गिकाः चाण्डाल्यस्तासां गीतानुगता गानमनुसृता याः करतालिकाः हस्ततालिकाः तासां विडम्बनस्य अनुकरणस्य अवसरो यस्य स एकपाद्द्विजः पिशाचाविष्टदेह इव आनीतानेकविकारः प्रकटीकृतकाममदादिभावः । पुनः बुभुक्षेति—बुभुक्षा क्षुत् सा एव आशुशुक्षणिः अग्निः तेन क्षीणं कुक्षिकुहरमेव कुहरं बिलं यस्य सः तरसमपि मांसमपि भक्षितवान् खादितवान् । व्यक्तीभवदनल्पोत्कटकामविकारः मातङ्गीं कामितवान् बुभुजे । भवति चात्र श्लोकः हेतुशुद्धेरिति—हेतुशुद्धेः यस्य कारणानि शुद्धानि तद्वस्तु भक्षणार्हम् इति श्रुतेर्वेदस्य वाक्यात् पीतमद्यः कृतमद्यपानः एकपात् ब्राह्मणः मूढमानसो भूत्वा मांसमातङ्गिकासंभोगम् अकरोत् ॥२७७॥

इत्युपासकाध्ययने मद्यप्रवृत्तिदोषदर्शनो नाम द्वाविंशः कल्पः ॥२२॥

## २३. मद्यनिवृत्तिगुणनिदानो नाम त्रयोविंशतितमः कल्पः

[ पृष्ठ १३१-१३३ ] श्रूयतां मद्यनिवृत्तिगुणस्योपाख्यानम्—अशेषेति—अशेषाश्च ताः व्याकरणादिविद्याः तेषां वैशारद्यं नैपुण्यं तस्य मदेन मत्ताः सगर्वा ये मनीषिणः विद्वांसः त एव मत्तालयः क्षीवभ्रमराः तेषां कुलं वृन्दं तस्य केल्यै क्रीडायै कमलनाभिः कर्णिकेव तस्यां मध्यकोशसदृशायां वलभ्यां पुरि । खात्रचारित्रशीलः करवालः, खातं खननं तस्य चरित्रं कार्यं खननकार्यं तत् शीलं यस्य धनार्थं जनधनस्थानखननस्वभावः चौरकर्म कुर्वाणः करवालो नाम चौरः । कपाटोद्घाटनपटुः बटुः पिहितद्वारोद्घाटननिपुणः बटुनामस्तेनः महानिद्रासपादनकुशलः धूर्तिलः दीर्घस्वापोत्पादनचतुरो धूर्तिलाभिधश्चौरः । परगोपायितद्रविणदेशविशारदः शारदः, धनिकैः गोपायितं भूमिभित्त्यादिषु निह्नुतं यद्द्रविणं धनं तस्य देशः प्रदेशस्तस्य ज्ञाने विशारदः चतुरस्रः विशारदो नाम दस्युः । खरपटागमविलासः कृकिलासः 'सधनः हन्तव्यः । गर्भिणी हन्तव्या' इति प्रतिपादके खरपटागमे विलासश्चातुर्यं यस्य स कृकिलासो नाम मोषकः । एते पञ्च मलिम्लुचाः पाटच्चराः स्तेनाः प्रतिपन्नपरस्परप्रीतिप्रपञ्चाः स्वीकृतान्योन्यस्नेहविस्ताराः । स्वव्यवसायसाहसाभ्यां निजोद्योगबलात्काराभ्याम् ईश्वरशरीरार्धवासिनी महादेवदेहार्धवसनशीलां भवानीमपि पार्वतीमपि, मुकुन्दहृदयाश्रयधियं श्रियमपि मुकुन्दः कृष्णस्तस्य हृदयं मनः वक्षःस्थलम् स एवाश्रय आधारः ममेति बुद्धियुक्ता श्रियं लक्ष्मीम् अपि, कात्यायनीलोचनांजनं कात्यायनी पार्वती तस्या लोचनयोर्नेत्रयोः अंजनं लेपनं यस्य तदञ्जनमपि कज्जलमपि हर्तुं समर्थाः । पश्यतोहराणामपि पश्यतो जनाननादृत्य धनं हरन्तीति पश्यतोहराश्चौराः तेषामपि पश्यतोहराश्चौराः तान् चौरानपि चुराकौशल्येन वञ्चयन्तः । कृतान्तदूतानामपि यमदूतानामपि यमदूताः । कदाचित् एकस्यां निशि रात्रौ चेलक्नोपं वर्षति देवे वस्त्रार्द्रता यथा स्यात्तथा वृष्टिं कुर्वति पर्जन्ये । कज्जलपटलकालकायप्रतिष्ठासु सकलासु काष्ठासु कज्जलानां पटलः समूहः तद्वत्कालस्य यमस्य यः कायः शरीरं तद्वत् प्रतिष्ठा स्थितिर्यासां तासु, सकलासु

काष्ठासु दिशासु विहितपुरसारापहाराः विहितं कृतं पुरसारस्य पुरजनधनस्यापहारो हरणं यैस्ते चौराः पुरबाहिरिकोपवने पुरस्य नगरस्य बाहिरिके उपवने उद्याने धनं विभजन्तः धनविभागं कुर्वन्तः, तवेदं ममेदम् इति विवदमानाः कलहं कुर्वन्तः, कन्दलं युद्धम् अपहाय त्यक्त्वा समानायितमैरेयाः आनायितमद्याः पानगोष्ठीं पानाय गोष्ठी तां पानगोष्ठीं संभूय मद्यपानम् अनुतिष्ठन्तः कुर्वन्तः, पूर्वाहितकलहकोपोन्मेष-कलुषधिषणाः पूर्वाहितः मद्यपानात्पूर्वम् आहितः कृतश्चासौ कलहः विवादः तस्य कोपस्य उन्मेषः उदयः तेन कलुषा मलिना धिषणा बुद्धिः येषां ते पञ्चचौराः यष्ट्यायष्टि, दण्डादण्डि, मुष्टामुष्टि, मुष्टिभिर्मुष्टिभिश्च युद्धं विधाय सर्वेऽपि मम्रुः पञ्चत्वं जग्मुः अन्यत्र विना धूर्तिलात् । धूर्तिलो जीवितः, चत्वारश्चौराः मृता इत्यर्थः । स किल धूर्तिलः यथादर्शनसंभवं यथा येन प्रकारेण दर्शनस्य मुन्यवलोकनस्य संभव उत्पत्तिः स्यात्तथा महामुनिविलोकनात् तस्मिन्नहनि दिने एकं व्रतं गृह्णाति, तत्र च दिने तद्दर्शनात् मुनिदर्शनात् आसवव्रतं मदिरात्यागव्रतम् अग्रहीत् गृहीतवान् । तदनु धूर्तिलः समानशीलेषु सदृशस्वभावेषु कश्यवश्यं मदिरादीनां विनाशऽश्यामात्मसमक्षम् उपयुज्य मरणावस्थां दृष्ट्वा, असुखबीजात् दुःखकारणात् आजवंजवात् संसाराद् विरज्य विरक्तो भूत्वा, मनोजकुजजटाजालनिवेशमिव केशपाशम् उत्पाट्य मनोजो मदनः स एव कुजो वृक्षः तस्य जटानां प्ररोहाणां जालनिवेशमिव समूहरचनेव केशपाशम् उत्खाय चिराय दीर्घकालम् अपरत्र परलोके अहितजैत्राय कर्मारिजयाय समीहांचक्रे प्रयत्नम् अकरोत् । भवति चात्र श्लोकः—धूर्तिलः एकस्मिन्नेव दिवसे मद्यत्यागात् अनापदं मृत्युरूपसंकटाभावम् आपत् । एतद्दोषात् मदिराप्राशनदोषात्सहायेषु मित्रेषु मृतेषु सत्सु ॥२७८॥

इत्युपासकाध्ययने मद्यनिवृत्तिगुणनिदानो नाम त्रयोविंशतितमः कल्पः ॥२३॥

## २४. मांसाभिलाषमात्रफलप्रलपनो नाम चतुर्विंशतितमः कल्पः

[पृष्ठ १३३-१३४] सन्तो मांसभक्षणं त्यजन्ति—**स्वभावेति**—प्रकृत्यैव मांसम् अशुचि अपवित्रं दुर्गन्धं च । अन्यापायदुरास्पदम् अन्येषां पशुपक्षिणाम् अपायात् घातात् दुरास्पदं दुःखस्थानम् । अथवा दुरास्पदे सूनाकार-गृहे लभ्यम् । तथा विपाके अवसाने दुर्गतिप्रदं तिर्यङ्नरकगतिदायकम् । सन्तः सज्जनाः कथम् अदन्ति अपि तु नैव ते भक्षयन्ति ॥२७९॥ **कर्मेति**—प्राणी अकृत्यम् अपि कर्म, कर्तुम् अयोग्यम् अकृत्यं कर्म कार्यं करोतु यदि आत्मनः हन्यमानविधिर्न स्यात् । चेत् स्वस्य केनापि हन्यमानविधिः मारणकार्यं न क्रियेत । यथा पशुर्हतस्तथा चेत् स पशुस्तं हिंसकं न हन्यात् । अथवा अन्यथा अन्येन प्रकारेण जीवमारणं विना जीवनम् उदरपोषणं न स्यात् । अन्नफलाद्यभावे मांसभक्षणं करोतु परम् अन्नफलाभावः कदापि न भवति अतः मांसभक्षणं न करोतु जनः ॥२८०॥ **धर्मादिति**—धर्मात् संसारदुःखनिवारकात् शर्मभुजां सुखं भुञ्जानानां धर्मे किं नु विद्वेषकारणं धर्मे द्वेषो नोचित एव । **प्रार्थितेति**—अभिलषितपदार्थदायिनम् अमरपादपं कल्पवृक्षं कः द्वेष्टु । को द्वेषं कुर्यात् ॥२८१॥ **अल्पात्क्लेशात् इति**—अल्पक्लेशात् स्वल्पदुःखात् । सुधीः विबुधः । स्वस्य आत्मनः । सुष्ठु सुखं न्याय्यं शर्म चेत् वाञ्छति अभिलष्यति । आत्मनः प्रतिकूलानि स्वस्य विरुद्धानि यानि कर्माणि यथा स्वस्य दुःखप्रदानि तानि परेषां न समाचरेत् ॥२८२॥ यः जनः परानुपघातेन अन्येषां घातम् अकृत्वा सुख-सेवापरायणः सुखभोगतत्परो भवेत् । स सुखं भुञ्जानोऽपि जन्मान्तरसुखाश्रयः स्यात् । अन्यजन्मलभ्यशर्मा-धारो भवेत् ॥२८३॥ यः पुमान् नरः तदात्वसुखासंगात् तदाभवं तदात्वं तच्च सुखं तस्य आसंगात् तात्कालिकसुखेष्वासक्तेः धर्मकर्मणि देवपूजादिके कार्ये न मुह्येत् संशयं न कुर्यात् स पुमान् ननु वितर्के अस्मिन् लोके उदर्के उत्तरभवे दुःखवर्जितः भवति ॥२८४॥ **स इति**—यः धर्मे अर्थे कामे च अन्यसमाश्रयः त्रिषु एकस्यापि आश्रयं न करोति सः प्राणी परं भूभारः, स जीवन्नपि मृतश्च सः ॥२८५॥

[पृष्ठ १३५] **स इति**—यः धर्मात्पुण्यात्फलं स्त्रीधनादिभवं सुखम् अश्नन्नपि अनुभवन्नपि धर्मे मन्दधीः मन्दादरो भवति स मूर्खः । स जडः । स अज्ञः, स पशोरपि पशुर्भवति ॥२८६॥ **स विद्वानिति**—यः स्वतः अन्यस्मादपि वा अधर्माय पापाय पापं कर्तुं न समीहते न प्रयतते । स विद्वान्, स महाप्राज्ञः, स महाबुद्धिमान्,

स धीमान्, स च पण्डितः ॥२८७॥ तत्स्वस्येति—तस्मात् स्वस्यात्मनः हितम् अभिलषन्तः, च मुहुः पुनः पुनः अहितम् असुखं भुञ्जन्तः। अन्यमांसैः पशुपक्ष्यादिमांसैः स्वमांसस्य वृद्धिविधायिनः कथं स्युः ॥२८८॥ यदिति—इह यो जनः। परत्र अन्यप्राणिनि। सुखं वा दुःखम् एव वा करोति। वृद्धये दत्तं धनवत् तत् सुखं वा दुःखं वा स्वस्य अधिकम् एव जायते। उत्तमर्णो यथा स्वी धनम् अधमर्णाय वृद्धये ददाति ततश्च तद्धनं पूर्वतोऽप्यधिकं वर्धते तथा परस्मिन् जने यः सुखं वा दुःखं वा करोति तत् परस्मिन् जन्मनि पूर्वजन्मतोऽपि अधिकं तेन लभ्यते ॥२८९॥ मद्यमांसमधुप्रायमिति—मद्यपानं मांसभक्षणम्, मध्वशनं च एतत्कर्म चेत् धर्माय पुण्याय मतम्। अपरः अधर्मः कः। अपरं पापं किं भवेत्। किं वा दुर्गतिदायकं वा अपरं किं कर्म स्यात् ॥२९०॥ स धर्म इति—यत्र अधर्मः पापं मिथ्यात्वादिकं हिंसादिकं वा नास्ति स धर्मः यत्र असुखं नरकादिदुःखं नास्ति तत् सुखम्। यत्र अज्ञानं नास्ति तज्ज्ञानम्। यत्र पुनः आगतिः संसारे आगमनं नास्ति सा गतिः ॥२९१॥ स्वकीयमिति—यथा स्वकीयं जीवितं सर्वस्य प्राणिनः प्रियम् इष्टं भवति तद्वत् एतत् परस्यापि जीवितं प्रियं भवति। ततो हिंसां परित्यजेत् ॥२९२॥

[ पृष्ठ १३६ ] मांसादिषु इति—मांसम् अदन्तीति मांसादिनः मांसभक्षकाः तेषु दया नास्ति। मद्यपायिषु मद्यं पिबन्तीति मद्यपायिनः सुरापानशीलास्तेषु सत्यं न वर्तते। मधूदुम्बरसेवेषु मधुनः क्षौद्रस्य उदुम्बराणां च पञ्चफल्याः भक्षणं कुर्वाणेषु मर्त्येषु अनृशंस्यम् अक्रूरता दयालुता न वर्तते ॥२९३॥ मधुसेवनं सन्तो न कुर्वन्ति—मक्षिकेति—मक्षिकाणां क्षुद्राणां गर्भात् संभूतानि यानि बालाण्डानि तेषां यदा मर्दनं क्रियते तदा मधुन उत्पत्तिर्भवति। तच्च कललाकृति, मधु रजोवीर्यमिश्रणात् ताम्रवर्णो यो द्रवपदार्थः स्त्रिया उदरे जायते स कललमुच्यते तद्वद्भासमानं मधु सन्तः दयार्द्रहृदयाः पुरुषाः कथं सेवन्ते भक्षयन्ति ॥२९४॥ उद्भ्रान्तेति—उद्भ्रान्ताश्चलवलिताः अर्भकाः मक्षिकाबालकाः गर्भे मध्ये यस्य तस्मिन् मधुच्छत्रे मधुगोलके अण्डजाण्डकखण्डवत् पक्षिबालकसमूहवत्। मधु माधुर्यं कुतः। यतस्तत् मधुच्छत्रं व्याधलुब्धकजीवितं व्याधा मृगवधाजीवा लुब्धकाः शबराः तेषां जीवितं भक्ष्य वर्तते। मधु नीचलोकानां भक्ष्यं जीवनिचितम् अतस्तदुत्तमानां न भक्ष्यम् ॥२९५॥ पञ्चोदुम्बरेषु जीवानां दर्शनात्तेषां त्याज्यत्वमाह—अश्वत्थेति—अश्वत्थफलानि पिप्पलफलानि। उदुम्बरफलानि जन्तुफलानि। प्लक्षफलानि पर्कटीफलानि। न्यग्रोधफलानि वटफलानि। आदिशब्देन फल्गुफलानि 'अंजीर' इति देशभाषायाम्। इत्यादि फलेष्वपि प्रत्यक्षाः स्थूलाः प्राणिनो जीवा दृश्यन्ते। सूक्ष्माश्च सन्ति परं ते आगमविषयाः अतः तेषां भक्षणं पापप्रदत्वात्त्याज्यम् ॥२९६॥ मद्यादीति—ये मद्यमांसमधुभक्षिणः सन्ति तद्गेहेषु अन्नं पानं च नाचरेत्। अन्नं न भक्षणीयं जलं च न पेयम्। तेषाम् अमत्राणि भाजनानि आदिशब्देन तेषां स्त्रीवस्त्रादिसंपर्कं च कदाचिदपि न कुर्याद् व्रतिकः ॥२९७॥

[ पृष्ठ १३७-१३९ ] अव्रतिनां संगात् लोके वाच्यता भवति—कुर्वन्निति—भोजनादिषु भोजनजलपानादिकार्येषु अव्रतिभिः सह संसर्गं संबन्धं कुर्वन् अत्र अस्मिन् लोके वाच्यतां निन्दां प्राप्नोति। परत्र परलोके च इह च सत्फलं न लभते तेन नरेण सत्फलं स्वर्गलोकसुखं न लभ्यते ॥२९८॥ दृतीति—दृतिप्रायेषु चर्मपुटकादिचर्मभाजनेषु पानीयं जलं व्रतस्थो जनः वर्जयेत्। कुतपादिषु चर्मनिर्मितात्पस्नेहभाजनेषु स्नेहं तैलं घृतं परित्यजेत् अव्रतोचिताः अव्रतिजनयोग्याः स्त्रियः मद्यमांससेविन्यः व्रतिभिः नित्यं परिहार्याः त्याज्याः ॥२९९॥ जीवेति—मयः उष्ट्रः, मेषः अजः, तौ आदौ येषां ते मयमेषादयः तत्कायवत् तच्छरीरवत् यथा तच्छरीरं मांसं तथा मुद्गमाषादिकमपि जीवयोगस्य समानतया मांसम् इति इतरे जगुः ब्रुवन्ति स्म ॥३००॥ तदयुक्तम्। तदाह—मांसमिति—मांसं प्राणिशरीरं स्यात्परं जीवशरीरं मांसं भवेन्न वा। यथा निम्बो वृक्षो भवति परं वृक्षस्तु निम्बो भवेन्न वा ॥३०१॥ किं च—द्विजाण्डजेति—द्विजनिहन्तॄणां ब्राह्मण-क्षत्रिय-वैश्यानां घातं कुर्वताम् अण्डजाः पक्षिणः तेषामपि घातं कुर्वतां पापं विशिष्यते विशिष्टं वर्धते। तथा जीवयोगाविशेषेऽपि तथा फलपलाशिनां पापं विशिष्यते। फलेष्वपि जीवाः सन्ति मांसेऽपि जीवाः सन्ति परं फलेषु एकेन्द्रिया एव जीवाः सन्ति मांसे तु द्वीन्द्रियानारभ्य पञ्चेन्द्रियपर्यन्तं जीवराशयः सदैव सन्ति अतः फलाशिनां स्तोकं पापं स्यात्परं पलाशिनां महापापबन्धो भवेत् ॥३०२॥ स्त्रीत्वेति—स्त्रीत्वसामान्यं दारेषु वर्तते, पेयत्वसामान्यं वारिणि

वर्तते एवं वदन् एष वादी मद्यमातृसमागमी ईहताम् इच्छतु। यथा स्त्रीत्वं पत्न्यां विद्यते तथैव जनन्यामपि अतो भार्यासमागममिव जननीसमागमोऽपि वादिनेष्येत। यथा जले पेयत्वसामान्यं वर्तते तथा मद्येऽपि वर्तते अतो जलवन्मदिरापि पीयतां वादिना परं तेन मदिरा त्यज्यते जलं पीयते। स्त्री सेव्यते माता वन्द्यते अतः पेयत्वं स्त्रीत्वं च सर्वत्र समानं नैव भवेत् ॥३०३॥ शुद्धेति—शुद्धं दुग्धं न गोमांसम्। एकस्या एव गोर्दुग्धं शुद्धं सेव्यं भवति परं तस्या मांसम् अशुद्धत्वात् सेव्यं नैव भवति। एतादृशं पदार्थस्वभाववैचित्र्यं वर्तते। आहेयम् अहेः सर्पस्य इदम् आहेयं सर्पसंबन्धि सर्पमस्तके स्थितं रत्नं विषम् अपहरति। परं तद्दन्तस्थितं विषं विपदे मरणाय स्यात् ॥३०४॥

[ पृष्ठ १३९ ] अथवा—हेयमिति—कारणे समे सत्यपि मांसं त्याज्यं पयः दुग्धं पेयम्। धेन्ववयवत्वसाम्येऽपि मांसं हेयं न दुग्धम्। विषतरोः पत्रम् आयुषे जीवनकारणं भवति परं तन्मूलं मृतये मरणाय स्यात्। विषतर्ववयवसमत्वेऽपि पत्रं भक्ष्यं भवति न मूलमिति ॥३०५॥ अपि च-शरीरेति—शरीरावयवत्वेऽपि मांसे दोषः तद्भक्षणं निन्द्यम्, न सर्पिषि घृते न दोषोऽतस्तद्भक्षणीयम्। द्विजातिषु जिह्वायां मद्यं दोषाय भवति। पादे मद्यं द्विजातिषु ब्राह्मण-क्षत्रिय-वैश्येषु न दोषाय भवति ॥३०६॥ विधिरिति—संप्रोक्षणं यज्ञादिश्चेद् विधिः शुद्धयै भवति तर्हि द्विजैः सर्वं भुज्यताम् तत्र मांसादिकं हेयम्, ओदनादिकं भोज्यम् इत्याग्रहो न विधेयः। केवलं वस्तु शुद्धयै चेत् अन्नादिकम्, यत्र अन्नादिकं शुद्धं लभ्येत तत्र तद्ग्राह्यमिति मन्यते चेत् श्वपचालये मातङ्गगृहे भुज्यताम्। अतः केवलं विधिना अन्नादेः दातुः पात्रस्य च शुद्धिर्भवतीति न मन्तव्यम्। यदि अन्नं शुद्धयै भवेत् तर्हि तेनान्नेन दाता पात्रमपि शुद्धं भवेत्। ततश्च तच्छुद्धं यत्र कुत्रापि मातङ्गगृहेऽपि लभ्येत तद्ग्रहणे दोषो न स्यात्। अतः केवलया अन्नशुद्धया भाव्यमिति न। तर्हि केषां शुद्धया विधिशुद्धिः स्यादिति प्रश्ने आह—॥३०७॥ तद्द्रव्येति—तस्मात् द्रव्यदातृपात्राणां विशुद्धौ द्रव्यशुद्धौ सत्यां, दातृशुद्धौ सत्यां, पात्रशुद्धौ च सत्या विधिशुद्धता भवति। द्रव्यादीनाम् अशुद्धौ केवलं विधिशुद्धया पर्याप्तं स्यात् इति न मन्तव्यम्। केवलं द्रव्यशुद्धयापि पर्याप्तता न संभवति, केवलं दातृशुद्धयापि सा न भवति अतः द्रव्यदातृपात्रशुद्धया सहिता विधिशुद्धता विशुद्धं फलं जनयतीति ज्ञेयम्। अशुद्धोऽपि दाता शुद्धो भवेदिति चेदुच्यते—यत्संस्कारशतेनापि नाजातिर्द्विजतां व्रजेत्। संस्कारशतेनापि द्विजान्मुक्त्वा अन्यो अजातिः शूद्रो जनः द्विजतां न व्रजेत्। गर्भजन्म सत्कुले जन्म दीक्षायोग्ये कुले जन्म यस्य तस्यैव संस्कारजन्म भवति स एव संस्कारजन्मना द्विजतां गच्छति। संस्कारहीनो द्विजः जात्या द्विजो भवति। स नामधारको द्विजो ज्ञेयः। यस्य सत्कुले जन्म न स संस्कारशतेनापि अजातिरेव नामधारकाद् द्विजादपि स हीन एव। किरणाकुलोऽपि काचः असंस्कृतमणेरपि समानतां न याति कथं संस्कृतमणेः समतां स बिभृयात् ॥३०८॥ तच्छाक्येति—तस्मात् शाक्यानां बौद्धानां सांख्यानां पंचविंशतितत्त्ववादिनां कापिलानाम्, चार्वाकाणां बृहस्पतिशिष्याणां नास्तिकानाम्, वेदवादिनां मीमांसकानाम्, वैद्यानाम्, कपर्दिनां कापालिकानां मतं विहाय श्रेयोर्थिभिः मुक्तिकामैः सदा मांसं हातव्यम् आजन्म मांसत्यागो विधेयः ॥३०९॥ यस्तु इति—यो जनः लौल्येन जिह्वालाम्पट्येन मांसाशी मांसम् अश्नाति भक्षयति, तेन मांसभक्षणेन तथा यज्ञे प्राणिवधेन धर्मो वर्धते इति च मन्यते स द्विपातकः ज्ञेयः। हिंसां धर्मं मन्यमानः मांसं च भुञ्जानः देवान् मांसं प्रीणयतीति मिथ्या संकल्पयन् द्विपातको भवति। यथा मात्रा सत्रं परदाराक्रियाकारी नरः मातृगमनपातकं परस्त्रीसेवनपातकं च कुरुते ॥३१०॥

[ पृष्ठ १४०-१४२ ] श्रूयतामत्र मांसाशनाभिध्यानमात्रस्यापि पातकस्य फलम्—मांसभक्षणसंकल्पमात्रस्यापि पापस्य फलं दृष्टान्तद्वारेण कथयति सूरिः सुदत्ताचार्यः तच्छ्रूयतामाकर्ण्यताम्—श्रीमदिति—श्रीः अस्यास्तीति श्रीमान् स चासौ पुष्पदन्तः श्रीमत्पुष्पदन्तः नवमो जिनपतिः स एव भदन्तः भव्यजनकल्याणविधायी ऋषिः तस्य अवतारे जन्मसमये अवतीर्णः स्वर्गात्समागतो यस्त्रिदिवपतिः स्वर्गनाथः सौधर्मेन्द्रः तेन संपादितो विहितो विधापितश्च य उद्याव उत्सवः तस्य या इन्दिरा लक्ष्मीस्तस्यै आसन्दो आसनभूता या काकन्दीपुरी तस्यां चार्वाकवंशोद्भवः सौरसेनो नाम भूपतिः कुलधर्मानुरोधबुद्धया निजवंशधर्मानुसरणमत्या, गृहीतपिशितव्रतः अङ्गीकृतमांसत्यागः। पुनर्वेदवैद्याद्वैतमोहितमतिः श्रुतिविपर्यासितमतिः वैद्यविपर्यासितप्रज्ञः अद्वैतमतपरावर्तितमतिश्च, संजातजाङ्गलजिघित्सानुमतिः उत्पन्नमांसबुभुक्षानुसृतबुद्धिः। अङ्गीकृतवस्तुनिर्वहणात् जनापवादाज्जुगुप्समानः।

स्वीकृतप्रतिज्ञावसानगमनात् जननिन्दनात् च भीतिमतिः, मनोविश्रान्तिहेतुना मनःसमाधानकारणेन कर्मप्रियेति नाम एव केतुः ध्वजः यस्य तेन बल्लवेन पाचकेन रहसि एकान्ते बिलस्थलजलान्तरालचरतरसमानाययन्नपि बिलचराः मूषकादयः, स्थलचराः अजादयः, जलचराः मत्स्यादयः, अन्तरालचराः शुकादयः तेषां तरसं पाचकेन अनाययन् अपि, अनेकराजकार्यपर्याकुलमानसतया नानाविधराजकीयविधानव्यापृतचित्ततया मांसभक्षणवेलां नावाप न प्राप्नोत् । कर्मप्रियोऽपि तथा अनुदिनम् अहरहः पृथ्वीश्वरनिदेशमनुतिष्ठन् महीपतेरादेशम् आचरन्, एकदा पृदाकुपाकोपद्रुतः पृदाकुः सर्पः तस्य पाकः शिशुः तेन उपद्रुतः पीडितः तेन दष्टः इति भावः, प्रेत्य मृत्वा स्वयंभूरमणाभिधानमुद्रे समुद्रे स्वयंभूरमणेति अभिधानं नाम तदेव मुद्रा चिह्नं यस्य तस्मिन् समुद्रे सागरे महादेवबलः महादेववत् बलं यस्य स तिमिङ्गिलगिलः तिमिङ्गिलो नाम महान् मत्स्यः तमपि गिलति इति तिमिङ्गिलगिलः जज्ञे । भूपालोऽपि चिरकालेन कथाशेषतामाश्रित्य कथा एव शेषा यस्य स कथाशेषस्ताम् आश्रित्य मृत्वेत्यर्थः । पिशितेति—पिशितस्य मांसस्य अशनं भक्षणं तस्याशयोऽभिध्यानम् इच्छा तस्य अनुबन्धात् संस्कारात् । तत्रैव सिन्धौ तस्यैव महामीनस्य कर्णबिले तन्मलाशनशीलः तस्य कर्णस्य यो मलः तस्याशनं भक्षणं शीलं स्वभावो यस्य । शालिसिक्थकलकलेवरः शाल्याः सिक्थं तण्डुलः तत्प्रमाणं कलं मनोहरं कलेवरं शरीरं यस्य तथाभूतः शफरः मत्स्योऽभवत् । तदनु तदनन्तरम् एव शालिसिक्थो मीनः पर्याप्तोभयकरणः पूर्णलब्धद्रव्यभावेन्द्रियः । वदनं मुखं व्यादाय उद्घाट्य निद्रायतः निद्राणस्य स्वपतः, गलगुहावगाहे गलः कण्ठः स एव गुहा गह्वरं तस्य अवगाहे विस्तारे वेलानदीप्रवाह इव समुद्रकूले संप्राप्तसरिदोघ इव अनेकं जलचरानीकं नानाविधमत्स्यादिजलजन्तुसमूहः प्रविश्य तथैव निष्क्रामन् निर्गच्छन् निरीक्ष्य ( तन्दुलमत्स्य. मनसि विमृशति ) पापकर्मा पापम् अन्तरायाख्यं कर्म यस्य सः, अत एव निर्भाग्याणां दुर्दैववतां च अग्रणीधर्मा अग्रेसरधर्मं बिभ्राणः, खल्वेष झषः मत्स्यः, यद्वक्त्रसंपातनचेतांस्यपि यस्मात् वक्त्रे वदने संपातनम् उत्पतनं तत्र चेतांसि येषां तथाभूतानि यादांसि जलजन्तून् अशितुं भक्षयितुं न शक्नोति समर्थो न भवति । मम पुनर्यदि हृदयेप्सितप्रभावान्मनोऽभिलषितसामर्थ्यात् दैवात् एतावन्मात्रं गात्रम् एतच्छरीरप्रमाणं शरीरं स्यात् तदा समस्तमपि समुद्रं विद्रुतसकलसत्त्वसंचारमुद्रं विद्रुता नष्टा सकलसत्त्वानां सर्वप्राणिनां संचारस्य भ्रमणस्य मुद्रा चिह्नं यस्य तं विदधामि । यदि मे महामत्स्यदेहतुल्यो देहो भविष्यति तदा सकलाञ्जलचरान् भक्षयित्वा समुद्रं जलशेषं करिष्यामि । इति अभिध्यानान्मनःसंकल्पनात् अल्पकायकलः शकुलः अल्पकायम् अल्पशरीरं कलति धारयति इति अल्पकायकलः शकुलः मत्स्यः निखिलनक्रचक्रचाराच्च महादेहाधीनो निखिलाः सकलास्ते नक्राः मकराः तेषां चक्रं समूहः तस्य चारो भक्षणं तस्मात् महादेहवान् स मीनः कालेन विपद्य मृत्वा उत्पद्य च जनित्वा च उत्तमनः त्रयस्त्रिंशत्सागरोपमायुः निलये निरये त्रयस्त्रिंशत्समुद्रतुल्यदीर्घकालजीवनस्य गृहे नरके सप्तमे भवप्रत्ययायत्ताविर्भूतज्ञानविशेषौ भवो जन्म स प्रत्ययो हेतुः तस्य आयत्तः अधीनः आविर्भूतः प्रकटीभूतः ज्ञानविशेषो ययोस्तौ अनिमिषचरौ भूतपूर्वमत्स्यौ नारकपर्यायधरौ किल एवं वक्ष्यमाणम् आलापम् अन्योन्यसंबोधनपूर्वकं भाषणं चक्रतुः । अहो क्षुद्रमत्स्य, तथा निर्मितकर्मणः दुष्कर्मणः निर्मितम् उत्पादितं क्रूरतया जलचरजीवभक्षणात्मकं कर्म कार्यं येन सः तस्य मम दुष्कर्मणः पापकर्मणो नारकायुष उदयात् मम अत्रागतिः आगमनम् उचितैव योग्या एव । तव तु मत्कर्णबिले मलोपजीवनस्य कर्णमलेन उपजीवनम् उदरनिर्वाहो यस्य कथमत्रागमनमभूत् सर्वथा मांसाहाररहितस्य प्राणिवधरहितस्य च तवात्रागमनं शक्यं नेति ( महामत्स्येनोक्ते तन्दुलमत्स्यो वदति ) हे महामत्स्य, चेष्टितादपि दुरन्तदुःखसंबन्धनिबन्धनादशुभध्यानात् । शारीरिकाज्जीववधविरहितव्यापारादहं विमुक्तोऽस्मि । परं तु दुष्टः अन्तो यस्य स्यात् तथाभूतदुःखसंबन्धस्य निबन्धनात् कारणात् अशुभध्यानात् ममात्रागमनमभूत् । भवति चात्र श्लोकः—क्षुद्रमत्स्येति—स्वयंभूरमणसमुद्रे महामत्स्यस्य कर्णस्थः एकः क्षुद्रमत्स्यः किल स्मृतिदोषात् अशुभध्यानात् अधो गतः सप्तमनरके त्रयस्त्रिंशत्सागरोपमायुषा जन्म अलभत ॥३११॥

इत्युपासकाध्ययने मांसाभिलाषमात्रफलप्रलपनो नाम चतुर्विंशतितमः कल्पः ॥२४॥

## २५. मांसनिवृत्तिफलाख्यानो नाम पञ्चविंशतितमः कल्पः

[ पृ० १४२-१४३ ] श्रूयतामत्र मांसनिवृत्तिफलस्योपाख्यानम्—चण्डमातङ्गस्य कथा—**अवन्तिमण्डलेति**—अवन्तयश्च ते मण्डलाश्च अवन्तिमण्डलास्त एव नलिनं कमं तस्मिन्नभिनिवासे सरसी रसयुक्ता या एकानसीनाम पुरी तस्याः पुरबाहिरिकायां तस्याः पुरो बाह्यप्रदेशे । **देविलेति**–देविला चासौ महिला पत्नी देविलाख्या पत्नी तस्या विलासा एव विशिखा बाणास्तेषां वृत्त्या संबन्धेन कोदण्डस्य धनुःसदृशस्य चण्डनाम्नो मातङ्गस्य एकस्यां दिशि । **निवेशितेति**–निवेशितं स्थापितं पिशितं मांसम् उपदंशश्च तद्वाचकभक्ष्यद्रव्यं च येन तस्य । अपरस्यां दिशि । **विन्यस्तेति**–विन्यस्तः स्थापितः सुरया मदिरया संभृतः पूर्णः कलशो येन तस्य । पुनः कथंभूतस्य चण्डमातङ्गस्य पलोपदंशोदारां सुरां मांसभक्षणे रुच्युत्पादकरूपाम् उदारां विपुलां सुरां पायं पायं पीत्वा पीत्वा तदुभयान्तराले तयोरुभययोः अन्तराले मध्ये चर्मनिर्माणतन्त्रां चर्मणा निर्माणं रचना तदेव तन्त्रं हेतुर्यस्यां तां वरत्रां वद्ध्रीं वर्तयतः रचयतः चण्डमातङ्गस्य । **वियदिति**–वियति आकाशे विहारो भ्रमणं तदर्थम् उड्डीनः उत्पतनं कुर्वाणः अण्डजडिम्भः पक्षिशिशुः तस्य तुण्डेन मुखेन यत्खण्डनं तस्मात् । विनिष्यन्दि स्रवत् यद्विषधरविषं सर्पविषं तस्य दोषस्यावसरो यत्र तथाभूता सुराभवत् । सर्पविषबिन्दोः पतनात्सविषा मदिरा जातेति भावः । अत्रैवावसरे अस्मिन्नेव प्रस्तावे तत्समीपवर्त्मगोचरे चण्डमातङ्गनिवासस्य समीपमेव मार्गे **धर्मेति**–धर्मश्रवणम्, जन्मान्तरादिप्रकटनम् इत्याद्युपाययुक्ताभिः कथाभिः विनेयजनाः शिष्यास्तेषामुपकाराय **कृतेति**–कृतः उत्पन्ना कामचारः इच्छा तेन प्रचारो भ्रमणं यस्य, पुनः कथंभूतम् ऋषियुगलम् । **मूर्तिमदिति**—मूर्तिमत् सदेहं स्वर्गमोक्षमार्गयुग्ममिव अम्बरात् आकाशात् अवतरत् अधः आगच्छत् ऋषियुग्मम् अवलोक्य संजातकुतूहलः उत्पन्नविस्मयः । तं देशं मुनिप्रदेशम् अनुसृत्य नगरे मुनिवरावलोकनात् श्रावकलोकं व्रतानि समाददानं गृह्णन्तम् अनुस्मृत्य ज्ञात्वा । समाचरितप्रणामः विहितवन्दनः । सुनन्दमुनेः अग्रेसरगमनम् अभिनन्दनं भगवन्तम् आत्मोचितं व्रतमयाचत । भगवान् । **उपकारायेति**–पर्जन्य इव यथा मेघवृष्टिः सर्वस्य उपकाराय तथा धार्मिकः सर्वस्य उपकाराय हितोपदेशेषु प्रवर्तते । यथा मेघवृष्टेः स्थानास्थानचिन्ता नास्ति तथा हितोक्तिषु अपि धार्मिकस्य सा न भवति ॥३१२॥ इत्यवगम्य ज्ञात्वा **सम्यगिति**–सम्यक् सम्यग्दर्शनयुक्तं यदवधिज्ञानं तस्योपयोगात् अवगतः ज्ञातः एतस्य चण्डमातङ्गस्य आसन्नपरासुतायोगः आसन्नः समीपः परासुताया मरणस्य योगः संबन्धः येन स भगवाञ्चारणर्षिः तं मातङ्गमेवम् अवोचत् । 'अहो मातङ्ग, तदुभयान्तरालसज्जां रज्जूं भिन्नदिशोः स्थितयोः पिशितसुराकुम्भयोरन्तराले मध्ये सज्जां स्थितां रज्जूं वरत्रां सृजतः निर्मिमाणस्य तन्मध्ये तव तन्निवृत्तिव्रतम् तयोः पलसुरयोस्त्यागस्य व्रतम्' इति मातङ्गस्तथा प्रतिपद्य स्वीकृत्य तम् अवकाशं तत्स्थानम् उपसद्य प्राप्य पिशितं प्राश्य भक्षयित्वा यावदहम् इदं स्थानकं नायामि यावत् कालम् अहम् एतत्स्थानं प्रदेशं नायामि नागच्छामि तावन्मेऽस्य पिशितस्य निवृत्तिस्त्यागः । इत्यभिधाय समासादितमदिरास्थानः लब्धसुराकलशप्रदेशः प्रतिपन्नपानः पीतसुरः । तदुग्रतरगरभरात् तस्य विषधरस्य उग्रतरं तीव्रतरं यत् गरं विषं तस्य भरात्प्रभावात् लघूल्लङ्घितमतिप्रसरः लघु शीघ्रम् उल्लंघितः विनष्टः मतिप्रसरः चेतनाविलासः यस्य । विषवेगान्मूर्च्छितस्येत्यर्थः तन्निवृत्ति मद्यमांसयोः निवृत्ति त्यागम् अलभमानचित्तोऽपि अप्राप्तमानसोऽपि प्रेत्य मृत्वा तावन्मात्रव्रतमाहात्म्येन स्तोककालं यावद्गृहीतव्रतप्रभावेन यक्षकुले यक्षमुख्यत्वं प्रतिपेदे प्राप । भवति चात्र श्लोकः—**चण्डेति**—अवन्तिषु देशेषु चण्डो मातङ्गः अत्यल्पकालभाविन्याः अतिस्तोकसमयसंजातायाः पिशितस्य निवृत्तितः मांसस्य त्यागात् यक्षमुख्यतां प्राप यक्षाणां व्यन्तरदेवविशेषाणाम् अग्रणीर्महर्द्धिकोऽभवत् ॥३१३॥

**इत्युपासकाध्ययने मांसनिवृत्तिफलाख्यानो नाम पञ्चविंशतितमः कल्पः ॥२५॥**

## २६. अहिंसाफलावलोकनो नाम षड्विंशः कल्पः

[ पृ० १४३-१४९ ] अथ के ते उत्तरगुणाः-उत्तरे मूलगुणानन्तरं सेव्यत्वादुत्कृष्टत्वाच्च ते च ते गुणाश्च उत्तरगुणाः के ते इति प्रश्ने उत्तरमाह—**अणुव्रतानीति**—पञ्चैव अणुव्रतानि, त्रिप्रकारं त्रिविधं गुणव्रतम् । चत्वारि शिक्षाव्रतानि एवं द्वादश उत्तरे गुणाः स्युः । गुणार्थम् अणुव्रतानाम् उपकारार्थं व्रतं गुणव्रतं दिग्विरत्यादीनाम् अणुव्रतानुबृंहणार्थत्वात् । शिक्षाव्रतम्—शिक्षायै अभ्यासाय व्रतं देशावकाशिकादीनां प्रतिदिवसाभ्यसनीयत्वात् । अतएव गुणव्रतादस्य भेदः । गुणव्रतं हि प्रायो यावज्जीविकमाहुः । अथवा शिक्षा विद्योपादानं शिक्षाप्रधानं व्रतं शिक्षाव्रतम्; देशावकाशिकादेर्विशिष्टश्रुतज्ञानभावनापरिणतत्वेनैव निर्वाह्यत्वात् ॥३१४॥ तत्र—**हिंसास्तेयेति**—हिंसायाः प्राणिवधस्य देशतः स्थूलत्वेन त्रसजीववधस्य विनिग्रहो विरतिस्त्याग इति, प्रथमम् अणुव्रतम् । स्तेयस्य देशतो विनिग्रहः, अनृतस्य देशतो विनिग्रहः, अब्रह्मणो देशतो विनिग्रहः तथा परिग्रहाणां देशतो विनिग्रहः एतानि पञ्चाणुव्रतानि प्रचक्षते स्यान्ति ॥३१५॥ व्रतस्य लक्षणम्—**संकल्पेति**—सेव्ये स्वदारताम्बूलादौ, संकल्पपूर्वकः इदं इयदेतावन्तं कालं न सेविष्ये इति मनसा अध्यवसायं कृत्वा नियमः प्रतिज्ञा व्रतं स्यात् अथवा अहम् इदम् इयत् एतावन्तं कालं सेविष्याम्येवेति संकल्पेन नियमः प्रतिज्ञा व्रतं स्यात् । अथवा सत्कर्मसंभवा प्रवृत्तिर्व्रतं स्यात् । किं विशिष्टा संकल्पपूर्विका शुभकर्मणि पात्रदानादिके संभवो यस्याः सा । अथवा असत्कर्मसंभवा निवृत्तिर्व्रत स्यात् हिंसादिकम् असत्कर्म तस्मान्निवृत्तिः विरतिः संकल्पपूर्विका एवं व्रतस्य स्वरूपम् ॥३१६॥ हिंसादिभ्यो विपत्तिर्दुर्गतो अत्र परत्रेति चोच्यते—**हिंसायामिति**—हिंसायाम्, अनृते असत्यभाषणे, चौर्या स्तेये, अब्रह्मणि मैथुने, परिग्रहे ममत्वे अत्रैव विपत्तिर्दृष्टा वधबन्धपरिक्लेशादिरूपा । परत्र परलोके नरकादौ दुर्गतिर्लभ्यते ॥३१७॥ हिंसाहिंसयोः स्वरूपमाह—**यदिति**—यस्मात् प्रमादयोगेन कषायावेशेन अनवधानतया इन्द्रियाणां प्रचारमनवधार्य वा । प्राणिषु प्राणहापनम् इन्द्रियादयो दशप्राणाः तेषां यथासंभवं व्यपरोपणं वियोगकरणं हिंसेत्यभिधीयते । तेषां प्राणानां रक्षणम् अहिंसा सा सतां मुनीनां मान्या ॥३१८॥ **विकथेति**—स्त्रीकथादयश्चतस्रः । अक्षाणि इन्द्रियाणि पञ्च । कषायाश्चत्वारः क्रोधमानमायालोभाः । निद्रा प्रणयश्च । एषाम् अभ्यासे पुनः पुनरावर्तने रतो जन्तुः प्रमत्तः परिकीर्तितः प्रतिपादितः ॥३१९॥ अहिंसाव्रतमाह—**देवतेति**—देवतायै, अतिथये, पितृभ्यः, मन्त्राय, औषधाय, भयाय च सर्वान् जीवान् न हिंस्यात् न घातयेत् । अहिंसा नाम तद्व्रतं भवेत् ॥३२०॥ **गृहकार्याणीति**—सर्वाणि गृहकार्याणि पेषणादिकानि पञ्च दृष्टिपूतानि दृष्टया सम्यङ्निरीक्षितानि कारयेत् । सर्वाणि द्रवद्रव्याणि जलघृततैलादीनि पटपूतानि वस्त्रगालितानि योजयेत् पानादिकार्येषु ॥३२१॥ **आसनमिति**—आसनं पीठम्, शयनं शय्या, मार्गं पन्थानम्, अन्नम् ओदनादिकम् अन्यच्च यत् वस्तु तत् अदृष्टं दृष्टया अवीक्षितं न सेवेत नोपयुञ्ज्यात् । यथाकालं भजन्नपि यस्मिन्काले यदासनादिकं सेव्यते तत् दृष्टया सम्यग्वीक्ष्य भजेत् तथा च हिंसादोषस्पर्शो न भवेत् विपदादिकप्राप्तिर्वा न भवेत् ॥३२२॥ **दर्शनेति**—भोजनान्तरायान् विवृणोति—**दर्शनेत्यादि**—दर्शनत्यक्तभोजिता, स्पर्शत्यक्तभोजिता, संकल्पत्यक्तभोजिता, संसर्गत्यक्तभोजिता, हिंसनाक्रन्दनप्रायाः प्राशप्रत्यूहकारकाः आर्द्रचर्मास्थिसुरामांसासृक्पूयानां दर्शनात व्रतिकेन अशनं दृष्ट्वा स्पृष्ट्वा च तात्कालिकाहारस्त्यक्तव्यः । इयं दर्शनत्यक्तभोजिता । स्पर्शत्यक्तभोजिता चैवम्—रजस्वला स्त्री, शुष्कं चर्मास्थिनी, शुनकमार्जारश्वपचादिकं स्पृष्ट्वा आहारस्त्यक्तव्यः । संकल्पत्यक्तभोजिता—इदं भुज्यमान वस्तु, मांसं सादृश्यात्, इदं रुधिरम्, इदमस्थि, अयं सर्प इत्यादिरूपेण मनसा भोज्यवस्तुनि विकल्प्यमाने अशनं त्यजेत् । संसर्गत्यक्तभोजिता—द्वित्रिचतुरिन्द्रियप्राणिभिः अन्ने संसृष्टैः भोज्यद्रव्यात्पृथक् कर्तुमशक्यैः जीवद्भिः मृतैर्वा बहुभिस्त्रिचतुरादिभिः युक्तम् अशनं त्यजेत् । तथा हिंसनाक्रन्दनप्रायाः अतिकर्कशस्वरम् अस्य मस्तकं छिन्धि इत्यादिरूपम् आक्रन्दनिःस्वनं हाहेत्याद्यार्तस्वस्वभावं विड्वरप्रायनिःस्वनम् परचक्रागमनातङ्कप्रदीपनादिविषयम् आकर्ण्य भोजनं त्यजेत् । प्रायः *शब्देन नियमितं प्रत्याख्यातं वस्तु भुक्त्वा अशनं त्यक्तव्यम्* । एवं प्राशप्रत्यूहकारकाः भोजनान्तरायकारका ज्ञातव्याः ॥३२३॥ **अतिप्रसंगेति**—सद्भिः गणधरादिदेवैः अन्तरायाः भुक्तेर्वर्जनहेतवः स्मृताः कथिताः । किमर्थं स्मृताः अतिप्रसंगहानाय अतिप्रसंगस्य विहितातिक्रमेण उपर्युपरि प्रवृत्तिः तस्य हानाय त्यागाय । तपः

इच्छानिरोधः तस्य परिवृद्धये समन्तादुपचयाय। व्रतबीजवृतिक्रियाः बीजस्येव व्रतानाम् आवेष्टकक्रियाः रक्षोपायाः येषु ते अन्तरायाः सन्ति ॥३२४॥ अहिंसाव्रतेति—अहिंसाव्रतस्य पालनार्थम्। मूलव्रतानाम् अष्टमूलगुणानां विशुद्धये अतिचाररहितत्वाय निशायां भुक्तिं भोजनं वर्जयेत् परिहरेत्। यतः सा इहामुत्र दुःखदायिनी भवति ॥३२५॥ आश्रितेष्विति—सर्वेषु आश्रितेषु मनुष्येषु पक्षिषु पशुषु च अनन्यस्वामिकेषु। यथावद्विहितस्थितिः यस्य येन अन्नादिना शरीरपोषणं स्यात् तेन तस्य तथा करणीयम्। एवम् आश्रितानां भरणं विधाय शारीरे अवसरे आहारग्रहणसमये स्वयं गृहाश्रमी गृहस्थः समीहेत यत्नं कुर्यात् ॥३२६॥ संधानमिति—यत्र रसकायिका जीवा अनन्तशो जायन्ते तत्संधानकम्। पानकं दधिगुडचातुर्जातकादिद्रव्योद्भवम्। धान्यं शाल्यादिकम्। पुष्पं कुसुमम्। मूलं वृक्षवल्ल्यादेः पादाः, दलं पत्रम्। यद् यद् जीवयोनि जीवस्य यदुत्पत्तिस्थानं तत् न संग्राह्यम्। यच्च जीवैरुपद्रुतं कीटकैः उपद्रुतं छिद्रितं तत् न संग्राह्यम् ॥३२७॥ अमिश्रमिति—अन्येन अन्नादिना मिश्रणम् अकृतमपि कालाश्रयेण वर्षाकालाद्यवलम्बनेन उत्सर्गे ग्राह्यमपि किंचिद्वस्तु जीवयोनित्वात् जीवैरुपद्रुतत्वाद्वा जिनागमे त्याज्यं भवति। किंचिद्वस्तु शीतोष्णादिदेशाश्रयेण, किंचिद्वस्तु जीर्णादि पुष्पितादिदशाश्रयेण प्रागुत्सर्गे सर्दाप जिनागमे त्याज्यं भवति। किंचिद्वस्तु मिश्रमपि कालदेशदशा अवलम्ब्य अग्राह्यं भवति ॥३२८॥ यदन्त इति—यस्य अन्तः मध्ये सुषिरं छिद्रं प्रायः बहुशः वर्तते तन्नालीनलादि कमलनालं नलादि देवनालवेत्रादिकं मृदु वेण्वादिकं हेयं त्याज्यम्, तत्सुषिरे त्रसजीवानाम् आगन्तुकानां संभवात्। तथा अनन्तकायिकप्रायम् अनन्तजीवानां शरीरं यद्भवति तदनन्तकायिकं प्रायः बहुशः अनन्तकायिकतुल्यं च यद्बहुजीवनिचितं त्रसजीवसंकीर्णं च भवति तद्वल्लीकन्दादिकं त्यजेत्। या वल्ली कोमला विद्यते, तस्याः किसलयवृन्तादिकं कोमलम् अनन्तकायिकं च भवति अतस्तत् व्रतिभिर्हेयम्। कन्दादिकं च पलाण्डुसूरणादिकं च बहुतराणां तदाश्रितजीवानाम् आश्रयस्थानत्वात् त्याज्यम्। अन्यथा तद्भक्षयतां जिह्वेन्द्रियप्रीणनमात्रं फलमल्पं भवति बहुजीवानां घातश्च भवति ॥३२९॥ द्विदलमिति—द्विदलं मुद्गमाषादिधान्यं द्विदलं द्वे दले विभागौ यस्य पृथक्तया पेषणादिना जाते तद्द्विदलं मुद्गमाषादिकं सखण्डं प्राश्यं भक्षणीयम् तत्र सखण्डत्वात् अङ्कुरशक्त्यभावः। अनवलां गतं द्विदलम् अकृतद्विदलभावं द्विदलं जीर्णं प्रायेण प्राश्यम् यदि अदृष्टजन्तुसम्मूर्च्छनं विद्येत। जन्तुसम्मूर्च्छने तद्धेयम्। सिम्बयः भल्लराजमाषप्रमुखफलिकाः सकलाः त्याज्या न भक्षणीयाः। कदा न भक्षणीयाः। याः सकलाश्च साधिता स्युः अकृतद्विधाभावा एव यदि अग्निना पाचिताः स्युस्तर्हि तासां भक्षणं पापप्रदं स्यात्, अखण्डत्वात् तद्गतत्रसजीवानाम् अग्निसंयोगेन मृतिं प्राप्तत्वात् ॥३३०॥ दयालुतायाः यत्राभावस्तद्वर्णनम्—तत्रेति—यत्र बह्वारम्भपरिग्रहस्तत्राहिंसा कुतः। प्राणिपीडाहेतुव्यापार आरम्भः। ममेदं बुद्धिलक्षणः परिग्रहः। बहव आरम्भपरिग्रहा यस्य तस्मिन्नरे अहिंसा कुतो भवेत्। तत्र कोमलपरिणामाभावात् लोभाकुलत्वात् च दयाभावो न भवति। वञ्चके परप्रतारणशीले नरे कुशीले परललनालम्पटे च दयालुता नास्ति ॥३३१॥ कस्य जीवस्य असद्वेद्यं कर्म बध्यते। शोकेति—स्वपरयोः शोकसंतापसंक्रन्दपरिदेवनदुःखधीः भवञ्जन्तुः असद्वेद्याय जायते। अन्यस्मिञ्जने स्वस्मिंश्च शोकाद्युत्पादिका यस्य बुद्धिर्भवति स जन्तुः प्राणी असद्वेद्याय असत् अशुभं दुःखदायकं वेद्यं वेदनीयाख्यं कर्म असद्वेद्यं तस्मै हेतुर्जायते भवति। शोकादीनां[1] व्याख्याः क्रमशः—अनुग्राहकसंबन्धविच्छेदे वैक्लव्यविशेषः शोकः। परिवादादिनिमित्तादाविलान्तःकरणस्य तीव्रानुशयः संतापः। परितापजाताश्रुपातप्रचुरविलापादिव्यक्तक्रन्दनं संक्रन्दनम्। संक्लेशपरिणामावलम्बनं गुणस्मरणानुकीर्तनपूर्वकं स्वपरानुग्रहाभिलाषविषयमनुकम्पाप्रचुरं रोदनं परिदेवनम् ॥३३२॥ चारित्रमोहास्रवं निगदति—कषायेति—यस्य भावः कषायोदयतीव्रात्मा उपजायते असौ जीवः चारित्रमोहस्य समाश्रयो जायेत। यस्य जीवस्य भावः क्रोधादिकषायाणाम् उदयात्तीव्र उत्कटः भवति स चारित्रमोहकर्मणः समाश्रयः अवलम्बनं भवति। ततश्च स जीवः व्रतादिपालने समर्थो न भवति। तस्मिन् हिंसादिपापसंभवो भवति ॥३३३॥

---

१. सर्वार्थसिद्धौ 'दुःखशोकादि' सूत्रस्य टीकायां व्याख्या इमाः द्रष्टव्याः।

[ पृष्ठ १५०-१५५ ] अहिंसादिगुणलाभाय मैत्र्यादिभावनाभ्यासः कार्यः—**मैत्रीति**—मैत्रीप्रमोदकारुण्यमाध्यस्थ्यानि यथाक्रमं। सत्त्वे गुणाधिके क्लिष्टे निर्गुणेऽपि च भावयेत्। मैत्र्यादीनां सत्त्वादीनां च क्रमशो वैशद्यं स्वयं ग्रन्थकारः पृथक्तया कथयति ॥३३४॥ **कायेनेति**—कायेन शरीरेण मनसा वाचा च परे अन्यस्मिन् सर्वस्मिन् देहिनि प्राणिनि अदुःखजननी दुःखं कस्यापि माभूत् इति मनोवृत्तिः मैत्रीविदां मैत्रीं विदन्ति जानन्ति इति मैत्रीविदः तेषां मैत्री मता परेषां दुःखानुत्पत्त्यभिलाषो मैत्री संमता ॥३३५॥ **तपोगुणेति**—तपसा अधिके गुणैः सम्यग्दर्शनादिभिश्च अधिके गरीयसि पुंसि सार्धर्मिके जने। प्रश्रयाश्रयनिर्भरः प्रश्रयः विस्रम्भो विनयो वा तस्य आश्रय आधारः तेन निर्भरः पूर्णः जायमानः मनोरागः मनोभक्तिः प्रमोदः। वदनप्रसादादिभिरभिव्यज्यमानान्तर्भक्तिरागः प्रमोदः इति विदुषां मतः विबुधानां मतः संमतः ॥३३६॥ **दीनेति**—असद्वेद्योदयापादितक्लेशाः क्लिश्यमानाः दीनाः तेषां दीनानाम् अभ्युद्धरणे दारिद्र्यरोगादिपीडापनयने या बुद्धिः संकल्पः तत्कारुण्यम्। माध्यस्थ्यस्य लक्षणमेवम्—निर्गुणात्मनि तत्त्वार्थश्रवणग्रहणाभ्यामसंपादितगुणो निर्गुणात्मा तस्मिन् अविनेये हर्षामर्षोज्झिता वृत्तिर्माध्यस्थ्यं रागद्वेषरहितो मनःस्वभावः उपेक्षाभावः माध्यस्थ्यमुच्यते ॥३३७॥ **इत्थमिति**—एवं मैत्र्यादिभावनोपेतस्य प्रयतमानस्य ईर्यादिसमितितत्परस्य गृहस्थस्यापि देहिनः स्वर्गः करस्थो जायते। अस्य गृहस्थस्य च तत्पदं मुक्तिपदं दूरे नास्ति स्तोकभवैर्लभ्येत एव तत् ॥३३८॥ दयावति नरे पापाभावः—**पुण्यमिति**—पुण्यं तेजःस्वरूपम्, पापं दुष्कृतं तमोमयम् अन्धकारमयम् प्राहुर्ब्रुवन्ति विद्वांसः। तत्पापं दयादीधितिमालिनि दयारूपा दीधितिमाला किरणमाला यस्य स दयादीधितिमाली तस्मिन् दयादीधितिमालिनि कृपारश्मिमति पुरुषसूर्ये तत्पाप किं तिष्ठेत् अपि तु तत्र पापं नैव तिष्ठेत् ॥३३९॥ **सेति**—यस्यां क्रियायां हिंसा नैवास्ति सा क्रिया कापि इहलोके नास्ति परम् अत्र क्रियायां मुख्यानुषङ्गिको भावौ विशिष्येते। यदा इम प्राणिनं हिनस्मीति संकल्पो यत्र क्रियाया वर्तते सा क्रियैव हिंसामयी जायते। यदा च क्रिया भवति परं तया साकं हिंसासंकल्पः न विद्यते तत्र गौणो भावो हिंसायाः भवति अत एव स भावः आनुषङ्गिको ज्ञेयः ॥३४०॥ हिंसकाहिंसकयोः स्वरूपम्—**अघ्नन्नपि इति**—कश्चन जनः अघ्नन्नपि प्राणिमारणम् अकुर्वाणोऽपि अभिध्यानविशेषेण हिंसासंकल्पेनैव पापी भवेत्। निघ्नन्नपि पापभाक् न प्राणिपीडां कुर्वाणोऽपि पापवान् न भवति। कथम्। प्राणिहिंसायाः असंकल्पनात्। यथा धीवरः सततहिंसाध्यवसायवान् भवति अतः स अघ्नन्नपि पापी स्यात्। कर्षकस्य भूमिकर्षणसमये जीवहिंसनम् अनिवार्यं तथापि जीवहिंसासंकल्पेन स भूमिकर्षणे न प्रवर्तते अतः स पापभाक् न भवति। कर्षकस्य अभिध्यानविशेषः जीवमारणसंकल्परहितो भवति। धीवरस्य च अभिध्यानविशेषे तद्वधसंकल्पः सर्वदा विद्यते अतः अघ्नन्नपि पापी भवत्येव ॥३४१॥ अभिध्यानविशेषं द्वितीयेन निर्देशेन व्यनक्ति—**कस्यचिदिति**—दारान्मातरमन्तरा एकपार्श्वे दारास्तिष्ठन्ति द्वितीयपार्श्वे माता तिष्ठति तयोर्मध्ये संनिविष्टस्य उपविष्टस्य तस्य वपुःस्पर्शाविशेषेऽपि उभयोर्जननीभार्ययोरङ्गस्पर्शे समानेऽपि शेमुषी तु विशिष्यते बुद्धिविशेषो भवत्येव पृथक्त्वेन, इयं माता, भार्येयमिति च भिन्नविषया बुद्धिर्युगपदुत्पद्यते ॥३४२॥ तदुक्तम्—**परिणाममेवेति**—कुशलाः पण्डिताः खलु पुण्यपापयोः परिणाममेव अभिध्यानमेव कारणं ब्रुवन्ति। तस्मात्पुण्योपचयः शुभपरिणामेभ्यः सुकृतसंचयः सुविधेयः कार्यः। तथा पापापचयः पापानां दुरितानाम् अपचयः हानिर्विनाशः सुविधेयः करणीयः ॥३४३॥ **वपुषः इति**—वपुषः शरीरस्य। वचसः भाषणस्य वा शुभाधारा अशुभाधारा या क्रिया भवति सा कियत्स्वेव वस्तुषु स्थूलपदार्थेषु क्रमेणैव भवेत्। युगपत् नैव भवेत्। सूक्ष्मवस्तुषु तथा गुणेषु वचसः प्रवृत्तिः शरीरस्य च नैव भवति। अतः आभ्यां पृथक् विशेषतां मनो बिभर्ति। यां काचन शुभाम् अशुभां वा प्रवृत्तिं वपुर्वचसी कुरुतस्तां मनः अवलम्ब्यैवेति ज्ञेयम्। विना चित्तं ते तां कर्तुं न क्षमे अतः अत्र मनोविषयक्रियासु नरः प्रयतः सावधानो भवेत्। मनसो या क्रिया भवति सा लोकत्रितयादपि महत्तरा जायते। तथा एकस्मिन्क्षणे जायते। अतः मनःक्रियासु विवेकेन भाव्यमन्यथा महान् पापबन्धः स्यात् ॥३४४॥ **क्रियान्यत्रेति**—कियत्स्वेव वस्तुषु दानपूजादिषु शुभेषु हिंसादिष्वशुभेषु या कायिकी वचःसंबन्धिनी वा क्रिया भवति सा क्रमेणैव भवति परं। मनसो या क्रिया भवति स लोकत्रितयादपि महत्तरा जायते तथा एकस्मिन् क्षणे जायते। अतः मनःक्रियासु विवेकेन भाव्यमन्यथा महान् पापबन्धः स्यात् ॥३४५॥

**एकस्मिन्निति**—उत्साहशालिनां पुंसां मनसः एकस्मिन् कोणे अनायासेन चतुर्दशभवनानि संमान्ति। उत्साहेन शोभमानानाम् उद्यमिनां नराणां मनसः एकस्मिन् विभागे अनायासेन विना परिश्रमं चतुर्दशभुवनानि संमान्ति। अर्थात् मनसः तादृशी शक्तिरस्ति यया चतुर्दशभुवनान्यपि ज्ञायन्ते। अथवा चतुर्दशभुवनानां स्वरूपं दर्पणतले यथा पुरतः स्थितः सकलोऽपि वस्तुनिवहो दृश्यते तथा प्रतिभाति। अतः लोकोक्तिरियं सत्येति ज्ञातव्या ॥३४६॥ तृणादीनामपि हिंसनं यावता निजं प्रयोजनं सिद्धयेत्तावदेव कुर्यात् इति कथयति—**भूपेति**—भुवः भूमेः पयसो जलस्य पवनस्य वायोः अग्नेश्च तथा तृणादीनाम् आदिशब्देन वल्लीगुल्मतर्वादीनां हिंसनं तावदेव कुर्यात् यावता स्वस्य कार्यं स्यात् कोऽसौ कुर्यात् अयं गृहस्थः। कथम् अजन्तु यत् यत्र स्थाने त्रसा न सन्ति तस्मात्स्थानाद् गृहीतव्यं जलतृणादिकमिति भावः ॥३४७॥ **ग्रामेति**—ग्रामस्वामिस्वकार्येषु ग्रामकार्यं सकलजनानां यत् कार्यं तस्मिन् राज्ञा नियुक्तः गृहस्थः यथालोकं लोकस्यानतिक्रमेण लोकानुसारेण कुर्यात् एवं स्वामिकार्य निजप्रभुणा आदिष्टम्, स्वकार्यं च लोकानुसारेण कुर्याद्वा यो य आलोक आप्तोपदेशप्रकाशस्तेन तेन तत्तत्कार्यमाचरेत् इति ग्राह्यम्, यतः अत्रास्मिञ्जगति गुणदोषविभागे लोक एव गुरुर्ज्ञातव्यः ॥३४८॥ **दर्पेणेति**—दर्पेण इन्द्रियमदेन प्रमादाद्वा कषायावेशवशतया वा। द्वीन्द्रियादिविराधने द्वीन्द्रियादिप्राणिविनाशने यथादोषं दोषमनतिक्रम्य यथागमम् आगमं प्रायश्चित्तशास्त्रम् अनुसृत्य प्रायश्चित्तविधिं कुर्यात् ॥३४९॥ प्रायश्चित्तनिरुक्तिमाह—**प्राय इति**—लोकः प्राय इत्युच्यते प्राय इति शब्दो लोकस्य वाचकः। तस्य लोकस्य चित्तं मनः उच्यते। एतस्य मनसः शुद्धिकरं कर्म तपः अनशनादिकं प्रायश्चित्तं प्रचक्षते आख्यान्ति। योऽपराधी जनः प्रायश्चित्तं करोति तस्य मनसस्तत्करणाच्छुद्धिर्जायते अन्ये च ये सधर्माणः सन्ति तेषामपि मनसः संतोषोत्पादनं भवति, प्रायश्चित्तं गृह्णतो जनस्य पुनरकार्ये प्रवृत्तिर्न भवति। जिनाज्ञा च प्रतिपालिता भवति ॥३५०॥ प्राज्ञाः प्रायश्चित्तस्य दातारः—**द्वादशेति**—आचारादिद्वादशाङ्गश्रुतधारकोऽपि एकः गुरुः कृच्छ्रं प्रायश्चित्तं दातुं नार्हति तस्माद्बहुश्रुतज्ञाः विद्वांसः प्रायश्चित्तप्रदाने अधिकारिणो मताः। एको विद्वान् देशकालादिसकलावस्थानां विमर्शं कर्तुं न प्रभवति अतः विशिष्टप्रायश्चित्तदाने आचार्यो बहूनां विदुषामभिप्रायस्य सम्यगालोचनं कृत्वा प्रायश्चित्तं दातुं समर्थो भवति ॥३५१॥ येन साधनेन दुष्कृतं कृतं तेनैव तस्य विनाशः कार्य इत्याह—**मनसेति**—मनसा चित्तेन, कर्मणा हस्तपादादिना शरीरेण, वाचा च परुषया दुरभिप्राययुतया यद्दुष्कृतमघम् उपार्जितं संचितं तत् तेनैव मनसा कर्मणा वाचा विशुद्धाभिप्रायतया तद्दुष्कृतं तत्पापं तथैव विहापयेत् विनाशयेत् ॥३५२॥ योगस्वरूपं निगदति—**आत्मदेशेति**—आत्मनः प्रदेशानां परिस्पन्दः कम्पनं योगः इति स योगविदां योगमार्गणास्वरूपस्य ज्ञातॄणां मतः अभिमतः। स च मनोवाक्कायतः जायते मनसा आत्मप्रदेशानां कम्पने जातो योगः मनोयोगसंज्ञां लभते। वचसात्मप्रदेशकम्पनं वचोयोगः, कायेन जीवप्रदेशचञ्चलता भवति तदा काययोगो जायते। इति त्रियोगाः पुण्यपापास्रवाश्रयाः पुण्यास्रवकारणत्वात् शुभयोगत्रितयम्। पापास्रवकारणत्वादशुभयोगत्रितयमुच्यते ॥३५३॥ अशुभयोगत्रितयं क्रमशो दर्शयति—**हिंसनाब्रह्मचौर्येति**—हिंसनं प्राणिवधः अब्रह्म मैथुनसेवनम्, चौर्यादिकं च काये शरीरे कर्म अशुभं विदुः। अशुभं पापोत्पादकम्। असत्यम् असभ्यं सभ्यजनायोग्यम्, पारुष्यं कर्कशम्, इत्यादि वचनविषयं कर्म अशुभवाग्योगयुक्तं ज्ञायताम् ॥३५४॥ **मदेर्ष्येति**—मदो गर्वः, ईर्ष्या द्वेषः, असूया परगुणासहनम् आदिशब्देन रागादयो विकाराः एतत्सर्वं मनोव्यापाराश्रितम् अशुभमनोयोगसंज्ञमुच्यते। एतद्विपर्ययात् हिंसनादेर्विपर्ययात् असत्यासभ्यादेर्विपर्ययात् मदेर्ष्यासूयनादेर्विपर्ययात् शुभं कायवाङ्मनोगतं कर्म ज्ञेयम् ॥३५५॥ तत्पुनः पापम् एतेषु हिरण्यादिदानेषु दत्तेषु न शाम्यतीति कथयति—**हिरण्येति**—हिरण्यं सुवर्णं पशुर्धेन्वादिकं भूमिः सस्योत्पत्तिक्षेत्रम् कन्या प्रसिद्धा शय्या तल्पम् अन्नम् ओदनादिकम्, वासांसि वस्त्राणि, एतेषां वस्तूनां दानैः अन्यैश्च पदार्थैर्न पापम् उपशाम्यति। पापनाशने एतानि दानानि नोपायः। यथा लङ्घनेन आहारत्यागेन ओषधग्रहणेन साध्यानाम् उपशान्तिं व्रजतां रोगाणां बाह्यो विधिः हस्तपादमर्दनादिकम् अकिंचित्करम् रोगहरणेऽक्षमम्। तथा पापेऽपि दानादिकं मन्यताम्, तेन पापापायो न भवति ॥३५६-३५७॥ **निहत्येति**—मनोवाग्देहदण्डनैः मनोनिग्रहं कृत्वा, भाषानिग्रहं विधाय, देहनिग्रहं च कृत्वा सकलं पापं निहत्य विनाश्य, ततः दानपूजादिकं कर्म व्रतिकः करोतु ॥३५८॥ प्रत्याख्यानं विधाय

निद्रादिकं विधेयम्—आप्रवृत्तेरिति—पुनः भोगादिषु आप्रवृत्तेः प्रवृत्तिर्यदा भवेत्तावत्कालं मे सर्वस्य भोगोपभोगादेः निवृत्तिस्त्यागोऽस्ति इति कृतक्रियः कृतप्रतिज्ञः सन्, गुरुनामानि पञ्चपरमेष्ठिमन्त्रं स्मरन् निद्रादिकं विधिं कुर्यात् ।।३५९।। प्रत्याख्यानस्य महाफलं निवेदयति—दैवादिति—दैवात् विधेः आयुर्विरामे सति आयुषि समाप्तिं गते सति । यद्भोगोपभोगप्रत्याख्यानं निद्रायाः पूर्वं विहितं तस्य महत्फलं तेन प्रत्याख्यानवताऽवाप्यते । अतः व्रती नरः भोगशून्यं भोगरहितम् अव्रतं कालं व्रतरहितं कालं न आवहेत्, न नयेत्, न यापयेत् । प्रतिदिनं व्रतिना प्रत्याख्यानं कृत्वैव सुप्यताम् इति भावः ।।३६०।। जीवदयायाः फलं चिन्तामणेरिवेति प्रतिपादयति—एकेति—एकत्र एका जीवदया । एकस्मिन्पार्श्वे एका जीवदया । परत्र अन्यस्मिन् पार्श्वे सकलाः सत्याचौर्यादिकाः क्रियाः । पूर्वत्र पूर्वस्या जीवदयायां परं फलं चिन्तामणेरिव यथा चिन्तामणेः यदिष्यते तत्फलम् इच्छासममेवाप्यते, परत्र सत्याचौर्यादिकानां क्रियाणां फलं कृषेरिव अद्य भूमिं कृष्ट्वा धान्यमुप्यते परं तत्फलं त्रिचतुर्भिर्मासैरवाप्यते । अतो जीवदयैवान्यक्रियाभ्यः श्रेष्ठेति विद्भिर्विज्ञेयम् ।।३६१।। अहिंसाव्रतमाहात्म्यं व्यनक्ति—आयुष्मानिति—एकस्मादेव अहिंसाव्रतप्रभावात् नरः आयुष्मान् दीर्घायुः, कीर्तिमान् प्रथितयशाः सुभगः सौभाग्यवान् श्रीमान् लक्ष्मीसंपन्नः सुरूपः सुन्दराङ्गो जायते ।।३६२।।

[ पृष्ठ १५५ ] श्रूयतामत्राहिंसाफलस्योपाख्यानम्—अवन्तिदेशेषु सकललोकेति—सकलजनचित्तहराः आगमाः वृक्षाः येषु, ते आरामाः उपवनानि यत्र तस्मिन् शिरीषग्रामे, मृगसेनाभिधानो मत्स्यबन्धः धीवरः । स्कन्धेति—निजांसावलम्बितबडिशपाशादिसाधनः । पृथुरोमेति—पृथुरोमाणो मत्स्याः तेषाम् आनयनाय उपनीतं कृतं विहारणं गमनं येन सः । कल्लोलेति—कल्लोलजलैस्तरङ्गनीरैः प्लावितानि आर्द्रितानि उल्लङ्घितानि कूलस्थानि तटवर्तीनि शालेयमालवप्राणि, शालिधान्ययुतोच्चक्षेत्राणि यया सा ताम् । सृप्रां सरितं नदीम् अनुसरन् अनुगच्छन् । स मृगसेनो धीवरः यशोधर्माचार्यं निचाय्य अवलोक्येति संबन्धः । कथंभूतं तम् । अशेषेति-सकलसाधुपरिषदि सभायां वर्यं श्रेष्ठम् । पुनः कथंभूतम् । अखिलेति—सकलमहाभाग्यवद्भूभृत्कृतपूजम्, पुनः कथंभूतम् । मिथ्येति—मिथ्यात्वरहिता धर्मचर्या धर्मानुष्ठानं यस्य सः तं यशोधर्माचार्यं निचाय्य विलोक्य । समासन्नेति-समासन्नं समीपस्थं यत्सुकृतं पुण्यं तेन आसाद्यं प्राप्यं हृदयं यस्य तस्य भावस्तस्मात् । दूरादेवेति—दूरादेव परिहृतपापोपार्जनसाधनसमूहः, ससंभ्रमम् आदरेण । संपादितेति—संपादितः कृतः दीर्घप्रणामः येन कृतसाष्टाङ्गनमस्कारः । प्रकामेति—प्रकामं प्रतिक्षणम् अतिशयेन प्रगलत् विनश्यत् एनः पापं यस्य सः, समाहितमनाः सावधानचित्तः, [ स धीवरः आचार्यं प्रति गत्वा व्रतमयाचत ] । साधु इति—साधूनां मुनीनां समाजे सत्तम श्रेष्ठ, सकलमहामुनिजनपूजितम, दैवात् शुभविधेः उपपन्नं प्राप्तं यत्पुण्यं तेन गृह्यभावः स्वपक्षभावः यस्य, एवंभूतोऽयं जनः कस्यचिद्व्रतस्य प्रदानेन अनुगृह्यताम् इत्यभाषत ।

[ पृष्ठ १५६-१५९ ] भगवान्—ननु वितर्के, शकुलीति—शकुलयो मत्स्याः तेषां विनाशे मारणे निःसूकाशयः क्रूराभिप्रायस्तेन वशस्य, पयःपतङ्गो बकः तस्येव, व्रतग्रहणोपदेशे कथं प्रवीणम् अन्तःकरणमभूत् । अस्ति हि लोके प्रवादः हि यस्मात् जगति किंवदन्ती प्रचलति । "न खलु प्रायेण बहुशः, प्राणिनां प्रकृतेः स्वभावस्य विकृतिः विकारः आयत्यां भाविनि काले शुभम् अशुभं वा विना भवति ।" भाविनि काले यस्य शुभं भवेत् तस्य क्रूरोऽपि स्वभावः परिवर्तते स मृदुर्भवति । तथा भाविनि काले यस्य अशुभं भवेत् तस्य मृद्वी प्रकृतिरपि क्रूरा भवेत् । एवं विमर्शं कृत्वा उपयुक्तावधिः सम्यग्ज्ञातसमीपेतदायुरवधिर्भगवान् तमेवमवदत् । "अहो शुभाशयायतन शुभपरिणाममन्दिर । अद्यतनाहनि अद्यतनदिवसे प्रथमदिवसे इति भावः । यः तव आदावेव प्रथमत एव आनाये जाले मीनः समापतितः स त्वया न प्रमापयितव्यः न हिंस्यः इति । यावच्च यावत्परिणामम् आत्मप्रवृत्तिविषयं स्वजीविकानिर्वाहपर्यन्तम् आमिषं मांसं प्राप्नोषि तावता मांसेन तव तन्निवृत्तिर्मत्स्यमारणत्यागः । अयं पुनः पञ्चत्रिंशदक्षरपवित्रः मन्त्रः सर्वदा सुस्थितेन दुःस्थितेन च त्वया ध्यातव्यः इति । मृगसेनः—यथादिशति बहुमानस्तथास्तु । इत्यभिनिविश्य इति मनसि तद्वचनमङ्गीकृत्य । तां शैवलिनीं सृप्रां नदीम् अनुगत्य, कृतजालक्षेपणः । अकालक्षेपं कालविलम्बनम् अकृत्वा शीघ्रमिति भावः, अतनुकरणम् अतनूनि महान्ति कारणानि नेत्रादीनि इन्द्रियाणि यस्य स अतनुकरणः महान् तं वैसारिणं मत्स्यम् ,

आसाद्य । स्मृतव्रतः आद्यो मत्स्यो न हन्तव्यः इति गृहीतव्रतस्य स्मरणं मृगसेनस्याजायत । तस्य मत्स्यस्य श्रवसि कर्णे चिह्नाय चीरचीरिं वस्त्रखण्डं वस्त्रस्य दशां निबध्य तम् अत्यजत् । पुनः अपराह्णकाले अन्यस्थाने । तीरिणीप्रदेशे नद्याः प्रदेशे । तथैव अदूरतरशर्मा समीपतरसुखः, समाचरितकर्मा कृतजालक्षेपणः । तमेव अचरक्षीणं मत्स्यम् अक्षीणायुषम् अनष्टजीवितम् अवाप्य लब्ध्वापि अमुञ्चत् । तस्मात् एतस्मिन् अनणिष्ठे अलघिष्ठे पाठीनवरिष्ठे पाठीनेषु मत्स्येषु वरिष्ठे महिष्ठे, पञ्चवारं जाले लग्ने पतिते विपदमग्ने संकटेन अमग्ने अस्पृष्टे मुच्यमाने त्यज्यमाने सति, गभस्तिमाली सूर्यः अस्तमस्तकमस्त्यास्त अस्ताचलशिखरमध्यारोहत । कथंभूतः सूर्यः । घनघुसृणेति—घनं विपुलं यत् घुसृणं काश्मीरजम्, तस्य रसेन अरुणिता लोहितवर्णा याः वरुणपुरस्य पुरन्ध्रयः सुचरिताः स्त्रियः तासां कपोलाः गण्डाः तेषां कान्तिरिव कान्तिस्तया शालते शोभते इति । तदनु तदनन्तरम् । गृहीतव्रतस्यापरित्यागात् ह्लादमानज्ञानं मृगसेनम् अधार्मिकलोकात् व्यतिरिक्तम् अन्यम् । रिक्तम् अप्राप्तमीनम् आयान्तं परिच्छिद्य ज्ञात्वा । अतुच्छो महान् कोपः क्रोधः अपरिहार्यस्त्यक्तुम-शक्यो यस्याः तथाभूता तद्भार्या मृगसेनस्य जाया घण्टाख्या । यमघण्टेव किमपि कर्णकटु श्रोत्रपरुषं क्वणन्ती ब्रुवाणा । कुटीरान्तः श्रितशरीरा उटजस्यान्तः मध्ये आश्रितं शरीरं देहो यस्याः मृगसेनं निरुद्धान्तःप्रवेशं कृत्वा स्वयम् उटजे स्थितेति भावः । निर्विवरं निश्छिद्रम् अररं कपाटं निरुध्य अस्थात् अतिष्ठत् । मृगसेनोऽपि तया प्रतिरुद्धसदनप्रवेशः तन्मन्त्रस्मरणसक्तचित्तः पञ्चत्रिंशदक्षरपवित्रस्य णमोकारमन्त्रस्य स्मरणे चिन्तने निरत-हृदयः, पुराणतरतरुभित्तं जीर्णतरद्रुमस्य शकलम् उच्छीर्षे विधाय सान्द्रं निबिडं निद्रायन् स्वपन्, एतत्तरुभित्ता-भ्यन्तरविनिःसृतेन उच्छीर्षीकृतस्य द्रुमखण्डस्य अन्तश्छिद्राद् बहिरागतेन सरीसृपसुतेन भुजगतनयेन दष्टः । कष्टम् अवस्थान्तरं मरणदशाम् आविष्टः प्राप्तः । व्युष्टसमये प्रभातकाले घण्टया दृष्टः । पुनरनेन सार्धं सह उषर्बुधमध्यानुमोचितेति—उषर्बुधोऽग्निः तस्य मध्ये पतिशरीरानन्तरम् अनुमोचितः त्याजितः स्वनिश्चयेन स्वदेहो यया । आत्मनि विहितबहुनिन्दया स्वस्मिन् कृतबहुगर्हणया । शोचितश्च शोकविषयं नीतः । ततः "सा यदेवास्य व्रतं तदेव ममापि । जन्मान्तरे अपि चायमेव मे पतिः भूयात्" इत्यावेदितनिदाना इति प्रकटीकृतभावि-पतिस्नेहा । समित्समिद्धमहसि समिद्भिः काष्ठैः समिद्धं प्रवृद्धं महस्तेजः यस्य तस्मिन्, द्रविणोदसि अग्नौ हव्यसमस्नेहम्, हव्येन देवेभ्यो दीयमानं द्रव्यं हव्यं घृतं तेन समः स्नेहो यस्मिन् तं देहं घृतवत्स्निग्धं सा जुहाव अजुहोत् अग्निसात् चकार । अथ विलासिनीति—विलासिनीनां शृङ्गाररसप्रियाणां स्त्रीणां विलोचनान्येव नेत्राण्येव उत्पलानि कमलानि तैः पुनरुक्ता वन्दनमाला तोरणमाला यस्याम् । विशालायां पुरि उज्जयिन्यां नगर्याम् । विश्वगुणामहादेवीश्वरो विश्वगुणानाम्न्या महादेव्याः पतिः विश्वंभरो विश्वं बिभर्ति इति विश्वंभरो जगत्पालकः विश्वंभरो नाम नृपतिः । धनश्रीपतिः धनश्रियाः पतिः, दुहितुः कन्यायाः सुबन्धोः पिता च सुबन्धुनाम्न्याः कन्यायाः पितेत्यर्थः । गुणपालो नाम श्रेष्ठी । तस्य किल गुणपालस्य मनोरथपान्थप्रीति-प्रपापालिकायाम् एतस्यां कुलपालिकायाम्, गुणपालस्य मनोरथा एव पान्थाः पथिकाः तेषां प्रीतेः प्रपा पानीय-शालिका तस्याः पालिकायां रक्षिकायाम् । एतस्यां कुलपालिकायां कुलीनपत्न्याम्, अनेन मृगसेनेन समापन्न-सत्त्वायां समापन्नः प्राप्तः सत्त्वो जीवो यस्यां सा एवंभूतायां गर्भिण्यां जातायाम् इत्यर्थः । असौ वसुधापतिः वसुधायाः भूमेः पतिः राजा विश्वंभरः विटकथासंसृष्टतया विटा जाराः तेषां कथाः ताभिः संसृष्टतया संसर्गं प्राप्तत्वात् प्रतिपन्नपाञ्चजनीनभावः पञ्चभिर्भूतैर्जन्यतेऽसौ पञ्चजनः पञ्चजनाय हितो भावः पाञ्चजनीनभावः प्रतिपन्नः स्वीकृतः पाञ्चजनीनभावः नास्तिकत्वभावः येन सः नास्तिको भूत्वा पञ्चेन्द्रियविषयासक्तिं गतः भाण्डादिरतो वा नर्मभर्मनाम्नो नर्मसचिवस्य परिहासे कुशलस्य नर्मभर्मनाम्नो मन्त्रिणः सुताय नर्मधर्मणे गुणपालश्रेष्ठिनम् अखिलकलाकलापालंकृतरूपसमन्वितां सुतामयाचत । अखिलाश्च ताः कला नृत्यगायनादि-विद्याः तासां कलापः समूहः तेन अलंकृतं च तद्रूपं सौन्दर्यं तेन समन्वितां युक्तां सुताम् अयाचत । [ श्रेष्ठी गुणपालः दुहित्रा सुबन्धुना सह कौशाम्बीदेशमयात् ] श्रेष्ठी दुष्प्रज्ञेन राज्ञा दुष्टा प्रज्ञा बुद्धिर्यस्य तेन राज्ञा याचितः प्रार्थितः यदि नर्मसचिवसुताय सुतां वितरामि तदावश्यं कुलक्रमव्यतिक्रमो दुरपवादोपक्रमश्च निजवंश-परम्पराचारोल्लङ्घनं भवेत्, दुष्टोऽपवादो निन्दा च तस्याः उपक्रमः प्रारम्भः स्यात् । अथ स्वामिशासनं नृपस्याज्ञाम् अतिक्रम्य उल्लङ्घ्यात्रैवासे तिष्ठामि, तदा सर्वस्वापहारः सर्वस्वस्य धनदारादेः अपहारो लुण्ठनं

स्यात्। प्राणसंहारश्च प्राणानां दशानां विनाशः भवेत्। इति निश्चित्य प्रियसुहृदः वल्लभमित्रस्य श्रीदत्तस्य वणिक्पतेः वैश्यस्वामिनः निकेतने गृहे। समणिमेखलकलत्रं मणिमयरशनायुतं कलत्रं श्रोणिर्यस्य तथाभूतं कलत्रं भार्याम् अवस्थाप्य, स्वापतेयसारं स्वापतेयेषु धनेषु सारं मणिकनकमौक्तिकादिकं दुहितरं च सुतां च आत्मसात्कृत्वा स्वायत्तं कृत्वा, सुलभकेलिवनवनाशयनिवेशं कौशाम्बीदेशम् अयासीत्। सुलभा केलिः क्रीडा यत्र तानि वनानि उद्यानानि वनाशया जलाशयाश्च तडागादयः तेषां निवेशो रचना यत्र तं कौशाम्बीदेशम् अयासीत्। अत्रान्तरे श्रीमद्दरिद्रमन्दिरनिर्विशेषम् आचरितपर्यटनौ अस्मिन्समये श्रीमतां धनिनां दरिद्राणां च मन्दिरेषु गृहेषु निर्विशेषं समतां मत्वा कृतविहारौ उभयेषां गृहेषु विहितगमनौ शिवगुप्त-मुनिगुप्तनामानौ मुनी श्रीदत्तप्रतिवेशनिवासिनोपासकेन यथाविधिविहितप्रतिग्रहौ कृतोपचारविग्रहौ च तामङ्गनाश्रयां धनश्रियम् अपश्यताम्। श्रीदत्तश्रेष्ठिनो गृहस्य समीपे निवासिना वसता उपासकेन श्रावकेण आगमोक्तप्रतिग्रहादिनवविधानैः कृतसत्कारौ कृतो य उपचारः सेवा वैयावृत्यं तेन युक्तौ विग्रहौ देहौ ययोस्तौ मुनी आजिरगतां धनश्रियम् ऐक्षेताम्। तत्र मुनिगुप्तभगवान्किल, धनश्रियं निध्याय वीक्ष्य कोऽपि पापी कुक्षावस्या अवतीर्णोऽत इयं दुःखार्ता जातेति अभाषत। कथंभूतां धनश्रियम्। केवलखलिस्नानपरुषाम् तैलविरहिततिलकिट्टेन केवलेन कृतस्नानत्वात् परुषां रूक्षाङ्गाम्, उद्गमनीयसंगताङ्गाभोगत्विषम् उद्गमनीयं धौतवस्त्रद्वयं तेन संगता एकत्वमापन्ना अङ्गानाम् आभोगा सुविस्तरा त्विट् कान्तिर्यस्यास्ताम्। अवैधव्येति—अवैधव्यचिह्नं जीवत्पतिकालक्षणं दवरकमात्रं मङ्गलसूत्रं तदेव जुषते सेवते इति ताम्। पुनः कथंभूताम्। आप्तेति—आप्तो विश्वस्तो जनः कान्तः पतिः, अपत्यं कन्या सुतश्च, परिजनः किंकरगणः एषां विरहेण वियोगेन देहसादः शरीरकृशता यस्याः ताम्। गर्भगौरवखेदां गर्भभारक्लान्ताम् च, शिशिराजस्रवास्रवशवर्तिनीं (?) शिशिराणि शीतानि अजस्राश्रूणि सततगलन्नेत्रजलानि तेषां वशवर्तिनी। स्थलकमलिनीमिव मलिनच्छविं मलिनकान्तिम्, उदवसितपरिसरे उदवसितस्य गृहस्य परिसरे पर्यन्तभुवि परगृहे वासो निवासस्तेन विशीर्यमाणा म्लायमाना मुखस्य श्रीः शोभा यस्यास्तां धनश्रियं निध्याय विलोक्य 'अहो महीयसां खलु एनसाम् आवासः महीयसां महताम् एनसां पापानाम् आवासः गृहं खलु कोऽपि अस्याः कुक्षौ उदरे महापुरुषोऽवतीर्णः आगतो भवेत्। येन अवतीर्णमात्रेणापि प्रविष्टमात्रेणापि दुष्पुत्रेणेव कुसुतेनेव दीना इयदावेशां दशाम् अशिश्रियत् इयान् आवेशो यस्यास्ताम् एवंस्वरूपाम् अवस्थाम् अवालम्बत इत्यभाषत ( मुनिगुप्तो मुनिः ) मुनिवृषा शिवगुप्तः—मैवं भाषिष्टाः मुनिषु वृषेव इन्द्र इवेति मुनिवृषा शिवगुप्तः मैवं वोचः। यतो यद्यपीयं श्रेष्ठिनी कानिचिद्दिनानि एवंभूता सती पराधिष्ठाने परस्य अन्यस्य अधिष्ठाने गृहे तिष्ठति, तथाप्येतन्नन्दनेन एतस्याः पुत्रेण सकलवणिक्पतिना सर्ववैश्यस्वामिना राजश्रेष्ठिना निरवधिशेवधीश्वरेण निःसीमनिधीनाम् ईश्वरेण स्वामिना विश्वंभरसुतावरेण च विश्वंभराख्यनृपसुताया वरेण पत्या भवितव्यम् इत्यवोचत्। एतच्च स्वकीयमन्दिरालिन्दगतः निजगृहबहिर्द्वारप्रकोष्ठं यातः श्रीदत्तः निशम्य श्रुत्वा 'न खलु प्रायेण असत्यमिदम् उक्तं भवति महर्षेः' इत्यवधार्य इति विनिश्चित्य सूचामुखसर्पवत् दुरीहितदत्तचेतोवृत्तिः आसीत्। सूचीवत् तीक्ष्णं मुखं यस्य स चासौ सर्पश्च स इव, दुरीहितं दुष्कार्यं तत्र दत्ता चेतोवृत्तिः मनोव्यापारो येन स तथाभूत आसीत् अजायत। धनश्रीश्च परिप्राप्तप्रसवदिवसा सती सुतमसूत परिप्राप्ता प्रसवदिवसं प्रसूतिदिनं यया एवंभूता सती पुत्रम् अजनयत्। श्रीदत्तः—चित्रभानुरिव अग्निरिव। अयं खलु बालिशः बालकः। आश्रयाशः आश्रयम् आधारवस्तु अश्नाति इति आश्रयाशः मम विनाशकरो भवेत्। तत् तस्मात् कारणात् असंजातस्नेहायामेव अनुत्पन्नप्रीतौ एव अस्य मातरि सत्याम् अस्य उपांशुदण्डः एकान्ते निगूढतया दण्डः श्रेयान् हितकृद् भवेत्। इति परामृश्य इति विचार्य। प्रसूतिदुःखेन अतुच्छमूर्च्छापाश्रयां दीर्घसंमोहात् काष्ठवन्निष्पन्दीभूतदेहां धनश्रियम् आकलय्य ज्ञात्वा, निजपरिजनजरतीमुखेन निजपरिकरजनानां जरतीनां वृद्धस्त्रीणां च वदनेन प्रमीत एवायं तनयः मृत एवायं सुतो जातः इति प्रसिद्धिं विधाय, आकार्य आहूय च एकं श्वपचं मातङ्गं कथंभूतम् आचरितोपचारप्रपञ्चम् आचरितः विहितः उपचारस्य आदरस्य प्रपञ्चः विस्तारो यस्य तम्। जिह्मब्राह्मीरहस्यनिकेतः कृतापायसंकेतः जिह्मा कपटयुक्ता सा चासौ ब्राह्मी भाषा तस्या रहस्यस्य निगूढताया निकेतः गृहभूतः, कृतः अपायस्य विनाशस्य संकेतो येन तथाभूतः श्रीदत्तः तं स्तन्यपं स्तनाज्जातं स्तन्यं दुग्धं तत्पिबतीति स्तन्यपः तं दुग्धपं बालम् एतस्मै

चाण्डालाय समर्पयामास । सोऽपि जनंगमः चाण्डालः स्वर्भानुप्रभेण करेण राहुसमेन कृष्णवर्णेन हस्तेन रामरश्मिमिव रामाः मनोज्ञाः रश्मयः किरणा यस्य तम् इव चन्द्रमिव तं स्तनंधयम् उपलभ्य गृहीत्वा । निःशलाकावकाशं निर्जनप्रदेशं देशं स्थानमाश्रित्य । पुण्यपरमाणुपुञ्जमिव पुण्यानां परमाणूनां पुञ्जमिव शुभदेहवन्तम् एनं बालं दृष्ट्वा । संजातकरुणारसप्रसरप्रसन्नमुखः संजातः उत्पन्नश्चासौ करुणारसः दयारसः तस्य प्रसरः प्रवाहः तेन प्रसन्नवदनः, सुखेन विनिधाय स्वकीयं गृहमटीकत अगच्छत् । पुनरस्यैव अवरभवभगिनीपतिः अशेषापणिकपणपरमेष्ठी इन्द्रदत्तश्रेष्ठी अवरभवा लघीयसी सा चासौ भगिनी तस्याः पतिः । अशेषाश्च ते आपणिकाः पण्यानां क्रयविक्रयादियोग्यानां वस्तूनां व्यवहारकारिणः, तेषां पणो व्यवहारस्तस्मिन् परमेष्ठी चतुरः इन्द्रदत्तश्रेष्ठी, विक्रयाडम्बरितशण्डमण्डलाधीनं विक्रयणक्रियया डम्बरिताः शोभिताः ये शण्डा वृषभाः तेषां मण्डलं समूहः तस्य अधीनम् आयत्तम्, पेठोपकण्ठगोष्ठीनं पेठस्य (?) उपकण्ठं समीपं गोष्ठीनं भूतपूर्वकं गोष्ठं गोष्ठीनम् अनुसृतः गतः, वत्सीयविषयसनीडक्रीडागतगोपालबालकलपनपरस्परालापात् वत्सेभ्यो हितः वत्सीयः स चासौ विषयः वत्सहितो निवासप्रदेशः तस्य सनीडं समीपं क्रीडार्थम् आगता ये गोपालबालकाः बल्लवानां शिशवः, तेषां लपनानि मुखानि तेषां परस्परालापात् अन्योन्यसंभाषणात् । वत्सतरतानकसंतानपरिवृतं वत्सतराः दम्याः तानकाः सद्योजाताः गोशिशवः, तेषां संतानः समूहः तेन परिवृतम् । **अनेकेति**—अनेके बहवः ते च ते चन्द्रकान्तोपलाः चन्द्रकान्तमणयः तेषाम् अन्तराले मध्ये निलीनं स्थितम् । **अरुणेति**—पद्मरागरत्ननिधिमिव तं जातं बालम् उपलभ्य दृष्ट्वा स्वयम् अवीक्षितपुत्रमुखत्वात् तद्बुद्ध्या 'मदीयस्तनयोऽयमिति मत्या' साधु अनुरुध्य सम्यक् विज्ञप्य 'स्तनंधयावधानधृतबोधे राधे स्तनंधयः शिशुः तस्य अवधानं 'कदा मे पुत्रो भविष्यतीति अवधानं चिन्ता तस्यां धृतो बोधो ज्ञानं यया तत्संबोधनम्, राधा इति । इन्द्रदत्तस्य जायाया नाम तत्संबोधनं हे राधे इति । तवायं गूढगर्भसंभवः तनूद्भवः, तन्वाः शरीरात् उद्भवः उत्पत्तिर्यस्य इति प्रवर्धिता प्रसिद्धिर्येन सः श्रेष्ठी महान्तम् अपत्योत्पत्तिमहोत्सवम् अकार्षीत् अकरोत् ।

[ पृष्ठ १६०-१६४ ] [ श्रीदत्तः भगिन्या सह तं बालं गृहमानीय पुनः तं मातङ्गाधीनं मारणायाकरोत् । सोऽपि वृक्षाकुले नदीतटनिकटे त्यक्त्वा ततो निजगृहम् अगमत् । ] श्रीदत्तः श्रवणपरंपरया कर्णपरंपरया तमेनं वृत्तान्तं वार्ताम् उपलभ्य श्रुत्वा, **शिशिवति**—शिशोः स्तनंधयस्य विनाशस्याशयेन अभिप्रायेण, कीनाश इव यम इव तन्निवेशम् आश्रित्य इन्द्रदत्तश्रेष्ठिनः गृहं गत्वा 'इन्द्रदत्त, अयं महाभागधेयो महाभाग्यः भागिनेयः भगिन्याः पुत्रः स्वस्रीयः ममैव तावद्धाम्नि गृहे वर्धतां वृद्धिं यातु' इत्यभिधाय उक्त्वैवम् सभगिनीकं भगिनीसहितं तोकं पुत्रम् आत्मावासं निजगृहम् आनीय, पुरावत् पूर्वमिव क्रूरप्रज्ञः निर्दयमतिः संज्ञपनार्थं मारणार्थम्, अन्तावसायिने चाण्डालाय प्रायच्छत् समर्पयामास । सोऽपि दिवाकीर्तिश्चाण्डालः उपात्तपुत्रभाण्डः गृहीतपुत्रपात्रः, सत्वरम् उपह्वरानुसारी निर्जनप्रदेशमनुगच्छन् । **समीरेति**—समीरस्य वायोर्वशात् गलितं विनष्टं घना मेघा एव अम्बराणि वस्त्राणि तेषाम् आवरणम् आच्छादनं यस्य, हरिणकिरणमिव हरिणाः मनोहराः किरणाः करा यस्य तमिव चन्द्रमिव ईक्षणरमणीयं नेत्राह्लादकम्, गुणपालतनयमालोक्य सदयहृदयः प्रबलविटपिसंकटे प्रबला दृढाः सारवन्तः ये विटपिनः वृक्षाः तैः संकटे व्याप्ते सरित्तटनिकटे नदीतीरसमीपे परित्यज्य अश्वल्लीत् आशु अगमत् । [ गोविन्दो नाम गोपालस्तं गृहीत्वा स्वभार्यायै सुनन्दायै समर्पितवान् ] तत्राप्यसौ पुरोपार्जितपुण्यप्रभावात् पूर्वजन्मार्जितपुण्यमाहात्म्यात्, धेनुभिः उपरुद्धसविधभागः, कथंभूताभिः धेनुभिः । उपमातृभिरिव धात्रीभिरिव एतद्वीक्षणात् अस्य बालकस्यावलोकनात् क्षरत्क्षीरस्तनाभिः निर्गलद्दुग्धकुचाभिः । **आनन्देति**—आनन्देन उदीरिता उच्चारिता निर्भराः विपुला हंभेति ध्वनयो याभिः धेनुभिः पुनः कथंभूताभिः । प्रचाराय तृणभक्षणाय आगताभिः, कुण्डोध्नीभिः कुण्डमिव ऊधांसि यासां ताभिः, व्रजलोकधेनुभिः गोपाललोकगोभिः उपरुद्धसविधभागो व्याप्तसमीपदेशः अपदान्तरं पदं स्थानम् अन्यत्पदं पदान्तरं स्थानान्तरमिति, न पदान्तरम् अपदान्तरं तदेव स्थानमागतेन तद्रक्षणदक्षेण तस्य बालकस्य रक्षणे दक्षेण चतुरेण गोपालजनेन (सूर्यास्तसमये विलोकितः) कथंभूते सूर्ये । **अस्तेति**—अस्तोऽस्ताचलः तस्य अवतंस इव भूषणवत् भासः किरणाः यस्य तस्मिन्, पुनः कथंभूते । **अशोकेति**—अशोकपुष्पगुलुम्छमनोज्ञे सरोजसुहृदि सरोजानां दिनविकासिकमलानां सुहृदि मित्रे सति विलोकितः दृष्टः ।

कथितश्च कस्मै । गोविन्दनामधेयाय गोपालाय, कथंभूताय सकलगोपज्येष्ठाय सर्वबल्लवजनेभ्यो ज्येष्ठाय वयसा अधिकाय बल्लवकुलवरिष्ठाय व्रजवंशश्रेष्ठाय, निजमुखेन तिरस्कृतकमलाय, गोविन्दाय । सोऽपि तनयप्रीत्या आनन्दमहत्या च आनीय उत्पादितमनोमोदायाः सुनन्दायाः समर्पितवान् । कृतम् अस्य इन्दिरामन्दिरस्य लक्ष्मीगेहस्य धनकीर्तिरिति नाम गोविन्देन । ततोऽसौ क्रमेण परित्यक्तशैशवदशः कमलेश इव परित्यक्ता मुक्ता शैशवदशा बाल्यावस्था येन सः कमलेश इव हरिरिव । युवजनेति—युवजनास्तरुणास्तेषां मनः पण्येन मनोग्रहणे यत्पण्यं क्रयाणम् अर्थप्रायं तारुण्यं तेन उत्फुल्लानि विकासं प्राप्तानि यानि बल्लवीनां गोपाङ्गनानां लोचनानि एव अलिकुलानि भृङ्गसमूहाः तैः अवलेह्यं स्वाद्यं लावण्यमेव मकरन्दः यस्य । पुनः कथंभूतम् । अमन्देति—अमन्दः महान् स चासौ आनन्दः तस्य कामः इच्छा तां ददातीति । अतिकान्तरूपायतनम् अतिमनोहरसौन्दर्यगेहम् यौवनम् आसादितः प्राप्तः । पुनरपि प्राज्यम् उत्तमं यत् आज्यं घृतं तस्य वणिज्या व्यवहारः तस्य उपार्जनं लाभः तदर्थं सज्जम् आगमनं यस्य तेन श्रीदत्तेन दृष्टः । पृष्टश्च गोविन्दः तस्य अवाप्तिप्रपञ्चः प्राप्तिविस्तरः [ श्रीदत्तः मत्पत्रं दर्शयन्तं त्वं विषेण मुशलेन वा जहि इति निजपुत्राय पत्रं लिखितवान् ] श्रीदत्तः—गोविन्द, मदीये सदने किमपि महत्कार्यम् आत्मजस्य तनयस्य निवेद्यं कथनीयमस्ति । तदयं प्रज्ञुः प्रकर्षवेगवती जानुनी यस्य स प्रज्ञुरयं धनकीर्तिः इमं लेखं ग्राहयित्वा सत्वरं प्रहेतव्यः प्रेषणीयः । गोविन्दः—श्रेष्ठिन्, एवमस्तु । लेखं चैवमलिखत् 'अहो विदितसमस्तपोतवकल ज्ञातसकलतुलामानपरिमाणकल, महाबल, एष खलु अस्मद्वंशविनाशवैश्वानरः अस्माकं वंशस्य कुलस्य विनाशाय वैश्वानरः अग्निरिवास्ति । अवश्यं विष्यो विषेण वध्यः, मुशल्यो मुशलेन वध्यो वा विधातव्यः इति धनकीर्तिस्तथा तातवणिक्पतिभ्याम् आदिष्टः सावष्टम्भम् अवष्टम्भ आधारः तेन सहितं सावष्टम्भं मुद्रासहितं गलालंकारसखं लेखं कृत्वा दवरकेन लेखपत्रं निबध्य तद्गले स बद्धवानित्यर्थः । गलबद्धभूषणेन सहेदं लेखपत्रमपि तेन गले बद्धम् । गत्वा च जन्मान्तरोपकाराधीनमीनावतारसरस्याम् एकानस्याम् अन्यज्जन्म जन्मान्तरं पूर्वजन्मेत्यर्थः । तस्मिन्कृतो य उपकारः तस्याधीनमीनस्य अवतारः उत्पत्तिः प्रवेशो वा यस्यां तथाभूतायाम् एकानस्याम् उज्जयिन्याम् । पूर्वजन्मनि यो मत्स्यो मृगसेनेन अहिंसाव्रतरक्षार्थे जालाज्जले मुक्तः स मृत्वा उज्जयिन्यां वेश्याऽजायत । तत्प्रवेशपदिरपर्यन्तवर्तिनि वने तस्यां प्रवेशः तत्प्रवेशः तत्र यत्पदिरं महासरः तस्य पदिरपर्यन्त (?) वर्तिनि वने उद्याने वर्त्मश्रमापनयनाय वर्त्मनः मार्गस्य श्रमहरणाय पिकप्रियालवालपरिसरे पिकानां कोकिलानां प्रियः आम्रतरुस्तस्य आलवालस्य समन्ततोऽम्भसो धारणार्थं यद्वृक्षमूले वेष्टनं क्रियते तदालवालमुच्यते तस्य परिसरे समीपप्रदेशे निःसंज्ञम् अवबोधरहितं गाढम् अस्वाप्सीत् अनिद्रात् । [ तत्रोद्याने अनङ्गसेना गणिकागता सा गाढनिद्रं तं विज्ञाय तस्य गलाल्लेखम् आदायावाचयत् । तल्लेखस्य परिवर्तनं कृत्वा तत्र लेखे धनकीर्तये मदीया कन्या मदागमनमनपेक्ष्य दातव्येति लिलेख ] अत्रावसरे अस्मिन् प्रस्तावे, विहितपुष्पावचयविनोदा कृतकुसुमोपचयकेलिः । सपरिच्छदा सपरिवारा । निखिलविद्याविदग्धा सकलगाननर्तनादिकलाचतुरा । पूर्वभवोपकारस्निग्धा पूर्वजन्मकृतोपकृत्या स्नेहला । संजीवनौषधिसमाना संजीवनी नामौषधिर्यस्या उपयोगे मृतवद्दृशो नरो जीवति तया सदृशी अनङ्गसेना नाम गणिका तस्यैव सहकारतरोः आम्रवृक्षस्य तलम् उपढौक्य गत्वा, विलोक्य च निष्पन्दलोचना निश्चलनेत्रा चिराय दीर्घसमयं तम् अनङ्गम् इव मदनमिव, मुक्तकुसुमास्त्रतन्त्रं मुक्तं त्यक्तं कुसुमास्त्राणां पुष्पबाणानां तन्त्रं धनुरादिपरिच्छदो येन, लोकान्तरमित्रम् अन्यो लोकः स्वर्गलोकं विना मध्यलोकः तस्य मित्रम् अशेषलक्षणेति सामुद्रिकोक्तसकलशुभलक्षणैर्युक्तदेहं धनकीर्तिम्, पुनरायुः-श्री-सरस्वती समागमं प्रतिपादयता रेखात्रितयेनेव प्रकाशं वितर्कितम् ऊहितं कर्कोटानां नागाकारभूषणानां त्रितयेन बन्धुरः सुन्दरः मध्यप्रदेशः यस्य तस्मात् कण्ठदेशात् आदाय अपायप्रतिपादनाक्षरालेखं लेखम् अवाचयत् । अपायो मृत्युः तस्य प्रतिपादनं कुर्वताम् अक्षराणां पदवाक्यस्वरूपाणाम् आलेखो लेखनं यत्र तथाभूतं लेखम् अवाचयत् पठति स्म । [ अनङ्गसेनया संमृज्य मृत्युलेखं श्रेष्ठिपुत्री श्रीमती धनकीर्तये दातव्येति लिलिखे ] तं वाणिजकापसदं खलं वैश्यं हृदयेन विकुर्वती जुगुप्समाना लोचनाञ्जनकरण्डादुपात्तेन लोचनार्थम् अञ्जनं कज्जलं लोचनाञ्जनं तस्य करण्डात् संपुटात्, उपात्तेन गृहीतेन वनवल्लीपल्लवनिर्यासरसद्रुतेन उपवनलताकिसलयानां मर्दनात् निर्गतक्षीररसेन द्रवभावमापन्नेन कज्जलेन, अर्जुनशलाकया अर्जुनाख्यतृणस्य शलाकया लेखन्या, तत्रैव परिम्लिष्ट-

पुरातनसूत्रे परिम्लिष्टानि परिमृष्टानि विनाशितानि पुरातनसूत्राणि पूर्वतनानि वाक्यानि यत्र तथाभूते पत्रे लेखान्तरम् अन्यं लेखं लिलेख। तथाहि—"यदि श्रेष्ठिनो माम् अवधेयवचनम् अवधेयानि ग्राह्याणि प्रमाणभूतानि वचनानि यस्य तथाभूतं यदि मां मन्यते, महाबलश्च यदि माम् अनुल्लङ्घनीयवाक्प्रसरं पितरं गणयति, वाचां प्रसरः वाक्प्रसरः अनुल्लङ्घनीयो वाक्प्रसरो यस्य आदेयभाषणस्तं यदि मां पितरं जनकं महाबलो मन्यते, तदा अस्मै निकामं नितरां सप्तपुरुषपर्यन्तपरीक्षितान्वयसंपत्तये धनकीर्तये सप्तपुरुषावसानं यावत् अवलोकितवंशशुद्धये अस्मै धनकीर्तये कूपदप्रक्रमेण जामातृदेयं वस्तु कूपमुच्यते। हिरण्यकन्यादायी कूपदः कथ्यते। हिरण्यकन्यादानक्रमेण द्विजदेवसमक्षम् अविचारापेक्षं विचारस्य अपेक्षाम् अकृत्वा श्रीमतिर्दातव्या इति। ततो यथाम्नातविशिखम् इमं लेखम् आमुच्य यथा आम्नाता प्रोक्ता विशिखा इकार-उकारादिमात्राचिह्नानि यत्र तथाभूतम् इमं लेखम् आमुच्य गले निबध्य समाचरितगमनायां विहितस्वस्थानगतौ अनङ्गसेनायां सत्यां धनकीर्तिश्चिरेण विद्राणसान्द्रनिद्रोद्रेकः विद्राणः विनष्टः सान्द्रः निबिडः अवबोधरहितः निद्रोद्रेकः स्वापस्य अतिशयो यस्य, सोत्सेकं सगर्वम् उत्थाय प्रयाय च गत्वा च श्रीदत्तनिकेतनं श्रीदत्तगृहम्, जननीसमन्विताय महाबलाय प्रदर्शितलेखः श्रीमतिसखः श्रीमतिः सखा यस्य स श्रीमतिजानिः अजायत [ श्रीदत्तो धनकीर्तिं मारणार्थं कात्यायनीमन्दिरं प्राहिणोत्, परं तच्छ्यालः तं गृहं प्रेष्य स्वयं देवीमन्दिरम् अव्रजत् तत्र च स श्यालः मारकैर्मारितः। ] श्रीदत्तो वार्ताम् इमाम् आकर्ण्य प्रतूर्णं शीघ्रं प्रत्यावर्त्य प्रतिनिवृत्य निधाय स्थापयित्वा च तद्वधाय तन्मारणाय राजधानीबाहिरिकायां चण्डिकायतने चण्डिकानामदेव्या मन्दिरे कृतसंकेतसंनद्धवपुषं मारणसंकेते संनद्धं वपुः यस्य तं नरं कच्चराचरणपिशाचीं मलिनाचारो जीववधः तत्र पिशाचीं पिशाचवदाचरणशीलां देवद्रीचीं देवमञ्चति देवद्र्यङ् पुरुषः, देवपूजिका स्त्री देवद्रीची तां च तद्वधाय स्थापयित्वा, परिप्राप्तोदवसितः परिप्राप्तः उदवसितं निजगृहं रहसि धनकीर्तिं मुहुराहूय बहुकूटकपटमतिः कूटो राशिः बहुराशियुक्तकपटेषु मतिर्यस्य स श्रीदत्तः एवम् आबभाषे अब्रवीत्। वत्स, मदीये कुले किलैवम् आचारः, पटुनरयामिनीमुखे कृष्णचतुर्दशीरात्रिप्रारम्भे कात्यायनीदेव्याः प्रमुखे प्राङ्गणे चण्डिकादेवीमन्दिरे इति भावः, प्रतिपन्नाभिनवकङ्कणबन्धेन प्रतिपन्नोऽङ्गीकृतः अभिनवो नूतनः कङ्कणबन्धः विवाहमङ्गलसूत्रबन्धो येन। स्तनंधयागोधेन स्तनंधया बाला तस्याः गोधेन पतिना। महारजनरसरक्तांशुकसमाश्रयः स्वयमेव माषमयमोरमौकुलिर्बलिरुपहर्तव्यः। महारजनानि कुसुम्भपुष्पाणि तेषां रसेन रक्तं रागयुक्तं यदंशुकं वस्त्रं तस्य समाश्रयः अवलम्बनं यस्य लोहितवस्त्रेणाच्छादित इत्यर्थः। स्वयमेव वरेणैव माषपिष्टविनिर्मितमोरमौकुलिः मोरः मयूरः काकः बलिः उपहाररूपेण उपहर्तव्यः समर्पणीयः। धनकीर्तिः—तात तात, यथा तातादेशः भवतः पूज्यस्य आदेशस्तथा तम् अनुरुन्धे। इति निगीर्य उक्त्वा, गृहीतकुलदेवतादेयहन्तकारोपकरणः गृहीतानि स्वीकृतानि कुलदेवतायै निजान्वयरक्षिकायै देवतायै देयाः हन्तकारास्तण्डुला उपकरणानि च येन स धनकीर्तिः, तेन श्यालेन पत्नीभ्रात्रा महाबलेन पुरप्रदेशान्निःसरन्नवलोकितश्च समालापितश्च भाषितश्च। हंहो धनकीर्ते, प्रवर्धमानान्धकारावन्ध्यायाम् अस्यां वेलायाम् अवगणः क्वोच्चलितोऽसि। प्रवर्धमानः वृद्धिं गच्छंश्चासौ अन्धकारः तेन अवन्ध्यायां युक्तायाम्, अस्यां वेलायाम् अस्मिन्नवसरे, अवगणः एकक एव गणेन परिवारेण रहितः अवगणः क्व उच्चलितोऽसि। क्व गन्तुमुद्यतोऽसि। महाबल, मातुलनिदेशान्नमसितनिवेदनाय दुर्गालये। श्वशुराज्ञायाः उपयाचितस्य निवेदनं कर्तुं देयवस्तुनिवेदनाय चण्डिकामन्दिरं यामि। यद्येवं नगरजनासंस्तुतस्त्वास्त्वं निवासं प्रति निवर्तस्व। यदि गन्तुमिच्छसि, मागच्छ, यतः स चण्डिकामन्दिरमार्गः नगरजनान् प्रति असंस्तुतः अस्मिन् समये तेन मार्गेण गन्तुं नोचितम्। त्वं निवासं स्वगृहं प्रति निवर्तस्व याहि। अहम् एतदुपयाचितम् ऐशान्याः स्पर्शयितुं प्रगच्छामि इष्टसिद्ध्यै देयद्रव्यम् ऐशान्याः कात्यायन्याः अर्पयितुं प्रगच्छामि यद्यत्र तातो रोषिष्यति तद्रोषमहमपनेष्यामि। ततो धनकीर्तिर्मन्दिरमगात्, महाबलश्च कृतान्तोदरकन्दरम् कृतान्तस्य यमस्य उदरकन्दरं कुक्षिगह्वरम्। महाबलस्तत्रत्यैः मारणार्थं नियुक्तैः पुरुषैर्मारितश्च। [ श्रीदत्तभार्या विशाखा धनकीर्तिमारणोपायं रचयति परं सोऽपि विफल एव भवति। विषमोदकं भक्षयित्वा उभावपि श्रेष्ठिश्रेष्ठिन्यौ म्रियेते। ] श्रीदत्तः सुतमरणशोकातङ्कोपान्तः प्रकाशिताशेषवृत्तान्तः पुत्रमृत्युजातदुःखज्वरसमीपागतान्तकः, निवेदितसकलोदन्तः, "सकलनिकाय्यकार्यानुष्ठानपरमेष्ठिनि, मन्मनोह्लादचन्द्रलेखे

विशाखे, समस्तगृहकार्याचरणचतुरे, मदीयचित्तानन्ददाये चन्द्रलेखासदृशे विशाखे, कथमयं वधेयः ममान्वयापायहेतुः प्रयुक्तोपायविलोपनकेतुः प्रवासयितव्यः। कथमयं वैधेयः गृहकर्मा मूर्खः मम वंशविनाशहेतुः प्रयुक्तोपायविनाशे केतुतुल्यः हन्तव्यः । विशाखा—श्रेष्ठिन्, मेलभावात् सर्वमनुपपन्नं त्वया चेष्टितम् । श्रेष्ठिन्, मेलभावात् मूर्खत्वात् वृद्धत्वात् चञ्चलत्वाद्वा । सर्वम् अनुपपन्नं अयुक्तिकं कार्यं त्वया कृतम् । अतः कुरुण्डतः दारुपुत्तलकान् मार्जाराद्वा भीतः कुक्कुटपोत इव ताम्रचूडशिशुरिव तूष्णीं मौनेन आस्स्व उपविश । भविष्यति भवतोऽशेषं मनीषितम् । यदिष्टं ते पूर्णं भविष्यति इत्याभाष्य उक्त्वा, अपरेद्युः अन्यस्मिन्दिवसे दयितजीवितव्यतोदकेषु मोदकेषु विषं संचार्य, दयितस्य वल्लभस्य जीवितव्यं जीवनं तस्य तोदकेषु दुःखदायिषु मोदकेषु लड्डुकेषु विषं संचार्य मेलयित्वा, सुते श्रीमते, य एते कुन्दकुमुदकान्तयो मोदकास्ते स्वकीयाय कान्ताय देयाः कुन्दपुष्पवत् श्वेतकमलवत् च सितद्युतयो लड्डुकाः निजाय कान्ताय स्वामिने देयाः, श्यावश्यामाकश्यामलरुचयश्च जनकाय, धूसरारुणवर्णतृणधान्यविशेषवद्धूसरकान्तयो मोदकाः पित्रे देयाः । इति समर्पितसमया अवगमितसंकेता समासन्नमरणसमया समीपागतमृतिवेला सरिति नद्यां सवनाय स्नानं कर्तुम् अनुससार अन्वगच्छत् । श्रीमतिः यच्चोक्ष(?) भक्ष्यं तत्प्रतीक्ष्याय, ताताय वितरितव्यम् । चोक्षं भक्ष्यं सुन्दरः शुचिर्मोदकः स प्रतीक्ष्याय पूज्याय ताताय पित्रे देयः इत्यवगत्य विज्ञाय अविज्ञातसवित्रीचित्तकौटिल्या अबुद्धमातृमनःकपटभावा, निःशल्यहृदया सरलमानसा तान्मोदकान् एतयोः जनकपत्योः विपर्ययेण अवीवृधत् पर्यवेषयत् । ये धूसरवर्णा मोदकास्ते निजपतये, चन्द्रकान्तास्ते पित्रे तया पर्यवेष्यन्त । विशाखा—पतिशून्यं मरणं प्राप्तत्वात् पतिरहितम्, अरण्यसामान्यं वनसदृशम् अगारं गृहम् आप्य आगत्य परिदेव्य च शोकं विधाय च दीर्घसमयम् । पुनः पुत्रि, किमन्यथा भवति महामुनिभाषितम् । केवलं तव वापेन मया च थेर्यात्मीयान्वयविलोपाय कृत्योत्थापनमाचरितम् । तव वापेन पित्रा थेर्या स्थविरया जरत्या मया च आत्मीयान्वयो निजवंशः तस्य विलोपाय विनाशाय कृत्या नाम क्रूरदेवताया उत्थापनम् आचरितम् । सा जागरूका कृतेति भावः । तदलमत्र बहुप्रलापेन । कल्पद्रुमेण कल्पलतेव त्वमनेन दैवदेयदेहरक्षाविधानेन धवेन सार्धम् आकल्पम् इन्द्रियैश्वर्यसुखमनुभव इति संभाविताशीर्वादा तमेकं मोदकमास्वाद्य पत्युः पथि प्रतस्थे । कल्पद्रुणा कल्पवल्लीव त्वमनेन विधिना देयस्य देहस्य शरीरस्य रक्षणविधानेन धवेन पत्या सह आकल्पं कल्पान्तकालं यावत् इन्द्रियसुखम् ऐश्वर्यसुखं च अनुभव इति समर्पिताशीः तमेकं लड्डुकं भक्षयित्वा पत्युः पथि मार्गे प्रतस्थे जगाम मृतेति भावः । [ विश्वंभरेण राज्ञा स्वकन्या धनकीर्तये दत्ता, गुणपालोऽपि धनकीर्तेः पिता कौशाम्बीदेशात्पद्मावतीपुरम् ( उज्जयिनीं ) आगत्य पुत्रेण सार्धं समतिष्ठत । ] एवं विहितेति—एवं पूर्वोक्तप्रकारेण कृतपापाभिप्रायाधीनतया प्राप्तासोमसुतशोकदशे तस्मिन् भार्यापितरि तन्मातरि च दशमीस्थे मृते सति स पुरातनसुकृतप्रभावात् । उल्लंघितेति—अतिक्रान्तभयानकप्राणविनाशकपञ्चसंकटः, प्रतिदिवसं वधिष्यमाणश्रीः एकदा तेन विश्वंभरेण राज्ञावलोकितः, तदङ्गसौन्दर्ये उत्पन्नविपुलाश्चर्येण तनूजया स्वसुतया सह उभयेन विशाम् आधिपत्यपदेन वैश्यानाम् आधिपत्यपदेन श्रेष्ठिपदेन, तथा विशां मनुजानाम् आधिपत्यपदेन स्वामित्वपदव्या योजितश्च गुणपालः किंवदन्तीपरंपरया जनश्रुत्या परंपरया अस्य कल्याणपरंपराम् आकर्ण्य कौशाम्बीदेशात्पद्मावतीपुरमागत्य अनेन आश्चर्ययुक्तविभवसहितेन अनुजातेन लघीयसा पुत्रेण सह संजग्मे समगच्छत ।

[ पृष्ठ १६४-१६६ ] अथान्यदा सकलेति—कलत्रं पत्नी, पुत्रः मित्रं च तन्त्रं सैन्यं च तेन सहितेन धनकीर्तिना, दर्शनायागतया अनङ्गसेनया च अनुसरणतत्परः गुणपालश्रेष्ठी मतिश्रुतावधिमनःपर्ययगोचरसभ्राजम्, सकलसंयतजनवृन्दराजं श्रीयशोध्वजनामपात्रं भगवन्तम् अभिवन्द्य स बहुविनयेन वक्ष्यमाणम् अपृच्छत्—भगवन्, किं नाम जन्मान्तरे धर्ममूर्तिना धर्मस्य पूजादानादिसुकृतस्य मूर्तिना शरीरेण धनकीर्तिना सुकृतं पुण्यमुपार्जितम् । येन बालकालेऽपि तानि तानि दैवैकशरणप्रतीकाराणि दैवम् एव एकं मुख्यं शरणं रक्षकं तेन प्रतीकारः संकटविनाशोपायो येषां तानि व्यसनानि संकटानि व्यतिक्रान्तः उल्लङ्घितवान् । येन सुकृतेन अस्मिन् जगति व्यतिरिक्तम् अधिकं रसायां पृथिव्याम् अनुपलभ्यमानं यद्रूपं लावण्यं तेन संपन्नः अभूत् । येन अदभ्रः विपुलः अभ्रियः आकाशसंबन्धी विभावसुः विद्युदग्निः तस्य प्रभासंभारः कान्तिसमूहः इव देवानाम् अपि अप्रतिहतमहः अनिराकृतकान्तिः समजनि । येन चापरेषामपि अन्येषाम् अपि तेषां तेषां महापुरुषकक्षाव-

ग्रहाणां महानरपाश्वश्रितानां गुणानां समवायः संचयः अभवत् । तथाहि—स्थानं वदान्यतायाः दातृत्वस्य, समाश्रयः, निकेतनम् अवदानकर्मणः प्रशस्तकर्मणः, गृहम्, क्षेत्रं मैत्रेयिकायाः मैत्रीभावस्य निवासः, स्वप्नेऽपि न स्वजनस्य अजनि अजायत मनोमन्तुः मनसाप्यपराधः । कन्तुरिव च मदन इव च कामिनीलोकस्य नारीजनस्य । तदस्य भदन्त महामुने, प्रापणिकपरिषत्प्रवणस्य प्रापणिकाः क्रयविक्रयकारिणो वैश्याः तेषां परिषत् संघः तस्मिन् प्रवणस्य चतुरस्य । निःशेषेति—सकलागमचतुरचित्तस्य निसर्गादेव । निखिलेति—सकलपरिच्छदाभाषणतत्परस्य । विनेयेति—विनेतुं शिक्षितुं योग्याः विनेयाः भव्याः श्राद्धजनाः तेषां मनःकुमुदमोदिकथावतारे अमृतमूर्तेः चन्द्रस्य सुकीर्तेः शोभनयशसः पुरोपार्जितं पूर्वजन्मलब्धं सुकृतं पुण्यं कथयितुमर्हसि । भगवान्—श्रेष्ठिन् श्रूयताम् । तत्संबन्धसक्तं धनकीर्तिश्रेष्ठिनः प्राग्जन्मसंबन्धसहितं पूर्वोक्तं वृत्तान्तम् अचकथत् कथयति स्म । या चास्य पूर्वभवनिकटा पूर्वजन्मना समीपस्था घण्टाभिधेया वधूटी पत्नी आसीत्, सा पूर्वजन्मकृताभिलाषा दमूमसि अग्नौ प्रवेशादियं संप्रति अधुना श्रीमतिः संजाता, यश्च मीनः स कालक्रमेण व्यतिक्रम्य उल्लङ्घ्य पूर्वं प्राक्तनं पर्यायपर्व अवस्थाग्रन्थिम् इयं अनङ्गसेना अजनि अजायत । अतोऽस्य महाभागस्य एकदिवसाहिंसाफलं एतद्विजृम्भते परिवर्धते । धनकीर्तिः एतद्वचत्रपवित्रश्रोत्रवर्त्मा एतस्य वचत्रेण वाक्येन पूतकर्णमार्गः, तथा श्रीमतिः अनङ्गसेना च पुराभवभवं प्राग्जन्मभवं भवं जन्म संभाल्य श्रुत्वा, उन्मूल्य च तमःसंतानतरुनिवेशमिव तमसाम् अज्ञानानां संतानं समूहः स एव तरुः वृक्षः तस्य निवेशमिव रचनामिव केशपाशं तस्यैव दोषज्ञस्य अन्तिके दोषान् रागद्वेषमोहादीन् जानातीति दोषज्ञः तस्य मुनेः यशोध्वजस्य अन्तिके समीपे, यथायोग्यताविकल्पं योग्यतायाः विकल्पं भेदम् अनुसृत्य, जिनमार्गोचितेन जिनकथितचारित्रोपाययोग्याचरणेन चिराय दीर्घकालम् आराध्य रत्नत्रयम्, विधाय च विधिवत् आगमम् । अनुसृत्यं निरजन्यमनोवर्तनं प्रायोपवेशनम् । अजन्यम् उपसर्गः विघ्नः निर्गतम् अजन्यात् मनोवर्तनं यस्मिन् तथाभूतं निर्विघ्नं भावः प्रायोपवेशनमिति मासादिकमवधि कृत्वा चतुराहारत्यागं विधाय । तदनु धनकीर्तिः सर्वार्थसिद्धिसाधनकीर्तिर्बभूव । सर्वार्थसिद्धिनामकस्य पञ्चमानुत्तरस्य साधने कीर्तिर्यस्य तथा बभूव । समाधिमरणेन धनकीर्तिमुनिः सर्वार्थसिद्धिं जगामेति भावः । श्रीमतिरनङ्गसेना च कल्पान्तरसंयोज्यं षोडशस्वर्गेषु केनचिदन्यतमेन कल्पान्तरेण स्वर्गान्तरेण संयोज्यं देवसायुज्यं देवादसंयोगम् अभजत् । भवति चात्र श्लोकः सर्वार्थः[1] । पञ्चकृत्वः इति—किलेत्यागमे । आगमे इति कथितमिति भावः । पुरा एकस्य मत्स्यस्य पञ्चकृत्वः पञ्चवारम् अहिंसनात् पञ्चवारम् अभयदानात् धनकीर्तिः पञ्चापदः पञ्च संकटानि अतीत्य उल्लंघ्य, श्रियः पतिः राजलक्ष्म्याः पतिः स्वामी अभवत् ॥३६३॥

इत्युपासकाध्ययने अहिंसाफलावलोकनो नाम षड्विंशः कल्पः ॥२६॥

## २७. स्तेयफलप्रलपनो नाम सप्तविंशः कल्पः ।

[ पृष्ठ १६६ ] अदत्तस्येति—अदत्तस्य वित्तस्वामिना यत्र समर्पितं तस्य परस्वस्य परकीयधनस्य ग्रहणं स्तेयं चौर्यम् उच्यते । परं सर्वभोग्यात् सकलैः जनैः स्थिरैः आगन्तुभिश्च भोक्तुं योग्यात् तोयतृणादितः भावात् जलतृणादितः पदार्थात् अन्यत्र तत् स्तेयम् उच्यते । जलतृणादीनां सर्वभोग्यत्वात् न तद्ग्रहणं चौर्यम् । तत्र स्वस्वामिकत्वाभावात् ॥३६४॥ ज्ञातीनामिति—ज्ञातीनां दायादानाम् अत्यये मरणे तैः अदत्तमपि धनं ग्राह्यम् इति संमतम् । तु अन्यथा जीवतां ज्ञातीनां निदेशेन दुरभिप्रायेण राजवर्चसा धनं गृह्यते चेत् व्रतक्षतिः अचौर्यव्रतनाशः स्यात् । जीवतां ज्ञातीनां निदेशेन इदं त्वं गृहाणेति दत्तं चेत् चौर्यं न भवति ॥३६५॥ संक्लेशेति—संक्लेशाभिनिवेशेन रागाद्यावेशेन आर्तरौद्राभिप्रायेण वा यत्र स्वपराश्रिते राये धने प्रवृत्तिः स्यात्

---

१. 'ब' प्रतौ सर्वार्थः इति नास्ति 'क' प्रतौ च नास्ति सर्वार्थः ।

तत् स्तेयं स्यात् । तद्वस्तु स्वयं गृहीतम् अथवा अन्यजनाश्रयं क्रियते तत्स्तेयं स्यात् । तद्वस्तु स्वयं न गृह्णीयात् अन्यजने च न दद्यात् । तत्सर्वं राशि विज्ञेयम्, स्वान्यजनाश्रये रायि प्रवृत्तिर्जायते तत्सर्वं स्तेयं विज्ञेयम् । स्वस्य रायि धने पराश्रिते रायि धने वा कथं स्तेयं भवति । संक्लेशाभिनिवेशेन प्रवर्तनात् ॥३६६॥ **रिक्थमिति**—निधिनिधानोत्थं रिक्थं नदीगुहाविवराकरादिस्थितं रिक्थं धनं राज्ञः विना अन्यस्य पुरुषस्य न युज्यते। राजा एव तद्धनस्य स्वामी । अत उक्तम् इह अस्वामिकस्य स्वस्य धनस्य मेदिनीपतिः राजा दायादः साधारणः स्वामी । निधिः यो व्ययीकृतः क्षयं न याति स निधिः । यद् व्ययीकृतं सन् क्षयं याति तन्निधानम् ॥३६७॥

[ पृष्ठ १६७ ] **आत्मार्जितमिति**—स्वेन अर्जितं उद्यमादिना लब्धमपि द्वापराय संशयाय स्यात् इदं मम धनमस्ति न वेति यदा संशय उत्पद्येत तदा तद्ग्रहणे दाने वा अन्यथा भवेत् स्तेयं स्यात् । अतः व्रती निजान्वयं विमुच्य अन्यस्य धनं परिहरेत् ॥३६८॥ **मन्दिरे इति**—मन्दिरे गृहे पदिरे मार्गे (?) नीरे, कान्तारे वने, धरणीधरे पर्वते तत् अन्यदीयम् अन्येषाम् इदम् अन्यसंबन्धि स्वापतेयं द्रव्यं व्रताश्रयैः अचौर्यव्रतं बिभ्रद्भिः न आदेयं न ग्राह्यम् ॥३६९॥ **पौतवेति**—पौतवन्यूनाधिक्ये पौतवं परिमाणं तत्र न्यूनता न्यूनेन परिमाणेन अन्यस्मै ददाति, अधिकेन आत्मने गृह्णाति । स्तेनकर्म चौर्यकर्मप्रयोगः चोरयतः स्वयम् अन्येन वा त्वं चोरयेति चोरणक्रियायां प्रेरणम्, ततो ग्रहः चौरेण चौर्यं कृत्वा आनीतस्य धनादिकवस्तुनो ग्रहणम् । विग्रहे यत्र द्वयो राज्ञोर्विरोधोऽस्ति तत्र अल्पमूल्येन महार्घाणि द्रव्याणि प्राप्यन्ते इति मत्वा तत्र गत्वा तथा ग्रहणं विग्रहे अर्थस्य संग्रहः उच्यते, एते दोषा अतीचारा अस्तेयस्य निवर्तकाः अचौर्यव्रतस्य निवर्तका न्यूनत्वकारका अतीचारा भवन्ति ॥३७०॥ **रत्नेति**—येषु व्रतिकेषु अस्तेयं व्रतं निर्मलं निरतीचारं वर्तते । तेषाम् अचिन्तिताः मनसा असंकल्पिताः रत्नाम्बरविभूतयः मणिजडितवस्त्रवैभवानि भवन्ति । तेषां रत्नानि[1] भवन्ति, रत्नानि अङ्गानि अवयवा येषां तानि गृहादीनि भवन्ति तथा च रत्नस्त्री स्त्रीरत्नं विद्याधरक्षेत्रे समुत्पन्नम् उत्तमकुले जातं तेषां भवति ॥३७१॥ **परप्रमोषेति**—परेषां प्रमोषः परप्रमोषः परस्य प्रमोषे चौर्ये जाते सति मनस्तोषेण कृष्णधियां मलिनमतीनाम्, तृष्णाकृष्णधियां तृष्णया कृष्णा धीः येषां तेषां नृणाम् अत्रैव अस्मिन्नेव लोके दोषसंभूतिः राजपञ्चजनादिभ्यः दण्डादिप्राप्तिः । परत्रैव च परलोके च दुर्गतिः नरकतिर्यग्गत्योः कुलहीने च जन्म जायते ॥३७२॥

[ पृष्ठ १६७-१६८ ] श्रूयतामत्र स्तेयफलस्योपाख्यानम्—प्रयागदेशेषु **निवासविलासवारलाप्रलापवाचालितविलासिनीनूपुरे इति**—निवासा हर्म्याणि तत्र विलासवारलाः क्रीडां कुर्वन्त्यो याः वारलाः हंस्यः तासां प्रलापाः मधुरस्वराः तैः सह वाचालितानि मुखरितानि विलासिनीनां नूपुराणि यत्र तथाभूते सिंहपुरे सिंहसेनो नाम नृपतिः आसीत् । कथंभूतः । **समस्तेति**—समस्ताश्च ते समुद्राश्च समस्तसमुद्राः तैः मुद्रिता चिह्निता सा चासौ मेदिनी च पृथ्वी तस्याः प्रसाधने वशीकरणे सेना यस्य सः, पराक्रमेण सिंह इव सिंहसेनो नाम नृपतिः । तस्य रामदत्ता नामाग्रमहिषी । कथंभूता सा । **निखिलेति**—निखिलं च तद्भुवनं जगत् तस्य जनैः स्तवनोचितं वृत्तं सदाचारो यस्याः सा । सुतौ चानयोः सिंहचन्द्रपूर्णचन्द्रौ नाम । कथंभूतौ तौ । [2]**आश्चर्येति**—आश्चर्योत्पादकलावण्येन परितोषिताः आह्लादिताः अनिमिषाणां देवानाम् इन्द्रा याभ्यां तौ । अस्य नृपस्य श्रीभूतिः पुरोहितः । कथंभूतः । **निःशेषेति**—निःशेषाणि निखिलानि तानि शास्त्राणि तेषु विशारदा चतुरा मतिर्यस्य सः पुरोहितः सूनृताधिकधिषणतया सत्यघोषापरनामधेयः सत्यं प्रियं च यद्भाषणं तत्सूनृतं तेनाधिका चासौ धिषणा बुद्धिस्तया सत्यघोषापरनामधेयः । धर्मपत्नी चास्य पतिहितैकचित्ता पतिहिते एकं मुख्यं चित्तं मनो यस्याः सा श्रीदत्ता नामाभूत् । स किल श्रीभूतिः विश्वासो विस्रम्भः रसः प्रेम ताभ्यां निर्विघ्नतया निरन्तरतया, परोपकारनिघ्नतया च परोपकारकरणवशतया च । वणिजां

---

१. वैडूर्यपद्मरागादिमणयः रत्नानि, सुवर्णरजतादिकं रत्नाङ्गम्, उत्तमाः स्त्रियः रत्नस्त्रियः । उत्तमानि वस्त्राणि रत्नाम्बराणि भाष्यन्ते ।

२. ब-क-पुस्तकयोः आश्चर्यसौदर्यौदार्येति पाठः ।

प्रशान्तशुल्कभाटकभागहारव्यवहारम् अचीकरत् । वणिजां वैश्यानां प्रशान्तशुल्कं घट्टादिदेयद्रव्यम्, भाटकं गृहादिस्वामिने निवासार्थं व्यवहारार्थं वा देयद्रव्यं भाटकम्, भागहारव्यवहारम् उत्तमर्णाधमर्णयोः यो धनदानादिव्यवहारो भवति तत्रोत्तमर्णेन यत् अंशव्यवहारेण अधमर्णतः धनग्रहणं क्रियते स भागव्यवहारः उच्यते । एवंविधं व्यवहारं स पुरोहितोऽकरोत् । किं कृत्वा स व्यवहारमकरोत् । पेण्ठास्थानं क्रयाणपत्तनं पीठस्थानं ( ? ) विनिर्माय । कथंभूतं तत् । **विभक्तेति**—विभक्ताः पृथक्पृथक् स्थिता ये अनेके अपवरकाः अन्तर्गृहाणि तेषां या रचना तया शालिनीभिः शोभमानाभिः महाभाण्डवाहिनीभिः महावणिङ्मूलधनधारिणीभिः, गोशालोपशल्याभिः गवां शाला गोशाला तस्याः उपशल्याभिः समीपस्थिताभिः कुल्याभिः पटशालाभिः समन्वितम् । पुनः कथंभूतम् । **अतिसुलभेति**—अतिसुलभानां जलानां यवसानां तृणानाम् इन्धनानां काष्ठानां च प्रचारो यत्र तत् । पुनः कथंभूतं तत् । **भाण्डनारम्भेति**—भाण्डनं कलहः तस्यारम्भे उद्भटाः शूराः ये भरोरा योधास्तेषां पेटकपक्षः समूहपक्षः तेन रक्षासारं कृतरक्षणत्वात् सारभूतम् पुनः कथंभूतम् । **गोरुतेति**—गोः धेनोः रुतं ध्वनिः यावद्दूरं श्रूयते तावत्प्रमाणं यद्वप्रं सस्यक्षेत्रम्, प्राकारः सालः, प्रतोलिः रथ्या, परिखा खातिका इत्यादिभिः मूत्रितं कृत त्राणं रक्षणं यस्य तत् । पुनः कथंभूतम् । **प्रपेति**—पानीयशाला । सत्रम् अन्नदानशाला । सभा व्यवहारनिर्णयपरिषत् । एभिः सनाथाः युक्ताः याः वीथयः गृहपङ्क्तयः तासां निवेशनं रचना यत्र तत् पण्यपुटभेदनं विक्रेयद्रव्यपरिपूर्णं पुटभेदनं नगरम् । पुनः कथंभूतम् । **विदूरितेति**—विदूरितं निवारितं कितवाः द्यूतक्रीडारताः । विटाः षिङ्गाः । विदूषकाः चाटुबटुकाः । पीठमर्दाः नर्मभाषणकारिणः । एतेषाम् अवस्थानं यत्र तत् तथाभूतं पेण्ठास्थानं विनिर्माय विरच्य नानादिग्देशगमनकारिणां वणिजां वैश्यानां प्रशान्तशुल्कभाटकभागहारव्यवहारमचीकरत् पुरोहितः श्रीभूतिरिति संबन्धोऽत्र ज्ञेयः । [ अस्मिन्प्रस्तावे भद्रमित्रो नाम वणिक् श्रीभूतेर्हस्ते तत्पत्नीसमक्षं सप्तरत्नानि दत्वा सुवर्णद्वीपम् अगच्छत् ] अत्रान्तरे अस्मिन् प्रसंगे भद्रमित्रः सुवर्णद्वीपम् अनुससारेति संबन्धः । स कस्य सूनुरिति विवृणोति कविः—**पद्मिनीखेटेति**—पद्मिनीखेटपट्टने विनिविष्टः संनिवेशविशिष्टो य आवासः मन्दिरम् आलयः तस्मिन् तन्त्रस्य तदधीनस्य तत्र निवसत इत्यर्थः । सुमित्रस्य वणिक्पतेः सूनुः भद्रमित्रः । कथंभूतस्य सुमित्रस्य । **सुदत्तेति**—सुदत्ता कलत्रं सुदत्ता भार्या तस्याः चरित्रेण सदाचारेण पवित्रितं गोत्रं यस्य, तस्य वणिक्पतेः ( सुमित्रस्य ) सूनुः । कथंभूतः । **निजेति**—निजा ये सनाभयः अन्वयजाः जनाः त एव अम्भोजानि कमलानि तेषां विकासने भानुरिव सूनुः । कथंभूतः । **समानेति**—समानं धनं चारित्रं येषां तैः वणिक्पुत्रैः वैश्यसुतैः सत्रं सह बहित्रयात्रायां नौकागमने यियासुः यातुमिच्छुः यियासुः जिगमिषुः । इति विचार्य सुवर्णद्वीपमनुससार । किं विचार्य । **पादेति**—यत् उद्यमात् धनं लभ्यते तस्य चत्वारो विभागाः कर्तव्याः । तत्र आयात् जाताद्धनलाभात्, पादं चतुर्थांशं निधिं कुर्यात् मूलधनत्वेन रक्षेत् पादं वित्ताय कल्पयेत् चतुर्थांशं वित्ताय उद्यमे भाण्डमिति योजयेत् । चतुर्थांशं धर्मे च उपभोगे च योजयेत् अवशिष्टं पादं भर्तव्यपोषणे कुटुम्बभरणार्थे तद्विनियोगं कुर्यात् ॥३७३॥ इति श्लोकार्थम् अवधार्य, अतिचिरम् उपनिधिन्यासयोग्यम् आवासं विचार्य च दीर्घकालं रत्नादिनिधिस्थापनयोग्यम् आवासः स्थानं किं स्यात् कुत्र स्यात् इति विमृश्य, उदिताचारसेव्यः उदितः विज्ञैः कथितः आचारः व्यवहारः सेव्यो यस्य । अवधारितेतिकर्तव्यः निश्चितकार्यपद्धतिः, सन् स भद्रमित्रः । **अखिलेति**—अखिलाः सकलाः ते च ते जनाश्च तेषां श्लाघ्यः प्रशस्यः यो विश्वासः विस्रम्भः तस्य प्रसूतिः उत्पत्तिः यस्मात् । तथाभूतस्य श्रीभूतेः हस्ते तत्पत्नीसमक्षम् अनर्घकक्षम् अनर्घाः उत्तमाः कक्षाः पार्श्वभागा यस्य तत्, अनुगताप्तकम्, आप्तेभ्यो अनुगतं हितकारिभ्यः पूर्वजेभ्यः अनुयातं रत्नसप्तकं निधाय स्थापयित्वा । विधाय च जलयात्रासमर्थं जलयात्रासंपादकम् अर्थं धनम् । एकवर्णप्रजाप्रलापम् एकवर्णा एव प्रजा वर्तते इति प्रलापः किंवदन्ती यत्र तथाभूतं सुवर्णद्वीपम् अनुससार ।

[ पृष्ठ १६९-१७० ] **पुनरिति**—पुनः अगण्यपण्यविनिमयेन असंख्यक्रयविक्रयवस्तूनां प्रतिदानेन, तत्रत्यं सुवर्णद्वीपसंबन्धि अचिन्त्यम् असंकल्प्यम् आत्माभिमतवस्तुस्कन्धं स्वेष्टपदार्थसमूहम् आदाय गृहीत्वा, प्रत्यावर्तमानस्य स्वदेशं प्रतिनिवर्तमानस्य व्याघुटितस्य अदूरसागरावसानस्य अदूरं समीपं सागरस्य समुद्रस्य

अवसानं तटं यस्य समुद्रतटस्य समीपं गतवतः। अकाण्डेति—अकाण्डे अनवसरे प्रचण्डं घोरं बलं सामर्थ्यं यस्य तथाभूतात् अनिलात् वायोः परिवर्तितपोतस्य भ्रामितनौकस्य, यद्भविष्यतया भाग्यधीनतया दैवावलम्बनपरतया आयुषः शेषत्वात् तस्यैकस्य प्रमादफलकावलम्बनोद्यतस्य प्रमादेन अनवधानतया फलकस्य आश्रयार्थम् उद्युक्तस्य, कण्ठप्रदेशप्राप्तजीवितस्य कण्ठगतप्राणस्येत्यर्थः, कथं कथमपि क्षणदायाः निशायाः क्षपणचरमयामक्षणे व्ययीकृतावसानप्रहरसमये अब्धिरोधोपलब्धिरभवत् समुद्रतटप्राप्तिरभवत्। [ महता कष्टेन भद्रमित्र आगत्य श्रीभूतिं मणिसप्तकमयाचत ] ततस्तदनन्तरम्, सुखैधितशरीरत्वात् सुखेन वर्धितदेहत्वात्। अपारेति—अपारश्चासौ अकूपारः समुद्रः तस्य क्षारवारि लवणजलं तस्य वशेन वशिकः अधीनः आशयः चित्तं यस्य शून्यचित्तस्येत्यर्थः। चिराय दीर्घकालानन्तरम् अपचितमूर्च्छोदयः अपचितो नष्टः मूर्च्छोदयो यस्य, स भद्रमित्रः श्रीभूतिं मणिसप्तकमयाचत। कदा मणिसप्तकममौ अयाचत। विश्वकर्मणि सूर्ये लोचनगोचरे नेत्रविषये जाते सति, कथंभूते विश्वकर्मणि। करप्रचारेति—करा रश्मयः तेषां प्रचारः तेन चूर्णिताः चक्रवाका एव चिन्तामणयः येन सः तस्मिन्। पुनः कथंभूते। प्रागचलेति—प्रागचलः पूर्वाचलः तस्य चूलिकाः शिखराणि तेषां चक्रवालं समूहः तस्य चूडामणिरिव तस्मिन्। पुनः कथंभूते। कमलिनीति—कमलिनीनां कमललतानां कुलं समूहः तस्य विकासेन आहितम् उत्पादितं हंसवासितानां हंसस्त्रीणां शर्म येन तस्मिन्। पुनः कथंभूते विश्वकर्मणि। दरदिति—दरन्ति विकसन्ति च तानि नलिनानि कमलानि तेषाम् अन्तरालो मध्यप्रदेशस्तद्वद् रुचिरे मनोहरे आरक्तवर्णे विश्वकर्मणि नेत्रविषये जाते सति। कथंभूतः भद्रमित्रः बान्धवमरणात्, द्रविणमंद्रवणात् द्रव्यविनाशनात्, अतीवार्तमनस्तया अतीवदुःखितचित्तत्वात्। छातच्छायकायः छाता क्षीणा छाया कान्तिः कायश्च यस्य सः क्षीणकान्तिशरीरः। पटच्चरचेलेति—पटच्चरं जीर्णं तच्च तच्चेलं वस्त्रं तस्य चीरी खण्डं तया निचिता आच्छादिता अङ्कशकटिः देहान्तो यस्य सः। कर्पटिः मलिनवस्त्रखण्डयुक्तः कटिमात्रवस्त्रः। परेति—परेषां पस्त्यानि गृहाणि तेषाम् उपास्ति तत्र याचनार्थं गमनं तेन निरस्ता नष्टा अभिमानावनिः गर्वभूमिर्यस्य, अवर्तनिः उपजीविकारहितः, सन् क्रमेण सिंहपुरं नगरम् आगत्य। गीर्मात्रेति—गीः वाणी सा एव गीर्मात्रं तेन अवसेयः ज्ञेयः पूर्वपर्यायो यस्य पूर्वा दशा यस्य स भद्रमित्रः। महेति—महामोहः महालोभः स एव रसः तेन उत्सारिता नाशिता प्रीतिः स्नेहो यस्य तं श्रीभूतिम् अभिज्ञानानि चिह्नानि अधिकानि वाक्येषु यस्य स भद्रमित्रः मणिसप्तकमयाचत। परेति—परेषां प्रतारणाय अभ्यस्ता पुनः पुनराम्नाता श्रुतिगीतिर्येन सः श्रीभूतिः—सुप्रयुक्तेनेति श्लोकाभिप्रायं परामृश्य सुप्रयुक्तेनेति—सुष्ठु पूर्वापरालोचनं कृत्वा विहितेन दम्भेन कपटेन स्वयंभूर्ब्रह्मदेवोऽपि वञ्च्यते प्रतार्यते। संवृतिः दम्भः यदि परमा पूर्णः स्यात् अन्यत्र अन्यजनविषये का नाम आलोचना को नाम परामर्शः। अन्यजनस्तु दम्भेन वञ्च्यते एव ॥३७४॥ इति परामृश्य विचार्य। महाघङ्घाघ्रातचेताः महाघङ्घो महोपहासः महातृष्णा च तेन आघ्रातं स्पृष्टं चेतो मनो यस्य सः। तम् आयातशुचम्, संप्राप्तशोकम्, अवोचत् अवदत्। "अहो दुर्दुरूट किराट गुरूपदेशम् अमन्यमान वैश्य दुराग्रहिन्नित्यर्थः। किमिह खलु त्वं केनचित्पिशाचेन छलितः पीडितः किमु मनोमहामोहावहानुरोधेन मनसः महामोहः अतीवधनविषयिणी तृष्णा तम् आवहति जनयति इति स चासौ अनुरोधः आग्रहः तेन, मोहनौषधेन अतिलङ्घितः चित्तव्यामोहं कुर्वता अगदेन परवशीभूतः, किं वा कितवव्यवहारेषु कितवाः द्यूतक्रीडारतास्तैः सह व्यवहारेषु कृतासु द्यूतक्रीडासु हारितसमस्तचित्तवृत्तिः विनाशितसकलधनः, उत अथवा अहो परचित्तवञ्चनपिशाचिकया परेषां मनःप्रतारणे पिशाचीसदृशया कयाचिल्लञ्जिकया कयाचिद्वेश्यया जनितदुष्प्रवृत्तिः उत्पादितदुर्व्यवहारः। अर्थात् तया प्रतार्य भवतो धनं सकलं गृहीत्वा भवानधनो कृतः। आहोस्वित् फलवतः पादपस्येव फलभरितस्य वृक्षस्येव श्रीमतः धनिकस्य क्रियमाणोऽभियोगः उपद्रवः न खलु किमपि फलम् असंपाद्य अनुत्पाद्य विश्राम्यतीति विरमतीति मनसि संप्रधार्य केनचिद् दुर्मेधसा कुधिया विप्रलब्धबुद्धिः प्रतारितमतिः त्वं जात इति मन्येऽहम्। येन एवं त्वम् अतिविरुद्धम् अभिधत्से ब्रवीषि। क्वाहम्, क्व भवान्, क्व मणयः, कश्चावयोः संबन्धः। तत्कूटकपटचेष्टिताकर पट्टनपाटच्चर तस्मात् कूटम् अनृतं कपटं माया च ताभ्यां युक्तानां चेष्टितानाम् आचाराणाम् आकर खनिरूप पट्टनपाटच्चर नगरचोर। अणकपणिक कुत्सित वैश्य। सकलेति—सकले मण्डले देशे प्रतीतं प्रसिद्धं प्रत्ययिकं सर्वैः अनुभूतं शीलं

सत्प्रवृत्तिः यस्य एतादृशं माम् अतिवेलम् एव वेलां मर्यादाम् अतिक्रम्यैव अकाण्डे अनवसरे चण्डकर्मन् पर्यनुयुञ्जानः प्रश्नान् कुर्वन्, कथं न लज्जसे। पुनश्चैनम् अर्थप्रार्थनपथमनोरथविशालम् अर्थानां सप्तमणीनां प्रार्थनं याचना तस्य पथि मार्गे यो मनोरथस्तेन विशालं शब्दालं ग्रहिलवत् शब्दान् ब्रुवन्तं भद्रमित्रं पालिन्दमन्दिरं राजगृहम् अनुचरैः निजकिंकरैः आनाय्य नीत्वा अनार्यमतिः अनार्या पापयुक्ता मतिर्यस्य स श्रीभूतिः, तं भद्रमित्रं पृथिवीनाथेनापि राज्ञापि निराकारयत् निरघाटयत्। उत्तेजितराजहृदयः उत्तेजितं क्रोधक्षोभं नीतं राज्ञो हृदयं येन स श्रीभूतिः कैः उदितैः वचनैः। तान्येव वर्णयति—'देव, अयं वणिक् निष्कारणम् अस्माकं दुरपवादमृदङ्गवत् दुरपवादो निन्दा अयशश्च तयोर्घोषणं कुर्वाणो मृदङ्ग इव मुखरमुखः वाचालवदनः नाथरहितवृषभवत् सुखेन आसितुं आरोहणं कर्तुं न ददाति। अनस्तितस्नानक इव सुखेन असितुं न ददाति।' इत्यादिभिः उदितैर्भाषणैः अवाप्तप्रसरतया लब्धावकाशत्वात् उत्तेजितराजहृदयः। तथैव स्ववत् राज्ञापि निरघाटयत्।

[ पृष्ठ १७१-१७२ ] भद्रमित्रः—चित्रमेतत्, ननु यन्मामपि परविप्रलम्भाय कुलक्रमायाताखिलकमलानिलयम् अनन्यसामान्यसाहसालयम् एष मोषधिषणानिधिः अपर इव अपायजलनिधिः नगरमध्येऽपि मोषितुमभिलषति। आश्चर्यमेतत्, ननु यत् यस्मात् मामपि परविप्रलम्भाय अन्यप्रतारणाय। कुलेति—वंशपरम्परायातसकललक्ष्मीगृहम् अनन्यसदृशसाहसगृहम्। एष मोषधिषणानिधिः एष सत्यघोषः मोषः स्तेयं तत्र या धिषणा बुद्धिः तस्या निधिर्निधानम् अपर इव अपायजलनिधिः अन्य इव अपायो विनाशः तस्य जलनिधिः समुद्रः। स एष श्रीभूतिः नगरमध्येऽपि मोषितुं स्तेनितुं चोरितुम् अभिलषति इच्छति। इति जातामर्षोत्कर्षः जातः उत्पन्नः अमर्षस्य क्रोधस्य उत्कर्षः तीव्रता यस्य स भद्रमित्रः तं न्यासार्पणे न्यासस्य निक्षिप्तस्य धनादेः अर्पणे तत्स्वामिने दाने अतिचिक्कणचित्तम् अतिकठिनमनसं निश्चित्य। स्वाध्यायिपरिषदि स्वाध्यायिनाम् अध्ययनशीलानां मठवासिनाम् परिषदि सभायां महापरिषदि च महान्तः राजपुरुषाः मान्यनागरिका वा धर्माधिकारिणः तेषां परिषदि सभायां च तस्य अन्यायस्य विश्वसितद्रोहस्य विन्यासेन स्थापनेन साध्यसिद्धिं मणिसप्तकप्राप्तिम् अनवबुध्य अनधीनधीः न परवशबुद्धिः अशङ्कमुकमतिः निःसंशयबुद्धिः महादेवीधामनेमनिवेशं महादेव्याः रामदत्तायाः धाम प्रासादः तस्य नेमे समीपे निवेशः स्थितिर्यस्य तम् अम्लिकानोकहशिखादेशम् अम्लिकानोकहः तिन्त्रिणीतरुस्तस्य शिखादेशम् अग्रप्रदेशम् आरुह्य आपद्गृह्यः आपद्भिः संकटैर्गृह्यः विवशः संकटपीडितः, कुररीविरहावसरः क्रौञ्चीवियोगसमयं प्राप्तः कुरर इव तमस्विनीप्रथमपश्चिमयामसमये तमस्विन्याः तस्याः आद्यन्त्यप्रहरवेलायां "सुहृच्चराहूतिः श्रीभूतिः भूतपूर्वः सुहृत् सुहृच्चरः भूतपूर्वमित्रम् इति आहूतिः आख्या यस्येति श्रीभूतिः एवंविधकरण्डविन्यस्तम् एवंविधसमुद्गकस्थापितम् इयत्संस्थानसदनम्, इयदाकारसहितम्, एतद्वर्णम् अदःसंख्यासवर्णं च मदीयं मणिगणम् उपनिधिनिधेयं न्यासरूपेण रक्षणाय दत्तम्, न प्रतिददातीति। अत्र च अस्यैव धर्मरमणी धर्मपत्नी साक्षिणी च यदि यद्वदत्यैतदन्यथा मनागपि भवति चेत् एतद्वचनं असंबद्धप्रलापतया सर्वेषां ऋतूनां परिवर्तस्य निर्गमनस्य अर्धं यावत् षण्मासान् यावदिति भावः। मिथ्या भवति ईषदपि तदा मे चित्रवधो विधातव्यः" इति दीर्घघोषघूर्णितमूर्धमध्यम् ऊर्ध्वबाहुः दीर्घस्तारो घोषः स्वरः तेन घूर्णितः कम्पितः स चासौ मूर्धा तस्य मध्यो यथा स्यात्तथा। ऊर्ध्वं कृतौ बाहू हस्तौ येन सः ऊर्ध्वभुजः, सर्वर्तुपरिवर्तार्धं पूत्कुर्वन् आक्रोशं कुर्वन् एकदा रामदत्तया निर्वर्णितः अवलोकितः इति संबन्धो द्रष्टव्यः। कथंभूतया रामदत्तया कौमुदीमहोत्सवसमयं चन्द्रज्योत्स्नायां शुक्लाष्टमीमारभ्य पौर्णिमातिथिं यावत् रात्रौ नारीनरैः विहारनृत्यगायनादिक्रीडा क्रियते तस्याः कौमुदीमहोत्सवेति नाम, तत्समयम् अवलोकमानया। तत्समयं विवृणोति नगराङ्गनाजनस्य चन्द्रामृतपात्रयन्त्रधारागृहावगाहगौरितजगत्त्रयं चन्द्रस्य अमृतं सुधा तत्पात्रमिव यानि यन्त्रधारागृहाणि तेषु अवगाहेन प्रवेशेन गौरितजगत्त्रयं धवलितत्रिभुवनम्। पुनः कथंभूतया रामदत्तया। तमङ्गेति—प्रासादोपरितनभूम्यग्रे समासीनया उपविष्टया, निपुणिकेति—निपुणिकानाम्न्या उपसवित्र्या धात्र्या समेतया सहितया, अनाथेति—अनाथाः अनाश्रयाः ते च ते लोकास्तेषां लोचनानि नयनान्येव चकोरपक्षिणः तेषां कौमुदीकल्पं ज्योत्स्नासदृशं वृत्तम् आचरणं यस्याः सा तया। करुणेति—करुणा दया

तस्या रसः तस्य प्रचारे प्रवृत्तौ पदव्या मार्गभूतया, महादेव्या आकर्णितानुक्रोशाभिनिवेशात् श्रुताक्रोशात् करुणाभिप्रायात् निर्वर्णितश्च उपलक्षितः। तदनु तदनन्तरम्, अस्मन्मनःसंधात्रि धात्रि, न खल्वेष मनुष्यः पिशाचपरिप्लुतः अस्माकं मनः अस्मन्मनः तत् सं सम्यक् दधाति धारयति संतोषयतीति संधात्री तत्संबोधनम्, हे धात्रि हे उपमातः, एष नरः खलु न पिशाचेन परिप्लुत आविष्टः नाप्युन्मत्ताचरितः मदिरादिपानेन विक्षिप्त-वृत्तिमनस्कत्वात् निरर्गलाचरणः न। यतस्तं दिवसम् आद्यं कृत्वा सकलमपि परिवत्सरदलं यस्मिन्दिनेऽयं नरः चिञ्चिणीवृक्षमारुह्य श्रीभूतिना मदीयरत्नसप्तकं गृहीतम् इति वचो वक्तुमारम्भं कृतवान् तम् आद्यं दिवसम् अवधि कृत्वा सकलमपि वर्षस्य दलं षण्मासान् यावत् एकवाक्यव्याहारपाठाकुण्ठकठोरकण्ठनालः एकमेव वाक्यं भाषणं तस्य व्याहार उच्चारणं तस्य पाठेन अकुण्ठः अस्खलितः कठोरः कण्ठस्य ग्रीवायाः नालः नलिका यस्य सः। तद्विचारयेयं ततस्मात् विचारयेयं विमर्शं कुर्याम्, अचिरकालं दीर्घकालं यावत्। शारेति—शाराः द्यूतक्रीडापाशाः तेषु विशारदं चतुरं हृदयं मन एव अम्बुजं कमलं यस्य एतत्क्रीडाव्याजेन मन्त्रेः सचिवस्य पुरोहितस्य अन्तःकरणं चित्तं विचारयेयं परीक्षेयम्। अम्बिके मातः त्वयापि द्यूतदेवनावसरे द्यूतक्रीडासमये। यद्यहम् एनम् अनेककुचराचारनिचितचित्तं नानाविधाकुत्सिताचारभृतमनसम् अतिबहु-कुकुटिचेष्टितम्, अतिशयनानाविषमायाचारम्। बकोटवृत्तं बकोटो बकः तस्येव वृत्तम् आचरणं यस्य एनम् उदन्तजातं वार्तासमूहं पृच्छामि। यद्यच्च अस्य कटकोर्मिकांशुकादिकं जयामि, कटकौ हस्तभूषणे, ऊर्मिका अंगुलीयकम्, अंशुकादिकं वस्त्रादिकं जयामि द्यूतक्रीडनेन तत्तदेव अभिज्ञानीकृत्य चिह्नीकृत्य मृगीमुखव्याघ्री-समाचारकुट्टिनी श्रीदत्ता भट्टिनी मृग्या हरिण्या इव मुखं व्याघ्र्या इव समाचारः तेन कुट्टिनी दुष्टा श्रीदत्ता भट्टिनी अस्ति। तिन्तिणीतरुभाजो अम्लिकावृक्षाश्रितस्य वणिजः वैश्यस्य विषमरुचिमरीचिसंख्यासंपन्नानि रत्नानि याचयितव्या विषमा खरास्तीक्ष्णा रुचिः कान्तिर्यस्य स अग्निः तस्य मरीचयः सप्तज्वालाः तत्संख्यासंपन्नानि सप्तसंख्यायुतानि रत्नानि याचयितव्या। इति निपुणिकायाः कृतसंगीतिः कृतसंकेता। श्वस्त्येऽहनि अद्यदिनादनन्तरदिने आगामिदिने सदैव मदीयहृदयानन्ददुन्दुभे दुन्दुभे ममेदं मदीयं तच्च तद्हृदयं मनः तस्य आनन्ददुन्दुभे मोदानकतुल्यदुन्दुभे हे पाशक, त्वयापि भगवत्या पूज्यया साधु सम्यक् विजृम्भितव्यम्, मत्कार्ये साहाय्यं दातव्यमिति, यद्यस्य चिञ्चापुरुषस्य चिञ्चातरुमाश्रितस्य नरस्य सत्यता अस्ति चेत्। इत्यध्येष्य इति सत्कारं कृत्वा तत्कर्मणि द्यूतकर्मणि नियोज्य, तथैवाचरिताचरणा तथैव यथा मनसि संकल्पः कृतः तमनुसृत्य कृतकार्या, शतशः तत्तदभिज्ञानज्ञापनानुबन्धतन्त्रात्तत्कलत्रान्मर्णानुपप्रणीय राज्ञः समर्पयामास। तत्तच्चिह्नावबोधकसंबन्धवशीकृतायाः श्रीभूतिपुरोहितभार्यायाः सकाशात् मणीन् सप्तरत्नानि उपप्रणीय लब्ध्वा राज्ञः सिंहसेनस्य समर्पयामास ददौ। [ राज्ञा स्वमणिराशौ तानि संमिश्र्य भद्रमित्र आकारितः एतेषु यानि तव रत्नानि तानि गृहाणेत्युक्तः स्वीयानेव मणीन् सोऽगृह्णात्, तुष्टो राजा तं शश्लाघे ] राज्ञा सिंहसेनेन अद्भुतांशो अद्भुता आश्चर्योत्पादका अंशाः किरणा यस्य तस्मिन् स्वकीयरत्नराशौ। नैजमणिवृन्दे तानि सप्तरत्नानि संकीर्य मेलयित्वा। आकार्य चैनम् आमम्लक्ष्मीलताविलासनन्दनं वैदेहकनन्दनम् अचिरादेव समीपागतश्रीवल्लीविलासनन्दनवनं वैश्यपुत्रम् 'अहो वणिक्तनय यान्यत्र रत्ननिचये मणिसमूहे तव रत्नानि सन्ति तानि त्वं विचिन्त्य गृहाण' इत्यभाणीत् अवोचत्। भद्रमित्र—चिररात्राय दीर्घकालेन ननु वितर्के दिष्ट्या सुदैवेन वर्धेऽहम् इति मनस्यभिनिविश्य। विमृश्य 'यथादिशति विशांपतिः भूपतिः।' इत्युपादिश्य इति उक्त्वा विमृश्य च तस्यां माणिक्यपुञ्जो रत्नराशौ निजान्येव मनागिवलम्बितपरिचयानि, ईषत्कालमवलम्ब्य विज्ञातस्वरूपाणि रत्नानि समग्रहीत्।

[ पृष्ठ १७२-१७४ ] ततः स नरवरः सपरिवारः प्रकामम् अतिशयेन विस्मितमतिः "वणिक्पते, त्वमेवात्र अन्वर्थतः अर्थम् अनुसृत्य सत्यघोषः, त्वमेव च परमनिस्पृहमनीषः परमा निस्पृहा नितरां निर्लोभा मनीषा मतिर्यस्य, यस्य तव चेतसि वचसि च न मनागपि ईषदपि अन्यथाभावो धनलाम्पट्यादिकं समस्ति।" इति प्रतीतिभिः प्रत्ययैः पारितोषिकप्रदानपुरःसरप्रकृतिभिः परितोषजनकधनप्रदानमुख्यस्वभावैः तत्तदौ-पयिकोपचितिवसतिभिश्च तत्तस्मात्तदाकाले उचितजाताभिः आदरवतीभिः उचितभिः। तमखिलब्रह्मस्तम्ब-स्तिभी(?) विजृम्भमाणगुणगणस्तोत्रम् सकलब्रह्माण्डहृदयैः वर्धमानगुणसमूहस्तोत्रं भद्रमित्रं कथङ्कारं न

श्लाघयामास न प्रशंसां चक्रे अर्थात् अनेकधा राजा तं तुष्टुवे । [ श्रीभूतिः दण्डत्रयेण दण्डितः मृत्वा शयुः अजायत ] पुनः अदूराशिवतातिम् अदूरा समीपा अशिवतातिः असुखविस्तारो यस्य तं श्रीभूतिं पुरोहितं निखिलेति—सकलजनवदनान्येव आलवालमूलं तत्र कौलीनताललता निन्दा एव लता अयशोवल्ली तस्याः अवलम्बवृक्षं न्युब्जाननम् अधःकृतवदनम्, निसर्गेण प्रकृत्या हरिणीसमच्छायमपि सुवर्णप्रतिमासमकान्तिमपि महासाहसानुष्ठानात् सूर्मीसमानकायं सूर्म्या लोहप्रतिमया समानः कायः शरीरं यस्य तम् । अनल्पेति—अनल्पं विपुलं वैलक्ष्यं खेदः तेन स्फुटत् द्विधाभावं गतम् आस्वनितं मनो यस्य तम् । अतीव भयेति—अतिशयभयात् आविर्भूतः प्रकटीभूतः उत्पथवेपथुः कुमार्गाचरणात् यः शरीरकम्पः तेन तिमितं प्रस्विन्नम्, बह्वाक्षेपं बहवः आक्षेपाः अपराधाः यस्य तं श्रीभूतिम् । [ सिंहसेनः प्रभुः परुषाक्षरैः वाक्यैः तीव्रं तर्जयति ] आः-सोमपायिनाम् अपाङ्क्तेय वैधेय यज्ञे सोमलतारसपानं कुर्वतां द्विजानां पंक्तेर्बहिर्भूत, वैधेय मूर्ख, युक्तायुक्तशून्यत्वात् । विश्वासघातपातकप्रसवश्रोत्रिय, यो जनो विश्रब्धः तस्य घातो नाशः तदेव पातकं तस्य प्रसवस्थान, श्रीभूतिना बहूनां विश्वासघातः कृतः अतः स विश्वसितवञ्चको जातः । श्रोत्रियकितव श्रोत्रियधूर्त । दुराचारप्रवर्तितनूत्नरत्नापहार दुराचारेण प्रवर्तितः निष्पादितः नूत्नाना नवानां रत्नानाम् अपहारः चौर्यं येन तत्संबोधनम् । कुशिकपांसन कुशिको नाम नृपः स तु विश्वामित्रस्य पितामहः तस्य कुलं वंशः तत्पांसयति नाशयतीति पांसनः तत्संबोधनम् । बकानुष्ठानसदन यथा बकः एकेन पादेन उद्धीभूय नेत्रे नासाग्रे विधाय मत्स्यं गिलति तथा साधुत्वं प्रदर्श्य तत्सदृशं प्रवर्तमानस्य कार्यमपि बकानुष्ठानमुच्यते तस्य सदनम् आवासभूतः तत्संबोधनम् । साधुजनमनः शकुनिबन्धनाय अतनुतन्त्रीजालमिव तवेदं यज्ञोपवीतम् । हे श्रीभूते तवेदं यज्ञोपवीतं साधुजनानां मनः एव शकुनिः शुकादिपक्षी तस्य बन्धनाय अतनूनां विपुलानां तन्त्रीणां तन्तूनां जालमिव पाश इव वर्तते । असदाचारावधिक असदाचारो दुराचारः तस्य अवधिर्मर्यादाभूतः तस्य संबोधनम् हे वेदवैवधिक वेदभारवाहक सद्धर्मधामश्यामलताविधानाय विश्वभुजः समेधन, सद्धर्मोऽहिंसासत्यादिरूपः स एव धाम गृहं तस्य श्यामलताविधानाय श्यामलतोत्पादनाय विश्वभुजः विश्वं सकलं वस्तु भुङ्क्ते इति विश्वभुक् अग्निः तस्य समेधन वृद्धिविधायिन्, अकृत्यचैत्यवात्यामात्य(?) अकृत्यं विश्वसितवञ्चनादिकम् अकार्यमेव चैत्यं गृहम् तत्संबोधनम् । अकार्यधारभूत इति भावः । वात्यामात्य निकृष्टमन्त्रिन्, जरायमदूतिकोपपतिक जरा एव यमस्य दूतिका तस्याः उपपत्तौ आदरे परायणः तत्संबोधनम्, दुर्गतिक दुःखदा गतिर्यस्य तत्संबोधनम्, किमात्मनः अङ्गच्छविं न पश्यसीति संबन्धः न पश्यसि, चर्मितरुत्वचमिव चर्मितरुर्भूर्जवृक्षः तस्य त्वचमिव वल्कलमिव अतिप्रवृद्धविस्रः अतिशयेन प्रवृद्धा विस्रा जरा यस्य, वात्योन्माथशिथिलितां प्रभातप्रदीपिकामिव वातानां समूहो वात्या तस्या उन्माथः तीव्रत्वं तेन शिथिलावस्थां नीतां प्रभातप्रदीपिकामिव उषःकालीनप्रदीपिका यथा तत्सदृशीमिव, अस्तासन्नजीवितरविम् अङ्गच्छविम् अस्तपर्वतसमीपं गच्छन्तं रविमिव अस्तः मृत्युः आसन्नः समीपो यस्य स चासौ जीवितरविः तम् अङ्गच्छविम् अङ्गकान्तिं न पश्यसि, येन अद्यापि वयोर्धसि यौवने वयसि वर्तमान इव चेष्टसे । तदिदानीं तस्मादधुना यदि चेत् घनाभिघातघोरतेजसि विश्ववेदसि निक्षिप्यसे घनानाम् अयोघनानाम् अभिघातः प्रहारः तेन घोरं तेजः प्रज्वलनं यस्य तस्मिन् विश्ववेदसि अग्नौ प्रक्षिप्यसे तदा चिरोपचितदुराचारग्रहस्य दीर्घकालसंचितदुर्निवारमोहस्य स तव अचिरदुःखदायिपरिग्रहानुग्रहः अनुग्रह इव शीघ्रकष्टदायकधनादिपरिग्रहस्य अनुग्रहः अनुग्रह इव, पिशाचवत् पीडाकर इव । ततो द्विजापसद द्विजेषु विप्रेषु आसीदति अपकृष्टत्वं प्राप्नोति यः तत्संबोधनं हे द्विजापसद, हे द्विजनीच, कदाचित्त्वया इदम् अतिदुर्गन्धगोर्वरोद्गवितमध्याशयं शालाजिरत्रयम् अशितव्यम् । इदम् अतिदुर्गन्धगोमयेन उद्गवितः भृतः मध्याशयो मध्यप्रदेशो यस्य तच्छालाजिरत्रयं तत्सरावत्रितयम् अशितव्यं भक्षितव्यम् । नो चेत् गोमयभक्षणं न क्रियेत चेत् असरालबलोत्फुल्लगल्लानां मल्लानां त्रयस्त्रिंशदपहस्तप्रहतानि सहितव्यानि । असरालं विपुलं च बलं च तेन उत्फुल्लाः पीवराः गल्लाः कपोला येषां तथाभूतानां मल्लानां बाहुयोधिना त्रयस्त्रिंशदपहस्तप्रहतानि त्र्युत्तरत्रयस्त्रिंशा हस्तमुष्ट्याघाताः सोढव्या ध्रुवम् । अन्यथा तव सर्वस्वापहारः सर्वस्वस्य धनादेरपहरणं क्रियेत । प्राणाशा प्रणाशावकाशविभूतिः श्रीभूतिः जीविताभिलाषायाः प्रणाशस्य मृत्योः अवकाशदाने विभूतिरिति मन्यमानः श्रीभूतिः आद्यनयं दण्डद्वयं क्रमेण अतितिक्षमाणः असहमानः । पर्याप्त-

समस्तद्रविणः पर्याप्तं गृहीतं सकलद्रविणं धनं यस्य सः। क्रिमिकिर्मीरपरिषत्परिकल्पितमार्ष्टिकृतकलश-कपालमालावासिकसृष्टिः कृमयः कीटाः तैः किर्मीरः कर्बुरितवर्णः स चासौ परिषत्कर्दमः तेन परिकल्पिता या मार्ष्टिः अङ्गलेपनं यस्य तथा च कलशानां मृद्घटानां या कपालमाला खर्परपंक्तिः, वासिकः कुठारश्च तेषां सृष्टिः रचना यत्र, उच्छिष्टसरावस्रक्परिष्कृतः भुक्त्वा क्षिप्ता उच्छिष्टास्ते च ते सरावाश्च तेषां स्रजा मालया परिष्कृतः अलंकृतः। पुरात् नगरात् अबालबालेयकम् अबालं तरुणं बालेयकं गर्दभम् आरोह्य चटापयित्वा, सनिकारं सधिक्कारं निष्कासितः निःसारितः। पापविपाकोपपन्नाप्रतिष्ठाकुष्टः पापस्य विपाकेन उदयेन उपपन्ना प्राप्ता या अप्रतिष्ठा अकीर्तिस्तया कुष्टः मर्दितः, दुष्परिणामकनिष्ठः अशुभाध्यवसायैः कनिष्ठः हीनसमतां गतः, शुभाशयाः पुण्यसंकल्पाः तदेव अरण्यं तस्य विनाशाय महः तेजो यस्य तथाभूते हिरण्यरेतसि अग्नौ अतिरौद्रसर्गात् अतिशयरूपं यद्रौद्रं रौद्रध्यानं तस्य सर्ग उत्पत्तिर्यस्मात् तथाभूतात् तनुसर्गात् देहत्यागात्। आहेयेऽन्ववाये सर्पसंबन्धिनि अन्ववाये कुले प्रादुर्भूय उत्पद्य चिराय दीर्घकालम् अपराध्य च प्राणिषु बहून् जीवान् हिंसित्वा भक्षयित्वा च, जातजीवितावधिः जाता जीवितस्यावधिर्मर्यादा यस्य समाप्त-जीवितमर्यादः अधः प्रधाननिधिः अधः नरकेषु प्रधानः मुख्यः निधिः बभूव। भवति चात्र श्लोकः—**श्रीभूति-रिति**—श्रीभूतिः पुरोहितः स्तेयदोषेण चौर्यापराधेन पत्युः सिंहसेनराजात् पराभवं धिक्कारं प्राप्य लब्ध्वा रोहिताश्च प्रवेशेन अग्नौ प्रवेशं कृत्वा दंशेरः सन् अहिः भवन् अधो गतः नरके उत्पन्नः ॥३७५॥

**इत्युपासकाध्ययने स्तेयफलप्रलपनो नाम सप्तविंशतितमः कल्पः ॥२७॥**

## २८. सुलसायाः सगरसंगमो नामाष्टाविंशः कल्पः

[ **पृष्ठ १७४-१७७** ] किं वचनं वाच्यं किं च वर्जयेत्। **अत्युक्तीति**—अत्युक्तिम् अतिशयेन उक्तिः अत्युक्तिः यथा यद् वस्तुस्वरूपं विद्यते ततोऽप्याधिक्येन कथनम् अत्युक्तिः। अन्यदोषोक्तिः अन्यस्य दोषाणाम् उक्तिर्वर्णनम् अन्यदोषोक्तिः। सा च अन्यनिन्दा भवत्विति हेतोः क्रियमाणा असत्यवचनतां प्राप्नोति परस्या-हितचिन्तनात्। असभ्योक्तिं च असभ्या निन्द्याः शिष्टजनबहिर्भूता नरास्तेषामुक्तिं गालिवचनादिकं च वर्जयेत् त्यजेत्। कीदृशं वचनं वाच्यमित्यनुयुक्ते वदति—नित्यम् अभिजातं हितं मितं वचनं भाषेत। सदा अभिजातं कुलीनजनोचितम्, हितं प्राणिनां हितकारकम्, मितम् अल्पं वचनं भाषेत। एवंविधे भाषणे सत्यवचःपालनं भवेत् ॥३७६॥ **तत् सत्यमपीति**—यत्परविपत्तये अन्यस्य प्राणिनः विपत्तये पीडायै जीवितनाशाय वा स्यात्तत्सत्यमपि वचनं नो वाच्यं न ब्रूयात्, येन वा वचनेन स्वस्य आत्मनः दुरास्पदाः दुरुत्तरा व्यापदः संकटानि तदपि सत्यं नो वाच्यम् ॥३७७॥ **प्रियशील इति**—प्रियंवदः प्रियं वदतीति प्रियंवदः येन प्राणिना तोषो जायेत न दुःखम् तादृग्भाषणं वदन् जनः प्रियंवद उच्यते। स जनः प्रियशीलः प्रियं कर्तुं शीलं स्वभावो यस्य, तथा प्रियाचारः प्रियः सर्वजनप्रीत्युत्पादकः आचारः सत्प्रवृत्तिर्यस्य। प्रियकारी प्रियं सकलजनहितकृत् कार्यं करोतीति प्रियकारी प्रियस्य करणात्। स जनः आनृशंसधीः नृशंसा निर्दया धीः बुद्धिः न नृशंसा धीर्बुद्धिर्यस्य स अनृशंसधीः आसमन्तात् अनृशंसधीः यस्य सः आनृशंसधीः परा-द्रोहबुद्धिः। नित्यं परहिते रतः भवति सत्यवादिनि नरे एवंविधा गुणा वसन्ति ॥३७८॥ अवर्णवादेन दर्शन-मोहास्रवो भवति—**केवलीति**—निरावरणज्ञानाः केवलिनः, तदुपदिष्टं बुद्ध्यतिशयर्द्धियुक्तगणधरानुस्मृतं ग्रन्थरचनं श्रुतम्। रत्नत्रयोपेतश्रमणगणः संघः, एतेषु अवर्णवादवान् असद्भूतदोषोद्भावनम् अवर्णवादः स अस्ति यस्य स अवर्णवादवान् जन्तुर्दर्शनमोहवान् भवेत् दर्शनमोहस्यास्रवयुक्तो भवेत्। देवधर्मतपःसु च देवेषु चतुर्णिकायेषु, धर्मः अहिंसालक्षणः अर्हदागमदेशितो धर्मः। अर्हदुपदिष्टद्वादशविधेषु तपःसु च असद्भूतदोषोद्-भावनम् अवर्णवादः तं यः करोति स दर्शनमोहास्रववान् भवेत्। [1]कवलाभ्यवहारजीविनः केवलिनः इत्येव-

१. सर्वार्थसिद्धौ केवलिश्रुतसंघधर्मदेवावर्णवादो दर्शनमोहस्य इति सूत्रस्य टीकायाम् एतत् अवर्ण-वादवर्णनं विद्यते [ पृष्ठ २१५-२१६ ]।

मादिवचनं केवलिष्ववर्णवादः । मांसभक्षणाद्यभिधानं श्रुतावर्णवादः । शूद्रत्वाशुचित्वाद्याविर्भावना संघावर्णवादः । सुरामांसोपसेवाद्याघोषणं देवावर्णवादः । अनशनादितपश्चरणं केवलम् आत्मक्लेशहेतुः न ततः सुखलाभः कश्चित् इति तपसोऽवर्णवादः ॥३७९॥ **मोक्षमार्गेति**—यः मोक्षमार्गं रत्नत्रयरूपं स्वयं जानन् विदन् अर्थिने प्रार्थनायां कृतायाम् 'उपदिश मम मोक्षमार्गमिति' अहं तं ज्ञातुमिच्छामीति प्रार्थनां कुर्वते मदापह्नवमात्सर्यैः तस्य तं न भाषते न ब्रूते स आवरणद्वयी ज्ञानदर्शनावरणद्वयास्रववान् जायते । न मत्समानो ज्ञानी कश्चित् इति स्वस्योत्कर्षतावहनं मदः । कुतश्चित्कारणान्नास्ति, न वेद्मि इत्यादि ज्ञानस्य दर्शनस्य च व्यपलपनं निह्नवः । कुतश्चित्कारणाद्भावितमपि मोक्षमार्गज्ञानं दानार्हमपि यतो न दीयते तन्मात्सर्यम् । इति मदापह्नवमात्सर्याणां लक्षणानि ॥३८०॥ सत्याणुव्रतस्य दोषाः—**मन्त्रभेद इति**—मन्त्रभेदः, परीवादः, पैशुन्यम्, कूटलेखनम्, मुधा साक्षिपदोक्तिश्च एते सत्यस्य विघातकाः सन्ति । मन्त्रभेदः—अर्थप्रकरणाङ्गविकारभ्रूनिक्षेपणादिभिः पराकूतमुपलभ्य तदाविष्करणम् असूयादिभिः । परीवादः मिथ्योपदेशः अभ्युदयनिःश्रेयसार्थेषु क्रियाविशेषेषु अन्यस्यान्यथा प्रवर्तनम् । पैशुन्यं परस्परभेदशीलत्वम्, अप्रकाशेन अनुचितं कथयित्वा अन्योन्यस्नेहदूषकत्वम् । कूटलेखनम्—अन्येन अनुक्तम् अननुष्ठितं च यत्किंचिदेव तेनोक्तमनुष्ठितं चेति वञ्चनानिमित्तं लेखनं कूटलेखनम् । मुधा साक्षिपदोक्तिः अहं तत्र साक्षी आसम् । इति व्यवहारनिर्णये मुधा असत्यं भाषणम् एते सत्याणुव्रतस्य विघातका नाशकाः सन्ति ॥३८१॥ **परस्त्रीति**—परस्त्रीसंश्रयां कथां बुधो न कथयेत् अमुकस्य स्त्रीसौन्दर्यादिगुणैरुपेता चतुरा च वर्तते इत्यादिकथनम् । राजविद्विष्टसंश्रयां कथाम् अस्माकं राज्ञः प्रतिपक्षी हीनबलोऽधिकबलो वेति राजविरुद्धं कथनम् । लोकविद्विष्टसंश्रयां कथां लोकेषु विद्विष्टानां शत्रूणां संबन्धिनीं कथां लोकविरुद्धां न कथयेत् । अनायकसमारम्भां कथानायकं विना यस्य कस्यापि कथनं यद्वा तद्वासंबद्धं कपोलकल्पितं प्रलपनं न कुर्याद् बुधः । अभिजातं, हितं मितं वदेदित्यर्थः ॥३८२॥ **असत्यमिति**—अस्यैदंपर्यम् । असत्यमपि किंचित्सत्यमेव यथान्धांसि रन्धयति, वयति वासांसि इति । अन्धोयोग्यतण्डुलादिषु अन्धःशब्दप्रयोगादसत्यत्वम् । लोके तथा व्यवहारात् सत्यगं असत्यमेतत् । सत्यमपि असत्यं किंचित् यथा अर्धमासतमे दिवसे तवेदं देयमित्याख्याय मासतमे संवत्सरतमे वा दिवसे ददातीति अत्र दानाव्यभिचारात्सत्यत्वम् । प्रतिपन्नकालव्यभिचाराच्चासत्यत्वम् । सत्यसत्यं किंचिद्यद्वस्तु यद्देशकालाकारप्रमाणं प्रतिपन्नं तत्र तथैव अविसंवादः । यद्वस्तु यद्देशं यस्मिन् देशे तिष्ठति तथा तद्देशस्थस्य वर्णनम् । तद्वस्तुपरिमाणम्, तद्वर्णः तदाकारश्च सर्वं यथार्थं वर्ण्यते तत् वचः सत्यसत्यम् । तथैव तदविसंवादिस्वरूपकथनम् । असत्यासत्यं किंचित्स्वस्यासत्संगिरते कल्ये दास्यामीति । यद्वस्तु स्वस्य संबन्धि न भवति तत् तुभ्यं कल्ये प्रातः वितरिष्यामि इत्यादि प्रतिज्ञया कथनम् असत्यासत्यं नालपेत् ॥३८३॥ **तुरीयमिति**—लोकयात्रात्रये स्थितः लोकव्यवहाराविसंवादित्वात् सत्यसत्यादिवाक्त्रये स्थितः पुरुषः व्रती तुरीयं चतुर्थम् असत्यासत्यं भाषणं नित्यं वर्जयेत् न ब्रूयादित्यर्थः । या गुर्वादिप्रसादिनी या यद्वचः गुर्वादेः मातापित्रुपाध्यायादेः प्रसन्नतां जनयति सा गीः तद्वचः मिथ्यापि असत्यापि न मिथ्येति मन्यताम् । यतस्तत्र स्वस्य गुर्वादेश्चाहिताभावात् ॥३८४॥ **न स्तुयादिति**—आत्मना स्वेन आत्मानं स्वं न स्तुयात् न प्रशंसेत् । न परम् अन्यं जनं परिवादयेत् न निन्देत् सतः विद्यमानान् अन्यगुणान् अन्येषां गुणान् न हिंस्यात् न नाशयेत् गुणेषु दोषारोपणं हिंसा तां न कुर्यात् । असतः अविद्यमानान् स्वस्य गुणान् न वर्णयेत् ॥३८५॥ **तथेति**—स्वस्याविद्यमानान् गुणांस्तुवन् अन्यगुणान् विनाशयंश्च पुमान्नरः नीचैर्गोत्रोचितः नीचगोत्रे जननयोग्यो भवेत् । गर्हितेषु कुलेषु जन्म लभेतेत्यर्थः । परं विपरीतकृतेः अन्येषां गुणानां वर्णनात् स्वस्य सतोऽपि उत्कृष्टान् गुणान् वर्णयन् कृती विद्वान् उच्चैर्गोत्रं लोकपूजितं कुलम् अवाप्नोति लभते ॥३८६॥ **यत्परस्येति**—परस्य अन्यस्य यत् प्रियं प्रीत्युत्पादकं कार्यमुपकारादिकं कुर्यात् तत् आत्मनः स्वस्य हि यस्मात् प्रियं भवेत् अतः अयं लोकः जनः पराप्रियपरायणः किमिति । परस्य अप्रियकरणे अनुपकृतिकरणे किमिति प्रवृत्तो भवति । तेन तथा करणे प्रवृत्तेन न भवितव्यम् ॥३८७॥ **यथा यथेति**—यथायथा एतच्चेतः मनः परेषु अन्यजीवेषु तमः वितनुते पापं विस्तारयति । तथा तथा आत्मनाडीषु आत्मनः निजस्य नाडीषु तच्चेतः तमोधाराः पापोदकधाराः निषिञ्चति । अशुभपरिणामैः आत्मनालीसु आत्मनः प्रदेशनलिकासु तमोधाराः पापधाराः प्रविशन्ति ॥३८८॥

दोषतोयैरिति—शरीरिणां प्राणिनां चित्तवासांसि मनोवस्त्राणि दोषतोयैः रागादिदोषजलैः संगन्तृणि संगमं गतवन्ति गुरूणि भारयुक्तानि भवन्ति । परं शरीरिणां जीवानां चित्तवासांसि मनोवस्त्राणि गुणग्रीष्मैः अहिंसा-सत्याचौर्यादिगुणा एव ग्रीष्मर्तवः तैः संगन्तृणि संगं गच्छन्ति दोषजलापनयात् लघूनि भाररहितानि भवन्ति । अत एव दोषांस्त्यक्त्वा गुणान् व्रतिका गृह्णीरन् ॥३८९॥ सत्यवागिति—सत्यवाक् सत्यं वचनं ब्रुवाणो व्रती सत्यस्य सामर्थ्यात्प्रभावात् वचःसिद्धिं समश्नुते प्राप्नोति । तया स निग्रहानुग्रहं कर्तुं प्रभुर्भवति । अस्य वचःसिद्धिं प्राप्तस्य व्रतिकस्य वाणी यत्र यत्र उपजायते प्रवर्तते तत्र तत्र जनानां मान्या भवेत् ॥३९०॥ तर्षेति—कैः मृषाभाषामनीषित इत्याह तर्षेत्यादि । मृषाभाषामनीषितः मृषाभाषायाम् असत्यभाषायां मनीषा बुद्धिरस्यास्तीति मृषाभाषामनीषितः । असत्यवचनेषु प्रेरितमतिर्नरः तर्षेण धनादेः अभिलाषया, ईर्ष्यया परोत्कर्षासहिष्णुतया, अमर्षेण क्रोधेन, हर्षेण । कं दुःखं प्राप्नोति । जिह्वाच्छेदं दुःखम् अवाप्नोति परत्र च परलोके च गतिक्षतिं सुगतिविनाशं प्राप्नोति लभते तिर्यग्गतिं नरकगतिं वा लभते ॥३९१॥

[ पृष्ठ १७७-१७९ ] श्रूयतामत्र असत्यफलस्योपाख्यानम्—जाङ्गलदेशेषु हस्तिनागनामावनीश्वर-कुञ्जरजनिजातावतारे हस्तिनागपुरे जाङ्गलेति नाम्ना प्रथितेषु देशेषु हस्तिनागनामा अवन्याः भूमेः ईश्वरेषु नृपेषु कुञ्जर इव गज इव तस्य जन्या जन्मना जातावतारे जातः अवतारो यस्य तस्मिन् हस्तिनागपुरे [ हस्तिनागनाम्ना नृपेण विरचितत्वात् नगरस्यापि नाम हस्तिनागपुरमिति जातम् । ] अयोधनो नाम नृपतिस्तत्र बभूव । कथंभूतः सः । प्रचण्डेति—प्रचण्डौ विक्रमशालिनौ तौ च तौ दोर्दण्डौ बाहुदण्डौ तयोर्मण्डली तस्या मण्डनं भूषणं स च मण्डलाग्रः खड्गः तेन मण्डनं कलहः कण्डूः खर्जनम् अस्ति येषां ते कण्डूलाः मण्डनकण्डूलास्ते च ते अरातयः शत्रवः तेषां खण्डिता च या मण्डनकण्डूलारातिकीर्तिलता तस्या निबन्धनं हेतुः अयोधनो नाम भूपतिरभूत् । तस्य च अतिथिर्नाम महादेवी कृताभिषेका । या अनवरतेति—अनवरतं सततं वसुविश्राणनं धनदानं तेन प्रीणिताः संतोषं नीता अतिथयो यया सा । अनयोः अयोधनातिथ्योः सुता सुलसा नाम सकलाश्च ताः कलाः नृत्यादयः तासाम् अवलोकनम् अर्जनं तस्मिन् अनलसा आलस्यरहिता सुलसा नाम । सा किल तया महादेव्या गर्भगतापि तया महादेव्या अतिथिना किल गर्भगतापि सा ज्ञातेयेन ज्ञातित्वेन एकोदरशालिनः एकस्मिन्नेव उदरे जातत्वात् शालिनः शोभमानस्य, रम्यकदेशनिवेशेति—रम्यकदेशे निवेशेन रचनया उपेतं सहितं यत्पौदनपुरं तत्र निवेशिनः तदधीशस्य । निर्विपक्षेति—निर्गता विपक्षाः शत्रवो यस्याः सा लक्ष्मीः रमा तया लक्षितस्य । अक्षूणमङ्गलस्य अविनष्टमङ्गलस्य अविनष्टपुण्यस्य पिङ्गलस्य सूनवे मधुपिङ्गलाय सुलसा परिणीता बभूव । कथंभूताय सूनवे गुणा एव गीर्वाणाचलो मेरुस्तस्य रत्नसानवे मणि प्रस्थाय पर्वतभागसमायेति भावः, पुनः कथंभूताय । दुर्वार इति—दुर्वाराः दुर्जेयाः ते वैरिणः तेषां वक्षः-स्थलानि उरोभूमयः तेषाम् उद्दशनं विदारणं तदेव अवदानं प्रशस्तं कर्म तस्य उद्योगः प्रवृत्तिः तस्मै लाङ्गलाय हलसदृशाय मधुपिङ्गलाय तन्नामधेयाय सूनवे परिणीता दानयोग्येति संकल्पवती बभूव । भूभुजा च महोदयेन राज्ञा अयोधनेन महान् उदयः समुन्नतिः आधिपत्यं वा यस्य तथाभूतेन तेन, पुनः कथंभूतेन । विदितेति—विदितं ज्ञातं महादेव्याः अतिथेः हृदयं संकल्पो येन तेनापि विगणय्य विचारं कृत्वा, कथंभूतं विचारं कृत्वेति विवियते—"यस्य कस्यचिन्महाभागस्य महादैवशालिनः पुरुषस्य भाग्यैः भोग्यतया संभोगयोग्यतया इदं स्त्रैणं स्त्रीरूपं द्रविणं धनं तस्यैतद् भूयात् भवतात् । अत्र सर्वेषामपि वपुष्मतां वपुः शरीरम् अस्ति येषां ते वपुष्मन्तः जीवाः तेषां दैवमेव शरणम् अवलम्बनम् अस्ति । कथंभूतं तत् । अचिन्तितेति—अचिन्तितानि मनसा असंकल्पितानि यानि सुखानि दुःखानि च तेषाम् आगमः प्राप्तिः तेन अनुमेयः प्रभावः सामर्थ्यं यस्य तत् दैवमेव शरणम् ।" इति विगणय्य स्वयंवरार्थं स्वयं स्वेच्छया पतिरनया सुलसया व्रियतामिति हेतोः भीम-भीष्म-भरत-भाग-संग-सगर-सुबन्धु-मधुपिङ्गलादीनामवनिपतीना भूपतीनाम् उपदानकूलं उप-दानानुकूलं मूलं प्रस्थापयांबभूवे उपदानं कन्याप्रदानं तस्य अनुकूलम् उचितं मूलं दूतैः संदेशं प्राहिणोति स्म । अत्रान्तरे मगधेति—मगधदेशानधिकृत्य प्रसिद्धिर्यस्याः तस्याम् अयोध्यायां नरवरः भूपतिः सगरो नाम । स किल किलेति वार्तायाम् । लास्येति—लास्यं नृत्यम् आदिशब्देन गानवादनादिकं तस्य विलासः शोभा तस्य कौशलं चातुर्यं तस्य रसः प्रीतिर्यस्या तस्याः सुलसायाः कर्णपरम्परया वार्तया

श्रुतेति—श्रुत: आकर्णित: सौरूप्यातिशय: लावण्यप्रकर्ष: येन, स: पुन: कथंभूत: । मनागिति—मनाक् ईषत् उपरमन् अल्पीभावं व्रजन् तारुण्योदय: यौवनप्रकर्ष: लावण्योदयः सौरूप्योन्नतिश्च यस्य स:, प्रयोगेण प्रयोगम् उपायं कृत्वा, तां सुलसाम्, आत्मसाच्चिकीर्षु: निजवशां कर्तुमिच्छुक: [ सगर: मन्दोदरीं नाम धात्रीं विश्वभूति नाम पुरोहितम् अयोधननृपालयं प्रति प्राहिणोत् ] कथंभूतां मन्दोदरीं प्राहिणोत् । तौर्यत्रिकं नृत्यगीतवाद्यं त्रयं तौर्यत्रिकं तूर्यं मुरजादि तत्र भवं तौर्यम् । तौर्योपलक्षितं त्रिकम् इति विग्रह: । तस्य सूत्रं तस्मिन् भरतमुनिशास्त्रे इति, प्रतिकर्मविकल्पेषु प्रत्यङ्गं कर्म प्रतिकर्म शरीरस्य प्रत्यवयव-प्रसाधनार्थं वेषादिकरणं प्रतिकर्मोच्यते तस्य विकल्पा: स्नानस्रक्चन्दनपङ्काद्य: तेषु, संभोगसिद्धान्ते काम-शास्त्रे, विप्रश्नविद्यायां विविधा: प्रश्ना: हानिलाभनष्टमुष्टादिविषया: तेषां विद्या ज्ञानं तस्याम्, स्त्रीपुरुषलक्षणेषु समुद्रर्षिप्रोक्तेषु, [1]कथाख्यायिकाख्यानप्रवह्लिकासु कथा-प्रबन्धस्य अभिधेयस्य कल्पना स्वयं रचना, आख्यायिका-उपलब्धार्था स्वयम् अनुभूतार्थप्रतिपादनम् । आख्यानं सदृष्टान्तं कथाकथनम् । प्रवह्लिकासु अभिप्रायसूचनकथासु यथा संदेह: स्यात् तादृशगुप्ताभिधानासु, तासु तासु कलासु च परमसंवीणतालताधरित्रीम् उत्तमचातुर्यवल्लीभूमिं मन्दोदरीं नाम धात्रीम् उपमातरम् । ज्योतिषेति—ज्योतिषशकुनादिशास्त्रेषु निशिता तीक्ष्णा मतिर्बुद्धि: तस्या: प्रसूति: उत्पत्तिर्यस्मिन् तं विश्वभूतिं च बहुमानेन अत्यादरेण संभावितम् आह्लादितं मनो यस्य तं पुरोधसं पुरोहितं तत्र पुरि नगरे हस्तिनापुरे प्राहिणोत् । [मन्दोदरी विश्वभूतिश्च सुलसां सगरे प्रीतियुक्तां मधुपिङ्गले च विप्रीतिम् अकारयताम् ] कथंभूता मन्दोदरी । विशिकेति—विशिका वशीकरणं तस्या: आशय: अभिप्राय: स एव शार्दूलो व्याघ्र: तस्य दरीव मन्दोदरी तां पुरमुपगम्य । परेति—परेषां जनानां प्रतारणे वञ्चने प्रगल्भा प्रौढा मनीषा मतिर्यस्या:, कृतेति—अर्धवृद्धा कषायवसना विधवा 'कात्यायिनी' त्युच्यते कृत: विहित: कात्या-यिनीवेषो यया सा मन्दोदरी । ताश्च ताश्च कला: तत्तत्कला: तासाम् अवलोकनं वीक्षणं तस्माज्जातं कुतूहलं यस्य स: तम् अयोधनधरापालम् । निजनाथेति—निजो नाथ: स्वामी सगरो नृप: तस्य अर्थसिद्धि: प्रयोजनसफलता तस्यां परवती अधीना रञ्जिलवती सती अयोधनं नृपम् अनुरक्तं विश्वसितं कुर्वाणा शुद्धान्तोपाध्याया भूत्वा शुद्धान्तम् अन्त:पुरं तत्र उपाध्याया अध्यापिका भूत्वा सुलसां सगरं ग्राहयामास । तथा बकोटवृत्तिवेधा: बक-प्रकृतिषु जनेषु वेधा: ब्रह्मा महाकपटपटुरित्यर्थ: । स पुरोधाश्च तैस्तैरादेशै: ज्योतिश्शास्त्रफलै: तस्य नृपस्य सुयोधनस्य महादेव्याश्च अतिथे: वशीकृतचित्तवृत्ति: वशीकृता निजाधीना विहिता मनोवृत्तिर्येन स: । स्वयं विहित-रचनै: आत्मना कृतै: श्लोकै: मधुपिङ्गले विप्रीतिं विरक्ततां कारयति स्म । तेन विहितरचने पद्ये कुण्टे इति—मन्दे आलस्यवति नरे वायुना उन्नतहृदये उन्नतपृष्ठे च पुरुषे षष्टिदोषा: सन्ति । एकाक्षे अशीति: । बधिरे शतम् । वामने च ह्रस्वे नरि शतं विंशं विंशत्यधिकं शतं दोषा: सन्ति तु पिङ्गे पिङ्गले नरे दोषा: असंख्यया तत्र दोषाणां गणनाकरणं न शक्यम् ॥३९२॥ मुखस्येति—मुखस्य अर्धं शरीरं स्यात् मुखस्य शोभा पूर्णा शरीरस्य तु ततोऽल्पा अर्धा । मुखं घ्राणार्धम् उच्यते यदि घ्राणं न स्यात् तर्हि विगतनासिकं मुखं न शोभते । घ्राणं नेत्रार्धं घ्राणे नासायां विद्यमानेऽपि नेत्रयोरभावे घ्राणं न शोभते । अत: शरीरमुखघ्राणेषु नयने परे उत्तमे ज्ञेये ॥३९३॥ इत्यादिवर्णनै: विश्वभूति: सुलसाया मनसि अप्रेम उदपादयत् [तत: सुलसा स्वयंवरमण्डपे सगरराजानं वृणुते स्म] तत: चाम्पेयमञ्जरीसौरभं चम्पकपुष्पमञ्जरीसौगन्ध्यमेव दुग्धं तस्य पाने लुब्धा: लोभिष्ठा: स्तनं-धया इव पुष्पंधया भ्रमरा: तद्वत् । यथा पय:पाने लुब्धा: स्तनंधया भवन्ति तथा तेषु स्वयंवराह्वानशृङ्गारि-ताहंकारेषु स्वयंवराह्वाने समागते शृङ्गारोऽस्ति यस्य शृङ्गारित: अहंकारो यैस्ते शृङ्गारिताहंकारा: सगर्वा: इत्यर्थ: । सगर्वेषु राजसु मिलितेषु मन्दोदरीवशमानसा मन्दोदर्यधीनमना: सा सुलसा श्रुतिमनोहरं श्रुत्या शब्देन मनो हरति इति शब्दचेतोहरं सगरम् अवृणोत् वृणोति स्म । कथम्, यथा निम्नधरोपगा आपगा सागरं निम्नधरा नीचभूमि: ताम् उपगच्छतीति निम्नधरोपगा निम्नभूमिवाहिनी आपगा वाहिनी नदी सागरं गच्छति

---

१. कथादीनाम् इदमपि लक्षणम्—कथा चित्रार्थगा ज्ञेया ख्यातार्थाख्यायिका मता । दृष्टान्तस्योक्ति-राख्यानं प्रवह्लीका प्रहेलिका ॥

तथा सा सगरं वृणुते स्म । भवति चात्र श्लोकः—अल्पैरिति—समर्थः अल्पैरपि सहायैः साहाय्यं वितरद्भिः कार्यकारिभिः पुरुषैः नृपः विजयी भवति । कुन्तस्य शस्त्रविशेषस्य अन्तः अग्रं कार्याय शत्रुविनाशाय भवति । परम् अस्य कुन्तस्य दण्डस्तस्य परिच्छदः सहायो भवति । तथा सगरस्य नृपस्य धात्रीपुरोहितौ द्वावेव तत्कार्याय समर्थौ जाताविति भावोऽत्र विज्ञेयः ॥३९४॥

इत्युपासकाध्ययने सुलसायाः सगरसंगमो नामाष्टाविंशः कल्पः ॥२८॥

## २९. वसो रसातलसादनो नामैकोनत्रिंशः कल्पः

[ पृष्ठ १७९-१८१ ] [ जातवैराग्यः मधुपिङ्गलः गृहीतदीक्षः विहरन् सगरद्वारमागात्, तत्र शिवभूतिर्विश्वभूतिशिष्यः उत्तमलक्षणोपेतं तमवलोक्य दह्यतामेतत्सामुद्रिकशास्त्रमित्युवाच । श्रुत्वा तद्गिरं विश्वभूतिः सकलं पूर्वेतिहासं तस्याकथयत् । सर्वमेतद्व्यतिकरं श्रुत्वा मधुपिङ्गलो मुनिः क्रुद्धो जज्ञे । कालेनोत्पद्य कालासुरनामासुरो जातः । ] प्ररूढनिर्वेदकन्दलः उत्पन्नभववैराग्याङ्कुरः मधुपिङ्गलः, "धिगिदं भोगायतनं शरीरम् । अभोगायतनं सुलसाभोगरहितत्वात् अभोगास्पदम् । यत् यस्मात् एकदेशदोषात् एकदेशः शरीरैकभागः नेत्रे तत्र दोषात् इमाम् उचितसमागमाम् अपि उचितः न्याय्यः समागमः संभोगो यस्यास्ताम् अपि मामतनूद्भवां मामस्य पुत्रीम् अहं नालप्सि न लब्धवान् ।" इति मत्वा विमुक्तेति त्यक्तभवमोहः स्वीकृतदीक्षः, क्रमेण तांस्तान् ग्रामारामनिवेशादीन् ग्रामवनादिरचनाविशेषान् निरनुकः अकामः । जङ्घारिक इव प्रशस्ताभ्यां वेगवतीभ्यां जङ्घाभ्यां इयर्ति गच्छतीति जङ्घारिक इव जाङ्घिकपुरुषवत् लोचनोत्सवतां नयन् नयनानन्दतां नयन् तत्रत्यजनानां नयनयोर्मोदं वितरन्, अशनाया बुद्धया भोजनकामेनेति भावः, अयोध्यामागत्य अनेकेति—अनेकैरुपवासैः अनाहारैः चतुर्विधाहारत्यागैः पराधीनचित्तसामर्थ्यः, तीव्रोदन्यतया तीव्रतृष्णया अतिक्लान्तशरीरः । बाष्पोह इव जलं पातुमिच्छंश्चातक इव क्लमथुव्यपोहाय ग्लानिनाशाय सगरागारद्वारमन्दिरे सगरनृपस्य द्वारगृहे मनाग् ईषत्कालं व्यलम्बत तस्थौ । तत्र च पुरेति-[ पुरा यदा सा सुलसा अतिथिदेव्या गर्भे आसीत् तदा मयेयं मधुपिङ्गलाय देयेति मनःसंकल्पमकरोत्सा । परं तस्याः सुलसायाः परिणयस्य प्रदानस्यापायः विश्वभूतिना अक्रियत । ] पुरा स्वयंवरकाले प्रयुक्ता योजिता परिणयापायस्य प्रदानविनाशस्य नीतिर्येन स विश्वभूतिः प्रगल्भमतये प्रगल्भा प्रौढा मतिर्बुद्धिर्यस्य तस्मै शिवभूतये रुचिष्याय प्रियाय शिष्याय, रहितेति-रहिता रहस्यस्य गोपनीयस्य मुद्रा प्रतीतिर्यत्र, तत्सामुद्रकं समुद्रेणर्षिणा प्रोक्तं देहचिह्नवृन्दम् अशेषविदुषविचक्षणः सकलबुधनिपुणः व्याचक्षाणो विवृण्वानः बभूव । परेति—परामर्शः पूर्वापरालोचनज्ञानं तस्य वशः असंशीतिः संशयरहितः स शिवभूतिः तं व्यक्तलक्षणपेशलं व्यक्ताणि सकलानि च तानि लक्षणानि शुभदेहचिह्नानि पद्मवज्रादीनि तैः पेशलः सुन्दरः तं मधुपिङ्गलम् अवलोक्य 'उपाध्याय, घनेति—घनं विपुलं तच्च घृतं तस्य आहुतिभिर्वृद्धिर्यस्यास्तीति वृद्धिमत् तच्च तद्धाम च तेजः तेन शालते इति धामशालिनि, ज्वालामालिनि ज्वालानां शिखानां माला यस्य तस्मिन् अग्नौ, दह्यताम् एतस्य ऐतिह्यस्य पारम्पर्योपदेशस्य स्वाध्यायः अध्ययनं पठनम्,' यत् यस्मात् एवमिति—एवंविधशरीरोऽपि अयं मुनिः ईदृगवस्थायाः एतादृग्दशायाः कीर्तिर्वर्णनं यस्य । अतः एतल्लक्षणशास्त्रं विफलम् इति शिवभूतेर्भाषणं श्रुत्वा विश्वभूतिर्वक्ष्यमाणं उवाच 'कथंभूतो विश्वभूतिः । सदेति—सदाचारस्य निगृहीतिर्विनाशो यस्मात् स विश्वभूतिः ( वदति ) अपर्याप्तेति—न परि सर्वतः आप्ता पूर्वापरसंगतिर्ज्ञानं येन तत्संबोधनम् हे शिवभूते, मा गाः खेदम्, यदेष नृपवरस्य सगरस्य निदेशादेशात् निदेशात् कृतात् आदेशात् आज्ञायाः, अस्मदुपदेशात् च अनन्येति—अन्यत्र उपलभ्यमानं सामान्यं लावण्यम् अन्यसामान्यलावण्यं न उपलभ्यमानं सामान्यं लावण्यम् अनन्यसामान्यलावण्यम्, तस्य निवासो यस्यां सा तां सुलसाम् अलभमानः तपस्वी दीनः तपस्वी अभूत् मुनिरजायत । एतच्च आसन्ना समीपा अरिष्टानां मरणलक्षणानां ततिः पङ्क्तिर्यस्य तस्य विश्वभूतेः वचनम् एकायनमनाः एकस्मिन्मुख्ये अयनं गमनं मनसो यस्य स एकायनमनाः एकाग्रसावधानो वा ।

मधुपिङ्गलो यतिः निशम्य श्रुत्वा प्रवृद्धक्रोधानलः समिद्धरोषाग्निः कालेन कतिपयैर्दिवसैः विपद्य मृत्वा उत्पद्य जनित्वा चासुरेषु कालासुरनामा भवप्रत्ययमाहात्म्यात् भवः जन्म प्रत्ययः कारणं तस्य माहात्म्यात् प्रभावात् उपजातावधिः उत्पन्नावधिज्ञानस्य संनिधिः समीपता यस्य, स कालासुरः तपस्याप्रपञ्चं तपोविस्तारम्, अन्वयोदञ्चं च असुरकुले उदञ्चम् उत्पत्तिं च आत्मनो निजस्य विनिश्चित्य, यत् इदानीमेव अधुनैव महा-पराधनगरं महापराधानां नगरमाश्रयं सगरं नृपम् अकारणं हेतुं विना प्रकाशिता प्रकटिता दोषजातिः येन तं विश्वभूतिं च चूर्णपेषं पिनष्मि गोधूमचूर्णवद्दलनं करोमि। तदानयोः सगरविश्वभूत्योः सुकृतभूयिष्ठत्वात् पुण्यवैपुल्यात् प्रेत्यापि परलोकेऽपि सुरश्रेष्ठत्वावाप्तिः देवज्येष्ठत्वलाभः न साध्वपराधः स्यात्। ततो यथा इह अनयोर्बहुविडम्बनावरोधो बधः बह्व्यः विपुलाः विडम्बनाः क्लेशाः तासाम् अवरोधः संबन्धः यथा भवेत्, परत्र च परलोके नरकादौ दुःखपरम्परानुरोधः दुःखसमूहसंबन्धो यथा भवति तथा विधेयं कार्यम्। न च एकस्य बृहस्पतेः सुरगुरोरपि अतिचतुरस्यापि कार्यसिद्धिरस्ति। इति अभिप्रायेण आत्मेति—निजविक्रिया-सामर्थ्यप्रकटीकरणे साहाय्यं प्रयच्छन्तम् अतिथिमिव, वैरनिर्यातनं शत्रुप्रतिकारः तस्य मनोरथः संकल्पः स एव रथः तस्य सारथिं रथचालकमिव कंचन नरम् अन्वेषणमतिः अनुसंधानबुद्धिः आसीत्।

[ पृष्ठ १८१-१८३ ] [ यस्य साहाय्यमासाद्य कालासुरः सगरं विश्वभूतिं च मृतिं निन्ये तस्य पर्वतस्य पूर्वचरितं वर्ण्यते ] अथ मधुपिङ्गलस्य कालासुरावस्थाप्राप्तिवर्णनानन्तरं पर्वतस्य कालासुरसाहायकस्य कथा कथ्यते—कामेति—कामस्य कोदण्डो धनुः तस्य कारणानि च तानि कान्ताराणि वनानि तैरिव इक्षुवणानाम् अवतारैः उत्पत्तिभिः विराजितमण्डलायाम् अलंकृतो मण्डलो आसमन्ताद्वृत्तभूप्रदेशो यस्याः तस्यां इहालायां तन्नामके देशे स्वस्तिमती नाम पुरी अस्ति। तस्याम् अभिचन्द्रापरनाम वसुविश्वावसुर्नाम नृपतिः अस्ति। तस्य सकलगुणरत्नप्रसूतिः वसुमतीनाम अग्रमहिषी प्रधानराज्ञी। अनयोः सूनुः पुत्रः समस्तेति—सकलशत्रु-तरुदहने विभावसुः अग्निरिव वसुर्नाम। पुरोहितश्च निश्चितेति—ज्ञातसकलागमरहस्यसमूहः क्षीरकदम्बो नाम। कुटुम्बिनी—अस्य कुटुम्बविशिष्टा भार्या सती पतिव्रता व्रतानाम् अहिंसादीनाम् उपास्तौ भक्तिपालने तत्परा स्वस्तिमती नाम। जन्युः पुत्रः पुनरनयोः क्षीरकदम्बस्वस्तिमत्योः [अनेकनमसितानि पूजनानि तेषां पर्वतः समूहः तेन प्राप्तो लब्धः पर्वतो नाम। स किल सदाचरणभूरिः सदाचरणेषु अहिंसादिषु इज्यादिषट्कर्मसु भूरिः ब्रह्मेव क्षीरकदम्बसूरिः एकदा सुवर्णगिरिर्नाम तन्नामा पर्वतः तस्य गुहायाः अङ्गणशिलायाम्, यस्यां शिष्यमताविव स्वाध्यायसंपादनवत् विशालायां विस्तृतायां तस्मै मुदा आनन्देन गतस्मयाय विनष्टगर्वाय यथा-विधि विधिमनतिक्रम्य समाधिगासवे सम्यक् आधिम् एकाग्रतां गच्छन्ति असवः प्राणाः यस्य तस्मै वसवे, प्रगलितेति—प्रगलितः विनष्टः पितुः पाण्डित्यस्य गर्व एव पर्वतो यस्मात् तस्मै पर्वताय, गिरिकूटपत्तनं वसतिर्निवासस्थानं यस्य तस्य विश्वनाम्नः विश्वंभरापतेः विश्वंभरा पृथ्वी तस्याः पत्युः स्वामिनः पुरोहितस्य कथंभूतस्य। विहितेति—अनवद्या निर्दोषा सा चासौ विद्या च अनवद्यविद्या तयोपेत आचार्यः अनवद्यविद्या-चार्यः विहिता कृता अनवद्यविद्याचार्यस्य चरणसेवा येन तथाभूतस्य विश्वदेवस्य नन्दनाय पुत्राय नारदाभि-धानाय च निखिलभुवनेति—सकलजगद्व्यवहारस्य तन्त्रं कारणम्, आगमसूत्रम्, अतिमधुरस्वरनिमित्तेन उपदिशन् ( क्षीरकदम्बसूरिः ) अम्बरादाकाशात् अवतरद्भ्यां भूमितलम् आगच्छद्भ्याम्, सूर्याचन्द्राभ्यामिव अमितगत्यनन्तगतिभ्यां ऋषिभ्याम् ईक्षांचक्रे अवलोकयामासे। [ अमितगतिभगवतोक्तं चतुर्षु एषु द्वाभ्यामूर्ध्व-गतिर्लभ्येति' श्रुत्वा पर्वतनारदौ परीक्षितौ क्षीरकदम्बेन। पर्वतस्याधोगमनं नारदस्य चोर्ध्वगमनं निश्चित्य क्षीरकदम्बो मुनिर्जज्ञे। आयुरन्ते सल्लेखनां विधाय देवो बभूव ] तत्र समासन्नसुगतिः समासन्ना निकटीभूता सुगतिर्यस्य स भगवाननन्तगतिः किलैवम् अभाषत—भगवन्, अत एव खलु विदुष्याः शिष्याः वेत्तुम् अध्येतुं योग्या विदुष्याः शिष्याः, यदेवम् अनवद्यं निर्दोषं ब्रह्मोद्यविद्यं ब्रह्मणा अर्हता जिनदेवेन उद्या प्रतिपादिता विद्या जीवादिसप्ततत्त्वज्ञानं यत्र तदेतच्छास्त्रं ग्रन्थः। शब्दपदवाक्यानि अर्थः तदभिप्रायः। तयोः प्रयोगः सनिदर्शनं प्रतिपादनम्। तस्य भङ्ग्यः प्रकाराः। तेषु यथार्थप्रतिपादनेन विधूतोपाध्यायात् उपाध्यायात् विधूतः उपा-ध्यायो बृहस्पतिः येन तस्मादुपाध्यायात् गुरोः, एकसर्गधियः एकनिश्चयमतयः, अधीयते पठन्ति। प्रयुक्तेति—प्रयुक्ता उपयोगदशाम् आनीता अवधिज्ञानदियतिर्येन स अमितगतिर्भगवान्—"मुनिवृषन् यतिश्रेष्ठ, सत्यमेवैतत्।

किंतु एतेषु चतुर्षु मध्ये द्वाभ्याम् असितगौरवर्णोपेतपदार्थवत् कृष्णभारयुक्तवस्तुवत्, अधःप्रबोधोचितमतिभ्याम् अधोगतिप्रापणयोग्यकुज्ञानयुतबुद्धिभ्याम् इदम् अतिपवित्रमपि सूत्रम् आगमः विपर्यासितव्यम् विपरीताभिधेयं कर्तव्यम् ।" एतच्च प्रवचनम् आगमः तदेव लोचनं नेत्रं तेन आलोकितः वीक्षितः ज्ञातः ब्रह्मस्तम्बो जगत्स्तम्बः चराचरद्रव्याणां सर्वगुणपर्याया येन सः क्षीरकदम्बः, संश्रुत्य आकर्ण्य "नूनमस्मिन् महामुनिवाक्ये-ऽर्थात् सप्तहविरग्निः तस्य मरीचयो ज्वालाः ताः यथा ऊर्ध्वं गच्छन्ति तथा चतुर्षु नरेषु द्वाभ्याम् ऊर्ध्वगाभ्यां सुरलोकं गच्छद्भ्यां भवितव्यमिति प्रतीयते ज्ञायते । तत्राहं तावत् एकदेशयतिपूतात्मानम् एकदेशयतिः उपासकः स चासौ पूतात्मा पवित्रात्मा तम् अधरधामसंनिधानम् अधरं च तद्धाम च स्थानं तत्र संनिधानं सामीप्यं न संवयेयम् अधोगतिस्थानं नरकं तत्र अहम् आत्मानं न प्रध्नीयाम् । अर्थात् अहं श्रावकधर्मधारकत्वादधोगतिं न यास्यामीति भावः । [ अहं वसुं च नोर्ध्वं यियासुं संवयेयम् ] यतः नरकान्तं राज्यम् । नरकः नरकप्राप्तिः अन्तः अवसानं फलं यस्य एतादृशं राज्यम् । बन्धनान्तो नियोगः नियोगः पापकार्ये प्रेरणा स बन्धनान्तो बन्धनं पापबन्धः अन्तोऽवसानं फलं यस्य एवंविधो भवति पापकार्ये प्रेरणया पापं बध्यते इत्यर्थः । मरणान्तः स्त्रीषु विश्वासः नारीषु विश्वासेन बहवो निधनं याताः, विपदन्ता खलेषु मैत्री दुष्टेषु सख्यम् आचरितं विपत्फलं जनयति । इति वचनात् इति वृद्धोक्तेः, इन्दिरेति—इन्दिरा लक्ष्मीः तस्या मदो गर्वः । मदिरामदः सुरापानाज्जातं विवेकविकलत्वम्, एताभ्यां द्वाभ्यां मलिनप्रचारे मलिनं पापं तस्मिन् प्रचारः प्रवृत्तिः यस्माद्भवति तथाभूते राज्यभरे प्रसरदसुं प्रकर्षेण सरन्त; असवः प्राणा यस्य तथाभूतं वसुं च नोर्ध्वं यियासुम् ऊर्ध्वं सुरलोकं यियासुं जिगमिषुं न संवयेयम् न जानामि । तन्नारदपर्वतौ परीक्षाधिकृतौ परीक्षायाम् अधिकृतौ नियुक्तौ तौ मया परीक्ष्यौ इति निश्चित्य समिधमयं पिष्टनिर्वृत्तम् ऊर्णायुद्वयं छागयुगलं निर्माय विरच्य प्रदाय च ताभ्याम् "अहो द्वाभ्यामपि भवद्भ्याम् इदं उरणयुगलं छागद्वन्द्वं यत्र न कोऽप्यवलोकते न पश्यति तत्र विनाश्य हत्वा प्राशितव्यं भक्षितव्यम्" इत्यादिदेश । तावपि तदादेशेन तदाज्ञया हव्यवाहनवाहनद्वितयं हव्यं समिदादिद्रव्यं वहतीति हव्यवाहनः अग्निः तस्य वाहनौ छागौ तयोर्द्वितयं युगलं प्रत्येकम् आदाय गृहीत्वा यथायथम् आत्मशक्त्यनतिक्रमेण अयासिष्टाम् अगच्छताम् । तत्र सत्सख्यातिखर्वः पर्वतः सद्भिः सज्जनैः सख्यं मैत्र्यं सत्सख्यं तस्मिन् अतिखर्वः अतिवामनः सज्जनमित्रतादूर इति भावः । पर्वतः पस्त्यपाश्चात्यकुम्बाम् उपसद्य पस्त्यस्य गृहस्य पाश्चात्यां परभागे वर्तमानां कुम्बां तटभित्तिम् उपसद्य आश्रित्य अह्रस्वः उन्नतः पर्वतः तम् उरभ्रं छागं भटित्रं संपाद्य अग्निपक्वं विधाय तस्य उत्रं मांसम् उदरानलपात्रम् उदराग्निभाजनम् अकार्षीत् अकरोत् । शुभाशयविशारदो नारदस्तु पुण्यविचारचतुरः नारदः 'यत्र न कोऽप्यालोकते' इति उपाध्यायोक्तं गुरुवचनं ध्यायन् मनसा विमृशन्, 'को नामात्र पुरे, कान्तारे, वा सद्रुघणद्रुभिः वृक्षैः सहितः सद्रुः स चासौ घनः सान्द्रः सद्रुघणः वृक्षनिबिडः प्रदेशः (?) अत्र पुरे नगरे कान्तारे वने वा को नाम सद्रुघणः न आत्मेक्षणस्य आत्मनयनस्य आत्मानयनभूतो यस्य सः तस्य अवधिमनःपर्ययकेवलज्ञानिनः, व्यन्तरगणेति—व्यन्तरामरसमूहस्य, महामुनिजनानाम् अन्तःकरणस्य कः पदार्थः अधिकरणं विषयो न भवेत् । इति विचिन्त्य तथैव तं वृष्णि छागम् उपाध्यायाय समर्पयामास ददौ । उपाध्यायः नारदमपि ऊर्ध्वगं सुरलोकगतियोग्यम् अवबुध्य । संसारतरुस्तम्बमिव कचनिकरम्बं केशसमूहम् उत्पाटय लोचं विधाय । स्वर्गलक्ष्मीसपक्षां सुररमासखीं दीक्षाम् आदाय गृहीत्वा । निखिलागमसमीक्षां सकलजिनसिद्धान्तानां सम्यक् ईक्षणं यस्याः भवति तां शिक्षां पठनम् अनुश्रित्य चातुर्वर्ण्यश्रमणसंघसंतोषणं गणपोषणम् आत्मसात्कृत्य । मुनि-ऋषि-यति-अनगारभेदः चातुर्वर्ण्यसाधुसमूहः तस्य मनःप्रसादसंपादनं गणपोषणं निजाधीनं कृत्वा, आचार्यपदं धृत्वेत्यर्थः । एकत्वादिभावनापुरस्कारम् आत्मसंस्कारं विधाय, तपोभावनैकत्वभावनाश्रुतभावनासत्वभावनाधृतिभावनानाम् अभ्यासं विधाय कायकषायकर्शनां सल्लेखनाम् अनुष्ठाय कायः शरीरं कषायाश्च क्रोधादयः तेषां यथाक्रमं कर्शनम् अल्पीकरणं विधाय निःशेषेति—सकलमूलगुणादिदोषाणाम् आलोचनां कृत्वा अङ्गविसर्गसमर्थम् देहत्यागक्षमम् उत्तमार्थं यावज्जीवं चतुर्विधाहारत्यागं प्रतिपद्य अङ्गीकृत्य सुरसुखकृतार्थो बभूव देवसुखं लब्ध्वा कृतप्रयोजनो जज्ञे [ एकदा पर्वतनारदयोरजैर्यष्टव्यमिति प्रवचनवाक्यमधिकृत्य वादोऽजनि, तत्र वसुरध्यक्षो जातः ] पूर्वमेव तदादेशात् क्षीरकदम्बगुरोः आज्ञामनुसृत्य, आत्म-

देशोपदेशः आत्मनः स्वस्य देशं गत्वा कृतोपदेशः सकलसिद्धान्तकोविदः नारदः सद्गुणभूरेः सद्गुणप्राप्तेः भूरिः ब्रह्मा देवतुल्यः तस्य क्षीरकदम्बसूरेः प्रव्रज्याचरणं स्वर्गारोहणं चावगत्य 'गुरुवद्गुरुपुत्रं च पश्येत्' इति कृतसूक्तस्मरणपर्याप्तितदाराधनोपकरणः इति सूक्तेः स्मरणात् गृहीतगुर्वाराधनसाहित्यः तद्विरहदुःखदुर्मनसं निजपतिवियोगदुःखव्याकुलचित्ताम् उपाध्यायभार्याम् जननीं निजमातृतुल्यां सहपांसुक्रीडितं सहधूलिक्रीडितं निजमित्रं पर्वतं च द्रष्टुम् आगतः। अपरेद्युः अन्यस्मिन्दिने तं पर्वतम् 'अजैर्यष्टव्यम्' इति वाक्यम् अजैः अजात्मजैः छागैः यष्टव्यम्, हव्यकव्यार्थो विधिर्विधातव्यः। देवेभ्यो दीयमानम् अन्नं हव्यम्। पितृभ्यो दीयमानमन्नं कव्यम् अग्निमुखेन देवेभ्योऽन्नं दीयते, विप्रमुखेन पितृभ्योऽन्नमिति। इति श्रद्धामात्रावभासिभ्योऽन्तेवासिभ्यो व्याहरन्तमुपश्रुत्य केवलं श्रद्धामात्रेण अवभासो येषां ते श्रद्धामात्रावभासिनः तेभ्यः गुरुकथितं श्रद्धया श्रोतव्यम् इति मत्या तदभिप्रायं शृण्वद्भ्यः विद्यार्थिभ्यः व्याहरन्तं प्रतिपादयन्तम् उपश्रुत्य श्रुत्वा बृहस्पतिप्रज्ञः सुरगुरुतुल्यमतिः ( नारदः ) "पर्वत, मैवं व्याख्यः एवं विवरणं मा कुरु। किं तु 'न जायन्ते इत्यजाः वर्षत्रयवृत्तयो व्रीहयस्तैर्यष्टव्यम् व्रीहयो धान्यमात्रं त्रैवार्षिकैर्धान्यैर्यष्टव्यं शान्तिकपौष्टिकार्था क्रिया कार्या इति परार्येव आचार्यादिदं वाक्यम् एवम् अश्रौष्व परारि एव गततृतीयवर्षे एव आचार्यमुखादिदं वचनम् अशृण्व।' पवत्सजूस्तथैवाचिन्तयाव गतवत्सरे सहमिलित्वा आचार्यवचनाभिप्रायानुसारेण चिन्तनं चावां अकुर्वहि। तत्कथमैषम एव तव मतिः द्वापरवसतिः समजनि इति बहुविस्मयं मे मनः। तत्कथं केन कारणेन ऐषम एव अस्मिन्नेव वत्सरे तव मतिः द्वापरवसतिः संशयस्थानम् अजायत इति मम चित्तम् अतीवाश्चर्ययुक्तम्" आचार्यकनिकेत पर्वत, यद्येवमद्यश्वीनेऽप्यथा(र्था)भिधाने भवान् अपरवानपि विपर्यस्यति तदा पराधीने मादृग्विधीने मादृशां विधिस्तस्य इने ईश्वरे को नाम संप्रत्ययः। आचार्यकगृह आचार्यसदृशेति भावः चेदेवम् अद्य श्वो वा भवम् अद्यश्वीनं तस्मिन् अद्यश्वीने सद्य एव प्रतिपादिते अर्थाभिधाने शब्दानां वाच्यार्थप्रतिपादने भवान् अपरवान् अपि स्वाधीनोऽपि विपर्यस्यति, यथागमं न कथयसीत्यर्थः, तदा पराधीने मादृशे को नाम जनस्य संप्रत्ययः संवादः सम्यक् प्रतीतिः स्यात्।

[ पृष्ठ १८४ ] पर्वतः—नारद, नेदमस्तुंकारम् इदं वचनं न स्वीकारार्हम् इति मे कथनम्। यदस्य शब्दस्य मन्निरुक्तः मया निरुक्त्या कृत एव अर्थः अतिसूक्तः अतिप्रशस्ततया उक्तः इति अर्थात् मया योऽर्थः निरुक्त्या प्रोक्तः स भवता ग्राह्यः इति न ममाग्रहः। परं यदि चायमन्यथा स्यात्तदा चेत् अयं मन्निरुक्तोऽर्थः अन्यथा स्यात् विपरीततां गच्छेत् तदा रसवाहिनीखण्डनमेव दण्डः रसान् अम्लमधुरतुवरादिकान् वहति जानातीति रसवाहिनी जिह्वा तस्याः खण्डनं कर्तनमेव दण्डः दमनम्। नारदः—पर्वत, को नु खल्वत्र विवदमानयोनिकषभूमिः। को विद्वान् विवदमानयोः विवादं कुर्वाणयोः खलु अत्र अजशब्दार्थविवादे निकषभूमिः यथार्थनिर्णयदानाधारः, यथा निकषपट्टे सुवर्णस्य परीक्षा भवति तथा सभाध्यक्षे निरपेक्षे सति सत्तत्त्वनिर्णयो भवति। पर्वतः—नारद, वसुः सभाध्यक्षः। ततो निर्णयो भवेत्। कर्हि तर्हि तं समयानुसर्तव्यम्। कदा तर्हि तं समया तस्य समीपम् अनुयातव्यम्। इदानीम् एव नात्रोद्धारः अधुनैव न विलम्बः। इत्यभिधाय तौ द्वावपि वसुं निकषा वसोः समीपं प्रास्थिषाताम् अयाताम्। ऐक्षिषातां च अपश्यतां च। तथोपस्थितौ तेन गुरुनिर्विशेषमाचरितसंमानौ तथागतौ तेन वसुना गुरुसमानं कृतसत्कारौ, यथावत् कृतकशिपुविधानौ दत्तान्नवस्त्रविधानौ, विहिताचितोचितकाञ्चनदानौ विहितं दत्तम् आचितः भारः विंशतिशतानि उचितं योग्यतामनुसृत्य काञ्चनस्य सुवर्णस्य दानं ययोस्तौ समागमनकारणम् आपृष्टौ अनुयुक्तौ, स्वाभिप्रायं निजागमनस्य हेतुं वादनिर्णयम् अभाषिषाताम् अकथयताम्। वसुः—यथाहतुस्तत्रभवन्तौ पूज्यौ यथा ब्रूतः तथा प्रातः एव प्रभातकाले एव अनुतिष्ठेय कुर्यामहम्। [ पर्वतमाता स्वस्तिमती वसुं प्रति गत्वा पर्वतानुकूलं न्यायदानं कुर्वित्युवाच तथास्त्विति प्रतिपन्नं तेन ] अत्रान्तरे वसुलक्ष्मीक्षयक्षपेव क्षपायां किल उपाध्याया अस्मिन् प्रसंगे वसुनृपस्य राजलक्ष्मीविनाशरात्रिरिव रात्रौ किल उपाध्याया, नारदपक्षानुमतं क्षीरकदम्बाचार्यकृतं तद्वाक्यव्याख्यानं स्मरन्ती स्वस्तिमती पर्वतपरिभवापायबुद्ध्या वसुमनुसृत्य नारदपक्षाभिप्रायानुकूलं क्षीरकदम्बसूरिविहितम् 'अजैर्यष्टव्यम्' इति वाक्यविवरणं चिन्तयन्ती

---

१. आचार्यस्य कर्तव्यं विद्यार्थिपाठनं तदाचार्यकमुच्यते। तस्य निकेतं गृहम्।

स्वस्तिमती पर्वतपरिभवापायबुद्ध्या वसुमनुसृत्य पर्वतेन नारदस्य परिभवः पराभवः आपायः कारितव्य इति मत्वा वसुमनुगम्य वत्स वसो यः पूर्वमुपाध्यायादन्तर्धानापराधलक्षणावसरो वरस्त्वयादायि स मे संप्रति समर्पयितव्यः इत्युवाच । वत्स वसो बालक वसो, यः पुरा गुरोः अन्तर्हितागोलक्षणप्रसंगे वरस्त्वया दत्तः स मे अधुना देयः इत्यब्रवीत् । सत्यप्रतिपालनासुर्वसुः—सत्यस्य संरक्षणाय असवः प्राणा यस्य स वसुः किमम्ब, किं मातः संदेहस्तत्र । यद्येवं यथा सहाध्यायी पर्वतो वदति, यदि संदेहो नास्ति तर्हि यथा सहपाठयः पर्वतो ब्रवीति तथा त्वया साक्षिणा भवितव्यम् । वसुस्तथा स्वयमाचार्यान्या अभिहितः । 'यदि साक्षी भवामि तदावश्यं निरये पतामि, अथ न भवामि तदा सत्यात् प्रचलामि' इति उभयाशयशार्दूलविद्रुतमनोमृगः चिरं विचिन्त्य उभयाभिप्रायव्याघ्रानुयातचित्तहरिणः दीर्घं विमृश्य—

[ पृष्ठ १८५-१८६ ] न व्रतमिति—अस्थिग्रहणं कपालग्रहणं चर्मधारणं व्रतं न, शाकेति—शाकं पत्रादि, पयो जलम्, मूलं कन्दादि, भैक्षचर्या भिक्षाणां समूहो भैक्षं तेन चर्या जीवननिर्वाहः इति व्रतं न भवति । किं तु अङ्गीकृतवस्तुनिर्वहणम्, स्वीकृतकार्यस्य अन्ते गमनम् एतद् उन्नतधियाम् उन्नता उदारा धीर्मतिर्येषां ते उन्नतधियः तेषां महामतीनां व्रतं भवति ॥३९५॥ इति च विमृश्य विचिन्त्य निरयनिदानदक्षं नरककारणचतुरं चरमपक्षम् अन्त्यपक्षम् एव पक्षम् आक्षेप्सीत् अगृह्णात् । [ पर्वतपक्ष एव सत्य इति वदन् वसुः ससिंहासनः पातालतलं गतः मृत्वा निरयं जगाम ] तदनु मुमुदिषमाणारविन्देति—आह्लादं जिगमिषन्ति च तानि अरविन्दानि कमलानि तेषां हृदयं मध्यप्रदेशः कर्णिका तत्र विनिद्राः निद्रारहिता उत्साहवन्तः ये इन्दिन्दिरा भ्रमराः तेषां चरणानां पादानां प्रचारात् उदञ्चन् ऊर्ध्वं गच्छन् उत्पतन् स चासौ मकरन्दः स एव सिन्दूरं नागसंभवं तेन युक्तं यत् नीरदेवतानां सीमन्तस्य अन्तरालं यत्र तस्मिन् प्रभातकाले, [ अधुना सदसो वर्णनम् ] सेवेति—सेवार्थं समागता ये समस्ताः सकलाः सामन्ता राजानः तेषाम् उपास्तिः उपासना नमस्कारादिकरणं तस्मिन् समये पर्यस्तानि स्खलितानि तानि च उत्तंसकुसुमानि भूषणभूतपुष्पाणि तान्येव उपहारः उपायनं तेन महोयः तस्मिन् सदसि सभायाम् । मृगयेति—मृगया आखेटकं पापर्द्धिः तस्य व्यसनं तस्य व्याजेन निमित्तेन शरव्यीकृते शरेण वेध्ये कृते सति कुरङ्गपोते हरिणशिशौ, अपराद्धेति—अपराद्धेपुः लक्ष्यात् च्युतसायकः वसुः प्रत्यावृत्य प्रतिनिवृत्य आसादितः लब्धः स्पर्शमात्रावशेषेण यः आकाशस्फटिकः तेन घटितं रचितं विलसनं शोभा यस्य तथाभूतं सिंहासनम् उपगत्य "सत्यशौचादिमाहात्म्यात् सत्यस्य निर्लोभस्य आदिशब्देन अहिंसादेर्माहात्म्यात् प्रभावात् अहं विहायसि आकाशे गतः स्थितः जगद्व्यवहारं लोकप्रवृत्तिं निहालयामि निश्चयेन पश्यामि" इति आत्मानम् उत्कुर्वाणः गर्वोन्नतं विदधानः विवादसमये तेन विनतवरदेन नारदेन विनतेभ्यो नम्रशिष्येभ्यः वरदेन वाञ्छितफलं ददता नारदेन "अहो मृषोद्योद्भिदविभावसो वसो, मृषा असत्यम् उद्यं प्रतिपाद्यं तदेव उद्भिदं भूमिम् उद्भिनत्ति इति उद्भिदं वृक्षवल्ल्यादिकं तस्य विभावसुः अग्निः तत्संबोधनं हे वसो, अद्यापि न किंचिन्नङ्क्ष्यति न किमपि हीनं भवेत् न कापि हानिर्भवेत् 'तत्सत्यं ब्रूहि' इत्यनेकशः कृतोपदेशः । काश्यपीतलं यियासुर्वसुः—काश्यप्याः पृथिव्याः तलं अधोभागं यियासुः जिगमिषुः वसुः (अब्रवीत्) 'नारद, यथैवाह पर्वतस्तथैव सत्यम् ।' इत्यसमीक्ष्यम् अविचार्य साक्ष्यं साक्षिकर्म वदन्, देव अद्यापि यथायथं यथासत्यं विद्यते तथा वद ब्रूहि, इत्यालापवदुले इति आलापेन संभाषणेन वदुले वक्तरि, समन्यु मन्युना शोकेन सहितं समन्यु तन्मानसं यासां ताः समन्युमानसाः ताश्च ता विलासिन्यः राजस्त्रियः तासां स्खलितोक्तयः सगद्गदानि वचनानि ताभिर्लोहले अव्यक्तवाग्युक्ते, विषादेति—विषादेन खेदेन आसादि व्यथितं हृदयं यासां ताः प्रजाः तासां प्रजल्पः उच्चैर्भाषणं तदेव काहलावाद्यविशेषो यत्र, स्फुटदिति—स्फुटत् भज्यमानं च तद् ब्रह्माण्डखण्डं तस्य ध्वनिः भूकम्पजातरवः तस्य कुतूहलं यत्र तथाभूते, समुच्छलति उत्थिते सति, परिच्छदकोलाहले परिवारजनकलकले जाते सति । ( वसुः पातालमूलं जगाहे ) असत्येति—असत्यश्चासौ धर्मः असत्यधर्मः यज्ञे प्राणिवधः तस्य कर्मप्रवर्तनं क्रियाप्रवृत्तिः तेन कुपिताः क्रुद्धाश्च ताः पुरदेवताः नगरदेव्यः तासां वशेन दुर्विलसनं दुःखं यस्य स ससिंहासनः सिंहासनेन सहितः, क्षणमात्रमपि अनासादितः अलब्धः सुखकालो यत्र तथाभूतं पातालमूलं जगाहे प्रविवेश । अत एव अद्यापि प्रथमं आहुतिवेलायाम् अग्नौ आहुतिनिक्षेपणसमये प्रथमं प्रजा जल्पन्ति वदन्ति, 'उत्तिष्ठ वसो स्वर्गं गच्छ' इति । भवति चात्र श्लोकः—

अस्थाने इति—अस्थाने अकृत्ये बद्धकक्षाणां कृतप्रयत्नानां नराणां द्वयं सुलभम्। किं तत्। परत्र पर-लोके दीर्घा दुर्गतिः दुःखदा तिर्यङ्नरकगतिः, अत्र च शाश्वती सदातनी दुष्कीर्तिः ॥३९६॥

इत्युपासकाध्ययने वसो रसातलासादनो नामैकोनत्रिंशः कल्पः ॥२९॥

## ३०. असत्यफलसूचनो नाम त्रिंशत्तमः कल्पः

[ पृष्ठ १८६–१८९ ] [ वसोः पातालतलगमनान्निर्वेदं प्राप्तो नारदो मुनिदीक्षां गृहीत्वा शुक्लध्यानेन केवलमुत्पाद्य सिद्धोऽभवत् ] नारदस्तमेव निर्वेदम् असत्यपापफलं वीक्ष्य संसाराद्वैराग्यम् उररीकृत्य स्वीकृत्य। कुन्तलकलापं कचवृन्दम् उन्मूल्य उत्पाटच, कथंभूतं कचकलापम्। नतभ्रू इति—नते वक्रे भ्रुवौ यासां ताः नतभ्रुवः ललनाः तासां विभ्रमाः शृंगारभावजक्रियाविशेषाः त एव भ्रमराः षट्पादाः तेषां कुलं समूहः तस्य निलया गृहाणि इव तानि नीलोत्पलानि नीलकमलानि तेषां स्तूपमिव राशिमिव। जातरूपं निर्ग्रन्थतां नग्नताम् आस्थाय प्रतिज्ञाय, कथंभूतं तत्। परमनिष्किंचनतारूपं परमा लोकोत्तरा निष्किंचनता नास्ति किंचन धनधान्यादि परिग्रहोऽस्येति निष्किंचनः तस्य भावो निष्किंचनता सैव निरूपं निश्चयेन स्वरूपं लक्षणं यस्य तत्। संयमोपकरणं मयूरपिञ्छिका प्राणिदयाकरम् आकलय्य गृहीत्वा। कथंभूतं तत्। सकलेति—समस्तजीवानाम् अभयदानसुधावृष्टेः अधिकरणम् आश्रयभूतं भाजनम्। उदकपरिचारिकां कमण्डलूम् आदृत्य स्वीकृत्य कथंभूतां ताम्। मुक्ति इति—मुक्तिलक्ष्म्याः समागमः संबन्धः तस्य संचारिकामिव दूतीमिव। स्वाध्यायं स्वस्मै आत्मने संवरनिर्जराहेतुत्वात् हितः उपकारकः अध्यायः अध्ययनम् स्वाध्यायस्तम्। कथंभूतम्। शिवेति—शिवश्रीः मुक्तिलक्ष्मीः तस्याः वशीकरणस्य आयत्तीकरणस्य अध्यायमिव अनुबध्य स्वीकृत्य। इन्द्रियारामम् उपरम्य इन्द्रिया इन्द्रियाणां विषयाः स्पर्शरसादयः त एव आरामः उपवनं तम् उपरम्य विनाश्य। कथंभूतं तम्। मनोमर्कटेति—मन एव मर्कटः वानरः तस्य क्रीडास्तासां प्रकामा अभिलाषा यत्र तम्। ध्यानदहनम् उद्दीप्य शुक्लध्यानाग्निं प्रदीपयित्वा। कथंभूतम्। अन्तरेति—अन्तरात्मा अहं ज्ञानदर्शनलक्षणः, शरीरादयः कर्मसंयोगजास्ते न मम स्वरूपम् इति मत्वा तेषु रागद्वेषाभ्याम् अवशः आत्मा अन्तरात्मा स एव हेमाश्म सुवर्णपाषाणः, तस्य समस्त-मलानां दहनं दाहकं यथा सुवर्णे किट्टकालिकादिकं मलम् अग्निर्दहति तथा शुक्लध्यानाग्निः ज्ञानावरणादिकर्माणि तेषां विकारांश्च रागाज्ञानादिमलान् निरस्यति। श्रीनारदो मुनिः शुक्लध्यानेन संजातकेवलः तत्पदाप्तिपेशलो बभूव तत्पदं परमात्मपदं सिद्धपदं तस्य आप्तिर्लाभस्तेन पेशलो मनोरमो बभूव। [ वसुनृपे मृते सति प्रजाजनेन निर्घाटितः पर्वतः वनगहने प्रविष्टः कालासुरेण दृष्टः पर्वतस्तु तथा सर्वेति—सकलसभासद्भिः समाजेन च उदीरितः उच्चारितः उद्घोषः महान् यः दुरपवादः धिक्कारः स एव रजः पांसुः यस्य सः, तस्मिन् वसौ कथा शेषतेजसि कथैव शेषं तेजः यस्य तथाभूते सति, पुनः कथंभूते वसौ मिथ्येति—मिथ्या असत्यः स चासौ साक्षिपक्षः प्रत्यक्षद्रष्टृपक्षः तस्मिन् विचक्षणं चतुरं वक्षः यस्य तस्मिन्। पुनः कथंभूते दुराचारेति—दुरा-चरणम् असत्यभाषणं तस्य ईक्षणम् अवलोकनं तेन क्षुभितः कुपितः स चासौ सहस्राक्ष इन्द्रः तस्य अनुचराः किंकराः यक्षादयः तैः ईक्षितं जीवितस्य महः तेजो यस्य सः तथाभूते वसौ कथाशेषतेजसि जाते सति। अह्न-स्वह्रीणतया ह्रीणः लज्जितः अह्नस्वः महान् स चासौ ह्रीणः तस्य भावस्तया अतीव लज्जिततयेति भावः, पौरा-पचिकीर्षया च पौरेषु नागरिकेषु अपकारकरणेच्छया च, निरन्तरेति—निरन्तराः निबिडाः उदञ्चन्तः ऊर्ध्वाग्राः रोमाञ्चाः केशाः तेषां निकायः समूहो यस्य स पर्वतः शल्लेति—शल्लस्य श्वाविधः याः शलाकाः छत्रादीनाम् अयःशलाकावत् ताभिः निकीर्णः व्याप्तः कायः देहो यस्य स इव, निजागणेयदुरी-हिताध्मातोदरचर्मपुटः निजानि स्वकीयानि अगणेयानि गणयितुं संख्यातुम् अशक्यानि यानि दुरीहितानि दुष्टसंकल्पाः दुरभिप्रायाः तैः आध्मातौ स्फोतौ विवृद्धौ उदरचर्मणोः पुटौ पार्श्वौ यस्य, स्फुटन्निव स्फोटं गच्छन्निव स पर्वतः कालासुरेण दृष्टः। पुनः कथंभूतः जनैः नगरान्निष्कासितः। कीदृशैर्जनैः निष्कासितः तैः नृपतिविनाशवशामर्षिभिः नृपतेः वसोः विनाशः तस्य वशात् आमर्षः क्रोधो येषां तैः, पुनः कथंभूतैः।

संभूय संहृत्य। उपदिष्टेति—उपदेशप्राप्तलोष्टानां मृत्खण्डानां वर्षणं कुर्वद्भिः, अतुच्छेति—अतुच्छानि महान्ति यानि पिच्छोलानि त्वचः, दलानि च फलशकलानि च तेषाम् आस्फालनानां ताडनानां प्रकर्षं कुर्वाणैः, प्रतिघातेन उच्छलन्ति उत्पतन्ति च तानि शकलानि कषाश्च तेषां प्रहारेषु तर्षः अभिलाषो येषां तैः पुनः कथंभूतैः नगरनिवासहर्षिभिः नगरे पुरे निवासेन हर्षः येषां ते नगरनिवासहर्षिणः तैः, जनैः अगणितापकारं न गणिताः अपकाराः यथा भवेयुः तथा अगणितापकारं स रासभरोहणावतारः रासभो गर्दभः तस्योपरि रोहणं चटनं तेन अवतारः प्रवेशो यस्य। पुनः कथंभूतः पर्वतः, महान् ( यथा नाम तथा गुणः, तथाकृतिर्वा ) कण्ठप्रदेशे गलप्रदेशे प्राप्ताः प्राणा यस्य, पुरुपूत्कृतोल्बणक्वाणः पुरु महत् पूत्कृतं पूत्करणम् आक्रोशः तस्य उल्बणः उत्कटः क्वाणः ध्वनिर्यस्य। सकलपुरवीथिषु सकलनगरगृहपङ्क्तिषु विश्वरघुष्टानुयातः विश्वराः सारमेयाः तेषां घुष्टं भषणं तत् अनुगतः निष्कासितः नगराद्बाह्यदेशं सधिक्कारं प्रेषितः। पुनः कथंभूतः पर्वतः। श्वपचेति—श्वपचो मातङ्गः तस्य श्मशानोपयुक्तं यदंशुकं तेन पिहितं मेहनं पुंश्चिह्नं यस्य सः पुनः कथंभूतः विपरीतेति—क्षुरः केशापनयनशस्त्रम् तस्य धारा तैक्ष्ण्यं विपरीतं यथा स्यात् तथा क्षुरधारया आचरितं कृतं मार्गाकृत्या मुण्डनं यस्य सः, प्रकाशितेति—प्रकटतया बद्धं शिखायां श्रीफलानां बिल्वफलानां जालं यस्य सः। पुनः कथंभूतः गलेति—कण्ठनालाश्रितशालाजिरततिः गलनालावलम्बितशरावपङ्क्तिः। प्रथीयसि महति, वनगहनरहसि अरण्यसान्द्रैकान्ते प्रवेशं कृतवान्। पुनः कथंभूतः। स कालासुरेण दृष्टः। तुच्छेति—तुच्छम् अल्पम् उदकं यस्यां तथाभूता चासौ द्वीपिनी द्वीपोऽस्त्यस्याम् इति द्वीपिनी द्वीपयुक्ता सा चासौ तटिनी नदी तस्याः तटनिकटे उपविष्टः स्थितः स पर्वतः तेन कालासुरेण दृष्टः [ कालासुरस्तं यद्बभाषे तदेव कविर्दर्शयति ] प्रत्यवमृष्टेति—प्रत्यवमृष्टा सम्यक्तया ज्ञाता हृदयचेष्टा येन तथाभूतेन कालासुरेण निभृतं निर्जनम् इति वक्ष्यमाणप्रकारेण वितर्क्य भाषितः पर्वतः। किं वितर्कितं तेन। 'अहं तावत् वैकारिकर्द्धिं प्रचिकाशयिषुशक्तिः अहं तावत् प्रथमं विक्रियाजन्यामृद्धिं प्रकटयितुं शक्तिर्यस्य तथाभूतः' अहं निजर्द्धिसामर्थ्येन पशवो यज्ञे हुताः विमानमारुह्य स्वर्गं यान्तीति दर्शयितुं समर्थः। एष पर्वतोऽपि स्वस्य मतस्य प्रतिष्ठापनं कर्तुमिच्छुर्या मतिः तस्यां प्रकर्षेण प्रसक्तिर्यस्य तथाभूतोऽस्ति। अतः निष्प्रतिघः निर्विघ्नः खलु मे कार्योल्लाघः कार्ये उल्लाघः हर्षः। इति निभृतं वितर्क्य पर्याप्तेति—परि समन्तात् आप्तः लब्धः परिव्राजकसाधुवेषः येन, मायामयी सकपटा मनीषा बुद्धिर्यस्य तथाभूतेन तेन भाषितश्च तथा हि—पर्वत, केन खलु समासन्नं समीपीभूतं कीनाशः यमः तस्य केल्याः क्रीडाया नर्म परीहासः यस्य तथाभूतेन तेन दुष्कर्मणा अशुभकार्येण विनिर्मापितः कारितः निर्वरः निष्ठुरः उत्कृष्टः निर्वरः अतितीव्र इति भावः स चासौ अपकारः अपकृतिः। येन त्वयि अपकारः कृतस्तस्य ध्रुवं संनिहितो मृत्युरिति मन्ये। पर्वतः—तात, को भवान्। पर्वतः—भवत्पितुः खलु प्रियसुहृद् अहं प्रियमित्रमहं सहाध्यायी सहपाठी शाण्डिल्य इति नाम्ना अभिधीयेऽहम्। यदा हि वत्स भवान् समभवत् अजायत, तदाहं तीर्थयात्रायामगाम्। इदानीं चागाम् आगच्छम्। अतो न भवान्मां सम्यगवधारयति न निश्चिनोति। तत्कथय कारणमस्य व्यतिकरस्य अस्या दशायाः किं नु निदानं तद् वद। पर्वतः—मदिति—मम प्राणितं जीवितं तस्य परित्राणे रक्षणे सघ्न् गृहभूत भगवन्, समाकर्णय शृणु। मम पितरि नाकलोकम् इते सति, अहं नारदेन विवदमानः एतादृशीम् अवस्थामगमम्। कथंभूते पितरि। समस्तेति—समस्ताः सकलाः आगमाः षड्दर्शनानि त एव रत्नानि तानि संनिदधाति समीपे धारयतीति संनिधाता तस्मिन्। पुनः कथंभूते तस्मिन्। सुकृतेति—सुकृतानि पुण्यानि तान्येव मणयः तान् सम्यक् आहरति आनयति इति समाहर्ता तस्मिन्। पुनः कथंभूते तस्मिन्। निजेति—निजरूपम् शुद्धम् आत्मरूपं तत् अनु अनुसृत्य यातरि गमनं कुर्वाणे यथा शुद्धात्मलाभः स्यात् तथा प्रवृत्तिं कुर्वाणे, समिते सम्यक् इतं गमनं प्रवृत्तिर्यस्य तथाभूते पितरि नाकलोकं स्वर्गलोके इते गते सति। स्वातन्त्र्यात् स्वच्छन्दभावात् एकदा अहं 'अजैर्यष्टव्यम्' इति वाक्यार्थं परिवर्तितवान्। कथंभूतोऽहम्। प्रदीप्तेति—प्रदीप्तः प्रज्वलितः निकामम् अतिशयेन कामोद्गमः कामस्य मदनस्य उद्भवः यस्य तथाभूतः। पुनः कथंभूतः। संपन्नेति—संपन्नः संप्राप्तः पण्याङ्गनाजनस्य वेश्यालोकस्य समागमः संभोगो यस्य तथाभूतः। पुनः कथंभूतः। कृतेति—कृतः पिशितस्य मांसस्य, कापिशायनस्य मद्यस्य सुरायाश्च आस्वादो भक्षणं पानं च येन तथाभूतः।

पुनः कथंभूतोऽहम्। पापेति—पापकर्मणां प्राणिवधादीनां कार्याणां प्रसादः कृपा यस्मिन् तथाभूतोऽहम्, चेतन् जानन्नपि आर्यैरदिष्टम् आर्यैः आचार्यपरंपरागतविबुधैः उपदिष्टं प्रतिपादितं विशिष्टम् अहिंसाधर्मपोषकत्वात्, व्याख्यानं विवरणमहं दुरात्मा इति आख्यानं नाम यस्य तथाभूतः, स्वव्यसनविवृद्धये वेश्यासेवनादि व्यसनपोषणाय, धर्मबुद्धया साधुमध्ये 'अजैर्यष्टव्यम्' इतीदं वाक्यं वचनम् अशेषकल्मषनिषेव्यः अशेषाणि सकलानि कल्मषाणि पापानि निषेव्यानि सेव्यानि यस्य तथाभूतोऽहम् अन्यथोपन्यस्यमानो विपरीतार्थोपस्थापकरूपेण प्रतिपादयन् नारदेन आपादितवचनस्खलनः आपादितं प्रदर्शितं वचनस्खलनम् अन्यथाप्ररूपणं यस्य तथाभूतः सन् एतावद्विपत्तिस्थाम् इयत्संकटदशाम् अवापं प्राप्तोऽहम्। [ पर्वतस्य कार्ये साहाय्यं तन्वानः कालासुरः ब्रह्मवेषं स्वीचकार ] कालासुरः—पर्वत, मा शोच, शोकं मा कुरु। मुञ्च त्वम् अशेषं सकलं धिषणायाः बुद्धेः कलुषं मालिन्यम्। अङ्ग, हे पर्वत, साधु संबोधय आत्मानम्। स्वम् एव सुष्ठु उपदिश। खिन्नो माभूरित्यर्थः। किं तत् आत्मसंबोधनम्। 'न खलु निरीहस्य निश्चेष्टस्य निरुद्यमस्य नरस्यास्ति काचिन्मनीषितावाप्तिः अभिलषितप्राप्तिः। तदलं हन्त हृदयदाहानुगेनावेगेन। तस्मात् हन्त खेदे, मनःसंतापं कुर्वता आवेगेन खेदेन अलं मनःसंतापकरं खेदं मा कुरु इत्यर्थः। हंहो पुत्र पर्वत, यथा स्वकीयसंकेताङ्कं स्वाभिप्रायव्यञ्जकलक्षणानि यथा स्युस्तथा ब्राह्मादि ब्राह्मगोसवाश्वमेधसौत्रामणिवाजपेयराजसूयपुण्डरीकप्रभृतीनाम् सप्ततन्तूनां यज्ञानां प्रतिपादकानि वाक्यानि रचयित्वा मध्ये मध्ये वेदवचनेषु निवेशय प्रवेशय। वत्स, भूः पातालम्, भुवर् मध्यलोकः, स्वर् स्वर्गलोकः एषां त्रय्याः विपर्यासनं वैपरीत्यापादनं तत्र समर्थं मन्त्राणां माहात्म्यं प्रभावो यस्य तथाभूते मयि सति, त्वयि च, तरसेति—तरसं मांसम्, आसवो मदिरा, सवित्री माता एतेषु वस्तुषु प्रवृत्तिः एतत्सेवनं तत्र हेतुः श्रुतिर्वेदः तस्याः गीतिः गानं तस्यां सम्यक् अभ्यस्तं सात्म्यं तन्मयता येन तथाभूते त्वयि, किं नु नाम इहासाध्यम्। इत्युत्साह्य स्वकीयाभिप्रायद्योतकवाक्यानां वेदे निवेशनकार्ये प्रवर्त्य। स्वयं विद्यानाम् अवष्टम्भेन बलेन सृष्टाभिः उत्पादिताभिः अष्टाभिरपि ईतिभिः उपद्रवैः उपद्रूयमाणजनपदहृदयं पीड्यमानदेशमध्यम् अयोध्याविषयम् आगत्य तत्र नगरबाहिरिकायां पुरबाह्यप्रदेशे स देवः कालासुरः चतुराननश्चतुर्मुखो ब्रह्मा अजायत। अध्वर्युः पर्वत आसीत्। अध्वरं यज्ञं यौति संपादयतीति अध्वर्युः होमकारी ऋत्विक् अभवत्। मायामयसृष्टयः मायया निर्वृत्ता मायामयी तद्रूपा सृष्टिः उत्पत्तिर्येषां ते मायामयसृष्टयः पिङ्गलमनु-मतङ्ग-मरीचि-गौतमादयश्च ऋत्विजः ऋतौ यजन्तीति ऋत्विजः पुरोहिताः अजनिषत अजायन्त। तत्र श्रुतिधृतिः श्रुतीः वेदान् धरतीति श्रुतिधृतिः ब्रह्मा चतुर्भिः वदनैः मुखैः उपदिशति। पर्वतस्तु—यज्ञार्थमिति—स्वयंभुवा स्वयं भवतीति स्वयंभूर्ब्रह्मा तेन स्वयमेव पशवः अजादयः यज्ञार्थं होमार्थं सृष्टाः उत्पादिताः। यज्ञः सर्वेषां जनानां भूत्यै वैभवाय भवति तस्मात् यज्ञे कृतः पशुवधः अवधः अहिंसा भवति ॥३९७॥ 'ब्रह्मणे ब्राह्मणम् आलभेत। ब्रह्मणे ब्रह्मदेवाय ब्राह्मणं विप्रम् आलभेत हिंस्यात्। इन्द्राय क्षत्रियम् इन्द्रदेवाय क्षत्रियं राजन्यम् आलभेत हिंस्यात्। आलभेत इत्यस्य उत्तरत्र सर्वत्र संबन्धः। मरुद्भ्यो वैश्यं वायुभ्यो वैश्यम् आलभेत। तमसे शूद्रं राहवे शूद्रम् आलभेत। उत्तमसे तस्करम् आलभेत उत्तमोदेवाय चौरम्। आत्मने क्लीबं नपुंसकम्। कामाय पुंश्चलं व्यभिचारिणम्। अतिकुष्टाय मागधं राजाग्रस्तुतिकारिणम्। गीताय सूतं सारथिम्। आदित्याय सूर्याय स्त्रियं गर्भिणीम्। सौत्रामणौ सौत्रामणियज्ञे यः एवंविधां सुरां पिबति न तेन सुरा पीता भवति। सुराश्च तिस्र एव श्रुतौ संमताः वेदे संमताः मान्याः। पैष्टी, गौडी, माधवी चेति। पैष्टी विविधधान्यविकारजा मदिरा। गौडी गुडादिविकारजा सुरा। माधवी च सुरा। गोसवे गोमेधे यज्ञे ब्राह्मणो गोसवेन गोमेधेन इष्ट्वा पूजयित्वा संवत्सरान्ते मातरमप्यभिलषति, उपेहि मातरम्, उपेहि स्वसारम्।

[ पृष्ठ १८९-१९१ ] षट्शतानि इति—अश्वमेधस्य यज्ञस्य मध्यमे अहनि दिवसे पशूनां षट्शतानि नियुज्यन्ते आलभ्यन्ते। वचनात् त्रिभिः पशुभिः ऊनानि रहितानि। अर्थात् सप्तनवत्यधिकानि पञ्चशतानि

---

१. अग्नीध्राद्या धनैर्वार्या ऋत्विजो याजकाश्च। आदिशब्दात् पोतृप्रशास्तृब्राह्मण्यच्छन्दस्य छायाकग्रावस्तुब्रह्ममैत्रावरुणप्रतिस्थातृप्रतिहन्तृनेतृनेष्टृसुब्रह्मण्या इत्थं सवस्याः सप्तदशर्त्विजः।

पशूनाम् अश्वमेधस्य यज्ञस्य मध्यमेऽहनि नियुज्यन्ते ॥ ३९८ ॥ **महोक्षो वेति**—श्रोत्रियाय वेदाध्येतृब्राह्मणाय महोक्षः महाबलीवर्दः, महाजो महांश्छागः विशस्यते हिंस्यते दिव्याय ॥ ३९९ ॥ **गोसवे इति**—गोसवे गोमेधयज्ञे सुरभिं गां हन्यात् हिंस्यात्। राजसूये यज्ञे तु भूभुजं राजानं हन्यात्। अश्वमेधे हयम् अश्वं हन्यात्। पौण्डरीके च दन्तिनं गजं हन्यात् ॥ ४०० ॥ औषध्यः—औषध्यः वनस्पतयः, पशवः छागादयः, वृक्षाः तरवः पलाशोदुम्बरपिप्पलादयः, तिर्यञ्चः कूर्मादयः, पक्षिणः हंससारसादयः, नराः मनुष्याः, एते यज्ञार्थं निधनं मरणं प्राप्ताः उच्छ्रिताम् उन्नतां गतिं देवादिगतिं प्राप्नुवन्ति यान्ति ॥ ४०१ ॥ **मानवमिति**—मनोरिदं मानवं मनुवचनम्, व्यासवासिष्ठं व्यासस्येदं व्यासम्, वसिष्ठस्येदं वासिष्ठम्, व्यासवचनं वसिष्ठवचनं च वेदसंयुतं वेदोक्तमेव भवति। यो नरः अप्रमाणं ब्रूयाद्वदेत् स ब्रह्मघातको भवेत् ब्राह्मणघातस्य पातकं तस्य भवेदित्यर्थः ॥ ४०२ ॥ **पुराणमिति**—पुराणं रामायणभारतादिकम्। मानवो धर्मः मनुप्रणीतं स्मृतिशास्त्रम्, साङ्गो वेदः शिक्षा-कल्प-व्याकरण-च्छन्दो-ज्योतिष-निरुक्तलक्षणैः षडङ्गैः सहितः वेदः चिकित्सितम् आयुर्वेदम्। एतानि चत्वारि शास्त्राणि आज्ञासिद्धानि। एतेषां वचनमेव मन्यते। हेतुभिर्न हन्तव्यानि। हेतुवादेन न निराकरणीयानि ॥ ४०३ ॥ इति मनु-मरीचि-मतङ्गप्रभृतयश्च सवषट्कारं वषट्कारपूर्वकम् अजाः छागाः, द्विजाः पक्षिणः, गजाः हस्तिनः वाजिनः अश्वाः प्रभृतौ आदौ येषां ते तान् देहिनो मन्वादय ऋषयो जुह्वति यज्ञकुण्डे मन्त्रोच्चारणपूर्वकं पातयन्ति। तदेवं श्रुतिर्वेदः शस्त्रम् अस्यादिकं प्रहरणम्, वणिज्या उद्यमः क्रय-विक्रयादिकम्, जित्या हलाद्युपकरणम्, एतैः उपजीविनां ब्राह्मण-क्षत्रिय-विट्-शूद्राणाम् ईताः ( ईतीः ) पीडाः पर्वतो व्यपोहति निराकरोति। कालासुरः पुनः आलभ्यमानान् हिंस्यमानान् प्राणिनः अजद्विजगजादीन् साक्षाद्विमानानि आरूढान् स्वर्गे देवलोके शाम्बर्या मायया पर्यटतः विहरमाणान् दर्शयति। मनुप्रमुखाश्च मुनयः प्रभावयन्ति मन्त्रप्रभावं दर्शयन्ति। मायया प्रकटितस्वर्गालयप्रदेशादिलोभे उत्पन्ने सकलप्रजाजनक्षोभे च स सगरः प्रत्यासन्नं समीपं नरकनगरं यस्य, श्वभ्रं नरकः तस्य विभ्रमस्य उचिता योग्या स्थितिर्यस्य स विश्वभूतिश्च तदुपदेशात् पर्वतकालासुराद्युपदेशात् तांस्तान् प्राणिनोऽजादीन् हत्वा प्सात्वा भक्षयित्वा च दुर्दुःखदः अन्तोऽवसानं यस्य तद्दुरितं पातकं तेन युक्तं चित्तं मनः चेतः ज्ञानं ययोस्तौ सगरविश्वभूती मखमिषात् यज्ञव्याजेन कालासुरेण स्मारितं ज्ञापितं पूर्वभवागः पूर्वजन्मापराधः ययोस्तौ वीतिहोत्रोऽग्निः तस्मिन्नाहुतिरूपेण विहितं कृतं विचित्रं नानाविधं वघरहः प्राणघातगुह्यं ययोस्तौ विचित्रायाः धरित्र्याः भूमेः द्राघीयः दीर्घं दुःखदवथुः पीडासंतापः तेन मन्थरं मन्दं तलं नरकतलम् इति भावः अगाताम् अगच्छताम्। पर्वतोऽपि सप्तमनरके जन्म लेभे। कथंभूतः सः अग्नायीपतिविजये अग्नेः स्त्री अग्नायी अग्नेर्भार्या तस्याः पतिः अग्निः तस्य विजये, जठरधनंजये उदराग्नौ च हव्यकव्यकर्मभिः पितृदेवकर्मभिः कृतसकलप्राणिघातः। पुनः कथंभूतः। **कालासुरेति**—कालासुरस्य तिरोधानम् अन्तर्धानं तेन विधुरविधिसारः दुःखपीडासारो यस्य। **तद्विरहेति**—तस्य कालासुरस्य विरहः वियोगः स एव आतङ्कशोचिः रोगाग्निर्यस्य क्लेशकृश्यच्छरीरः दुःखेन कृशदेहः, कालेन जीनं जीर्णं जीवितम् आयुः प्रचारः श्वासोच्छ्वासादिकं गमनादिकं च यस्य सः पर्वतः सप्तमरसावसरः सप्तमरसा सप्तमं नरकम् अवसरः तस्य स्थानम्। समपादि अभवत्। भवति चात्र श्लोकः—**मृषोद्यादीनवोद्योगात्**—मृषोद्यम् असत्यवचनं तदेव आदीनवो दोषः तस्य उद्योगात् पर्वतेन समं वसुः ज्वलदातङ्कपावकं ज्वलन् दीप्यन् आतङ्क एव पावको अग्निर्यत्र तथाभूतं जगतीमूलं जगत्या मूलं नरकभूमिं जगाम अगच्छत् ॥ ४०४ ॥

इत्युपासकाध्ययने असत्यफलसूचनो नाम त्रिंशत्तमः कल्पः ॥ ३० ॥

## ३१. अब्रह्मफलसाधारणो नामैकत्रिंशत्तमः कल्पः

[ पृष्ठ १९१-१९२ ] **वधू इति**—वधूः पत्नी वित्तस्त्री वेश्या अवधृता उभे मुक्त्वा सर्वत्र अन्यस्मिन् तज्जने स्त्रीजने कन्यादिषु तेषु माता, स्वसा भगिनी, तनूजेति कन्येति या मतिः संकल्पः गृहाश्रमे गृहस्थधर्मे

ब्रह्म ब्रह्मचर्यं वेदितव्यम् ॥४०५॥ धर्मेति—धर्माचरणस्य भूमिः पुण्यभूमिः आर्यदेशः चैत्यालयादिकं वा तत्र मनुष्यः नियतस्मरः विजितमदनो भवेत् । धर्मभूमौ धर्मस्य स्थाने मातृस्वसृतनूजादिषु मनुष्यः जितमदनो भवेत् । यत् यस्मात् जात्यैव स्वजात्या एव परिणीतया सह संभोगः कार्यः, पराः वधूवेश्ये मुक्त्वा पराः ताभ्याम् अन्याः जातिबन्धुलिङ्गिस्त्रियः जातिस्त्रियः या स्वीया जातिः तत्स्त्रियः, बन्धुस्त्रियः सुहृदां स्त्रियः, स्यालादिसंबन्धिनां स्त्रियः, लिङ्गिस्त्रियः व्रतिन्यः स्त्रियः आर्यिकादयश्च । ताः त्यजेत् ॥४०६॥ रक्ष्यमाणे इति—यत्र यस्मिन् व्रते रक्ष्यमाणे अहिंसादयो गुणाः अहिंसा-सत्य-अचौर्य-परिग्रहप्रमाणत्वादयो गुणाः बृंहन्ति वृद्धिमुपयान्ति । ब्रह्मविद्या-विशारदाः अध्यात्मज्ञाननिपुणाः तद्ब्रह्म उदाहरन्ति नियतस्मरं नाम व्रतं वदन्ति ॥४०७॥ मदनेति—मदनोद्दीपनैः मदनस्य उद्दीपनानि कामवृद्धिविधायीनि यानि वृत्तानि वर्तनानि कुत्सिताचाराः तैः आत्मनि मदं न आचरेत् दर्पं नोत्पादयेत् । मदनोद्दीपनै रसैर्वृष्यादिरसैः स्वस्मिन् दर्पं न जनयेत् । मदनोद्दीपनैः शृङ्गार-प्रचुरैः काव्यादिभिः दर्पं न उत्पादयेत् ॥४०८॥ हव्यैरिति—यथा हुतप्रीतिः हूयन्ते इति हुतानि घृतादीनि तेषु प्रीतिः यस्य सः हुतप्रीतिः अग्निः, स हव्यैरिव हव्यैर्यथा देवदत्तद्रव्यैर्घृतादिभिः तोषं तृप्तिं न एति । नीरधिः समुद्रः पाथोभिरिव जलैर्यथा तोषं नैति तथा भवसंभवैः नृजन्मनि संभव उत्पत्तिर्येषां तैर्भोगैः स्त्रीस्रक्चन्दनादिभिः एष पुमान् पुरुषः तृप्तिं संतोषं न एति ॥४०९॥ विषवदिति—यथा विषम् आपाते तत्काले मधुरागमं भवति मधुरस्वादं भवति । अन्ते अवसाने विपत्तिः मृत्युः फलं ददाति तथा विषयाः कामिन्यादयः तत्काले मधुराः प्रियाः भवन्ति अवसाने विपत्तिफलदाः आपत्फलदायिनो भवन्ति । तत् इह विषयेषु सतां सज्जनानां को ग्रहः कः अभिनिवेशः ॥४१०॥ बहिरिति—बाह्यतः तास्ताः आलिङ्गनचुम्बनादिकाः क्रियाः कुर्वन् संकल्पजल्प-वान् नरः अहम् एवं तां नारीमाश्लिष्यामि एवं तस्या मुखं चुम्बिष्यामि इति संकल्पं कुर्वंस्तथैव अन्तर्जल्पं कुर्वाणः नरः भावाप्ताविव भावः समानरतिरिति । तस्याप्ताविव प्राप्तौ सत्यामेव स निर्वाति संतोषं याति । परं तत्र विषयसेवने परस्त्रीसेवायाम् अधिकः क्लेशः समुत्पद्यते । अथवा भावाप्तौ एव समरसरसरङ्गोद्गमे सत्येव निर्वाति सुखं लभते । अन्यथा भीत्यादिविकारे सति मनःप्रसत्त्यभावे सुखं न लभते । प्रत्युत परस्त्र्यादिसेवने क्लेश एव अधिको भवेत् । अतः परस्त्रियं वर्जयेत् ॥४११॥ निकाममिति—निकामं नितराम् । कामकामा-त्मा कामे मैथुनसुखे काम इच्छा यस्य स आत्मा जीवः । तस्य मैथुनस्य अनारतसेवने सति । तस्य अनन्तवीर्य-पर्यायः तृतीया प्रकृतिः भवेत् नपुंसकभावो भवेत् ॥४१२॥ सर्वेति—हितकामिनां हिताभिलाषिणाम् । फलाय धर्मफलप्राप्तये । सर्वा क्रिया अनुलोमा अनुकूला भवेत् । धर्मसेवने अनुकूला दानतपःपूजादिका क्रिया स्वर्गा-पवर्गफलप्राप्तौ हेतुः भवेत् । परम् अर्थकामौ वर्जयित्वा विश्वसितवञ्चनस्वामिद्रोहपरस्त्रीसेवनादिकाननुकूल-क्रियाणां करणेनार्थकामपुरुषार्थफलं न लभ्यते । न्यायोपात्तधनादिकात् स्वस्त्रीसंतोषादिकादेव अर्थकामफलं लभ्यते ॥४१३॥ क्षमेति—कामः मैथुनसेवनं क्षयामयसमः क्षयनामक आमयसमः रोगतुल्यः अयं कामः । सर्वे च ते दोषाः सर्वदोषाः तेषाम् उदये उत्पत्तौ द्युतिः कान्तिः । कामाकुले नरे रागादिदोषाणाम् उत्पत्तिर्भवतीति भावः । तत्र मर्त्यानाम् मनुष्याणाम् उत्सूत्रे कामे उच्छृङ्खले सति कुतः श्रेयःसमागमः, कुतः मोक्षप्राप्तिः भवेत् ॥४१४॥ देहेति—देहस्य संस्कारः दन्तनखकेशादिशृङ्गारः शरीरसंस्कारः । द्रविणसमुपार्जनं क्रयविक्र-यादिभिः धनवृद्धिः तथा द्रविणवृत्तयः द्रविणेन धनेन वृत्तिः उपजीवनम् । जितकामे जितः कामो येन तस्मिन्नरे जितेन्द्रिये उपर्युक्ताः सर्वाः क्रिया वृथा । तत्कामः सर्वदोषान् भजति ॥४१५॥

[ पृष्ठ १९३-१९४ ] स्वाध्यायेति—यावत् यावत्कालं चित्तेन्धने चित्तमेव मन एव इन्धनं दारु तस्मिन् कामाशुशुक्षणिः इन्द्धे दीप्तो भवति । तावत् तावत्कालं स्वाध्यायः धर्मग्रन्थानां पठनम्, पृच्छनादिकं च, ध्यानं मन एकाग्रं विधाय अर्हदादिषु तद्गुणेषु च विहितं चिन्तनम् । धर्मः अहिंसादिसदाचारः आदिशब्देन तपःसंयमादिकम् । एताः क्रियाः कुतः ॥ ४१६ ॥ ऐदंपर्यमिति—अतः एतस्मात्कारणात्, मुक्त्वा अत्यधिकं कामसेवनं मुक्त्वा, भोगान् आहारवद्व्रजेत् अत्यासक्त्या अन्ने सेविते धर्मार्थकाया नश्यन्ति । तथा स्त्र्यादि-भोगाः अत्यासक्त्या सेविताः धर्मम् अर्थम् कायं च नाशयन्ति अतः भोगान् अन्नवद्व्रजेत् । देहदाहस्य शान्तये, अभिध्यानं सततं भोगानाम् अनुचिन्तनं तस्य विहानये नाशाय ॥ ४१७ ॥ स्वस्त्रीसंतोषव्रतदोषान् वर्णयति—परस्त्रीति—परस्त्री परस्य स्त्री परस्त्री तया संगमः संभोगः, स्वस्त्रीसंतोषं व्रतं नाशयति । अनङ्गक्रीडा-

अङ्गं लिङ्गं योनिश्च तयोरन्यत्र मुखादिप्रदेशे क्रीडा । अन्योपयमक्रिया—कन्यादानम् उपयमक्रिया । अन्यस्य स्वापत्यव्यतिरिक्तस्य कन्याफलकिप्सया स्नेहसंबन्धादिना वा उपयमक्रिया । तीव्रता परित्यक्ता-न्यव्यापारस्य पुनः पुनः स्वस्त्रीसेवनम् । रतिकैतव्यं रतिक्रियायां कैतव्यं कपटं विटत्वम्, एतानि तद्व्रतं ब्रह्मचर्यव्रतं हन्युः दुष्येयुः ॥ ४१८ ॥ मद्यमिति—मद्यं मदिरा, द्यूतं पणः, उपद्रव्यं मांसमधु-माक्षिक-धत्तूरादि वस्तु । तौर्यत्रिकं नाट्यम् गानं वादित्रं च, अलंक्रिया: लिगलेपादिप्रयोगः, आभूषणानि च, मदो दर्पः, व्यभिचारिणः पुरुषा विटाः, वृथाटघा प्रयोजनं विना विचरणम् इति दशधा अनङ्गजः कामजः गणः ॥ ४१९ ॥ कोपजो गणः—हिंसनम्, साहसम् अविचारेण बलेन कार्यकरणम्, द्रोहः स्वामिमित्रादिद्वेषः । पुरोभागी खलः तस्य भावः पौरोभाग्यं दुर्जनत्वम् । अर्थदूषणे अर्थलाभे दूषणम् अन्तरायविधानम् । ईर्ष्या स्पर्धा पराभ्युदयासहनम् । वाग्दण्डः क्रोधावेशेन निन्द्यभाषणं वाग्दण्डः, पारुष्यं परुषभाषणं मर्मदाहकत्वम् अनेकदोषदुष्टोऽसीति । इति कोपजः अष्टधा गणः प्रोक्तः । ब्रह्मव्रतवता एते दोषाः त्याज्याः ॥ ४२० ॥ ऐश्वर्येत्यादि—ऐश्वर्यं वैभवम् । औदार्यं दातृत्वगुणः । शौण्डीर्यम् अप्रतिहत-मानता, अन्येन अपरिभवः । धैर्यं निर्भयता, सौन्दर्यं रूपवत्त्वम् । वीर्यता सामर्थ्यम् अद्भुतसंचारान् च आकाश-गामित्वादिचारणर्द्धिभेदान् एतान् गुणान् चतुर्थव्रतपूतधीः चतुर्थव्रतं ब्रह्मचर्यं तेन पूता धीः पवित्रा मतिर्यस्य सः नरः लभेत प्राप्नुयात् ॥ ४२१ ॥ अब्रह्मचारिणो दोषाः—अनङ्गेति—अनङ्गो मदनः स एव अनलः अग्निः तेन संलीढे संस्पृष्टे, परस्त्रीरतिचेतसि परस्त्रिया सह संभोगसुखे चेतो मनो यस्य तथाभूते नरे अत्र इहलोके सद्यस्का विपदः तत्काले एव विपदः पीडा लिङ्गच्छेदादिकाः । परत्र च दुरास्पदाः परलोके च दुःखस्थानानि यासु ताः विपदः जायन्ते ॥ ४२२ ॥

[ पृष्ठ १६४ ] श्रूयतामत्राब्रह्मफलस्योपाख्यानम्—काशिदेशेषु सुरसुन्दरीसपत्नेति—सुरसुन्दर्यो देवाङ्गनाः तासां सपत्नः रूपगुणे ताभिः स्पर्द्धां कुर्वन् यः पौराङ्गनाजनः नगरनारीगणः तस्य विनोदा एव अरविन्दानि कमलानि तेषां सरसीव तथाभूतायां वाराणस्यां धर्षणो नाम नृपतिः । कथंभूतः सः । संपादितेति—संपादितं कृतं समस्तारातीनां सकलद्विषतां संतानस्य वंशस्य प्रकर्षेण कर्षणं सपत्नदेशकोषाणां च हरणं येन तथाभूतः । अस्य सुमञ्जरी नाम अग्रमहादेवी पट्टमहाराज्ञी आसीत् । कथंभूता सा । अति-चिरेति—अतिदीर्घकालात् प्ररूढः वृद्धिं गतः प्रणयः स्नेहः स एव सहकारः आम्रतरुस्तस्य मञ्जरीव पुष्प-पंक्तिरिव । धर्षणनृपतेः उग्रसेनो नाम सचिवः, कथंभूतः सः । पञ्चतन्त्रादीनि यानि शास्त्राणि तेषामध्य-यनात् विस्तृतं वचनं यस्य तथाभूतः । अस्य सचिवस्य सुभद्रा नाम पत्नी, कथंभूता सा । पतिहितैक-मनोमुद्रा स्वभर्तृकल्याणे एव एका मनोमुद्रा मनोव्यापारो यस्याः सा । दुर्विलासरसे रङ्गः प्रीतिर्यस्य तथाभूतः कडारपिङ्गो नाम अनयोः सूनुः पुत्रः । धर्षणनृपस्य पुष्यो नाम पुरोहितः । कथंभूतः सः । अनवद्येति—अनवद्या पापरहिता या विद्या आगमज्ञानं तेन प्रकाशिताः अध्यापिताः अशेषशिष्या येन स तथाभूतः । अस्य पद्मा नाम धर्मपत्नी । कथंभूता सा । सौरूप्येति—सुरूपस्य भावः सौरूप्यं सौन्दर्यं तस्य अतिशयः प्रकर्षः तेन अपहसिता उपहासं नीता तिरस्कृता पद्मा लक्ष्मीर्यया सा । [ कडारपिङ्गेन पद्मा एकदा अवलोकिता ] । स कडारपिङ्गः कथंभूतः । समस्तेति—समस्ताश्च ते अभि-जातजनाः सद्वंशजजनाः तेभ्यो ये बाह्या व्यवहारा असदाचाराःताननुगच्छति इति सकडारपिङ्गः कडारस्तृण-वह्निः तद्वत् पिङ्गः सकडारपिङ्गः । स्वापतेयेति—स्वापतेयं धनम्, तारुण्यम् यौवनम्, मदः इन्द्रियदर्पः एभ्यः मन्दं मानबलं ज्ञानसामर्थ्यं यत्र तथाभूताच्चापलात् दुरालपनभण्डेन दुर्भाषणे भण्डेन चतुरेण अश्लीलभाषणनिपुणेन खिङ्गषण्डेन विटसमूहेन सह, नतभ्रू इति—नते भ्रुवौ यासां ता नतभ्रुवः तासां विभ्रमाः शृङ्गारभावज-क्रियाविशेषाः तैः अभ्यर्थ्यमानाः भुजङ्गा जाराः एव अतिथयः यासु तासु वीथिषु मार्गेषु संचरमाणः विहरन् तामेकदा पद्माम् अवलोक्य दृष्ट्वा, कीदृशीं ताम् । प्रासादेति—प्रासादतलं हर्म्यस्योपरितनभूमिम् उपसीदति इति उपसदा तां हर्म्यस्योर्ध्वभूमौ तिष्ठन्तीम् । अरालेति—अरालानि वक्राणि पक्ष्माणि नेत्रलोमानि ययोः ते च ते ईक्षणे नयने ताभ्याम् आक्षिप्ता तिरस्कृता पद्मा यया तादृशीं तां पद्माम् अवलोक्य । एषेति—एषा इयं प्रत्यक्षीभूता नारी इन्द्रियाणि एव द्रुमाः तरवः तेषां समुल्लसने विकासने अम्बुवृष्टिः जलवृष्टिः । एषा मन एव

मृगः हरिणः तस्य विनोदस्य विहारभूमिः संचारस्थानम्। एषा स्मरः कामः एव द्विरदः गजः तस्य बन्धने वारिवृत्तिः बन्धनरज्जुः। एषा किं खेचरी विद्याधरी, किम् अमरी सुरी, वा किम् इयं रतिः मदनभार्या ॥४२३॥

[ पृष्ठ १९५–१९७ ] इति च विचिन्त्य मकरेति—मकरः मत्स्यः केतौ ध्वजे यस्य स मदनः तस्य वशे व्यापारनिधिः प्रवृत्तिनिधानं यस्य, प्रवृत्तेति—प्रवृत्तः प्रादुर्भूतः दुरभिसंधिः दुष्टो मनोविचारो यस्य, पुरुषेति—पुरुषप्रयोगेण दूतसंप्रेषणादिना अभिमतस्य इष्टस्य सिद्धिं प्राप्तिम् अनवबुद्धयमानः अजानन्, तडिल्लतां नाम धात्रीम्, कथंभूताम्। पराशयेति—पराभिप्राय एव शैलः पर्वतः तस्य विदारणे विदलने तडिल्लतामिव विद्युल्लतामिव। अषडक्षीणे शरणे न षट् अक्षीणि नेत्राणि यत्र तथाभूते शरणे गृहे तृतीयाद्यगोचरे गृहे विजने गृहे इत्यर्थः। सुनयेति—सुनयानां विज्ञप्त्यादिव्यवहाराणाम् आयतनादिभिः स्थानादिभिः पादपतनादिभिः चरणवन्दनादिकैः प्रश्रयैः विनयैः। कथंभूतैः असदाशयाश्रयैः दुरभिप्रायावलम्बनैः अवन्ध्यसाध्यं सफलसाध्यम् उपरुध्य ज्ञात्वा। स्वकीयेति—निजाभिप्रायगहनवर्धनभूमिम् अकरोत् विदधे। तदुपरोधात् तस्य उपरोधात् आग्रहात् तथाविधविधिविधात्री वशीकरणकार्यविधायिनी तत्कार्यविधायिनी—धात्री ( स्वगतम् ) परपरिग्रहः परस्य अन्यस्य परिग्रहः कलत्रम्। अन्यतरानुरागग्रहश्च अन्यतरस्य अनुरागः स्नेहस्तस्य ग्रहणं चेति दुर्घटः दुःसंधानः प्रतिभासः अनुभवो यस्य तादृक् खलु अयं कार्योपन्यासः। अथवा सुघटः एव सुसंधान एव अयं कार्यघटः। इयं कार्यरचना सुसंधानैव। यतः यस्मात् तप्तातप्तप्लवयसोरयसोरिव अग्नितप्तानग्नितप्तयोः प्लवयसोः चक्रलोहनेम्योरिव विरुद्धयोश्चेतसोः मनसोः संगत्याय अनुकूलीकरणाय खलु पण्डितैः दौत्यं दूतत्वं करणीयम्। अन्यथा सरसतरसोः रससहितयोः वेगवतोः द्रवस्वभावयोः जलयोरिव सरसतरसोः प्रेमवतोः वेगवतोश्च अन्योन्यं प्रति उत्सुकयोः द्रवस्वभावयोः काठिन्यरहितयोः चित्तयोः एकीकरणे किं नु नाम प्रतिभाविजृम्भितम्। का नाम नवनवोन्मेषशालिन्या बुद्धेः स्फूर्तिः। प्रतिकूलस्वभावयोर्मनसोरेकीकरणे यद्दौत्यं क्रियते तदेव दौत्यं प्रशस्यमित्यर्थः। किं च। सा दूतिकेति—या बुधानां विदुषाम् अभिमतकार्यविधौ इष्टकर्मकरणे चातुर्यवर्यवचनोचितचित्तवृत्तिः चातुर्येण बुद्धिकौशल्येन वर्यं श्रेष्ठं यद्वचनं तस्य उचिता योग्या चित्तवृत्तिः मनोवृत्तिः यस्याः सा दूतिका स्वामिसंदेशप्रापिका ज्ञेया। या दूतिका किं करोति। चुम्बकोपलकलेव चुम्बति लोहमाकर्षति स चासौ उपलश्च चुम्बकोपलः अयस्कान्तः तस्य कला अंशः यथा अन्तःशल्यं लोहमयं बहिः करोति। तथा अपरस्य अन्यस्य नरस्य चेतोनिरूढं मनसि स्थितं शल्यं वैरादिकं बहिः करोति ततो निष्कासयति। एतादृशी एव दूतिका प्रशस्येति भावः ॥४२४॥ तदलं विलम्बेन अस्मिन् कार्ये कालक्षेपो न कर्तव्य इति भावः। यथा परिपक्वफलं व्यतिक्रान्तकालं सरसत्वाधिष्ठानं न भवति। तत् उचितकालातिक्रमेण गन्धवर्णरसभ्रष्टं भवति। तथात्र कार्ये विलम्बे जाते सति अस्य कार्यस्य सरसत्वं च नश्येत्। किं त्वस्य साहसावलम्बनधर्मणः कर्मणः साहसाश्रयसाध्यस्य कार्यस्य दैवात् सिद्धौ सत्याम्, परेङ्गिताकारसर्वज्ञैः प्राज्ञैः अन्यमनःस्थिताभिप्रायचेष्टानां विद्भिः विबुधैः, कथमपि महता कष्टेन, बहुजनावकाशे कृते सति बहुजनानां मनसि अवकाशे परिचये कृते सति स्नेहे आदरे वा समुत्पादिते सति शरीरी साहसकर्मणः कर्ता नरः पुरश्चारी भवति अग्रणीः जायते। साहसकार्यस्य असिद्धौ सत्यां शरीरी तत्कार्यस्य विधाता दुरपवादपरागावसरः जननिन्दाधूलिपातस्थानं व्यसनगोचरश्च भवति विपद्विषयश्च जायते। तत् ध्वनयेयं कथयामि या इयं पद्मा इदं कार्यं च अवसेयं ज्ञातुं योग्यम्। इयं पद्मा किंस्वभावा कीदृश्यस्या मनोवृत्तिरिति ज्ञातव्यम्। इदं च कार्यम् अद्वितीयापत्यप्रसवाय अद्वितीयं न द्वितीयम् अद्वितीयम् एकं तच्च तदपत्यं पुत्रः तस्यैव प्रसव उत्पत्तिर्यस्य तथाभूताय सचिवाय अवसेयं ज्ञातव्यम्। तदुदाहरन्ति—"न च अनिवेद्य भर्तुः किंचिदारम्भं कुर्यात् अन्यत्रापत्प्रतीकारेभ्यः" स्वामिनः अनिवेद्य अकथयित्वा न च किंचित् आरम्भम् कार्यं कुर्यात् स्वामिनं पृष्ट्वा कार्यं कुर्यात् इति भावः। परम् आपत्प्रतीकारेभ्य अन्यत्र विपत्तिनिराकरणसमये स्वामी न प्रष्टव्यः अपृष्ट्वा एव स्वामिनं तदुपद्रवकारिणीम् आपदं परिहरेत् इति। ( प्रकाशम् ) प्राणप्रियैकापत्य अमात्य, प्राणवत् प्रियं वल्लभम् एकम् अपत्यं यस्य तथाभूत हे अमात्य सचिव, ईदृश इव सामान्यजन इव भवादृशोऽपि जनः जातस्य पुत्रस्य जीविते अमृतस्य निषेकाय सेचनाय अचिरत्नं यत्नं तात्कालिकं प्रयत्नं विधातुं योग्यो भवान् भवति। अमात्यः—समस्तमनोरथसमर्थनकथास्मार्ये आर्ये, समस्तानां सकलानां मनोरथानाम्

अभिलाषाणां समर्थनकथा फलदानकथा तस्यां स्मार्ये स्मरणयोग्ये आर्ये पूज्ये, तज्जीवितामृतनिषेकाय तस्य मदपत्यस्य जीवितार्थम् अमृतनिषेकाय सुधासेचनाय मज्जीवितोचितविवेकाय च मदीयं जीवितं मत्प्राणाः तस्य उचितो योग्यो यो विवेकः तस्मै तत्र भवती पूज्या त्वमेव प्रभवति समर्था भवति। धात्री—अथ किम्। अभ्युपगतं भवद्वचः। तथापि अबलेति—अबलाजनानां नारीजनानां मनसो अतिरिक्ता अधिका या प्रतिभा सा अस्ति यस्य स प्रतिभावान् तेन प्रतिभावता। हे अमात्य, नारीजनप्रतिभाया अपि भवतः प्रतिभा अधिका अस्ति अतो भवतापि अस्मिन् कर्मणि प्रयत्नः करणीयः इत्यभिधाय धृतकात्यायनीप्रतिकर्मा धृतकात्यायनीवेषा या अर्धवृद्धा काषायवसना अथवा च सा दूती कात्यायनीत्युच्यते। करतलेति—हस्ततलधृतस्फटिकमणिरिव विज्ञातसकलस्त्रीस्वभावा तैस्तैः अन्यमनोहरणमन्त्रैः वचनैः, नयनमनोमोदजनकपदार्थैश्च। अतिदीर्घकालं विहितादरा, परिप्राप्तेति—परिप्राप्तः लब्धः प्रणयस्य प्रीत्या प्रार्थनस्य प्रसरावतारः अवतारोद्भवः यया सा तथाभूता सा दूती एकदा मुदा आनन्देन, रहसि विजने तां पुष्यपुरोहितभार्याम् उद्दिश्य इमं वक्ष्यमाणम् प्रस्तुतेति—प्रसंगप्राप्तकार्यरचनायाः अनुकूलमर्यादोपेतं श्लोकं पद्यम् उदाहार्षीत् उक्तवती—स्त्रीषु इति—अत्र जगति स्त्रीषु नारीषु गङ्गैव जाह्नव्येव धन्या पुण्यवती, या परभोगोपगापि परेषां समीपं भोगदानाय उपगच्छन्त्यपि शंभुना शिवेन मूर्ध्नि मस्तके मणिमालेव रत्नस्रगिव सोल्लासं सानन्दं ध्रियते स्थाप्यते ॥४२५॥ भट्टिनी—(स्वगतम्) इत्वरीति—परपुरुषानेति गच्छति इत्येवं शीला इत्वरी कुलटा पुंश्चली स चासौ जनश्च इत्वरीजनः तस्याचरणम् असत्प्रवृत्तिः तदेव हर्म्यं धनिनां वासः तस्य निर्माणाय प्रथमसूत्रपात इव प्रथमत एव भूमिमापनार्थं सूत्राङ्कनमिव अयं वाक्यप्रस्ताव उपलक्ष्यते। तथा चाह या इयं तावत् आकूतपरिपाकम् स्वाभिप्रायस्य परिपाकं निश्च्योतं सारम्। (प्रकाशं) आर्ये, किमस्य सुभाषितस्य ऐदंपर्यं तात्पर्यम्। धात्री—परमसौभाग्यभागिनि भट्टिनि, उत्तमसौभाग्यवति, भट्टिनि, भट्टं स्वामित्वम् अस्याः अस्तीति भट्टिनी तत्संबोधनं हे भट्टिनि, हे ब्राह्मणभार्ये, जानासि एवास्य सुभाषितस्य कैम्पर्यम् तात्पर्यम्। यदि न वज्रघटितहृदयासि चेद्वज्रेण निर्मितचित्ता न भवसि। भट्टिनी—(स्वगतम्) सत्यं वज्रघटितहृदयाहम्। यदि चेत् भवत्प्रयुक्तोपघातघुणजर्जरितकाया न भविष्यामि। भवत्या प्रयुक्तः यः उपघातः अपकारः स एव घुणः कीटकः तेन जर्जरितः कायः उत्कीर्णः देहो यस्याः तथाभूताहं न भविष्यामि। आर्ये, हृदयेऽभिनिविष्टम् अर्थं मनसि निश्चयेन प्रविष्टम् अर्थम् अभिप्रायं श्रोतुमिच्छामि। धात्री—वत्से, कथयामि किं तु चित्तं द्वयोरिति—ज्ञानम् अभिमानः चित्तोन्नतिः तदुभयम् एव घनं तेन धन्या धीः बुद्धिः यस्य तेन नरेण। द्वयोः पुरतः अग्रतः एव चित्तं निजाभिप्रायः निवेदनीयं कथनीयम्। कौ तौ द्वौ नरौ ययोः पुरतः चित्तं निवेद्यते इत्याह—यः प्रार्थितम् इति—यः नरः अभियुज्यमानः संबध्यमानः प्रार्थितं मित्रस्य याचनादिकं न रहयति न स्फोटयति 'यो वा जनो निजस्य मनसः अनुकूलः भवति, सोऽपि रहस्यं न भिनत्ति। अतः इमौ द्वौ एव नरौ रहस्यकथनयोग्यौ निश्चेयौ ॥४२६॥ भट्टिनी—(स्वगतम्) अहो नभःप्रकृतिम् अपि इयं नभसः आकाशस्य स्वभावम् अपि नैर्मल्यमपि पङ्कैः कर्दमैः उपलेप्तुं क्षिप्तुम् इच्छति आकाशवन्निर्मलस्वभावां मां पतिव्रताम् इयं धात्री असतीजनदोषकर्दमैः क्षिप्तुमिच्छति। इति स्वगतं पश्चा व्यमृशत्। (प्रकाशम्) आर्ये, उभयत्रापि समर्थाहम्, अहं रहस्यभेदिका न भवामि। त्वन्मनसोऽनुकूला च भवामि। चित्तं द्वयोरिति न मदुपज्ञम् न ममाद्यज्ञानम्। न भवदुपक्रमं वा न भवत्या प्रथमं कार्यम् प्रारब्धमिति। न हि मदीय उपाधिर्न च भवदीय उद्यमः किं तु पुरैव ईदृशी गतिरस्ति। धात्री—(स्वगतम्) अनुगुणेयं खलु कार्यपरिणतिः इयं खलु निश्चयेन कार्यपरिणतिः कर्मणः परिणमनम् अनुगुणा मदभिप्रायानुकूला भवति। यदि चेत् निकटतटतन्त्रस्य समीपतीरप्राप्तस्य बहित्रपात्रस्येव नौकाशरीरस्येव दुर्वातालीसंनिपातो न भवेत्। दुष्टो वातः दुर्वातः तस्य आली पङ्क्तिः दुर्वातालो तस्याः संनिपातः वेगेन आगमनं न भवेत्। मम कार्यं तु अधुना सम्यक् अनुकूलप्रायमेव जाने इति धात्री वदति यदि कोऽपि नान्तरायोऽत्र स्यात्। (प्रकाशम्) अत एव भद्रे, वदन्ति पुराणविदः।

[ पृष्ठ १९८ ] विधुरिति—गुरोः बृहस्पतेः कलत्रेण भार्यया सह विधुश्चन्द्रः समगंस्त मैथुनं चकार। गोतमस्य ऋषेः भार्ययाहल्यया सह अमरेश्वरः इन्द्रः। शन्तनोर्नृपस्य च भार्यया गङ्गया सह दुश्चर्मा शंकरः पुरा किल समगंस्त संभोगं चकार ॥४२७॥ भट्टिनी—आर्ये, एवमेव सत्यमेतत्। यतः। स्त्रीणामिति—स्त्रीणां

वपुः शरीरं बन्धुभिः स्वजनैः अग्निसाक्षिकम् अग्निं साक्षीकृत्य परत्र अन्यस्मिन् पुरुषे विक्रीतम् अर्पितम्। परम् इदं मानसं न विक्रीतम्, न दत्तमिति भावः। ननु यत्र विश्रम्भगर्भा निर्वृतिः प्रणयपूर्वा निर्वृतिः संतोषः आह्लादः भवति स एव कृती पुण्यवान् धन्यः तस्य मानसस्य अधिपतिः स्वामी मतः ॥४२८॥ धात्री—पुत्रि, तर्हि श्रूयताम्, त्वं किल एकदा कस्यचित्कुसुमकिंसारुनिर्विशेषवपुषः, कुसुमस्य किंसारवः केशराः तैः निर्विशेषवपुषः समानशरीरस्य कुसुमकेशरकोमलदेहस्येति भावः। **पुराङ्गनेति**—नगरस्त्रीजननयनकमलमोदे अमृतरोचिषः सुधाकरतुल्यस्य कस्यचिन्नरस्य। **प्रासादेति**—प्रासादस्य हर्म्यस्य परिसरे पर्यन्तभुवि विहारिणी त्वम् एकदा। **वीक्षणेति**—नयनमार्गानुयायिनी सती कौमुदीव ज्योत्स्नेव। **हृदयेति**—हृदयम् एव चन्द्रकान्तमणिः तस्य आनन्द एव निःस्यन्दः जलनिर्गमः तस्य संपादिनी अभूः त्वम् अभवः। तत्प्रभृति तद्दिनमारभ्य, ननु तस्य मदनसुन्दरस्य यूनः तरुणस्य। **प्रत्यवसितेति**—प्रत्यवसितः विनष्टः वसन्तश्रीसमागमसमयो यस्य तथाभूतस्य पुष्पंधयस्येव भ्रमरस्येव रसालमञ्जर्यामिव आम्रपुष्पपङ्क्तौ इव भवत्यां महान्ति खलु मन्दमकरन्दास्वादने स्वैरं मकरन्दभक्षणे दोहदानि अभिलाषाः सन्ति। नितान्तं नितरां चिन्ताचक्रपरिक्रान्तं चिन्ता मानसी व्यथा तस्याः चक्रेण परिक्रान्तं व्याकुलं स्वान्तं तस्य मानसम्। **प्रसभमिति**—प्रसभं नितरां तव गुणस्मरणपरिणत्याः आधारं तस्य मनोऽस्ति। **अनवरतमिति**—सततं रामणीयकं तव देहसौन्दर्यम्, तस्य अनुकीर्तनं पुनः पुनः स्मरणं तस्य संकेतो यत्र तथाभूतं तस्य मनः। **प्रविकसदिति**—प्रविकसत् विकासं प्राप्नुवत् कुसुमतुल्यविलासयोग्यवल्लरीसदृशवल्लभाजने संनिहितेऽपि समीपस्थितेऽपि तस्मिन् तस्य महानुद्वेगः, अतीव खिन्नता विद्यते। **पिशाचेति**—पिशाचेन देवविशेषेण छलितस्येव पीडितस्य नरस्येव अस्थाने स्वायोग्ये वस्तुनि अनुबन्धः स्नेहः। **संजातेति**—संजातः उत्पन्न उन्मादः चित्तविभ्रमः यस्य तथाभूतस्य नरस्येव विचित्रः नानाविध उपलम्भः विभ्रमः तेन क्रियाप्रारम्भो यस्य। पुनः कथंभूतः। **स्कन्धेति**—स्कन्धे निजस्कन्धे निजभुजशिरसि गदेन गृहीतस्य नरस्येव प्रतिदिनं लब्धकृशावस्थः। **स्मरेति**—स्मरस्य कामस्य आराधनायां प्रणीतं विहितं प्रणिधानम् ऐकाग्र्यं येन तथाभूतस्य नरस्येव इन्द्रियेषु संनता अवसादः काश्यम् अभवत्। प्राणेषु च अद्यश्वीनकथा असुषु जीविते वा अद्यश्वीनकथा अद्य श्वो वा भवति अद्यश्वीनं मरणं तस्य कथा। अपि च—**अनवरतेति**—अनवरतं सततं जलेन आर्द्राणि क्लिन्नानि यानि आन्दोलनानि व्यजनानि तेषां स्पन्दाः चञ्चलताः तैः मन्दैः अतिसरसा अतिस्निग्धा या मृणाल्यः कमलिन्यः तासां कन्दलैः अङ्कुरैः नालैः कथंभूतैः चन्दनार्द्रैः चन्दनेन आर्द्रैः क्लिन्नैः एतैः सर्वैः करणभूतैः हे प्रियसखि, **अमृतेति**—अमृतरुचिः चन्द्रः तस्य मरीचयः कराः तैः प्रौढिता प्रगल्भता यस्यां तथाभूतायां निशायाम् ते सुहृदः मित्रस्य वल्लभस्येत्यर्थः किंचित् आत्मप्रबोधः अल्पस्वानुभूतिर्विद्यते। स्मरव्यथया तव वल्लभोऽतीव पीडितः इति भावः ॥४२९॥

[ पृष्ठ १९९-२०० ] भट्टिनी—आर्ये, किमित्यद्यापि गोपायते, केनाहं दृष्टा, कः स्मरपीडितः तस्य नामादिकं कथं न कथयसीत्यर्थः। मा निह्नुष्व सर्वं स्फुटं कथयेति भावः। धात्री—( कर्णजाहमनुसृत्य ) एवमेवम्। सचिवपुत्रः कडारपिङ्गः स्मरपीडित इति भावः। भट्टिनी—को दोषः। धात्री—कदा। कदा तेन आगन्तव्यम् इति प्रश्नो धात्र्या कृतः। भट्टिनी—यदा तुभ्यं रोचते। तदा तेनागन्तव्यम् इतश्च अनन्तरायतया निर्बाधतया तया पत्न्या पुष्यभार्यया अनुमता सा धात्री। तनयानुमताहितमतिपाटवः तनयस्य अनुमतं प्रियं यत्कार्यं तत्र आहितं स्थापितं मतिपाटवं बुद्धिचातुर्यं येन स सचिवोऽपि उग्रसेनोऽपि। **नृपतीति**—नृपतेः धर्षणाह्वस्य निवासे गृहे उचितप्रचारेषु उचितः योग्यः प्रचारः प्रवर्तनं येषां तेषु वासरेषु दिनेषु यातेषु कस्मिंश्चिद्दिने गुणव्यावर्णनप्रसंगे आगतम् एतस्य महीपतेः नृपस्य पुरतः श्लोकम् इमम् उपन्यास्थत् अपठदित्यर्थः। **राज्यमिति**—यस्य वेश्मनि गृहे किंजल्पः पक्षिविशेषः विद्यते तस्य राज्यं विवर्धते। सिद्धात् मन्त्राराधनाल्लब्धाच्चिन्तामणेर्यथा किंजल्पपक्षिप्राप्तेः शत्रवश्च क्षयं यान्ति ॥ ४३० ॥ राजा—अमात्य, क्व तस्य प्रादुर्भूतिः, कीदृशी च तस्याकृतिः। अमात्यः—देव, भगवतः पार्वतीपतेः पूज्यस्य गौरीवल्लभस्य श्वशुरस्य पार्वतीपितुः, कथंभूतस्य श्वशुरस्य। **मन्दाकिनीति**—मन्दाकिन्याः गङ्गायाः स्पन्दः प्रवाहः तस्य निदानं कारणं कन्दरनीहारो गुहाहिमं यस्य। पुनः कथंभूतस्य। **रमणेति**—रमणः पतिः सहचरो सहयायी यासां ताः खेचर्यः खगाङ्गनाः तासां सुरतस्य संभोगस्य परिमलः विमर्दोत्थजनमनोहरगन्धः, तेन मत्ता लम्पटा

ये मत्तालयः मत्तभृङ्गाः तेषां मण्डली समूहः तेन विलिख्यमाना रच्यमाना मरकतमणिमेखला मरकतानां मणीनां हरिन्मणीनां मेखला रशना यस्य। पुनः कथंभूतस्य। कृत्स्नोत्पलेति—कृत्स्नोत्पलाः कर्णिकाराः तेषां षण्डः समूहः तेन मण्डितं भूषितं शिखण्डम् अग्रं यस्य रत्नशिखण्डनाम्नः शिखरस्य अभ्यासे समीपे निःशेषाः सकला ये शकुन्ताः पक्षिणः तेषां संभवम् उत्पत्तिम् आवहति धारयतीति तथाभूता गुहा समस्ति। यस्यां जटायु-वैनतेय-वैशम्पायनप्रभृतयः शकुन्तयः पक्षिणः प्रादुरासन् अजायन्त। तस्यामेव तस्य किञ्जल्कपक्षिणः उत्पत्ति-र्जन्म। तां च गुहाम् अहं पुष्यश्च अनेकशः असकृत् नन्दाभगवतीयात्रानुसारित्वात् गौरीभगवत्याः यात्रामनु-सृत्येत्यर्थः, साधु जानीवः। प्रकृतिश्चास्य अनेकवर्णा मनुष्यसवर्णा नरसमाना च। भूपालः—( संजात-कुतूहलः ) अमात्य, कथं तद्दर्शनोत्कण्ठा ममाकुण्ठा स्यात्। तस्य किंजल्कपक्षिणो दर्शनस्य उत्कण्ठा मम अकुण्ठा सा, उत्कण्ठा कथं मम सफला स्यादिति भावः। अमात्यः—देव, मयि पुष्ये च गते सति। राजा—अमात्य, भवान् अतीव प्रवयाः वृद्धः। तत्पुष्यः प्रयातु। अमात्य—देव, तर्हि दीयताम् अस्मै सरत्नालंकार-प्रवेकम्, पारितोषिकम्। रत्नालंकाराश्च ते प्रवेकाश्च उत्तमाः रत्नालंकारप्रवेकाः तैः सहितं सरत्नालंकार-प्रवेकम् पारितोषकं परितोषजनकं द्रव्यम् अस्मै पुष्याय दीयताम्। अगणेयं पाथेयं च विपुलं पाथेयं पथि व्ययितव्यद्रव्यं शम्बलमिति भावः। राजा—बाढम्। अत्र मम संमतिरस्ति इति भावः। स्वामिचिन्ताचार-चक्षुष्यः पुष्यः स्वामिनो धर्षणनृपस्य चिन्ता यथा अभिप्रायोऽस्ति तथा आचारेण प्रवर्तनेन चक्षुष्यः नेत्रानन्द-जनकः पुष्यः तथा राज्ञादिष्टः गेहम् आगत्य 'आदेशं न विकल्पयेत्' नृपतिना आदेशः ईदृश एव कथं कृतः अन्यादृशः कथं न कृतः इति विकल्पः न कर्तव्यः इति मतानुसारी प्रयाणसामग्रीं कुर्वाणः तया सतीव्रतपवित्रित-सद्मया पद्मया सतीव्रतेन पवित्रितं सद्म गृहं यया तथाभूतया पद्मया पृष्टः—भट्ट, किमकाण्डे किम् अनवसरे प्रयाणाडम्बरः देशान्तरगमनारम्भः। पुष्यः—प्रस्तुतमाचष्टे प्रतिपन्नं कथयति। भट्टिनी—भट्ट, सर्वमेतत्स-चिवस्य कूटकपटचेष्टितम्। कूटम् अनृतमयं कपटचेष्टितम् अनृतमयमायाव्यवहारः। भट्टः—भट्टिनि, किं न खलु एतच्चेष्टितस्यायतनम्। एतत्कूटकपटव्यवहारस्य किमास्पदम्। भट्टिनी—प्रकान्तम् अभाषिष्ट। पूर्ववृत्तं सकलम् अभाषत। भट्टः—किमत्र कार्यम्।

[ पृष्ठ २०१ ] भट्टिनी—कार्यमेतदेव। दिवा सप्रकाशं सर्वजनसमक्षम् एतत्पुरात्प्रस्थाय निशि निभृतं च प्रत्यावृत्य गूढं पुनरागम्य अत्रैव महावकाशे निजवासनिवेशे विपुलदेशे निजगृहापवरके सुखेन वस्त-व्यम्। उत्तरत्राहं जानामि। तदनन्तरं कार्यम् अहं पारयिष्ये। भट्टः—तथास्तु। ततोऽन्यदा तया पर-निकृतिपात्र्या धात्र्या अन्यप्रतारणपात्रभूतया धात्र्या उपमात्रा स दुराचाराभिषङ्गः असदाचारासक्तः कडार-पिङ्गः सुप्तजनवेलायाम् आनीतः। "समभ्यसतु तावत् इहैव इयं धात्री, अयं च कडारपिङ्गः महीमूलं पाताल-तलं नरकं यियासुः जिगमिषुः पातालवासदुःखं समभ्यसतु आवर्तयतु।" इत्यनुध्याय इति चिन्तयित्वा तया पद्मया महावर्तस्य विपुलविस्तारस्य गर्तस्य कूपवत् गम्भीरभूमिरन्ध्रस्य उपरि कल्पितायां स्थापितायाम् अवानी-यायां रज्ज्वादिनिवेशरहितायां खट्वायां मञ्चके क्रमेण उपवेशितवपुषौ स्थापितदेहौ तौ द्वावपि दुरातङ्कबन्धे महाव्यथायुक्ते श्वभ्रमध्ये गर्ते विनिपेततुः अपतताम्। अनुबभूवतुश्च अन्वभवतां च निखिलपरिवारजन-भुक्तावशिष्टभक्तादिभोजनौ कुम्भीपाकवत् उपक्रमः यस्य तथाभूतं षट्समाशाखान् समायाः षट्शाखाः षट्-विभागाः तावत्कालं दुःखक्रमम्। समायाः वर्षस्य शाखाविभागाः मासाः षट् च ताः समाशाखाः षट्समाशाखाः षण्मासानिति यावत्। षण्मासावधि दुःखक्रमम् अनुबुभुजतुः। पुनरेकदा "स्वाम्यादेशविशेषविदुष्यः पुष्यः नृपाज्ञाविशेषे चतुरः पुष्यभट्टः तथाविधपक्षिप्रसवसमर्थपक्षिणीसहितं किंजल्पजातीयविहगजननसमर्थया विहग्या संयुक्तं कृतो विहितः पञ्जरे परिकल्पो बन्धः यस्य तं किंजल्पम् आदाय गृहीत्वा आगच्छन्, त्रिचतुरेषु वासरेषु दिवसेषु अस्यां पुरि प्रविशति।" इति प्रसिद्धिप्रवर्तिनी इति वार्तां घोषयन्ती। विविधवर्णविडम्बितकायेन नीलपीतादिवर्णैर्विविधैर्विडम्बितौ चित्रितौ कायौ यस्य तद्द्वयेन, पुनः कथंभूतेन तद्द्वयेन। चटकेति—चटकः कलविंकः, चकोरः जीवंजीवः यो ज्योत्स्नया मोदते। चाषः किकीदिविर्नाम पक्षी, चातकः सारङ्गाख्यः पक्षी एते आदौ येषां ते चटकादयः तेषां छदाः पक्षाः तैः छादिता आवृताः प्रतीकस्य शरीरस्य निकाया अवयवाः यस्य तथाभूतेन तद्द्वयेन पञ्जर एव आलयः गृहं यस्य तद्द्वयेन सहस्रचिरप्रवासोचितवेषजोष्यं पुष्यं

रुचिरेण सुन्दरेण प्रयाणयोग्यवेषेण जोष्यं सेवनीयं तं पुष्यं पुरः अग्रे वने विनिवेश्य स्थापयित्वा । भट्टेति—भट्टात् पुष्यभट्टात् हेतोः उद्भूतः जातः आरम्भः यस्य तथाभूतेन संभाषणेन सनाथो युक्तः यः सखीजनः तेन संकल्पा भूषिता । धृतेति—धृतः प्रोषितभर्तृकायाः आकल्पो वेषो यया सा, ( प्रकृष्ट दूरं गतः प्रोषितः प्रवासं गतो भर्ता यस्याः सा प्रोषितभर्तृका ) अभिमुखम् अयासीत् अगच्छत् । अपरेद्युः अन्यस्मिन्दिने स निखिलगुणा एव द्रविणं धनं तेन विशेष्यः इतरजनेभ्यः असमानः पुष्यः पृथिवीपतिभवनं धर्षणनृपप्रासादम् अनुगम्य 'देव, अयं स किंजल्पः पक्षी, इयं च तत्प्रसवित्री माता पतत्रिणी च पक्षिणी च, इत्याचरत् इत्यवदत् ।

[ पृष्ठ २०२-२०३ ] राजा—( चिरं निर्वर्ण्य निर्णीय च स्वरेण ) पुरोहित, नैष खलु किंजल्पः पक्षी, किं तु कडारपिङ्गोऽयम् । एषापि विहङ्गी पक्षिणी न भवति किं तु तडिल्लतेयं कुट्टिनी पुरुषेण सह परस्त्रीयोगम्य कर्त्री । पुष्यः—देव, एतत्परिज्ञाने प्रगल्भमतिप्रसवः सचिवः । देव एतस्य किंजल्पपक्षिविषयकपरिज्ञाने प्रगल्भः प्रौढः मतिप्रसवः बुद्ध्युत्पादः यस्य तथाभूतः सचिवः । राज्ञा सचिवस्तथा पृष्टः क्ष्मातलं पातालं प्रविविक्षुरिव प्रवेष्टुमिच्छन्निव क्षोणीतलं भूतलम् अवालोकत ऐक्षत । राजा—पुष्य, समास्ताम् । अयं भवान् ऐतिह्यनिकरं प्राग्वृत्तजातं कथयितुम् अर्हति । प्राग्वृत्तं सकलं कथयेति राजा पुष्यम् अपृच्छत् । पुष्यः—स्वामिन्, कुलपालिकात्र प्रगल्भते । कुलं पालयति इति कुलपालिका कुलवती मे धर्मपत्नी ऐतिह्यनिकरं कथयितुं प्रगल्भते समर्था भवति । भूपतिः भट्टिनीम् आहूय 'अम्ब, कोऽयं व्यतिकरः किं प्रकरणमिदम्' इत्यपृच्छत् । भट्टिनी तदुदन्तं तत्प्रकरणस्य पूर्ववृत्तान्तम् आख्यत् अवर्णयत् । काश्यपीश्वरः कश्यपस्येयं काश्यपी पृथ्वी तस्या ईश्वरः अधिपतिः धर्षणः शैलूष इव नटवत् हर्षामर्षोत्कर्षस्थामवस्थामनुभवन् आनन्दकोपोत्कटाम् अवस्थां दशाम् अनुभवन् सकलनिशान्तस्थितस्त्रीजनप्रणम्यमाणचरणकमलां तां पद्मां तैस्तैः साध्वीगणानन्ददैः स्तुतिवचनैः संमानसंनिधानैः समादरसूचकैः भूषणदानैश्च उपचर्य पूजयित्वा, वेदविद्द्विजोह्यमानकर्णीरथारूढां स्त्रीणां वाहनार्थं वस्त्रादिना आच्छादितस्य रथविशेषस्य कर्णीरथ इति नाम । वेदविद्भिः वेदार्थं जानद्भिः द्विजैः विप्रैः स्कन्धे धृत्वा नीयमानकर्णीरथम् आरूढां पद्मां वेश्म गृहं प्रवेश्य, पुनः 'अरे निहीन नितरां हीन नीच, किमिह नगरे न सन्ति सकललोकसाधारणभोगाः अखिलजनसामान्यैर्भुज्यमानाः सुभगाः सुन्दराः सीमन्तिन्यः नार्यः किमिति न सन्ति येनैवम् आचरः दुराचरणं कृतवान् । कथं च दुराचार, एवमाचरन् न अत्र विलायं विलीनोऽसि । दुर्व्यवहार, एवम् आचरणं कुर्वंस्त्वं लवणवत् जले कथं न विलीनोऽसि । तत् इदानीमेव यदि भवन्तं तृणाङ्कुरमिव तृणेह्मि हन्मि, तदा तव हुंकृतम् अभिमानः अपकृतं स्यात् नष्टं भवेत् ।' इति निर्भरम् अतिशयेन निर्भर्त्स्य तर्जयित्वा दुर्नयनगरभुजंगं दुराचारपुरजारं कडारपिङ्गं कुट्टिनीमनोरथातिथिं कुट्टिन्याः परस्त्रियं पुरुषेण योजयन्त्याः विद्युल्लतायाः मनोऽभिलाषस्य अतिथिम् अभ्यागतं सतृणं तृणेन सहितम् उग्रसेनमन्त्रिणं च निखिलजनसमक्षम् आक्षारणापूर्वकं परस्त्रीनिमित्तं दूषणं दत्त्वा प्रावासयत् देशान्तरं प्राहिणोत् । दुष्प्रवृत्तानङ्गमातङ्गः दुष्प्रवृत्तेन दुराचारेण अनङ्गत्वात् कामाकुलत्वात् मातङ्गः चाण्डालसदृशः, कडारपिङ्गः तथा प्रजाप्रत्यक्षं पौरसमक्षम् आक्षारितः परस्त्रीनिमित्तं दत्तदूषणः सुचिरं दीर्घकालम् एतदेनःफलम् अनुभूय एतस्य परस्त्रीपापस्य फलं भुक्त्वा दशमीस्थः मरणावस्था दशमीत्युच्यते तस्यां तिष्ठतीति दशमीस्थः । मरणं प्राप्तः सन् श्वभ्रप्रभवभाजनं श्वभ्रे नरके प्रभवः उत्पत्तिः तस्य भाजनं पात्रं जनम् अभजत् । नरके समुत्पन्न इति भावः । भवति चात्र श्लोकः—मन्मथेति—मन्मथः कामः तेन उन्माथितं पीडितं स्वान्तं मनः यस्य, परस्त्रिया सह रतिः संभोगः तस्मिन् जाता धीः मतिर्यस्य स कडारपिङ्गः संकल्पात् परस्त्रीसंभोगमनोऽभिलाषात् रसातले नरके निष्पात पतितः अजायतेति भावः ॥ ४३१ ॥

इत्युपासकाध्ययनेऽब्रह्मफलसाधारणो नाम एकत्रिंशत्तमः कल्पः ॥३१॥

## ३२. परिग्रहाग्रहफलफुल्लनो नाम द्वात्रिंशत्तमः कल्पः

[ पृष्ठ २०३-२०४ ] ममेदमिति—बाह्याभ्यन्तरवस्तुषु गोमहिषमणिमुक्तादिषु बाह्यवस्तुषु रागादिषु च अभ्यन्तरवस्तुषु मम इदम् इति संकल्पः संरक्षणार्जनसंस्कारादिरूपः परिग्रहः मतः तत्र चेतसः मनसः निकुञ्चनं सङ्कोचनं कुर्यात् तेषु मनोऽभिलाषं कर्शयेदित्यर्थः ।।४३२।। बाह्यपरिग्रहान् व्याचष्टे—क्षेत्रं सस्योत्पत्तिस्थानम्, धान्यं शालिव्रीह्यादिकम्, धनं हिरण्यरूप्यादि, वास्तु गृहं, कुप्यं क्षौम-कार्पास-कौशेय-चन्दनादि । शयनं शय्या, आसनं पीठमञ्चादिकम्, द्विपदाः दासीदासम्, पशवः गोमहिषादयः, भाण्डं भाजनानि । इति बाह्या दश परिग्रहाः ।।४३३।। अभ्यन्तरपरिग्रहाः—समिथ्यात्वा इति—मिथ्यात्वेन अतत्त्वश्रद्धानेन सहिताः त्रयो वेदाः स्त्रीवेदः पुरुषेण सह रमणाभिलाषः नार्यामुत्पद्यते । पुरुषवेदः नार्या सह रमणाभिलाषः पुरुषे । नपुंसकवेदः उभाभ्यां रमणाभिलाषः । हास्यादयः षट् हास्यं, रतिः, अरतिः, शोकः, भयम्, जुगुप्सा । चत्वारश्च कषायाः क्रोध-मान-माया-लोभाः । इति अन्तःपरिग्रहाः चतुर्दश । अन्तर्ग्रन्था अपि कथ्यन्ते । अन्तः आत्मनि यैः संसारः ग्रथ्यते बध्यते ते ग्रन्थाः राग-द्वेष-लोभ-मोहादयः परिणामविशेषाः ते चात्मन्येव संभवन्ति ।।४३४।। बाह्यान्तरङ्गपरिग्रहवर्णनम्—चेतनेति—बाह्येषु स्वस्माद् भिन्नेषु चेतनेषु गो-महिष-पुत्र-कलत्रादिषु आसक्तिः एकः बाह्यश्चेतनपरिग्रहः मणिमुक्तायगृहादिषु अचेतनेषु आसक्तिः द्वितीयः अचेतनः बाह्यः परिग्रहः इति बाह्यचेतनाचेतनपदार्थासक्तेः बाह्यपरिग्रहद्वैविध्यम् । परं भवहेत्वाशयाश्रयः संसारकारणा ये मिथ्यात्वाविरत्यादयः आशयाः चैतन्यरूपाः परिणामाः ते आश्रयः आधारः यस्य स अन्तःपरिग्रहः एक एव । उपाधिभेदाद् द्विविधत्वम् अन्तःपरिग्रहस्य निगदन्त्याचार्याः शिष्यावबोधार्थम् ।।४३५।। धनायेति—धनाया धनाभिलाषा तया आविद्धबुद्धीनां व्याकुलमतीनां नराणां मनोरथाः अधनाः धनरहिता भवन्ति । हि यस्मात्कारणात् अनर्थक्रियारम्भा धीः तदर्थिषु कामधुक् न भवति । अर्थः प्रयोजनं यस्याः सिध्यति सा क्रिया अर्थक्रिया न अर्थक्रिया अनर्थक्रिया अनर्थक्रियाया आरम्भो यस्यां सा धीः मतिः तदर्थिषु अर्थार्थिषु धनार्थिषु कामधुक् न भवति कामान् इष्टाभिलषितान् न दुग्धे । इच्छया मनोरथैर्वा धनानि न लभ्यन्ते । धनप्राप्तिकारणम् अन्तरायकर्मणां क्षयोपशमोऽभाणि इति मत्वा आर्तध्यानं न कर्तव्यम् ।।४३६।। सहेति—सह युगपत् समकालीना संभूतिः आत्मना सह जन्म यस्य स एष देहोऽपि यत्र शाश्वतः नित्यः न, तत्र द्रव्यदारकदारेषु द्रव्यं धनम्, दारकः सुतः दारा पत्नी, एतेषु महात्मनां निःस्पृहाणां का आस्था कः प्रयत्नः ।।४३७।। स इति—यः धर्माय दानपूजनादिकार्याय धनागमं धनप्राप्तिं न विनयेत नोपयुङ्क्ते, तथा भोगाय यः धनागमं नोपयुङ्क्ते तस्य स विफल एवाजागलस्तनवत् ।।४३८।। प्राप्ते इति—ये धने प्राप्ते लब्धे न माद्यन्ति न गर्विणो भवन्ति । ये प्राप्तिस्पृहयालवः न भवन्ति । धनप्राप्त्यै न स्पृहयन्ति च त एव महात्मानः लोकद्वयाश्रितां इहपरलोकयुगलाश्रितानां लक्ष्मीणां परमेश्वरा भवन्ति । उपर्युक्ता एव महात्मानः इहलोके चक्रवर्तिश्रियं लभन्ते परलोके स्वर्गादौ इन्द्रविभूतिं च प्राप्नुवन्ति । ।।४३९।। चित्तस्येति । हे चित्त हे मनः, वित्तस्य धनस्य चिन्तायाम् अभिलाषायाम् एनसः पापात् परम् अन्यत् फलं लाभो न । हि यतः उचितमेवैतत् अस्थाने अविषये क्लिश्यमानस्य प्रयतमानस्य नरस्य चित्तस्य वा क्लेशाद् दुःखात्परम् अन्यत् फलं न भवति ।।४४०।। निःसंगस्य सुखं भवतीति निश्चिनोति—अन्तरिति—अन्तःसंगे अन्तरङ्गे । परिग्रहे रागादौ । बहिर्गते परिग्रहे मणिमुक्तादिके । यस्य मानसं निःसंगम् अनासक्तं भवति । स अगण्यपुण्यसंपन्नः असंख्यसुकृतपूर्णः नरः सर्वत्र सुखम् अश्नुते लभते ।।४४१।।

[ पृष्ठ २०५ ] बाह्येति—बाह्ये मणिमुक्तादिषु पुत्रकलत्रादिके च । संगे परिग्रहे । रते आसक्ते । पुंसि पुरुषे । चित्तविशुद्धता मनोनैर्मल्यं कुतः कथं स्यात् । बहिः सतुषे वान्ये बाह्ये सत्वचि सस्ये अन्तःविशुद्धता अन्तर्निर्मलता दुर्लभा भवति ।।४४२।। सत्पात्रेति—यः पुरुषः सत्पात्रे रत्नत्रयवति मुनौ श्रावके च विनियोगेन धनार्पणेन अर्थसंग्रहतत्परः धनार्जने तत्परः प्रवणो भवति स लुब्धेषु महालुब्धः यतः लुब्धः यावज्जीवं धनं न त्यजति परं मृतः स्वेन सह अमुत्र परस्मिल्लोके धनं नेतुमसमर्थः । परं सत्पात्रे धनं विनियुञ्जानः परलोकेऽपि धनं नयति अतः स एव लुब्धेषु महालुब्धः ज्ञेयः ।।४४३।। परिग्रहप्रमाणाणुव्रतहानिः प्रदर्श्यते—कृतेति—कृतं प्रमाणं परिमाणं यस्य तस्मात् धनात् । लोभेन अधिकसंग्रहः अधिकधनसंग्रहः यस्य भवति स गृहमेधिनां पञ्च-

माणुव्रतचतुर्थानि पञ्चमाणुव्रतहानिं करोति ॥४४४॥ अस्मिन् द्वन्द्वद्वयेऽपि उभयपरिग्रहेऽपि यस्य देहिनः शरीरिणः। मनः निःस्पृहं वर्तते । स पुरुषः स्वर्गापवर्गलक्ष्मीणां पक्षे क्षणात् दक्षते चतुरो भवति। निःस्पृहचित्तस्य नरस्य स्वर्गापवर्गलक्ष्मीणां प्राप्तिर्भवति॥४४५॥ अत्यर्थम्-अतिशयेन अर्थकांक्षायां धनाभिलाषायां नृणाम् अघौघसंचितं पापसमूहसंभृतम् । चेतः संसारावर्तवर्तगं भवस्य आवर्तः गर्तः तत्र वर्त्तं वर्तनं गच्छतीति संसारावर्तवर्तगम् । भवगर्तभ्रमणवत् भवति जायते ॥४४६॥

[ पृष्ठ २०५–२०७ ] श्रूयतामत्र परिग्रहाग्रहस्योपाख्यानम्—पाञ्चालदेशेषु त्रिदशेति—त्रिदशानां देवानां निवेशः निवासः स्वर्गः तद्वत् अनुकूले सुखजनके उपशल्ये समीपे । काम्पिल्ये तन्नामके नगरे रत्नप्रभो नाम नृपतिः । कथंभूतः सः । निर्जेति—स्वधीप्रभावधिक्कृतदेवगुरुप्रज्ञः । अस्य मणिकुण्डला नाम महादेवी कथंभूता सा । आत्मीयेति—आत्मनः इमौ आत्मीयौ तौ च तौ कपोलौ गण्डौ तयोः कान्तिर्द्युतिः तया विजितं पराभूतम् अमृतमरीचेः सुधाकरस्य चन्द्रस्य मण्डलं ययेति । अस्य नृपस्य सागरदत्तो नाम श्रेष्ठी । कथंभूतः सः । कुलेति—कुलं वंशः तस्य क्रमः परम्परा तस्मात् आगतं प्राप्तम् आत्मोपार्जितं च स्वेन संपादितं च अमितं विपुलं वित्तं यस्य सः । सागरदत्तो नाम श्रेष्ठी । गृहस्य श्रीरिव रमा यथा धनश्रीर्नामास्य भार्या । सूनुः पुत्रः अनयोः धनश्रीसागरदत्तयोः सुदत्तो नाम । कथंभूतः सः । न्यायादनपेतो न्याय्यः स चासौ अर्थः न्याय्यार्थः स्वामिमित्रविश्वसितद्रोहवञ्चनादिकविरहितः अर्थः न्याय्यार्थः तस्योपार्जने एकं चित्तं तत्परं मनो यस्य सः सुदत्तो नाम सूनुः पुत्रः । स सागरदत्तः कथंभूतः । महालोभेति—महालोभ एव विभावसुरग्निः तेन ज्वलत् दहत् चित्तस्य मनसः भित्तम् अंशो यस्य सः सागरदत्तः । पुरुषेति—अनेकपूर्वपुरुषक्रमेणागतायाः सुवर्णकोटेः, स्वयं संपादितार्धकोटेः स्वामी भवन्नपि शालीयादिभक्तभोजने कलमाद्यन्नभुक्तौ द्वयोः तुषयोः त्वचोः अपनीतिर्हानिर्भवति । द्वावनाघ्राणाकृतिश्च द्वौ तुषौ अनाघ्राणाकृती च अग्निजलसंयोगेनापि अपक्वावस्थावेव तिष्ठतः । शाकानां पाकविधाने अग्निना पक्वत्वकरणे संभारादिकृतिश्च तल्लवनक्रियायां तन्मूलानां शाकनाडिकानां कठिनावयवानां च अपनयनं क्रियते, प्रसभं यथेच्छम् अभ्यवहृतिश्च भक्षणं च भवति । घार्तपूराः घार्तिकाख्याः भक्ष्यविशेषाः, पूरिमा पोलिका, वेष्टिमावेष्टनाकारा ( 'जिलेबी' इति भाषायाम् ) एतेषां भक्ष्याणाम् उपक्षेपे ग्रहणे भक्षणे वा महती महान् स्नेहापहृतिः घृततैलादिविनाशः स्यात् इन्धनानां काष्ठानां विरतिः हानिर्भवेत् । दुग्धदधिघोलरसाद्युपयोगे भक्षणे कृते विक्रय कर्तुं न शक्यते 'यत्तु सस्नेहमजलं मथितं घोलमुच्यते' न च तक्रं कडङ्गरायेति भक्ष्यविशेषाय तक्रस्यापि उपयोगो न भवेत् । इति मन्यमानः विमर्शं कुर्वन् स्वयमेव प्रतिदिवसवृद्धिग्रहणाय प्रतिदिनम् अधमर्णात् कुसीदग्रहणाय छवजलोकपाटके छवजलोकास्तैलिकाः तेषां पाटके गृहपङ्क्तौ विहरमाणः गच्छन् प्रतिपित्तृप्रियन्त्रमुपसृत्य तिलंतुदयन्त्राणां समीपं स्थित्वा आः सुरभिः सुगन्धिः खलु एष खलः पिण्याकं संजातः इति सस्मेरं स्मितं कृत्वा व्याहरन् ब्रुवाणः, गृहीतपिण्डखण्डः स्वीकृतपिण्याकशकलः, प्रत्यवसानसमये भोजनवेलायां तद्गन्धम् आजिघ्रन् सन् सर्वजनत्यक्तम्, अतीतकालमर्यादं जीर्णमित्यर्थः अतिक्रान्तसमर्घम् अतीव सुलभं दरिद्रेणापि प्राप्यम्, अकण्डितमेव च स्थालीबिलीयं स्थालीनिहितं तदौदनादिकं शीघ्रं पक्वं भवति तत् केवलम् अवन्तिसोमेन सह काञ्जिकया सह अयं सागरदत्तः आहरति भक्षयति । अत एव अस्य महामोहसंबद्धस्य पिण्याकगन्ध इति नाम जगति पप्रथे, प्रसिद्धं बभूव । 'मुखामोदमात्रेण च प्रयोजनम् । तदलं ताम्बूलार्थम् अर्थव्ययेन, धनत्यागेन' । इति विचिन्त्य विष्णुतरुत्वचः वृक्षविशेषस्य या त्वक् तस्याः कालवल्लीदलोत्तरास्वादश्चः पिप्पलछल्ली बावचीपत्राणां च पश्चाद्भोजनेन रुक् रुचिर्यासां विष्णुतरुत्वचः ताः कवलयति भक्षयति । अर्धघ्राणोदरः परिवारः ऊनभोजनः भृत्यवर्गः कदाचिदपि देहे हृदये वा न मनागपि विकुरुते आलस्ययुक्तो न भवति । इति मत्वा न कमप्यूर्धपूरं पूरयति । कुक्षिपूरणमात्रम् अन्नं कस्यापि न ददाति । प्रतिचारकांश्च स्वभृत्यांश्च एवं शिक्षयति उपदिशति—'न तैलार्थं लवणार्थं वित्तं व्ययितव्यम्' किं तु कार्षापणं माषं चादाय कार्षापणं कर्षिकाख्यं पणाख्यं वा नाणकम् आदाय तथा माषं चादाय गृहीत्वा येन तैलादिकं मीयते तद्भाण्डं चादाय आपणं विपणिं उपढौक्य गत्वा तदुभयं गृहीत्वा पुनरिदं साधु न भवति इति समर्पयन्नापणिकाय तत्र मापे भाण्डे किंचिल्लग्नम् आयाति

तेन शारीरो विधिर्विधातव्यः तेन तैलेन अङ्गस्य म्रक्षणं कृत्वा स्नानं विधातव्यम्। परिजनार्भकान् भृत्यबालान् स्वकीयांश्च निजज्ञातिबालांश्च उपजपति ( उपजापयति ) भेदयति। न भवद्भिः अङ्गाभ्यङ्गार्थं भवनम् उपद्रोतव्यम्। अङ्गेषु अभ्यङ्गस्नानाय भवनं गृहं न उपद्रोतव्यम् न उद्वेजितव्यम् किं तु प्रातिवेशिकशिशुसंदोहैः सहातिसंबाधं योद्धव्यम्। आसन्नगृहिणां बालकसमूहैः सह अतिसंबाधं मल्लयुद्धं विधेयम्। अस्माद्धेतोः भवताम् अनुपायसंनिधिः स्नानविधिः। उपायमन्तरा प्रयत्नमन्तरेण अभ्यङ्गस्नानकार्यं स्यात्। क्षपायां च रात्रौ प्रतिवेशवेश्मप्रदीपप्रभाप्रज्वलितेन आसन्नगृहे प्रदीपकान्त्या प्रकाशितेन वलीकान्तावलम्बितेन काचमुकुरेण नीध्रान्ताश्रितेन काचदर्पणेन गृहाङ्गणे प्रदीपकार्यं कर्तव्यम्। तथा निकाय्यमध्ये गृहस्य मध्ये मध्येगृहं शणसरण्ड-प्रोतैः विषमरुचिदीप्तैः उरुबूकबीजैः शणाग्रसंलग्नैः प्रोतैः अग्निप्रज्वलितैः एरण्डबीजैः प्रदीपकार्यं करोति। प्रदीपप्रकाशं विदधाति। सकलजनसाधारणाश्च नवीनसंगा एव युगाः सर्वजनसामान्यानि नवीनसंगाः नूतनान्येव निर्मितानि वस्त्राणि सपरिच्छदः स्वपरिवारयुक्तः परिदधाति धारयति। मनाक् ईषत् मलीमसरागाश्च मलिनो रागो रंगो येषां तान् विक्रीणीते। ततोऽस्य वसनधावनार्थं वस्त्रप्रक्षालनाय न कपर्दकोपक्षयः न धनव्ययः। पर्वाणि च पर्वदिनानि च उत्सवदिवसान् पुराणानि जीर्णानि पल्लवानि पर्णानि कचवरं कच्चरं तेषाम् अपनयनकरणं त्यागः यत्र तथाभूतेन उत्करेण नखादिना आकर्षणेन आतपतप्तसंघाटस्नेहद्रवेण आतपेन रविकिरणतापेन तप्ता ये निबिडाः संघाटाः गुडांशास्तेषां स्नेहद्रवेण स्निग्धपाकेन गुडगोणीक्षालनकषायेण च गुडोपेतगोणीनां क्षालनेन धावनेन संजातकषायरसेन च निवर्तयति यापयति। प्रत्यामन्त्रणेन भोजनार्थं लोकानाम् आह्वानेन द्रविणव्ययात् धनत्यागात् परागारभोजनावलोकनेन परगृहे यद्भोजनं भुज्यते तस्य आलोकनेन प्रेक्षणेन भोजनकार्यं निवर्तयति। आश्रितजनमनोविनाशभयाच्च आमन्त्रितोऽपि भोजनार्थम् आहूतोऽपि परगृहे भोजनाय न गच्छति यदि तत्र गच्छामि भोजनाय तर्हि आश्रितजनानां मनः विकृतं भवेत् ते धनस्य चौर्यं कुर्युः अतः न कस्यापि निकेतने गृहे प्साति भक्षयति। कथंभूते पिण्याकगन्धे।

[ पृष्ठ २०७-२१० ] एवमतीव तर्षोत्कर्षरसहार्ये तर्षस्तृष्णा तस्य उत्कर्षः प्रवृद्धिः तस्य रसः प्रेम तेन हार्ये तदधीने इत्यर्थः। पुनः कथंभूते। **सकलेति**—सकलानां कदर्याणां कृपणानाम् आचार्ये महाकृपणे इति-भावः। तथाभूते तस्मिञ्जीवत्यपि मृतकल्पमनसि मृतेन सदृशं मृतकल्पं तन्मनः यस्य सः मृतकल्पमनाः तस्मिन् वसति सति। एकदा ( रत्नप्रभो नृपः चैत्यालयनिर्माणाय सुवर्णेष्टकाः स्तूपताम् आनयत् ) रत्नप्रभो नृपः **राजसिन्धुरेति**—राजानः एव सिन्धुराः हस्तिनः तेषां प्रधावस्य अभिद्रवस्य आक्रमणस्य संदर्शनाय अवलोकनार्थं प्रासादस्य संपादनाय रचनाय। **श्रवणेति**—श्रवणौ कर्णौ तौ आश्रयीभूतौ वृत्तस्य यस्य तथाभूतस्य ब्रह्मदत्तस्य महीपतेः कालेन स्थण्डिलतया उन्नतभूमिरूपतया लुप्तो विनष्टः अवकाशः यस्मिंस्तथा-भूते भवनप्रदेशे प्रासाददेशे भूशोधनं विधाय यत्ने कृते सति। **तदास्थानेति**—तस्य आस्थानमण्डपस्य सभागृहस्य आभोगः विस्तारः तस्य बन्धं जुषन्ति इति बन्धजुषः सभागृहविस्तारबन्धभागिन्यः इति भावः। पुनः कथंभूताः। **प्रकामेति**—प्रकामम् अतिशयेन ऊषरदोषः क्षारमृत्तिकादोषः तेन कलुषवपुषः कृष्णीभूता इति भावः। पुनः कथंभूताः। **संपूर्णेति**—सकलविस्तारभृतः प्रथिमगुणविशिष्टाः पृथुत्वगुणशालिन्यः, सुवर्णेष्टकाः सुवर्णेन हेम्ना रचिता इष्टकाः समालोक्य बहिर्निकामं बाह्यावस्थायां नितरां कलङ्केन कृष्णादित्वेन मलिनिमादर्श-नात् इतरमृत्तिकेष्टकाभिः अविशेषतां तासाम् आकलयन् जानानः एताः खलु चैत्यालयनिर्माणाय जिनगृह-निर्माणाय योग्याः इति मनसा एकत्र स्तूपताम् उन्नतराश्याकारताम् आनयत्। [ अत्रान्तरे पिण्याकगन्धः काच-वाहान् भक्ष्यादिभिः प्रलोभ्य तासां सुवर्णेष्टकानां संग्रहमकरोत् ] अत्रान्तरे अस्मिन्प्रसंगे **समस्तेति**—सकलानां मितंपचानां कृपणानां पुरोगमसंबन्धः अग्रणीत्वयुक्तः पिण्याकगन्धः सरभसं वेगेन पततां गच्छताम् इष्टकाभारं वहतां वैवधिकनिवहानां विवधैः उभयतो बद्धशिक्यैः स्कन्धवाह्यकाष्ठैः भारं वहन्तो नरा वैवधिका उच्यन्ते तेषां समूहानां सायंसमये मार्गविषये मार्गप्रदेशे पतिताम् एकाम् इष्टकाम् अवाप्य लब्ध्वा चरणधावनप्रदेशे तां स न्यधात् अस्थापयत्। तत्र च प्रतिधस्रं प्रतिदिनम् अङ्घ्रिसंघर्षात् पादमर्दनात् अशेषकालुष्यमोषे सकलमलिनताया अपगमे भर्मनिर्मितत्वम् अवेत्य भर्मणा सुवर्णेन रचितत्वं तस्या ज्ञात्वा, तैस्तैः प्रलोभनवस्तुभिः मोदकादिभिः काचवहानां

भारग्राहकानां विहितोपचारः कृतादरः ताः सुवर्णेष्टकाः संगृह्णन् स्वीकुर्वन् श्रुतः आकर्णितः स्वस्रीयस्य भगिनीपुत्रस्य अपायोदन्तः मृत्युवार्ता येन तथाभूतः पिण्याकगन्धः **फायमानेति**—फायमानः वर्धमानः यः मनोमन्युः मनःशोकः तेन कृतो अन्तो नाशः यस्य सः ( स्वसुतं सुवर्णेष्टकाग्रहणं कुर्वित्यादिश्य भगिनीग्रामं गतवान् ।) **पुत्र**, सकलकलानिपुणचित्तसुदत्त तव पितृष्वसुः पुत्रशोकशान्त्यै मया अवश्यं गन्तव्यम् अपस्नातव्यं च मृतोद्देशेन स्नानं च कर्तव्यम् । ततस्त्वयाप्येताः सुवर्णेष्टकाः परिस्कन्दलोकप्रलोभेन परि आसमन्तात् स्कन्देन भारवाहिनां लोकानां प्रलोभेन दत्त्वा साधु संग्रहीतव्याः । इत्युपह्वरे एकान्ते व्याहृत्य उक्त्वा **सकलेति**—सकलं च तज्जगत् सकलजगत् तस्य व्यवहारः प्रवृत्तिः तस्य अवतारः उत्पत्तिः तस्मै त्रिवेद्यां वेदत्रयसदृश्यां काकन्द्यां नगर्यां तोकस्य पुत्रस्य शोकात् अश्रूणि नेत्रजलानि भूयिष्ठानि यस्याः सा तथाभूतायाः कनिष्ठाया लघिष्ठायाः स्वसुः दर्शनार्थमगच्छत् । असद्व्यवहारव्यावृत्तः अन्याय्यव्यवहारात् निवृत्तः सुदत्तः तातोपदेशं पितुरादेशम् अनिःश्रेयसं अश्रेयस्करम् अवस्यन् जानन्, यतः राजपरिगृहीतं राजस्वामिकं तृणमपि काञ्चनीभवति सुवर्णं जायते संपद्यते च तद्धेतुर्भवति पूर्वपुरुषार्जितस्यापि धनस्यापहरणाय प्राणविनाशाय च इति जातमतिः उद्भूतविवेकः न एकामपि इष्टकां समग्रहीत् समगृह्णात् । महालोभलोलतान्धः पिण्याकगन्धः तस्याः काकन्द्याः पुरः पुर्याः अपस्नात्वा मृतकोद्देशेन स्नानं विधायागतः सुतमपृच्छत् । वत्स, कियतीः खलु त्वम् इष्टकाततीः इष्टकानां ततीः समूहान् पर्यग्रहीः अगृह्णाः । स्तेययोगविनिवृत्तः स्तेयं चौर्यं तस्य योगः संबन्धः तस्माद्विनिवृत्तः विरक्तः सुदत्तः—तात, नैकामपि इष्टकामहम् अगृह्णाम् । [श्रुत्वैतत्पुत्रवाक्यं पिण्याकगन्धः स्वपादौ शिलापुत्रकेण जर्जरितावकरोत्] **प्रादुर्भवदिति**—प्रकटीभवद्दीर्घनरकगतिपापबन्धः पिण्याकगन्धः समर्थे कुटुम्बपालनक्षमे सदाचारपालनेन कृतार्थे जीवितसाफल्यं कुर्वाणे, पुण्यकार्यं दानपूजादिकं तद्भजतीति पुण्यभाक् तस्मिन् तुजि पुत्रे परम् अन्यत् उत्तरं वचनम् अपश्यन् 'यदि चेत् इमौ क्रमौ चरणौ परिक्रमणक्षमौ परिक्रमणं गमनं तत्र क्षमौ समर्थौ मम न अभविष्यतां तदा कथंकारं किमर्थम् अहं मन्मनोरथवन्द्यां' मन्मनोरथानां कारागारसदृश्यां काकन्द्याम् अगमिष्यम् । अतः एतौ एव पादौ अत्र श्रीविरामावहौ लक्ष्मीविनाशजनकौ द्रोहौ द्वेषरूपौ इति विचिन्त्य उद्वर्तनं विलेपनम् वर्तयन्त्या मर्दयन्त्या स्ववासिन्याः स्वपत्न्याः करादाक्षिप्तशरीरेण बलाद्गृहीतेन शिलापुत्रकेण पेषणपाषाणेन तौ जर्जरितौ अकरोत् । [ इष्टकासु सुवर्णत्वं निर्वर्ण्य राजा पिण्याकगन्धस्य सर्वस्वमपाहरत्, स च मृत्वा नरके जन्मालभत ] एतच्च वैदेहकव्यञ्जनपरिजनात् वैश्यवेषधारिभृत्यजनात् रत्नप्रभो राजा अशृणोत् । कथंभूतः । **प्राचीनेति**—प्राचीनबर्हीं इन्द्रः तस्य निभः तदुपमः तत्सदृशो वा **क्षितीति**—क्षितिः पृथ्वी एव रमणी स्त्री सा एव करिणी हस्तिनी तस्याः इभः गजः रत्नप्रभः श्रुत्वा वासीवक्त्रेण कुठारिकामुखेन शिल्पिभिः तक्षिभिः **विधापितेति**—कारितेष्टकाछेदः नृपः सुवर्णत्वं निश्चित्य **विहितेति**—कृतधनादिसकलवस्त्वपहारम् सनिकारं सधिक्कारं **नगरेति**—नागरिकजनेन उच्चार्यमाणदुरपवादानां घोष्यमाणावर्णानां प्रबन्धो विस्तारो यस्य तं पिण्याकगन्धं निरवासयत् स्वदेशात् निरघाटयत् । 'इन्द्रियम् अस्थानं हि गुणदोषयोर्महीपतयः' राजानः गुणदोषयोः अस्थानम् इन्द्रियम्' अस्थानेन यस्य नियतं स्थानं नास्ति तादृशेन इन्द्रियेण मनसा इन्द्रियेण गुणदोषयोर्विचारः क्रियते यथा तथा राजा जनानां गुणदोषौ अस्थानम् इन्द्रियं मनः भूत्वा विचारयति इति नीतिवाक्यम् अनुस्मृत्य मूलधनप्रदानेन राजा सुदत्तस्य मूलधनं दत्त्वा समाश्वासयत् तथा अन्वयागतनिवासनिवेदनेन च वंशपरम्परागतनिवासो भवतोऽत्रैव भवत्विति निवेदनं कृत्वा राजा सुदत्तं साधु समाश्वासयत् । स तथा निर्वासितः निर्घाटितः संजातनरकनिषेकनिबन्धः संजातः नरकस्य गतेः आस्रवस्य निश्चयेन बन्धो यस्य । **कृतेति**—कृतः प्रकामम् अतिशयेन लोभेन संबन्धो येन सः, **चिरायेति**—चिराय दीर्घकालावधिकाः उपार्जिता लब्धाः दुरन्ताः दुःखदोऽन्तो येषां तेषां दुष्कर्मणां स्कन्धाः येन स पिण्याकगन्धः प्रेत्य मृत्वा पातालं श्वभ्रं नरकम् अगात् । भवति चात्र श्लोकः—षष्ठ्याः क्षितेः तमःप्रभायाः पृथिव्याः दुःखमल्लके दुःखानां पात्रभूते अस्मिन्लल्लके नाम्नि इन्द्रकबिले धनायाविद्धचेतसा धनायया धनाभिलाषया आविद्धं भ्रान्तं चेतः मनो यस्य तेन पिण्याकगन्धेन पेते अपत्यत ॥४४७॥

इत्युपासकाध्ययने परिग्रहाग्रहफलफुल्लनो नाम द्वात्रिंशत्तमः कल्पः ॥३२॥

## ३३. गुणव्रतत्रयसूत्रणो नाम त्रयस्त्रिंशत्तमः कल्पः

[ पृष्ठ २१० ] दिगिति—सद्भिः सज्जनैः गणधरदेवादिभिः सागारयतिषु अगारेण सहिताः सागाराः ते च ते यतयश्च सागारयतयः, गृहे स्थित्वा अहिंसादिषु एकदेशेन यतनत्वात् श्रावकाः सागारयतयः प्रोच्यन्ते। तेषु दिशां विरतिः, देशानां विरतिः, अनर्थदण्डानां च विरतिः इति त्रितयाश्रयं दिग्देशानर्थदण्डानां त्रितयस्य आश्रयम् आधारभूतं गुणव्रतत्रयं स्मृतम् दिग्भ्यो विरतिः दिग्व्रतम्, देशेभ्यो विरतिः देशव्रतम्, अनर्थदण्डेभ्यो विरतिः अनर्थदण्डव्रतम् ॥४४८॥ दिग्व्रतदेशव्रते व्याचष्टे—सर्वासु दिक्षु पूर्वादिषु दशसु दिक्षु, एतस्यां कस्यांचिद्दिशि मम इयत्येव इयद्योजनक्रोशादिपरिमाणा गतिर्गमनम् इति मर्यादां कृत्वा ततो बाह्ये गमनं नैवेति दिग्व्रतम्। तथा च निखिलेषु सर्वेषु अधःप्रोर्ध्वदेशेषु निम्नोन्नतेषु देशेषु गुहादिषु पर्वतशिखरेषु च मम इयत्प्रमाणा गतिरिति देशव्रतम् ॥४४९॥ दिग्देशेति—एवं पूर्वोक्तप्रमाणेन दिशां देशानां च नियमात् अवधेः ततो बाह्येषु वस्तुषु भोगोपभोगादिषु वस्तुषु हिंसानिवृत्तेः लोभनिवृत्तेः, भोगादिनिवृत्तेश्च चित्तयन्त्रणा मनोनिग्रहः भवति ॥४५०॥

[ पृष्ठ २११-२१२ ] रक्षन्निति—इदं गुणव्रतत्रयं प्रयत्नेन अहिंसाद्यणुव्रतपालनपूर्वकं रक्षन् गृही गृहस्थः यत्र यत्र भूतले स्वर्गादौ वा उपजायते उत्पद्यते तत्र तत्र आज्ञैश्वर्यं लभेत प्राप्नुयात् ॥४५१॥ आशेति—गृहीतस्य देवगुरुसमक्षं स्वीकृतस्य आशाप्रमाणस्य आशानां पूर्वादीनां दशानां दिशां प्रमाणस्य इयत्तायाः व्यतिक्रमात् उल्लङ्घनात् देशव्रती अणुव्रती गृहस्थः प्रायश्चित्तसमाश्रयः प्रायश्चित्तस्य विषयः प्रजायेत भवेत्। यदा लोभादिना गृहीतदिग्व्रतस्य गृहीतदेशगुणव्रतस्य गृहिणः तन्मर्यादाया उल्लंघनं स्यात् तदा प्रमादपरिहानये तद्व्रतनैर्मल्याय प्रायश्चित्तं तेन समाचर्यम्। तथा कृते सति दोषपरिहारो भवेत् व्रतोत्कर्षश्च जायेत ॥४५२॥ शिखण्डीति—शिखण्डी मयूरः, कुक्कुटस्ताम्रचूडः, श्येनः शशादनः, बिडालो मार्जारः, व्यालः सर्पः, बभ्रुः नकुलः, विषं गरलम्, कण्टकानि शस्त्रम्, अग्निः, कशा प्रतोदः, पाशको जालं रज्जुः ॥४५३॥ पापाख्यानेति—पापाख्यानं पापोपदेशः हिंसाकृष्यादिसंश्रयः, अशुभध्यानम् आर्तरौद्रविकल्पम्, हिंसा हिंसादानं विषास्त्रादिहिंसाकारणानां दानम्, क्रीडा जलक्रीडादिकम्। वृथाक्रिया: पृथ्वीखननम्, वातव्याघातः, अग्निर्विध्यापनम्, जलसेचनादिकम्। वनस्पतीनां छेदादिकम्, एते सर्वे अनर्थदण्डास्त्याज्याः। परोपतापः परेषाम् उपतापः पीडनम्, पैशुन्यं परोक्षं निन्दाकरणम्, शोकः अनुग्राहकसंबन्धविच्छेदे वैक्लव्यविशेषः शोकः, आक्रन्दः परितापजाताश्रुपातप्रचुरविलापादिभिर्व्यक्तक्रन्दनमाक्रन्दनम्। अन्यैः एतेषां करणम् एते अनर्थदण्डहेतवो भवन्ति ॥४५४॥ वधेति—वधः दण्डकशावेत्रादिभिः अभिघातः प्राणिनाम्। बन्धनम्—रज्ज्वादिभिर्बन्धनं येनाभिमतगतिविरोधः। संरोधः—रोधनम् एते अन्येऽपि च ईदृशाः अनर्थदण्डाख्याः भवन्ति, सांपरायः संसारः तस्य प्रवर्धकत्वात् ॥४५५॥ पोषणमिति—क्रूरसत्त्वानां जीवघ्नजीवानां मार्जारादीनाम् पोषणम्। हिंसोपकरणक्रियाम् हिंसायाः उपकरणानां विषशस्त्रादीनां क्रिया करणम्। देशव्रती गुणव्रतपालकः श्रावकः कथंभूतः, स्वकीयेति स्वकीयाश्च ते आचाराः अहिंसाद्युपेताः श्रावकाचाराः तैः चार्वी सुन्दरा तया युक्ता धीर्बुद्धिर्यस्य ॥४५६॥ अनर्थदण्डत्यागस्य फलम्—अनर्थदण्डनिर्मोक्षात् स्वस्य स्वकीयजनाना वा शरीरवाङ्मनःप्रयोजनाद्विना अन्यः अर्थः अनर्थः तद्विषयकाः अशुभमनोवाक्कायाः परपीडाकरत्वाद्दण्डा इव दण्डाः तेषां निर्मोक्षात् त्यागात्। देशतो यतिः श्रावकः सर्वभूतेषु सुहृत्तां मित्रत्वं तेषां भूतानां दुःखानुत्पत्त्यभिलाषम्। स्वामित्वं च प्रपद्यते लभते ॥४५७॥ अनर्थदण्डत्यागनाशाय काः क्रियाः आह—वञ्चनेति—वञ्चना परप्रतारणम्, आरम्भो जीवपीडाहेतुव्यापारः। हिंसा च एतेषाम् उपदेशं कृत्वा एतेषु वञ्चनादिषु अन्येषां प्रवर्तनम्। भाराधिक्यं प्रमाणातिरिक्तभारारोपणम्। अधिकक्लेशः तिरश्चां येन क्लेशः स्यात्तत्कार्यकरणं रज्ज्वादिना बन्धनम् अन्नाद्यदानम् आदिकम् एताः क्रियाः तृतीयगुणहानये भवन्ति ॥४५८॥

इत्युपासकाध्ययने गुणव्रतत्रयसूत्रणो नाम त्रयस्त्रिंशत्तमः कल्पः[१] ॥३३॥

---

१. अत्र यशस्तिलकचम्पूकाव्यस्य सप्तम आश्वासः समाप्यते; यथा—"इति सकलतार्किकलोकचूडामणेः

## ३४. स्नानविधिर्नाम चतुस्त्रिंशत्तमः कल्पः

[ पृष्ठ २१२-२१३ ] गुणव्रतवर्णनानन्तरं शिक्षाव्रतानि वर्ण्यन्ते प्रथमं तेषामभिधानानि कीर्त्यन्ते—**आद्याविति**—आदौ सामायिकं कर्म, द्वितीया प्रोषधोपासनक्रिया, सेव्यार्थनियमस्तृतीयं शिक्षाव्रतम्, दानं चतुर्थं शिक्षाव्रतम्। शिक्षायै अभ्यासाय व्रतानि शिक्षाव्रतानि, प्रतिदिवसाभ्यसनीयत्वात्। गुणव्रतं हि प्रायो यावज्जीविकमाहुः। अथवा शिक्षा विद्योपादानम्, शिक्षाप्रधानं व्रतं शिक्षाव्रतम्। सामायिकादेर्विशिष्टश्रुतज्ञानपरिणतत्वेनैव निर्वाह्यत्वात् ॥४५९॥ सामायिकमाह—**आप्तसेवेति**—आप्तसेवोपदेशः समयः स्यात् तत्र समयार्थिनां आप्तसेवोपदेशाभिलाषिणां श्रावकाणां नियुक्तं यत्कर्म तत्सामायिकम् ऊचिरे। यः सर्वज्ञः सर्वलोकेशः सर्वदोषविवर्जितः सर्वसत्त्वहितश्च तम् आप्तमाहुः इति आप्तस्य लक्षणं पूर्वमुक्तम्। तस्याप्तस्य सेवा पूजा तत्र नियुक्तं यत्कर्म जिनस्नपनार्चास्तुतिजपाः तत्सामायिकमूचिरे उक्तवन्तः ॥४६०॥ आप्ताभावेऽपि तदाकारपूजा पुण्योत्पादिकेति दर्शयति। **आप्तेति**—आप्तस्य अर्हत्परमेष्ठिनः असन्निधानेऽपि अविद्यमानेऽपि, तदाकृतिपूजनं पुण्याय पुण्यप्राप्तये भवति। दृष्टान्तमाह—तार्क्ष्यमुद्रा गरुडमुद्रा यस्यां गरुडस्य सांनिध्ये अविद्यमानेऽपि विषसामर्थ्यस्य मूर्च्छामृत्यादेः सूदनं विनाशनं किं न कुर्यात् अपि तु कुर्यादेव। अर्हदाकृतिं शान्ताम् आत्मध्यानमुद्राप्रदर्शिनीं दृष्ट्वा भक्तिरुत्पद्यते ततश्च पुण्यं प्राप्यते पापलोपश्च भवति ॥४६१॥ देवतार्चने शुद्धिद्वयस्यावश्यकता—**अन्तःशुद्धिमिति**—अन्तःशुद्धिं विधाय अशुभसंकल्पान्मुक्त्वेत्यर्थः, बहिःशुद्धिं विधाय, विधिवत् शौच-स्नान-दन्तधावनादिक्रिया. बहिःशुद्धिं च विधाय देवतार्चनं विदध्यात् कुर्यात्। आद्या अन्तःशुद्धिः दौश्चित्यनिर्मोक्षात् पापसंकल्पत्यागात्। अन्या बहिःशुद्धिः स्नानाद् भवति। स्नानभेदान् अग्रे वक्ष्यति ॥४६२॥ स्नानं किमर्थं करणीयमित्यनुयोगस्य उत्तरमाह—**संभोगायेति**—अन्नादिभक्षणं संभोगः तदर्थः स्नानं कर्तव्यम्। विशुद्ध्यर्थं शरीरनिर्मलत्वाय परिणामविशुद्ध्यर्थं च स्नानं मतम्। यत्र यस्मिन् स्नाने। अमुत्र परलोके स्वर्गादौ उचितो विधिः दानव्रतपूजाभिषेकादिकं क्रियते तत्स्नानं धर्माय स्मृतम्। गृहस्थयत्योः स्नानकालनिर्णयः ॥४६३॥ **नित्यमिति**—गृहस्थस्य देवार्चनपरिग्रहे देवपूजास्वीकारे नित्यं स्नानम्, अकृतस्नानो गृही देवपूजां न कुर्यात् बहिःशुद्धेरभावात्। सा च अन्तःशुद्धेरपि निमित्तम्। यतेस्तु दुर्जनस्पर्शात्स्नानम्, दुर्जनाः कापालिकात्रेयीचाण्डालशबरादयः तेषां स्पर्शात् यतेः स्नानं भवति। एषां स्पर्शाभावे तस्य स्नानं विगर्हितं निन्द्यं भवति ॥४६४॥ कुत्र कथं स्नानं कर्तव्यमिति कथयति—**वातातपादीति**—भूरितोये विपुलजले वातातपादिसंस्पृष्टे प्रवहता वायुना सर्वतः स्पृष्टे। आतपेन सूर्यकिरणैः सर्वतः स्पृष्टे। अपनीतशैत्ये जलाशये तडागादौ। अवगाह्य अन्तःप्रविश्य स्नानम् आचरेत्। उपर्युक्तविशिष्टजलाशयाभावे अन्यस्य कूपादेर्जलं गालितं भजेत् जलं गालयित्वा दृढेन निर्मलेन वाससा तेन स्नानमाचरेत्। अगालितकूपजलेन स्नानं न कुर्यात् कृतेऽपि तेन स्नाने बहिःशुद्धिर्न भवति। परं वातातपादिसंस्पृष्टं जलाशयजलं गालितजलवच्छुद्धं मतम् अतस्तेन स्नानं बहिःशुद्धिविधायकं ज्ञातव्यम् ॥४६५॥ स्नानस्य पञ्चविधत्वम्—

[ पृष्ठ २१४-२१५ ] पादजानु इति—पादौ चरणौ, जानुनी ऊरुपर्वणी, कटिः श्रोणिः, ग्रीवा कण्ठः, शिरो मस्तकम्, एषां पञ्चानां पर्यन्तस्य संश्रयः अवलम्बनं यत्र तत् स्नानं पञ्चविधं पञ्चप्रकारं तद्यथादोषम्। दोषमनुसृत्य। शरीरिणां नराणां ज्ञेयं ज्ञातव्यम् ॥४६६॥ स्नानाधिकारिणो विशिनष्टि—**ब्रह्मचर्योपपन्नस्येति**—ब्रह्मचर्येण स्त्रीसंभोगवर्जनेन उपपन्नस्य युक्तस्य ब्रह्मचारिणः। पुनः कथंभूतस्य। निवृत्तारम्भकर्मणः सेवोद्योगकृष्यादिकर्मविरतस्य। यद्वा तद्वा स्नानं भवेत् पादस्नानं कटिस्नानं त्रिष्वेकेन केनापि स्नानेन आचरितेन स ब्रह्मचारी देवार्चनाधिकारी भवेत्। अन्यस्य स्त्र्यारम्भसेवासंक्लिष्टस्य गृहिणः अन्त्यं तद्द्वयं स्नानं मतं ग्रीवास्नानं शिरःस्नानं च ताभ्यां स शुद्धः देवपूजां कुर्यात् ॥४६७॥ आरम्भादि-

---

श्रीमन्नेमिदेवभगवतः शिष्येण सद्योऽनवद्यगद्यपद्यविद्याधरचक्रवर्तिशिखण्डमण्डनीभवच्चरणकमलेन श्रीसोमदेवसूरिणा विरचिते यशोधरमहाराजचरिते यशस्तिलकापरनाम्नि महाकाव्ये सच्चरित्रचिन्तामणिर्नाम सप्तम आश्वासः।"

संक्लिष्टस्य बहिःशुद्धेरत्यावश्यकता—**सर्वेति**—सर्वे च ते आरम्भाः सेवाकृषिवाणिज्यादयः तेषां विजृम्भणं विजृम्भः प्रवृद्धिर्यस्य, पुनः कथंभूतस्य। ब्रह्मजिह्मस्य जहाति त्यजति इति जिह्मः ब्रह्मचर्येण त्यक्तस्य स्वस्त्रिया कृतमैथुनस्येति भावः। एतादृशो देहिनः द्विजश्रावकस्य बहिःशुद्धिम् अविधाय अकृत्वा आप्लोपास्त्यधिकारिता न। देवापूजाधिकारो नास्ति ॥४६८॥ **अद्भिरिति**—अद्भिः जलैः शुद्धिं निराकुर्वन् स्नानम् अकुर्वन् इत्यर्थः, मन्त्रमात्रपरायणः मन्त्रोच्चारणेष्वेव तत्परः स ब्रह्मचारी भुक्त्वा भोजनं कुर्वाणः तद्दोषपरिहाराय मन्त्रम् उच्चार्य शुद्धिभाग्भवति, हृत्वा मलमूत्रं कृत्वा मन्त्रैः शुद्धयति। विहृत्य च विहारं कृत्वा स्वाध्यायाद्यर्थं गुर्वादिसमीपं गतवतस्तस्य मार्गे पादपतनादिषु जीवघाते सति पञ्चगुरुमन्त्रैरीर्यापथशुद्धिं कुर्वतः शुद्धिर्भवति न तस्य जलशुद्धेरावश्यकता ॥४६९॥ बहिःशुद्धिकराणि वस्तूनि—**मृत्स्नयेति**—प्रशस्ता शुचिस्थाने स्थिता शुभगन्धरसवर्णोपेता मृत्तिका मृत्स्नोच्यते तया। इष्टकया दग्धमृत्खण्डेन। भस्मना, गोमयेन गोविडा। तावच्छौचं शुद्धिं कुर्यात् यावन्निर्मलता हस्तादेः स्यात्। इयं विशुद्धिर्ब्रह्मचारिणा मुनिनापि विधेया। या स्नानशुद्धिः सा कदा विधेयेति उक्तमेव ॥४७०॥ विहृत्य आगतस्य, वस्तूनां च शुद्धिः—**बहिरिति**—बाह्यप्रदेशे विहृत्य गत्वा पुनः संप्राप्त आगतः अनाचम्य आचमनम् अकृत्वा गृहं न प्रविशेत्। आचम्य जलप्राशनं त्रिवारं कृत्वा गृहप्रवेशः कार्यः। तथा स्थानान्तरात् अन्यत् स्थानं स्थानान्तरम् अन्यग्रामगृहादेः आगतं सर्वं वस्तु धान्यफलादिकं प्रोक्षितं जलेन प्रसिच्य आचरेत् सेवेत ॥४७१॥ कथंभूतः सन्देवार्चनविधिं कुर्यात्—**आप्लुत इति**—आ समन्तात् प्लुतः जलमवगाह्य स्नातः। संप्लुतः सम्यक् प्लुतः संस्नातः। स्वान्तशुचिवासो विभूषितः मनसा शुचिवाससा च शुद्धवस्त्रयुगलेन च विभूषितः शोभितः। मौनेन संयमेन इन्द्रियप्राणिसंयमयुगलेन च संपन्नः परिपूर्णः गृही देवार्चनाविधिं कुर्यात् ॥४७२॥ **दन्तधावनेति**—दन्तानां धावन दन्तधावनं दन्तप्रक्षालनं तेन शुद्धम् आस्यं मुखं यस्य सः। मुखवासोचिताननः वदनवाससा छन्नमुखः। असंजातान्यसंसर्गः न संजातः अन्यजनानाम् अस्नातजनानां ससर्गः स्पर्शः यस्य सः। गृही देवान् उपाचरेत् पूजयेत् ॥४७३॥ **होमेति**—भोजनात्प्राक् होमः भूतबलिश्च एतौ द्वौ विधी पूर्वैः प्राचीनसूरिभिः भक्तविशुद्धये अन्नविशुद्धये उक्तौ। भुक्तेः भोजनस्य आदौ प्रारम्भे सलिलम् आचमनम्, सर्पिः घृतम्, ऊधस्यम् ऊधसि भवम् ऊधस्यं गोस्तनोद्भवं दुग्धमिति। एतेषां सेवनं रसायनम्। ज्वरादिव्याधिविनाशकम्। होमेन देवानां तर्पणं भवति। अन्नदानेन भूतानां प्राणिनां तर्पणं स्यात् ॥४७४॥ **एतद्विधिरिति**—एष विधिः होमभूतबल्यादिविधिः न धर्माय न पुण्याय। न च तदक्रिया तस्य अक्रिया अकरणम् अधर्माय अपुण्याय कथम्। दर्भपुष्पादिवत् दर्भपुष्पाक्षतश्रोत्रवन्दनादिविधानं यथा कृतं न धर्माय। अकृतं वा अधर्माय न भवति। दर्भाः लोकव्यवहारे पूजायां च पूताः मन्यन्ते। आसनादौ, अग्निज्वालनेन भूमिशुद्धौ च तदुपयोगकरणकथनात्। पुष्पाक्षतानामपि पाक्षिकादिभक्तानां भक्तिपरिणामाङ्गत्वात् धर्महेतुत्वमपि विज्ञेयम्। ब्रह्मचारिक्षुल्लकादीनां तदभावेऽपि भावपूजनं भवेदतो नाधर्मायापि ॥४७५॥ **द्वौ इति**—हि यस्मात् गृहस्थानां द्वौ धर्मौ लौकिकः लोके भवः लौकिकः इहलोकसंबन्धी धर्मः। परस्मिन् लोके भवः पारलौकिकः। आद्यः लौकिको धर्मः लोकाश्रयः अस्ति। होमो भूतबलिः, दर्भपुष्पाक्षतादिकं च लौकिको धर्मः। परः पारलौकिकः आगमाश्रयः आगमाधारः जिनागमप्रोक्तः ॥४७६॥

[ पृष्ठ-२१६ ] **जातयः इति**—सर्वा जातयः अनादयः ब्राह्मणक्षत्रियादयः। विदेहक्षेत्रापेक्षया एता जातयः अनादयः। तत्र मुक्तियोग्यानां जातीनाम् अच्छेद एव। भरतैरावतक्षेत्रापेक्षया चतुर्थकाले मुक्तियोग्यानां जातीनां संभवत्वात् सादित्वं तासाम्। अतः तत्क्रियाश्चापि तथाविधा अनादयः। श्रुतिः वेदः शास्त्रान्तरं वा अन्यद्वा शास्त्रं स्मृत्यादिकं प्रमाणं भवतु अत्र नः अस्माकं का क्षतिर्हानिः॥ लोकाश्रयो धर्मः यः श्रुतौ स्मृतौ वोक्तः सः स आत्मप्रतिपन्नव्रतानुष्ठानानुपघातेन प्रमाण्यताम् ॥ ४७७ ॥ जैनागमविधिम् आत्महिताय प्रमाणयेत्— **स्वजात्यैवेति**—विशुद्धकुलजातौ स्वजात्यैव स्वस्य जात्यैव जन्मना एव विशुद्धानां पवित्राणां वर्णानां ब्राह्मण-क्षत्रिय-विशां तत्क्रियाविनियोगाय गर्भान्वय-दीक्षान्वय-कर्त्रन्वयक्रियाणां विनियोगाय आरोपणाय जैनागमविधिः जिनागमप्रोक्तः आचारः परं प्रमाणं मन्तव्यः। यथा स्वजात्यैव स्वजन्मनैव निर्मलस्य कान्तिजुषो रत्नस्य मणेः तत्क्रियाविनियोगः शाणघर्षणादिकं रत्नशास्त्रप्रोक्तं परं प्रमाणं मन्यते जनैः तद्वत् ॥ ४७८ ॥

श्रुतिस्मृत्योरप्रामाण्यं कथमिति चेदाह—यदिति—यत् यस्मात् । तत्र श्रुतिस्मृत्योः, भवभ्रान्तिनिर्मुक्तिहेतुधीः दुर्लभा । भवे संसारे भ्रान्तिः भ्रमणं तस्याः निर्मुक्तिः पृथग्भवनं तस्याः हेतुधीः उपायज्ञानं कारणज्ञानं दुर्लभं नितराम् अप्राप्यम् । संसारमुक्त्युपायज्ञानं श्रुतिस्मृत्योर्नास्त्येवातस्ते न प्रमाणे । संसारव्यवहारे तयोः प्रामाण्यमस्तु इति चेन्न, यतः संसारव्यवहारे स्वतः सिद्धे सति तत्र आगमः वृथा । बाह्यशुद्धयादयो ये आचाराः ते यावन्तः सम्यक्त्वव्रतानुपघातहेतवस्तावन्तः प्रमाणं तेष्वेव श्रुतिस्मृत्योः प्रामाण्यं जैनैर्मन्यते ॥ ४७९ ॥ तथा च—सर्व एवेति—यत्र यस्मिन् लौकिके विधौ होमभूतबल्यतिथिसत्कारादौ सम्यक्त्वहानिः सम्यग्दर्शनस्य विनाशो न स्यात् यत्र च व्रतदूषणम् अहिंसादिव्रतेषु दूषणम् उपघातः न स्यात् । सः सर्व एव लौकिको विधिः जैनानां प्रमाणम् । श्रुतिस्मृत्योः प्राणिवधो यज्ञेऽवधत्वेन प्रतिपादितः । तदाचरणम् अहिंसाव्रतोपघाताय भवेत् अतः स लौकिको विधिर्न प्रमाणं सम्यक्त्वव्रतविघातकत्वात् । ये च प्राणिवधयज्ञसमा अन्येऽपि लौकिका विधयः सम्यक्त्वव्रतविघातकृतः सन्ति ते सर्वेऽपि वर्ज्या एव ॥४८०॥

इत्युपासकाध्ययने स्नानविधिर्नाम चतुस्त्रिंशत्तमः कल्पः ॥ ३४ ॥

## ३५. समयसारविधिर्नाम पञ्चत्रिंशत्तमः कल्पः

[ पृष्ठ २१७-२१८ ] द्वये देवसेवाधिकृताः संकल्पिताप्तपूजापरिग्रहाः कृतप्रतिमापरिग्रहाश्च । देवेति दीव्यते स्तूयते इन्द्रादिभिरिति देवः परमात्मा तस्य सेवा पूजाभिषेकस्तुतिवन्दनाः तासु अधिकृताः अधिकारिणः । द्वये श्रावकाः सन्ति । संकल्पिताप्तेति—दलफलोत्पलादिषु अयं जिनः इति संकल्पितः आप्तः तस्य पूजापरिग्रहः येषां ते प्रथमे श्रावकाः । कृतप्रतिमापरिग्रहाः अपरे श्रावकाः । इति श्रावकभेदौ द्वौ । स संकल्पोऽपि दलं पत्रं फलं पूगीफलादिकम्, उत्पलं कमलम्, आदिशब्देन कमलबीजादिकम्, तेषु यथा आप्तसंकल्पः क्रियते तथा समयान्तरं वैदिकसमयादिकं तत्प्रतिमासु हरिहरादिषु न विधेयः । यतः—शुद्धे इति—यथा कन्याजने शुद्धत्वात् इमां कन्याम् अहं तुभ्यं ददामि धर्मे चार्थे च कामे च नातिचर इति संकल्पेन कन्याप्रदानं क्रियते । तत्र च कन्यायां त्वमस्य भार्या भवेति संकल्पः देवाग्निसाक्षिकः क्रियते। स च कन्याजने एव कर्तुम् उचितः पूर्वं तादृक्संकल्पस्याकृतत्वात् । परपरिग्रहे परकीयभार्यायां संकल्पः कर्तुं नोचितो यथा, तथा आकारान्तरसंक्रान्ते हरिहरादिप्रतिमारूपे अयं जिन इति संकल्पकरणं नोचितमिति भावः ॥४८१॥ तत्र प्रथमं प्रतिसमयसमाचारं संकल्पिताप्तसमाचारविधिम् अभिधास्यामः कथयिष्यामः । तथाहि—अर्हन्नतनुरिति—अर्हन् जिनेश्वरः, अतनुः सिद्धः, मध्ये भूर्जफलकसिचयादीनां मध्यभागे स्थाप्यौ । तयोर्दक्षिणतः सव्यभागे गणधर आचार्यः, पश्चात् वामभागे श्रुतगीः उपाध्यायपरमेष्ठी श्रुतं द्वादशाङ्गात्मकं श्रुतज्ञानं गिरि वाण्यां यस्य सः । तदनु तदनन्तरं साधुः परमेष्ठी । पुरोऽपि च दृगवगमवृत्तानि सम्यग्दर्शनज्ञानचारित्राणि स्थाप्यानि । एतेऽर्हदादयः भूर्जे भूर्जपत्रे, फलके दारुपट्टके, सिचये वस्त्रे, शिलातले समतलपाषाणे, सैकते सिकताभिर्निर्मिते स्थण्डिले, क्षितौ भूमितले, व्योम्नि आकाशे, हृदये चेति समयसमाचारवेदिभिः नित्यं स्थाप्याः । संकल्पसमाचारस्य ज्ञातृभिः सदा स्थाप्याः ॥४८२-४८३॥ एवं स्थापनाकरणानन्तरं पञ्चपरमेष्ठिनां रत्नत्रयस्य चाष्टप्रकारेण पूजनवर्णनं क्रमशः क्रियते । प्रथमं तावत् अर्हत्परमेष्ठिपूजनं विधियते तद्यथा—रत्नत्रयेति—रत्नत्रयेण पुरस्कारः अग्रतःकरणं पूजनं येषां ते रत्नत्रयपुरस्काराः रत्नत्रयेण पूजनीयाः पञ्चापि परमेष्ठिनः परमे इन्द्रादीनां वन्द्ये पदे तिष्ठन्तीति परमेष्ठिनः । अर्हत्सिद्धाचार्योपाध्यायसाधवः । कथंभूताः भुवनेन्दवः त्रिजगच्चन्द्राः, भव्यरत्नाकरानन्दं भव्याः रत्नाकरा इव समुद्रा इव तेषाम् आनन्दम् आह्लादं कुर्वन्तु जनयन्तु ॥४८४॥ ॐ निखिलेति—निखिलेति, परानपेक्षेति अनेकानि विशेषणानि अर्हत्परमेष्ठिनो विशेष्यस्य, अतः तानि क्रमशो विव्रियन्ते । रत्नत्रयपुरःसरस्य भगवतोऽर्हत्परमेष्ठिनः अष्टतयीमिष्टिम् अष्टविधां पूजां जल-गन्धाक्षत-पुष्प-नैवेद्य-दीप-धूप-फलैः अष्टप्रकारैर्द्रव्यैः पूजां करोमि इति स्वाहा । कथंभूतस्य पूजां करोमि निखिलेति—निखिलाश्च ते भुवनपतयः सकलजगत्स्वामिनः अधोलोकस्य धरणेन्द्रः प्रभुः मध्यलोकस्य नरलोकस्य चक्रवर्ती । ऊर्ध्वलोकस्य सौधर्मेन्द्रादयोऽधिपतयः । तैः विहिता कृता

निरतिशया नितराम् अतिशयो माहात्म्यं यासु ताः सपर्याः पूजाः तासां परंपराः पञ्चकल्याणपूजा यस्य स तस्येति भावः । **परानपेक्षेति**—पराणि इन्द्रियाणि, आलोकः ज्ञानाद्यावरणक्षयोपशमश्च पराणि तेषाम् अनपेक्षश्चासौ पर्यायश्च पूर्णपरमात्मावस्था तस्याः प्रवृत्तं जातं सकलवस्तुसमूहवीक्षणाय लोचनमिव नेत्रमिव यत् केवलज्ञानं तदेव साम्राज्यं तस्य लाञ्छनरूपाणि अभिज्ञानरूपाणि यानि पञ्चमहाकल्याणानि गर्भ-जन्म-दीक्षा-केवल-निर्वाणान्तानि । अष्टमहाप्रातिहार्याणि च अशोकतरुपुष्पवृष्टि-दिव्यध्वनि-चामर-रत्नासन-भामण्डल-दुन्दुभि-छत्रत्रयाणि जन्मजातदशातिशयाः । देवकृताश्चतुर्दशातिशयाः । केवलज्ञानसंजाता दशातिशयाश्च एतैश्चतुस्त्रिंशदतिशयैर्विराजितस्य एतेऽतिशयास्तीर्थकृतो विमुच्य अन्यत्र चक्रवर्त्यादिष्वपि नोपलभ्यन्ते । पुनः कथंभूतस्य अर्हतः । **षोडशार्धेति**—षोडशस्य अर्धम् अष्टौ लक्षणानां सहस्रं लक्षणसहस्रं षोडशार्धेन सहितं लक्षणसहस्रं तेन अङ्कितम् उपलक्षितं दिव्यदेहस्य माहात्म्यं प्रभावो यस्य तस्य । अर्हन्तो हि विषाग्निशस्त्रादिभिरप्रतिहतशरीराः धातुवैषम्यादिविरहितदेहा अत एव तेषां दिव्यदेहत्वम् । **द्वादशेति**—शिक्षकवादिविक्रियर्द्धिमुन्यादयो द्वादशगणाः तेषां प्रमुखाः श्रेष्ठाः गणधरदेवा महामुनयः तेषां मनःप्रणिधानं चित्तैकाग्र्यं तेन संनिधीयमानम् आरोप्यमाणं परमेश्वर इति, परमसर्वज्ञ इति नाम्नां सहस्रं यस्य । पुनः कथंभूतस्य—**विरहितेति**—अरिर्मोहनीयं कर्म । रजसी ज्ञानदर्शनावरणे । रहः अन्तरायं कर्म । एभ्यो जाता ये मोहाज्ञानादयः कुहकभावाः मिथ्याभावाः ते विरहिताः नष्टाः अरिरजोरहःकुहकभावा यस्य तस्य । पुनः कथंभूतस्य **समवसरणेति**—समवसरणं केवलज्ञानिजिनवैभवम् उद्द्योतयन्ती इन्द्रनिर्मिता रत्नसभा समवसरणम्, तदेव सरः तत्र अवतीर्णम् उद्भूतम् आगतं जगत्त्रयमेव पुण्डरीकखण्डः कमलवृन्दं तस्य ( विकासने ) मार्तण्डमण्डलस्येव सूर्यस्येव । पुनः कथंभूतस्य **दुष्पारेति**—दुष्प्राप्यं पारं परतीरं यस्य स आजवंजवीभावः संसारभावः स एव जलनिधिः तत्र निमज्जन्तो ब्रुडन्तो ये जन्तवः तेषां जातं समूहः तस्य हस्तावलम्ब इव परमागमः यस्य तस्य । पुनः कथंभूतस्य **भक्तिभरेति**—भक्तेर्गुणानुरागस्य भरो भारः तेन विनता नम्राः विष्टपत्रयीं पालयन्तीति विष्टपत्रयीपालाः ये इन्द्रधरणेन्द्रचक्रवर्तिनः तेषां मौलयः किरीटानि तेषां मणयः रत्नानि तेषां प्रभा कान्तिः तस्या आभोगो विस्तारः स एव नभः तत्र विजृम्भमाणाः चरणयोः पादयोः नखाः एव नक्षत्राणि तेषां निकुरम्बं समूहो यस्य । पुनः कथंभूतस्य **सरस्वतीति**—सरस्वत्याः शारदायाः सकाशात् वरस्य वाञ्छितफलस्य प्रसादः दानानुग्रहः तत्करणे चिन्तामणेः चिन्तारत्नस्येव । पुनः कथंभूतस्य । **लक्ष्मीति**—लक्ष्मीरेव श्रीरेव लता तस्या निकेतो गृहम् आश्रयरूपस्तस्य कल्पवृक्षस्येव, पुनः कथंभूतस्य । **कीर्तीति**—कीर्तिरेव पोतिका अल्पा पोता पोतिका वत्सिका तस्याः प्रवर्धने कामधेनोरिव । **अवीचीति**—अवीचिर्नरकविशेषः तस्य परिचयः संगतिः तस्य खलीकारकरणम् अपकारकरणं विनाशकरणं तस्मिन् अभिधानमात्रमन्त्रस्य 'णमो अरिहन्ताणं इति मन्त्रस्य प्रभावो यस्येति । **सौभाग्येति**—सौभाग्यस्य शुभभाग्यवत्तायाः सौरभस्य सुगन्धस्य संपादने लाभे पारिजातपुष्पगुच्छसदृशस्य । पुनः कथंभूतस्य । **सौरूप्येति**—सौरूप्यस्य सातिशयं सौन्दर्यं तस्य उत्पत्तिः येषु ते च ते मणयश्च तेषां या मकरिका तस्या घटने रचनायां विकटाकारस्य विस्तृताकृतियुतस्य रत्नत्रयेण अग्रणित्वं प्राप्तस्य भगवतोऽर्हतो जिनस्य परमेष्ठिनः अष्टतयीम् अष्टविधाम् इष्टिं पूजां करोमीति स्वाहा ॥२५॥ अपि च—**नरोरगेति**—नराः मनुष्याः, उरगा नागासुराः सुराः अमराः एते एव अम्भोजानि कमलानि तेषां विकासने विरोचनस्य सूर्यस्य रुचेः इव श्रीः यस्य तम्, जिनाधीशम् अर्चनगोचरं पूजनविषयं करोमि । किमर्थम् आरोग्याय जातिजरामरणरोगाभावाय ॥४८५॥

[ पृष्ठ २१९ ] अधुना सिद्धपरमेष्ठिनः पूजनं क्रियते—ॐ **सहचरेति**—आत्मना सह चरतीति सहचरम् आत्मना सहैव विद्यमानम् । समीचीनं निर्दोषं सत्यं परमार्थभूतम् । चार्वीत्रयं सुन्दरत्रयं यत् आत्मना सहैव जातम्, यत्सत्यं यत् सुन्दरं च एतादृशं सम्यग्दर्शनम्, सम्यग्ज्ञानम् सम्यक्चारित्रं च चार्वीत्रयं तस्य विचारः मनसा चिन्तनं तस्य गोचरो विषयः यद् उचितं हिताहितं तस्य प्रविभागो यस्य । अत एव परनिरपेक्षतया स्वयंभुवः स्वयं परोपदेशानपेक्षतया भवति रत्नत्रयरूपेण परिणतो भवतीति स्वयंभूः तस्मात्, सलिलात् मुक्ताफलमिव मौक्तिकं यथा । उपलादिव च पाषाणाद्यथा काञ्चनम् । अस्मादेवात्मनः पूर्वं संसारिणः कारणविशेषोपसर्पणात् सर्वसंगत्यागाजस्रश्रुतभावनेन्द्रियमनःसंयमनशुद्धात्मध्यानविशेषात् आविर्भूतम् उत्पन्नम्,

परमात्मानम् उपेयुषः प्राप्तवतः सिद्धपरमेष्ठिनः इष्टिं करोमीति संबन्धः। कथंभूतं परमात्मानम्। अखिलेति—सकलमलानाम् आत्मगुणानां ज्ञानदर्शनादिकानाम् आच्छादकतया विरूपपरिणतिकारकत्वाद्वा ज्ञानावरणाद्यष्टकर्माणि मलत्वेन व्यवह्रियन्ते। तेषां विलयात् निरवशेषक्षयात् लब्धात्मस्वभावं प्राप्तनिजशुद्धज्ञानादिगुणम्। असहायं क्षयोपशमाद्यनपेक्षम्। अक्रमम् इन्द्रियाद्यनुत्पन्नत्वात् क्रमरहितम्। युगपत्सकलवस्तुगोचरम्, अवधीरितेति—अवधीरितं तिरस्कृतम् अन्यसंनिधिव्यवधानं येन, तिरस्कृतं पञ्चेन्द्रियविषयसांनिध्यस्य व्यवधानं येन। पञ्चेन्द्रियविषयेभ्योऽनुत्पन्नम्। साक्षादात्मन एव जायमानत्वात् व्यवधानरहितम्। अनवधिम् अवधिरन्तः ततोऽपसृतत्वात् अनवधिम्, निःसीमानम् अयत्नसाध्यम्, केवलं यत्नेन न साध्यम्। अवसितातिशयसीमानम् समाप्ततरतमादिमर्यादम्। आत्मस्वरूपैकनिबन्धनम् आत्मस्वरूपमेव एकं केवलं निबन्धनं कारणं यस्य। अन्यवस्तुनः सकाशादनुपजायमानमित्यर्थः। अन्तःप्रकाशं सूर्यप्रकाशवद्बहिरनुपलभ्यमानम् अन्तरेव विद्यमानमपि सकलजगदवलोकमानम्, चैतन्यमधिष्ठितम्, अनन्तदर्शनगुणस्य वैशद्येन निर्मलत्वेन साक्षादवलोकितसकलपदार्थस्वरूपसर्वस्वम् दृष्टसकलद्रव्यपर्यायलक्षणम्। अनवसानसुखस्रोतसम्—अवसानमन्तः न अवसानम् अन्तो यस्य तत् सुखं तस्य स्रोतः प्रवाहधारा तेन युक्तम्। अपर्यन्तवीर्यम् अनन्तशक्तिकम्, अचाक्षुष-सूक्ष्मावभासम् चक्षुर्भ्यामनुपलभ्यमानम् अतः सूक्ष्मतया अवभासयुक्तम्, असदृशाभिनिवेशावगाहम्, असदृशम्, अनुपमम् अभि सर्वतः निवेशः प्रवेशः यत्र तथाभूतोऽवगाहगुणो यस्य। चरमदेहतः किंचिदूनः आत्मप्रदेशानाम् अवगाहः प्रवेशो यस्य तथाभूतम्। अगुरुलघुव्यपदेशम्, न गुरुर्भारयुक्तः न लघुश्च तादृग्गुणविशिष्टम्। अपगतेति—अपगता नष्टा बाधा पीडा यथा स्यात्तथा, परेषां सिद्धानाम् अनन्तानाम् आकाराणां संक्रमः प्रवेशो यत्र तथाभूतम्। अतिविशुद्धस्वभावतया अत्यन्तनिर्मलप्रकृतितया, निवृत्ताशेषशारीरद्वारतया च विनष्टसकलदैहिकद्वारतया च ईषन्मुक्तपूर्वदशान्तरम्। रूप-रस-गन्ध-शब्द-स्पर्शरहितम्। अशेषभुवम् सकलस्वप्रदेशान् व्याप्नुवन्तम्। आशिरः शेखरायमाणपदविश्वंभरम् आमस्तकं मुकुटायमानपदं स्थानं यत्र तथाभूतं विश्वं जगत्। बिभर्तीति तथाभूतम्। उपशान्तेति—उपशान्तः नष्टः सकलसंसारदोषाणां रागादीनां प्रसरः प्रचारः यत्र तं परमात्मानम्। सकलकर्मविलयादत्यन्तशुद्धात्मानम् उपेयुषः प्राप्तवतः। गुरुणापि तीर्थंकरपरमदेवेनापि नमः सिद्धेभ्य इति वचनात् प्रतिपन्नगुरुभावस्य स्वीकृतगुरुत्वस्य रत्नत्रयपुरःसरस्य भगवतः सिद्धपरमेष्ठिनः अष्टतयीम् इष्टिं करोमि इति स्वाहा। अपि च प्रत्नेति—प्रत्नानि पुरातनानि यानि कर्माणि पूर्वानेकजन्मबद्धानि तैः विनिर्मुक्तान् रहितान्, नूत्नेति नूत्नानि नवानि अस्मिन्भवे बद्धानि यानि कर्माणि तैः विवर्जितान् रहितान्, रत्नत्रयेण महीयसः श्रेष्ठान् पूर्णरत्नत्रयलाभात् अर्हतोऽपि श्रेष्ठावस्थां बिभ्राणान् सिद्धान् मुक्तान् यत्नतः प्रमादं मुक्त्वा भक्तिभारेण संस्तुवे ऐहिकफलानभिलाषया स्व-स्वरूपप्राप्तिहेतोः स्तवीमि ॥४८६॥

[ पृष्ठ २२० ] अधुनाचार्यपरमेष्ठिनः पूजां करोमि—ॐ पूज्यतमस्य उपाध्यायसाधुपरमेष्ठिनोऽपेक्षया, उदितोदितेति—उदितोदिताः प्रकर्षेण अभ्युदयं प्राप्ता या कुलशीलगुरुपरंपरा प्रकर्षेण अभ्युदिते कुलशीले यस्याः तथाभूता या गुरुपरंपरा गुरुपर्वक्रमः तस्याः उपात्तः गृहीतः ज्ञातः समस्तस्य सकलस्य ऐतिह्यरहस्यस्य आगमगूढतत्त्वस्य सारो येन तस्य। पुनः कथंभूतस्य। अध्ययनेति—अध्ययनं स्वयं शास्त्राभ्यासकरणम्। अध्यापनं शास्त्रपाठनम् विनियोगः अनेन छात्रेणेदं कर्तव्यमनेनेदमित्याज्ञाकरणम्। विनयेन नियमानां पालनं व्रतानां तपसां वा पालनम्। उपनयनादिक्रियाकाण्डे च तेषु निष्णातचित्तस्यात्यन्तप्रगल्भमतेः। पुनः कथंभूतस्य। चातुर्वर्ण्येति—चतुःप्रकारमुनिसमूहः चातुर्वर्ण्यसंघः ऋषिमुनियत्यनगारलक्षणः। ऋष्यार्यिका श्रावकश्राविकासमूहो वा तस्य प्रवर्धना तस्य माहात्म्यवर्धनं तस्य धुरम् अग्रं धरति वहतीति तस्य। पुनः कथंभूतस्य। द्विविधात्मेति—द्विविधः द्विप्रकारः स चासौ आत्मधर्मश्च व्यवहारात्मधर्मः, निश्चयात्मधर्मश्च अथवा द्विविधा आत्मानः मुनयः श्रावकाश्च तयोर्धर्मविबोधने, विधूतेति—विधूनस्त्यक्तः ऐहिकफलापेक्षासंबन्धो येन तस्य। पुनः कथंभूतस्य। सकलवर्णेति—सकलाश्च ते वर्णाश्च ब्राह्मणादयः शूद्रान्ताश्चतुर्वर्णाः आश्रमाश्च आ शास्त्रोक्तकालात् श्राम्यन्ति यथास्वं तपस्यन्ति इत्याश्रमाः ब्रह्मचारी गृहस्थः वानप्रस्थः भिक्षुकश्चेति। समयाः चत्वारः जैनजैमिनिशाक्यशांकरागमाः, एषां समाचाराः आचाराः विचाराः सम्य-

ग्ज्ञानानि तेषाम् उचितानि तदनुकूलानि यानि वचनानि तेषां प्रपञ्चा एव मरीचयः किरणाः तैः विदलितं निरस्तं सकलजनताकमलिन्याः मिथ्यात्वमोहान्धकारपटलं येन तथाभूतस्य । पुनः कथंभूतस्य । ज्ञानेति—ज्ञानस्य तपसश्च प्रभावेण प्रकाशितं जिनशासनं येन तस्य पुनः कथंभूतस्य । शिष्यसंपदा शिष्याणां विभवेन अशेषमिव सकलमिव भुवनं जगत् उद्धर्तुम् उद्यतस्य संनद्धस्य, भगवतो रत्नत्रयपुरःसरस्य आचार्यपरमेष्ठिनः अष्टतयीम् इष्टिं करोमीति स्वाहा । अपि च—विचार्येति—सर्वम् ऐतिह्यम् आगमं विचार्य मनसि चिन्तयित्वा आचार्यकम् आचार्यपदम् उपेयुषः प्राप्तवतः आचार्यवर्यान् हृदयाम्बुजे संधार्य अर्चामि पूजये ॥४८७॥

[ पृष्ठ २२०-२२४ ] अथोपाध्यायपूजां वर्णयति—ॐ श्रीमदिति—श्रीमतः समवसरणानन्तचतुष्टये-त्युभयलक्ष्मीमतः भगवतः अर्हतः । वदनारविन्दात् मुखकमलात् । विनिर्गतद्वादशाङ्गानि आचाराङ्गादीनि. उत्पादादिचतुर्दशपूर्वाणि, सामायिकादिचतुर्दशप्रकीर्णकानि, एभिः विस्तीर्णो यः श्रुतपारावारः श्रुतज्ञानसमुद्रः तस्य पारंगमस्य । पुनः कथंभूतस्य । अपारेति—अपारश्चासौ संपरायः संसारः स एव अरण्यं तस्मात् विनिर्गमः बहिर्निर्गमनं तदर्थं यः अनुपसर्गः बाधारहितः मार्गः तस्मिन् निरतास्तत्पराः ये विनेयजनाः शिष्यजनाः तेषां शरण्यस्य शरणे साधोः । पुनः कथंभूतस्य । दुरन्तैकान्तेति—दुरन्तः दुष्फलः स चासौ एकान्तवादः सर्वथा नित्यादिधर्माभिनिवेशः सा एव मदमषी मदकृष्णजलं तेन मलिना ये परवादिकरिणः पर-वादिगजाः तेषां कण्ठीरवोत्कण्ठेति—कण्ठ्यां रवो गर्जना यस्य सः कण्ठीरवः सिंहः तस्य उत्कण्ठः उत् ऊर्ध्वं कण्ठात् निर्गतः स चासौ कण्ठीरवः गर्जना तद्वत् भासमानाः याः प्रमाणनय-निक्षेपानुयोगानां वाचः तासां व्यतिकरः समूहो यस्य तथाभूतस्य । श्रवणेति—श्रवणम् आकर्णनम् । ग्रहणं शास्त्रार्थोपादानम् । अव-गाहनं ज्ञानेन विषयस्य आलोडनम् । अवधारणा अविस्मरणम्, प्रयोगः विज्ञातमर्थम् अवलम्ब्य अन्यस्मिन्नर्थे व्याप्त्या तथाविधत्वसाधनं प्रयोगः । वाग्मित्वं प्रशस्ता वागस्यास्तीति वाग्मी तस्य भावः प्रशस्तवचनवक्तृत्वम् । कवित्वं—सरसतया विषयवर्णनशक्तिः । गमकशक्तिः गमयति बोधयति विषयान् लक्षणैर्यः स गमकः तस्य शक्तिः ताभिः विस्मापिताः आश्चर्यं प्रापिताः विततनरनिलिम्पाम्बरचरचक्रवर्तिनः वितताः प्रसृताः ये नराः निलिम्पा देवाः । अम्बरचराः आकाशगामिनः विद्याधराः । तेषां चक्रवर्तिनः स्वामिनः नृपादयः तेषां सीमन्ताः केशवर्त्मानि तेभ्यः प्रतिपर्यस्ताः गलिताः या उत्तंसस्रजः शिरोमालाः शेखराणीत्यर्थः तासां सौरभं सौगन्ध्यं तेन अधिवासितः संस्कारितः पादपीठस्य उपकण्ठः समीपप्रदेशः यस्य । पुनः कथंभूतस्य तस्य । व्रतेति—व्रतानाम् अहिंसादीनां महाव्रतानां विधानं समाचरणं तस्मिन् अनवद्यं हृदयं मनो यस्य तस्य भगवतः रत्नत्रयपुरस्सरस्य उपाध्यायपरमेष्ठिनोऽष्टतयोमिष्टिं करोमीति स्वाहा । अपि च—अपास्तेति—अपास्ताः प्रतिविहिताः एकान्तवादिनाम् इन्द्राः प्रभवः यैः तान् पराजितैकान्तविबुधपतीन् । अपारागमपारगान् अपार-श्चासौ आगमः तस्य पारं परतीरं गच्छन्तीति तान् उपाध्यायपरमेष्ठिनः श्रुतज्ञानलाभाय उपायभूताय अहं उपासे भजे ॥४८८॥ अधुना साधुपरमेष्ठिपूजनम् । ॐ विदितेति—विदितं ज्ञातं वेदितव्यं जीवादितत्त्व-सप्तकं येन स तस्य । पुनः कथंभूतस्य । बाह्येति—बाह्यम् अनशनादिकमाचरणम्, अभ्यन्तरं च प्रायश्चि-त्तादिकम् इति बाह्याभ्यन्तराचरणे । करणत्रयं मनोवचःकायानां त्रयं करणत्रयम् अथवा अधःकरणम् अपूर्वकरणम् अनिवृत्तिकरणं च परिणामविशेषाणां संज्ञाश्चेमाः, एभिः परिणामैः जीवः सम्यग्दर्शनम्, अणुव्रतानि, महाव्रतानि च लभते । एतत्त्रयविशुद्धिरेव त्रिपथगापगाप्रवाहः गङ्गानदीप्रवाहः । तेन निर्मूलितः विनाशितः मनोजकुज-कुटुम्बाडम्बरो येन मनोजः मदनः स एव कुजः वृक्षः कुः पृथ्वी तस्या जायत इति कुजः तस्य कुटुम्बं राग-द्वेष-मद-मात्सर्यादयः तस्य आडम्बरो दर्पः स निर्मूलितो येन तस्य तथाभूतस्य । पुनः कथंभूतस्य । अमराम्बर-चरेति—अमरा देवाः, अम्बरचराः नभोगामिनः विद्याधराः तेषां नितम्बिन्यः रमण्यः तासां कदम्बः समूहः स एव नदः तस्मात् प्रादुर्भूतः मदनमद एव मकरन्दः मरन्दरसः तस्य दुर्दिनविनोदः एव अरविन्दं तस्य चन्द्रायमाणस्य मुकुलीकरणे चन्द्रवत् आचरणं कुर्वतः । पुनः कथंभूतस्य । उदितोदितेति—उत्तरोत्तरं प्रकर्षं प्राप्तानि यानि व्रतानि तेषां व्रातः समूहः तेन अपहसितः तिरस्कृतः अवाच्यकामनया निन्द्याभिलाषया पुत्री-समागमाभिवाञ्छया चारित्रच्युतश्चासौ विरिञ्चः ब्रह्मा तपःप्रारम्भैः विरोचनश्चन्द्रः वैखानसा विश्वामित्रादि-

यतयः तेषां रसोऽनुरागो येन सः तस्य । पुनः कथंभूतस्य । वनदेवताभिः विलुप्यमानचरणपरागस्य, कथंभूतैः तपःप्रारम्भैः । अनेकश इति—अनेकशः बहुवारं त्रैलोक्यक्षोभकारिभिः, ध्यानधैर्येति—ध्यानेन आत्मस्वरूपचिन्तनेन, धैर्येण मनसोऽक्षोभेण च अवधूता विनाशिताः विष्वक् सर्वतः प्रत्यूहव्यूहाः विघ्नसमूहा यैः पुनः कथंभूतैः । अनन्येति—अन्यजनासंभविभिः, मनोविषयातिक्रामिभिः, आश्चर्यप्रभावास्पदैः, अनवधारितम् अनुद्दिष्टं विधानं भोजनं येषु तैः, तैः तैः मूलोत्तरगुणेषु ग्रामणीभिः पुरोगमैः तपःप्रारम्भैः । पुनः कथंभूतस्य । सकलेति—सकलं च तत् ऐहिकसुखसाम्राज्यं च तस्य वरप्रदाने अवहिताः दत्तावधानाः आयाताः आगताः तथापि अवधीरिताः अवज्ञाताः तत्कारणात् विस्मिताः उपनताः नम्रीभूताः या वनदेवताः तासाम् अलकाः केशा एव अलयो भृङ्गाः तेषां कुलेन समूहेन विलुप्यमानः ह्रियमाणः चरणकमलयोः परागो यस्य तस्य । पुनः कथंभूतस्य । निर्वाणपदनिष्ठितात्मनः मुक्तिमार्गे निष्ठितः निश्चयेन स्थितः आत्मा यस्य तथाभूतस्य रत्नत्रयपुरःसरस्य भगवतः सर्वसाधुपरमेष्ठिनः अहतयोमिष्टिं करोमि इति स्वाहा । अपि च—बोधेति—बोध एव आपगा नदी तस्याः प्रवाहेण, विध्यातो विध्वस्तः अनङ्गवह्निः यैस्ते । विध्येति—विधिना आगमकथितप्रकारेण पूजनेन आराध्याः पूज्याः अङ्घ्रयश्चरणा येषां ते साधवः साध्यबोधाय साधयितुं योग्यं साध्यं मुक्तिपदं रत्नत्रयं साध्यो बोध्यः आत्मा यस्य तत् साध्यबोध्यं केवलज्ञानं तस्मै वा तस्य बोधाय ज्ञानाय भवन्तु ॥ ४८९ ॥ अधुना सम्यग्दर्शनरत्नस्य पूजा । ॐ जिनेति—जिनः दुर्जयकर्मठकर्मारातीन् जयतीति जिनः, अर्हन्, जिनागमः जिनेन अर्हता प्रोक्तः आगमः द्वादशाङ्गानि आचारादीनि, जिनधर्मः तेन जिनेन प्रणीतो धर्मः क्षमादिलक्षणो दशविधः, जिनोक्तजीवादितत्त्वावधारणं च एभिः विजृम्भितः प्रवृद्धः निरतिशयः निश्चयेन अतिशयो वैशिष्ट्यं यस्मिन् तथाभूतोऽभिनिवेशः परमार्थानाम् आप्तागमतपोभृतां दृढश्रद्धानं तदेव अधिष्ठानम् आधारः यासु तथाभूतासु चेतःप्रासादपरंपरासु । पुनः कथंभूतासु । प्रकाशितेति—प्रादुर्भूता या शङ्का जिनैः अनेकान्तात्मकं सर्वं प्रतिपादितं तद्यथार्थम् उत अन्यन्नित्यम् अनित्यं वा सर्वम् इति परमार्थम् एवंरूपा धीः शङ्का । सम्यग्दर्शनमाहात्म्यात् तपोमाहात्म्याच्च मम देवपदं नृपतिपदं वा लभताम् इति स्पृहा आकांक्षा प्राकाम्यमुच्यते । अवह्लादनम्—विचिकित्सा स्नानादिरहितस्य मुनेः शरीरं वीक्ष्य जुगुप्साकरणम् । कुमतार्तिः कुधर्मे तदाचरणवति पुरुषे प्रशंसादिकरणं मूढत्वम् । एते खलु विकाराः शल्यरूपाः तेषाम् उद्धारः अपनयनं यासु तासु चेतःप्रासादपरंपरासु । पुनः कथंभूतासु । प्रशमेति—प्रशमादिचतुष्टयस्य लक्षणानि प्रागुक्तानि एते प्रशमादय एव सुकृतिचेतःप्रासादपरंपरायाः स्तम्भाः तैरियं प्रासादपरंपरा संधृता भवति । पुनः कथंभूतासु । स्थितिकरणेति—धर्माद् भ्रश्यतो धर्मे स्थापनं स्थितीकरणम् । उपगूहनम्—धार्मिकजनदोषझम्पनम् । वात्सल्यम्—निर्मायेन मनसा धार्मिकजनस्य यथायोग्यम् आदरकरणम् । प्रभावना—दानतपोजिनपूजाविद्याविनयैर्जिनधर्ममाहात्म्यसंवर्धनम् । स्थितिकरणोपगूहनवात्सल्यप्रभावनाभिः आचरिताः उत्सवसपर्याः महपूजाः यासु तासु । पुनः कथंभूतासु—अनेकेति—अनेके ये त्रिदशविशेषाः देवविशेषाः इन्द्रसामानिकादयः तेषां निर्मापिताः भूमिकाः यासु ताः । तथाभूतासु सुकृतिचेतःप्रासादपरंपरासु सुकृतीनां पुण्यवतां मनःसौधपंक्तिषु, कृतक्रीडाविहारमपि कृतः क्रीडार्थं विहारो येन तथाभूतमपि यत् सम्यग्दर्शनं निसर्गात् स्वभावतः महामुनीनां मन एव पयोधिः समुद्रः तेन सह परिचितं परिचयविशिष्टं भवति । अशेषेति—अशेषाः सकलाः ये भरतैरावतविदेहाः त्रीणि क्षेत्राणि वर्षधराश्च हिमवदादयः तेषां चक्रवर्ती स्वामी मेरुपर्वतः तस्य चूडामणिस्वरूपः तत्कालजन्मा तीर्थकरः तस्य कुलदैवतमेतत्-सम्यग्दर्शनम् । अमरेति—अमरेश्वरा इन्द्राः तेषां या मतिर्ज्ञानं सा एव देवता तस्याः अवतंसः कर्णभूषणरूपम् एतत्सद्दर्शनं कल्पवल्लीपल्लवम् इव । अम्बरेति—अम्बरचरा विद्याधराः ते च ते लोका जनाः तेषां सम्यग्दर्शनमेतत् हृदयस्य एकम् अद्वितीयं मण्डनम् । अपवर्गेति—अपवर्गपुरं मुक्तिनगरं तत्र प्रवेशं कृत्वा यत् अगण्यपण्यस्य आत्मसात्करणं स्वीकरणं तदर्थं दीयमानं तस्य सत्यंकारमिवैतत्सम्यग्दर्शनम् । अवश्यं मयैतत्क्रेतव्यम् इति सत्याकरणसदृशम् । अनुल्लङ्घ्येति—उल्लङ्घयितुम् अशक्यम् अवश्यभोग्यमिति भावः, एतादृग् यत् दुरघं दुष्टम् अघं पापं तदेव घनघटा मेघसमूहः तस्य दुर्दिनानीव ये प्राणिनस्तेषु, ज्योतिरिति—

ज्योतिर्लोकादीनां ज्योतिषव्यन्तरभवनवास्यादीनां या गतयः अवस्थाः ता एव गर्ताः श्वभ्राणि रन्ध्राणि तेषु पाते पतने यत् तमस्काण्डं मिथ्यात्वतिमिरं तस्य भेदनमेतत्सम्यग्दर्शनम् । आमनन्ति मनीषिणः मनीषा बुद्धिरस्ति येषां ते मनीषिणः धीमन्त इति भावः । तस्य संसारपादपोच्छेदे संसारवृक्षभेदने आद्यकारणस्य सकलमंगलविधायिनः पञ्चपरमेष्ठिनाम् अग्रणीकृतस्य भगवतः पूज्यस्य सम्यग्दर्शनरत्नस्य अष्टतयीमिष्टिं करोमीति स्वाहा । अपि च—**मुक्तीति**—लक्ष्मीर्लतेव तस्याः सम्यग्दर्शनमेतत् मूलमिव वर्तते । मुक्तिश्रीवल्लरीवनम् प्रमाणनयात्मिका युक्तिश्रीः तस्या वल्लरीणां लतानां वनमिवेदम् । **भुक्तीति**—भोगानां स्रक्कामिन्यादीनां दाने समर्थो यश्चिन्तामणिः तं प्रददाति सम्यग्दर्शनमिदम् । एतत् सम्यक्त्वम् अहं भक्तितोऽर्हामि पूजयामि ॥४९०॥ अथ सम्यग्ज्ञानपूजा—

**ॐ यन्निखिलेति**—यत् सम्यग्ज्ञानं सकलजगतः तृतीयं नेत्रम् । यत् स्वहिताहितविमर्शज्जातो यो याथात्म्याव-बोधः यथार्थपरिचयः तेन सप्राप्तसत्यस्वरूपम् । **अधिगमेति**—गुरूपदेशाज्जातं सम्यक्त्वरत्नमधिगममुच्यते तस्योत्पत्तिस्थानमेतत् । अखिलास्वपि दशासु निगोदावस्थामारभ्य मुक्त्यवस्थापर्यन्तं सर्वास्वपि दशासु, क्षेत्रज्ञ आत्मा तस्य स्वभावाः सुखाद्यनन्तगुणाः त एव साम्राज्यं तस्यैतत् सम्यग्ज्ञानं परमम् अभिज्ञानलक्षणम् । अपि च यस्मिन्सम्यग्ज्ञाने इदानीमपि अस्मिन्कलिकालेऽपि नदीष्णातचेतोभिः कुशलमनोभिः **सम्यगिति**—समीचीनतया उपाहितः प्रणिधानयुतः स चासौ उपयोगः अर्थग्रहणव्यापारः तेन संमार्जनं निर्मलीकरणं यस्मिन् तथाभूते द्युमणिमणिदर्पण इव द्युमणिः सूर्यः स चासौ मणिः सूर्यकान्तरत्नं तस्य दर्पणे आदर्शे साक्षाद्भवन्ति प्रत्यक्षतां प्रतिपद्यन्ते ते ते भावैकसंप्रत्यया भावोऽभिप्रायः एव एकः मुख्यः संप्रत्ययः परिज्ञानकारणं येषाम् स्वभावक्षेत्रसमय-विप्रकर्षिणोऽपि भावाः स्वभावविप्रकर्षिणः परमाण्वादयः । क्षेत्रविप्रकर्षिणः देशान्तरिता इति ते च मेर्वादयः । समयविप्रकर्षिणः कालान्तरिताः रामरावणादयः भावाः पदार्थाः । तस्य सम्यग्ज्ञानस्य, कथंभूतस्य पञ्च-तयीमवस्थाम् अवगाहमानस्य, तस्य तादृशीम् अवस्थां विवृणोति—**आत्मलाभेति**—तस्य सम्यग्ज्ञानस्य आत्मलाभ-निबन्धस्य स्वोत्पत्तिविषयस्य उभयहेतुविहितविचित्रपरिणतिभिः बाह्याभ्यन्तरकारणाभ्यां कृत-नानापरिणतिभिः कृतनानादशैः मतिश्रुतावधिमनःपर्ययकेवलैः पञ्चतयीं पञ्चविधाम् अवस्थां दशा-मवस्थाम् अवगाहमानस्याप्रविशतः सकलमंगलानां विधातुः पञ्चपरमेष्ठि-पुरःसरस्य भगवतः सम्यग्ज्ञान-रत्नस्याष्टतयीमिष्टिं करोमि स्वाहा ॥३२॥ अपि च—**नेत्रमिति**—हिताहितयोः सुखदुःखयोः तत्कार-णयोश्च आलोके दर्शने सम्यग्ज्ञानं नेत्रं लोचनम् अस्ति । तथा तत् धीसौधसाधने धीः बुद्धिः सा एव सौधः प्रासादः तस्य साधने रचनायां सूत्रम् यथा सूत्रेण शिल्पी प्रासादादिकं सप्रमाणं निर्मिनोति तथा सम्यग्ज्ञानेन बुद्धिसौधनिर्माणं सप्रमाणं भवति । लक्ष्म्याः समागमे क्षेत्रम् एतत्सम्यग्ज्ञानं पूजाविधेः पात्रं कुर्वे ॥४९१॥ अधुना सम्यक्चारित्रं पूज्यते । **ॐ यत्सकलेति**—यच्चारित्ररत्नं सर्वलोकालोकदर्शनप्रतिबन्धकस्य अन्धकारस्य मोहस्य विध्वंसकमस्ति । **अनवद्येति**—अनवद्या निर्दोषा चासौ विद्या सैव मन्दाकिनी गङ्गानदी तस्या धरमिव हिमाचलमिव । **अशेषसत्त्वोत्सवेति**—सकलप्राण्युत्सवप्रमोदचन्द्रोदयम्, **अखिलेति**—सकलव्रतगुप्ति-समितिगण एव लताः वल्लयः तासां य आरामः उद्यानं तस्य विकसने पुष्पाकरसमयं वसन्तकालः । **अनल्पेति**—अनल्पफलानि स्वर्गादिसौख्यानि, तेषां प्रदाने कल्पवृक्षोत्पत्तिभूमिम् । **अस्मयेति**—न स्मयो गर्वो यस्मिन् स चासौ उपशमः चारित्रमोहस्य अनुदयः, क्षयोपशमश्च, सौमनस्यं मनसः कापट्यरहिता वृत्तिः, धैर्यं च एवं गुणाः प्रधाना येषां तैः अनुष्ठीयमानम् आचर्यमाणम् चारित्रं सद्धीमन्तः सती चासौ धीर्बुद्धिः सा अस्ति येषां ते सद्धीमन्तः समीचीनबुद्धयः गणधरादयः परमपदप्राप्तेः परमं सर्वोत्कृष्टं पदं स्थानं मुक्तिमन्दिरं तस्य प्राप्तेः लाभस्य प्रथमं सोपानमिव उपानम् उपरिगमनं तेन सह विद्यमानम् आरोहणम् इव । तस्य पञ्चतयात्मनः सामायिकच्छेदोपस्थापन-परिहारविशुद्धि-सूक्ष्मसाम्पराय-यथाख्यातेति पञ्चप्रकारस्य सकलमंगलविधायिनः पञ्चपरमेष्ठिपुरःसरस्य भगवतः सम्यक्चारित्ररत्नस्य अष्टतयीमिष्टिं करोमीति स्वाहा ।

[ पृष्ठ २२५ ] अपि च—**धर्मेति**—धर्मः उत्तमक्षमादिदशलक्षणात्मकस्तस्य योगी तदाचरणं कुर्वाणः साधुः एव नरेन्द्रः राजा तस्य । **कर्मेति**—कर्माण्येव वैरिणः शत्रवः तेषां जयार्जनं जयप्राप्तौ तत्पराङ्मुखीकरण-साधनम् । सर्वसत्त्वानां सर्वजीवानां शर्मकृत् सौख्यकारकम् वृत्तं चारित्रं धर्मधीः धर्मे धीर्बुद्धिर्यस्य सोऽहं वृत्त

चारित्रम् आश्रये अवलम्बे ।।४९२।। जिनेति—जिनोऽर्हन्, सिद्धः मुक्तः, सूरिः आचार्यः, देशकः उपाध्यायः, साधुः साधुपरमेष्ठी, श्रद्धानं सम्यक्त्वम्, बोधो ज्ञानम्, वृत्तं चारित्रं तेषाम् अष्टतयीम् अष्टप्रकाराम् इष्टिं पूजां कृत्वा ततः युक्त्या स्तवं विदधामि स्तुतिं करोमि ।।४९३।। ( प्रथमं तावत् सम्यग्दर्शनं स्तूयते । ) तत्त्वेष्विति—तत्त्वेषु जीवादिसप्तपदार्थेषु प्रणयं रुचि जिनैः परस्य मनसः तत्त्वतत्परस्य मनसः चित्तस्य श्रद्धानं सम्यग्दर्शनम् उक्तम् । [1]एतत् निसर्गाधिगमाभ्यां द्विभेदम्, उपशम-क्षयोपशम-क्षयभेदात्त्रिभेदम्, आज्ञामार्ग-उपदेश-सूत्र-बीज-संक्षेप-विस्तार-अर्थ-अवगाढ-परमावगाढेति भेदात् दशविधम् । चतुर्भिः गुणैः प्रशम-संवेगा-नुकम्पा-आस्तिक्यैः व्यक्तं प्रकटीभूतम्, निःशङ्कादिभिरष्टाङ्गम् । भुवनत्रयार्चितं त्रैलोक्यपूजितम् इदं त्रिभिः मूढैः देव-लोक-पाखण्डिभिः अपोढं रहितम् । हे देव जिनेन्द्र, संसृतिः संसारः सा एव लता वल्ली तस्याः उल्लासः विकासः, तस्य अवसानम् अन्तः स एव उत्सवः आनन्दः यस्य तत् सम्यग्दर्शनम् अहं चित्ते दधामि धारयामि ।।४९४।। ते कुर्वन्त्विति—हे देव जिनेन्द्र, एषा रुचिः सम्यग्दर्शनं येषु जीवेषु न विद्यते ते जीवाः प्रायः बहुशः जन्मच्छिदः संसारच्छेदकाः न भवन्ति । कथंभूता रुचिः । तवेति—तव भवतः वचःश्रद्धा यथार्थजीवादिवस्तुप्रतिपादके वचने श्रद्धारूपा, पुनः कथंभूता अवधानोद्‌धुरा अवधानं प्रणिधानं तेन उद्‌धुरा उत्कटा जिनप्रोक्तमेव तत्त्वं सत्यं नान्येषाम् इति दृढाभिनिवेशयुक्ता । पुनः कथंभूता । दुष्कर्मेति—दुष्कर्मणां ज्ञानावृत्यादीनाम् अशुभकर्मणां ये अङ्कुराः प्ररोहाः तेषां कुञ्जः समूहः तस्य वज्रदहनः वज्राग्निरिव तस्य द्योतः कान्तिः तेन अवदाता शुद्धा निर्मला । येषु इयं श्रद्धा न विद्यते ते दुर्धरधियः दुःखेन ध्रियते इति दुर्धरा धीर्येषां ते दुर्धरधियः अतीव चञ्चलबुद्धयः ते नरा तपांसि कुर्वन्तु । ज्ञानानि संचिन्वताम् ज्ञानोपचयं कुर्वन्तु । वा अथवा वित्तं धनं वितरन्तु ददतु । तदपि तथापि प्रायः जन्मच्छिदः न भवन्तीति विज्ञेयम् ।।४९५।।

[ पृष्ठ २२६ ] संसारेति—हे नाथ स्वामिन्, यः कृती पुण्यवान्, हृदि मनसि सम्यक्त्वरत्नं सम्यग्दर्शनमणिं धत्ते धारयति, तस्य नरस्य स्वर्गापवर्गश्रियः स्वर्गमुक्तिरमाः सुलभाः सुप्रापाः भवन्ति । कथंभूतं सम्यक्त्वरत्नम् । संसारेति—संसार एव अम्बुधिः समुद्रः तस्य उल्लंघने सेतुबन्धं सेतुरचनातुल्यम् । पुनः कथंभूतम् । असमेति—समं युगपत् न समम् असमं क्रमेण प्रारम्भः उत्पत्तिर्यस्य तच्च तल्लक्ष्मीवनं रमाक्रीडा-रामः, तस्य प्रोल्लासने विकासने अमृतवारिवाहम् पीयूषमेघसदृशम् । पुनः कथंभूतम् । अखिलत्रैलोक्यचिन्ता-मणिम् । सकलत्रैलोक्ये चिन्तामणिं चिन्तितवस्तुदानरत्नसमम् । पुनः कथंभूतम् । कल्याणेति—कल्याणानि गर्भावतारादिनिर्वाणान्ताः पञ्चमहोत्सवाः तान्येवाम्बुजखण्डानि कमलवृन्दानि तेषां संभवसरः उत्पत्ति-सरोवरम् ।।४९६ ।। [ इति दर्शनभक्तिः ] [ ज्ञानभक्तिः ] अत्यल्पेति—इयम् अक्षजा मतिः इन्द्रिया-निन्द्रियजा बुद्धिः अत्यल्पायतिः अत्यल्पा अतिस्तोकः आयतिः भविष्यत्कालो यस्याः सा मतिज्ञानं जातमपि कालान्तरस्थायि न भवति । विस्मृतिशीलं हि तत् । अवधिः बोधः अवध्याख्यं ज्ञानं रूपिद्रव्यविषयम् । सावधिः द्रव्यक्षेत्रकालभावमर्यादायुतम् । साश्चर्यः विस्मयोत्पादकं मनःपर्ययः तन्नामकं ज्ञानं परमनसि स्थितं अर्थं प्रत्यक्ष-तया जानाति अत एव साश्चर्यं तत् परं स्वल्पः सः क्वचिदेव योगिनि कस्मिंश्चिदेव सप्तविधान्यतमर्द्धिधारके मुनिवर्ये विद्यते । अद्यास्मिन् पञ्चमकाले पुनः दुष्प्रापं लब्धुं नितराम् अशक्यम् । इदं केवलं ज्योतिः केवलज्ञानं प्रकाशस्वरूपं कथागोचरं प्राचीनमहापुरुषकथाविषयमेव । तु परम् । निखिलार्थगे सुलभे श्रुते सकलजीवादि-पदार्थविषये सुप्रापे श्रुतज्ञाने माहात्म्यं प्रभावं किं वर्णयामः । श्रुतज्ञानस्य माहात्म्यं नास्माभिर्वर्णयितुं शक्यते इति भावः ।।४९७।। यद्देवैरिति—यत्स्याद्वादसरोरुहं तच्छ्रुतज्ञानकमलं मम मनोहंसस्य मन एव हंसः सितच्छ-दस्तस्य मुदे भूयात् । आनन्दं जनयत्विति भावः । कथंभूतं तत् यद्देवैः शिरसा धृतम् । गणधरैः कर्णावतंसीकृतं चतुर्ज्ञानधारिभिस्तीर्थकरमुख्यशिष्यैः कर्णभूषणीकृतम् । योगिभिः चेतसि मनसि स्थापितम् । पुनः नृपवरैः माण्डलिकमहामाण्डलिकादिभिर्नृपेश्वरैः आघ्रातः सारो यस्य, स्याद्वादसरोरुहस्य नासिकया गन्धो घ्रातः । विद्याधराधीश्वरैः नभश्चरभूपैः हस्ते, दृष्टिपथे मुखे च निहितम् स्थापितम् ।।४९८।। मिथ्यातम इति—

१. ब० क० पुस्तकयोः तत्तदुद्भिन्नदशा इति पाठः ।

जिनागमाय जिनप्रोक्तार्ये स्याद्वादवाण्यै नित्यं प्रणमामि सदा नमस्करोमि। कथंभूतोऽहम्। तत्त्वेति—तस्य जिनागमस्य तत्त्वं स्वरूपं तस्य भावने चिन्तने मनः यस्य। कथंभूताय अहं प्रणमामि—मिथ्येति—मिथ्यातमः अतत्त्वश्रद्धानम् एव तमः तिमिरं तस्य पटलं समूहः तस्य भेदनकारणाय विनाशहेतवे। पुनः कथंभूताय स्वर्गेति—स्वर्गमोक्षनगरपथप्रदर्शकाय। पुनः कथंभूताय त्रैलोक्यमङ्गलकराय जगत्त्रयहितंकराय ॥४९९॥ [ इति ज्ञानभक्तिः ]

[ पृष्ठ २२७ ] [ चारित्रभक्तिः ] ज्ञानमिति—यदन्तरेण चारित्रभक्ति विना ज्ञानं दुर्भगस्य कुरूप-नरस्य देहमण्डनम् इव शरीरालंकरणमिव, स्वस्य खेदावहं स्यात्। अयं सम्यक्त्वरत्नाङ्कुरः चारित्रं विना तत्फलश्रियं स्वफलशोभां साधु उत्तमतया न धत्ते धारयति। देव प्रभो, जिन, तास्ताः तपोभूमयः तपसां भूमयः स्थानानि कायवाङ्मनांसि यदन्तरेण कामं नितरां विफलाः स्वर्गमोक्षफलरहिताः भवन्ति। अतः तस्मै संयमदमध्यानादिधाम्ने प्राणीन्द्रियसंयमौ द्वौ, दमः इन्द्रियनिग्रहः, ध्यानम् एकाग्रचिन्तानिरोधः आदौ येषां तेषां गुप्तिसमित्यादीनां धाम्ने गृहाय त्वच्चरित्राय तव भगवतः चरिताय चारित्रगुणाय नमः अस्तु ॥५००॥ यश्चिन्तामणिरिति—अहं विविधं पञ्चविधं तच्चारित्रं सामायिकच्छेदोपस्थापन-परिहारविशुद्धि-सूक्ष्मसाम्पराय-यथाख्यातचारित्रभेदम्। नमामि। कथंभूतं तत्- यदिति—यच्चारित्रम् ईप्सितेषु इष्टेषु अभिलषितदाने चिन्तामणिः सौरूप्यस्य सौन्दर्यस्य, सौभाग्यस्य शुभदैवस्य च वसतिर्गृहम्। श्रीति—श्रियाः रमायाः पाणिग्रहकौतुकं विवाहोत्सवः, कुलेति—कुलं वंशः बलं सामर्थ्यम् आरोग्यं रोगविहीनता एषाम् आगमे संगमः मिलनस्थानम्। यदिति—यत् पञ्चात्मकं पञ्चभेदं चारित्रं पूर्वैः प्राचीनैः समाधिनिधिभिः प्राप्तानां सम्यग्दर्शनादीनां पर्यन्तप्रापणं समाधिः ध्यानं वा धर्म्यं शुक्लं च समाधिः। स एव निधिः येषां तैः साधुभिः मोक्षाय चरितं सेवितम् ॥५०१॥ हस्ते इति—यस्य मुनेः जैनैः जिनप्रोक्तैः सामायिकादिचरितैः मनः पवित्रं तस्य हस्ते स्वर्गसुखानि आगच्छन्ति। अतर्कितभवाः अतर्कितो अकस्मात् भवः उत्पत्तिर्यासां ताः अकस्मात्प्राप्ताः अविचारगोचराश्चक्रवर्तिनः संपदः तं यान्ति। देवाः पादतले लुठन्ति, द्यौः स्वर्गः सर्वतः दशभ्यो दिग्भ्यः कामितम् इष्टं फलति यच्छति। पुनः इमाः कल्याणोत्सवसंपदः गर्भादिकल्याणेषु इन्द्रादिभिः कृते उत्सवे रत्नादिवृष्टिः दिव्यभोगोपभोगवस्तुप्राप्तिः तस्य अवतारालये स्वर्गादवतरणं यस्मिन्नालये भविष्यति तत्र प्रागेव जन्मनः पूर्वमेव, अवतरन्ति आगच्छन्ति ॥५०२॥ [ इति चारित्रभक्तिः ] [ अथार्हद्भक्तिः ] बोधो इति—हे जिनेन्द्र, ते तव अवधिर्बोधः अवध्याख्यम् इन्द्रियमनोऽनपेक्षं तृतीयं ज्ञानम्। अशेषनिरूपितार्थं अशेषाः सकलाः निरूपिताः परोक्षतया ज्ञाताः अर्थाः जीवादयः पदार्था येन तत् तथाभूतम् श्रुतज्ञानम्। ते तव मतिः मतिज्ञानं सहजा त्वया सहैव जाता कथंभूता। अन्तर्बहिःकरणजा—अन्तःकरणं मनः तस्मात् जाता अन्तःकरणजा, बहिःकरणानि बाह्येन्द्रियाणि स्पर्शनरसनघ्राणचक्षुःश्रोत्राणि पञ्च तेभ्यो जाता मतिः। इत्थम् एवं स्वतः स्वस्मादेव सकलपदार्थविमर्शनमतेः भवतः परतः परस्माद् गुर्वादेः का व्यपेक्षा अभिलाषा स्यात्। न कापि इति। सहजज्ञानत्रितयवत्त्वात् तीर्थकरस्य ज्ञानसंपादने गुर्वपेक्षा नास्तीति भावः ॥५०३॥

[ पृष्ठ २२८ ] ध्यानावलोकेति—देव हे विभो, शुक्लध्यानप्रकाशेन विगलद् विध्वस्यत् तिमिर-प्रतानम् अज्ञानपटलं यस्य तस्मिन्। ताम् अनुपमां केवलमयीम् अनन्तज्ञानादिचतुष्टयरूपां श्रियं लक्ष्मीम् आदधाने बिभ्रति त्वयि। मुहुः पुनः पुनः। महाय उत्सवाय पूजनाय व्यापारमन्थरं त्रिभुवनम्। एक-पुरमिव आसीत् अभवत्। भगवतः केवलज्ञाने जाते सति तदास्थाने नरसुरपशवः धर्मश्रवणार्थं संततमागच्छन्तीति भावः ॥५०४॥ छत्रमिति—अहं छत्रं प्रभोः मस्तके दधामि धारयामि। किमु चामरम् उत्क्षिपामि चालये। अथ जिनस्य पदे हेमाम्बुजानि सुवर्णकमलानि अर्पयामि। इत्थम् एवंप्रकारेण। अमरपतिः सौधर्मेन्द्रः स्वयमेव यस्मिन् जिने सेवापरः आराधनादक्षः। तत्र अहं परं किमु वच्मि भगवतो महिमा गणिनामपि वाचाम् अगोचर इति भावः ॥५०५॥ त्वमिति—हे ईश नाथ, त्वं सर्वदोषरहितः क्षुत्पिपासाद्यष्टादशदोषदूरः। ते वचः सुनयम् अपेक्षया वस्तुधर्मप्रतिपादनपरम्। ते सकलो विधिः उपदेशादिकः। सत्त्वानुकम्पनपरः प्राणिदयामाश्रित्य प्रवर्तते। तथापि लोकः त्वदीयसकलविधिं दृष्ट्वापि न भोक्ष्यति। [ न तुष्यति ] ननु अस्य लोकस्य कर्म एव

कारणम् न तु भवान्। यथा रवौ उदिते कौशिकस्य घूकस्य स दोषः न तु रवेः। घूको रविं न प्रेक्षते तथा जनः न तुष्यति नासौ दोषो जिनदेवस्य। लोकस्य मिथ्यात्वोदय एव तत्रापराध्यति ॥५०६॥ पुष्पमिति—देव अर्हन्, त्वदीयेति तव इमौ त्वदीयौ तौ च तौ चरणौ पादौ तयोः अर्चनस्य पूजनस्य यत्पीठं सिंहासनं तस्य संगात् संपर्कात् जगत्त्रयस्य त्रैलोक्यस्य। चूडामणीव भवति। तत्पुष्पं वन्द्यं भवति अतः जनः तत् मस्तके बिभर्ति। अतः अन्यशिरसि अपरेषां हरिहरादीनां मस्तके स्थितमपि अस्पृश्यं भवति। अतः ते तव। को नाम साम्यम् अनुशास्तु प्रतिपादयतु। कैः। रवीश्वराद्यैः सूर्यरुद्राद्यैः समतां प्रतिपादयतु। न कदापि सूर्यहरिहरादिभिः त्रैलोक्य-वन्द्यस्य भगवतो जिनेश्वरस्य साम्यमस्तीति ज्ञेयम् ॥५०७॥ मिथ्येति—पुरा एतज्जगत् मिथ्या मिथ्यात्वम् अतत्त्वार्थ-श्रद्धानोपदेशः तदेव महान्धतमसं महागाढतिमिरं तेन आवृतम् अत एव अप्रबोधं ज्ञानरहितम्। भवगर्तपाति संसार-रन्ध्रे पातो यस्य तथाभूत्। परं तत्तस्मात्कारणात् हे देव, त्वमेव, भवानेव, दृष्टिहृदयाब्जविकासकान्तैः दृष्टी नेत्रे, हृदयं मनः तान्येव अब्जानि कमलानि तेषां विकासे कान्तैः मनोहरैः। स्याद्वादेति—स्याद्वादरश्मिभिः स्वरूप-चतुष्टयं पररूपचतुष्टयंचापेक्ष्य जातैः सप्तभङ्गरज्जुभिः उद्धृतवान् भवगर्तपातात् उपरि निष्कासितवान् ॥५०८॥ पादाम्बुजद्वयमिति—देव विभो यस्य नरस्य स्वच्छे मनसि निर्मले हृदये। तव इदं पादाम्बुजद्वयं चरण-कमलयुगलं समास्ते विद्यते। श्रीः लक्ष्मीः स्वयं तं भजति सेवते। स्वर्गमोक्षोत्पादिका मातेव इयं सरस्वती तं नियतं निश्चयेन वृणीते स्वीकरोति ॥ ५०९ ॥ [ इत्यर्हद्भक्तिः ]

[ पृष्ठ २२९ ] [सिद्धभक्तिः] सम्यग्ज्ञानत्रयेणेति—कथंभूताः सिद्धाः मतिश्रुतावधीनां त्रयेण प्रवि-दितः ज्ञातः सकलज्ञेयजीवादितत्त्वविस्तारो यैः ते। पुनः कथंभूताः। अथ अनन्तरम्। ध्यानवातैः सकलं कर्मरजः ज्ञानावरणादिघातिकर्मचतुष्करजः प्रोद्धूय निरस्य। प्राप्तकैवल्यरूपाः लब्धशुद्धात्मरूपाः संप्राप्तकेवलज्ञानरूपा वा। पुनः कथंभूताः सिद्धाः। अथ सत्त्वोपकारं प्राण्युपकृतिं कृत्वा ये त्रिभुवनपतिभिः धरणेन्द्रचक्रवर्तिस्वःपतिभिः दत्तयात्रोत्सवाः उद्घोषितनिर्वाणकल्याणाः। ते लोकत्रयस्य शिखरे अग्रे सिद्धपुरीनिवासिनः सिद्धाः वः युष्माकं सिद्धये मुक्त्यै सन्तु भवन्तु ॥५१०॥ दानज्ञानेति—आहारौषधावासशास्त्रभेदाच्चतुर्विधानि दानानि। ज्ञानम् आध्यात्मिकम्। चारित्रं सामायिकादिकम्। प्राणेन्द्रियसंयमौ द्वौ। तथा द्रव्यार्थिकपर्यायार्थिकौ नयौ एषां प्रारम्भः गर्भे यस्य तथाभूतं मनः कृत्वा। एषु विषयेषु मनः संस्थाप्य। तथा च अन्तरिन्द्रियं मनः बहिरिन्द्रियाणि च स्पर्शादीनि पञ्च। तथा पञ्चमरुतः प्राणापानसमानोदानव्यानाः तान् संयम्य वशीकृत्य पश्चात् तत् ध्यानं प्रविधाय। कथंभूतं ध्यानम्। वीतेति—वीतं नष्टं विकल्पानां रागद्वेषादीनां जालं यस्मात्। पुनः कथंभूतम्। भ्रस्यत्तमःसन्तति, भ्रस्यन्ती तमसाम् अज्ञानानां संततिर्यस्मात्तत्। अखिलं ध्यानं शुक्लाह्वयं चतुर्विधं प्रविधाय विचिन्त्य। ये च मुमुचुः ये मुनयः द्रव्यभावकर्मभ्यां मुक्ता बभूवुः। तेभ्योऽपि अञ्जलिः प्रसृतिर्बद्धः तान् सिद्धपरमेष्ठिनोऽपि वयं वन्दामहे ॥५११॥ इत्थमिति—इत्थम् एवम्। अत्र अस्मिन्लोके। ये मुनयः, कथंभूताः। धृतेति—धृता ध्याने अवधानर्द्धिः प्रणिधानवैपुल्यं यैस्ते। कुत्र। समुद्रेति—समुद्रः। कन्दरः पर्वतदरी। सरः सरोवरम्। स्रोतस्विनी नदी। भूः भूमिः। नभ आकाशम्। द्वीपः जलवेष्टितभूमिः। अद्रिः पर्वतः। द्रुमः वृक्षमूलम्। काननं वनं तानि आदौ येषां तेषु। धृतध्यानस्थिराः त्रिषु कालेषु भूतभविष्यद्भवत्सु कालेषु मुक्तिसंगमे मुक्तिसंगसुखसेविनः भव्येषु रत्नाकराः मुनयः रत्नत्रयमङ्गलानि ददतां समर्पयन्तु ॥५१२॥ [ इति सिद्धभक्तिः ] [चैत्यभक्तिः] भौमेति—भौमाः भवनवासिनो देवाः। व्यन्तराः विविधदेशान्तराणि येषां निवासास्ते व्यन्तरदेवाः। मर्त्या मनुष्याः सार्धद्वीपद्वितयवर्तिनः, भास्करसुराः चन्द्रसूर्यादयः पञ्चविधा ज्योतिष्काः। सुराः स्वर्गवासिनो देवाश्च। एषां श्रेणीविमानाश्रिताः पंक्तिबद्धविमानेषु आवासेषु श्रिताः स्थिताः पुनः कथंभूताः आकृतीः। स्वर्ज्योतिरिति—स्वः स्वर्गः ज्योतिः ज्योतिर्मण्डलस्थानम् कुलपर्वतान्तरधरा हिमवदादयः कुल-पर्वताः अन्तरधरा व्यन्तराणां निवासभूमिः। रन्ध्रप्रबन्धः भवनवासाः पंक्तिबद्धाः। एषु स्थितिः यासां ताः। पुनः कथंभूताः। जिनेन्द्रेति—जिनेन्द्रा अर्हन्तः। सिद्धाः मुक्ताः। गणभृतः आचार्याः। स्वाध्यायिनः उपाध्यायाः। साधवः साधुपरमेष्ठिनश्च एषाम् आकृतीः प्रतिमाः अहं वन्दे। पुनः कथंभूताः। तत्पुरेति—तेषां भौमादिदेवानां

पुराणि नगराणि तेषां पालाः रक्षकाः असुरेन्द्रादयः तेषां मौलयः किरीटानि तेषु विलसन्ति यानि रत्नानि तानि एव प्रदीपास्तैः अचिताः पूजिताः आकृतीः साम्राज्याय मुक्तिसाम्राज्याय वन्दे ॥५१३॥ [इति चैत्यभक्तिः]।

[ पृष्ठ २३० ] [ पञ्चगुरुभक्तिः ] **समवसरणेति**—अहं तान् पञ्चपरमेष्ठिनः स्तुवे इति क्रियासंबन्धः। अहं समवसरणवासान् अर्हतः स्तुवे। समवसरणे वासो येषां तान्। मुक्तिलक्ष्मीविलासान् मुक्तिरमया विलासं क्रीडां कुर्वाणान् सिद्धान् स्तुवे। सकलसमयनाथान् सकलाश्च ते समयाः आगमाः तेषां नाथान् स्वपरागमवेदिनः आचार्यान् स्तुवे। वाक्यविद्याः व्याकरणादिशास्त्राणि तैः सनाथाः सहिताः तेषां ज्ञातारः इति भावः। तानुपाध्यायान्। **भवनिगलेति**—संसारशृङ्खलानां विनाशस्त्रोटनं तस्य उद्योगाय क्षमो यो योगः आतापनादिः तेन प्रकाशन्ते इति प्रकाशास्तान् साधुपरमेष्ठिनः। अहं क्रियावान् सामायिकादिक्रियाः कुर्वाणोऽहं संस्तुवे। कथंभूतान्पञ्चपरमेष्ठिनः स्तुवे। **निरुपमेति**—निरुपमाः निर्गता उपमा येभ्यस्ते निरुपमाः ते च ते गुणाश्च निरुपमगुणाः तेषां भावो अस्तित्वं येषां तान् स्तुवे। अर्हतां षट्चत्वारिंशद्गुणाः। सिद्धानां सम्यक्त्वादयोऽष्टौ। सूरीणां षट्त्रिंशद्गुणाः। उपाध्यायानां पञ्चविंशतिर्गुणा। साधूनाम् अष्टाविंशतिगुणास्तेषां गुणानाम्। [ इति पञ्चगुरुभक्तिः ] ॥५१४॥ [ शान्तिभक्तिः ] **भवेति**—जिनः शान्तिः शान्तिकरः स्तात् भवतु। कथंभूतः सः। **भवेति**—संसारासुखाग्निशान्तिः संसारदुःखाग्न्युपशामकः। **धर्मामृतेति**—धर्म एव अमृतमिति तस्य वर्षः वृष्टिः तस्मात् जनिता उत्पादिता शान्तिर्येन सः। पुनः कथंभूतः। **शिवेति**—मुक्तिसुखागमनाय शान्तिरूपः जिनः शान्तिकरः स्तात्। [ इति शान्तिभक्तिः ] ॥५१५॥ [ आचार्यभक्तिः ] **मनोमात्रेति**-मनोमात्रस्य उचितं मनोमात्रोचितं तस्मै मनोमात्रोचिताय मनसैव कर्तुं योग्याय पुण्याय। यः न चेष्टते न प्रवर्तते। हताशस्य दीनस्य तस्य मनोरथाः मनोऽभिलाषाः कथं कृतार्थाः कृतकार्याः सफलाः स्युर्भवेयुः ॥५१६॥

[ पृष्ठ २३१ ] **येषां तृष्णेति**—येषां आचार्याणां चित्तवृत्तिप्रचारः मनोवृत्तिप्रसरः तत्त्वलोकावलोकात् जीवादिसप्ततत्त्वमयो यो लोको जगत् तस्य अवलोकात् वीक्षणात् तृष्णातिमिरभिदुरः तृष्णा विषयाभिलाषा एव तिमिरं तमः तस्य भिदुरः भेदकः अस्ति। प्रशमजलधेः क्रोधादिकषायाणां प्रशमः अनुद्भवः एव जलधिः समुद्रः, तस्य पारे अवारे च तीरे उभयोस्तीरयोः चित्तवृत्तिप्रचारः खेलति। संगवार्धेः परिग्रहसमुद्रस्य परस्मिन् च तटे खेलति। **बाह्येति**—बाह्येषु कनककामिन्यादिषु पुद्गलादिषु च अनात्मीयेषु व्याप्तिप्रसरविधुरः प्रवृत्तिप्रसररहितः वर्तते तेषाम्। आचार्याणाम् अर्चाविधिषु पूजाकर्मसु वारिपूरः जलप्रवाहः अर्पितः वः युष्माकं श्रिये लक्ष्मीप्राप्तिहेतवे भवतात् भवतु ॥५१७॥ **दूरारूढे इति**—अस्मिन् अन्तरात्माम्बरे अन्तरात्मा चित्तदोषात्मविभ्रान्तिः चित्तं च विकल्पः। दोषाश्च रागादयः। आत्मा च शुद्धं चेतना वद् द्रव्यम्। तेषु विगता विनष्टा भ्रान्तिर्यस्य। चित्तं चित्तत्वेन बुध्यते, दोषांश्च दोषत्वेन, आत्मानमात्मत्वेनेत्यर्थः स अन्तरात्मा स एव अम्बरम् आकाशम्, तस्मिन्, प्रणिधितरणौ एकाग्रतायुक्तं मन एव तरणिः सूर्यः तस्मिन्। दूरारूढे मध्यभागम् आरूढे सति। येषां हृदयकमलं मोदेन स्वात्मानुभूतिसौख्येन निष्पन्दवृत्ति निश्चलवृत्ति स्थिरं भवति। **तत्त्वेति**—तत्त्वं शुद्धात्मस्वरूपं तस्य अवलोकः अनुभवनं तस्य अवगमः ज्ञप्तिः तस्मात् गलिता नष्टा ध्वान्तबन्धस्थितिः मिथ्याज्ञानबन्धावस्था येषाम्। तेषां सूरीणां पादयोः चन्दनेन अहम् इष्टिं पूजाम् उपनये निर्वर्तये। आत्मस्वरूपानुभवेन येषाम् अज्ञानबन्धस्त्रुट्यति तेषां पादौ आचार्याणामहं चन्दनेन चर्चयामीत्यर्थः ॥५१८॥ **येषामन्तरिति**—येषाम् आचार्याणां क्षेत्राधीशे आत्मनि अन्तरिति—अन्तः चित्ते तदमृतरसास्वादमन्दप्रचारे सति स्वात्मानुभूत्यमृतरसस्यास्वादश्चर्वणं तेन मन्दः जडः प्रचारः आत्मानुभवं विहाय अन्यत्र अनात्मीयेषु पदार्थेषु गमनं तस्मिन्। अन्यत्र मनःप्रचारः आत्मानुभूतिपीयूषस्वादनिमग्नत्वात् येषां न भवतीति भावः। येषां योगीश्वराणाम् आतापनादियोगधारिणाम् मुनीनाम् ईश्वरा अधिपतयस्तेषां सूरीणाम्। **विगतेति**—विनष्टः निखिलः सकलः आरम्भः प्रक्रमः यस्य स चासौ संभोगः इन्द्रियविषयानुभवः। ग्रामोक्षाणां ग्रामीणानां बलीवर्दानाम् उदुषित इव शृंगाभ्यां घर्षित इव भाति। तेषां निर्ममाणां कलमसदकैः शाल्यक्षतैः तण्डुलैः पूजनं कुर्मः ॥५१९॥ **देहारामे इति**—देह एव आरामः उपवनम् तस्मिन्नपि उपरतधियः विरक्तमतयः। कस्मात्

उपरतभियः सर्वसंकल्पशान्तेः सर्वेषां संकल्पानां शान्तेः विनाशात् । अहमेषां स्वामी मम च इमे स्वम् इति संकल्पव्यपगमात् । ब्रह्मधामामृताप्तेः येषां ऊर्मिस्मयविरहिता ब्रह्मण आत्मनः धाम स्थानं यत् अमृतं स्वात्मानुभूतिः तस्य आप्तेर्लाभात् ऊर्मिस्मयविरहिता शोकमोहौ जरामृत्यू क्षुत्पिपासे इति षडूर्मयः । स्मयाश्च ज्ञानपूजाकुलजातिबलर्द्धितपोवपुषां मानित्वं स्मयाः अष्टविधाः । षडूर्मिभिः अष्टविधस्मयैश्च विरहिताः रहितत्वम् लब्धम् । येषां च आत्मात्मीयानुगमविगमात् शुद्धबोधाः वृत्तयः संकल्पविकल्पानाम् अनुगमस्य उत्पत्तेर्विगमात् येषां वृत्तयः मनोविमर्शाः शुद्धबोधाः शुद्धात्मस्वरूपज्ञानयुक्ताः सन्ति । तेषां चरणकमलानि पुष्पैः शिवाय मोक्षाय अर्चयेयं पूजयेयम् ॥५२०॥

[ पृष्ठ २३२ ] येषामङ्गे इति—येषां सूरीणाम् अङ्गे मलयजरसैः चन्दनगन्धैः संगमः । लेपनं कर्दमैः मृदा लेपनं वा समानः हर्षाय विषादाय वा क्रमशो न भवति । स्त्रीविब्बोकैः स्त्रीणां शृङ्गारभावजा क्रिया विब्बोकः अभिमतवस्तुप्राप्तौ अपि गर्वादनादरः । सापराधस्य संयमनं ताडनं च विब्बोकः । एताभिः स्त्रीणां शृङ्गारक्रियाभिः अनुषङ्गः संबन्धः समानः प्रतिभाति । पितृवनेति—पितॄणां वनमिव श्मशानं तत्र चिताभस्मभिः चीयते श्मशानाग्निरस्याम् इति चिता तस्या भस्मभिः भसितैः वा अनुषङ्गः लिप्तिः समानः न प्रीत्यप्रीत्यै भवति । मित्रे शत्रावपि च विषये अनुषङ्गः संबन्धः निस्तरङ्गः तरङ्गः मनोवृत्तिः हर्षविषादात्मिका निर्गतौ तरङ्गौ हर्षविषादौ यस्मादसौ निस्तरङ्गः मित्रे दृष्टे न हर्षः स्यात् अरौ दृष्टे न खिन्नता । तेषां सूरीणां पूजाव्यतिकरविधौ पूजोत्सवविधौ एष हविर्नैवेद्यं वः युष्माकं भूत्यै वैभवदानाय अस्तु भवतु ॥५२१॥ योगाभोगाचरणचतुरे इति—येषां सूरीणां स्वान्ते मनसि । कथंभूते । योगेति—योगानाम् आतापनाभ्रावकाशवर्षायोगानाम् आभोगो विस्तारः तस्य आचरणं प्रवर्तनं तत्र चतुरे कुशले । पुनः कथंभूते । दीर्णेति—दीर्णः विनष्टः कन्दर्पस्य मन्मथस्य दर्पः मदो येन तस्मिन् । पुनः कथंभूते ध्वान्तेति-ध्वान्तम् अज्ञानं तस्य उद्धरणं निरसनं तत्र सविधे तत्परे । पुनः कथंभूते ज्योतिरिति—ज्योतिषः स्वानुभूतिज्ञानस्य उन्मेषः उद्भूतिः तं भजतीति ज्योतिरुन्मेषभाक् तस्मिन् स्वान्ते स्वानुभूतिज्ञानसंपन्ने सतीति भावः । क्षेत्रनाथः क्षेत्रं देहः तस्य नाथः स्वामी आचार्याणाम् आत्मा । अन्तः निजस्वरूपे उच्चैः अत्यन्तम्, अमृतभृत इव सुधापूर्ण इव संमोदेत ह्लादेत । तेषु क्रमपरिचयात् चरणपूजनात् प्रदीपः वः श्रिये लक्ष्म्यै संपदे स्यात् भवेत् ॥५२२॥ येषां ध्येयेति—येषां सूरीणां बोधाम्भोधिः सम्यग्ज्ञानसागरः कथंभूतानां सूरीणाम् । ध्येयाशयेति—ध्येयो ज्ञानदर्शनलक्षणो निजात्मा तस्मिन् ध्येये आशयः विमर्शं कुर्वन्मनः स एव कुवलयं कुमुदं तस्य आनन्दे प्रमोदे चन्द्रोदयतुल्यानां । येषां सूरीणां ज्ञानाब्धिः प्रमदसलिलैः आनन्दनीरैः आत्मावकाशे निजस्वरूपे नैव माति ॥ बहिः नानाविधलब्धिः बहिरुत्पूरो भवति । एतां अखिलेति—सकलजगद्विभवरमां समवसरणादिरूपां प्राप्यापि येषां चेतः मनः निःस्पृहम् अस्ति, तेषाम् अपचितौ पूजायां धूपः वो युष्माकं श्रेयसे मुक्तये अस्तु ॥५२३॥ चित्ते चित्ते इति—चित्ते मनसि चित्ते आत्मनि विशति सति प्रवेशं कुर्वति सति । करणेषु स्पर्शनादिषु इन्द्रियेषु स्वान् विषयांस्त्यक्त्वा अन्तरात्मन्येव स्थितेषु । स्रोतस्यूते स्रोतोभिः स्पर्शनादिविषयैः स्यूते अनुषक्ते पुंसि । बहिः बाह्ये अखिलतः सर्वशः व्याप्तिशून्ये बाह्यपदार्थविमर्शशून्ये सति । येषां ज्योतिः ज्ञानं किमपि अनिर्वचनीयरूपेण परमानन्दसन्दर्भगर्भं परमश्चासौ आनन्दश्च परमानन्दः विषयजादानन्दात् आत्मानन्दः स्वानुभूतिरूपः अपूर्वसुखजनकत्वात् परमानन्द उच्यते तस्य सन्दर्भः ज्ञानेन सह एकलोलीभावः स गर्भे यस्य तथाभूतं ज्ञानज्योतिः जन्मच्छेदि जन्महन्तृ जन्मनः भवस्य हन्तृ प्रभवति समर्थं जायते । तेषु आचार्येषु फलैः सपर्यां पूजां कुर्मः ॥५२४॥

वाग्देवतावर इति—हे सूरिवर, तत् ततः चरणार्चनेन तव पादपूजनेन अयं पुष्पाञ्जलिः इयं कुसुमानां प्रसृतिः । उपासकानाम् आचार्यभक्तानां वाग्देवतायाः सरस्वत्याः वरः इव वाञ्छिताभिलाष इव । पुनः कथंभूतः आगामिन्यां तत्फलप्राप्तौ पुण्यपुञ्ज इव सुकृतसमूह इव । पुनः कथंभूतः । लक्ष्मीति—लक्ष्म्याः कटाक्षा एव मधुपा भृङ्गाः तेषां आगमने एकहेतुः मुख्यं कारणम् । भवतु अस्तु ॥५२५॥ ( इत्याचार्यभक्तिः )

इत्युपासकाध्ययने समयसमाचारविधिर्नाम पञ्चत्रिंशत्तमः कल्पः ॥३५॥

## ३६. स्नपनार्चनविधिर्नाम षट्त्रिंशः कल्पः

[ पृष्ठ २३३-२३५ ] जिनप्रतिमास्नपनम् । इदानीम् अधुना । ये कृतप्रतिमापरिग्रहाः कृतजिनबिम्बपूजाप्रतिज्ञाः तान्प्रति तानुद्दिश्य । स्नपनम् अभिषेकः । अर्चनं पूजनं जलादिद्रव्यैः । स्तवः प्रतिमार्पितार्हदादीनां गुणानां स्तुतिः । जपः अर्हदादीनां मन्त्रस्य जपो वाचिको मानसिको वा जप्यः । ध्यानम् एकाग्रेण मनसार्हदादीनां गुणानां चिन्तनम् । श्रुतदेवताराधनविधिः श्रुतदेवतायाः जलाद्यैः गुणानुरागपूर्वकं पूजनम् । एतान् षड्विधीन् प्रोदाहरिष्यामः कीर्तयिष्यामः । तथाहि—श्रीकेतनमिति—अहं जिनाभिषेकाश्रयं जिनाभिषेकस्य आश्रयं गृहम् आश्रयामि तत्र प्रवेशं करोमि । कथंभूतं तम् आश्रयामि । श्रीकेतनं श्रियो देवतायाः केतनं गृहमिव । पुनः कथंभूतम् । वागिति—वाग्वनिता वाग्देवता श्रुतदेवता तस्या निवासम् आश्रयम् । उपासकानां देवपूजादिषट्कर्माणि कुर्वतां श्रावकाणां पुण्यार्जनक्षेत्रं सस्यप्राप्तिस्थानमिव पुण्यप्राप्तिस्थानम् । पुनः कथंभूतम् । स्वर्गेति—स्वर्गमोक्षप्राप्तेर्मुख्यं निदानम् ॥५२६॥ [ इति जिनमन्दिरप्रवेशः ] भावामृतेनेति—भावो जिनगुणानुरागस्तदेव अमृतं जलं तेन मनसि प्रतिलब्धशुद्धिः संप्राप्तशौचः अहम् । पुण्यामृतेन च मन्त्रपूतेन जलेन । तनौ शरीरे । नितरां पवित्रो भूत्वा सकलीकरणम् अङ्गन्यासं च कृत्वेत्यर्थः । श्रीमण्डपे यत्र जिनो भगवान् विराजते तत्स्थानं श्रीमण्डपः । तत्र विविधवस्तुविभूषितायाम् अष्टमङ्गलद्रव्यालंकृतायां वेद्यां पीठे । जिनस्य सवनम् अभिषेकम् । विधिवत् जिनस्नानशास्त्रोक्तप्रकारेण तनोमि करोमि ॥५२७॥ उदङ्मुखमिति—पूजकः स्वयम् उदङ्मुखम् उत्तरां दिशं प्रति मुखं कृत्वा तिष्ठेत् । जिनं प्राङ्मुखं स्थापयेत् पूर्वदिङ्मुखं जिनं कृत्वा तं स्थापयेत् । तथा पूजाक्षणे पूजनसमये पूजकः नित्यं यमी अणुव्रतधारकः वाचंयमक्रियः वाचंयमो पूजामन्त्रादपरस्य भाषणम् अकुर्वाणः पूजनक्रियां कुर्वाणः भवेत् ॥५२८॥ षड्विधं देवसेवनम् । प्रस्तावनेति—प्रस्तावना, पुराकर्म, स्थापना, संनिधापनम् । पूजा, पूजाफलं च इति देवसेवनं षड्विधम् ज्ञेयम् ॥५२९॥ १. प्रस्तावनाधिकारः प्रथमः, स वर्ण्यते—यः श्रीजन्मेति—यः श्रीजिनः श्रीजन्मपयोनिधिः श्रियो लक्ष्म्या जन्मने पयोनिधिः समुद्रः, यं योगिनः मनसि ध्यायन्ति । येनेदं भुवनं सनाथम्, स्वामिना सहितम् । यस्मै अमरा नमस्कुर्वते । यस्माज्जिनात् श्रुतिः द्वादशाङ्गरूपा प्रादुरभूत् जज्ञे । यस्य प्रसादात् जनाः सुकृतिनो भवन्ति । यस्मिन् जिने न एव भवाश्रयो भवः संसृतिः आश्रयो भाजनं यस्य तथाभूतः व्यतिकरः संबन्धः न, तस्य स्नापनाम् आरभे ॥५३०॥ वीतोपलेपवपुषः इति—वीतः विनष्टः मलस्य उपलेपः उपदेहः वपुषो शरीराद्यस्य तस्य जिनस्य नित्यनिर्मलस्य मलानुषङ्गः मलस्य संबन्धः कुतः कस्मात् कारणाद् भवेत् । त्रैलोक्यस्य पूज्यौ चरणौ यस्य तस्य जिनस्य अर्घ्यः कुतः न तेन अर्घ्येण जिनस्य किमपि प्रयोजनं सिद्धमिति । हे जिन, मोक्षामृते धृतधियः मोक्षपीयूषे विहितवाञ्छस्य तव नैव कामः अभिलाषः । ततः इदं स्नानं कम् उपकारं तव किं प्रयोजनं करोतु साधयतु ॥५३१॥ तथापीति—तथापि स्वस्य पुण्यार्थं पुण्यप्राप्त्यर्थं तव अभिषवं स्नानं प्रस्तुवे प्रारभे । को नाम कः पुमान् फलार्थी फलान्यभिलषन्, तरूपकारार्थं तरोः वृक्षस्य उपकारार्थम् उपकारकरणाय विहितोद्यमः कृतयत्नो भवेत् । यथा अभिषेकेण जिनेश्वरे काप्युपकृतिर्न भवेत् यतः स स्वभावनिर्मलः । अतः स्वपुण्योपचयार्थम् एव उपासकेन तस्य स्नानं विधेयम् । यथा फलार्थी जनः वृक्षं जलदानेन सेवतेन वृक्षोपकाराय तथा स्वपुण्याय जिनाभिषेकक्रियां श्रावकः करोति ॥५३२॥ इति प्रस्तावना ] २. पुराकर्म । रत्नाम्बुभिरिति—रत्नजलैः तथा कृशानां कृशानुभिः अग्निभिः भूमौ स्नानभूमौ जिनाभिषेकस्थाने आप्तशुद्धौ सत्या पवित्रायां जातायाम् । भुजङ्गमपतीन् नागेन्द्रान् अमृतैः दुग्धैः उपास्य प्रीणयित्वा । प्रजापतिनिकेतनदिङ्मुखानि प्रजापतिनिकेतनं ब्रह्मस्थानं तत्प्रमुखानि दिङ्मुखानि पूर्वादिदशदिशः । दूर्वा स्वनामख्याततृणविशेषः । अक्षताः अखण्डतण्डुलानि । प्रसवाः पुष्पाणि, दर्भाश्च कुशाः तैः विदर्भितानि युक्तानि कुर्मः ॥५३३॥ पाथःपूर्णानिति—अहं पूजकः कोणेषु चतुरः कुम्भान् विदधे । कथंभूतान् पाथःपूर्णान् जलैर्भृतान् । सुपल्लवैः आम्राशोकादिकिसलयैः प्रसूनैः पुष्पैः अर्च्यान् पूज्यान् । पुनः कथंभूतान् प्रवालमुक्तोल्बणान् विद्रुममुक्ताहारशोभितान् चतुरः दुग्धाब्धीनिव चतुःसंख्यान् क्षीरसमुद्रानिव । वेद्याश्चतुःकोणेषु विदधे स्थापयामि ॥५३४॥ [ अत्र जिनाभिषेकप्रस्तावनापुराकर्ममन्त्रा लिख्यन्ते । ॐ ह्रीं श्रीं क्लीं

भूः स्वाहा। इति जिनाभिषेकप्रस्तावनापुष्पाञ्जलिं क्षिपेत्। ] पुराकर्ममन्त्राः—ॐ ह्रीं नमः सर्वज्ञाय सर्वलोकनाथाय धर्मतीर्थंकराय श्रीशान्तिनाथाय परमपवित्रेभ्यः शुद्धेभ्यः, नमो भूमिशुद्धिं करोमि स्वाहा। इत्यनेन भूमिशोधनम्। ॐ ह्रीं अग्निं प्रज्वालयामि निर्मलाय स्वाहा, ॐ ह्रीं वह्निकुमाराय स्वाहा, ॐ ह्रीं ज्ञानोद्योताय नमः स्वाहा। इति अग्निज्वालनम्। ॐ ह्रीं श्रीं क्षीं भूः नागेभ्यः स्वाहा। इति नागतर्पणम्। ॐ ह्रीं क्रों दर्पमथनाय नमः स्वाहा। इति ब्रह्मादिदशदिग्बलिः। ॐ ह्रीं स्वस्तये कलशस्थापनं करोमि स्वाहा। ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं नेत्राय संवौषट् कलशार्चनं करोमि स्वाहा। [ इति पुराकर्म। ] ३. अथ स्थापना। यस्य स्थानमिति—यस्य प्रभोः स्थानं निवासः। त्रिभुवनेति—त्रिभुवनस्य जगत्त्रयस्य शिरः सर्वार्थसिद्धिविमानं तस्योपरि शेखरमिव मुकुटमिव सिद्धशिला वसुधा तस्या अग्रे उपरि निसर्गात् स्वभावात् यस्य प्रभोः स्थानं निवासः विद्यते। तस्य प्रभोर्जिनराजस्य अमर्त्यक्षितिभृति अमर्त्यानां देवानां क्षितिभृति क्षितिं पृथ्वीं बिभर्तीति क्षितिभृत् पर्वतः तस्मिन् देवपर्वते मेरौ स्नानपीठी स्नानासनं भवेत् इत्यस्मिन् विषये अद्भुतं न। हे जिन, ते सवनसमये अभिषेककाले लोकानन्दामृतजलनिधेः लोकानां भव्यानाम् आनन्दक्षीरसमुद्ररूपस्य तव। एतद्वारि क्षीरसमुद्रजलम्। सुधात्वम् अमृतावस्थां धत्ते तत्र कः चित्रीयते आश्चर्ययुक्तो भवति। न कोऽपि ॥५३५॥ तीर्थोदकैरिति—मणिसुवर्णघटोपनीतैः रत्नहेमकलशैः आनीतैः। तीर्थोदकैः तीर्थजलैः। पवित्रवपुषि पूतशरीरे। जलैः प्रक्षालिते इति भावः। पुनः कथंभूते प्रविकल्पितार्घे प्रविकल्पितः दत्तः अर्घो यस्मै तस्मिन् पीठस्यापि अर्घो देयः इति भावः। पुनः कथंभूते पीठे लक्ष्मीति—लक्ष्म्याः श्रुतस्य च आगमनं येन भवेत् तथाभूतश्रीकारह्रीकारबीजाक्षरयुते विदर्भगर्भे अग्रसहिता दर्भा विदर्भास्ते गर्भे यस्य तथाभूते पीठे। भुवनाधिपतिं त्रिलोकेशं जिनेन्द्रं संस्थापयामि ॥५३६॥ [ इति स्थापना ] स्थापनाया मन्त्राः—ॐ ह्रीं अर्हं क्ष्मं ठठ श्रीपीठं स्थापयामि स्वाहा। ॐ ह्रां ह्रीं ह्रूं ह्रौं ह्रः नमोऽर्हते भगवते श्रीमते पवित्रजलेन श्रीपीठप्रक्षालनं करोमि स्वाहा। ॐ ह्रीं सम्यग्दर्शनज्ञानचारित्राय स्वाहा। इति श्रीपीठमभ्यर्चयेत्। ॐ ह्रीं श्रीलेखनं करोमि स्वाहा। ॐ ह्रीं श्रीं क्लीं ऐं अर्हं श्रीवर्णे प्रतिमास्थापनं करोमि स्वाहा। ४. संनिधापनम् सोऽयमिति—येयम् अर्चा जिनप्रतिमा सोऽयं जिनः समवसरणस्थः। ननु एतत् पीठं सुरगिरिः मेरुः। एतानि सलिलानि कुम्भभृतानि साक्षात् दुग्धजलधेः क्षीरसमुद्रस्य नीराणि। हे जिन, तव सवप्रतिकर्मयोगात् तवाभिषेककार्यसंबन्धात् अहम् इन्द्रः सौधर्मेन्द्रः। ततः इयं महोत्सवश्रीः कथं न पूर्णा अभिषेकमहोत्सवस्य लक्ष्मीः शोभा कथं न पूर्णा भवेत् ॥५३७॥ [ इति संनिधापनम् ] [ संनिधापनमन्त्रः—श्रीमण्डपादिषु शक्रमण्डपादिभावस्थापनार्थं जात्यकुङ्कुमालुलितदर्भदूर्वापुष्पाक्षतं क्षिपेत् ] अथातः ५. पूजाविधानम्। यागेऽस्मिन् अस्मिन् जिनयज्ञे, यूयं सर्वे आगत्य विघ्नशान्तिं कुरुध्वम्। इत्यनेन पद्येन लोकपालाह्वानम्। नाकनाथ नाकः स्वर्गः तस्य नाथः पतिः स्वर्गेन्द्र इति भावः। नाकनाथ इति संबोधनैकवचनम्। अग्रेऽपि तदेकवचनान्येव। यथा ज्वलन अग्ने। पितृपते यम। नैगमेय हे नैर्ऋत। प्रचेतः वरुण। वायो। रैद धनपते, कुबेर। ईश शंकर। शेष हे नागनायक, उडुप उडूनि नक्षत्राणि पातीति उडुपः चन्द्रः तत्संबोधनं हे उडुप चन्द्र। तथा ग्रहाग्राः सोम-मङ्गल-बुध-गुरु-शुक्र-शनैश्चर-रवि-राहु-केतवः ग्रहाः अग्रे येषां ते सर्वे उपर्युक्ता लोकपालाः। यूयमेत्य आगम्य। भूः स्वः स्वधाद्यैः मन्त्रैः सह अधिगतबलयः प्राप्तोपहाराः सन्तः। स्वासु पूर्वादिषु दिक्षु उपविष्टाः भवत। क्षेमदक्षाः रक्षणचतुराः भवन्तः क्षेपीयः शीघ्रं जिनसवोत्साहिनां जिनयज्ञे उत्साहशालिनाम् उपासकानां विघ्नशान्तिम् अन्तरायोपशमं कुरुत ॥५३८॥ दिक्पालमन्त्रः—ॐ ह्रीं क्रों प्रशस्तवर्णसर्वलक्षणसंपूर्णस्वायुधवाहनचिह्नसपरिवारा इन्द्राऽग्नि-यम-नैर्ऋत-वरुण-वायु-कुबेरेशान-धरणेन्द्र-सोमनामानः दशलोकपाला आगच्छत आगच्छत संवौषट्। स्वस्थाने तिष्ठत तिष्ठत ठः ठः। ममात्र संनिहिता भवत भवत वषट्। इदमर्घ्यं पाद्यं गृह्णीध्वं ॐ भूर्भुवः स्वः स्वाहा स्वधा। इति इन्द्रादिदशलोकपालपरिवारदेवतार्चनम्। ] [ इति लोकपालाह्वानम् ]

[ पृष्ठ २३६ ] नीराजनावतरणम् देवेऽस्मिन्निति—अस्मिन्देवे जिनेश्वरे विहितार्चने कृतपूजने स्तुतिपाठमङ्गलशब्दैः प्रारब्धगानस्वने आतोद्यैः वाद्यैः सह निनदति ध्वनिं कुर्वति। प्राङ्गणे जिनमन्दिरस्याजिरे

रङ्गवल्यादिभिः भव्यानां मनांसि आनन्दयति सति। जिनपतेः अहं नीराजनावतरणक्रियां प्रस्तुवे प्रारभे। कैः मृत्स्नादिभिः मृत्सा प्रशस्ता मृत्तिका तया गोमयस्य पिण्डैः भूम्यपतितैः प्रशस्तैः गोमयलड्डुकैः भूतिपिण्डैः गोमयोद्भूतैः अग्निप्लुष्टैः भस्मभिः हरिता दूर्वा दर्भाः कुशाः प्रसूनानि पुष्पाणि अक्षता अखण्डतण्डुलाः एभिः तथा सचन्दनैः अम्भोभिः चन्दनगन्धसहितैः जिनपतेः अर्हतः नीराजनां प्रस्तुवे अवतरणं कुर्वे नीरस्य शान्त्युदकस्य अजनं क्षेपणम् अत्रेति नीराजना ताम्। नीराजनामन्त्रः—ॐ ह्रीं क्रों समस्तनीराजनद्रव्यैः नीराजनं करोमि। दुरितमस्माकमपहरतु भगवान् स्वाहा। इति मृत्स्नागोमयादिपवित्रद्रव्यैः नीराजनम्। इति नीराजनावतरणम् ॥५३९॥ जलाभिषेकः पुण्यद्रुम इति—अयं चिरं पुण्यद्रुमः पुण्यवृक्षः नवपल्लवाश्रिया प्रतिभाति चेतःसरः मनःसरोवरं प्रमद एव मन्दम् अचञ्चलं सरोजं कमलं गर्भे यस्य तत्। मम वागापगा मम वचनसरित् दुस्तरतीरमार्गा दुःखेन तरीतुं योग्यः तीरस्य मार्गो यस्याः सा। जिनपतेः त्रिजगत्प्रमोदैः त्रिलोकहर्षकारकैः स्नानामृतैः भातीति संबन्धः। अयं मम पुण्यद्रुमः, मम चेतःसरः, मम वागापगा च जिनपतेः स्नानामृतैः भातीति। इति जलाभिषेकः ॥५४०॥ जलाभिषेकमन्त्रः—ॐ ह्रीं स्वस्तये कलशोद्धरणं करोमि स्वाहा। ॐ ह्रीं श्रीं क्लीं ऐं अर्हं वं मं हं सं तं पं वं वं मं मं हं हं सं सं तं तं पं पं झं झं झ्वीं क्ष्वीं क्ष्वीं क्ष्वीं हं सः। त्रैलोक्यस्वामिनो जलाभिषेकं करोमि नमोऽर्हते स्वाहा। रसाभिषेकः द्राक्षेति—द्राक्षा गोस्तनीफलानि खर्जूराणि स्वादुमस्तकपित्तजित्फलानि, चोचानि नालिकेरफलानि, इक्षुः रसालः प्रसिद्धः प्राचीनामलकानि जीर्णधात्रीफलानि तेभ्य उद्भवो येषां तैः राजादनानि क्षीरभृत्फलानि आम्राणि चूतफलानि पूगानि क्रमुकफलानि एभ्य उत्थैर्जातैः रसैः जिनं स्नापयामि जिनाभिषेकं करोमि ॥५४१॥ ॐ ह्रीं श्रीं क्लीं ऐं अर्हं वं मं हं सं तं पं वं वं मं मं हं हं सं सं तं तं पं पं झं झं झ्वी झ्वीं क्ष्वीं क्ष्वीं हं सः त्रैलोक्यस्वामिनो रसाभिषेकं करोमि नमोऽर्हते स्वाहा। इति रसाभिषेकः। घृताभिषेकः आयुरिति—जिनेश्वरस्य हैयंगवीनसवनेन ह्यस्तनदिनगोदोहसंजातैः घृतैः सवनेन अभिषेकेण प्रजासु परमं दीर्घम् आयुः भवतात् भवतु। धर्मावबोधसुरभिः धर्मज्ञानेन सुरभिः सुगन्धयुक्ता प्रजा भवतात्। विनेयजनता तत्त्वार्थोपदेशश्रवणग्रहणाभ्यां विनीयन्ते पात्रीक्रियन्ते इति विनेयाः विनेयाश्च ते जनाश्च विनेयजनाः तेषां समूहः विनेयजनता। कामं नितरां पुष्टिं वितनोतु धारयतु ॥५४२॥ घृताभिषेकमन्त्रः—ॐ ह्रीं श्रीं····त्रैलोक्यस्वामिनो घृताभिषेकं करोमि नमोऽर्हते स्वाहा। दुग्धाभिषेकः येषामिति—ते नराः भव्यजनाः धारोष्णपयःप्रवाहधवलं धाराभिः स्तननिर्गताभिः उष्णं च तत् पयः दुग्धं तस्य प्रवाहवत् धवलं शुक्लम्। जैनं वपुः जिनस्य वपुः शरीरम्। ध्यायन्तु स्मरन्तु चिन्तयन्तु। येषां नृणां नराणां काम एव भुजङ्गः सर्पः तस्य निर्विषविधौ निर्विषीकरणे। बुद्धिप्रबन्धः बुद्धेः प्रबन्धः सातत्यम्। येषां जन्मजरामृतीनां व्युपरमाय विनाशनाय ध्यानस्य प्रपञ्चः विस्तारस्तस्याग्रहः विद्यते ते ते नराः जैनं वपुश्चिन्तयन्तु येषाम् आत्मविशुद्धेति—आत्मनः जीवस्य विशुद्धबोधः निर्मलं ज्ञानं तस्य विभवः संपत् तस्य आलोके दर्शने सतृष्णम् उत्सुकं मनो विद्यते ते जैनं वपुः उक्तस्वरूपं चिन्तयन्तु ॥५४३॥ दुग्धाभिषेकमन्त्रः—ॐ ह्रीं श्रीं···· त्रैलोक्यस्वामिनो दुग्धाभिषेकं करोमि नमोऽर्हते स्वाहा।

[ पृष्ठ २३७-२३९ ] दध्यभिषेकः जन्मस्नेहच्छिदिति—स्नेहहेतुः निसर्गात् प्रकृत्यैव दधि स्नेहस्योत्पादने कारणं सत्, जैनस्नानानुभवनविधौ जिनप्रभोः स्नानस्य अनुभवः माहात्म्यं तस्य विधौ तत् दधि जन्मस्नेहच्छिदपि जगतः त्रैलोक्यस्य जन्मनः स्नेहं रागभावं छिनत्तीति ज्ञेयम्। स्तब्धेति—स्तब्धतया सान्द्रतया लब्धात्मवृत्ति प्राप्तजन्म दधि पुण्योपाये पुण्यप्राप्त्युपाये मृदुगुणमपि कोमलस्वभावमपि प्राप्तजाड्यस्वभावं लब्धमान्द्यप्रकृतिकं चेतो जाड्यं हरदपि मनसा अज्ञानतां निवारयदपि तद्दधि वः मङ्गलं पुण्यं तनोतु विस्तारयतु ॥५४४॥ दधिमन्त्रः—ॐ ह्रीं श्रीं····त्रैलोक्यस्वामिनो····दधिस्नपनं करोमि नमोऽर्हते स्वाहा। ] सर्वौषध्यभिषेकः-एलेति—त्रिपुटा ( 'वेलदोडा' इति भाषायाम् ) लवङ्गं देवकुसुमम् इत्यपरनाम। कक्कोलं सुगन्धिद्रव्यविशेषः कोशफलमित्यपरनाम। मलयं चन्दनम्। अगुरुः कालागुरुः। एभिः मिश्रितैः पिष्टैश्चूर्णैः कल्कैः सुगन्धिकर्दमैः कषायैश्च वटपिप्पलोदुम्बरादीनां त्वचां कषायैः क्वाथजलैः। जिनदेहं जिनशरीरम्। उपास्महे पूजयामः ॥५४५॥ अस्य मन्त्रः—ॐ ह्रीं श्रीं····त्रैलोक्यस्वामिनः कल्कचूर्णोद्वर्तनं करोमि

नमोऽर्हते स्वाहा। नीराजना नन्द्यावर्तेति—नन्द्यावर्त इति आकारविशेषः सुवर्णादिपात्रे चन्दनगन्धेन वृत्ताकाररूपरेखाविशेषः स्वस्तिकं तु प्रसिद्धाकृतिकम्। फलानि आम्रादीनि। प्रसूनानि पुष्पाणि। अक्षतास्तण्डुलाः। अम्बु जलम्। कुशपूलानि दर्भजूटानि। एभिः वर्धमानैश्च शरावैः। देवं जिनेश्वरम् अवतारयामि ॥५४६॥ [ नीराजनमन्त्रः—ॐ ह्रीं क्रों समस्तनीराजनाद्रव्यैः नीराजनं करोमि दुरितमस्माकम् अपहरतु अपहरतु भगवान् स्वाहा। ] ॐ भक्तिभरेति—अस्य गद्यस्य 'मद्भाविलक्ष्मी'ति श्लोकेन संबन्धः। जिनं चतुर्भिः कुम्भैः स्नपयामीति चतुःकोणकलशाभिषेकः अनेन गद्येन श्लोकेन च प्रतिपादितः। अधुना गद्यं विव्रियते—ॐ भक्तिभरेति—भक्तिभरेण विनता नम्राः ये उरगाणां नागानाम् नराणां सुराणाम् असुराणाम् ईश्वरा अधिपतयः शेषभूपतिदेवेन्द्राः सुरेन्द्राः तेषां शिरांसि तेषां किरीटानि तेषां कोटयः तेषु कल्पवृक्षकिसलयायमानं पादयोर्युगलं यस्य। पुनः कथंभूतं जिनम् अमृताशनेति—अमृताशनाः देवाः तेषां अङ्गनाः देव्यः। तासां करैः विकीर्यमाणानि क्षिप्यमाणानि यानि मन्दारादिकल्पवृक्षाणां प्रसूनानि। तेभ्यः स्यन्दमानस्य गलतः मकरन्दस्य पुष्परसस्य स्वादात्पानात् उन्मदा मत्ताः मिलन्तः ये मत्तालयः समदभ्रमराः तेषां कुलस्य प्रलापः झंकारः तेन उत्तालिता उत्साहिता ये निलिम्पा देवाः तेषां लप्तिः जिनगुणगणालापः तत्र व्यापारी गलो यत्र तथाभूतं जिनम्। पुनरपि कथं भूतम्। अम्बरचरेति—अम्बरे नभसि चरन्ति इति अम्बरचरा विद्याधरास्तेषां कुमाराः सूनवः तैः हेलया लीलया आस्फालितानि ताडितानि वेणुवल्लक्यादिभेरीभम्भाप्रभृतीनि यानि अनवधिघनसुषिरततावनद्धानि वाद्यानि तेषां नादेन निवेदितः निरूपितः निखिलविष्टपाधिपानां सकलजगन्नायकानाम् उपासनावसरः पूजनसमयो यस्य तम्। पुनः कथंभूतम्। अनेकामरेति—अनेके च ते अमरविकिराः देवपक्षिणः तेषां त्रोटयश्चञ्चवः ताभिः कीर्णा इतस्ततो विक्षिप्तानि किशलयानि यस्य स अशोकश्चासौ अनोकहः वृक्षः तस्य उल्लसन्तः विकसन्तश्च ये प्रसवाः पुष्पाणि तेषां परागो रजः तेन पुनरुक्तः सकलदिक्पालहृदयरागस्य प्रसरो यस्मिन्विषये तम्। पुनः कथंभूतम्। अखिलेति—अखिलं च तद्भुवनैश्वर्यं सकलजगद्विभवः तस्य लाञ्छनं चिह्नं यत् आतपत्रत्रयं छत्रत्रयं तस्य शिखण्डे अग्रे मण्डनमणयः भूषणरत्नानि तेषां मयूखाः किरणाः तेषां रेखाभिः लिख्यमानं स्पृश्यमानं यन्मुखं तेन मुखराः भाषमाणाः याः खेचर्यः नभोगनार्यः तासां भालतलस्य ललाटपट्टतलस्य तिलकपत्रकं यत्र तथाभूतं जिनम्। पुनः कथंभूतम्। अनवरतेति—अनवरतं सततं यक्षैः विक्षिप्यमाणा वीज्यमाना उभयपक्षयोः पार्श्वद्वययोः चामरपरम्परा चामराणां पङ्क्तिः तस्याः अंशुजालानि करसमूहाः तैः धवलितानि विनेयजनानां तत्त्वार्थश्रद्धानश्रवणग्रहणवतां भव्यजनानां मनःप्रासादचरित्राणि यत्र तथाभूतम्। पुनः कथंभूतं जिनम्। अशेषेति—सकलप्रकटितवस्त्वतिशायिदेहकान्तिमण्डलपरिहृतसभागृहस्थितसभ्यमततिमःसमूहम्। पुनः कथं भूतम् जिनम्। अनवधीति—अवधिर्मर्यादा सा येषां नास्ति तेषां वस्तूनां निःसीमपदार्थानाम् आत्मसात्कारं कुर्वाणा निजाधीनतां जनयन्ती सारा उत्तमा विस्फारिता वृद्धिं प्राप्ता या सरस्वती तन्नामधारिणी सरिदिव शारदादेवी तस्याः तरङ्गा वीचयः तेषां सङ्गः संबन्धः तेन संतर्पिताः संतोषं नीताः समस्तसत्त्वाः सकलप्राणिनः एव सरोजानि कमलानि तेषाम् आकरः समूहो यत्र तम्। पुनः कथंभूतं जिनम्। इभारातीति—इभा हस्तिनः तेषाम् अरातयो रिपवः सिंहाः तेषु परिवृढाः श्रेष्ठाः ये सिंहयूथस्वामिनः तैः उपवाह्यमानं धार्यमाणं यत् आसनं पीठं तस्य अवसाने लग्नानि खचितानि यानि रत्नानि मणयः तेषां कराः रश्मयः तेषां प्रसरेण पल्लवितं किसलयितं यद्वियदेव आकाशमेव पादपस्तरुः तस्य आभागो विस्तारो यत्र। पुनः कथंभूतं जिनम्। अनन्येति—अनन्यसामान्यम् अन्येन प्रासादादिना सामान्यं सदृशम् अन्यसामान्यं न अन्यसामान्यम् अनन्यसामान्यम् अनुपमं च तत्समवसरणं च सैव सभा रत्नमयी देवनिर्मिता सभा तस्याम् आसीना उपविष्टा ये मनुजा नराः दिविजाः अमराः भुजङ्गा नागासुराः तेषाम् इन्द्राः स्वामिनः तेषां वृन्दं तेन वन्द्यमानं पादारविन्दयोः चरणकमलयोर्युग्मं यस्य तं जिनम्। मद्भावीति—मम भाविलक्ष्मीः भविष्यति काले प्राप्स्यमाना या लक्ष्मीः संपद् सैव लतिका तस्या यद्वनम् आरामस्तस्य। प्रवर्धनेति—प्रवर्धनाय वृद्धयै आवर्जिता नम्रीभूता वारिपूरा जलप्रवाहा येषां तैः चतुर्भिः कुम्भैः जिनं भगवन्तं वीतरागं स्नपयामि अभिषेचयामि। कथंभूतैः कुम्भैः

नभःसदोधेनुपयोधराभैः नभसि सीदन्ति इति नभःसदसः देवाः तेषां धेनुः कामधेनुरित्यर्थः तस्याः पयोधराभैः पयसां धराः पयोधराः स्तनाः तेषामिव आभा शोभा येषां ते पयोधराभाः तैः ॥५४७॥ इति चतुःकोणकलशाभिषेकः। मन्त्रः—ॐ ह्रां ह्रीं ह्रूं ह्रौं ह्रः अ सि आ उ सा नमोऽर्हते भगवते मङ्गललोकोत्तमशरणाय कोणकलशाभिषेकं करोमि नमोऽर्हते स्वाहा। गन्धोदकाभिषेकः लक्ष्मीकल्पलते इति—त्रैलोक्यप्रमदावहैः लोकत्रयं प्रति प्रमदं आह्लादम् आवहन्ति आनयन्ति इति त्रैलोक्यप्रमदावहाः तैः लोकत्रयाह्लादकैः गन्धोदकैः। जिनपतेः स्नापनात् अभिषेचनात् लक्ष्मीकल्पलते त्वं जनानन्दैः लोकाह्लादकरैः परम् उत्तमं यथा स्यात्तथा पल्लवैः किसलयैः समुल्लस भूषिता भव। तथा हे धर्माराम, श्रीजिनोक्तः उत्तमक्षमादिरूपः धर्म एव आरामः कृत्रिमम् उपवनं तस्य संबोधनैकवचनं हे धर्माराम, फलैः प्रकामसुभगस्त्वं भव्यसेव्यो भव प्रकामं नितरां सुभगः सुन्दरः त्वं भव्यसेव्यो भव्यजनैराराध्यः भव। हे बोधाधीश हे ज्ञानपते, आत्मन् त्वं संप्रति अधुना मुहुः पुनः दुष्कर्माणि मोहादीनि ततो जातः धर्मक्लमः संतापक्लान्तिः तं विमुञ्च परित्यज। यतः लोकत्रयानन्ददायको जिनपतेः गन्धोदकैरभिषेको जातः ॥५४८॥ [ गन्धोदकाभिषेकमन्त्रः—ॐ नमोऽर्हते भगवते प्रक्षीणाशेषदोषकल्मषाय दिव्यतेजोमूर्तये नमः श्रीशान्तिनाथाय शान्तिकराय सर्वविघ्नप्रणाशनाय सर्वरोगापमृत्युविनाशनाय सर्वपरकृतक्षुद्रोपद्रवविनाशनाय सर्वक्षामडामरविनाशनाय, ॐ ह्रां ह्रीं ह्रूं ह्रौं ह्रः अ सि आ उ सा नमः मम सर्वशान्तिं कुरु मम सर्वपुष्टिं कुरु स्वाहा स्वधा। ] आत्मपवित्रीकरणम्। शुद्धैरिति—विशुद्धबोधस्य निर्मलकेवलज्ञानिनः जिनेशस्य शुद्धैः निर्मलैः उत्तरोदकैः तडागाद्यानीतैः गन्धोदकाभिषेकानन्तरं केवलजलैः उत्तरोत्तरसंपदे उत्तम-उत्तमतर-उत्तमतमसंपत्त्याप्तये अवभृथस्नानम् अभिषेकावसानस्नानं करोमि ॥५४९॥ [ तन्मन्त्रः—ॐ नमोऽर्हत्परमेष्ठिभ्यः मम सर्वशान्तिर्भवतु स्वाहा। स्वमस्तके गन्धोदकप्रक्षेपणम्। ] अधुना जिनपूजने जिनस्याह्वानविधानं क्रियते तद्यथा—अमृतेति—अस्य पद्यस्याभिप्रायो यथार्थतया न ज्ञायते परम् अस्मिन् पद्ये अर्हत्परमेष्ठिनं कमले संस्थाप्य विधिनाहं तं पूजये इत्युपासकः कथयति। अहं त्रिभुवनवरदं त्रैलोक्यस्थितभव्येभ्योऽभीष्टफलदं जिनं विधिना आगमोक्तपूजाप्रकारेण पूजयेयं यजेय। कथं पूजयेयं कमले सस्थाप्य। कथंभूते कमले कलादले कला एव दलं यस्य तस्मिन्। पुनः कथंभूते निजाङ्कबीजे निजस्य चन्द्रस्य अङ्कः लक्ष्म तदेव बीजं यस्य तस्मिन्। पुनः कथंभूते अमृतकृतकर्णिके अमृतेन प्रकारेण कृता कर्णिका कमलकोषो यस्य तस्मिन्। अमृतेन प्रकारेण कर्णिका क्रियते तन्मध्ये स्वकीयं नाम निक्षिप्यते, कलादले षोडशदलेषु अकारादयः स्वरा लिख्यन्ते ॥५५०॥ [ मन्त्रः—ॐ ह्रीं स्याद्भिरभीप्सितफलदेभ्यः स्वाहा। इति पुष्पाञ्जलिः। ] जलपूजनम् पुण्योपार्जनशरणमिति—अहं पुरुदेवं तोयेन पूजयामि इति संबन्धः। कथंभूतं पुरुदेवम्। पुण्योपार्जनशरणं पुण्यप्राप्तेः शरणं गृहम्। पुराणपुरुषं पुराणश्चिरंतनः पुरुषः आत्मा यस्य तम्। स्तवेति—स्तवस्य गुणस्तुतेः उचितम् आचरणं महाव्रतादिकं यस्य तम्। पुनः कथंभूतम्। पुरुहूतविहितसेवम्—पुरुहूतेन इन्द्रेण विहिता कृता सेवा यस्य तं पुरुदेवं पुरुर्महान्, इन्द्रादीनामाराध्यः देवः पुरुदेवस्तम् जिनराजं पूजयामि तोयेन जलेन ॥५५१॥ [ मन्त्रः—ॐ ह्रीं अर्हन् नमः परमेष्ठिभ्यः स्वाहा। जलम्। चन्दनपूजनम्। मन्देति—मन्दः प्रचुरः मदो गर्वः, मदनः कामः एतौ दमयति इति दमनस्तम्। पुनः कथंभूतं जिनम्। मन्दरेति—मन्दरः सुमेरुः स चासौ गिरिश्च तस्य शिखरे शृङ्गे मज्जनावसरे स्नानसमये, पुनः कथंभूतं जिनम्। उमेति—उमा लक्ष्मीः अभ्युदयनिःश्रेयसरूपा सा कीर्तिश्च एव लतिका वल्ली तस्याः कन्दम् उत्पत्त्याधारम्, जिनं चन्दनचर्चितं कुर्वे ॥५५२॥ [ मन्त्रः—ॐ ह्रीं अर्हन् नमः परात्मकेभ्यः स्वाहा गन्धम्। ] तण्डुलपूजा। अवमेति—अवमानि निन्द्यकार्याणि दोषा वा तान्येव तरवः वृक्षास्तेषां गहनं वनं तस्य दहनम् अग्निम् जिनम्। पुनः कथंभूतम्। निकामेति—निकामम् अत्यर्थं सुखं तस्य संभवे उत्पत्तौ अमृतस्थानम् मोक्षस्थानमिव, पुनः कथंभूतम्। आगमदीपालोकम् आगम एव दीपः तस्य आलोकमिव प्रकाशमिव जिनं कलमभवैः शाल्युत्पन्नैः तण्डुलैः यजामि ॥५५३॥ [ मन्त्रः—ॐ ह्रीं अर्हन् नमोऽनादिनिधनेभ्यः स्वाहा। अक्षतान् ] पुष्पपूजा। स्मरेति—कुसुमशरैः जिननाथम् अर्चयामि। कथंभूतं जिनम्। स्मररसेन शृङ्गाररसेन विमुक्ता रहिता सूक्तिः वचनम् उपदेशः यस्य सः तम्। विज्ञानेति—विज्ञानं केवलज्ञानम् एव समुद्रः तेन मुद्रितं व्याप्तम् अशेषं वस्तु

बन्धम् येन तं जिनम्। श्रीति—श्रीरेव मानसं तन्नामकं सरोवरम् तत्र कलहंसं मधुरशब्दं कुर्वाणः हंस इव जिनं कुसुमसरैः पुष्पहारैः अर्चयामि ॥५५४॥ [मन्त्रः—ॐ ह्रीं अर्हन् सर्वनृसुरासुरपूजितेभ्यः स्वाहा पुष्पाणि।]

[पृष्ठ २४०] नैवेद्यपूजा अर्हन्तमिति—हविषा नैवेद्येन अर्हन्तम् आराधयामि। कथंभूतम् अर्हन्तम्। अमितनीतिम् अमिता अनन्ताः नीतयः नयाः यस्य तम् अनन्तनयस्वरूपप्रतिपादकम्। निरञ्जनम् अञ्जनम् ज्ञानावरणादि कर्म तस्मात् निष्क्रान्तो निरञ्जनः तम्। पुनः कथंभूतम्। आधिदावाग्नेः 'आधिर्ना मानसी व्यथा' इत्यमरः। आधय एव दावाग्निर्वनाग्निस्तस्य मिहिरं प्रशमनकरणे मेघम्। पुनः कथंभूतम्। मुक्तिस्त्रीरमितमानसमनङ्गम् मुक्तिस्त्रिया रमितं स्वस्मिन् अनुरक्तं कृतं मानसं यस्य तम् ॥५५५॥ मन्त्रः—ॐ ह्रीं अर्हन् नमोऽनन्तज्ञानेभ्यः स्वाहा नैवेद्यम्। दीपपूजा भक्त्येति—जिनं दीपैः उपचरामि। कथंभूतम्। भक्त्या गुणानुरागपरिणामेन। आनता ईषत् नम्रीभूता ये अमरा देवास्तेषाम् आशयाः मनांसि तान्येव कमलवनानि तेषां यत् अरालं तिमिरम् उत्कटम् अज्ञानम् अविकासित्वं वा तद्विनाशे मार्तण्डं रविसदृशम्। पुनः कथंभूतम्। सकलसुखानाम् अनन्तसौख्यानाम् आरामः उपवनभूतः स चासौ कामदः ईप्सितानां दायकः। अकामं न काम इच्छा यस्य तम् ॥५५६॥ मन्त्रः—[ॐ ह्रीं नमोऽनन्तदर्शनेभ्यः स्वाहा दीपम्।] धूपपूजा अनुपमेति—धूपैर्जिनं यजामहे। कथंभूतम्। अनुपमेति—अनुपमम् अप्रतिमं केवलज्ञानं वपुश्च शरीरं यस्य तम्। सकलेति—सकलाश्च ताः कलाः मतिज्ञानादयो अंशाः तेषां विलयः नाशः। क्षायोपशमिकज्ञानभेदाः केवलज्ञाने समुत्पन्ने सति नावतिष्ठन्ते। संक्षीणसकलज्ञानावरणे भगवति अर्हति कथं क्षायोपशमिकानां ज्ञानानां संभवः। न हि परिप्राप्तसर्वशुद्धौ पदे प्रदेशाशुद्धिरस्ति। अतः सकलकलाविलयरूपं केवलज्ञानं तस्मिन्वर्तते यदात्मरूपं य आत्मस्वभावस्तत्र तिष्ठतीति सकलकलाविलयवर्तिरूपस्थम्। पुनः कथंभूतम्। योगावगम्यनिलयम्। योगेन आत्मध्यानेन अवगम्यो निलयः निवासः मोक्षो यस्य तम्। पुनः कथंभूतम्। निखिलगं सकलवस्तुषु ज्ञानेन गच्छति इति निखिलगः तम्। विश्वतत्त्वानां ज्ञातारम् इति भावः ॥५५७॥ मन्त्रः—[ॐ ह्रीं अर्हन् नमोऽनन्तवीर्येभ्यः स्वाहा, धूपम्।] फलपूजा स्वर्गापवर्गेति—फलैर्जिनपतिमुपासे। कथंभूतम् जिनम्। स्वर्गेति—स्वर्गः सुरलोकः अपवर्गो मोक्षः तयोः संगतिं प्राप्तिं विधायिनं कुर्वन्तम्। पुनः कथंभूतम्। व्यस्तेति—व्यस्ता विनाशिता जातिर्जन्म मृतिर्मरणम्, दोषाश्च क्षुत्पिपासादयो येन तम्। पुनः कथंभूतम्। व्योमेति—व्योमचराः विद्याधराः अमराः चतुर्णिकायदेवाः तेषां पतयः विद्याधरचक्रवर्तिनो देवेन्द्राश्च तैः स्मृतं चिन्तितं जिनं फलैः उपासे पूजये ॥५५८॥ [मन्त्रः—ॐ ह्रीं अर्हन् नमोऽनन्तसौख्येभ्यः फलानि।] अर्घम् अम्भश्चन्दनेति—अम्भः जलम्। चन्दनं तन्दुलोद्गमहविर्दीपैः उद्गमाः पुष्पाणि हविर्नैवेद्यम् एभिर्द्रव्यैः। तथा सधूपैः फलैः धूपेन सहितैः फलैः अष्टद्रव्यैः। अर्चित्वा पूजयित्वा। कं जिनपतिम्। कदा स्नानोत्सवानन्तरम् कथंभूतं जिनम् त्रिजगद्गुरुम् त्रैलोक्यनाथम्। जिनं पूजयित्वा स्तौमि स्तुवे। प्रजपामि तं प्रभुम्, चेतसि दधे। तदनन्तरं श्रुताराधनं श्रुतस्य जिनवाण्याः आराधनं पूजनम् कुर्वे। त्रैलोक्यप्रभवं तन्महं तत्पूजनम्, कालत्रये श्रद्दधे ॥५५९॥ [मन्त्रः—ॐ ह्रीं अर्हन्नमः परममङ्गलेभ्यः स्वाहा अर्घ्यम्।] अष्टमङ्गलैः पूजनम् यज्ञैरिति—अष्टविधपूजनैः मुदा आनन्देन देवं निरुपास्य पूजयित्वा। पुनः पुष्पाञ्जलिसमूहेन पूरितपादासनं जिनानाम् इनं स्वामिनम् श्वेतातपत्रचमरीरुहदर्पणाद्यैः छत्रत्रयचामरादर्शाद्यैः आराधयामि ॥५६०॥ पुष्पाञ्जलिः। [मन्त्रः—ॐ ह्रीं अर्हन्नमो ध्यातृभिरभीप्सितफलदेभ्यः स्वाहा। पुष्पाञ्जलिः। इति पूजा।]

[पृष्ठ २४१] ६. पूजाफलम्। भक्तिरिति—जिनचरणयोः जिनपदयोः नित्यं भक्तिः सदा भक्तिरुपासना। सर्वसत्त्वेषु चतसृषु नरकादिगतिषु सीदन्तीति दुःखमनुभवन्तीति सत्त्वाः प्राणिनः। सर्वे च ते सत्त्वाश्च सर्वसत्त्वाः सकलजीवाः। तेषु मैत्री तेषु दुःखानुत्पत्तौ अभिलाषः। सर्वत्र भूयादित्यनेन संबन्धः। सर्वातिथ्ये सर्वेषाम् आतिथ्ये गृहागते सकलाभ्यागतजने मम विभवधीः मम धनविनियोगो भवेदिति धीरभिप्रायो भूयात्। अध्यात्मतत्त्वे अध्यात्मशास्त्रनिगदितात्मस्वरूपे। मम बुद्धिर्भूयात् वर्तताम्। सद्विद्येषु सती प्रशस्ता लोके धर्मोपदेशिनी विद्या येषां ते सद्विद्यास्तेषु प्रणयपरता प्रीतितत्परता। परार्थे परोपकारे चित्तवृत्तिः मनोऽभिप्रायः। हे भगवन्, यावत्कालं त्वदीयं तव संबन्धि, धाम तेजः भवति तावत्कालं मम एतत् पद्यकथितं

गुणवृन्दं भवतु ॥५६१॥ प्रातर्विधिरिति—हे देव, मम प्रातर्विधिः प्रभातकालीनं कार्यम्। तव पादाम्बुजपूजनेन चरणकमलयोः पूजया यायात् व्यतीतो भवतु। अयं मध्याह्नसंनिधिः इयं मध्यदिनवेला मुनिमाननेन मुनेः यतेः माननेन पूजया आहारदानेन। मम सायन्तनोऽपि समयः कालः देव, त्वदाचरणकीर्तनकामितेन तव आचरणं व्रततपोध्यानादिरूपं चारित्रं तस्य कीर्तनं प्रशंसा तस्य कामितेन इच्छया। जिनेन्द्रसमं मम व्रततपोध्यानादिकं कदा स्यादिति आशंसनेन यायात् गच्छेत् ॥५६२॥ धर्मेष्विति—धर्मेषु उत्तमक्षमादिदशधर्माचरणेषु। धर्मनिरतात्मसु धर्मे रत्नत्रये निरतः आत्मा येषां ते धर्मनिरतात्मानः श्रावकाः श्राविकाः मुनयः आर्यिकाश्चेति चत्वारः संघास्तेषु। धर्महेतौ धर्माचरणसाधने जिनचैत्यालयादौ। नृपः अनुकूलः अस्तु। कथंभूतः सः ? धर्मादवाप्तमहिमा धर्माचरणाल्लब्धप्रभावः। तथा जिनेन्द्रेति—जिनपतिपदपूजनपुण्यात् धन्याः सुकृतवत्यः प्रजाश्च चतुर्वर्णवत्यः नित्यं परमां श्रियम् उत्तमां श्रियं लक्ष्मीं आप्नुवन्तु लभन्ताम्। इति पूजाफलम् ॥५६३॥ आलस्यात्—वपुषः आलस्यात् मान्द्यात्। कर्मणि अनुत्साहत्वात्। हृषीकहरणैः हृषीकाणां नेत्रादीन्द्रियाणां हरणैः अन्योपयोगपरत्वात्। आत्मनः स्वस्य व्याक्षेपतो वा अन्यकार्यव्याकुलतया वा। मनसः चापल्यात्। मतेर्बुद्धेर्जडतया वस्तुस्वरूपानाकलनतया। वाक्सौष्ठवे मान्द्येन, वचनस्य सौष्ठवं स्पष्टाक्षरवक्तृत्वं तस्मिन् मान्द्येन लुप्तवर्णपदत्वेन। हे देव, तव संस्तवेषु पूजादिकार्येषु एष प्रमादः अनवधानता समभूत्। स मे मिथ्या विफलः स्तात् भवतु। ननु निश्चये यतः देवताः प्रणयिनां प्रार्थनां कुर्वतां भक्त्या तुष्यन्ति प्रसन्ना भवन्ति ॥५६४॥ देवपूजामिति—यो गृहस्थः देवपूजाम् अर्हदादिपञ्चगुरुपूजनम् अनिर्माय अकृत्वा, मुनीन् उत्तमपात्रभूतान् यतीन् अनुपचर्य तदीयाम् आहारदानसेवां अविधाय च भुञ्जीत भोजनं कुर्वीत स परं तमः अत्युत्कटं दुःखं भुञ्जीत ॥५६५॥

इत्युपासकाध्ययने स्नपनार्चनविधिर्नाम षट्त्रिंशः कल्पः ॥३६॥

## ३७. स्तवनविधिर्नाम सप्तत्रिंशत्तमः कल्पः।

[ पृष्ठ २४२ ] नमदिति—स जिनो देवः जीयात् सर्वोत्कर्षेण वर्तिषीष्ट। यस्य अङ्घ्रियुगलं पदद्वन्द्वम् अरुणायते लोहितायते। कुत्रेति चेदुच्यते-नमदिति—नमन्तः नमस्कुर्वन्तः येऽमराः तेषां मौलिमण्डले मुकुटसमूहे विलग्नानि खचितानि यानि रत्नानि मणयः तेषां अंशवः कराः तेषां निकरः समूहः तेन युक्तेऽस्मिन् गगने नभसि ॥५६६॥ सुरपतियुवतिश्रवसामिति—सुराणां पतयः सुरपतयः सौधर्मेन्द्रादय इन्द्राः तासां युवतयः शच्यादयो देव्यः तासां श्रवसां कर्णानाम्। अमरेति—अमरतरुः कल्पवृक्षः तस्य स्मेराः विकासमाप्ताः याः मञ्जर्यः मञ्जु मनोज्ञतां रान्तीति मञ्जर्यः अभिनवनिर्गताः आयताः सुकुमाराः सुकुसुमाः मञ्जर्यः तासां संस्पर्शेन रुचिरं मनोज्ञं यस्य चरणयोः पादयोः नखानां किरणजालम्। स जिनो जगति भूतले जयतात् सर्वोत्कर्षम् अवाप्नोतु ॥५६७॥ 'नमदिति' 'सुरपतीति' पद्यद्वयं वर्णच्छन्दोविशेषाख्यम्। दिविजेति—दिवि जायन्ते इति दिविजाः देवाः तेषां कुञ्जरः गजः ऐरावणः तस्य मौलौ मस्तके यानि मन्दाराणि मन्दारतरुपुष्पाणि तेभ्यो निर्गतस्य मकरन्दस्य स्यन्दः प्रस्रवणं तेन युक्ताः ये करविसराः शुण्डासमूहाः तस्य आसारेण धारासंपातेन धूसरे पदाम्बुजे पदकमले यस्य सः तत्संबोधनैकवचनं पदाम्बुज। वैदग्ध्यपरमपद वैदग्ध्यस्य विदग्धो विद्वान् तस्य भावो वैदग्ध्यं वैदुष्यं तस्य परमपद उत्तमाधार केवलज्ञानाधार। प्राप्तो वादे जयो येन तत्संबोधनं प्राप्तवादजय। विजितमनसिज विजितः पराजितः मनसिजः मनसि जायते इति मनसिजः मन्मथः येन तत्संबोधनम्। मात्राच्छन्दः। चतुष्पदी—यस्त्वामिति—हे जिन, अमितगुणं त्वां मिताः मातुं शक्या गुणा यस्य स मितगुणः न मितगुणोऽमितगुणः अनन्तगुणः त्वम्। त्वाम् अनन्तगुणं कश्चित्सावधिबोधः समर्यादज्ञानः। विपश्चित् बुधः विशेषं पश्यति चेतसि चिन्तयतीति विपश्चित्। यदि स्तौति त्वां नूनं तर्के, असौ विपश्चित् हस्तेन अचिरकालं शीघ्रं काञ्चनशैलं सुवर्णपर्वतं मेरुं तुलयति कियत्परिमाणोऽस्तीति ज्ञातु-

मिच्छति। हे भगवन्, तव गुणानां स्तवं कर्तुं वाञ्छन् जनः तत्पारं न कदापि प्राप्नोतीति ज्ञेयम् ।।५६८।। **स्तोत्रे इति**—यत्र स्तोत्रे अनवधिबोधाः न अवधिर्बोधे ज्ञाने येषां ते अनवधिबोधाः अमितज्ञानिनः। चिन्तां स्तोत्रं भगवतो विधास्यामः इति संकल्पं मुमुचुः त्यक्तवन्तः। पुनः कथंभूताः। सकलैतिह्येति—ऐतिह्यं नाम आप्तोपदेशः श्रुतज्ञानं वा, स एव अम्बुधिः समुद्रः तस्य विधिः स्वाध्यायः तस्मिन् दक्षाश्चतुराः। महामुनिपक्ष्याः महामुनयो गणधरदेवादयः तत् पक्षम् अवलम्बमानाः तत्सदृशाः। चिन्तां तत्यजुस्तत्र तस्मिन् प्रभुस्तोत्रे मादृग्वेधाः मत्सदृशः विद्वान् कथं चिन्तां न त्यजेत् ।।५६९।। **तदपीति**—तदपि च तथापि च यद्यपि अहं गणधरादिसदृशमतिर्नास्मि। मयि तथा स्तवनशक्तिर्नास्ति। तथापि हे जिन, त्वयि विषये अहं किमपि वदेयं वच्मि। यत् यतः इयं भक्तिः मां कामम् अतिशयेन स्वस्थं तूष्णीं न कुरुते। त्वयि विषये मद्भक्तिर्हे देव, किमपि स्तवनं कुरु इति मां प्रेरयत्येवेति भावः। अतोऽहं त्वां स्तोतुमुद्यतोऽस्मीति ।।५७०।। **सुरपतिविरचितेति**—हे जिन, कः तव गुणं प्रवितनुता स्तुतिपथं नयतु न कोऽपि। सुरपतिर्देवेन्द्रः तेन विरचितो विहितः संस्तवः स्तुतिः यस्य तत्संबोधनं हे सुरपतिविरचितसंस्तव **दलितेति**—दलितो विनाशितः अखिलो भवः संसारो येन तत्संबोधनम्, **परमेति**—परमम् अत्युत्तमं धाम वीर्यम् अनन्तशक्तिः तेन लब्धः उदयः प्रातिहार्यादिवैभवं येन। **अघेति**—अघं पापं तस्य हरणे नाशने चरणं चारित्रं यस्य तत्संबोधनम्। हे हतनतभय हतं नतानां भक्तानां भयं येन तत्संबोधनम् हे हतनतभय ! ।।५७१।।

[पृष्ठ २४३-२४४] **जयेति**—जयेति सर्वोत्कर्षेण वर्तस्व। कथंभूतस्त्वम्। निखिलेति निखिलाः सकलाः निलिम्पाः देवाः तेषाम् आलापः गुणस्तुतिः तत्र कल्पः योग्यः। जगतीति जगत्या विश्वेन विश्वेन, स्तुता चासौ कीर्तिश्च सैव कलत्रं भार्या सा तल्पे शय्यायां यस्य। जय सर्वोत्कर्षेण तथाभूतस्त्वं वर्तस्व। परमेति—परमश्चासौ-धर्मश्च तदेव हर्म्यं प्रासादः तत्र अवतारः जन्म यस्य। लोकेति—लोकानां त्रितयं लोकत्रितयं जगत्त्रयं तस्योद्धरणे कुगतेरुद्धरणे सारो रत्नत्रयबलं यस्य सः। अत्र कल्प, तल्प, अवतार, सारेति शब्दानां संबोधनैकवचनानि ज्ञेयानि ।।५७२।। **जयेति**—लक्ष्मीति लक्ष्म्याः प्रातिहार्यलक्ष्म्याः समवसरणरमायाश्च करौ हस्तौ तावेव कमले ताभ्याम् अर्चितं पूजितम् अङ्गं शरीरं यस्य तत्संबोधनम्। **सारस्वतेति**—सरस्वत्या अयं सारस्वतः स चासौ रसः तेन नटने नर्तने आद्यरङ्गः प्रथमा नर्तनभूमिः तत्संबोधनम्। केवलबोधे जाते सति द्वादशाङ्गश्रुतदेव्या जिनवदनं आद्यरङ्गभूमिर्जातमिति भावः। हे जिन जय सर्वोत्कर्षेण वर्तस्व। कथंभूतं जिनसंबोधनम्। बोधेति-बोधस्य केवलज्ञानस्य मध्ये सिद्धाः ज्ञाताः अखिलार्थाः सकलजीवादिवस्तुनिवहाः यस्य तत्संबोधनम्। **मुक्तिश्रीति**—मोक्षलक्ष्मीरमण्या रत्या संभोगेन कृतार्थः कृतकृत्यः तत्संबोधनम् हे जिन त्वं जय ।।५७३।। **नमदिति**—नमन्तश्च ते अमराश्च नमदमराः नम्रीभूताः सुराः तेषां मौलयः किरीटानि तान्येव मन्दरस्य मेरोः तटान्ताः तत्र राजन्तः शोभमानाः पदयोः ये नखा त एव नक्षत्रकान्तः चन्द्रो यस्य तत्संबोधनं हे राजत्पदनखनक्षत्रकान्त। विबुधेति—विबुधानां देवानां स्त्रियः तासां नेत्राण्येव अम्बुजानि कमलानि तानि विबोधयतीति विकासयतीति विबोधः तत्संबोधनम्। मकरेति—मकरः ध्वजे यस्य मकरध्वजः कामः तस्य धनुः कोदण्डं तस्य उद्धवस्य उत्सवस्य निरोधः प्रतिबन्धः तत्संबोधनम्। हे जिन त्वं जय सर्वोत्कर्षेण वर्तस्व। कामविनाशक जिन त्वं सदा जयेति ।।५७४।। **बोधत्रयेति**—बोधानां मतिश्रुतावधीनां त्रयं बोधत्रयं तेन विदितं ज्ञातं विधेयतन्त्रं कार्यपद्धतिर्येन तत्संबोधनम्। तव परत्र अन्यस्मिन् पुरुषे का नाम अपेक्षा। अन्यस्मात्पुरुषात् कार्यस्वरूपज्ञानस्य नापेक्षा भवत्यस्तीति भावः। अत्र निदर्शनम्—असुभृज्जनस्य प्राणिसमूहस्य प्रबोधं व्यपगतनिद्रावस्थां दधतः तन्वतः, अरुणस्य सूर्यसूतस्य कोऽपि गुरुः अस्ति किम्। नैव विद्यते स्वयं प्रकाशशील एव सः ।।५७५।। **निजबीजेति**—महति महापुरुषे निजबीजबलात् निजं बीजं कारणं तस्य बलात् प्रभावात् सामर्थ्यात् मलिनापि धीः दोषवत्यपि मतिः हे अभव हे संसाररहित। परमां शुद्धिं भजति आश्रयते। अत्र निदर्शनम्—युक्तेः अग्न्यादिकारणसामग्र्याः कनकाश्मा सुवर्णपाषाणः हेम सुवर्णं संपद्यते। किं कोऽपि तत्र सुवर्णे विवदेत नाम, नेदं सुवर्णम् इति विप्रतिपत्तिं कुर्यात् किं कोऽपि। यस्मिन्नासन्नभव्यात्मनि मलिनापि धी रत्नत्रयकारणानि संप्राप्य निर्मला भवति विधिज्ञत्वं प्राप्नोति ।।५७६।। **परिमाणमिवेति**—यथा परिमाणं परमाणोः

वर्धमानम् अतिशयेन वियति आकाशे गुरुतां महत्तमताम् उपैति प्राप्नोति । तथा मतिः अतिशयेन वर्धमाना नरि कस्मिश्चिदात्मनि उच्चैर्गुरुताम् उपैति प्राप्नोति । तत् तस्मात्कारणात् द्विजस्य सर्वज्ञं निषेधतो मीमांसकस्य विश्ववेदिनिन्दा सर्वज्ञनिन्दा हे देव, कस्य चित्ते विश्राम्यति तिष्ठति । स्थानं न लभते इति भावः । दोषावरणयोर्निःशेषनाशात् कश्चिदात्मा सर्वज्ञो भवत्येव ॥५७७॥ **कपिलो यदि इति**—यदि कपिलः साङ्ख्यदर्शनस्य प्रणेता अचिति अचेतने प्रधाने चित्तिं ज्ञानम् इच्छति तर्हि सः सुरगुरुगोर्गुम्फेष्वेव पतति सुराणां देवानां गुरुः उपाध्यायः बृहस्पतिः तस्य गोः दर्शनं चार्वाकदर्शनं तस्य गुम्फेषु रचनासु एव कपिलः पतति इति मन्यामहे वयम् । स च बृहस्पतिः जीवच्छरीरमेवात्मा नातो भिन्नः कश्चिदात्मा नाम, स च आत्मा गर्भादिमरणपर्यन्तमेव, गर्भात्पूर्वं मरणाच्चोत्तरं नास्ति भवान्तरम् । इति मन्यते । कपिलोऽपि—प्रकृतौ अचेतनायां सर्वज्ञत्वं मन्यमानः बृहस्पतिमनुसरति । हे विदित हे सर्वज्ञ अर्हन्, चैतन्यं केवलं स्वरूपमात्रपरिच्छेदि बाह्यग्राह्यरहितं घटपटादिग्राह्याणाम् अग्राहकं तर्हि तत् कस्य उपयोगि स्यात् ? वद, अतः हे अर्हन् भवानेव यथार्थदर्शी । आत्मा एव दोषावरणहानेः सर्वज्ञो जायते इति वदति तदेव सत्यम् ॥५७८॥ **भूपवनेति**—भूः पृथ्वी, पवनो वायुः, वनं जलम्, अनलोऽग्निः इति तत्त्वान्येव तत्त्वकानि तेषु तत्त्वकेषु । धिषणः बृहस्पतिः विभागं निगृणाति प्रतिपादयति । एतत्तत्त्वचतुष्टयम् इति वदति । परन्तु तद्विपरीतधर्मधाम्नि एभ्यः विपरीतस्वभावास्पदे चिदि आत्मनि विभागं न ब्रवीति । ज्ञानं भूतचतुष्टयाद्भिन्नं नेति मन्यते तत्तु तेभ्य उत्पद्यते इति मन्यते । तज्ज्ञानं तस्य भूतचतुष्टयस्य कर्म कार्यं मनुते परं तत् आत्मनो धर्मः न भूपवनादीनां इति ज्ञेयम् ॥५७९॥

[ पृष्ठ २४५-२४६ ] **विज्ञानप्रमुखाः इति**—विज्ञानं प्रमुखं येषु ते विज्ञानप्रमुखाः सुखादयः गुणाः । विमुचि विशेषेण मुञ्चति इति विमुच् तस्मिन् विमुचि मुक्तात्मनि न सन्ति । इति यस्य वाचि व्याख्याने किल नयः वर्तते । मुक्तौ बुद्धिसुखदुःखादीनां नवानां गुणानाम् अत्यन्तोच्छेदान्मोक्षः इति वैशेषिको वदति । तस्य मते मुक्तौ गुणाः न तिष्ठन्ति इति तत्र मुक्त्यवस्थायां पुमानपि आत्मापि नैवेति मन्यताम् । दाहात् औष्ण्यात् दहनोऽग्निः अपरत्र अन्यत्र कः तिष्ठति ॥५८०॥ **धरणीधरेति**—धरणीधरः पर्वतः, धरणिः पृथ्वी, प्रभृतयः तरुतन्वादयः तान् गिरिशः शंकर ईश्वरः सृजति । ननु नियगृहादि घटगृहादिकं गिरिशः करोति इति वक्तव्यम् । यदि सकलमेव कर्म गिरिशः करोति तर्हि तक्षादीनां किं प्रयोजनम् । चित्रम् आश्चर्यं वर्तते । यत् यतः तद्वचांसि लोकेषु महायशांसि महाकीर्तिमन्ति सन्ति ॥५८१॥ **पुरुषत्रयमिति**—हरिहरब्रह्माणः पुरुषत्रयम् । अबलासक्तमूर्ति अबलासु लक्ष्मीपार्वतीसावित्र्यादिषु नारीषु आसक्ता मूर्तिः शरीरं यस्य तत् । अत एतत्त्रय आगमस्य कर्तृ न संभवति । त्रैलोक्यस्यापि न तत्र कर्तृत्वं संभवेत् । अपरः शरीररहितः अनादिमुक्तः ईश्वरः सृष्टिकर्ता वेदकर्ता वा स्यात् इति च नैव संभवति । यतः स गतकायकीर्तिः गतकायः नष्टशरीरः इति यस्य कीर्तिः जगति पप्रथे । एवं सति, हे नाथ जिन, अत्र जगति अस्मिन् । द्विजसूत्रं ब्राह्मणानां वेदादिकं कथं हिताहितविषयम् आभाति शोभते । वेदस्य ईश्वरकृतत्व न संभवति । ततश्च स हिताहिते न कुर्यात् ॥५८२॥ **सोऽहमिति**—हे बौद्ध, यः अहं बालवयसि बाल्यावस्थायाम् अभूवं प्राग् आसम् स एव अहम् इति निश्चिन्वन् निश्चयं कुर्वन् क्षणिकमतं जहासि । 'सर्वं क्षणिकं सत्त्वात्' इत्यनुमानेन निजं स्वरूपं तव आत्मनः स्वरूपं क्षणिकं नैव सिद्ध्येत् । सर्वथा क्षणिके आत्मनि सन्तानोऽपि अत्र न स्यात् । 'अपरामृष्टभेदाः कार्यकारणक्षणाः संतानः' इत्यपि सन्तानलक्षणं नैव सिद्धयति । एकत्वाभावे नित्यत्वाभावे च पूर्वक्षणः कारणम् उत्तरक्षणः कार्यम् इति न भवेत् । ततः कार्यकारणभावाभावात् सन्तानसिद्धिः न । अस्थिरे वासनापि न । यदि अन्वयः पूर्वापरसंबन्धः तेनापि प्रयोजनसिद्धिर्न । अन्वये सति सर्वथा क्षणिकत्वं हीयते । क्षणिकमतप्रतिपादकेन सुगतेन तेन अन्वयभावः नापि न प्राप्तः ॥५८३॥ **चित्तमिति**—चित्तं ज्ञानम् । कथंभूतं तत् । अक्षजम् इन्द्रियोत्पन्नम् । तत् विचारकं न पूर्वापरालोचनक्षमं न । अखिलं सविकल्पं ज्ञानम् । सांशपतितंसांशा घटादयः स्थिरस्थूलपदार्थाः सामान्यरूपाः तत्र पतितम् तद्ग्राहकम् अस्ति । तेन क्षणिकाः विशरारवः परमाणवः न गृह्यन्ते । तत्सविकल्पं ज्ञानं कल्पनापोढम् अभ्रान्तं नास्ति । उदितानि शब्दाः निर्विकल्पज्ञानं क्षणिकं वस्तु च न स्पृशन्ति । अतः शाक्याः बौद्धाः तानि वचनानि आत्महितानि जीवहितकराणि कथम्

रचन्ति ब्रुवन्ति ॥५८४॥ अद्वैतम् इति—कोऽपि ब्रह्माद्वैतवादी अद्वैतं तत्त्वं वदति। सोऽपि सुधियां सुष्ठु धीः बुद्धिः येषां ते सुधियः तेषां सुधियां विदुषाम्। धियं बुद्धिम्। न आतनुते न विस्तारयति। अद्वैतिनो मतं सुधीभ्यो न रोचते इति भावः। यतः यस्मात्। हे शिवशर्मसदन मुक्तिसुखानां गृहीभूत जिनेश्वर। अत्र अद्वैतमते पक्षस्य, हेतोः, दृष्टान्तस्य, वचनस्य संस्था स्थितिः कुतो भवेत्? द्वैते एव पक्षहेतुदृष्टान्तानां संभवः। नास्ति तत्संभवोऽद्वैते ॥५८५॥ हेताविति—हेतौ सति कारणहेतौ कार्यहेतौ विद्यमाने अनेकधर्मसिद्धिः भवति। कार्याणि दृष्ट्वा कारणान्यनुमीयन्ते। समर्थकारणे सति कार्यम् अवश्यं भवति। जिनेश्वर एवम् अनेकधर्मप्रवृद्धिः जीवादिसप्ततत्त्वानां सिद्धिम् आख्याति कथयति। विशिष्टधर्मलक्षणसद्भावात् पृथक्-पृथक् तत्त्वसिद्धिः भवति। यथा ज्ञानधर्मः जीवतत्त्वं निश्चिनोति। स्पर्शादयो धर्माः पुद्गलतत्त्वम्। अन्यत् पुनः कथंचित् नित्यम् कथंचित् अनित्यम्, कथंचित् भिन्नम् कथंचित् अभिन्नम्। अखिलमतव्यतीतं नित्याद्येकान्तमतभिन्नम्। हे उरुनयनिकेत उरवो महान्तः ते च ते नयाश्च नैगमादयः। तेषां निकेत गृहभूत हे जिन तव मतम् उद्भाति प्रकर्षेण शोभते ॥५८६॥

[ पृष्ठ २४७–२४९ ] मनुजत्वमिति—मनुजत्वं पूर्वम् आदौ यस्य एतादृशः। नयनायकस्य सकलनैगमादिनयानाम् अधीशस्य सकलनयचक्रस्य ज्ञातुः। गुणोत्तमस्य गुणानां केवलज्ञानदर्शनशक्तिसुखानाम् अनन्तानां प्राप्तेरुत्तमस्य श्रेष्ठत्वं प्राप्तस्य। भवतीति भवन् तस्य भवतः सतः, भवतः पूज्यस्य। ये द्वेषकलुषधिषणाः वैरमलिनमतयः भवन्ति ते भवन्तं रहन्ति त्यजन्ति। ते जडजं मौक्तिकमपि रहन्ति। जलजं मौक्तिकं मत्वा रहन्ति त्यजन्ति। यथा कश्चित् मूर्खः जलान्मौक्तिकं जातं वीक्ष्य जलवत्तत्त्यजति तथा भवान् आदौ मनुष्य आसीत् तदनन्तरं घातिकर्मक्षयं कृत्वा नयनायको जातः परं द्वेषिणः मनुष्योऽयमिति मत्वा अवमत्य भवतः अवमाननं कुर्वन्ति। अहो मूढत्वं तेषाम् ॥५८७॥ नाप्तेषु इति—यः एकम् ईश्वरं एव आप्तं मन्यते स आप्तेषु बहुत्वं न सहेत। पर्यायविभूतिष्वपि न महेत। पर्याया ईश्वरस्य वराहाद्यवतारास्तेषां विभूतिषु वैभवेषु स न महेत पूजयेत? अपि तु न पूजयेत्। यतः स एकम् ईश्वरं विना अन्यान् तदवतारानपि आप्तरूपान् अमन्यमानः कथं पूजयेत्। नूनं द्रुहिणादिषु तथाविधेषु दैवतेषु तस्य कं स्फुटति। तथाविधेषु ईश्वरावतारेषु दैवतेषु देवंमन्येषु तस्य एकमेवाप्तं मन्यमानस्य नुः कं मस्तकं कथं स्फुटति कथं नमति नैव नमेत् ॥५८८॥ दीक्षास्विति—हे इन हे प्रभो, सकलगुणैः व्रततपःसमित्यादिगुणैः रत्नत्रयरूपैः अहीन न हीनः न अपूर्णः तत्संबोधनं हे अहीन, दीक्षासु महाव्रतदीक्षासु, अणुव्रतदीक्षासु च। तपसि अनशनादिके द्वादशविधे, वचसि च पूर्वापरविरोधानवकाशे यत् यस्मात् इह ऐक्यम् एकरूपता अविरोधता वर्तते। तस्मात् बुधोचितपादसेव बुधैरुचिता कर्तुं योग्या पादयोः सेवा यस्य स तत्संबोधनम्, बुधोचितपादसेव। त्वमेव जगतां नाथोऽसि इति ब्रवीमि। अन्येषां हरिहरादीनां दीक्षातपोवचःसु ऐक्यं नैवातस्ते त्रैलोक्यस्वामित्वानर्हा एव ॥५८९॥ देवेति—हे देव दीव्यति क्रीडति परमानन्दपदे इति देवः परमाराध्यः तत्संबोधनं हे देव। तथापि कोऽपि नरः त्वयि विमुखचित्तः पराङ्मुखमनाः भवति तर्हि स एव निन्द्यो भवति। विदलितेति—विदलिताः विनाशिताः मदनस्य विशिखा बाणा येन सः तत्संबोधनम्, हे जिन, घूके दिवापि विदृशि नेत्ररहिते यथा निन्द्यः तथा त्वयि विमुखचित्तो नरः निन्द्य एव। परं यः विदृशोनः(?) अन्धानां स्वामी तं न कोऽपि उपालभते दूषणं ददाति। दिवा दिने घूके विदृशि अन्धेऽपि इनं सूर्यं स उपलभते परं अन्यः कोऽपि सूर्यं न निन्दति ॥५९०॥ निष्किंचन इति—निष्किंचनोऽपि न किंचन धनधान्यादिपरिग्रहो यस्य। निर्गतः किंचनात् असौ निष्किंचनः निष्परिग्रहोऽपि त्वं जिन जगते त्रिलोकाय कामितानि अभिलषितानि निकामं यथेष्टं न दिशसि न ददासि। भक्तानाम् अभिलषितानि त्वं निष्परिग्रहोऽपि पूरयस्येव। अत्र चित्रं विस्मयो नैव। अथवा इह खात् आकाशात् शून्यस्वरूपादपि वृष्टिः किमु नो समस्ति नो चकास्ति न शोभते अपितु शोभते एव। पद्धतिकाछन्दः ॥५९१॥ इति—एवं तदमृतनाथ तत्तस्मात् अमृतनाथ अमृतस्य मोक्षस्य नाथ स्वामिन्। स्मरशरमाथ, स्मरस्य कामस्य शरान् उन्मादमोहनसन्तापनादीन् बाणान् मथ्नाति पीडयतीति स्मरशरमाथः तत्संबोधनं हे स्मरशरमाथ। त्रिभुवनपतिमतिकेतन त्रिभुवनस्य पतयः स्वामिनः धरणेन्द्रादयः तेषां मतेः मान्यतायाः निकेतनं गृहम् तत्संबो-

धनम्, भगवान् खलु धरणेन्द्रादिभिः कृतायाः पूजायाः स्थानमित्यर्थः। हे जिन कर्मारातिविजयिन्, प्रशमनिवेश रागादिदोषनिबर्हणं प्रशमः तस्य निवेश गृहीभूत। जगदीश जगन्नाथ। मम त्वत्पदनुतिहृदयं दिश। तव पदयोः नुतिः स्तुतिः तस्यां हृदयं मनः दिश देहि। मम मनः त्वत्पदभक्तिपरं कुर्वित्यर्थः। घत्ता ॥५९२॥ **अमरतरुणीति**—हे जिन त्वम् अमरतरुणीति—अमरतरुण्यः देवयुवतयः, तासां नेत्राणाम् आनन्दे प्रमोददाने महोत्सवचन्द्रमाः महोत्सवदिनस्य पूर्णिमायाः चन्द्रमाः असि। हे जिन त्वं **स्मरेति**—स्मरस्य मद एव गर्व एव ध्वान्तं तिमिरं मदमयध्वान्तं तस्य ध्वंसे विनाशे परमः उत्तमः अर्यमा सूर्यः मतोऽसि। त्वं कर्मारातौ ज्ञानावरणादिकर्मशत्रुगणे अदयहृदयः क्रूरमनाः असि। नते भक्त्या नम्रे जने कृपात्मवान् दयास्वभावः इति त्वं विसदृशव्यापारः शत्रौ मित्रे भक्ते च विषमप्रवृत्तिः तथापि भवान् महान् पूज्यः। भगवाञ्जिनः रागद्वेषाभ्यां सताम् असतां च अनुग्रहनिग्रहयोर्न विधाता स तु परमोदासीनः परन्तु सदसन्तः जिने रागेण द्वेषेण च प्रवर्तन्तेऽतस्तद्रागद्वेषयोर्जिनो गतेर्धर्मास्तिकायवत् कारणं मन्यते ॥५९३॥ **अनन्तेति**—जिनेश्वर, त्वयि अनन्तगुणसंनिधौ अनन्तानां गुणानां सम्यक् अक्षये निधौ निधाने सति। मयि च नियतबोधसंपन्निधौ नियतः परिमितः स चासौ बोधो ज्ञानं स एव संपन्निधिः यस्य तथाभूते मयि अल्पज्ञे सतीत्यर्थः। पुनः कथंभूते भवति। श्रुताब्धीति श्रुताब्धिः द्वादशाङ्गज्ञानसमुद्रः तस्य बुधाः ज्ञातारः गणधरदेवादयः तैः संस्तुगते स्तुति विषयतां नीते। मयि च कथंभूते परिमितोक्तेति—परिमितं सावधिकं यत् उक्तवृत्तम् अल्पज्ञताख्यं प्रोक्तं वृत्तम् उदन्तः तस्मिन् स्थिते मयि। हे जिनेश्वर, स्फुटं प्रकटं त्वयि ईदृशे महाज्ञानसमुद्रे। मयि च तादृशे पल्वलकल्पे, सति। तदिदं वस्तुद्वयं भवान् अहं च, सदृशनिश्चयं समानमिति निर्णयपात्रं कथं भवतु ॥५९४॥ **तदलमिति**—हे अतुल अनुपम, त्वादृगिति त्वया सदृशाः त्वादृशाः तेषां वाणी त्वादृग्वाणी तस्याः पन्थाः त्वादृग्वाणीपथः तेन स्तवनं तस्य उचितः तस्मिन्, त्वयि जिने। जडस्य मन्दस्य मादृशः। गुणानां गणः समूहः तस्य अपात्रैः अविषयभूतैः स्तोत्रैः अलं पर्याप्तम्। गणधरदेवादयः तव गुणानां स्तोत्राणि विधातुं क्षमा भवन्ति यतस्ते तव गुणानां गणनाभिज्ञाः। नाहं मन्दः। प्रणतिविषये अस्मिन् व्यापारे कर्मणि सुलभे सति कथमयम् अवाक् स्तुतिं कर्तुम् असमर्थो जनः त्वद्गुणस्तुतौ प्रवर्तेत। हे स्वामिन् आस्तां स स्तुतिमार्गः नाहं तेन गन्तुं क्षमः अतः ते नमोऽस्तु अस्तु ॥५९५॥ **जगन्नेत्रमिति**—हे जिन त्वां जगतां नेत्रभूतम्। **निखिलेति**—सकलविषयज्ञानज्योतिषा पात्रं भाजनम्। पुनः कथंभूतम्। **सकलेति**—सकलाश्च ते नयाश्च सकलनयाः नैगमादिनयाः तेषां नीतिः पद्धतिः तया स्मृता गुणा यस्य तं महान्तं पूज्यं त्वाम्। पुनः कथंभूतम्। विनतेति—विनताः भक्ताः तेषां हृदयानन्दविषये महोदारं महान्तं वदान्यं दानशीलं सारम् उत्तमं त्वाम् अहं याचे। हे भगवन् अर्थिविमुखः याचकविमुखश्चेत्त्व न भवसि ॥५९६॥ **मनुजेति**—इह अस्मिन् लोके। **मनुजेति**—मनुजा नराः। दिविजा दिवि स्वर्गे जायन्ते इति देवाः। तेषां लक्ष्मीः रमा तस्या लोचनयोः नेत्रयोः आलोकः प्रकाशः तस्य लीला शोभा येषां तथाभूताः प्राणिनः। त्वत्प्रसादात् तव कृपां प्राप्य। चिरं बहुना कालेन। चरितार्थाः कृतकृत्याः जाताः। **स्वामीति**—स्वामिनः प्रभोः सेवायाम् आराधनायाम् उत्सुकत्वात् हर्षनिर्भरत्वात्। इदानीम् अधुना। छात्रमित्रे छात्राणां शिष्याणां मित्रे सुहृदि मयि त्वं हृदयम्। सह वसतिसनाथां सह वसत्या निवासेन सनाथं मनः विधेहि कुरुष्वेत्यर्थः (परिपूरितवाञ्छं कुरु इत्यर्थ.) ॥५९७॥

इत्युपासकाध्ययने स्तवनविधिर्नाम सप्तत्रिंशत्तमः कल्पः ॥३७॥

## ३८. जपविधिर्नामाष्टत्रिंशत्तमः कल्पः।

[ पृष्ठ २४९-२५२ ] **सर्वेति**—केचित् आचार्याः सर्वाक्षरैः जपं निगिरन्ति प्रतिपादयन्ति। केचित् सूरयः नामाक्षरैर्जपम्, केचित् मुख्याक्षरादिषु एकवर्णन्यासात् एकवर्णमवलम्ब्य जपं निगिरन्ति। परमहं तु

सिद्धक्रमैरेव, यथा मन्त्राणां क्रमः प्राचाम् आचार्याणां मते सिद्धः तथैव तमाश्रित्य जपः कार्यः इति निगिरामि। यथागमे जपविषये क्रमः श्रूयते तथा स जपो जप्यः ॥५९८॥ पातालेति—पातालेषु भावनेषु। मर्त्येषु मनुजेषु। खेचरेषु विद्याधरेषु सुरेषु देवेषु सिद्धक्रमस्य मन्त्रस्य संसिद्धेः सिद्धिर्भवतीति हेतोः अधिगमात् प्रामाण्यात् अधिकप्रतिपत्तेः आदरात् समवाये जनसमुदाये, देवयात्रायाम् देवप्रतिष्ठादौ। सिद्धक्रमस्य मन्त्रस्यैव प्रामाण्यं श्रूयते ॥५९९॥ जपकरणविधिः—पुष्पैरिति—पर्यङ्कस्थः पद्मासनेन स्थितः निष्कम्पितम् अचलितम् अक्षवलयम् अक्षाणाम् इन्द्रियाणां वलयं येन सर्वाणि इन्द्रियाणि संयम्य जपं कुर्यादिति भावः। कैः जपो विधेय इत्याह—पुष्पैः कुसुमैः, पर्वभिः अङ्गुलिग्रन्थिभिः, अम्बुजबीजैः कमलबीजैः, स्वर्णमणिभिः, अर्ककान्तरत्नैर्वा सूर्यकान्तमणिभिर्वा जपः कार्यः। अथवा निष्कम्पितम् अचलितम् अक्षवलयम् जपमाला यस्य सः जपी जपं कुर्यात्। कमलबीजमालया, स्वर्णमणिमालया, सूर्यकान्तमणिमालया वा जपो विधीयेत जपिना ॥६००॥ अङ्गुष्ठे इति—मोक्षार्थी इदम् अक्षवलयं जपमालाख्यम्, अङ्गुष्ठे तथा तर्जन्याम् अङ्गुष्ठसमीपाङ्गुल्यां बहिः बाह्ये नयतु संचारयतु। पुनः ऐहिकापेक्षी धनधान्याद्यपेक्षां कुर्वाणः इतरासु अङ्गुलीषु मध्यमानामिका-द्यङ्गुलीषु अन्तः बहिश्च तां नयतु संचारयतु। (जाप्ये कृते सति बहिर्वस्तु उच्चाटनीयं जाप्यः प्रापयतु इति-टिप्पण्याम्) ॥६०१॥ वचसेति—वचसा वाण्या, मनसा वा चित्तेन वा समाहितस्वान्तैः ध्येये निश्चलीकृत-मनोभिः, जाप्यः कार्यः जपो विधातव्यः, आद्ये जाप्ये वाण्या कृते जाप्ये शतगुणं पुण्यम्, द्वितीये मनसा कृते जाप्ये वचनमनुक्त्वा विधेये जाप्ये सहस्रगुणितं पुण्यं जायते। वचःकृते जाप्ये मनसः स्थिरत्वात् शतगुणं पुण्यं मनोविहितजाप्ये ततोऽपि मनसः स्थिरतरत्वात् सहस्रगुणं पुण्यं लभ्यते ॥६०२॥ नियमितेति—नियमितः स्वस्वविषयादाकृष्य आत्मनि नियन्त्रितः करणग्राम इन्द्रियगणो येन। स्थानेति जिनालयादिकं स्थानम्। पद्मासनादिकम् आसनम्। मानसस्य चित्तस्य प्रचारः नाभिनेत्रललाटादिषु संचारणं मनःप्रचारः इत्यादिजप साधनानि जानन्। पुनः कथंभूतः। पवनेति—कुम्भकरेचकादिवायुधारणरेचनाद्युपायज्ञः पुमान् सम्यक्सिद्धः भवेत् अशेषज्ञश्च स्यात् ॥६०३॥ इममेवेति—पञ्चत्रिंशत्प्रकारवर्णस्थं पञ्चाधिकत्रिंशदक्षरोपेतम् इममेव मन्त्रं 'णमो-अरिहंताणं' इत्यादिरूपं प्रसिद्धम्। मुनयः परमपदावाप्तये मुक्तिपदलाभाय। विधिवत् नियमितकरणग्राम इति श्लोकोक्तविधिमनुसृत्य जपन्ति ॥६०४॥ मन्त्राणामिति—अखिलानां मन्त्राणाम् अयं एकः पञ्चनमस्कार-मन्त्रः सिद्धः सन् कार्यकृद्भवेत् इष्टं कार्यं कुर्यात्। परे तु सर्वे मन्त्राः अस्य णमो अरिहंताणं एतावन्मात्रस्य एकदेशकार्यं न कुर्युः। सर्वेषु मन्त्रेषु अयमेव मन्त्रः श्रेष्ठः ॥६०५॥ कुर्यादिति—अङ्गुष्ठमारभ्य कनिष्ठिका-पर्यन्तं करयोः वामदक्षिणकरयोः प्रकारयुगलेन (?) विधिपूर्वकाङ्गुलिरेषा करन्यासं कुर्यात्। न्यासं कृत्वा पञ्चनमस्कारमन्त्रम् उभयकरयोरङ्गुलीषु लिखित्वा। तदनु हृदाननमस्तककवचास्त्रविधिः मनोमुखशिरःसु कवचविधिम् अस्त्रविधिं च कुर्यात्। कवचस्य विधिः कं देहं वञ्चति विपक्षास्त्राणि वञ्चयित्वा रक्षति इति कवचः तस्य विधिः मन्त्रोच्चारेण सकलीकरणविधानं विधातव्यः। एतत्सर्वं जपात्पूर्वं विधातव्यमित्यर्थः ॥६०६॥ संपूर्णेति—संपूर्णमति स्पष्टं। सनादं बिन्दुसहितं ॐकारं पञ्चपरमेष्ठिवाचकम्, आनन्दसुन्दरम् आनन्देन आत्मानुभवसुखेन सुन्दरं रमणीयम्। जपतः अस्य मुनेरुपासकस्य वा सर्वेषां समीहितानाम् अभिल-षितानाम् अभ्युदयनिःश्रेयसां सिद्धिः प्राप्तिः निःसंशयं संजायेत भवेत् ॥६०७॥ मन्त्र इति—परत्र मन्त्रे अन्यस्मिन्मन्त्रे ऋषिमण्डलादिमन्त्रे। फलोपलम्भे अभिलषितप्राप्तौ सत्यामपि। अयमेव पञ्चपरमेष्ठिमन्त्रः सेव्य आराध्यः। यद्यपि अग्रे शाखादिषु। विटपी वृक्षः। फलति प्रादुर्भूतफलो भवति। तथापि तस्य वृक्षस्य मूलं जलेन सिच्यते। तदसिञ्चने न फलोपलब्धिस्तथा अस्मिन्मन्त्रे सेव्यमाने इतरेभ्य एतन्मूलकेभ्यो मन्त्रेभ्यः फललाभो भवेत् ॥६०८॥ अत्रामुत्रेति—गुरुपञ्चकवाचकान्मन्त्रात् पञ्चपरमेष्ठिमन्त्रात्। आरोपमन्त्रः अत्र अस्मिन् लोके। परत्र च स्वर्गादौ च। नियतं निश्चयेन कामितफलसिद्धये अभीष्टफललाभाय। नाभूत् नाभवत्। नास्ति न भवति। न भविष्यति च ॥६०९॥ अभिलषितेति—अस्मिन् मन्त्रे इष्टपदार्थदाने सुरगोसदृशे सति कामधेनुसदृशे सति तथा अस्मिन्मन्त्रे दुरितं पापं तदेव द्रुमः तरुः तस्य पावकेऽग्निसदृशे सति। दृष्टादृष्टफले दृष्टं लब्धम् ऐहलौकिकं धनादिकम् अदृष्टं पारलौकिकं स्वर्गादिफलं यस्य तथाभूते सति परत्रमन्त्रे

अन्यमन्त्रे जनः कथं सज्जतु कथमासक्तो भवतु ॥६१०॥ इत्थमिति—मनसि स्वचित्ते बाह्यं मनः बहिः पुद्गलादौ प्रवर्तमानं मनः बाह्यम् उच्यते तत् अबाह्यवृत्ति अन्तरुन्मुखं कृत्वा आत्मस्वरूपरतं विधाय। हृषीकनगरम् इन्द्रियपुरम्। महता वायुना नियम्य नियन्त्र्य। सम्यग्जपं प्रयत्नात् विदधतः कुर्वतः सुधियः विबुधः अस्य कृतिनः पुण्यवतः किम् असाध्यं अस्ति न किमप्यसाध्यम् ॥६११॥

इत्युपासकाध्ययने जपविधिर्नामाष्टत्रिंशत्तमः कल्पः ॥३८॥

## ३९. ध्यानविधिर्नामैकोनचत्वारिंशः कल्पः।

[ पृष्ठ २५२-२५७ ] आदिध्यासुरिति—परं ज्योतिः आदिध्यासुः परम् उत्तमं ज्योतिः निरावरणज्ञानं यस्य तम् अर्हन्तम् आदिध्यासुः ध्यानविषयं कर्तुम् इच्छन्। शाश्वतं तद्धाम ईप्सुः शाश्वतम् अविनश्वरं तद्धाम तस्य अर्हतः धाम स्थानं मुक्तिपुरम् ईप्सुः वाञ्छन् समाहितः सम्यक् प्रणिधानं गतः उपासकः। इमं ध्यानविधिं यत्नादभ्यस्यतु ॥६१२॥ तत्त्वेति—तत्त्वस्य अर्हदादिपरमेष्ठिस्वरूपस्य जीवादितत्त्वस्य वा या चिन्ता ध्यानं सा एव अमृताम्भोधिः सुधासमुद्रः तस्मिन् दृढमग्नतया दृढं निःसंदेहं मग्नतया बुडितत्वात्। मनः बहिर्व्याप्तौ बाह्ये योषित्कनकादिवस्तुनि जडं कृत्वा ततस्तदाकृष्येत्यर्थः। द्वयमासनं पद्मासनम् अर्धपल्यङ्कासनं च आचरेत्। तदासनेन स्थित्वा ध्यानं क्रियतामित्यर्थः ॥६१३॥ सूक्ष्मेति—सूक्ष्मः उच्छ्वासनिःश्वासः तस्य यमः प्रवेशः आयामो निर्गमः। सन्नेति—सन्नः नष्टः सर्वाङ्गानां सञ्चरः चलनं यस्य सः स्थिरीभूतसर्वाङ्गः। ग्रावोत्कीर्णः इव ग्रावणि पाषाणे उत्कीर्ण इव उट्टङ्कित इव आसीत उपविशेत्। किं कुर्वन् ध्यानेति—ध्यानानन्दसुधां लिहन् आत्मस्वरूपैकाग्रतयोत्पन्नात्मानुभवसुखपीयूषमास्वदमानः ॥६१४॥ यदेन्द्रियाणीति—यदा यस्मिन् समये पञ्चापि इन्द्रियाणि स्पर्शनादीनि पञ्चभावेन्द्रियाणि। आत्मस्थानि आत्मन्येव तिष्ठन्ति स्पर्शरसादिविषयान् विमुच्य आत्मनि ज्ञानदर्शनलक्षणे स्थिरीभवन्ति। तदा तस्मिन्काले। अन्तश्चित्ते ज्योतिः निरावरणं ज्ञानं स्फुरति उद्गच्छति तथा चित्ते स्वस्वरूपे एव निमज्जति। बाह्ये वस्तुनि ज्योती रागद्वेषमोहाकुलं न भवतीति भावः ॥६१५॥ ध्यानध्यातृध्येयतत्फलान्याह—चित्तस्येति—चित्तस्य मनसः एकाग्रता एकस्मिन् अग्रे वस्तुनि गुणे पर्याये वा स्थिरीकरणं ध्यानमुच्यते। आत्मा ध्याता कथ्यते, ध्याने कृते सति ततो यत् फलं लभ्यते तेन स ध्याता ध्यानफलस्वामी ध्यातेत्युच्यते। ध्येयम् आगमज्योतिः आत्मा आगमज्ञानसंपन्नः जीवः ध्येयम्। देहयातना तद्विधिः कायक्लेशः। एवं ध्यानादीनां चतुर्णां स्वरूपमुक्तम् ॥६१६॥ तैरश्चमिति—तिरश्चामिदं तैरश्चं पशुभिः कृतम्। अमरैर्देवैः कृतम्। मार्त्यं मर्त्यैर्मनुजैः कृतम्। नाभसं नभसो जातम् वज्रादिकृतमित्यर्थः, भौमं भूमेर्जातम् भूकम्पादिकम्। आङ्गजम् अङ्गात् जायते इति अङ्गजं रोगादिकम्। एतत्सर्वम् अन्तरायं सहेत। एतेभ्यो जातानाम् अन्तरायाणां सहनं कुर्यात्। कथंभूतः ध्याता द्वयातिगः द्वयं रागद्वेषौ अतिगच्छति इति द्वयातिगः रागद्वेषरहितः सन्। रागद्वेषयोरुद्भूत्या आर्तध्यानं रौद्रध्यानं चोद्भवेत्। अतः तौ विमुच्य उपसर्गांश्च सोढ्वा, धर्म्यं ध्यानं ध्यायेत् ॥६१७॥ नाक्षमित्वमिति – अक्षमित्वं क्षमारहितत्वम् अविघ्नाय विघ्ननाशाय न भवति। क्लीबत्वं कातरत्वं भयं अमृत्यवे मरणरहितत्वाय न भवति। तस्मात् ततः अक्लिश्यमानात्मा संक्लेशपरिणामरहितः परं ब्रह्मैव शुद्धमात्मस्वरूपमेव चिन्तयेत् विमृशेत् ॥६१८॥ यत्रेति – यत्र यस्मिन् स्थाने ग्रामनगरादौ। इन्द्रियग्रामः इन्द्रियशब्देन अत्र स्पर्शादिविषयाः गृह्यन्ते विषयेषु विषयिणामुपचारात्। तेषां ग्रामः समूहः, इन्द्रियग्रामः, यत्र इन्द्रियविषयाः स्पर्शादयः सन्ति तत्र ध्याता न तिष्ठेत्। यत्र इन्द्रियाणां व्यासंगः आसक्तिः संभवेत् तत्र ध्याता न तिष्ठेत्। विशेषेण आसंगः आसक्तिः व्यासंगः विषयलोलता। तेन व्यासंगेन यत्र ध्येयचिन्तने विप्लवं विघ्नं ध्याता नाश्नुवीत न प्राप्नुयात् तमुद्देशं तत्स्थानं ध्याता अध्यात्मसिद्धये स्वस्वरूपलाभाय भजेत् आश्रयेत् ॥६१९॥ देहस्य रक्षा कर्तव्या, किमर्थम्। फल्गुजन्मेति – फल्गुजन्मा फल्गु व्यर्थं विफलं जन्म

यस्य तथाभूतः अपि अयं देहः। यत् यस्मात्कारणात् अलाबुफलायते तुम्बीफलसदृशो भवति। कस्मिन्, विषये संसारसागरोत्तारे भवसमुद्रतरणे। तस्मात् ततः प्रयत्नात् रक्ष्यः। अलाबुफलं कटुत्वाद्भक्षणानर्हम् अतस्तस्य फल्गुजन्म तथापि तेन नरः नदीसमुद्रादिकं तरति तथा अयं नरदेहः पश्वादिदेहवत् नोपयुज्यते अतोऽफलस्तथापि अनेनैव संसारसागरस्तरीतुं शक्यते न पशुदेहेन देवदेहेन वा। अतः नृदेहोऽयं प्रयत्नेन रक्षणीयः ॥६२०॥ **नरे इति**—यथा अधीरे धैर्यरहिते पुरुषे वर्म तनुत्रं कवचो वृथा विफलम्। असस्ये क्षेत्रे सस्यं धान्यं तद्यत्र न तत्क्षेत्रम् असस्यं धान्यरहितम्। तत्र वृतिः आसमन्तात् कण्टकादिभिः परिवरणं व्यर्था। तथा ध्यानशून्यस्य तद्विधिः वृथा अनैकाग्र्यवतः नरस्य आसनादिकम्, विविक्तस्थानं च वृथा स्यात् ॥६२१॥ **बहिरन्तरिति**—यथा वातैः अस्पन्दो निश्चलो दीपः आलोकनेन बहिःप्रकाशेन उल्लासी शोभमानो भवति। तथा अन्तस्तमोवातैः अन्तः आत्मनि स्थितानि यानि तमांसि अज्ञानानि तान्येव वाताः वायवस्तैः अस्पन्दं निश्चलं मनश्चित्तं यत् यस्मात् तत्त्वावलोकनोल्लासि जीवादिसप्ततत्त्वदर्शनेन उल्लासि शोभमानं भवति। तदा तत् ध्यानं सबीजं कारणं बीजं तेन सहितं भवति। सालम्बनं तद्ध्यानं भवति इति ज्ञेयम् ॥६२२॥ **निर्विचारेति**—चेतःस्रोतःप्रवृत्तिषु चेतसः मनसः स्रोतांसि प्रवाहाः तेषां प्रवृत्तयः व्यापाराः तासु। कथंभूतासु निर्विचारावतारासु। विचारः एकस्माद्ध्येयात् अन्यस्मिन् ध्येये मनसः प्रवृत्तिः विचारः तस्य अवतार आगमनं तद् यत्र न ताः निर्विचारावताराः। स्वस्मिन् विषये एव मनःप्रवृत्तिषु स्थिरासु जातासु आत्मनि एव स्फुरन् आत्मा ज्ञानदर्शनवति स्वरूपे एव विजृम्भमाणः जीवः। अबीजकं ध्यानं भवेत्। एकत्ववितर्कावीचाराख्यं ध्यानं भवेत्। इति भावः ॥६२३॥ **चित्ते इति**—अनन्तप्रभावे न अन्तः विनाशः यस्य स अनन्तः स प्रभावः सामर्थ्यं यस्य तत् अनन्तप्रभावं तस्मिन् चित्ते मनसि। पुनः कथंभूते प्रकृतया स्वभावेन रसवत् पारदवत् चले चञ्चले सति। तत् मनः तेजसि आत्मनि ज्ञाने च स्थिरे जाते सति। जगत्त्रये किं न सिद्धं भवेत् आत्मनि ज्ञाने च मनसि स्थिरे भूते सर्वा अभ्युदयनिःश्रेयससंपदो लभ्यन्ते यथा पारदे तेजसि अग्नौ निश्चलीभूय सिद्धे सति सुवर्णादिसिद्धिर्भवति ॥६२४॥ **निर्मनस्के**—मनोहंसे निर्मनस्के निर्विचारे सति। पुंहंसे आत्महंसे सर्वतः स्थिरे सति। संकल्पविकल्पमुक्ते सति। बोधहंसः ज्ञानहंसः अखिलालोक्यसरोहंसः अखिलानि सर्वाणि तानि आलोक्यानि विलोकितुं ज्ञातुं योग्यानि जीवादिवस्तूनि तान्येव सरः सरोवरं तत्रत्यः हंसः जायते भवति। चित्ते रागद्वेषविहीने सति आत्मा आत्मन्येव स्थिरो भवति ततश्च स ज्ञानावृत्त्यादिघातिकर्मक्षयात् अखिलज्ञो भवति ॥६२५॥ **यद्यप्यस्मिन् इति**—यद्यपि अस्मिन्मनःक्षेत्रे अस्मिन् चित्तस्थाने। तां तां क्रियां जीवादिध्येयेषु मनस एकाग्रीकरणरूपां तां तां प्रवृत्तिं समादधत् सम्यक् कुर्वाणः। किंचिद्भावं किंचिज्जीवादितत्त्वानां स्वरूपं वेदयते विशेषतया जानाति, स्वात्मानुभवसुखं चानुभवति। तथापि अत्र न विभ्रमेत् न मुह्येत्। मया आत्मानुभवो लब्धः इति विमर्शेन न हृष्येत्। हेयम् उपादेयं च वस्तु यथावत्पश्येत् इत्यर्थः, अन्यथा रागादिभिः अभिभूतः स्यात् ॥६२६॥ **विपक्षे इति**—क्लेशराशीनां दुःखसमूहानां विपक्षे शत्रुभूते अस्मिन् स्वात्मानुभवे अयं विभ्रमः मोहो हर्षो वा यस्मान्न एष विधिर्भवेत्। तस्मात् परं ब्रह्म परमात्मस्वरूपम् आश्रितः ध्याता अस्मिन् विधौ न विस्मयेत नाश्चर्यं गच्छेत् न दर्पं गच्छेत्। दर्पं गते सति आत्मानुभवात् च्युतिर्भवेत् ॥६२७॥ **प्रभावेति**—प्रभावः अनुभावः। ऐश्वर्यं विभवः। विज्ञानं, देवतासंगमादयः देवतायाः संगमः प्रसन्नताभावः, आदौ येषां ते सर्वे व्यापाराः एतानि सर्वाणि कार्याणि। योगोन्मेषात् ध्यानस्योदयात् ध्यानस्य प्रभावात् भवन्तोऽपि अमी तत्त्वविदां जीवादिस्वरूपज्ञानिनां मुदे आनन्दाय न भवन्ति ॥६२८॥

[पृष्ठ २५८-२६१] **भूमाविति**—यथा रत्नानां जन्म उत्पत्तिः भूमौ भवति इति सत्यं एतावता यत्र कुत्रापि भूमौ रत्नजन्म न भवतीति ज्ञातव्यम्। तथा आत्मजं आत्मनो जायते इति आत्मजं ध्यानं नाचेतनेभ्यः पुद्गलादिभ्यस्तज्जन्म इति सत्यं तथापि आत्मजं ध्यानं सिद्धमपि सर्वत्राङ्गिनि सर्वजीवराशौ तद्भवेदिति न ग्राह्यम् ॥६२९॥ **तस्येति**—तस्य ध्यानस्य परमम् उत्कृष्टं कालं समयं मुनयः अन्तर्मुहूर्तं वदन्ति तावत्कालं मनः अपरिस्पन्दमानं निश्चलम् तत्परं ध्येये स्थिरं भवति। ततः परं मनः दुर्धरं भवति ॥६३०॥ **तत्कालमपि इति**—सः अन्तर्मुहूर्तावधिकः कालो यस्य तद्ध्यानम् आत्मनि एकाग्रम् आत्मविषये स्फुरत् जृम्भमाणं उच्चैः महान्तं

कर्मोच्चयं ज्ञानावरणादिकर्माष्टकम् भिन्द्यात्। आत्मनः सकाशात् पृथक् कुर्यात्। यथा वज्रम् अशनिः शैलं क्षणात् भिन्द्यात् स्फोटयेत् ॥६३१॥ कल्पैरिति—कल्पैरपि कल्पप्रमाणैरपि युगान्तरैरपि चुलुकैः माषमज्जन-जलमापैः अम्बुधिः उच्चुलुम्पितुं लोप्तुं न शक्यः असंख्यकल्पकालान् यावत् चुलुकैः समुद्ररिक्तीकरणाय प्रयतमानोऽपि जनः तत्कार्यकरणे समर्थो न भवेत्। परं कल्पान्तभूः वातः युगान्तजो वायुः तं समुद्रं पुनः शोषम् आनयेत्। तथा यदा आत्मध्यानमात्मनि स्फुरति तदा अनन्ताः कर्मस्कन्धाः अन्तर्मुहूर्तेनैव तेन विध्व-स्यन्ते ॥६३२॥ रूपे मरुतीति—रूपे कामतत्त्वादौ महति परकायप्रवेशादौ चित्ते विशन् प्रवेशं कुर्वन् कामितं वाञ्छितं लभेत यथा तथा अयम् आत्मा आत्मना स्वेनैव आत्मनि स्वस्वरूपे नितरां रतो भवन् कामितम् अभिलषितं शिवम् अनन्तसुखं लभेत प्राप्नुयात् ।६३३॥ ध्यानहेतवः—वैराग्यमिति—वैराग्यं संसाराद् भीतिः संवेगः तस्मिन् जाते सति धनादीनां क्रोधादीनां च त्यागरूपा परिणतिरुत्पद्यते सैव वैराग्यं भण्यते। ज्ञानसम्पत्तिः अध्यात्मज्ञानप्राप्तिः। असंगः अनासक्तिरूपः परिणामः असंगः। स्थिरचित्तता मनसः एकस्मिन्विषये निश्चलता। ऊर्मिस्मयसहत्वं च। क्षुत्पिपासे, जरामृत्यू शोकमोहौ षडूर्मयः। एताः षड्विधाः पीडाः। स्मयो गर्वः सोऽष्टविधः ज्ञानपूजाकुलजातिबलर्द्धितपोवपुषाम् अष्टानां गर्वः। एतेषां सहनम् एते योगस्य ध्यानस्य प्राप्तये पञ्च हेतवः कारणानि सन्ति ॥६३४॥ ध्यानान्तरायाः—आधीति—आधिर्मानसी व्यथा। व्याधिः शरीरे रोगपीडा। विपर्यासः वस्तुनो विपरीतज्ञानम्। प्रमादः असावधानता। आलस्यं कार्ये मन्दत्वम्। विभ्रमः इदं वस्तु इदं वेति वस्त्वनिश्चयः। अलाभः विविक्तदेशकलाद्यप्राप्तिः। संगिता धनादिषु लुब्धता। अस्थैर्यं चित्तस्यानैकाग्र्यम्। एते नव तस्य ध्यानस्य अन्तरायकाः विघ्नाः ज्ञेयाः ॥६३५॥ यः कण्टकैरिति—यः कण्टकैः अङ्गं देहं तुदति पीडयति। यश्च नरः लिम्पति अङ्गं चन्दनैः। तयोः कार्ययोः रोषे तोषेऽपि अविपक्वात्मा अनासक्तप्रकृतिः। ध्याता लोष्ठवत् मृत्पिण्डवत् अरागद्वेषो भवेत् ॥६३६॥ ज्योतिर्बिन्दुरिति—ॐकारस्याकारेण बिन्दुकलादीनामाकारेण च निर्बीजीकरणं कर्म करोति। तदवसाने मरणस्य जयो भवति इति मिथ्यादृष्टयः कथयन्ति तदसत्यम्। बिन्दुः अर्धचन्द्रकला, नादः अनुस्वारः उपरि एका षड्नादः(?) नादः कथ्यते। कुण्डकुण्डली, तदाकारेण वाजीकरणम्। विषेश्वरी(?) मुद्रा-त्रिकोणचतुःकोणादिबहुप्रकारस्तेन बहुवचनम्। प्रेयाणि(?) निर्बीजीकरणादिकम् ज्योतिर्बिन्दु-कलादीनामाकारेण शुक्रनिःकाशनं नाभिप्रमुखेषु स्थानेषु कार्यम्। ब्रह्मग्रन्थिः—निखिलान्त्रजालमलं ब्रह्मग्रन्थि-रुच्यते। तत्रापि निर्बीजीकरणं भवति। नेत्रनाभिप्रमुखमार्गेण शुक्रनिःकाशनं कर्म मृत्युञ्जयं भवति साधनाभ्यासेन यदा मरणवेला वर्तते तदा निर्बीजीकरणं क्रियते तेन कर्मणा मृत्यौ वञ्चिते सति पश्चात्कदापि मरणं न स्यादित्यर्थः। अग्नि—नासिकायाम् अग्नितत्त्वं वर्तते। रवौ—दक्षिणनाड्याम्, चन्द्रे वामनाड्याम्। लूतातन्तौ लिङ्गविषये हृदये छिद्रं विनापि तदा काले भेदसदृशग्रन्थिः स्यात्। ज्योतिरादिशब्दानाम् अभिप्रायः टिप्पण्यां वर्तते सा टिप्पणी एवात्रालिखिता। एतेषां त्रयाणां श्लोकानाम् अर्थः सम्यक्तया नावगतोऽस्माभिः ॥६३७-६३९॥ कर्माणीति—यदि चेत् एवंविधैर्नयैः प्राणायामादिभिः उपायैः कर्माणि साध्यानि जेतुं शक्यानि भवे-युस्तर्हि तपोऽनशनादिकम्। जपः वाण्या मनसा वा मन्त्रपरिवर्तनम्। आप्तेष्टिः पञ्चपरमेष्ठिपूजनम्। दानं स्वपरानुग्रहार्थं स्वस्य धनादेर्दानम्। अध्ययनं स्वाध्यायः एतानि यानि आवश्यकापरिहार्याणि कार्याणि तैः पर्याप्तं भवेत्। एभिः उपायैः अनशनादिकर्माणि व्यर्थानि स्युः ॥६४०॥ योऽविचारितेति—यः पुमान् अविचा-रितरम्येषु अविमर्शितसुन्दरेषु। क्षणं स्तोककालं देहार्तिहारिषु देहदुःखविनाशं कुर्वत्सु। इन्द्रियार्थेषु इन्द्रिय-प्रयोजनसाधकेषु। प्राणायामादिषु वश्यात्मा आयत्तः सोऽपि किल योगी उच्यते। किलेत्यरुचौ। योगीति नैव मान्यः ॥६४१॥ यस्येति—यस्य पुंसः इन्द्रियार्थतृष्णापि मनः जर्जरीकुरुते चित्तं पीडयति। स नरः तन्नि-रोधभुवः तस्या इन्द्रियविषयाभिलाषायाः निरोधात् भवति जायते प्राप्यते तथाभूतस्य धाम्नः स्थानस्य मुक्तेः कथम् ईप्सति अभिलषति। यावत्कालं विषयतृष्णया मनः पीड्यते तावत्कालं मुक्त्यभिलाषो वृथैव ॥६४२॥ आत्मज्ञ इति—आत्मस्वरूपस्य ज्ञाता यातनायोगकर्मभिः अनशनकायक्लेशादितपांसि, परिषहसहनं च यातना, योगः निजात्मरूपे एकाग्रता। एभिः कर्मभिः कालेन संचितं दोषम् अनेकभवार्जितं रागद्वेषमोहादिकं क्षपयन् शुक्लध्यानेन निरस्यन् योगी कल्पतां वीतरागतां निजात्मशुद्धत्वं याति। यथा रोगी यातनायोगकर्मभिः

लङ्घनस्वेदनवमनादिभिरौषधसेवनेन च कालेन संचितं कफादिकं निरस्य कल्यतां नीरोगतां एति याति तथेति भावः ॥६४३॥ लाभेऽलाभे इति—यः मुनिः लाभे अलाभे। वने वासे ग्रामनगरादौ च। मित्रे अमित्रे शत्रौ च। प्रिये अप्रिये मनोज्ञे अमनोज्ञे च। सुखे दुःखे च समानात्मा भवति उपेक्षायुतः रागद्वेषरहितो जायते। तस्य सदा ध्यानधीः आत्मानुभवलाभाय ध्यानधीः एकाग्रबुद्धिर्भवति ॥६४४॥ कीदृगाचरणं ध्यान-लाभहेतुर्भवतीत्याह—परे ब्रह्मणीति—परे उत्तमे ब्रह्मणि आत्मनि परमात्मनि परमात्मस्वरूपप्रतिपादकागमे अनूचानः विचक्षणः। धृतिः संतोषः। मैत्री परेषां दुःखानुत्पत्त्यभिलाषः, दया अनुग्रहार्द्रीकृतचेतसः परपीडा-मात्मस्थामिव कुर्वतो यो मनःपरिणामः सा दया। धृत्या मैत्र्या दयया च अन्वितः धृतिमैत्रीदयान्वितः, सः मुनिः सूनृताद्वाक्यादन्यत्र सत्यप्रियवाक्याद्विना अन्यत् असत्यम् गर्हितम्, सावद्यम्, सदपह्नवादिकं भाषणं न ब्रूयात्। अर्थात् नित्यं वाचंयमी मौनवान् भवेत् ॥६४५॥

[ पृष्ठ २६२-२६८ ] संयोगे इति—इष्टलाभे, विप्रलम्भे इष्टवियोगे। निदाने भाविविषयभोग-काङ्क्षायाम्, परिदेवने स्वपरानुग्रहाभिलाषविषये अनुकम्पाप्रचुरे रोदने, हिंसायां प्रमत्तयोगात्प्राणव्यपरोपणे। अनृते प्रमत्तयोगादसदभिधाने। स्तेये प्रमत्तयोगाददत्तादाने। भोगरक्षासु इन्द्रियविषयाः भोगाः तेषां रक्षासु तत्परे। जन्तोः प्राणिनः अनन्तसंसारभ्रमैनोरथवर्त्मनी अनन्तभवेषु भ्रमणे पापरूपरथमार्गभूते द्वे ध्याने भूमिर्ययोस्ते एनोरथवर्त्मनी पापरथसंचारमार्गस्वरूपे दुरन्तफलदायिनी दुष्टोऽन्तो येषां तानि फलानि दत्तः इति दुरन्तफल-दायिनी नरकतिर्यग्गतिदुःखफलदायके आर्तरौद्रे ध्याने त्यजेत् मुञ्चेत् ॥ ६४६-६४७ ॥ बोध्यागमेति—बोध्यो ज्ञातुं योग्यो मुमुक्षुभिर्य आगमः स बोध्यागमः। तस्य कपाटे तस्य स्वरूपप्रच्छादकत्वात् कपाटसदृशे। तथा ते दुर्ध्याने परे मुक्तिमार्गार्गले परे दृढे मुक्तिपथरोधके। श्वभ्रलोकस्य नरकलोकस्य सोपाने निश्रेणीसदृशे। तत्त्वेक्षावृतिपक्ष्मणी जीवादिद्रव्याणां यथागमे याथात्म्यं प्रोक्तं तस्य तथा भवनं तत्त्वं तस्य ईक्षा पुनःपुनर्विमर्शः तस्याः आवृतिराच्छादनं तस्मिन् पक्ष्मणी नेत्रच्छदसदृशे ॥ ६४८ ॥ लेशतोऽपीति—यावत् यावत्कालम् एते आर्तरौद्रध्याने लेशतोऽपि स्तोकमपि मनः चित्तं समधितिष्ठतः आश्रयतः तावत् एष जन्मतरुः जननवृक्षः उच्चैः समधिरोहति अतितुङ्गो वर्धते ॥ ६४९ ॥ ज्वलन्निति—ज्वलन् प्रकाशयुतो भवन् प्रदीपः अञ्जनं कज्ज-लम् आधत्ते धारयति उत्पादयति। परं रविर्ज्वलन् अञ्जनं न आधत्ते। तथा आशयविशेषेण ध्यानं फलम् आरभते शुभाशुभशुद्धपरिणामविशेषतया ध्यानं शुभाशुभशुद्धफलं जनयति। अशुभपरिणामविशेषेण आर्तरौद्रद्वयं नरक-तिर्यग्गतिफलं ददाति। शुभपरिणामविशेषेण धर्म्यध्यानं देवगतौ सुखं ददाति। शुक्लध्यानं शुद्धोपयोगपरिणामैः मुक्तिसुखं ददाति ॥ ६५० ॥ प्रमाणनयनिक्षेपैरिति—प्रमाणं प्रकर्षेण संशयादिदोषरहितं वस्तुतत्त्वं येन मीयते तत्प्रमाणम्। नयः प्रगृह्य प्रमाणतः परिणतिविशेषादर्थावधारणं नयः। निक्षेपः – नामादिभिः वस्तु-निरूपणं निक्षेपः। अनुयोगः सदादिप्रश्नैः जीवादिस्वरूपनिश्चयोऽनुयोगः। अनुयोगसहितैः प्रमाणनयनिक्षेपैः विशुद्धधीः विशुद्धबुद्धिर्मुनिः धर्मध्यानपरायणः सन् तत्त्वेषु जीवादिषु मतिं तनोति विस्तारयति ॥६५१॥ अरहस्ये इति—यथा सती, काञ्चनकर्मणो पतिव्रता स्त्री, सुवर्णालंकारश्च अरहस्ये गोपनीये न भवतः निर्दोष-त्वात्। तथा सुधियः परमागमम् अरहस्यं निर्दोषम् इच्छन्ति ॥६५२॥ यः स्खलतीति—यः अल्पबोधानां मादृशां विचारेष्वपि स्खलति यः आगमः अल्पज्ञानानां मादृशां कार्यकारणविमर्शसमये स्खलति वस्तुतत्त्व-निर्णयं दातुं क्षमो न भवति। असत्यत्वात्। स आगमः संसारसमुद्रे मज्जज्जन्त्वालम्बः ब्रुडत्प्राण्युत्तारकः कथं स्यात्। सर्वज्ञप्रणीतमागमं प्रमाणीकृत्य "इत्थमेवेदं नान्यथावादिनो जिनाः" इति गहनपदार्थश्रद्धा-नमर्थावधारणम् आज्ञाविचयाख्यं धर्म्मज्ञानं ज्ञातव्यम् ॥६५३॥ अपायविचयं धर्म्यध्यानमाचष्टे—अहो मिथ्यातम इति—युक्तिद्योते स्फुरति अपि अनेकान्तरूपं पदार्थनिवहं प्रमाणनयप्रकाशे प्रदर्शयत्यपि। मिथ्यातमः अतत्त्वश्रद्धानं विपरीतादिमिथ्यात्वसमूहः पुंसां भव्यजनानां चेतांसि मनांसि अन्धयति हिता-हितविवेकशून्यं करोति। कुत्र ? रत्नत्रयपरिग्रहे सम्यग्दर्शनज्ञानचारित्राख्यमोक्षमार्गस्वीकारे। अहो आश्चर्यम् ॥ ६५४ ॥ आशास्महे इति—तत् तस्मात् कारणात्, एतेषां भव्यजनानाम् आशास्महे एतेऽपि रत्नत्रयपरिग्रहवन्तो भवन्त्विति इच्छामः। अस्तकल्मषाः निराकृतमिथ्यात्वपापाः एते अद्य कथं दुःख-

निबर्हणं चतुर्गतिदुःखनाशनं तत्त्वं यथार्थमनेकान्तवस्तुस्वरूपं प्रपश्यन्ति। यथा ते तत्त्वरूपं प्रपश्यन्ति तथा तेषाम् आशास्महे ॥ इति अपायधर्म्यध्यानम् ॥६५५॥ लोकविचयधर्म्यध्यानमाह—**अकृत्रिम इति**—अयं लोकः अकृत्रिमः नहि केनापि देवेन रचितः। विचित्रात्मा नानाविधस्वरूपः। मध्ये च त्रसराजिमान् त्रसनालीसहितः त्रसजीवसमूहशोभितः। मरुत्त्रयीवृतः घनवातेन, अम्बुवातेन, तनुवातेन च सर्वतो वेष्टितः। प्रान्ते *अस्य लोकस्य प्रान्ते अग्रे तद्धामनिष्ठितः तेषां मुक्तानां धाम आस्पदं निवासः तेन निष्ठितः समाप्तिं गतः।* मुक्तानां निवासो लोकस्यान्ते विद्यते इति भावः। तत ऊर्ध्वं सर्वत्र अलोकाकाश एवेति पुनः पुनः लोकस्य विचारणं लोकविचयधर्म्यध्यानमित्यर्थः ॥६५६॥ विपाकविचयधर्मध्यानमाह—**रेणुवदिति**—तत्र तस्मिंल्लोके। तिर्यक् मध्यलोके। ऊर्ध्वम् उपरि स्वर्गादौ। अधः पाताले च। एते जन्तवः त्रसस्थावरप्राणिनः। रेणुवत् धूलिर्यथा वायुप्रेरिता सती तिर्यक् इतस्ततः ऊर्ध्वम्, अधः यत्र कुत्रापि भ्रमति। तथा निजान्येव कर्माणि यानि शुभाशुभानि तान्येव अनिलः वायुस्तेन ईरिता नोदिताः। अनारतम् ऊर्ध्वाधस्तिर्यक्षु स्थानेषु भ्रमन्ति तिर्यगादिदेहान् धृत्वा। एवं पुनः स्मरणम् एकाग्रचेतसा लोकविचयध्यानम् ॥६५७॥ **इतीति**—इति एवं प्रकारेण। धर्म्यं चतुर्विधं धर्म्यध्यानं चिन्तयतः एकाग्रेण मनसा। पुनः कथंभूतस्य। यतेति – यतानि दान्तानि वशीकृतानि इन्द्रियाणि चेतो मनश्च येन तस्य मुनेः। तमांसि पापानि। द्रवं विनाशम् आयान्ति गच्छन्ति। कस्मादिव। द्वादशेति—द्वादशात्मा सूर्यः मेषवृषादिराशीन् क्रमशः गच्छत्यतः स द्वादशात्मा कथ्यते। *यथा सूर्यस्योदयाद्* ध्वान्तं पलायते तथा इन्द्रियाणि मनश्च वशीकृत्य धर्म्यध्यानं चिन्तयतो मुनेः तमांसि अज्ञानानि विनाशं यान्ति ॥६५८॥ **भेदमिति**—विवर्जिताभेदम् अभेदं परित्यज्य भेदं ध्यायन्। भेदवर्जितम् अभेदं च ध्यायन् ध्याता सूक्ष्मक्रियाशुद्धो कायवाङ्मनसां व्यापारान् सूक्ष्मीकरोति। ततश्च पूर्वापेक्षया क्रियाशुद्धो भूत्वा निष्क्रियो भवति। योगत्रयरहितः ध्याता ततो निष्क्रियं ध्यानं प्रतिपद्यते स्वीकरोति ॥६५९–६६०॥

कीदृगात्मा मोक्ष इत्युच्यते—**प्रक्षीणोभयेति**—मनीषिणः स्याद्वादिनो विद्वांसः मोक्षम् आहुः। कथंभूतं मोक्षम्। प्रक्षीणेति—प्रक्षीणे प्रणष्टे बन्धहेत्वभावनिर्जराभ्यां कर्मणी द्रव्यभावाख्ये यस्य सः तम्। पुनः कथंभूतम्। जन्मदोषैर्विवर्जितम् जन्म चतुर्गतिभ्रमणम्, दोषाश्च आवरणानि क्षुत्पिपासादयश्च तैर्विवर्जितम्। पुनः कथंभूतं मोक्षम्। लब्धेति – लब्धाः प्राप्ताः गुणाः अनन्तज्ञानादयोऽनन्ता गुणा यस्य तथाभूतम् आत्मानं मोक्षम् आहुः ब्रुवन्ति। नष्टाष्टकर्माणम् प्राप्तानन्तगुणम् द्रव्यभावकर्मरहितम् नष्टचतुर्गतिभ्रमणम् दोषरहितम् आत्मानम् विद्वांसः मोक्षं कथयन्ति इति भावः ॥६६१॥ ध्यातुर्ध्येयमाचष्टे—**मार्गसूत्रमिति**—मार्गो मोक्षमार्गः तस्य सूत्रं 'सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः' तत् ध्याता ध्यायेत् चिन्तयेत्। कथंभूतो ध्याता *आगम एव चक्षुरस्ति यस्य स आगमचक्षुष्मान् स्याद्वादागमलोचनः।* पुनः कथंभूतः। **प्रसंख्येति**—प्रसंख्यानम् एकाग्रचिन्तानिरोधो ध्यानं तत्र परायणः प्रणिधानपरः। किं किं ध्यायेत्। अनुप्रेक्षाः शरीरादीनां स्वभावानुचिन्तनम्। सप्ततत्त्वं जीवाजीवास्रवबन्धसंवरनिर्जरामोक्षाश्चेति सप्ततत्त्वानि तेषां समाहारम्। जिनेश्वरं प्रक्षीणसकलघातिकर्माणं तीर्थकरदेवम् च। ध्यायेत् चिन्तयेत् ॥६६२॥ **जाने इति**—यथा ऐतिह्यं तत्त्वम्। इति इह भवम् ऐतिह्यम् आप्तोपदेशः जिनागमः। तत्त्वं जीवादिकं यथा जाने वेद्मि तथा तदनन्यधीः तस्मिन् *अनन्या धीः यस्य सः आगमे एव मतिं कृत्वेत्यर्थः। अहं श्रद्दधे अन्यस्मिन् मिथ्यागमे न कदाचनापि मम मतिः* प्रवर्तेत। अहं सर्वम् आरम्भं मुञ्चे प्राणिपीडाहेतुव्यापार आरम्भः तं त्यजामि। तथा आत्मनि ज्ञानदर्शनलक्षणे निजात्मनि आत्मानं स्वम् आदधे स्थापयामि स्थिरीकुर्वे। न बाह्ये वस्तुनि ॥६६३॥ **आत्मायमिति**—अयम् आत्मा बोधिसंपत्तेः रत्नत्रयनिधेः सकाशात्। यदा आत्मना स्वेनैव करणेन श्रुतज्ञानेन। आत्मनि निजे स्वरूपे निश्चलो भवति तदा आत्मानं ज्ञानदर्शनलक्षणं शुद्धम् बाह्यसंयोगरहितं सूते जनयति। तदा परमात्मना *परमः आत्मा परमात्मा* सकलमोहक्षयात् केवलज्ञानलाभाच्च नितरां शुद्धत्वं प्राप्तः आत्मा परमात्मा तस्य स्वरूपेण स आत्मानं लभते। यथा वर्तिः दीपं प्राप्य दीपो जायते तथा श्रुतज्ञानेन जीवतत्त्वे एकाग्रीभूय चिरन्तनाभ्यासेन आत्मानं जीवो लभते ॥६६४॥ स्वस्वरूपचिन्तने आत्मैव ध्यातृध्यानध्येयध्यानफलरूपो भवतीति दर्शयति—ध्यातेति—आत्मैव ध्याता भवति। यथा युक्तिपरिग्रहः प्रमाणनयात्मिका युक्तिः,

तस्याः परिग्रहः युक्तिपरिग्रहः यथार्थत्वेन सम्यक्तया प्रमाणनयानाम् आश्रयं कृत्वा निजस्वरूपम् आत्मा चिन्तयति तदा स ध्यातोच्यते। रत्नत्रयं ध्येयं भवति। आत्मैव आत्मानं चिन्तयति निजेनैव स्वरूपेण निजं रूपं चिन्तयति। अतो ध्यानमप्यात्मैव। रत्नत्रयं तस्य चिन्तनात्प्राप्यतेऽस्तस्तदेव आत्मनोऽनन्यं फलम्। अत्र रत्नत्रयम् आत्मनः सकाशात् अभिन्नम्। अतः रत्नत्रयवान् आत्मा रत्नत्रयमेवोक्तः ॥६६५॥ **सुखामृतेति**—आत्मनः निजस्वरूपे एव रतिः सुखामृतम् उच्यते। तस्योत्पत्तेः आत्मा कारणम्। अतः सुधोत्पत्तिर्यथा सुधासूतेश्चन्द्राज्जायते तथा सुखामृतोत्पत्तेः कारणं आत्मैव न स्त्रीस्रक्चन्दनादिवस्तूनि। अयमात्मैव निजानन्दरवेः उदयाचलः। परम् अहं ब्रह्मापि अत्र अस्मिन् संसारे तमःपाशवशीकृतः तमोऽज्ञानं तत् पाश इव पाशः। यथा पाशेन कण्ठो निरुध्यते तथाऽज्ञानपाशेनायमात्मा निरुद्धत्वादचेतन इव स्वस्वरूपज्ञानमूढो भवति ॥६६६॥ **यदेति**—यदा काललब्धिमासाद्य पञ्चेन्द्रियसंज्ञिपर्याप्तिकत्वपर्यायं प्राप्य सर्वविशुद्ध्या सम्यक्त्वं चारित्रं च लभते ममात्मा तदा तद्ध्यानोदयगोचरं मे चेतश्चकास्ति। तस्य निजस्वरूपस्य ध्यानं चिन्तनं तस्य उदयः उत्पत्तिः सः गोचरो विषयो यस्य तथाभूतं चेतः चकास्ति प्रकाशते। तदा आदित्यः सूर्यः अन्धकारं निरस्य अतमाः ध्वान्तरहितः जगतां चक्षुर्भवति। लोकं निजतेजसा प्रकाशयति। तथा अहमपि अतमाः तमः मिथ्याज्ञानं तेन रहितो भूत्वा आदित्यवत् प्रकाशमयो ज्ञानमयो भूत्वा जगतां त्रिलोकानां चक्षुः स्याम् यथार्थवस्तुस्वरूपदर्शको भवेयम् ॥६६७॥ इन्द्रियजसुखस्वरूपं दर्शयति निदर्शनेन—**आदाविति**—सर्वम् इन्द्रियसुखं पञ्चेन्द्रियविषयसुखम्। आदौ प्रारम्भे। मधुवन्मकरन्दवत् प्रतिभाति। परं प्रान्ते अवसाने तदेव अमधु कटुकम् अप्रियं जायते। यथा हेमन्ते शीततौं प्रातःस्नायिषु प्रभातकाले स्नानं कुर्वत्सु अङ्गिषु नरेषु तोयम् उष्णमिवाभाति। परं सूर्योदयानन्तरं तदेव नीरं तथा नानुभूयते ॥६६८॥ सर्वेऽपि यमेन कवलीक्रियन्ते जीवाः। **यो दुरामयेति**—यः दुरामयदुर्दर्शे यः यमः दुष्टेन रोगेण पीडयमानत्वात् दुर्दर्शः दुष्टः कुरूपः दर्शः दर्शनं यस्य, रोगेण कुरूपाकारः जुगुप्स्याकारः यो नरः तस्मिन्। यः बद्धग्रासः तं नरं यः ग्रासीकरोति। तस्य यमस्य। स्वभावसुभगे प्रकृतिसुन्दरे नरे। स्पृहा अभिलाषा। केन निवार्यते। न केनापि ॥६६९॥

[ पृष्ठ २६९-२७० ] **जन्मेति**—जन्म जननम् यौवनं तारुण्यम्, संयोगसुखानि इष्टजनसहवाससुखानि। यदि देहिनां प्राणिनाम्। निर्विपक्षाणि निर्गतो विपक्षः शत्रुर्येभ्यस्तानि यदि भवेयुः। तदा को नाम सुधीर्मतिमान्नरः संसारमुत्सृजेत् भवं त्यजेत्। गृहीत्वा दीक्षां को नाम जनः तपःक्लेशं सहेत। जन्मनः शत्रुर्मरणम्। यौवनस्य शत्रुर्जरा। संयोगसुखस्य शत्रुः इष्टवियोगदुःखम् ॥६७०॥ **अनुयाचेतेति** – आयूंषि न अनुयाचेत आयुर्वृद्धये न स्पृहयेत्। नापि मृत्युम् उपाहरेत् मृत्युर्मे भूयादिति नाभिलषेत्। कालावधि कालस्य मर्यादाम् अविस्मरन् चिन्तयन् भृतः भृत्य इव द्रव्यक्रीतो दास इव आसीत्। यथा भृत्यः स्वामिनं यावत्कालं तेन न मुच्यते तावत्कालं तं सेवते तथा आयुःसमाप्तिर्यावन्न भवेत्तावत्कालं स्वस्थेन चेतसा आसीत ॥६७१॥ **महाभाग इति** – अहम् अद्य महाभागः महाभाग्यवान्। अस्मि भवामि। यत् यस्मात्कारणात् तत्त्वरुचितेजसा जीवादिसप्ततत्त्वानां रुचिः जिनदेवेन यत्सप्ततत्त्वानां स्वरूपं प्रत्यपादि तत्र न दोषकणिकापीति विमर्शात्संजातहर्षेण नखच्छोटिकादानं तदेव तेजः तेन। अहं सुविशुद्धान्तरात्मा अतीव निर्मलान्तरात्मा जातः। मम प्राक्तनं बहिरात्मस्वरूपं यदन्धकारसदृशमासीत्तन्नष्टम्। अधुनाहं तमःपारे प्रतिष्ठित आसे। सम्प्रत्यहं मिथ्याश्रद्धानतमः उल्लङ्घ्य स्वस्वरूपे श्रद्धानरूपे स्थिरो जातः स्वैरं वर्ते ॥६७२॥ जैनागमसुधाया दुर्लभत्वमाह – **तन्नास्तीति** – लोके जगति। अहं यत् सुखं दुःखं च नाप्तवान् न लब्धवान् तन्नास्ति। चतुर्गतिभवानि सर्वाणि सुखानि दुःखानि च मया अनन्तवारं भुक्तानि। परं मया स्वप्नेऽपि जैनागमसुधारसः न प्राप्तः। जागरितावस्थायां जिनप्रोक्तस्य आगमपीयूषस्य आस्वादः दूर एव आसीत् ॥६७३॥ जैनागमसुधाबिन्दुमप्यालिहतो जनस्य संसारज्वलनशान्तिर्भवतीति वदति – **सम्यगिति** – एतत्सुधाम्भोधेः एष चासौ सुधाम्भोधिः एतत्सुधाम्भोधिः तस्य एतस्य जिनागमपीयूषसागरस्य। बिन्दुमपि मुहुः पुनः पुनः आलिहन् आस्वादयन् जन्तुः। जातु कदाचिदपि। जन्म एव ज्वलनोऽग्निः तस्य भाजनं पात्रं न जायेत। तस्य जीवस्य संसाराङ्गारस्पर्शः कदाचनापि न भवेत् ॥६७४॥ अधुना अर्हतः स्वरूपं पञ्चदशभिः श्लोकैर्व्यावर्णयति सूरिः। तत्स्वरूप-

ज्ञानेन तद्ध्यानं कर्तुं शुशकं भवेत् यतः – देवं देवसभासीनमिति – ध्यायेदिति पञ्चदशतमपद्यस्थित-क्रियया संबन्धः । कथंभूतम् अर्हन्तं ध्यायेत् । देवमिति – दीव्यते स्तूयते इन्द्रादिभिरिति देवः तम् । पुनः कथंभूतं देवसभासीनम् – देवैर्निर्मितायां समवसरणसंसदि समासीनं रत्नजटिततुङ्गसिंहासने पद्मोपरि उपविष्टम् । पुनः कथंभूतम् पञ्चकल्याणनायकम् – पञ्चानां गर्भजन्मतपःकेवलनिर्वाणलक्षणानां कल्याणानां मङ्गलानां देवैरवतीर्य विहितानाम् उत्सवानां नायकम् अधीशम् । पुनः कथंभूतम् चतुस्त्रिंशद्गुणोपेतम् – अर्हतः शरीरे जन्मसमये दशातिशयाः संजायन्ते । केवलज्ञाने जाते दशातिशया भवन्ति । देवकृताश्च चतुर्दशातिशयाः संभवन्ति अतोऽर्हन् भवति चतुस्त्रिंशद्गुणोपेतः तम् । पुनः कथंभूतम् । प्रातिहार्योपशोभितम् – अशोकवृक्षाद्यष्टप्राति-हार्याणि तैरुपशोभितमलंकृतम् ॥६७५॥ निरञ्जनम् – अञ्जनं कज्जलं तद्यथा वस्त्रादिकं मलिनं करोति तथा घातिकर्माञ्जनमात्मनो ज्ञानादिगुणान्मलिनीकरोति अतः तन्निर्गतं यस्मात्सोऽर्हन्निरञ्जनः तम् । पुनः कथंभूतम् परमम् उत्तमम्, सर्वलोकेषु श्रेष्ठम् । रमयाश्रितम् – अनन्तज्ञानादिचतुष्टयरूपया लक्ष्म्यावलम्बितम् । पुनः कथंभूतम् अच्युतम् न च्यवते स्म स्वस्वरूपात् अच्युतः परमात्मनिष्ठः तम् । च्युतदोषौघं च्युतो गलितः दोषाणाम् ओघः समूहो यस्मात् यस्य वा तं क्षुत्पिपासाद्यष्टादशदोषरहितम् । अभवम् न भवः जन्ममरणादि-लक्षणः यस्य तम् । भवभृद्गुरुम् भवं संसारं बिभ्रति इति भवभृतः तेषां गुरुः तम् – संसारिणां भव्यानां मोक्ष-मार्गोपदेशकत्वात् भवभृद्गुरुस्तम् । पुनः कथंभूतम् । सर्वसंस्तुत्यम् सर्वैः नरैर्दानवैर्देवैः पशुभिश्च स्तोतुं योग्यं सर्वसंस्तुत्यम् । पुनः कथंभूतम् । अस्तुत्यम् न स्तुत्यो यस्य कोऽपि, अर्हतः सर्वश्रेष्ठत्वात् गुणैर्ज्येष्ठत्वात् च । पुनः कथंभूतं सर्वेश्वरम्, अनीश्वरम् सर्वेषां त्रिभुवनपतीनाम् इन्द्रधरणेन्द्रचक्रवर्तिनाम् ईश्वरः स्वामी तम् । अनीश्वरम् न ईश्वरो यस्मात् अन्यः स अनीश्वरः अर्हतः कोऽपि प्रभुर्न वर्तते स सर्वेषामेव प्रभुः । सर्वाराध्यम् सर्वैः इन्द्रादिभिः गुणप्राप्त्यर्थमाराध्यं पूज्यम् । अनाराध्यम् नान्य आराध्यो यस्य सः तम् स्वयमेव निजात्मानम् आराध्यार्हन् स्वयंभूर्जातः इति भावः । पुनः कथंभूतम् सर्वाश्रयम् सर्वेषां भव्यानाम् आश्रयभूतमवलम्बभूतम् । अनाश्रयम् निरालम्बम् । सर्वेभ्यो गुरुत्वात् अनाश्रयम् ॥६७६-६७७॥ प्रभवमिति – सर्वविद्यानां प्रभवम् सकलद्वादशाङ्गानां भावरूपाणाम् उत्पत्तिस्थानम् । सर्वलोक-पितामहम् । सर्वेषां त्रिभुवनवर्तिनां लोकानां जीवानां पितामहः । गणधरदेवादयः सर्वलोकानां पितरः तेषामपि जिनेश्वरः पिता अतः अस्मदादीनां भक्तानां स पितामहः तम् । पुनः कथंभूतम् । सर्वेति – सर्वेषां सत्त्वानां प्राणिनां यत् हितकरं रत्नत्रयं तदर्थम् आरम्भः उपदेशो यस्य सः तम् । पुनः कथंभूतम् । गतसर्व गतेन ज्ञानेन व्याप्तवान् सर्वाणि वस्तूनि यः स गतसर्वः सर्वज्ञः इति भावः । पुनः कथंभूतम् । असर्वगम् सर्वगो व्यापकः सर्वाणि वस्तूनि गच्छतीति सर्वगः न सर्वगः असर्वगः अव्यापकः देहमात्रपरिमाणः । स्वदेहे एव सर्वेषां जनानां सुखदुःखानुभवोऽत आत्मा स्वदेहपरिमाणः । नैयायिकवैशेषिकाणां मते आत्मनो व्यापकत्वं प्रतिपादितं परं तत्तथा न । व्यापकत्वे आत्मनस्तच्छरीरेणापि व्यापकेन भाव्यम् । "स्वाङ्ग एव स्वसंवित्या स्वात्मा ज्ञानसुखादिमान् । यतः संवेद्यते सर्वैः स्वदेहप्रमितिस्तथा" इत्यनेन प्रमाणेन तस्य स्वदेहपरिमाणत्वं सिद्धं भवेत् ॥६७८॥ नम्रामरेति—नम्राश्च ते अमराश्च देवास्तेषां किरीटानि मुकुटाः तेभ्यो निर्गता ये अंशवः किरणास्तेषां परिवेषा मण्डलानि तैर्युक्ते नभस्तले आकाशतले । भवदिति—भवतः पूज्यस्य पादयोर्द्वयं युगलं तस्य द्योतिनः कान्तिमन्तो ये नखाः त एव नक्षत्रमण्डलम् । कथंभूतं तत् स्तूयमानं स्तुतिविषयीक्रियमाणम् । कैः अनूचानैः श्रुतज्ञाननिपुणैः । पुनः कथंभूतैः ब्रह्मोद्यैः ब्रह्म मुक्तिः उद्यं वचनविषयं येषां ते ब्रह्मोद्यास्तैः मुक्तिपदं वर्णयद्भिः । ब्रह्मकामिभिः ब्रह्म शुद्धात्मरूपं तस्मिन्कामो वाञ्छा येषां ते ब्रह्मकामिनः तैः । पुनः किंभूतैः । अध्यात्मेति—आत्मनि अधिकृतश्चासौ आगमः अध्यात्मागमः जीवस्वरूपप्रतिपादकं शास्त्रम् तस्मिन् वेधोभिः ब्रह्मभिः तच्छास्त्रनैपुण्यवद्भिः महर्द्धिभिः बुद्धिविक्रियादिलब्धिमद्भिः योगिमुख्यैः ध्यानिवर्यमुनिभिः स्तूयमानम् अर्हन्तं ध्यायेदिति संबन्धो ज्ञेयः ॥६७९-६८०॥ नीरूपमिति—कथंभूतमर्हन्तं ध्यायेदित्याह – नीरूपं निर्गतो रूपात् इति नीरूपः तम् शुक्लादिवर्णरहितम् तथापि रूपिताशेषम् रूपितं ज्ञातम् अवलोकितं सकलवस्तुकदम्बकं येन स रूपिताशेषस्तम् । अशब्दं शब्दरहितं शब्दस्तु पुद्गलपर्यायः स अर्हति न विद्यते । तथापि शब्दनिष्ठितं

शब्देन आगमेन निष्ठितः निर्णीतः तं शब्दनिष्ठितम् । पुनः कथंभूतम् । अस्पर्शं योगसंस्पर्शम् । स्पर्शैः अष्टविधैः शीतोष्णादिभिः रहितम् । योगः धर्म्यशुक्लध्याने तयोः सं सम्यक् स्पर्शो यस्य सः तम् । अरसं रसरहितं पुनः सरसागमम् । सरसः सकलषड्द्रव्याणां रसः स्वभावः तेन सहितः तद्द्रव्यस्वरूपज्ञापकः आगमो यस्य सः तम् । अथवा सरसो भव्यजनमनोमोदकः आगमो यस्य सः तम् ॥६८१॥ गुणैरिति—अनन्तज्ञानादिभिः गुणैः सुरभितः सुगन्धितः आत्मा यस्य सः तं गुणैः सुरभितात्मानम् । दोषदुर्गन्धकणिकयापि रहितम् अर्हन्तं ध्यायेदिति भावः । अगन्धगुणसंगमम् गन्धगुणस्य संगमेन रहितम् । गन्धो गुणः पुद्गले वर्तते सोऽर्हति नास्तीति भावः । व्यतीतेति—व्यतीतः विशेषेण अतीतः अपगतः इन्द्रियाणां संबन्धो यस्मात् । भगवान् केवलज्ञानी यदा जातस्ततः प्रभृति तस्य मतिज्ञानावरणक्षयोपशमजातैः स्पर्शनादीन्द्रियैः संबन्धो नष्टः । भावेन्द्रियसंबन्धापगमो जातो भगवतः । नामकर्मोदयोत्पन्नैर्द्रव्येन्द्रियसंबन्धस्तस्य अघातिकर्मणां सत्त्वाद्विद्यते । पुनः कथंभूतं तं ध्यायेत् इन्द्रियार्थावभासकम् इन्द्रियाणां पञ्चेन्द्रियाणाम् अर्थाः विषयभूता ज्ञेयपदार्थाः तान् अवभासयति जानातीति अवभासकः तम् ॥६८२॥ अर्हतः अष्टमूर्तिमत्त्वं व्याख्याति—भुवमिति—आनन्दाः अनन्तसुखानि एव सस्यानि धान्यानि तेषां भुवं भूमिरूपम् । पुनः कथंभूतम् । तृष्णा आशा एव अनलार्चिषः अग्निज्वालाः तद्विध्यापने अम्भः पानीयरूपमर्हन्तम् दोषरेणूनां क्षुत्पिपासादयो दोषा एव रेणवः धूलयः तेषाम् उड्डायने पवनरूपम् । एनोऽवनी-रुहाम् अग्निम्—एनांसि पापानि तान्येव अवनीरुहाः वृक्षास्तेषां दहने अग्निरूपम् । यजमानं सदर्थानां सन्तः अनेकान्ताः कथंचिन्नित्यानित्यादयो ये जीवादिपदार्थाः तेषां यजमानं भव्येभ्यो दातारम् । व्योम अलेपाद्धि सम्पदाम् हि यतः सम्पदां समवसरणादिविभूतीनां प्राप्तावपि अलेपात् अनुरक्त्यभावात् व्योमरूपम् आकाशरूपम् अर्हन्तं ध्यायेत् । भानुमिति—भव्यारविन्दानां भव्यकमलानाम् विकासपटुत्वात् आनन्ददायकत्वात् भानुं रविरूपम् । चन्द्रमिति—मोक्षामृतश्रियाम् मोक्ष एवामृतं सुधा तस्य श्रियः कान्तयः तासां चन्द्ररूपम् इत्यर्हतोऽष्टमूर्तिरूपं प्रतिपादितम् ॥६८३-६८४॥

[ पृष्ठ २७१-२७२ ] अतावकगुणमिति—सर्वं सकलं वस्तुजातं अतावकगुणम् तव इमे ताव-कास्त्वदीयास्ते च गुणास्तावकगुणाः ते यस्मिन् न सन्ति तथाभूतं सर्वं विद्यते वस्तुजातम् । सर्वज्ञत्वादिगुणा भवत्येव सन्ति अतो भवद्व्यतिरिक्ताः सर्वे हरिहरादयोऽतावकगुणाः इति भावः । त्वं तु सर्वगुणभाजनः सकलघातिकर्मविलयात्त्वं भवान् सकलानन्तबोधादिगुणानां पात्रभूतः । त्वं सृष्टिः उत्पत्तिरूपः केषां सर्वकामानाम् सर्वासाम् इच्छानां त्वं पूरकः । त्वं भव्यमनोरथपूरणसमर्थः । तथापि कामसृष्टिनिमीलनः कामस्य स्मरस्य अशुभमनोवाक्कायव्यापाररूपस्य निमीलनः विध्वंसकः ॥६८५॥ खसुप्तदीपनिर्वाणे इति—अप्राकृते अलौकिके खसुप्तदीपनिर्वाणे-खनिर्वाणं नैयायिकानाम् । बुद्धिसुखादीनां नवानाम् आत्मगुणानाम् अत्यन्त-मुच्छेदात् जीवो मुक्तो भवति इति मतम् । सुप्तनिर्वाणं सांख्यानाम् । यतस्ते मुक्तौ जीवस्य प्राकृतिकज्ञाननाशं मन्यन्ते । दीपनिर्वाणं बौद्धानाम् यतस्ते आत्मा दीप इव तैलक्षयात् सर्वथा विनाशं यातीति मन्यन्ते । हे जिन, त्वयि अप्राकृते अलौकिके त्वयि । जिने आकाशवत् रागद्वेषमोहाभावात् शून्यत्वम् । योगनिद्रायां सुप्तत्वम् । दीपवत्केवलज्ञानेन द्योतकत्वं विद्यते । अतः नैयायिकसांख्यबौद्धरूपं जगत्त्रयं प्राकृतं रत्नत्रयस्वरूपहीनं वर्तते स्फुटम् ॥६८६॥ त्रयीमार्गमिति—त्रयी सम्यग्दर्शनज्ञानचारित्राणां त्रयमेव त्रयीत्युच्यते । तस्यास्त्रय्याः भवान् प्रापकत्वात् त्रयीमार्गः तं त्रयीमार्गम् । त्रयीरूपं सम्यग्दर्शनादित्रयी एव भवतः स्वरूपं ततोऽनन्यत्वात् अग्नेरुष्णतावत् । त्रयीमुक्तम्, मिथ्यादर्शनम्, मिथ्याज्ञानम्, मिथ्याचारित्रम् एतेषां त्रयी तस्या मुक्तं रहितम् । त्रयीपतिं लोकत्रयीस्वामिनम् रत्नत्रयपतिं वा । त्रयीव्याप्तम्—त्रय्यां लोकत्रितये व्याप्तम् । केन व्याप्तम् ज्ञानेन । त्रयीतत्त्वम् रत्नत्रयं त्रयीत्युच्यते । तदेव तत्त्वं स्वरूपं यस्य तथाभूतं त्रयीतत्त्वम् । त्रयीति—त्रयी लोकत्रयम् तत्र चूडामणिवत् स्थितम् जिनं ध्यायेत् ॥६८७॥ जगतामिति—जगतां त्रिलोकानां कौमुदीचन्द्रम् ज्योत्स्नोत्पादकं चन्द्रमिव । कामेति त्रिलोकानां या अभिलाषाः तत्पूरणाय कल्पावनीरुहम् कल्पयति कामान् सम्पादयति इति कल्पः स चासौ अवनीरुहश्च वृक्षः तम् । गुणेति—गुणाः ज्ञानादयः त एव चिन्तामणयः चिन्तितफलदायका मणयः तेषां क्षेत्रम् उत्पत्तिस्थानम् । अर्हन्तं ध्यायेत् । पुनः कथंभूतम् । कल्याणेति—

कल्याणानाम् आगमनं तस्य आकरम् उत्पत्तिस्थानम् ॥६८८॥ प्रणिधानेति—प्रणिधानानि चित्तस्य एकाग्रता करणानि तान्येव प्रदीपाः तेषु साक्षादिव प्रत्यक्षमिव चकासतं प्रकाशमानम् । जगत्त्रयार्चार्हं लोकत्रयपूजनयोग्यम् । सर्वतोमुखम्—विश्वतश्चतुर्दिक्षु मुखं वक्त्रं यस्येति विश्वतोमुखः केवलज्ञानवन्तं स्वामिनं सर्वेऽपि जीवा निजनिजसम्मुखं भगवन्तं पश्यन्तीति भावस्तस्य तादृशनिर्मलत्वात् । अथवा विश्वतोमुखं खलु जलमुच्यते तत्स्वभावत्वात्, अमितजन्मपातकप्रक्षालकत्वात् । विषयसुखतृष्णानिवारकत्वात्, प्रसन्नभावत्वाच्च भगवानपि विश्वतोमुख उच्यते । अथवा विश्वं संसारं तस्यति नाशयति निराकरोति मुखं यस्येति विश्वतोमुखः । भगवन्मुखदर्शनेन जीवः पुनः संभवे न संभवेत् । अथवा विश्वतः सर्वाङ्गेषु मुखं यस्येति विश्वतोमुखः तम् । पुनः कथंभूतम् अर्हन्तम् इन्द्रादिकृतामनन्यसंभाविनीम् अर्हणामर्हति योग्यो भवतीति अर्हन् । अथवा अकारशब्देन अरिर्लभ्यते स एव मोहनीयः । रकारेण रजो रहस्यं च लभ्यते किं तत् रजः ज्ञानावरणं दर्शनावरणं च द्वयमेतत् रज उच्यते । रहस्यशब्देन अन्तरायकर्मोच्यते, एतच्चतुष्टयं च घातिकर्मचतुष्टयं कथ्यते । तद्धत्वा अर्हणामर्हतीति अर्हन् तम् अर्हन्तं ध्यायेत् चिन्तयेन्मनसेति ॥६८९॥ आहुरिति—तस्मात् भगवतो जिनेश्वरात् परं ब्रह्म परमात्मपदं करे अयत्नाप्यं विना प्रयत्नं लभ्यमित्याहुर्गणधरदेवादयः । तस्मादेव अर्हतः ऐन्द्रं पदम् इन्द्रसंबन्धि सकलदेवाधिपत्यं करे अयत्नलभ्यमाहुः । तथा तस्मात् एव भगवत इमा इहलोकसंबन्धिन्यः चक्राङ्काः सुदर्शनचक्रचिह्नाः सकलचक्रिपतिपालिताः क्षितिपश्रियः भूमिपतिलक्ष्म्यः अयत्नलभ्याः सन्ति ॥६९०॥ यं यमिति—अस्मयमत्सराः स्मयश्च मत्सरश्च स्मयमत्सरौ गर्वान्यशुभद्वेषौ तौ येषां न ते अस्मयमत्सराः अगर्वा अन्यशुभस्निग्धाश्च भव्याः अध्यात्ममार्गेषु यं यं भावम् अभिप्रायं तत्पदाय अन्तः मनसि दधति बिभ्रति, अर्हत्पदप्राप्तये स स भावस्तत्रैव लीयते तस्मिन्नेव पदे लीनो जायते । स स भावः प्रकर्षं प्राप्य अर्हत्पदप्राप्तिकारणं भवति । एतदेव सोदाहरणं विवृणोति ॥६९१॥ अनुपायेति—पुंस्तरूणां पुमांसः भव्याः त एव तरवो वृक्षास्तेषां मनोदलं मनश्चित्तमेव दलं पत्रं तत् अनुपायानिलोद्भ्रान्तम् अनुपायाः मोक्षप्राप्तेरमार्गाः मिथ्यादर्शनादयस्त एव अनिलास्तैरुद्भ्रान्तम् । परं यदा ते अनिलाः शाम्यन्ति, तदा चिरादपि दीर्घात्कालादपि भूमावेव लीयमानं भज्येत । यथा तरोर्दलं वा तेनोपरि नीयते परं तस्योपशमे तत्पुनरध आगत्य भूमिमाश्रयति तथा भव्यमनोदलं पुनः अर्हत्स्वरूपां भूमिमाश्रयति । ज्योतिरेकमिति—इदं परमात्मज्योतिः । एकम् अद्वितीयम् । इदं पुद्गलधर्माधर्माकाशकालेषु नोपलभ्यते । परम् अस्य परमात्मनः वेदः । करीषेति—करीषं शुष्कगोमयम् । अश्मा पाषाणः समित् शुष्कतृणकाष्ठादिः तैः समः तुल्यः अयं परमात्मा स्वस्मिन्नेवोपलभ्यः ; परं तत्प्राप्तेः परमात्मनः प्राप्तेः तथा अग्निप्राप्तेश्च उपायज्ञानाभावात् दिङ्मूढाः पथिका इव जीवाः भवकानने संसारारण्ये । भ्रमन्ति विचरन्ति । गोमयेऽग्निः शीघ्रं प्रकटो न स्यात् तथा स्त्रीषु परमात्मा पारम्पर्येण प्रकटो भवति । पाषाणे अग्निः शीघ्रं प्रकटो भवति तथा पुंसि आत्मा तस्मिन्नेव भवे प्रकटो भवेत् परमात्मदशां प्राप्तुम् अर्हो भवेत् । नपुंसके च स्त्रीवत् ॥६९२–६९३॥ परापरेति—पराः श्रेष्ठा गणधरादयः । अपरा गृहस्थाः तेषु परं श्रेष्ठम् । एवम् उपर्युक्तप्रकारेण चिन्तयतो मनसि स्मरतो यतेः । ते ते भावाः लोकोत्तरश्रियः जगदुत्कृष्टसम्पद्भिः युक्ताः । अतीन्द्रियाः अतिक्रान्तेन्द्रियविषयाः भवन्ति । परात्मनः स्मरणात् सामान्यजनदुर्लभाः अवधिज्ञानाद्यतिशयविशेषा लभ्यन्ते । पराः अनगारकेवलिनः तेभ्यः परा उत्कृष्टाः गणधराः तेभ्यः परो जिनः इति । जिनेश्वरात् न कोऽपि श्रेष्ठः ॥६९४॥ व्योमेति—यथा व्योमाकाशं स्वयम् अमूर्तमपि छायानरेति—छाया प्रतिबिम्बं तेन युक्तो नरः तस्य उत्सङ्गं संबद्धं भवति । तथा अयम् आत्मा योगयोगात् ध्यानयोगात् प्रत्यक्षं वीक्षणम् अनुभवो यस्य तथा भवति । किल कश्चिन्निमित्ती मनुष्यः स्वशरीरच्छायालोकनं करोति । छायालोकनाभ्यासवशात् वियति छायां विनापि स तां वीक्षते एवं ध्यानाभ्यासात् आत्मा ध्यात्रा दृश्यते ॥६९५॥

[ पृष्ठ २७३–२८० ] न ते गुणेति—यत् यस्मात्कारणात् योगस्य ध्यानस्य द्योतनेन प्रकाशेन । अस्ततमश्च ये निरस्ता ज्ञानसमुच्चये येन स्युः प्रकटत्वं न प्राप्नुयुस्ते गुणाः नैव । यत् न जायते तज्ज्ञानं नैव या नोद्भवति सा दृष्टिर्नास्ति । यन्नोत्पद्यते तत्सुखमपि न । अस्यैदम्पर्यमेतत्—आत्मनि निरस्तकर्मणि सर्वे

गुणा:। सकलं ज्ञानम्। सकलं दर्शनम्। सकलं सुखं च उत्पद्यन्ते ॥६९६॥ **देवम् इति**—जगत्त्रयीनेत्रं सकललोकलोचनम्, देवं जिनेशम्, तथा व्यन्तराश्च देवता: शासनदेवतादय: पूजाविधानेषु पूजाभिषेकादौ समं समानमानार्हं पश्यन् वीक्षमाण: अध: दूरं व्रजेत् अधोलोके दूरं नरकं गच्छेत् उत्पद्येत। व्यन्तरदेवताभि: तुल्यत्वम् अर्हतोऽस्तीति संकल्पेन महानविनयो भवति जिनेन्द्रस्य तत: पापलेपादधोगतिप्राप्ति: स्यादेव ॥६९७॥ **ता इति**—ता: शासनयक्षयक्षिण्य: गोमुखचक्रेश्वर्यादय:, क्षेत्रपाला: दिक्पालादयो देवता:। परमागमे शासनाधिरक्षार्थं जिनमतरक्षणाय कल्पिता: सूरिभि: मन्यन्ते स्म। अतो यज्ञांशदानेन पूजाशेषद्रव्यवितरणेन सुदृष्टिभि: सम्यग्दर्शनधारिभिर्भव्यै: माननीया: पूजनीया:। तथा संकल्पेन पूजिता: भव्यानां सम्यक्त्वहानये ता न भवन्ति। ता: जिनसदृशा: न माननीया: किन्तु जिनाधीना ज्ञातव्या: ॥६९८॥ **तच्छासनेति**—तस्य जिनेश्वरस्य शासने मते एका दृढा अद्वितीया भक्तिर्येषां तादृशां सुदृशां सम्यग्दर्शनवतां सुव्रतात्मनाम् अणुव्रतिनां ता: सपुरन्दरा: सौधर्मेन्द्रसहिता: स्वयमेव सन्तुष्टा भूत्वा प्रसीदन्ति प्रसन्ना भवन्ति ॥६९९॥ **तद्धर्मेति**—तद्धर्मे जिनप्रोक्ते धर्मे बद्धकक्षाणां दृढतरबुद्धीनाम्। रत्नत्रयधारणात् महीयसां श्रेष्ठतामापन्नानाम्। मनोरथै: मनोऽभिलषितै:। उभे द्यावाभूमी द्यौ: आकाशं भूमि: भूतलम् नभोभूतले। कामदुघे स्याताम्। इष्टदानसमर्थे कामधेनू भवेताम् ॥७००॥ वरोपलिप्सया चेतसो रिक्तत्वमाह—**कुर्यादिति**—जन: तपोऽनशनादिकं कुर्यात् विदधीत। मन्त्रान् जपेत्, देवता वा नमस्येत् नमस्कुर्यात्। यदि तच्चेत: तस्य मन: सस्पृहं वरोपलिप्सयाकुलं स्यात् स: सम्यग्दृष्टि: व्रतिको वा अमुत्र, परस्मिन् स्वर्गादौ इह च अस्मिल्लोके रिक्त: फलशून्यो भवेत् ॥७०१॥ ॐकारजप: करणीय इति निवेदयति—**ध्यायेत् इति**—गुरुपञ्चकवाचकम् अर्हत्सिद्धादिपरमेष्ठिनां पञ्चानां वाचकं प्रतिपादकम्। वाङ्मयं पञ्चनमस्कारमन्त्रं ध्यायेत् चिन्तयेत् एकाग्रीभूतमानस:। एतद्धि वाङ्मयं सर्वविद्यानां सकलविद्यानाम्। अधिष्ठानम् आधारभूतम्। अविनश्वरम् अविनाशि ज्योति:। अपूर्वम् चन्द्रसूर्यादिषु नोपलब्धं कदापि सकलपदार्थप्रकाशकम् ॥७०२॥ **ध्यायन्निति**—इदं पञ्चपरमेष्ठिवाचकम् ॐ इत्यक्षरम्। अस्मिन्देहे मन्दरमुद्रया मस्तकोपरि हस्तद्वयेन शिखराकार: कुड्मल: क्रियते स एव मन्दरो गिरि:। इति विन्यस्य स्थापयित्वा। ध्यायेत् चिन्तयेत्। सर्वनामादिवर्णार्हम् सर्वाणि यानि नामानि पञ्चपरमेष्ठिनाम्। तेषु आदिवर्णस्य अर्हं योग्यम्। वर्णाद्यन्तं सबीजकम् बीजाक्षरोपेतम्। पञ्चपदप्रथमाक्षरेण योग्यम् अर्हन् शब्दस्य 'अर्ह' इति गृह्यते। अशरीर 'अर' इति। सूरि 'अर्य' इति। अध्यापक 'अ' इति। मुनि 'म' इति। पश्चात् 'रूपे रूपं प्रविष्टम्' इति वचनात् अकाररकाराश्च लुप्यन्ते। तदनन्तरम् 'अर्ह' इत्यत्र उच्चारणार्थ: अकार: क्षिप्यते। 'मोऽनुस्वारं व्यञ्जने' अर्हम् इति तत्त्वं निष्पन्नम् ॥७०३॥ **तप:श्रुतेति**—तपसा श्रुतेन ज्ञानेन विहीनोऽपि। तद्ध्यानेति—तद्ध्यानेन आविद्धं व्याप्तं मानसं यस्य स: पुरुष:। तत्तत्त्वेति—तत्तत्त्वे 'ॐ अर्हम्' इत्यादिमन्त्रस्वरूपे तत्त्वे रुचि: श्रद्धानं तत्र दीप्रा धी: बुद्धि: यस्य स जन:। जातु कदाचनापि। तमसाम् अज्ञानानाम्। स्रष्टा उत्पादक: न भवति। स: अज्ञो न भवति। उपर्युक्तमन्त्रचिन्तनेन स ज्ञानी स्यात् ॥७०४॥ अस्यैव मन्त्रस्य समाधिमरणे चिन्तनं कार्यम्—**अधीत्येति**—सर्वशास्त्राणि आत्महितस्य कर्तॄणि अधीत्य पठित्वा। परम् उत्तमं तप: विधाय कृत्वा च। अन्ते मृतिसमये, अनन्यचेतस: अन्यस्मिन् अन्नादौ, शरीरे च मन: अकृत्वा। पञ्चपरमेष्ठिचरणेषु मन: स्थिरीकृत्य इमम् मन्त्रं स्मरन्ति ॥७०५॥ **मन्त्रोऽयमिति**—अयं मन्त्र: स्मृतिधाराभि: पञ्चपरमेष्ठिगुणस्मरणजलधाराभि:। यस्य मुनेराराधकस्य गृहिणो वा चित्तम् अभिवर्षति अभिषिञ्चति। तस्य सर्वे **क्षुद्रेति**—क्षुद्राश्च ते उपद्रवा: उपसर्गा: त एव पांसव: रजांसि प्रशाम्यन्ति नश्यन्ति। क्षुद्रदेवतिर्यग्भि: कृता: पीडा: अनेन मन्त्रेण नश्यन्तीत्यर्थ: ॥७०६॥ **अपवित्र इति**—जन्तु: अपवित्र: अपूताङ्ग: अशुचि:। पवित्रो वा स्नानादिभि: शुचिर्वा। सुस्थित: नीरोग:। दु:स्थितोऽपि वा सरोगोऽपि वा। या कापि भवत्ववस्था एतत्स्मृते: अस्य मन्त्रस्य स्मरणात्। सर्वसम्पदां सकलवैभवानाम् आस्पदं स्थानं भवति ॥७०७॥ **उक्तम् इति**—लोकोत्तरं ध्यानमुक्तम्। लौकिकं किञ्चित्स्तोकम् उच्यते। प्रकीर्णकप्रपञ्चेन इतस्तत: प्रतिपादितानां विषयाणाम् एकत्र प्रतिपादनं प्रकीर्णकम्। तस्य प्रपञ्चो विस्तरस्तेन। पुन: कथंभूतं तत् दृष्टादृष्टफलाश्रयम्—दृष्टफलम् आरोग्यम् धनादिलाभश्च। अदृष्टं फलं स्वर्गादिकम् तयो:

आश्रयं आधारं ध्यानम् उच्यते ॥७०८॥ पञ्चमूर्तिमयमिति—पञ्चमूर्तयः अर्हत्सिद्धाचार्योपाध्यायसाधव-श्चेति तैर्निर्वृत्तं पञ्चमूर्तिमयम्। बीजं ॐ इत्यादि बीजाक्षरम् नासिकाग्रे निधाय विचिन्तयन् जपन्। चेतः मनःसंगमे भ्रूमध्ये निधाय स्थापयित्वा दिव्यं ज्ञानम् अवाप्नुयात् लभेत ॥७०९॥ यत्र यत्रेति—यस्मिन् यस्मिन् हृषीके इन्द्रिये स्पर्शनादौ। अचलं मनः निदधीत। तत्र-तत्र अयं बाह्यग्राह्याश्रयं बाह्यैरिन्द्रियैर्ग्राह्यो यः आश्रयः आधारस्तज्जन्यं सुखं लभेत प्राप्नुयात्। इन्द्रियग्राह्या ये पदार्थाः तेभ्यः सुखं लभेताराधकः ॥७१०॥ स्थूलं सूक्ष्ममिति—स्थूलं सूक्ष्मं चेति ध्यानस्य भेदौ द्वौ। एकं स्थूलं तत्त्वाश्रयं द्वितीयं सूक्ष्मं बीजसमाश्रयं बीजाधारम्। आद्येन स्थूलेन कामम् अभिलषितं स्वर्गादिपदम्। द्वितीयेन परं पदं मुक्ति लभते ॥७११॥ पद्ममिति—पूर्वम् आदौ। पद्मं कमलम् उत्थापयेत् नाभौ स्वभावेन स्थितं कमलं चालयेत्। पश्चात् नालाकारेण नाडीं नालिकां संचालयेत्। नाड्या कृत्वा मरुतः हृदयं प्रापयेत्। पश्चात् मरुच्चतुष्टयं पृथ्वी-अप्-तेजो-वायुमण्डलानि नासिकामध्ये सूक्ष्माणि स्थितानि सन्ति। तानि चेतसि आत्मविषये। प्रचारयतु योजयतु॥ इति टिप्पणे ॥७१२॥ दीपहस्त इति—यथा दीपहस्तः करधृतदीपः कश्चिन्नरः किंचिद्वस्तु आलोक्य तं पदार्थम् आलोकनानन्तरं त्यजति। तथा ज्ञानेन ज्ञेयमालोक्य पश्चात्तज्ज्ञानमुत्सृजेत्। ज्ञानेन प्रथमं यः पदार्थो ज्ञातस्तं समुत्सृज्य अन्यं ज्ञेयम् आश्रयेत् ततस्तमपि पदार्थम् परित्यजेत् ॥७१३॥ सर्वपापास्रवे इति—सर्वेति सकलपापानाम् आस्रवे आगमने क्षीणे सति, ध्याने भावना भवति। ध्यानं कर्तव्यमिति विमर्शो मनसि स्फुरति। परं येषां बुद्धिः पापेन उपहता वर्तते तेषां मनसि ध्यानवार्तापि दुर्लभा भवति। यदा चारित्र-मोहनीयकर्मणां क्षयोपशमः संपद्यते तदा आत्मध्याने मनो लीनं भवति परं कषायाणाम् उत्कटता येषां हृदि जागर्ति तेषां ध्याने मनागपि मनो न लीयते ॥७१४॥ दधिभावगतमिति—क्षीरं दुग्धम् उत्तरपर्यायं दधिभावं प्राप्तं पुनः तन्निजावस्थां न याति। तथा तत्त्वज्ञानविशुद्धात्मा तत्त्वं जीवादिकं तस्य ज्ञानेन विशुद्धो निर्मल आत्मा यस्य स आराधकः ध्याता पुनः पापैर्न लिप्यते, तस्य ध्यातुः पापे बुद्धिर्न प्रवर्तते इति भावः ॥७१५॥ मन्दं मन्दमिति—ध्याता वायुं मन्दं मन्दं शनैः शनैः क्षिपेत् मुञ्चेत्। तथा मन्दं मन्दं विनि-क्षिपेत् आकर्षेत्। क्वचिद्वायुर्न धार्यते न रुध्यते। न च शीघ्रं प्रमुच्यते। शनैः शनैः वायुर्मोक्तव्यः। वायोश्चिरं निरोधाद्देहस्य मनसश्च स्वास्थ्यं विनश्येत्। शीघ्रं तद्विमुक्तेश्च चेतश्चाञ्चल्यं प्रजायेत ॥७१६॥ रूपमिति—योगिनः ध्यातुः गतिः स्वरूपं प्रभावो वा विचित्रा विस्मयोत्पादिका वर्तते। यतः ते विदूरतः स्थितं रूपं स्पर्शं रसं गन्धं शब्दं चैव आसन्नमिव समीपस्थमिव गृह्णन्ति जानन्तीत्यर्थः। निर्मले मनसि विमले दर्पण इव भावाः स्वस्वरूपं निदधतीति ज्ञेयम्। दग्धे बीजे इति—यथा बीजे अङ्कुरोत्पत्तिकारणे। अत्यन्तं दग्धे सति ततः अङ्कुरः न प्रादुर्भवति नोत्पद्यते। तथा कर्मबीजे मोहकर्मणि ज्ञानावृत्यादिकर्मकदम्बके प्ररोहण-कारणे दग्धे सति भवाङ्कुरः जन्माङ्कुरः न रोहति न जायते ॥७१७-७१८॥ नाभाविति—नाभौ तुन्दीकूपे। चेतसि हृदये। नासाग्रे नासिकाग्रे। दृष्टौ नेत्रे। भाले ललाटे। मूर्धनि शिरसि। च कायसरोवरे। ध्याता मनोहंसं विहारयेत् विचारयेत्। मन एव हंसः मनोहंसः तम्। एवं ध्यात्रा विहिते सति यत्र कुत्रापि मनसः एकाग्रता स्यात् ॥७१९॥ यायादिति—नरः व्योम्नि आकाशे। यायात् गच्छेत्। जले तिष्ठेत्। अनलाचिषि अग्निज्वालायां निषीदेत् उपविशेत्। मनोमरुत्प्रयोगेण मनसः स्थिरीकरणेन, मरुत्प्रयोगेण च प्राणायामेन च। शस्त्रैरपि न बाध्यते। शस्त्रप्रहारेण अवयवा न छिद्यन्ते। एवं जनमनोविस्मापकं सामर्थ्यं ध्यातरि प्राणायामध्यानात् उद्भवति ॥७२०॥ जीव इति—जीवः संसारी। शिवः मुक्तः। शिवः मुक्तः, जीवः संसारी अत्र कश्चन भेदः अस्ति किम् नास्ति। य एव जीवः संसारी स एव शिवः जीवत्वेन उभयोरपि अभेदात्। परम् एकः जीवः पाशबद्धः कर्माष्टकपीडितः वर्तते। अपरः पुनः शिवः पाशमुक्तोऽस्ति ॥७२१॥ आत्मनो ध्यानं कथं क्रियते। साकारमिति—सर्वं वस्तुजातं साकारम् आकारेण सहितं नश्वरं विनाश-शीलम्। अनाकारं यद्वस्तु तन्न द्रष्टुं शक्यम्। अतः पक्षद्वयविनिर्मुक्तं साकारतायुक्तं निराकारं च यस्य स्वरूपं न विद्यते स जीवः योगिभिः कथं ध्यायते उच्यतामिति प्रश्ने सूरिराह—अत्यन्तमिति—देहोऽत्यन्तं मलिनः सप्तधातुभूतत्वात्। परम् आत्मा तथा न। कीदृशस्तर्हि सः, पुमानात्मा अत्यन्तनिर्मलः सप्तधातूपेतत्वं

देहस्य स्वरूपं न तदात्मनः। स तु नितान्तं निर्मलः। एनम् आत्मानं देहाच्छरीरात्पृथक् कृत्वा विभिन्नं कृत्वा तस्मान्नित्यम् अविनाशिनं तं विचिन्तयेत् ध्यायेत् ॥७२२-७२३॥ **तोयमध्ये इति**—यथा तोयमध्ये जलमध्ये। तैलं पृथक् तिष्ठति। नीरक्षीरवत् अन्योन्यप्रदेशप्रवेशस्तयोर्न भवति। तथा अस्मिन् शरीरमध्ये पुमाञ्जीवः पृथक्तया आस्ते विद्यते ॥७२४॥

[ पृष्ठ २८१-२८४ ] **दध्नः सर्पिरिवेति**—यथा उपायेन मन्थनदण्डेन मथित्वा दध्नः सर्पिर्घृतं पृथक् क्रियते तथा तत्त्वज्ञैः जीवस्वरूपाभिज्ञैः चिरम् अनादिकालेन संसर्गवानपि नीरक्षीरमिव देहेन, आत्मा शरीरतः देहात् पृथक् क्रियते। केन ध्यानोपायेन ॥७२५॥ **पुष्पामोदाविति**—यथा पुष्पात् आमोदः गन्धः भिन्नः। यथा तरोश्छाया भिन्ना। तद्वत् देहदेहस्थौ ज्ञातव्यौ। देहजीवौ प्रतिपत्तव्यौ। देहः पुष्पसदृशः साकारः जीवस्तद्गन्धतुल्यः निराकारः। देहः तरुवत् जीवस्तच्छायेव। यद्वा तौ लपनबिम्बवत् देहः लपनवत् मुखवत्। आत्मा आदर्शगतमुखबिम्बवत्। यद्वत्सकलनिष्कले सकलः अर्हन् निष्कलः सिद्धः तत्र सकलनिष्कले ॥ ७२६ ॥ **एकस्तम्भमिति**—इदं शरीरं योगिनां गृहम् गेहमिव। यथा गृहं स्तम्भैः सहितं वर्तते तथा इदं योगिशरीरम्। एकस्तम्भम् एकः स्तम्भः यत्र तथाभूतम्। एकस्तम्भं जीवे चेतना लक्षणं तदेव लक्षणं स्तम्भभूतम्। गृहे द्वाराणि विद्यन्तेऽत्र नवद्वाराणि सन्ति, शरीरे नवछिद्राणि सन्ति। द्वे नेत्रे नासिकारन्ध्रद्वयम्। कर्णरन्ध्रयुगम्। मुखरन्ध्रम्। शिश्नरन्ध्रम्। गुदरन्ध्रमिति नवरन्ध्रं शरीरम्। एतानि रन्ध्राण्येव शरीरस्य द्वाराणि। पञ्च-पञ्चजनाश्रितम्—यथा गृहं पञ्चजना मनुष्यास्तैराश्रितम्। तथा योगिनां शरीरगृहमपि पञ्च इन्द्रियाण्येव पञ्चजनाः मनुष्याः तैराश्रितम्। यथा गृहम् अनेककक्षं बहुप्रकोष्ठकं विद्यते। तथा योगिनां शरीरमिदम् अनेककक्षं नाभिकमलादिनानावयवोपेतम् ॥७२७॥ **ध्यानामृतान्नेति**—योगिनां चित्तं योगबान्धवे योगो ध्यानं स एव तस्य बान्धवः आप्तजनस्तत्र तथाभूते शरीरे रमते संतुष्यति। कथंभूतस्य योगिनः। **ध्यानेति**-ध्यानमेव अमृतान्नं पीयूषान्नं तेन तृप्तस्य सौहित्यं प्राप्तस्य। पुनः कथम्भूतस्य। **क्षान्तीति**—क्षान्तिः क्षमा सैव योषित् जाया तस्यां रतस्य स्नेहं कृतवतः ॥७२८॥ **रज्जुभिरिति**—यथा रज्जुभिः प्रग्रहैः। कृष्यमाणः चोद्यमानः। हयोऽश्वः पारिप्लवश्चञ्चलः। स्याद्भवति। तथा इन्द्रियैः स्पर्शनादिभिः। कृष्टः प्रेरितः। आत्मा क्षणम् एकक्षणकालमपि ध्याने न लीयते लीनो निश्चलो न भवति। यो दुष्टाश्वः स्यात्स प्रेरितस्तिष्ठति खंचितश्चलति तथेन्द्रियैः खंचितः आत्मा चलति न तिष्ठति। अतः आत्मानं शनैः शनैः वशं करोतु ॥७२९॥ **रक्षामिति**—सकलीकरणविधिना स्वाङ्गरक्षणं विधाय। तथा संहरणम् औदारिकशरीरभस्मनः हरणं कृत्वा। वैक्रियिकशरीरं चोत्पाद्य। गोमुद्रामृतवर्षणम् सुरभिमुद्रयामृतवर्षणं च कृत्वा। स्वयम् आप्तरूपधरः आप्तोऽर्हन् तस्य रूपधरः परमौदारिकदेहस्थोऽहमिति भावयित्वा आप्तम् अर्हन्तं चिन्तयेत् सकलीकरणे पूर्वं यथा शरीररक्षा क्रियते। पश्चात् अग्नितत्त्वे दहनलक्षणं संहरणम्। चन्द्राद्वरुणमण्डलात् अमृतवर्षेण सृष्टि कृत्वा। स्वयम् आप्तरूपधरः आप्तम् अर्हन्तं चिन्तयेत् इति भावः। ( टिप्पणे ) ॥७३०॥ **धूमवत् इति**—धूमवत् पापं निर्वमेत् अघं परिक्षपयेत्। केन गुरुबीजेन। (झ्रं) कारेण। तेन कारणेन तद्वर्णेन अमृतवर्णेन पकारेण। मुहुः मुहुः वारंवारम् ॥७३१॥ पद्मवीरसुखासनवर्णनम्—**संन्यस्ताभ्यामिति**—संन्यस्ताभ्यां संस्थिताभ्याम् अधोङ्घ्रिभ्याम् अधश्चरणाभ्याम्, पद्मासनं भवति। ऊर्वोरुपरि सक्थ्नोरुपरि युक्तितः अङ्घ्रिभ्यां स्थापिताभ्यां वीरासनं भवति। तथा समगुल्फाभ्यां समघुटिकाभ्यां सुखासनं भवति। टिप्पण्यामिदम् सक्थ्नोरधः पादौ तदा पद्मासनम्, सक्थ्नोरुपरि तदा वीरासनं घूण्टौ उपरि घूण्टौ तदा पद्मासनम् ॥७३२॥ तत्र सुखासनस्येदं लक्षणम्—**गुल्फोत्तानेति**—गुल्फयोः घुटिकयोः उपरि उत्तानौ ऊर्ध्वतलौ यौ करौ हस्तौ तयोः अङ्गुष्ठे रेखाः रोम्णाम् आलिः पंक्तिः नासिका नासा च समदृष्टिः समाः कुर्युः विदध्युः। नातिस्तब्धो न अतिशयेन स्तब्धः स्थिरः। न वामनः नातिनम्रः ॥७३३॥ **तालेति**—तालस्य वितस्तेः त्रिभागस्त्र्यंशः तृतीयभागश्चतुरङ्गुलः तावत् मध्ये अन्तरम् अङ्घ्रयोश्चरणयोर्यस्य स तालत्रिभागमध्याङ्घ्रिः। पुनः कथंभूतः योगी। स्थिरेति—स्थिरे निश्चले शीर्षशिरोधरे मूर्धग्रीवे यस्य सः। पुनः कथंभूतः समनिष्पन्देति—पार्ष्ण्यग्रौ गुल्फयोः अधःप्रदेशाग्रौ। जानुनी ऊरुपर्वणी भ्रुवौ हस्तौ करौ लोचने नयने समानि निस्पन्दानि च निश्चलानि च पार्ष्ण्यग्रजानुभ्रूहस्तलोचनानि यस्य सः। एतादृशो

योगो ध्यानयोग्यः ॥७३४॥ ध्यानजं विधिमाह–नखेति–न नखकुन्तिः न नखानां कुन्तनं दन्तैः कार्यम्। न कण्डूतिः हस्तेन अङ्गखर्जनं नैव विधेयम्। न ओष्ठभक्तिः ओष्ठयोरनावृतता न विधेया। ओष्ठौ पिधाय ध्यानं विधेयम्। न कम्पतिः शरीरकम्पनं न कार्यम्। न पर्वगणितिः पर्वणां कराङ्गुलीनां ग्रन्थीनां गणितिः गणना न कार्या। नोक्तिः न भाषणं वक्तव्यम्। आन्दोलितिः स्मितिः शरीरस्य आन्दोलन स्मितं हास्यं च न विधेयम् ॥७३५॥ न कुर्यादिति–दूरं दृक्पातः दूरं दृग्भ्रामवलोकनं न कुर्यात्। नैव केकरवीक्षणं तिर्यगवलोकनं नेत्राभ्यां नैव विधेयम्। न स्पन्दमिति–पक्ष्ममालानां स्पन्दं पक्ष्मपुटानां स्पन्दं चलनं नैव कुर्यात्। नासाग्रदर्शनः नासाया अग्रे दर्शने लोचने यस्य सः ॥७३६॥ विक्षेपाक्षेपेति–विक्षेपो मनसश्चञ्चलता। आक्षेपः अपवादः। संमोहो जडता मौढ्यं वा। दुरीहा दुरभिप्रायः। एभिः रहिते हृदि मनसि लब्धतत्त्वे च लब्धजीवादिस्वरूपज्ञाने सति। अयं अशेषः सकलः ध्यानजो विधिः ध्यानपरिकरः करस्थो निजायत्तो भवेत् ॥७३७॥

**इत्युपासकाध्ययने ध्यानविधिर्नाम एकोनचत्वारिंशः कल्पः ॥३९॥**

## ४०. श्रुताराधनविधिर्नाम चत्वारिंशत्तमः कल्पः।

[ पृष्ठ २८५-२८७ ] **यस्याः पदद्वयमिति**—यस्याः जिनमुखोद्भवायाः सरस्वत्याः पदद्वयं चरणयुगलं स्याद्यन्तं त्याद्यन्तं च। अलङ्कृतियुग्मयोग्यम् नूपुरयुगलोचितं शब्दालङ्कारार्थालङ्कारौ अलङ्कृतियुग्मं तस्य योग्यं तेन भूषितमिति। पुनः कथंभूतं तत्। लोकत्रयेति–लोकत्रयमेव अम्बुजसरः कमलसरोवरं तत्र प्रविहारि प्रकर्षेण विहरणशीलम्। हारि मनोहरं च। तां देवीं शारदा सलिलेन जलेन सेवे पूजयामि। कथंभूतां देवीम्। **कवीति** – कवयः एव सुतरवः कल्पवृक्षाः तेषां मण्डनाय शोभायै कल्पवल्लीं कल्पलताम्। पुनः कथंभूताम्। वागिति—वाचां विलासः वाग्विलासः तस्य वसतिः गृहभूताम्। इति तोयेन सरस्वती पूजयेत् ॥ ७३८ ॥ **यामन्तरेणेति**—यां जिनशारदाम् अन्तरेण विना सकलार्थसमर्थनोऽपि सकलाश्च ते अर्थाः जीवादयः धर्मार्थकाममोक्षाः वा तेषां समर्थनोऽपि प्रतिपादकोऽपि। बोधः अधिगमः ज्ञातम्। अवकेशितरुवत् अफलवृक्षवत् वन्ध्यपादपवत्। फलार्थिसेव्यः धर्मार्थादिपुरुषार्थचतुष्टयं प्राप्तुकामैः न सेव्यः आश्रयणीयो न भवति। परं यया सरस्वतीदेव्या अनुगतः युक्तः स बोधोऽल्पवेद्यपि स्तोकपदार्थबोधकोऽपि सुरद्रुरिव कल्पतरुरिव त्रिलोक्या लोकत्रयजनैः सेव्यः भजनीयो भवति तां वाग्देवतां गन्धैः प्रयजेय अहं पूजयेयम्। इति गन्धम् ॥७३९॥ **येति**—या वाग्देवी स्वल्पा वस्तुरचना जीवादितत्त्वकथनं यस्याः सा तथाभूतापि अल्पार्थापि अल्पशब्दसहितापि मितप्रवृत्तिः मिता अल्पा प्रवृत्तिः यस्याः सा परं संस्कारतः तद्विपरीतलक्ष्मीः तस्यां वाग्देव्यां संस्कारे अभ्यासरूपे अतिशयाधाने कृते सति पूर्वोक्ताद्विपरीता लक्ष्मीः शोभा यस्याः सा अर्थात् या अस्वल्परचना भवति अमितप्रवृत्तिश्च भवति। या सुधानुबन्धात् सुधायाः अमृतस्य अनुबन्धात् संबन्धात् स्वर्वल्लरीवनलतेव स्वर्गस्थितानां वल्लरीणां यद्वनं तत्रत्या लतेव प्रतिभाति। सा लता यथा सुधां सूते तथा या वाग्देवी मुक्तिसुधां सूते अतस्ताम् अहं सदकैः तण्डुलैः श्रयामि भजामि। इत्यक्षतम् ॥७४०॥ **यद्बीजमल्पमपि**—यस्याः बीजं यद्बीजं यस्याः उत्पत्तिकारणम् अल्पमपि जीवे बाल्याद्यवस्थायाम् अल्पं विद्यते परं तत् सज्जनधीधरायां साधुजनमतिभूम्यां लब्धप्रवृद्धि लब्धं प्राप्तं प्रवृद्धि यत् तत् किं कारणं तस्य प्रवृद्धेः। विविधेति—विविधाः तर्क-साहित्य-व्याकरणादयः ये अनवधयः अमर्यादाः प्रबन्धाः ग्रन्थरचनाविशेषाः तैः लब्धप्रवृद्धि प्राप्तसमृद्धिकं सत् अपूर्वरसवृत्तिभिः अपूर्वो अदृष्टपूर्वो अननुभूतपूर्वो वा यः रसः शान्तरसः तस्य वृत्तयो विशेषाः तैर्यद्बीजं रोहति वर्धते। ताम् आश्चर्यगोचरविधिम् आश्चर्यस्य गोचरो विषयो विधिः कार्यं यस्याः तां वाचां देवीं प्रसवैः पुष्पैर्भजे सेवे पूजये। इति पुष्पम् ॥७४१॥ **येति**—या वाग्देवी। अस्पष्टताधिकविधिः। अस्पष्टता अविशदता तया अधिको विधिः कार्यं यस्याः सा। श्रुतज्ञानम् अस्पष्टं तदेव कार्यं यस्याः तथाभूता। अथवा शब्दरूपत्वात् नेत्राणामगम्या। तथापि मनः आत्मा स्पष्टं प्रसूते। प्रकटीकरोति।

परतन्त्रनीतिः परतन्त्रनयरूपा श्रुतज्ञानावरणक्षयोपशमाधीना। अष्टस्थानापेक्षया परतन्त्रनीतिः पराधीना तथापि मनः स्वाधीनं प्रसूते प्रकटीकरोति। प्रायः कलापरिगता कलाभिः वस्त्वंशज्ञानैः परिगता व्याप्ता। मनः प्रसूते मनः चित्तं जनयति। कलापरिगतापि मूर्तिसहितापि। मनः आत्मा उपशान्तकलं शरीररहितं सूते। 'श्रुतमनिन्द्रियस्येति' मनसः श्रुतज्ञानं विषयः इति निर्देशात्। यदा च स्पष्टं तत् श्रुतज्ञानमस्पष्टं शुक्लध्यानेन घातिकर्मविनाशात् केवलज्ञानरूपं बिभर्ति तदा तत् स्पष्टं स्वतन्त्रम् उपशान्तकलं च भवति। सकलवस्तुपरिच्छेदकत्वात्। क्षायोपशमिकभावविनाशनात्। अंशात्मकलाविकलत्वात्। उचितमेव, नृणां वस्तुगतिः चित्रा नराणां नानाविधं वस्तुविषयं ज्ञानं भवति। अतः तां वाग्देवीम् अन्नविधैः चरुप्रकारैः यजे पूजये ॥७४२॥ एकं पदमिति—बहुपदापि बहूनि पदानि यस्याः सा बहुपदा तथाभूतापि तुष्टा सती एकं पदं ददासि। श्रुतपदसंख्यागमे एवं प्रतिपादिता—'कोटीशतं द्वादश चैव कोट्यो, लक्षाण्यशीतिस्त्र्यधिकानि चैव। पञ्चाशदष्टौ च सहस्रसङ्ख्यमेतच्छ्रुतं, पञ्चपदं नमामि।' एवं बहुपदेषु सत्स्वपि एकं पदं ददासीति विरोधः, तत्परिहारस्त्वेवम्। एकं मुख्यं पदं स्थानं सिद्धालयं त्वं ददासि। वर्णात्मिकापि अकारादिहकार-पर्यन्तवर्णस्वरूपा अपि त्वम् आराधकजनं वर्णभाजं वर्णधारिणं न करोषि इति विरुद्धमेतत्परिह्रियते—स्वयं वर्णभागपि सती आराधकं वर्णादिगुणधारिणं ब्राह्मणत्वादिवर्णयुक्तं मूर्तिमन्तं च न करोति अर्थात् वाग्देव्याराधकाः तत्प्रसादात् संसारिदशां मुक्त्वा सिद्धपदं लभन्ते इति भावः। तथापि भवतीं अहं सेवे यजे। यतः अर्थी जनो दोषं न पश्यति कार्यपेक्षी नरः। तत् तस्मात् तव एष दीपः समस्तु। इति दीपम् ॥७४३॥ चक्षुःपरमिति—करणेति-करणानि इन्द्रियाणि तान्येव कन्दरं दरी तस्माद् दूरितार्थे तिरोहितार्थे जीवादि-पदार्थसार्थे। हे देवि, त्वं परम् उत्तमं चक्षुः नेत्रमसि। अतीन्द्रियपदार्थावलोकनक्षमत्वात्। मोहेति—मोहान्ध-कारापनयने देवि, त्वं परमः उत्कृष्टः प्रकाशः असि मेघादिना कदाचनापि अतिरोहितप्रकाशा त्वमसि। तद्धामेति—तत् अनिर्वचनीयं स्वरूपं धाम स्थानं सिद्धालयः तत्प्रतिगामी गमनशीलः यः पन्था मार्गस्तस्य वीक्षणे रत्नदीपः त्वमसि। तत् तस्मात् हे देवि, इह जनेन आराधकनरेण त्वं धूपैः सेव्यसे आराध्यसे। इति धूपम् ॥७४४॥ चिन्तामणीति—चिन्तामणिश्चिन्तारत्नम्, त्रिदिवधेनुः स्वर्गसुरभिः, कामधेनुरिति भावः। सुरद्रुमाद्याः कल्पपादपादयः पुंसां पुरुषाणां मनोरथेति—चित्ताभिलाषाः तेषां यः मार्गः तस्मिन् प्रथितः प्रसिद्धः प्रभावः माहात्म्यं येषां ते भावाः हे देवि, तव सम्यक्सेवाविधेः समीचीनाराधनाविधानात्, नियतं नियमेन भवन्ति भवताना जायन्ते। तत् तस्मात् इदं फलं नारिकेलादि समर्पितं ते मुदेऽस्तु आनन्दाय जायताम्। इति फलम् ॥७४५॥ कलधौतेति—कलधौतेन सुवर्णेन रचितानि यानि कमलानि, मौक्तिकानि शौक्तिकानि मुक्ताफला-नीति भावः, दुकूलं सूक्ष्मवस्त्रम्। मणिजालं रत्नसमूहः, चामराणि चमरीजानि प्रायः आदौ येषां तैः अनर्घ्य-वस्तुनिवहैः तथा सकलमङ्गलभावैः दर्पणदधिदूर्वादिभिर्मङ्गलैर्भावैः पदार्थैः अहं देवीं सरस्वतीम् आराधयामि सेवे ॥७४६॥ स्याद्वादेति—स्याद्वादः कथंचिद्वादः स एव भूधरः पर्वतः तस्माद्भव उत्पत्तिर्यस्याः सा। मुनिभिः माननीया यतिजनवन्द्या। अनन्येति—न अन्यः शरणं रक्षको येषां ते अनन्यशरणाः तैः। त्वमेव रक्षिका येषां तैः देवैः समुपासनीया आराध्या। पुनः कथंभूता। स्वान्तेति—स्वान्ते मनसि आश्रिताः संचिताः ये अखिलाः कलङ्काः ज्ञानावरणादिकर्मदोषाः तेषां हरतीति हरः तथाभूतः प्रवाहः यस्याः सा। मनःस्थित-सकलकर्मकलङ्कहरणक्षमज्ञानजलौघो यस्याः सा। वागापगा जिनवाणीनदी। मम बोध एव गजः करी तस्य अवगाहः प्रवेशो यस्यां तथाभूता भवतु ॥७४७॥ जिनाभिषेकादिभ्यः का अवस्था लभते भाक्तिक इति प्रश्ने प्राह—मूर्धेति—जिनानां तीर्थकृताम् अभिषवात् स्नानात् भक्तो मूर्धाभिषिक्तो भवति प्रधाननृपो जायते। जिनानाम् अर्चनात् पूजनात् अर्च्यः नृसुरपूज्यो भवति। संस्तवनात् जिनगुणस्तुतेः स्तवार्हः स्तुतियोग्यो भवति। जपात् जपी नामस्मरणयोग्यो भवति। ध्यानविधेः एकाग्रचित्तेन जिनगुणध्यानकरणात् अबाध्यः अन्यैर्बाधां नाप्नोति। श्रुतसेवनात् च श्रुतस्य जिनमुखोद्भूतवाण्याः आराधनात् श्रुताश्रितश्रीः श्रुतलब्ध-लक्ष्मीको भवति ॥७४८॥ दृष्ट इति—हे जिन, दृष्टः त्वम् अनन्याश्रयैः भावैः नितरां सेवितः असि। अन्यजनाश्रयणादुद्भूताः ये अनुरागादयो भावाः ते अन्याश्रया भावा उच्यन्ते ते तु भवजनकाः। तथाभूत-

भावेभ्यो विलक्षणाः पुण्यजनका ये भवद्गोचरानन्तज्ञानादिगुणाः ते आश्रयोऽवलम्बो येषां तैर्भावैः। हे जिन, त्वं मया दृष्टः नितरां सेवितः आराधितः असि। तथापि त्वं स्निग्धः अनुरक्तो मयि न। यस्त्वं भक्ते विरक्तोऽपि अभक्ते द्वेषिणि समविधिः समस्वभावः असि। हे ईश, पुनः एतत् मच्चेतः मम मनः भवति त्वयि प्रेमप्रकृष्टं प्रेम्णा आकृष्टं संलग्नम्। ततः अपरं किं भाषे अन्यत् किं ब्रुवे वच्मि। यामि गच्छामि गृहम्। भवतस्तव पुनर्दर्शनं भूयात् भवतु॥७४६॥

इत्युपासकाध्ययने श्रुताराधनविधिर्नाम चत्वारिंशत्तमः कल्पः॥४०॥

## ४१. प्रोषधोपवासविधिर्नामैकचत्वारिंशत्तमः कल्पः।

[ पृष्ठ २८८-२६० ] पर्वाणि—मासे चत्वारि पर्वाणि शुक्लकृष्णाष्टम्यौ द्वे शुक्लकृष्णे चतुर्दश्यौ द्वे इति चत्वारि पर्वाणि पर्वदिनानि प्रोषधशब्दाभिधेयानि आहुर्ब्रुवन्ति स्म। पूर्यन्ते धर्मकर्माणि अत्रेति पर्वाणि। पूजाक्रियाव्रताधिक्यात् अन्वर्थनामधेयानि। अत्र धर्मकर्मपूजाभिषेकव्रतादिकं बृंहयेत् वर्धयेत्॥७५०॥ **रसत्यागेति**—रसानां क्षीरदधीक्षुतैलघृतानां त्यागः रसत्यागः। एकभक्तं दिने एकदा भोजनम् एकभक्तम्। एकस्थानम्—एकस्मिन्नेव स्थाने सकृद्भोजनम्। उपवसनक्रिया चतुर्णाम् आहाराणां त्यागः उपवसनम्। एताः क्रियाः यथाशक्ति आत्मनः बलं वीर्यं चानतिक्रम्य विधेयाः स्युः कर्तव्या भवेयुः। पर्वसन्धौ सप्तम्यां नवम्यां च त्रयोदश्यां पौर्णिमायाम्, अमावस्यायां च। पर्वणि अष्टम्यां चतुर्दश्यां च॥७५१॥ **नैरन्तर्येति**—तस्य रसत्यागस्य, एकभक्तस्य, एकस्थानस्य, उपवसनस्य च नैरन्तर्यं निरन्तरस्य भावः नैरन्तर्यम्। एताः क्रियाः केऽपि सततं कुर्वन्ति केचन रसत्यागादीनां सान्तर्यं कुर्वन्ति। केचन यस्मिन् तिथौ यद्व्रतम् उक्तं तत्र एताः रसत्यागादिकाः क्रियाः कुर्वन्ति। तीर्थे तीर्थंकराणां गर्भजन्मतपःकेवलमोक्षादिनेषु एताः क्रियाः करणीयाः। रोहिण्यादिनक्षत्रेषु च। अयं चित्रः बहुविधः उपवासविधिः श्रुतसमाश्रयः आगमाधारः चिन्त्यः स्मरणीयः॥७५२॥ प्रोषधोपवासवतः आचारविशेषमाह—**स्नानेति**—स्नानम्, गन्धः, अङ्गसंस्कारः शरीरस्य सौन्दर्यापादनम्। भूषा अलङ्कारधारणम्। योषा स्त्रीसेवा। एषु अविषक्तधीः अविषक्ता अननुरागवती धीः बुद्धिर्यस्य सः, एषां परिहारं कुर्वाणः इति। **निवृत्तेति**—सर्वाश्च ताः सह अवद्येन पापेन युक्ताः क्रियाः सर्वसावद्यक्रियाः। निवृत्तः सर्वसावद्यक्रियाभ्यो यः स निवृत्तसर्वसावद्यक्रियः परित्यक्तसकलपापाचारः। संयमयोः इन्द्रियप्राणिसंयमयोः तत्परः। एतादृशो गृहस्थः उपोषितः गृहीतोपवासः नित्यं धर्मध्यानपरायणो भवेत् कुत्र ध्याननिरतो भवेत्। देवागारे जिनमन्दिरे गिरौ पर्वते गृहे स्वावासे वा। गहनेऽपि वनेऽपि वा॥७५३-७५४॥ उपोषितस्य तस्य बह्वारम्भनिषेधमाह—**पुंस इति**—कृतोपवासस्य कृतचतुर्विधाहारत्यागस्य। पुनः कथंभूतस्य। **बह्वीति**—बहुश्चासौ आरम्भश्च प्राणिपीडाहेतुव्यापारः तत्र रतो व्यापृत आत्मा यस्य सः तस्य कायक्लेशः शरीरकष्टम् गजस्य स्नानेन जलावगाहनेन समा क्रिया यस्य सः तस्य यथा गजः जले निमज्य तटमागच्छति तत्रत्यानि रजांसि स्वमस्तके शुण्डया निक्षिपति, तद्वत् आरम्भरतस्य नरस्य उपवासकरणं शरीरक्लेशाय भवेत्॥७५५॥ प्रोषधविघ्नविधायिकाः क्रिया आह—**अनवेक्षेति**—भूमिर्जीवाकुलास्ति न वेति सम्यगनवलोक्य तत्रार्हदादिपूजोपकरणपुस्तकादेः आत्मपरिधानाद्यर्थस्य स्थापनं ग्रहणं वा। अप्रतिलेखनम्—मृदुना उपकरणेन प्रमार्जनं प्रतिलेखनम्। न प्रतिलेखनं अप्रतिलेखनम्। दुष्कर्मारम्भः पापकार्यारम्भः। दुर्मनस्कारः अशुभमनोविमर्शः। आवश्यकेति—आवश्यकानां सामायिकादीनां विरतिस्त्यागः। क्षुत्पीडितत्वादावश्यकेषु अनुत्साहः प्रोषधव्रते वा। एते चतुर्थम् उपवासं विनिघ्नन्ति विनाशयन्ति॥७५६॥ कायक्लेशादात्मविशुद्धिमाह—**विशुद्ध्ये-दिति**—अयम् अन्तरात्मा कायक्लेशविधिं विना उपवासादिकं विना न विशुद्ध्येत् न निर्मलो भवेत्। निदर्शनमाह—**काञ्चनेति**—काञ्चनाश्मा सुवर्णपाषाणः तस्य विशुद्धये किट्टमलाद्यपनयाय अग्नेरन्यत्किमस्ति उपायान्तरमस्ति नैव। अग्निरेव सुवर्णमलनिर्गमनोपायोऽस्ति। तथा कायक्लेशादिभिस्तपोभिः कर्ममलनिर्गमनाज्जीव-

सुवर्णं शुद्धं जायते ॥७५७॥ हस्ते इति—सुकृतिजन्मनः सुष्ठु कृतिः सत्कार्यं पुण्यं तेन युतं जन्म यस्य स सुकृतिजन्मा तस्य पुण्यवतो। यस्य नरस्य चित्तं चारित्रैः पवित्रं पूतम्। तस्य हस्ते दुःखमेव द्रुमो वृक्षः तस्य दावानलः वनाग्निरिव चिन्तामणिः विद्यते इति ज्ञातव्यम् ॥७५८।

इत्युपासकाध्ययने प्रोषधोपवासविधिर्नामैकचत्वारिंशत्तमः कल्पः ॥४१॥

## ४२. भोगपरिभोगपरिमाणविधिर्नाम द्विचत्वारिंशत्तमः कल्पः।

[ पृष्ठ २९१-२९२ ] भोगपरिभोगयोर्लक्षणमाह—**यः सकृदिति**—यः भोजनादिकः भोजनपुष्पगन्धादिकः भावः पदार्थः। सकृत् सेव्यते भुज्यते स भोगः। पौनःपुन्येन वारम्वारं सेवनात् भूषादि अलङ्कारस्त्रीवस्त्रादिकं परिभोगः स्याद्भवेत् ॥७५९॥ परिमाणं तयोः भोगपरिभोगयोः इयन्तं कालं दिवसपक्षमासादिकालं यावत् अथवा इयत्संख्योपेतयोः परिमाणं कुर्याच्छ्रावकः, किमर्थम्। चित्तेति-चित्तस्य मनसः व्याप्तिरधिकाधिकसंग्रहाशा तस्या निवृत्तये व्यपोहाय। प्राप्ते भोगोपभोगवस्तुनिवहे लब्धे योग्ये च सेवितुमर्हे च सर्वस्मिन् इच्छया इच्छापरिमाणं कृत्वा नियमं भजेत् आश्रयेत्। अद्याहं एतावन्तौ एव भोगपरिभोगौ भुञ्जे। इति नियमम् अवलम्बेत ॥७६०॥ यमनियमयोर्लक्षणमाह—त्याज्ये वस्तुनि इच्छाकृशीकरणाय यमश्च नियमश्च स्मृते निगदिते भवतः। यमो यावज्जीवम् आमरणं ज्ञेयः ज्ञातव्यः। सावधिः एकद्विव्यादिसंख्यापरिच्छिन्नदिवसमासादिसमयः नियमः स्मृतः ॥७६१॥ आजन्मत्याज्यान्याह—**पलाण्डुवति**—पलाण्डुः सुकन्दकः, केतकी केतकनामधेया वनस्पतिः निम्बसुमनांसि प्रसिद्धानि निम्बकुसुमानि। सूरणः तन्नामा कन्दविशेषः अर्शोघ्न इत्यपरं तस्य नाम। आदिशब्देन अर्जुनारणिशिग्रुपुष्पमधूकबिल्वफलादिकं त्याज्यम्। तथा बहुघातविषयं गुडूचीमूलकलशुनार्द्रशृङ्गबेरादिकं त्याज्यम्। एतानि वस्तूनि तद्रूपधारिबहुप्राणिसमाश्रयाणि विद्यन्ते। अतः आजन्म एषां त्यागः कार्यः ॥७६२॥ भोगोपभोगपरिमाणव्रतनाशकानां त्यागः करणीय इत्युपदिशति—**दुष्पक्वस्येति**—दुष्पक्वस्य सान्तस्तण्डुलभावेन अतिक्लेदनेन वा दुष्टपक्वस्य मन्दपक्वस्य वा अन्नस्य प्राशः भक्षणं तत्क्षतिकारणं भोगपरिभोगपरिमाणव्रतनाशकारणम्। निषिद्धस्य पूर्वश्लोकोक्तपलाण्ड्वादीनाम् आहारस्य प्राशः भक्षणं व्रतविनाशकम्। जन्तुसंबन्धमिश्रयोः जन्तुना संबन्धस्य सचित्तस्य सचेतनबीजादिसहितस्य। संबद्धस्य पक्वफलादेर्भक्षणम्। तेन सचित्तेन सम्मिश्रं पृथक्कर्तुमशक्यम् आर्द्रकदाडिमबीजमिश्रं तिलमिश्रं च यद्यवधानादिकं तस्य प्राशो भक्षणम् एतद्व्रतनाशकम्। अवीक्षितस्य अनालोकितफलादेर्भक्षणम् एतद्व्रतविनाशकरम् ॥७६३॥ एतद्व्रतस्य निरतीचारस्य पालनात्सातिशयफलमाह—**इत्थमिति**—इत्थम् उक्तप्रकारेण नियतवृत्तिः भोगपरिभोगप्रमाणं कुर्वाणः। अनिच्छोऽपि अभिलाषम् अकुर्वन्नपि। नरः नरेषु देवेषु च श्रियः चक्रवर्त्यादिविभवस्य आश्रय आवासो भवेत्। स च मुक्तिश्रियः समीपे आगमनं यस्य तथाभूतो भवेत् ॥७६४॥

इत्युपासकाध्ययने भोगपरिभोगपरिमाणविधिर्नाम द्विचत्वारिंशत्तमः कल्पः ॥४२॥

## ४३. दानविधिर्नाम त्रिचत्वारिंशत्तमः कल्पः।

[ पृष्ठ २९३-२९७ ] अधुना दानविधिर्विस्तरेण वर्ण्यते—**यथाविधीति**—प्रतिग्रहादिनवविधिमनतिक्रम्य, यथादेशं जाङ्गलानूपादिदेशमनुसृत्य। यथाद्रव्यं शुद्धान्नजलादिकमनुसृत्य। यथागमम् आगमोक्तदानस्वरूपमनतिक्रम्य। यथापात्रं पात्राण्यनतिक्रम्य। यथाकालं शीतोष्णादिककालमनतिक्रम्य। गृहाश्रमैः गृहस्थश्रावकैः दानं देयम् ॥ ७६५ ॥ दानलक्षणमाह—**आत्मन इति**—आत्मनः श्रेयसे दातुः स्वस्य हिताय। अन्येषां रत्नत्रयसमृद्धये अन्येषां सत्पात्राणां रत्नत्रयस्य वृद्धिर्भवत्विति हेतोः। इत्थं स्वपरानुग्रहाय स्वान्योप-

काराय यस्मात् तद्दानमिष्यते ॥७६६॥ दातृपात्रेति—तत् दानम्, दातृविशेषात्, पात्रविशेषात्, विधिविशेषात्, द्रव्यविशेषात् विशिष्यते। यथा घनाघनोद्‌गीर्णं तोयं मेघैर्वृष्टं जलम्। भूमिसमाश्रयं भूम्याधारं प्राप्य विशिष्यते तथा दानमपि दातृपात्रविध्यादिविशेषेण विशिष्टफलदं भवेत् ॥७६७॥ दात्रादीनां लक्षणान्याह—दातेति—अनुरागसंपन्नः दाता पात्रगुणानुरक्तो दाता भवति। पात्रं रत्नत्रयगुणविशेषसंबन्धात्, सत्कारो नवधा विधिरुच्यते। द्रव्यम् अन्नादि। तत्तु स्वाध्यायतपःसाधकं भवेत् ॥७६८॥ वित्तव्ययस्य प्रकारान् ब्रूते—कश्चिद्दाता परलोकधिया अनेन वित्तव्ययेन अन्नादित्यागेन मे परलोकः स्वर्गादिर्लभ्येत इति मन्यते। कश्चिद्दाता ऐहिककीर्तिलोकादरादिप्राप्तिर्मे भूयादिति वाञ्छया वित्तव्ययं करोति। कश्चिच्च औचित्यमनसा वित्तव्ययं करोति। दानप्रियवचनाभ्याम् अन्यस्य सन्तोषोत्पादनम् औचित्यं तेन युक्तेन मनसा अभिप्रायेण वित्तव्ययं करोति। इति सतां सज्जनानां दातॄणां वित्तव्ययः धनवितरणं त्रिधा त्रिप्रकारं भवति ॥७६९॥ परलोकैहिकौचित्येष्वस्तीति—येषां धीः बुद्धिः परलोके ऐहिके औचित्ये च समा नास्ति। कदाचित् प्रवर्तते कदाचिन्नेति वैषम्यं येषां धियां वर्तते तेषां धर्मः, ऐहिकं सुखादिकं यशश्चेति एतत्त्रयं कुतः स्यात्। एतत्त्रयं तैर्दातृभिर्न लभ्यते, तेषां वित्तव्ययो विफल एव भवेत् ॥७७०॥ दानचातुर्विध्यमाह—अभयेति—मनीषिभिः विद्वद्भिः। चतुर्विधं चतुःप्रकारं दानं प्रोक्तम्। अभयेति—अभयदानम्, आहारदानम्, औषधदानम्, श्रुतदानम्—ज्ञानदानमिति। एतत् चतुर्विधं दानं भक्तिशक्तिसमाश्रयं भक्त्याधारम्, शक्त्याधारं च। यदि धनं समीपे न स्यात् तर्हि एतद्दानं दातुकामोऽपि न दातुं शक्नोति। शक्तिरस्ति तथापि भक्त्यभावे न दातुमिच्छति। यस्य समीपे एतद्द्वयं वर्तते स चतुर्विधमेतद्दानं पात्रेभ्यो ददातु ॥ ७७१ ॥ चतुर्विधदानानां फलचातुर्विध्यं वदति—सौरूप्यमभयादिति—अभयात् भीतस्य नरस्य अभयदानात् दाता सौरूप्यं सौन्दर्यं प्राप्नोति। आहारदानात् भोगवान् भवति दाता। औषधदानात् आरोग्यं दातुर्भवति। श्रुतात् शास्त्रदानात् दाता श्रुतकेवली स्यात् ॥७७२॥ अभयदानं प्रथमं देयमिति वर्णयति—अभयम् इति—सुधीः शुभमतिः श्रावकः। सर्वसत्त्वानां प्राणिनां आदौ प्रथमं सदा अभयं दद्यात्। तद्धीने अभये अदत्ते सर्वः परलोकोचितः विधिः देवपूजादिकं षट्कर्माचरणं वृथा भवेत्। जीवितरक्षणम् अभयात् भवति तच्चेत् न रक्ष्यते परलोकोचिताः क्रियाः को विदध्यात् ॥७७३॥ अभयदानं सर्वेषाम् उत्तममिति निगदति—दानमिति—अन्यदाहारादिकं दानं भवेन्मा वा भवतु न वेति। नरश्चेद्यदि अभयप्रदः अभयदानं यदि स ददाति तेन ॥७७४॥ तेनेति—यः अभयदानवान्—यः नरः अभयं दत्त्वा प्राणिनो निर्भयान् करोति, तेन सर्वं श्रुतम् अधीतं सकलं द्वादशाङ्गज्ञानं पठितम्। तेन परं तपः तप्तम् उत्तमं तपः सेवितम्। तेन कृत्स्नं दानं कृतम् आहारौषधशास्त्रदानानि दत्तानीति मन्ये ॥७७५॥ दातुर्लक्षणमाह—नवेति—नव च ते उपचाराश्च नवविधयः पात्रस्य नवादरप्रकाराः तैः संपन्नः युक्तः। सप्तभिर्गुणैः समेतः सहितः दाता चतुर्विधैः अन्नं पानं खाद्यं लेह्यमिति आहारचातुर्विध्यं तत्र ओदनादिकमन्नम्। जलादिकं पेयम्। अपूपपूरिकामोदकादिकं खाद्यम्। दाडिमादिफलानि क्षैरेय्यादिकं लेह्यमिति। तैः शुद्धैः अस्पृश्यजनादूषितैः स्वयं स्नानादिशुद्धेन दात्रा विहितैः अन्नैः आहारैः साधूनां स्थितिं कल्पयेत् भोजनविधिं कल्पयेत् कुर्यात् ॥७७६॥ नवोपचारानाह—प्रतिग्रहेति—गृहसंश्रितेन गृहनिरतेन श्रावकेण मुनीनां नवोपचाराः यथायोग्य-भुक्त्युपचाराः कार्याः विधेयाः। तान् प्रतिग्रहेत्याह—प्रतिग्रहः स्वगृहद्वारे यतिं दृष्ट्वा प्रसादं कुरुतेत्यभ्यर्थ्य नमोऽस्तु तिष्ठत इति त्रिर्भणित्वा स्वीकरणम्। उच्चासनम्—स्वगृहान्तः स्वीकृतयतिं नीत्वा निरवद्यानुपहतस्थाने उच्चासने निवेशनम्। पादपूजा पादयोः क्षालनम्, पूजा च गन्धाक्षतादिभिः। प्रणामः पूजितसंयतस्य पञ्चाङ्गप्रणामकरणम्। वाक्कायमनःप्रसादाः वाण्याः शरीरस्य मनसश्च प्रसन्नता। तत्र परुषकर्कशादिवचोवर्जनं वाक्शुद्धिः, सर्वत्र संवृताचारतया प्रवर्तनं कायशुद्धिः। आर्तरौद्रवर्जनं मनःशुद्धिः। विधाविशुद्धिः चतुर्दशमलरहितस्य आहारस्य यतन याशोधितस्य हस्तपुटेऽर्पणम् ॥७७७॥ दातुर्गुणानाह—श्रद्धेति—श्रद्धेत्यादि सप्तगुणा यत्र यस्मिन् दातरि सन्ति तं दातारं सूरयः प्रशंसन्ति। के ते सप्तगुणाः। आह—श्रद्धा, तुष्टिः, भक्तिः, विज्ञानम्, अलुब्धता, क्षमा, शक्तिः। श्रद्धा—पात्रगुणानुरागः। विज्ञानम्—द्रव्यक्षेत्रकालादिवेदित्वम्। अलुब्धता—सांसारिकफलानपेक्षा। क्षमा—दुर्निवार-

कालुष्यकारणोऽपत्तावपि कोपाभावः। शक्तिः—स्वल्पवित्तस्य स्वाढ्याश्चर्यकारिदानप्रवृत्त्यङ्गम् ॥७७८॥ तत्र विज्ञानस्यैवं लक्षणम्—त्रिवर्णमिति—मुनिभ्यः तदन्नं न देयम्। कीदृशं तद् यच्च भुक्तं भक्षितं गदावहं रोगोत्पादकम्। पुनः कथंभूतम् अन्नं न देयम्। विवर्णं कान्तिरहितम्। विरसं स्वादरहितम्। विद्धं कीटाद्युपद्रुतम्। असात्म्यम्—यस्य प्रकृतेः पानाहारादयः विरुद्धा अपि सुखित्वाय कल्प्यन्ते तत्सात्म्यम्। प्रकृतिविरुद्धाहारपानादयः भक्षिताः सन्तः सुखित्वाय नावकल्प्यन्ते तदसात्म्यमित्युक्तम्। प्रसृतम् अतिजीर्णं एतादृक् सदोषमन्नं मुनिभ्यो न देयम् ॥७७९॥ उच्छिष्टमिति—भुक्तावशिष्टम्। नीचलोकार्हम्—नीचाश्चाण्डालादयस्तद्योग्यम्। अन्योद्दिष्टम् देवतायाचकपाखण्डाद्युद्दिष्टम्। विगर्हितं निन्द्यम्। दुर्जनस्पृष्टम् दुर्जनैः चाण्डालादिभिः स्पृष्टं स्पर्शितम्। देवतायक्षाद्यर्थं कल्पितं निर्मितम् ॥७८०॥ ग्रामान्तरादिति—अन्यस्माद् ग्रामात् आनीतम्। मन्त्रानीतम्—पठितसिद्धमन्त्रेण आनीतम्। उपायनम् उपहारीकृतम् अन्नम्। आपणक्रीतम् कान्दविकादिकृतम् अन्नं यत्तस्मात् क्रीत्वानीतम्। विरुद्धं पात्रप्रकृतिविरुद्धम्। अयथर्तुकम् यस्मिन् ऋतौ यदनुकूलम् अन्नं तद्यथर्तुकम्। तथा यन्न तत् अयथर्तुकम्। ऋत्वननुकूलम् ॥७८१॥ दधिसर्पिषयोरिति—यदृच्छया सर्पिषा च रञ्जितं तदन्नं भक्ष्यप्रायं पर्युषितं मतम्। यत् गन्धवर्णरसभ्रष्टं अन्यत् सर्वं विनिन्दितम् अन्नं न देयम् ॥७८२॥ मुनीनां वैयावृत्यं विदध्यादिति वर्णयति—बालग्लानेति—बालो मुनिः वयसा लघुः। ग्लानः रोगपीडितः। तपःक्षीणः तपसा अनशनादिना क्षीणः कृशः। वृद्धः जरया ग्रस्तः। व्याधिसमन्वितः रोगेण बहुकालं कदर्थितः। एतान् मुनीन् नित्यमुपचरेत् आहारौषधादिना सेवेत। यथा ते तपःक्षमाः स्युः तपः अनशनादिकं कर्तुं समर्थाः स्युः ॥७८३॥ भोजनक्षणे परिहार्यान् दोषान् व्याचष्टे—शाठ्यमिति—शाठ्यं कपटं वक्रताम्। गर्वं कुलमदादिकम्, अवज्ञानम् अवमाननम्, निरादरताम्, पारिप्लवं चञ्चलताम्। असंयमम् अजितेन्द्रियताम्। वाक्पारुष्यम्—वाचः भाषणस्य पारुष्यं कठोरताम् तव मस्तकं कृणोमि इत्यादिरूपं वचनम्। एतान् दोषान् भोजनक्षणे मुन्याहारवेलायां वर्जयेत् दाता ॥७८४॥

[ पृष्ठ २९८-३०० ] कुत्र मुनिर्न भुञ्जीतेति निगदति—अभक्तानामिति—अभक्तानां ये जैनमुनिभक्ताः न सन्ति, ये च कदर्याः कृपणाः तथा ये अव्रताः व्रतरहिताः सन्ति तेषां सद्मसु गेहेषु न भुञ्जीत न भोजनं कुर्वीत। कः साधुः मुनिः। तथा दैन्यकारुण्यकारिणां ये जनाः निजं दैन्यं दर्शयन्ति अथवाऽयं मुनिर्दीनोऽस्य भोजनं दीयताम् इति ये वदन्ति तेषां सद्मनि न भुञ्जीत। ये च मुनिविषये कारुण्यं दर्शयन्ति तेषां गृहेऽपि मुनिः नाहारं गृह्णीयात् ॥७८५॥ किमर्थं दैन्यकारिणां गृहे न भुञ्जीरन् मुनयः इति वर्णयति—नाहरन्तीति—महासत्त्वाः धैर्यशालिनः मुनयः। चित्तेनापि केनापि अनुकम्पिताः 'इमे मुनयः दयापात्रं येषामुपरि दयां विधाय आहारो देय इति' इति मनसाऽपि संकल्पितास्तस्य गृहे ते नाहरन्ति न भुञ्जते। किं तु तेऽदैन्यकारुण्यसंकल्पोचितवृत्तयः अहम् अदीनः जिनवत् इति संकल्पेन प्रवर्तन्ते। अहं प्राणिषु करुणाक्रान्तचेताः कथमिमे सर्वज्ञप्रतिपादितमोक्षमार्गे प्रवर्तेरन् इति संकल्पार्हस्वभावाः सन्ति ॥ ७८६ ॥ कुत्र प्रतिहस्तं दिशेदिति व्याचष्टे—धर्मेष्विति—धर्मेषु स्वाध्यायादिषट्कर्मसु। स्वामिसेवायां प्रभोः सेवायाम्। सुतोत्पत्तौ च पुत्रजननकार्ये च। कः सुधीर्बुद्धिमान् प्रतिहस्तम् अन्यपुरुषं समादिशेत् युञ्ज्यात्। एतानि कार्याणि सुधीः स्वयमेव कुर्यात् अन्यत्र कार्यदैवाभ्यां कार्यं प्रेषणम्, दैवं यत्किमपि इष्टम् अनिष्टं वा दैवं करोति तत्र स्वहस्तात् किमपि न कर्तुं शक्नोति अतस्तत्र स्वहस्तनियमो नास्ति ॥७८७॥ आत्मेति—आत्मनः स्वस्य वित्तपरित्यागेन धनव्ययेन परैः अन्यैर्धर्मविधापने धर्मसंपादने। अन्यैर्नरैः दानपूजाभिषेकादिधर्मकार्यकरणे निःसंशयं सः स्वस्य वित्तत्यागः विफलो भवति तस्य फलं वित्तत्यागवता न लभ्यते। परभोगाय तत्फलम् अवाप्नोति सः ॥७८८॥ स्वयं धर्मविधायिनः फलं निर्दिशति—भोज्यम् इति—यः स्वयं धर्मं करोति तस्य धर्मकृतेः धर्मकार्यात् भोज्यम् इन्द्रियविषयः लभ्यते। तस्य भोजनशक्तिः इन्द्रियविषयभोगसामर्थ्यं लभ्यते। वरस्त्रियः वराया रूपादिगुणैः उत्तमायाः स्त्रियो युवत्याः रतिशक्तिः संभोगसामर्थ्यम्। विभवः ऐश्वर्यम् दानशक्तिश्च दानसामर्थ्यं च लभ्यते ॥७८९॥ केषु मुनिभिराहारग्रहणं वर्ज्यते—शिल्पिकारुकेत्यादि—शिल्पिनः मालाकारकुम्भकारचित्रकारादयः। कारुकवाचः निर्णेजकादयः। शम्फली परनारीं पुंसा योजयित्री कुट्टनीत्यर्थः। पतितादयः मद्यमांससेवनात् जातिच्युतः पतितः।

आदिशब्देन अन्येऽपि तत्सदृशा ये जनाः अस्पृश्यादयश्च । तेषु मुनिः देहस्थितिं न कुर्वीत आहारं नैव गृह्णीयात् तथा लिङ्गिलिङ्गोपजीविषु आर्यिका मुनयो वा ये लिङ्गेन उपजीविकां कुर्वन्ति यतीनाम् उपकरण—पादरक्ष-पिच्छयोगपट्टादिकरणजीविनां गृहे आहारो न कर्तव्यः । एतेषु सर्वेषु मुनिना देहस्थितिर्न क्रियेत । कृतायां प्रायश्चित्तविधिं चरेन्मुनिः ॥७९०॥ दीक्षायोग्यत्वाहारोचितत्वे वर्णयति—दीक्षायोग्या इति—त्रयो वर्णाः ब्राह्मण-क्षत्रिय-वैश्याः एते त्रयो वर्णा दीक्षायोग्याः अर्हद्रूपधारणे अर्हा बोद्धव्याः । चत्वारश्च वर्णाः सच्छूद्रेण सहिताः ब्राह्मण-क्षत्रिय-वैश्याः विधोचिताः आहारोचिताः । विधाशब्देन आहारो गृह्यते सर्वेऽपि जन्तवः मनो-वाक्कायधर्माय मनसा, वाचा, कायेन च धर्माय धर्माचरणाय मताः त्रिभिः करणैः धर्माचरणं कर्तुं योग्याः । यस्य यद् धर्माचरणम् आहारदानादिकं निर्दिष्टं तेन तत्कार्यम् । यस्य तत् न प्रोक्तं तेन तत् न कार्यम् । स्वस्व-योग्यतानुसारेण कृतो धर्मः पुण्याय कल्पते । अन्यथा आगमाज्ञाविलोपः पापहेतुः स्यादिति ॥७९१॥ को धर्मः किं च तस्य कारणम् । पुष्पादिरिति—पुष्प-फल-नैवेद्यादिकानां देवगुरुशास्त्रेभ्योऽर्पणं, पात्रेभ्योऽशनम् आहारदानं वा न स्वयं धर्म एव हि, यथा क्षित्यादिः भूमिजलवातादिकं न स्वयं धान्यं किं तु धान्यस्य कारणम् । तथा पुष्पादिः अशनादिः धर्मस्य कारणं यो मनसि भावः शुभः शुद्धश्च स धर्मसंज्ञां धत्ते । अन्यत् तस्य कारणं ज्ञेयम् । पुष्पान्नादिवस्तुभावस्य परिणामनिर्मलतायाः कारणं स्यात् । अतः भावधर्मं प्रति कारणत्वात् तस्यापि परम्परया धर्मत्वमनने न हानिः ॥७९२॥ युक्तमिति—नृणां नराणां साधु मायादिरहितं मनः सकृदेव एकदैव श्रद्धया युक्तं सत् परां शुद्धिम् अतीव निर्मलताम् अवाप्नोति लभते । यथा रसैः पारदैर्विद्धम् अन्तःप्रविष्टपारदं लोहं परां शुद्धिं निर्मलतां धृत्वा सुवर्णतां प्राप्नोति ॥७९३॥ देहिनां प्राणिनां सदपि अकुटिलमपि मनः तपोदानार्चनाहीनम् अनशनादितपोभिः चतुर्विधाहाराभयौषधशास्त्रदानैः जिनपूजया च हीनं रहितं सत् तप आदिकर्मभ्यः संजातस्य पुण्यस्य प्राप्तये न स्यात् । कुशूलस्थितबीजवत् यथा कुशूले धान्यागारे स्थितं बीजं तत्फलप्राप्तये धान्यरूपफलोत्पादनाय हेतुर्न भवति अतः अकुटिलोऽपि मानवो धर्मरतो भवेच्चेत् धर्मफलं लभेत नान्यथा ॥ ७९४ ॥ आवेशिकेति—आवेशिकः अतिथिः आगन्तुकः । आश्रितः अनन्यस्वामिकः । ज्ञातिर्निजवंशजः । दीनः दुःखितो दरिद्रश्च तेषु यथाक्रमं क्रमम् अनतिक्रम्य यथौचित्यं दानप्रियवचनाभ्यां सन्तोषानतिक्रमेण । यथाकालं कालमनतिक्रम्य । यज्ञपञ्चकमाचरेत् । ऋषियज्ञं देवयज्ञं भूतयज्ञं नृयज्ञं पितृयज्ञं चेति पञ्चयज्ञान् क्रमशः कुर्यात् ॥ ७९५ ॥ पञ्चमकालेऽपि जैनमुनयः विहरन्तीति निगदति—काले इति—अस्मिन्कलौ काले दुःषमाख्ये पञ्चमकाले । चले चित्ते मनसि चञ्चले सति । देहे शरीरे च अन्नादिकीटके अन्नम् अत्तीति भक्षयतीति अन्नादी स चासौ कीटकः तस्मिन् सति । एतच्चित्रम् आश्चर्यं विद्यते यत् अद्यापि जिनरूपधारिणः नराः विद्यन्ते । अयं पञ्चमकालः शुभो नास्ति यतः सर्वे जनाः स्वैराचारपरायणाः पापरता दृश्यन्ते । चित्तमपि चलं धर्माचरणादपेतुमिच्छति । देहोऽपि अन्नाभिलाषरतः तथापि अत्र भारते केचन जना जिनेन्द्रमुद्रां धृत्वा स्वपरहिताय यतन्ते ॥७९६॥ यथेति—यथा लेपादिनिर्मितं काष्ठपाषाणमण्यादिविरचितं जिनेन्द्राणां रूपं जिनप्रतिबिम्बं पूज्यम् । तथा पूर्वमुनिच्छायाः पूर्वे ये मुनयः पूर्वमुनयस्तेषां छाया यत्र तत्सदृशा इत्यर्थः । अष्टाविंशतिमूलगुणधारिणः संयताः संप्रति अस्मिन्काले पूज्याः मान्याः । परं यदि स्वाचारात् भ्रष्टाः गृहस्थवत् असत्यं ब्रुवन्ति, मान्यान् मुनीनपि न मानयन्ति अहमपि न तेभ्यो हीनः इति ये मन्यन्ते । न ते नमस्कारयोग्याः, ये च तान्नमस्यन्ति ते तत्पापम् अनुमन्यमाना ज्ञातव्याः । उक्तं च कुन्दकुन्दाचार्यैः षट्प्राभृते—"तेसिं पि णत्थि बोही पावं अणुमोअमाणाणं—तेषामपि नास्ति बोधिः पापम् अनुमन्यमानानाम् इति । पूर्वमुनिच्छाया इत्यत्र छाया शब्दः अल्पत्वद्योतकः तच्च अल्पत्वं मुनिचारित्रापेक्षया पूर्वे मुनयः तपस्विनः परीषहोपसर्गान् सहमाना आसन् नाधुना ते तथा हीनसंहननधारित्वात् । परंतु हीनसंहननेऽपि मूलगुणानां पालनं भवत्येव अतः मूलगुणलोपाकारिणः मुनयः पूर्वमुनिच्छाया ज्ञातव्याः ॥७९७॥ पात्रप्रकारानाह—तदुत्तमम् इति—यत्र नरे रत्नत्रयं भवेत् विद्येत तत् उत्तमं पात्रं भवेत् । देशव्रती अणुव्रती दर्शनप्रति-माद्येकादशप्रतिमासु यां कामपि प्रतिमाम् सेवमानः श्रावकः मध्यं पात्रं भवेत् । अन्यच्च जघन्यं पात्रं स्यात् । कः यः असंयतः सुदृक् असंयतः उभयसंयमविहीनः केवलं सम्यग्दर्शनं पालयन् ॥७९८॥

[पृष्ठ ३०१-३०४] यत्रेति—यत्र रत्नत्रयं नास्ति सम्यग्दर्शनं सम्यग्ज्ञानं सम्यक्चारित्रं च रत्नत्रयम् तत् यस्मिन् नरे न विद्यते स अपात्रम् इति बुधाः विद्वांसः विदुः जानन्ति। तत्र उप्तम् दत्तम् आहारादिकं चतुर्विधं दानम् ऊषरायां क्षारमृत्तिकावत्यां क्षिताविव भूम्याम् उप्तं बीजमिव सर्वं वृथा विफलं स्यात् ॥७९९॥ पात्रे दत्तमिति—गृहमेधिनां गृहिणां गृहे मेधा बुद्धिर्येषां ते गृहासक्ताः श्रावकाः। तेषाम् अन्नं पात्रे दत्तं पुण्याय भवेत्। यथा मेघानां शुक्तावेव पतितं जलं मुक्ताफलं मौक्तिकं भवेत् जायेत ॥८००॥ मिथ्यात्वेति—मिथ्यात्वेन अतत्त्वश्रद्धानेन कुदेवागमलिङ्गिनां श्रद्धानेन वा ग्रस्तानि चित्तानि मनांसि येषां तेषु नरेषु। कथंभूतेषु चारित्राभासभागिषु चारित्रस्य आभासं भजन्ते इति चारित्राभासभागिनः तेषु यच्चारित्रमिव सम्यग्दर्शनयुक्तं चारित्रम् इव भासते परं तत्तथा नास्ति तत् चारित्राभासम् तद्युक्तेषु दानम् आहारादिकदानम् अहिषु सर्पेषु पयःपानमिव दुग्धपानमिव दोषायैव भवेत्। ततः संसार एव वर्धेत ॥ ८०१ ॥ कारुण्यादिति—कारुण्यात् करुणाया दयाया भावः कारुण्यम्। तस्मात् मनसि अनुकम्पाया उद्भवात्। अथवा औचित्यात् प्रियवाक्सहितं दानम् औचित्यं तस्मात्। तेषां चारित्राभासभागिनां मिथ्यादृशां किञ्चिद् स्वल्पं अन्नादिकं दिशन्नपि वितरन्नपि उद्धृतम् अन्नम् एव दिशेत्, तदीयपात्रे अन्नं निक्षिपेत् अन्यत्र गत्वा भुज्यतामिति कथयेत्। गृहे भुक्ति न कारयेत् मदीये गृहे भुङ्क्ष्वेति कथयित्वा गृहे एव तं न भोजयेत् ॥८०२॥ उद्धृतान्नदाने हेतुमाह—सत्कारादाविति—येषां सत्कारादिषु क्रियमाणेषु, आदरेण स्वीकरणम्। उच्चासनदानम्। पादप्रक्षालनम्। गन्धादिना पूजनम्, इत्यादि सत्कारक्रियाकरणे दर्शनं सच्छ्रद्धानं दूषितं मलिनं भवेत्। तदेव निदर्शनेन दृढयति—यथा विषभाजनसंगमात् विषपात्रसहवासात् विशुद्धं निर्दोषमपि अम्बु जलं दूषितं पानकारिणो नरस्य प्राणहरणं कुर्यात् ॥८०३॥ एषां सहवासादिकमपि परिहरेदिति कथयति—शाक्येति—शाक्याः बौद्धाः, नास्तिकाश्चार्वाकाः आत्मा नास्ति, परलोको नास्तीति वादिनः। यागज्ञाः मीमांसका अश्वमेधादियज्ञविधायिनः। जटिलाः जटाधारिणः पारिव्राजकाः, आजीवकाः''''आदौ येषां ते तैः मिथ्यामतप्रवर्तिभिः लोकैः सहावासम् एकस्मिन् स्थाने निवसनम्। सहालापं तैः सह भाषणम्, तत्सेवां च विवर्जयेत् त्यजेत् ॥८०४॥ अज्ञातेति—अज्ञातं तत्त्वानां जीवादीनां चेतः हृदयं स्वरूपं यैस्ते अज्ञाततत्त्वचेतसः। अथवा अज्ञातम् अनवबुद्धं तत्त्वं जीवादीनां स्वरूपं येन तत् अज्ञाततत्त्वं तत् चेतः मनः येषां ते अज्ञाततत्त्वचेतसः तैः शाक्यादिभिः, पुनः कथंभूतैः दुराग्रहमलीमसैः दुरभिनिवेशान्मलिनमनोभिः शाक्यादिभिः गोष्ठ्यां भाषणव्यवहारे कृते तत्त्वविमर्शे कृते दण्डादण्डि, दण्डैर्दण्डैरिदं अन्योन्यं युद्धं प्रवर्तते इति, अन्योन्यं कचान् गृहीत्वेदं युद्धं प्रवर्तत इति कचाकचि। दुराग्रहवशंगतचेतस्त्वात् ते कलहोद्यता भवेयुरिति ॥८०५॥ दर्शनम्लानिकारणान्याह—भयलोभेत्यादि—भयं भीतिः, राजादिजनिता, लोभः वर्तमानकाले अर्थप्राप्तिः। उपरोधः मित्रानुरागः आदिशब्देन आशया भाविनोऽर्थस्य प्राप्त्याकाङ्क्षया। कुलिङ्गिषु शाक्यनास्तिकयागज्ञजटिलादिषु कुगुरुषु निषेवणैः प्रणामविनयादिभिः नीचैः आचरणे हीने आचारे जाते सति दर्शनम् अवश्यं म्लायेत् मलिनं भवेत् उज्ज्वलं न स्यात् ॥८०६॥ बुद्धिपौरुषेत्यादि—बुद्धिः कर्मणि कौशलम्। पौरुषं प्रयत्न उद्यमश्च। नृषु नरेषु कर्मकुशलेषु प्रयत्नवत्सु सत्स्वपि, दैवायत्तविभूतिषु सम्पदः दैवाधीनाः संभवन्ति। तत्प्राप्त्यर्थं कुत्सितसेवायां यदि नरा उद्यताश्चेत् तत्र दैन्यं दीनता एव दारिद्र्यमेव अतिरिच्यते अधिकं कारणं प्रधानं कारणं ज्ञातव्यम्। नरः कश्चित् सम्यग्दृष्टिः कुत्सितजनस्य दारिद्र्याभिभूतत्वात्सेवां करोति चेत् तेनैवं विमर्शः कर्तव्यः अहं सम्यग्दृष्टिः यद्यपि कर्मकुशलः पौरुषयुक्तश्च तथापि विभूतयो दैवायत्ताः। अतः मयास्य सेवा क्रियते तथापि मम सदाचारं नाहं त्यजामि, नाहं कुलिङ्गिनो निषेवे। मिथ्यादृष्टिनश्च नाहं प्रशंसामि। एवं विवेकेन प्रवृत्ति कुर्वाणः सम्यक्त्वं न मलिनयेत् ॥८०७॥ समयीत्यादि—मनीषिणः विद्वांसः तत्पात्रं पुनः पञ्चधा पञ्चप्रकारम्। आमनन्ति आगममनुसृत्य वदन्ति। किं समयी श्रावकः साधुश्च जिनसमयश्रितः, सूरिः आचार्यः समयदीपकः वादित्वादिना मार्गप्रभावकः ॥८०८॥ समयिकमाह—गृहस्थो वेत्यादि—जैनं समयं जिनप्रतिपादितं समयं मतम् आश्रितः गृहस्थो वा गृहनिरतः गृहविरतो वा। यथाकालं कालम् आहारकालम् अनतिक्रम्य अनुप्राप्तः गृहमागतश्चेत् पूजनीयः सुदृष्टिभिः

सम्यग्दर्शनधारिभिः ॥८०९॥ साधकमाह—ज्योतिर्मन्त्रेत्यादि—ज्योतिः ग्रहनक्षत्रादिकं तद्गत्यादिकं च, तज्जानातीति ज्योतिर्ज्ञः। मन्त्रज्ञः मन्त्रं तत्स्वरूपम् इष्टानिष्टं तत्फलम्, तदाराधनादिकं जानातीति मन्त्रज्ञः। निमित्तम् अष्टधा अन्तरिक्ष-भौम-अङ्ग-स्वर-व्यञ्जन-लक्षण-छिन्न-स्वप्नाः। तद् जानातीति निमित्तज्ञः, यः ज्योतिःषु, मन्त्रेषु, निमित्तेषु च कुशलः। यः कार्यकर्मसु प्रतिष्ठाषोडशसंस्कारविधानव्रतोद्यापनादिषु कर्मसु सुप्रज्ञः सुबुद्धिः सम्यक्तया परोक्षार्थाः ग्रहगतयः, तदिष्टानिष्टफलानि च तेषु समर्था धीर्यस्य सः समयिभिः गृहस्थैः मुनिभिश्च मान्यः आदरणीयः। अथवा कार्यकर्मसु सुप्रज्ञः वैद्यः स च व्याधिं परोक्षार्थं जानाति अतः सोऽपि समयिभिः मान्यः ॥८१०॥ साधकमाह—दीक्षायात्रेति—दीक्षा द्विविधा अणुव्रतदीक्षा महाव्रतदीक्षा च यात्रा ग्रामान्तरगमनं तीर्थयात्राकरणं वा। प्रतिष्ठा जिनयज्ञविधानम्। आद्यशब्देन व्रतोद्यापनं विवाहादिसंस्काराश्च। एताः क्रियाः तद्विरहे ज्योतिर्मन्त्रनिमित्तज्ञाद्यभावे कुतः भवेयुः। तदर्थम् एतत्कार्यविधानाय परपृच्छायां वैदिकादि-ज्योतिर्विद्वैद्यादि-विद्वज्जनपृच्छायां निजसमयोन्नतिः कथं स्यात् ॥८११॥ नैष्ठिकमाह—मूलोत्तरगुणेति—मूलगुणाः अहिंसादयः अष्टाविंशतिः। उत्तरगुणाः चतुरशीतिलक्षाः। एतैर्गुणैः श्लाघ्यानि यानि तपांसि अनशनादीनि द्वादश तैः निष्ठिता दृढा स्थितिः मुनिधर्मे अवस्थानं यस्य सः, साधुः मुनिः सम्यक्तया मनोवाक्कायैः पूज्यः मान्यः स्यात्। कैः पुण्योपार्जनपण्डितैः पुण्यसंचये निपुणैः श्रावकैः ॥८१२॥ गणाधिपमाह—ज्ञानकाण्डे इति—न्याय-धर्म-व्याकरण-साहित्यादिकशास्त्राणि ज्ञानकाण्डम्। क्रियाकाण्डे अणुव्रतमहाव्रताद्याचाराः क्रियाकाण्डम्, एतत् काण्डद्वये चातुर्वर्ण्यपुरःसरः मुन्यृषियत्यनगाराणां पुरःसरः अग्रणीः सूरिः संसाराब्धितरण्डकः भववार्धिपोतः। देव इव अर्हन्निव आराध्यः पूज्यः ॥८१३॥ समयद्योतकम् आह—लोकवित्त्वादि—लोकवित्वं लोकव्यवहारवेदित्वम्, कवित्वं बुधजनमनोहरणकुशलकाव्यरचनाचातुर्यम् आद्यं येषु तैः वादवाग्मित्वकौशलैः, विजिगीषुकथानैपुण्यं वादः। वाग्मित्वं वक्तृत्वं तयोः कौशलैः चातुर्यैः मार्गप्रभावनोद्युक्ताः रत्नत्रयमार्गप्रभावने उद्द्योतने उद्युक्ताः तत्पराः सन्तः साधवः गृहस्थाश्च विशेषतः दानसम्मानादिना पूज्याः मान्याः ॥८१४॥ कीदृशं ज्ञानं तपश्च पूज्यं स्यादित्याह—मान्यमित्यादि—तपोहीनं लोकविस्मयकारकतपोरहितं ज्ञानं दीक्षायात्राप्रतिष्ठाद्युपयोगि मान्यं भवेत् तादृक् ज्ञानम् अनशनादितपोनिमित्तं भवेत्। ज्ञानहीनं तपः नैष्ठिकस्थम् अर्हितं पूज्यं स्यात्। ज्ञानातिशयहेतुत्वात्। द्वयं ज्ञानतपोयुगलं गणाधिपस्थम्। यत्र स देवः स्यात् अर्हन्निव स्यात्। द्विहीनः गणपूरणः गणं संख्यां पूरयति इति गणपूरणः भवेत् ॥८१५॥ मुन्यादीनां विनयक्रियामाह—अर्हद्रूपे इति—अर्हतः रूपं यस्य सः अर्हद्रूपः तस्मिन् जिनमुद्राधारके नग्नमुनौ नमोऽस्तु स्यात्। नमोऽस्तु इति त्रिरुक्त्वा मुनिं पञ्चाङ्गैर्नमेत्। विरतिः आर्यिका तस्यां विनयक्रिया वन्दे इति। च अन्योऽन्यं क्षुल्लके च अहं यथायोग्यप्रतिपत्त्या इच्छाकारवचः इच्छामीत्यादिप्रसिद्धविनयकर्म सदा स्यात्। श्रावकाः अन्योन्यं दृष्ट्वा इच्छामीत्युक्त्वा विनयक्रियां कुर्युः ॥८१६॥

[ पृष्ठ ३०५-३०८ ] अनुवीचीत्यादि—पूज्यादिसंनिधौ पूज्या मान्या ये आचार्यादयः ते आदौ येषां ते पूज्यादयः आर्यिकाक्षुल्लकादयः। तेषां संनिधौ समीपे अनुवीचिवचः विचार्य भणनम्, निरवद्यवचनं सदा भाष्यम् अनिशं वाच्यम्। गुरुसंनिधौ यथेष्टं हसनालापान् असत्यभाषणं, नर्महास्यम्, अभ्याख्यानं मिथ्याविवादः वर्जयेत् त्यजेत् ॥८१७॥ भुक्तिमात्रेत्यादि—भुक्तिः आहार एव भुक्तिमात्रं तस्य प्रदानं वितरणं तस्मिन् तपस्विनां का परीक्षा को विमर्शः करणीयः अयम् आगमोक्तमाचारं यतीनाम् आचरति न वेति विमर्शो न करणीयः। ते सन्तः सन्मुनयो भवन्तु असन्मुनयो वा यतः गृही गृहस्थः दानेन शुद्ध्यति पुण्यं लभते ॥८१८॥ सर्वेति—सर्वे च ते आरम्भाः सर्वारम्भाः अनेकानि कार्याणि तत्र च गृहस्थानां बहुधा बहुभिः प्रकारैः लज्जाभयपक्षपातादिभिः धनव्ययः भवति। ततोऽत्यर्थम् अतिशयेन विचारणा परीक्षा न कर्तव्या ॥८१९॥ यथा यथेति—यथा यथा मुनयः तपांसि, ज्ञानम्, महाव्रतानि, समितयः आदिभिर्गुणैः विशिष्यन्ते विशिष्टा जायन्ते भवन्ति। तथा तथा ते गृहमेधिभिः गृहस्थैः पूज्या मान्या भवन्ति ॥८२०॥ दैवादिति—धन्यैः पुण्यवद्भिः गृहस्थैः दैवाल्लब्धं प्राप्तं धनं समयाश्रिते समयो जिनधर्मः तम् आश्रिते मुन्यादौ

अन्ने वस्तव्यं दातव्यम् । यथागमम् आगममनुसृत्य एकः मुनिः लभ्यः प्राप्येत न वा लभ्यः न प्राप्येत ॥८२१॥ अयं जिनधर्मः कीदृक्पुरुषैः सेव्यते इति प्रश्ने उत्तरमाह—उच्चावचेति—अयं जिनेशिनां समयः धर्मः उच्चावचजनप्रायः उच्चक् च अवाक् च उच्चावचः अनेकप्रकारः स च जनः तेन प्रायः भृतः अस्ति । यथा आलयः गृहम् एकस्तम्भे न तिष्ठेत् तथा एकस्मिन् पुरुषे अयं जिनेशिनां समयः न तिष्ठेत् ॥८२२॥ जिनेशिनां समये कतिविधा मुनयो भवन्तीति व्याचष्टे—ते नामेति—नामन्यासेन, स्थापनान्यासेन, द्रव्यन्यासेन, भावन्यासेन च मुनयः चतुर्विधाः भवन्ति । ते सर्वेऽपि दानादरक्रियासु योग्या भवन्ति ॥८२३॥ उत्तरोत्तरेति—उत्तरोत्तरभावेन नामादिन्यस्तेषु मुनिषु उत्तरोत्तरन्यासेन न्यस्ते मुनौ विधिः दानमानादिक्रियया आदरो विशिष्यते । नाममुनेः स्थापनामुनिः श्रेयान् । ततः द्रव्यमुनिः श्रेयस्तरः । ततोऽपि भावमुनिः श्रेयोऽधिकः । यथा पुण्यार्जने पुण्यसंचये गृहस्थानां जिनप्रतिकृतिषु जिनबिम्बेषु नामादिन्यासेन उत्तरोत्तरभावेन आदरविधिः विशिष्यते । यथा नामजिनतः स्थापनाजिनः पूज्यः । स्थापनाजिनात् द्रव्यजिनः भाविजिनः अधिकं पूज्यस्ततोऽपि भावजिनो विशेषेण पूज्यः ॥८२४॥ नामनिक्षेपमाह—अतद्गुणेष्विति—न विद्यन्ते शब्दप्रवृत्तिनिमित्तानि जगत्प्रसिद्धानि जातिगुणक्रियाद्रव्यलक्षणगुणविशेषणानि येषु तेषु भावेषु व्यवहारप्रसिद्धये नरेच्छावशवर्तनात् पुरुषाभिप्रायमवलम्ब्य यत्संज्ञाकर्म नामविधानम्, तन्नाम ज्ञातव्यम् ॥८२५॥ स्थापनानिक्षेपमाह—साकारे इति—यत्प्रतिनिधिभूतं वस्तु सादृश्यमावहति तत्साकारम् । ततोऽन्यथाप्रतिनिधिभूतत्वेन कल्प्यते तन्निराकारम् । एतादृशे काष्टादौ काष्ठपुस्तचित्रकर्माक्षनिक्षेपादिषु सोऽयमित्यभिप्रायेण न्यस्यमाना स्थापना निगद्यते अभिधीयते ॥८२६॥ द्रव्यनिक्षेपं ब्रवीति—आगामीति—आगामिनि भाविकाले गुणलाभमपेक्ष्य योऽर्थो यद्वस्तु प्रकल्प्यते सः द्रव्यन्यासस्य द्रव्यनिक्षेपस्य गोचरः विषयः । भावनिक्षेपं वदति—तत्कालेति—तत्कालपर्यायाक्रान्तं वर्तमानदशास्थितं वस्तु भावो भाष्यते ॥८२७॥ राजसं दानमाह—यदात्मेति—यत् दानम् आत्मवर्णनप्रायम् स्वस्तुतिबहुलम् । क्षणिकाहार्यविभ्रमम् क्षणपर्यन्तं संजातविलासम् । कदाचित् ददाति, प्रतिदिनं न ददाति । अतः क्षणिकविभ्रमम् । आपातमनोहरम् । परप्रत्ययसंभूतम् अन्योपदेशसंभूतम् । अन्येन जनेन दापितं वा । स्वचित्ते दानस्य विश्वासो नास्ति । परं कस्यचिद्दानस्य फलं दृष्ट्वा अनेन ईदृशं प्राप्तं फलमिति ज्ञात्वा पश्चात् ददाति । आहार्यम्—यदा कश्चित्प्रवर्तयेत् तदा दानं ददाति । तत् दानं राजसं मतं कथितम् ॥८२८॥ तामसदानमाह—पात्रापात्रेत्यादि—पात्रं च अपात्रं च उभयमपि समं समानरूपम् अवेक्ष्यं वीक्ष्यते यत्र तत् । असत्कारं पात्रस्य सत्कारो यत्र न क्रियते तथाभूतम् । असंस्तुतम्—लज्जादिना दत्तम् । दासभृत्यकृतोद्योगं क्रीतजनेन, वैतनिकभृत्येन वा कृतः उद्योगः पाचनादिकार्यं वा यत्र तद्दानं तामसम् ऊचिरे बभाषिरे ॥८२९॥ सात्त्विकं दानमाह—आतिथेयमिति—यत्र स्वयम् आतिथेयम् अतिथेः पात्रस्य स्वागतीकरणम् । यत्र पात्रनिरीक्षणम् आगतस्य अतिथेः पात्रापात्रत्वं विमृश्य तद्योग्यतामनुसृत्य प्रवर्तनम् । यत्र दाने श्रद्धादयो गुणाः सन्ति तद्दानं सात्त्विकं विदुः जानन्ति ॥८३०॥ दानानाम् उत्तमादिकत्वमाह—उत्तममिति—सात्त्विकं दानम् उत्तमम् । मध्यमं राजसं भवेत् । सर्वेषां दानानां निर्धारणे षष्ठी । सर्वेषु दानभेदेषु सर्वेषु पुनः जघन्यं तामसं ज्ञेयम् । सर्वेषामेव दानानाम् इति सात्त्विकराजसयोरपि योजनीयम् ॥८३१॥ दानफलम् इहापि लभ्यत इत्याह—यद्दत्तम् इति—यत् दानम् अभयादिकं दत्तं तत् अमुत्र अमुष्मिल्लोके परलोके स्यात् फलवद् भवेत् इति वचः भाषणम् असत्यपरं स्यात् । यतः तोयतृणाशनाः जलतृणभक्षिण्यः गावो धेनवः । किं पयः न प्रयच्छन्ति न ददति अपि तु ददत्येव । गावः यस्मिन् दिने जलयवसं भक्षयन्ति तद्दिन एव दुग्धं ददति । तथा दानफलं दात्रा अस्मिन्नेव लोके फलं मनःप्रसादरूपं लभ्यते । अथवा यत् अस्माभिः रूक्षं स्निग्धं वा अन्नं कदन्नं वा दत्तं तदेवान्यजन्मनि अस्माभिः प्राप्यते इति मिथ्यावचः । यतः गौः तोयं तृणं चाश्नाति परं मधुरं पयो ददाति । अत्र यद्दीयते तदेव लभ्यते इति वचो मिथ्या ॥८३२॥ मुनिभ्य इति—मुनिभ्यः शाकपिण्डोऽपि शाकस्य पत्रशाकस्य पिण्डः पुञ्जः ग्रासः पत्रशाकोऽपि । काले आहारवेलायाम् भक्त्या प्रकल्पितः दत्तः अगण्यपुण्यार्थं भवेत् । यतः भक्तिः चिन्तामणिः चिन्तामणिरिव ॥८३३॥ मौनविधिः किमर्थमित्याह—अभिमानस्येति—अभिमानस्य अयाचक-

व्रतस्य रक्षणार्थम् । आगमस्य विनयार्थम् जिनेश्वराः भोजनादिविधानेषु मौनम् ऊचुः उक्तवन्तः ।।८३४।। **लौल्यत्यागादिति**—लौल्यं जिह्वालम्पटता तस्य त्यागात् इच्छाया निरोधात् । तपोवृद्धिः भवति । अभिमानस्य च रक्षणम् अयाचकव्रतस्य पालनं स्यात् । ततश्च तस्माद्व्रतरक्षणात् लौल्यत्यागाच्च जगत्त्रयविषये मनःसिद्धिः स्याद् भवेत् । यया सर्वज्ञता स्यात् ।।८३५।।

[ पृष्ठ ३०९-३१३ ] श्रुतस्येति—मौनेन श्रुतस्य प्रश्रयो विनयो भवेत् । ततश्च श्रेयःसमृद्धेः समाश्रयः स्यात् । मुक्तिसम्पदः आश्रयः भवेत् । ततः मौनात् मनुजलोकस्य सरस्वती प्रसीदति त्रिजगदनुग्रहसमर्थो दिव्यध्वनिप्रसादो भवति ।।८३६।। संयमिनां व्याध्यादिप्रतीकारः करणीयः इति कथयति—**शारीरेति**—शारीरा व्याधयः दोषधातुमलविकृतिजनिताः । मानसा व्याधयः दौर्मनस्यदुःस्वप्नसाध्वसादिसम्पादिताः । आगन्तुव्याधयः शीतवाताभिघातादिकृताः । एतैः व्याधिभिः सम्बाधसंभवे पीडासंभवे । केषां संयमिनां तपस्विनाम् । गृहाश्रितैः गृहनिरतश्रावकैः । साधु सम्यक्तया । शारीरमानसागन्तुकानां रोगाणां प्रतीकारः विनिवृत्त्युपायः । कार्यः करणीयः ।।८३७।। व्याधिपीडितमुन्युपेक्षायां सर्वं श्रुतं नश्येदिति निवेदयति—**मुनीनामिति**—उपासकैः देवशास्त्रगुरूणाम् उपासनां कुर्वद्भिः श्रावकैः । व्याधियुक्तानां रोगपीडितानां ज्ञानवतां मुनीनाम् उपेक्षायाम् औदासीन्यकरणे । असमाधिः रत्नत्रयविराधना तेषां मुनीनां भवेत् । स्वस्य औषधादिसाहाय्यम् अविहरतः अधर्मकर्मता च प्रकटीभवेत् । अतः जैनागमस्य व्याख्यानं विदधानेषु विद्वत्सु । तदागमस्य पठनं कुर्वत्सु छात्रमुन्यादिषु । सदा सौमनस्यं शुभं हर्षादिकम् । आचार्यं करणीयम् । कैः उपायैः इत्याह आवासेति—आवासः वसतिका । पुस्तकं शास्त्रम् । आहारः मुन्युपयोगि प्रकृत्यनुकूलम् अन्नदानम् । सौकर्यादिविधानकैः अन्यश्रुतसाधनानां सौलभ्यकारणैः । श्रुतस्कन्धेति—श्रुतस्कन्धधरात्यये श्रुतस्कन्धस्य अङ्गपूर्वज्ञानस्य धरणे समर्थानां मुनीनाम् अत्यये विनाशे । निर्मूलतः सर्वम् अङ्गपूर्वप्रकीर्णोक्तम्—अङ्गेषु एकादशसु पूर्वेषु चतुर्दशसु च यदुक्तं श्रुतज्ञानं तन्नश्येत् । तथा सूक्तम्—सुष्ठु उक्तं निर्दोषं प्रतिपादितं केवलिभाषितं जिनेश्वरप्रोक्तं सर्वं नश्येत् । अतः गृहाश्रितैः संयमिना व्याधेः प्रतीकारः कार्यः । **प्रश्रयोत्साहतेति**—प्रश्रयो विनयः । उत्साहः उद्यमः । सततप्रयत्ने साहाय्यदानम् । आनन्दवर्धनम् । स्वाध्यायोचितवस्तुभिः श्रुतवृद्धान् मुनीन् जनयन् श्रावकः श्रुतपारगः सकलश्रुतधारकः जायते । ८३८-८४१ ।। श्रुताच्छ्रुताभावाच्च किं स्यादिति निवेदयति—श्रुतात् श्रुतरक्षणात् तत्त्वज्ञानं जीवादितत्त्वबोधः जायते । श्रुतात् श्रुतपालनात् समयवर्धनं स्वमतप्रभावना भवति । श्रेयोऽर्थिनां मुक्त्यभिलाषिणा श्रुताभावे एतत्सर्वं जीवादितत्त्वज्ञानं स्वमतप्रभावना च विनश्यति सर्वं तमस्यते अन्धकारकल्पं भवति ।।८४२।। **अस्त्रधारणवदिति**—यथा अस्त्रधारणं सुलभं तथा नराः बाह्ये क्लेशे सुलभाः । परं तथा शौण्डीराः पराक्रमिणो वीराः दुर्लभाः तथा यथागमज्ञानवन्तो नराः यथार्थज्ञानसंपन्नाः दुर्लभाः ।।८४३।। **ज्ञानभावनयेति**—ज्ञानभावनयोर्हीने ज्ञानाभ्यासाय सततं प्रयत्नम् अकुर्वति कायक्लेशिनि शरीरक्लेशान् सहमाने नरो केवलं वाहीकवत् भारं वहन्नर इव किंचिद्भारो हीयते, अन्यः वर्धते । तथा कायक्लेशं कुर्वाणे नरि नूतनं कर्मागच्छति-पुरातनं किंचिद् गलति ।।८४४।। मोहशमनाय ज्ञानमेव कारणम्—**सृणिवदिति**—सृणिवत् अंकुशो यथा दन्तिनः करिणः वशाय दमनाय हेतुर्भवति तथा आशयदन्तिनः मोहकरिणो दमनाय ज्ञानम् अंकुशवत् भवति । तदृते ज्ञानादृते । बहिः कायक्लेशाख्यं तपः क्लेश एव पीडैव परम् अतिशयेन भवेत् ।।८४५।। ज्ञानभावना श्रेष्ठेति—**बहिरिति**—ज्ञानं भावयतः आत्मनि आगमाश्रयेण ज्ञानं चिन्तयतः नरस्य संनिधौ बहिः अनशनादितपः स्वयम् अभ्येति तं प्राप्नोति । यत् यतः अत्र ज्ञानभावनायां क्षेत्रज्ञे आत्मनि निमग्ने एकाग्रचिन्तापरिणते जाते सति । कुतः अपराः क्रियाः रागवर्धकाः स्युः वीतरागविज्ञानरूपायां परिणतौ जातायां जीवे कर्मागमनं न भवति । संवरः च जायते ।।८४६।। **यदज्ञानीति**—अज्ञानी आत्मज्ञानशून्यः केवलं बाह्यं कायक्लेशं कुर्वाणो जीवः । बहुभिः युगैः कर्म क्षपयेत् विनाशयेन्न वा । परं योगसंपन्नः एकाग्रचित्तः ज्ञानी । ध्रुवं निश्चयेन । क्षणतः मुहूर्तादेव । कर्म क्षपयेत् दहेत् । मिथ्याज्ञानी कर्मक्षयं न करोति, सम्यग्ज्ञानी क्षणात्कर्मराशिं भस्मभावं नयति ।।८४७।। **ज्ञानीति**—अखिले बहिर्व्रते अनशनादौ । क्लेष्टुः क्लेशं सहमानात् यतेः । ज्ञानी मुनिः पटुः

कर्मक्षपणचतुरो भीयते । ज्ञानलवे ज्ञातुः यतेः युगैरपि बहुभिः यस्मात् न पटुत्वं कर्मक्षपणकुशलत्वं न भवति । संपूर्णे चारित्रे सति पटुः परिपूर्णज्ञानी भवेत् । न तु ज्ञानलवमात्रेण केवली स्यादिति भावः ॥८४८॥ शब्दैतिह्यै-रिति—यस्य शब्दैतिह्यैः शब्दागमैः व्याकरणैः यस्य गीः वाणी शुद्धा न । यस्य च धीः बुद्धिर्नयैः नैगमादिनयैः शुद्धा कुशला न । सः परप्रत्ययात् अन्यस्मात् कुत्सितगुर्वादेः प्रत्ययात् ज्ञानात् क्लिश्यन् क्लेशं प्राप्नुवन् पुमान् अन्धसमः अन्धतुल्यः भवेत् ॥८४९॥ शब्दाद्यागमानां द्वैविध्यम् आह—स्वरूपमिति—स्वरूपम् । रचना । शुद्धिः । भूषा । अर्थः । समासतः संक्षेपात् । आगमस्य शास्त्रस्य । प्रत्येकम् एतद्द्वैविध्यं भेदद्वयं प्रतिपद्यते स्वीकरोति । तद्यथा—शब्दागमः, न्यायागमः, धर्मागमः इति त्रय आगमाः सन्ति । तेषां प्रत्येकं स्वरूपादेः द्वैविध्यं भवति । तद्यथा—स्वरूपं द्विविधम् अक्षरम् अनक्षरं च । अस्फुटार्थसूचनार्थम् यथा तडत्तडित् । पटपटायति । रचना द्विविधा गद्यं पद्यं च । प्रत्येकमागमः गद्यरूपेण पद्यरूपेण वा स्वाभिप्रायं निवेदयति । शुद्धिर्द्विविधा—प्रमादप्रयोगविरहः प्रमादात् अनवधानात् यः अशुद्धः प्रयोगः अशुद्धा वाक्यरचना तस्याः विरहः अभावः । अर्थव्यञ्जनविकलतापरिहारश्च । अर्थः शब्देन प्रतिपाद्याशयः । व्यञ्जनम् शब्दः तयोः विकलतायाः परिहारः त्यागः । भूषा द्विविधा वागलंकारः शब्दालंकारः अर्थालंकारश्च उपमारूपकादयः । अर्थो द्विविधः चेतनः अचेतनश्च । चेतनोऽर्थः देवमानवादिः । अचेतनः पृथिव्यादिः जातिः व्यक्तिश्चेति वा ॥८५०॥ दानविधेः अतिचारा-नाह—सार्धमिति—सचित्तनिक्षिप्तम्—सचित्ते पद्मपत्रादौ अन्नस्य निक्षिप्तम् अन्ननिक्षेपः । सचित्तवृतं सचित्तेन कमलपत्रादिना वृतमन्नस्योपरि आवरणम् । अन्योपदेशः परस्य दातुरेतद्गुडखण्डादिकमस्तीति पात्रस्य निवेदनम् । मात्सर्यम् अन्यदातृगुणासहिष्णुत्वं मात्सर्यम् । कालातिक्रमणक्रिया साधूनाम् उचितस्य भिक्षासमयस्य लङ्घनम् । एते पञ्चातिचाराः दानहानये दानव्रतस्य विनाशाय भवन्ति ॥८५१॥ यतिभक्त्यादिकरणाद्दात्रा किं किं लभ्यते इत्याह—नतेरित्यादि—यतेर्नतेः मुनिनमस्कारात् गोत्रम् उच्चं कुलं दाता अवाप्नोति । दानात् आहारादिदानात् श्रियः संपदः अवाप्नोति । उपास्तेः यतिपूजनात् सर्वसेव्यतां सकलजनमान्यतां लभते । भक्तेः यतिगुणानुरागात् कीर्तिमवाप्नोति, यशो लभते । कः दाता कथंभूतः स्वयं यतीन् भजन् स्वयं मुनीन् आश्रयन् उपासमानः ॥८५२॥

इत्युपासकाध्ययने दानविधिर्नाम त्रिचत्वारिंशत्तमः कल्पः ॥४३॥

## ४४. यतिनामनिर्वचनश्चतुश्चत्वारिंशत्तमः कल्पः ।

[ पृष्ठ ३१४-३१७ ] गृहिणामेकादशपदान्याह—मूलव्रतमिति—मूलव्रतं मद्यमांसमधुभिः सह पञ्चोदुम्बरत्यागो मूलव्रतम् । पञ्चाणुव्रतानि, गुणव्रतत्रयम् शिक्षाव्रतचतुष्टयम् एतेषां द्वादशानां पालनम् व्रतपदं द्वितीयम् । अर्चा आप्तसेवा समयो वा तस्याः करणं तृतीयं पदम् सामायिकाख्यम् । पर्वकर्म प्रोषधोपवासः चतुर्थं पदम् । अकृषिक्रिया क्षेत्रे सस्यादिवापनम्, हलेन भूमिकर्षणम् एतत्कार्यम् अस्मिन्पञ्चमे पदे निषिद्धम् अतः अकृषिक्रियाख्यं पदमेतत्पञ्चमम् । दिवा दिने स्वस्त्रीसंभोगत्यागः षष्ठं पदम् । नवविधं ब्रह्म-मनसा वचसा कायेन संभोगत्यागः स्वयम्, अन्येन त्याजनम्, त्यजतो अनुमोदनम् । एतत्सप्तमं पदम् । श्रावकस्य सचित्तस्य आमस्य मूलफलशाकशाखादेस्त्यागः अष्टमं श्रावकपदम् । परिग्रहपरित्यागः बाह्यदशविधपरिग्रहाणां क्षेत्रवास्त्वादीनां त्यागो वर्जनं नवमं श्रावकपदम् । भुक्तिमात्रानुमान्यता–भुक्तिराहारः अन्नपानखाद्यलेह्यानां चतुर्णाम् आहाराणाम् अनुमान्यता अनुमतिदानम्, दात्रा पुत्रादिना श्रावकेण क आहारोऽद्य ग्राह्य इति पृष्टे अमुक आहारो ममेष्ट इति कथनम् । भुक्तिमात्रानुमान्यता दशमं पदम्[1] । तद्धानौ च तस्या अनुमतेर्हानिस्त्यागः एकादशपदम्[2] ।

---

१. भुक्त्यनुमतिं मुक्त्वा अन्यत्र आरम्भे, परिग्रहे, ऐहिकेषु विवाहादिकर्मसु अनुमतेरपि त्यागः ज्ञातव्यः ।

२. दात्रा पुत्रादिना श्रावकेण कः आहारोऽद्य भवेद्भवत इष्टः इति पृष्टेऽपि तद्विषये अनुमतेरपि अदानम् एकादशं पदम् ।

८५३-८५४। **अवधीत्यादि**—अवधिव्रतम् आरोहेत् पूर्वपूर्वव्रतस्थितः। पूर्वस्मिन् पूर्वस्मिन् व्रते मूलव्रतादौ स्थितः। अवधिव्रतं कालमर्यादां कृत्वा उत्तरव्रतं गृह्णीयात्। यद्यद्व्रतं नवीनं गृह्यते तस्य तस्य मर्यादां कृत्वा तत्पालयेत्पूर्वव्रतैः सह। सर्वत्रापि एकादशसु पदेषु ज्ञानदर्शनभावनाः समाः प्रोक्ताः। यदि एषां पदानां श्रद्धानं ज्ञानं च न स्यात् तर्हि उत्तरोत्तरपदधारणं नोचितं भवेत्। सर्वेषु एकादशपदेषु क्रमेण रत्नत्रयभावनाः सदृशाः सन्त्येव ॥ ८५५ ॥ **षडत्रेति**—अत्र आदिषट्पदधारिणः श्रावकाः गृहिणः, ज्ञेयाः, सप्तमाष्टमनवमपदधारिणो ब्रह्मचारिनामानो ज्ञेयाः। दशमैकादशपदधारकौ द्वौ भिक्षुकौ इति निर्दिष्टौ। ततः सर्वतः व्रतधारिणः महाव्रतिनो यतिनामधेया ज्ञातव्याः ॥ ८५६ ॥ **तत्तदिति**—महाव्रतादिषु यस्य गुणस्य प्राधान्यं येषु विद्यते तत्तद्गुण-माश्रित्य यतयो मुनयोऽनेकधा बहुविधाः स्मृताः प्रोक्ताः। तेषां यतीनां निरुक्ति निश्चयेन उक्तिः कथनं निरुक्तिस्तां वदतो वर्णयतः मत् मत्सकाशात् निबोधत शृणुध्वम् ॥८५७॥ **जित्वेति**—यः सर्वाणि इन्द्रियाणि स्पर्शनरसनादीनि जित्वा स्वविषयेभ्यः परावृत्य स्वायत्तानि करोति तथा आत्मना स्वयम् आत्मानं स्वं वेत्ति जानाति स गृहस्थो भवतु वानप्रस्थो वा भवतु। वानप्रस्थः – अपरिगृहीतजिनरूपो वस्त्रखण्डधारी निरतिश-यतपस्युद्यतो भवति। स जितेन्द्रियनामधेयो भवति। इति जितेन्द्रियपदनिरुक्तिः ॥८५८॥ क्षपणश्रमण-योर्निरुक्तिमाह—**मानेति**—मानो गर्वः, माया कपटम्, मदः उन्मत्तता, आमर्षः क्रोधः एषां क्षपणात् क्षय-करणात् यतिः क्षपणः स्मृत उक्तः ॥ **यो नेति**—यः यतिः श्रान्तेः न श्रान्तः श्रान्तेः ईर्यासमित्या भ्रमणात् न श्रान्तः न क्लान्तः तं बुधा विद्वांसः श्रमणं विदुः जानन्ति ॥८५९॥ आशाम्बरनग्नयोर्निरुक्तमाह—**य इत्यादि**—यः 'हताशः' हताः प्रशान्ताः आशा अभिलाषा यस्य स 'हताशः' तम् आशाम्बरम् आशादिश एव अम्बरं वस्त्रं यस्य स आशाम्बरः तम् आशाम्बरम् ऊचिरे बभाषिरे। यः सर्वसंगपरित्यक्तः सकलबाह्या-भ्यन्तरपरिग्रहमुक्तः स नग्नः परिकीर्तितः कथितः ॥८६०॥ ऋषिमुन्योर्निरुक्तिमाह—**रेपणादिति**—क्लेश-राशीनां संसारे सम्प्राप्तचतुर्गतिदुःखसमूहानां रेपणादुत्पाटनात् विनाशनात् संवरणात् मनीषिणः विद्वांसः ऋषिम् आहुः ब्रुवन्ति। आत्मविद्यानां कर्मक्षयं कृत्वा सकलविमलकेवलज्ञानं लभ्यते तत्केवलज्ञानम् आत्मविद्या तथा च तपश्चरणसामर्थ्यात् या कोष्ठबीजबुद्ध्यादयो लभ्यन्ते ता अपि आत्मविद्याः प्रोच्यन्ते। आत्मविद्यानां मान्यत्वात् तत्प्राप्तेः पूजां प्राप्तत्वात् महद्भिः मुनिः कीर्त्यते वर्ण्यते ॥८६१॥ यत्यनगारयोर्निरुक्तिमाह—**य इति**—यः मुनिः पापपाशनाशाय पापान्येव पाशाः जालानि तेषां नाशाय यतते प्रयत्नं करोति स यतिर्भवति। यः मुनिर्देहगेहेऽपि देह एव गेहं शरीरमेव गृहं तत्र यः अनीहः इच्छारहितः स अनगारः सतां सज्जनानां पूज्यः ॥८६२॥ शुचिशब्दस्य निरुक्तिमाह-**आत्मेति**-आत्माशुद्धिकरैः आत्मनः अशुद्धि कुर्वन्ति इति आत्मा-शुद्धिकरा ये कर्मदुर्जनाः कर्माण्येव दुर्जनाः चाण्डाला अस्पृश्याः तैः यस्य न संगः न स्पर्शः स पुमान् पुरुषः शुचिः पवित्र आख्यातः प्रोक्तः, न अम्बुसम्प्लुतमस्तकः अम्बुना जलेन संप्लुतं सं समन्ततः प्लुतं धौतं मस्तकं यस्य स पुमान् न शुचिराख्यातः ॥८६३॥ निर्ममशब्दस्य निरुक्तिमाह—**धर्मकर्मेति**—यः धर्मकर्मफले धर्मो रत्नत्र-यात्मकः तस्य कर्माणि आचरणानि गुप्तिसमितिधर्मानुप्रेक्षापरीषहजयचारित्ररूपाणि। तेभ्यो लब्धे फले स्वर्गादि-सुखलक्षणे। अनीहः निःस्पृहः। अधर्मकर्मणः निवृत्तः पापकर्मणो हिंसादेर्निवृत्तः दूरीभूतः। तम् इह अस्मिंल्लोके केवलात्मपरिच्छदं केवल एकः आत्मा एव परिच्छदः परिवारो यस्य तं निर्ममं निर्नष्टा ममेति बुद्धिर्यस्य स निर्ममः तम् उशन्ति ब्रुवन्ति ॥८६४॥ मुमुक्षुमाह—**यः इति**— यः यतिः कर्मद्वितयातीतः द्रव्यकर्माणि ज्ञानावरणा-दीनि अष्टौ। भावकर्माणि च अज्ञानरागद्वेषमोहादयो भावाः। कर्मणोर्द्वितयं कर्मद्वितयं तस्मात् अतीतः रहितः तं 'मुमुक्षुं' प्रचक्षते ब्रुवते। परं लोहस्य हेम्नो 'वा' पाशैर्यो बद्धः स अबद्ध एव। एते लोहादिपाशाः न वस्तुनो बन्धनानि तैर्नात्मा बद्धयते यतः ॥८६५॥ समधीत्वं प्रतिपादयति—**निर्मम इत्यादि**—निर्गतो ममभावो यस्य स निर्ममः निर्मूर्च्छः। निरहंकारः अहमस्य स्वामी इति मनःसंकल्पोऽहंकारः स निर्गतो यस्मात् स निरहंकारः निर्गर्वः। निर्माणमदमत्सरः निर्गतः नष्टः मानो मदो मत्सरश्च यस्मात् स निर्माणमदमत्सरः। क्षीणाभिमानेन्द्रियगर्वपरगुणासहनभावः। निन्दायां तथ्यस्य अतथ्यस्य वा दोषस्योद्भावनं प्रति इच्छा निन्दा तस्याम्। संस्तवे चैव गुणप्रशंसायां चैव शंसितव्रतः शंसितानि व्रतानि यस्य सः। निर्दोषव्रतपालनो यः स

समधीः समा रागद्वेषपरिहीणा बुद्धिर्यस्य सः मुनिः गृहस्थो वा समधीरुच्यते ॥८६६॥ वाचंयमत्वलक्षणमाह—योऽवगम्येति—तत्त्वैकभावनः तत्त्वेषु एका मुख्या भावना चिन्तनं यस्य स तत्त्वैकभावनः। यः मुनिः अनाद्यन्ततत्त्वं न आदिः उत्पत्तिर्जन्म अन्तो विनाशः यस्य तत्तत्त्वं जीवाजीवादिवस्तुस्वरूपम् अवगम्य ज्ञात्वा, वाचंयमः वाचो वाक्यात् यच्छति विरमतीति वाचंयमः मौनव्रती विज्ञेयः, न पशुवन्नरः मौनी विज्ञेयः ॥८६७॥ अनूचानत्वं ब्रूते—श्रुते इत्यादि—श्रुते आगमे। व्रते अहिंसादिमहाव्रते। प्रसंख्यानं ध्यानं तस्मिन्। संयमे प्राणिसंरक्षणात्मके इन्द्रियजयरूपे। नियमे परिमितकालावधिरूपे भोगोपभोगत्यागे। यमे आजन्मभोगोपभोगत्यागे यस्य उच्चैश्चेतः उन्नतं चेतः मनो भवति स अनूचानः श्रुतज्ञानविचक्षणः विनीतो वा प्रकीर्तितः ॥८६८॥ अनाश्वन्मुनेः स्वरूपमाह—य इत्यादि—यः यतिः अक्षस्तेनेषु इन्द्रियचौरेषु अविश्वस्तः विश्वासं न च गच्छति। शाश्वते पथि नित्ये रत्नत्रयमार्गे च स्थितः वर्तते स्म। समस्तसत्त्वविश्वास्यः सकलप्राणिविश्वासार्हः स मुनिरिह अनाश्वान् गीर्यते उच्यते ॥८६९॥

[ पृष्ठ ३१८-३२१ ] योगिनमाह—तत्त्वे इत्यादि—तत्त्वे जीवादिपदार्थे पुमान् यस्य आत्मा युक्तो वर्तते। मनः पुंसि यस्य मनः बाह्यान् धनादिपदार्थान् विमुच्य पुंसि ज्ञानदर्शनलक्षण आत्मन्येव युक्तं वर्तते। मनसि एव युक्तं यस्य अक्षकदम्बकं इन्द्रियगणो वर्तते। तदपि स्पर्शादिविषयेषु न प्रवर्तते। स मुनिः योगी भवति। परेच्छादुरीहितः योगी न भवति। परेषु स्त्रीपुत्रधनादिषु या इच्छा मनःसंकल्पः तस्यां दुरीहितः दुष्प्रवृत्तः यः स योगी न स्यात् ॥८७०॥ यतेः पञ्चाग्निसाधकत्वं ब्रवीति—कामः क्रोध इत्यादि—यस्य कामः संकल्परमणीयः प्रीतिसंभोगशोभी रुचिरोऽभिलाषः कामः। क्रोधः अमर्षः असहनता। मदो गर्वः। माया कपटम्। लोभः वर्तमानकाले अर्थप्राप्तिगृद्धिः। इत्यग्निपञ्चकम् येन साधितं वशीकृतं सः कृती कृतकृत्यः मुनिः पञ्चाग्निसाधकः स्यात् ॥८७१॥ मुनेर्ब्रह्मचारित्वमाह—ज्ञानं ब्रह्मेति—आत्मस्वरूपपरिज्ञायकं ज्ञानं ब्रह्मेत्युच्यते आत्मज्ञानेन परपदार्थे आसक्तिरहितावहा। स्वात्मन्येव रतिर्हितकारिणीति प्रतिपाद्यते। तस्माज्ज्ञानं ब्रह्मेति निर्वचनं योग्यम्। दया ब्रह्म दया प्राण्यनुकम्पनं सर्वे जीवाः सुखमभिलषन्ति न कोऽपि दुःखम्। अतः आत्मना सदृशाः सर्वे प्राणिनः इति ज्ञात्वा दया विधेया। दयेयं ब्रह्मज्ञानकारणत्वाद् ब्रह्मेति परिगीयते। कामविनिग्रहः कामाकुलितो मनुष्यः रामाभिलाषी भवति। निजात्मनि शुद्धे तस्य रतिर्न भवति अतः आत्मस्वरूपरतिच्युतः सोऽजितेन्द्रियो भवति तस्य ब्रह्मप्राप्तिः कुतः। कामविनिग्रहे कृते निजात्मनि ब्रह्मणि रतिर्जायते अतः कामविनिग्रहस्य ब्रह्मेत्यभिधानम्। अत्र ज्ञानब्रह्मणि, दयाब्रह्मणि कामविनिग्रहाख्ये ब्रह्मणि च सम्यग्वसन्नरः ब्रह्मचारी आत्मा भवेत् ॥८७२॥ मुनेर्गृहस्थत्वं कथयति—क्षान्तियोषितीत्यादि—यः मुनिः क्षान्तियोषिति क्षमास्त्रियां सक्तः रतिं करोति। यः सम्यग्ज्ञानम् एव अतिथिः स प्रियो यस्य यथा गृहस्थः ज्ञानादिसिद्धयर्थम् आहाराय यत्नेन श्रावकगृहम्। अतन्तं गच्छन्तम् अतिथिं पूजयति तथा सम्यग्ज्ञानरूपम् अतिथिम् आराधयति स मुनिः नूनं गृहस्थो भवेत्। गृहस्थः दैवतं साधयति आराधयति तथायं मुनिर्मन एव दैवतं तत्साधयति। मनो वशीकृत्य तत् आत्मनि एकाग्रं करोति तत आत्मानुभूत्याख्यं सुखं लभते ॥८७३॥ मुनेर्वानप्रस्थत्वं व्यनक्ति—ग्राम्यमिति—ग्राम्यम् अर्थं ग्राम इन्द्रियगणः तस्य विषयः स्पर्शरसादिः ग्राम्योऽर्थ उच्यते। तं स्पर्शादिविषयं स्त्रीस्रक्चन्दनादिकं परित्यज्य मुक्त्वा। अन्तः यः अर्थः रागद्वेषादिः तमपि परित्यज्य यः संयमी यतिः प्रवर्तते स वानप्रस्थः विज्ञेयः। न वनस्थः कुटुम्बवान् वने तिष्ठन् पोष्यवर्गसहितः वानप्रस्थो नोच्यते। वानप्रस्थोऽयं गृहस्थभेदेऽपि शब्दो वर्तते। वानप्रस्थो गृही तृतीयाश्रमी उच्यते तस्यापि स्वरूपं जैनागमे एवं प्रतिपादितम्—"वानप्रस्था अपरिगृहीतजिनरूपा वस्त्रखण्डधारिणः निरतिशयतपस्युद्यता भवन्ति।" वैदिकधर्मे वानप्रस्थो दाराभिः सह वने तिष्ठति इत्युक्तं तथा वानप्रस्थस्य गृहिणः स्वरूपं जैनागमे नास्ति। ग्राम्यमर्थमिति श्लोके मुनेर्वानप्रस्थेति नामापि कथं भवेदिति विशदीकृतम्। परं मुनिर्वानप्रस्थाभिधो गृही नेत्यत्र ज्ञेयम् ॥८७४॥ मुनेः शिखाछेदित्वं कथयति—संसारेत्यादि—संसार एवाग्निः। चतुर्गतिभ्रमणं संसारः स एवाग्निः तस्य शिखाः मिथ्यात्वाविरतिप्रमादकषायाख्याः। तासां छेदो विनाशः कर्तनं वा येन ज्ञानासिना। आत्मज्ञानमेव असिः खड्गः तेन कृतः तं मुनिं

'शिखाछेदिनं' प्राहुः न तु मुण्डितमस्तकम् मुण्डितं मस्तकं येन सः मुण्डितमस्तकः तं न ब्रुवन्ति। केवलं केशलोचं करोति परम् अनाचारेण प्रवर्तते स मुण्डितमस्तकोऽपि न मुनिः। मिथ्यात्वाविरतिप्रमाद-कषायान् यश्छिनत्ति स एवान्वर्थो मुनिः शिखाच्छेदीत्युच्यते ॥८७५॥ मुनिं हंसमाह—**कर्मेत्यादि**—क्षीरनीरसमानयोः यथा क्षीरनीरयोः संयोगे इदं क्षीरम् इदं दुग्धम् इति विवेक्तुं नान्यो जनः समर्थः हंसं विना। स तु नीरमिश्रितं क्षीरं नीरं मुक्त्वैव पिबति। यदा स हंसः नीरमिश्रिते क्षीरे निजां चञ्चुं प्रवेशयति तदा क्षीरं पीत्वा नीरमेवावशेषयति। तथैव मुनिरपि क्षीरनीरसमानयोः कर्मात्मनोः विवेक्ता भवति। आत्मनः सकाशात् कर्माणि पृथक् करोति अत एव स परमहंसो भवति। स परमहंसः अग्निवत्सर्वभक्षकः नास्ति। जैनसाधुः श्रावकगृहे अभक्ष्यवर्ज्यम् आहारं करोति आहारदोषांस्त्यक्त्वा। अग्निस्तु सर्वं शुद्धमशुद्धं वा भक्षयति। न तस्य विवेकोऽस्ति ॥८७६॥ मुनेस्तपस्वित्वं व्यनक्ति—**ज्ञानैरिति**—यस्य ज्ञानैर्मनः नित्यं प्रदीप्तं किट्टकालिकादिदोषरहितं सुवर्णमिव तेजस्वि-निर्मलमभवत्। यस्य वपुः वृत्तैः त्रयोदशविधैः गुप्तिसमितिमहाव्रतरूपैश्चारित्रैः नित्यं प्रदीप्तम् अभवत्। नियमैः नानाविधैः सेव्यपदार्थत्यागैः इन्द्रियाणि यस्य नित्यं दीप्तानि स तपस्वीत्युच्यते न वेषवान्, केवलं नग्नः पिच्छिकाकमण्डलुसहितः तपस्वी नोच्यते। ॥८७७॥ मुनेरतिथित्वं व्यनक्ति—**पञ्चेन्द्रियेत्यादि**—याः पञ्चेन्द्रियाणां स्पर्शादिविषयेषु प्रवृत्तयः ता एव पञ्च तिथयः नन्दा, भद्रा, रिक्तादयः, ताः संसारे भवे अश्रेयोहेतुत्वात् अकल्याणकारणत्वात् ताभिर्मुक्तो अतिथिर्भवेत् ॥८७८॥ मुनेर्दीक्षितत्वं प्रतिपादयति—**अद्रोह इति**—सर्वसत्त्वेषु सकलजीवेषु अद्रोहः अद्वेषः स एव यस्य यज्ञः इज्यते हविरत्र इति यज्ञः स यस्य दिने दिने वर्तते स पुमान् यतिः दीक्षितात्मा ज्ञेयः। न तु अजादियमाशयः दीक्षितो ज्ञेयः अजाश्वादिषु यमाशयः यमवत् आशयो मारणाभिप्रायो यस्य स पुरुषः दीक्षितो न ज्ञेयः। दीक्षा संजाता अस्येति दीक्षितः। स व्रती न सोमपानवति अध्वरे यजमानः सन्दीक्षित उच्यते ॥८७९॥ श्रोत्रियत्वं मुनेः कथयति—दुष्कर्माणि दुष्टानि हिंसासत्यचौर्यादिपापकार्याणि तान्येव दुर्जनाः चाण्डालशबरनाहलादयः तान् न स्पृशतीति दुष्कर्मदुर्जनास्पर्शी। पुनः कथंभूतः। सर्वेति—सर्वेषां सत्त्वानां प्राणिनां हिते कुशले आशयोऽभिप्रायो यस्य स पुमान् श्रोत्रियः वेदाध्ययनब्राह्मणः। न तु यः बाह्यशौचवान् बाह्यं स्नानेन शौचं मन्वानः न स श्रोत्रियः ॥८८०॥ मुनेर्होतृत्वं निदिशति—**अध्यात्मेति**—अध्यात्माग्नौ आत्मनि अधिकृत्य वर्तते इति अध्यात्मं स एवाग्निः तत्र दयारूपैर्हविप्रक्षेपणप्रतिपादनपरैर्मन्त्रैः सम्यक्कर्म-समिच्चयं सम्यक्तया सावधानो भूत्वा कर्माणि ज्ञानाद्यावरणानि एव समिधः होमे समर्पणीयानि पलाशादि-काष्ठतुल्यानि तेषां चयं समूहं यः जुहोति अध्यात्माग्नौ प्रक्षिपति, स होता स्यात् होमकर्ता भवेत्। परं यः बाह्याग्निसमेधकः बाह्याग्नौ पलाशादिकाष्ठानि निक्षिप्य तस्य प्रवर्धकः भवति स अत्र होता न स्यात्। यः यतिः स्वानुभूत्यग्नौ दयामन्त्रानुच्चार्य कर्मसमिच्चयं प्रक्षिपति प्राणिसमूहं होमे न प्रक्षिपति। प्राणिसमूहं होमे क्षिपन्न सदयः किं तु निर्दय एव। अत्र स्वानुभूतिरूपे होमे कर्मणां ज्ञानाद्यावरणानां प्रक्षेपणात् आत्मा होता भवति इति ज्ञेयम् ॥८८१॥ मुनेर्यष्टृत्वं वक्ति—**भावपुष्पैरिति**—भक्तिकुसुमैः देवं यजेत् जिनं पूजयेत्, वा शुद्धचिदानन्दस्वरूपं निजात्मानं पूजयेत्। व्रतपुष्पैर्वपुर्गृहम्—व्रतान्येव पुष्पाणि तैः वपुरेव गृहं यजेत् पूजयेत्। क्षमापुष्पैः मनोवह्निं चित्तानलं पूजयेत्। स यष्टा यजनं कुर्वाणः, सतां सज्जनानां मान्यः पूज्यो भवेत् ॥८८२॥ मुनिम् अध्वर्युमाचष्टे—**षोडशानामिति**—षोडशसंख्यानां भावनर्त्विजाम् दर्शनविशुद्धि-विनयसम्पन्नतादिषोडशभावनानां तीर्थकरत्वप्राप्तिकारणानां पुरोहितानां यः उदारात्मा दातृसदृशः महानात्मा मुनिः, प्रभुः स्वामी स शिवेति—शिवशर्म मोक्षसुखं तदेव अध्वरो यज्ञः तस्य उद्धुरः श्रेष्ठः अध्वर्युः यज्ञ-सम्पादको बोद्धव्यः ज्ञातव्यः ॥८८३॥ वेदस्य स्वरूपमाह—**विवेकमिति**—यः शरीरशरीरिणोः शरीरं देहः शरीरी शरीरे निवसन्नात्मा। तयोः उभयोः विवेकं पार्थक्यं भिन्नलक्षणत्वम् उच्चैः नितरां निवेदयेत् कथयेत्। सः वेदः विदुषां प्रीत्यै रुचये स्यात्। वेदः अखिलक्षयकारणं सकलप्राणिविनाशहेतुः स प्रीति-हेतुर्न भवति ॥८८४॥ का नाम त्रयीति प्रश्ने तदुत्तरमाह—**जातिरिति**—जातिर्जन्म, जरा वृद्धत्वम् मृतिः मरणम् एतत्त्रयी पुंसां संसृतिकारणं भवहेतुः भवति। एषा त्रयी यतस्त्रय्याः यस्याः त्रय्याः सम्यग्दर्शनज्ञान-

चारित्रकायास्त्रय्या: क्षीयते सा त्रयी बुद्धिमतां मता प्रशस्या। रत्नत्रयम् एव त्रयीनामधेयं तदेव जन्मजरामृतित्रयीं विनाशयेत् न ऋक्सामयजुषां त्रयी संसारक्षयकारणम् ॥८८५॥ मुनेर्ब्राह्मणत्वमाह—**अहिंस इति**—अहिंसः न हिनस्तीति अहिंसः प्राणिघातदूरो दयालुः। सद्व्रतः सन्ति व्रतानि यस्य सः सन्ति सम्यग्दर्शनवन्ति, अथ च सन्ति निरतिचाराणि व्रतानि यस्य सः। ज्ञानी सम्यग्ज्ञानी चतुर्णां प्रथमाद्यनुयोगानां ज्ञाता। निरीहः निस्पृहः। निष्परिग्रहः निर्ममत्वरतः। स सत्यं ब्राह्मणः स्यात् भवेत् न तु जातिमदान्धलः अहं जात्या श्रेष्ठः इति गर्वेण मदोद्धुरः ब्राह्मणो न भवेत् ॥८८६॥ का जातिरिति प्रश्ने उत्तरमाह—**सेति**—यस्याः सद्धर्मसंभवः यस्या जातेः सकाशात् परलोकाय पर उत्तमः लोकः स्वर्गादिः तस्मै परलोकाय उत्तमस्वर्गादिलाभाय सद्धर्मसंभवः समीचीनरत्नत्रयधर्मस्य संभवः उत्पत्तिः स्यात् सा जातिः उत्तमेत्यर्थः। शुद्धा भूः यदि बीजवर्जिता स्यात् तर्हि सा न हि सस्याय जायेत धान्योत्पत्त्यै न भवेत्। केचन जना उत्तमजातौ जन्म लब्ध्वापि धर्मविहीना एव कालं यापयन्ति, केचन च हीनजातौ समुत्पन्ना अपि तज्जात्युचितं धर्मं पालयित्वा स्वहितं साध्नुवन्ति अतः धर्मपरिपालनं भवेत् सा जातिः उत्तमा ज्ञेया। हीनजातौ जनित्वापि तज्जातियोग्यं धर्मं पालयन् यो नरो म्रियते सोऽन्यभवे उच्चां जातिं सद्धर्मवती लभते ॥८८७॥ के शैवबौद्धादयः इति प्रश्ने उत्तरं दीयते—**स शैव इति**—यः शिवज्ञात्मा शिवं मुक्त्युपायं सद्दृष्टिज्ञानवृत्तानि जानाति तथाभूत आत्मा शैवः। यः अन्तरात्मभुत् सः बौद्धः अन्तरात्मानं बुध्यतीति अन्तरात्मभुत्। किमन्तरात्मनः स्वरूपम्। उच्यते चित्तदोषात्मविभ्रान्तिरन्तरात्मा चित्तं च विकल्पः दोषाश्च रागादयः आत्मा च शुद्धं चेतनाद्रव्यम्, तेषु विगता विनष्टा भ्रान्तिर्यस्य स चित्तं चित्तत्वेन बुध्यते। दोषांश्च दोषत्वेन। आत्मानम् आत्मत्वेनेत्यर्थः। एतादृशं निजस्वरूपं यः बुध्यते जानाति स बौद्धः भवति। कस्तर्हि सांख्यः यः प्रसंख्यावान् स सांख्यः, प्रकर्षेण संशयविपर्ययानध्यवसायरहितं यथा स्यात्तथा द्रव्यगुणपर्यायान् संख्याति वर्णयति इति प्रसंख्यावान् सांख्यो भवेत्। स द्विजः यो न जन्मवान् यः पुनः जन्मवान् न भवति स द्विजः। यः कुलीनायां मातुरुत्पद्य कृतोपनयो गुरुणा तत्त्वज्ञानं लम्भितः प्राप्तः द्वितीयजन्मा—लब्धसंस्कारजन्मा दीक्षित्वा कर्मक्षयं करोति तृतीयं जन्म न लभते स द्विज इत्युच्यते ॥८८८॥ दानायोग्यत्वमाह—**ज्ञानहीनेति**—ज्ञानेन सम्यग्ज्ञानेन हीनः ज्ञानहीनः। दुराचारः दुष्टः आगमविरुद्धाः आचाराः कार्याणि यस्य सः, स्वच्छन्दं प्रवृत्तः। निर्दयः दयारहितः। लोलुपाशयः पञ्चेन्द्रियविषयेषु लम्पटः। तथा अक्षेति—अक्षाणि इन्द्रियाणि तानि अनुमता अनुमृता क्रियाः गमनभोजनादिक्रिया यस्य एतादृशो यः मुनिः स्यात् स दानयोग्यः कथं स्यात्। स मुनिर्दानानर्हः इति विज्ञेयः ॥८८९॥ भिक्षाचातुर्विध्यमाह—अनुमान्या, समुद्देश्या, त्रिशुद्धा तथा भ्रामरी इति भिक्षा चतुर्विधा चतुःप्रकारा ज्ञेया। कयोरियं चतुर्विधा भिक्षेत्याह—यतिद्वयसमाश्रया देशयतिविषयिणी महाव्रतिविषयिणी च अनुमान्या भिक्षा दशप्रतिमापर्यन्ता। समुद्देश्या आमन्त्रणपूर्विका षट्प्रतिमापर्यन्ता। एकादशप्रतिमाधारकस्य भिक्षा 'त्रिशुद्धे'ति नाम लभते। मुनिभिक्षाया नाम भ्रामरीति ज्ञेयम्। दातृजनबाधया विना कुशलो मुनिर्भ्रमरवदाहरतीति तस्य भिक्षा भ्रामरीति नामाश्नुते ॥८९०॥

इत्युपासकाध्ययने यतिनामनिर्वचनश्चतुश्चत्वारिंशः कल्पः ॥४४॥

## ४५. सल्लेखनाविधिर्नाम पञ्चचत्वारिंशः कल्पः।

[ पृष्ठ ३२२-३२५ ]—अन्त्यविधि—सल्लेखनाविधिमाह—**तरुदलेति**—कदा सल्लेखना विधेयेति प्रश्ने व्याचष्टे—परिपक्वं तरुदलमिव जीर्णावस्थां प्राप्तं शिथिलवृन्तं वृक्षपर्णमिव। स्नेहविहीनं स्नेहेन तैलेन विहीनं रहितं दीपमिव। स्वयमेव विनाशोन्मुखं पतनावस्थां प्रति अनुसरन्तं देहं शरीरम् अवबुध्य ज्ञात्वा। अन्त्यं विधिं सल्लेखनाख्यं करोतु ॥८९१॥ **गहनेति**—शरीरस्य देहस्य विसर्जनं त्यागः गहनं कठिनं नहि। किंतु

इह वृत्तं चारित्रं चारित्रपालनं गहनं कठिनं वर्तते । तत् तस्मात्कारणात् स्यास्नु चिरकालं स्थातुं योग्यं शरीरमिदं न विनाश्यं नाशयितुं न योग्यम् । यदा तु शरीरम् धर्मसाधनायालं समर्थं न भवति तदा सल्लेखनां विधाय देह-त्याग उचितः । अन्यथा सल्लेखनाकरणम् आत्मघातसमं स्यात् । यदा तु तच्छरीरं नश्वरम् पतनाभिमुखं भवति तदा न शोच्यम् । धैर्येण धर्मरक्षणार्थं सल्लेखना विधेया । अतः उक्तं चरितं गहनं न शरीरहानमिति ॥८९२॥ **प्रतिदिवसमिति**—दिवसं दिवसं प्रति प्रतिदिवसम्, अनुदिनम् । प्रत्यहम् । वपुः विजहद्बलं बलं सामर्थ्यं विजहाति त्यजति यत् तत् शरीरं विजहद्बलम् । विनश्यत्सामर्थ्यम् इति भावः । उज्झद्भुक्तिं उज्झति त्यजति भुक्तिं भोजनं यत् तच्छरीरम् अगृह्णदाहारम् । त्यजत्प्रतीकारं परिहरद्रक्षणोपायम् । एतदवस्थं वपुः शरीरं नृणां मनुजानां श्रावकाणां मुनीनां वा, चरमचरित्रोदयं चरमम् अन्त्यं चरित्रोदयं सल्लेखनोत्पत्तिरूपं समयं कालं निगदति कथयति । एतदवस्थं यदा शरीरं भवति तदा सल्लेखना कार्येति व्यक्तीकृतं सूरिणा ॥८९३॥ पापकृतेः सविधेव पापकार्यस्य संनिकटेव, पापकार्यस्य समीपमागतेव, जरा वृद्धावस्था । कीदृशी सा जनिताखिलेति—जनितः उत्पादितः अखिलस्य सर्वस्य कायस्य देहस्य कम्पनातङ्कः वेपथुरोगो यया सा जरा यदि यमदूतीव यमस्य वार्ताहरेव समागता आगता तर्हि जीवितेषु प्राणेषु कः तर्षः का तृष्णा कोऽभिलाषः । तदा गृहस्थेन मुनिना निरभिलाषेण भाव्यम् ॥८९४॥ **कर्णान्तेति**—यदि चेत् जरया वृद्धावस्थया कर्णान्ते श्रवणयुगस्य समीपे केशपाशस्य ग्रहणस्य विधिः बोधितोऽपि प्रकटीकृतोऽपि ज्ञापितोऽपि मानवः स्वस्य हितैषी न भवति निजहितेच्छां न कुरुते तर्हि मृत्युः तं किं न ग्रसते । न भक्षयति किम् अपि तु भक्षयत्येव ॥८९५॥ **उपवासादिभिरिति**—उपवासैः आहारकर्शनेन, स्निग्धपानपरिहापनेन, खरपानेन, तस्यापि हापनेन इत्यादिभिः अन्नहापनप्रकारैः अङ्गे कृतसल्लेखनकर्मा शरीरे कृतं सल्लेखनकर्म येन सः सम्यक् शान्तेन मनसा लेखनम् उपवासादिभिः शरीरकर्शनं कायसल्लेखना, तत् सल्लेखनकर्म येन कृतं स कृतसल्लेखनकर्मा । कषायदोषे च क्रोधादिककषायदोषे च कृतसल्लेखनकर्मा सम्यक्कृशीकृतकषायकर्मा गणमध्ये चतुःसंघमध्ये प्रायाय यतेत । अनशनाय उपवासाय यतेत प्रयत्नं कुर्यात् आमरणं सावधिकं वा उपवासं कुर्यादिति ॥८९६॥ **यमनियमेति**—यमः आमरणं भोगोपभोगादित्यागः । नियमः परिमितकालं तयोस्त्यागः । स्वाध्यायः वाचना-पृच्छनादिपञ्चविधः । तपांसि अनशनादिकं बाह्यं षड्विधं तपः । प्रायश्चित्तादिकं षड्विधम् आभ्यन्तरं तपः । देवार्चनाविधिः देवस्य जिनप्रभोः पूजाभिषेकादिकम् । दानं त्रिविधपात्रेभ्य आहारादिदानम् । एतत्सर्वं निष्फलं भवेत् । कदा चेत् अवसाने मनः मलिनं स्यात् । मृतिसमये चित्तम् आर्तरौद्रादिध्यानेन मलिनं कलुषितं स्यात् ॥८९७॥ **द्वादशेति**—नृपः द्वादशवर्षाणि यावत् शस्त्राभ्यासं कृत्वा यदि रणेषु समरेषु स मुह्येत् प्रमाद्येत्। तर्हि तस्यास्त्रविधेः तस्य अस्त्रशिक्षणस्य किं स्यात् किं फलं भवेत् । तत्सर्वं विफलं भवेत् । तथा यतेः पुराचरितं यमनियमस्वाध्यायादिकं सर्वं प्रागाचरितम् आचरणं विफलं भवेत् । अतोऽवसाने परिणामेषु नैर्मल्येन भाव्यम् ॥८९८॥ **स्नेहं विहायेति**—बन्धुषु ज्ञातिबान्धवेषु स्नेहं विहाय त्यक्त्वा । मोहं विभवेषु संपत्सु त्यक्त्वा अहिते कलुषतां द्वेषं विहाय त्यक्त्वा । गणिनि निर्यापकाचार्ये निखिलं सकलं दुरीहितं दुश्चेष्टितं निवेद्य कथयित्वा । तदनु तदनन्तरम् उचितं विधिं निर्यापकाचार्येण कथितम् उचितं योग्यं विधिं सल्लेखनाचारविशेषं भजतु आश्रयतु ॥८९९॥ सल्लेखनाचारविशेषं निगदति—**अशनमिति**—क्रमेण अशनम् अन्नं हेयं वर्जनीयम्। तदनन्तरं स्निग्धं पानं दुग्धादिकं विवर्ध्य तदपि हेयम् । ततः खरं पानं काञ्जिकादिकं शुद्धपानीयरूपं वा विवर्ध्य तदपि हेयम् । तदनु सर्वनिवृत्तिं सकलत्यागं चतुर्विधाहारत्यागम् उपवासम् अपि कुर्यात्, कथंभूतः सन् गुरुपञ्चकस्मृतौ निरतः अर्हत्सिद्धाचार्योपाध्यायसाधूनां पञ्चपरमेष्ठिनां नामस्मरणे निरतः तत्परः सन् ॥९००॥ **कदलीघातवदिति**—यथा परश्वादिना कदलीतरुरेकप्रहारेणैवोन्मूल्यते तथा दुर्निवाररोगशस्त्रप्रहारादिना सकृदेव अक्रमेण आयुषि जीविते विरतिम् उपयाति विनाशोन्मुखतां गच्छति सति, केषां कृतिनां पुण्यवताम् । तत्र अकस्मात् आयुर्विरमणकाले एष सल्लेखनाविधिर्नास्ति 'आहारं त्यक्त्वा स्निग्धं विवर्धयेत्, तदपि त्यक्त्वा खरपानं पूरयेत्' इत्यादिरूपः क्रमेणान्नादित्यागविधिर्नास्ति । तदेव ग्रन्थकृदेवमाह—यत् दैवे प्रयत्नासाध्ये क्रमविधिः सल्लेखनाविषयोक्तः नास्ति । न भवति कदलीघातमरणे अहं चतुर्विधाहारं

त्यजामीति संगरेण समाधिमरणं करोति ॥९०१॥ सूराविति—सूरौ निर्यापकाचार्ये। प्रवचनकुशले आराधना-शास्त्रनिपुणे व्याख्यानकुशले च। साधुजने परिचारकमुनिगणे यत्नकर्मणि वैयावृत्यकरणदक्षे निरलसे च सति। चित्ते च सल्लेखनाराधकस्य मनसि समाधिरते रत्नत्रये धर्मध्याने चतुराराधनरते च स्थिते सति। यतः किमिहासाध्यम् इह लोके असाध्यं दुष्करं किमस्ति ॥९०२॥ सल्लेखनातिचारान् वक्ति—जीवितेति—जीविताशंसा, जीविताभिलाषा प्रत्याख्यातचतुर्विधाहारस्यापि मे जीवितमेव श्रेयः यत एवं विधा मदुद्देशेनेयं विभूतिर्वर्तते इत्याकाङ्क्षेति यावत्। मरणाशंसा रोगोपद्रवाकुलतया प्राप्तजीवनसंक्लेशस्य मरणं प्रति चित्तप्रणिधानम्। अथवा यदा न कश्चित्तं प्रतिपन्नानशनं प्रति सपर्यया आद्रियते। न च कश्चिच्छ्लाघते, तदा तस्य यदि शीघ्रं म्रियेय तदा भद्रकं भवेत् इत्येवं विविधपरिणामोत्पत्तिर्वा। सुहृदनुरागः बाल्ये सहपांसुक्रीडनादि, व्यसने सहायत्वम्, उत्सवे संभ्रमः इत्येवमादेश्च मित्रसुकृतस्यानुस्मरणम्, बाल्याद्यवस्थासहक्रीडितमित्रानुस्मरणं वा। सुखानुबन्धविधिः एवं मया भुक्तम्, एवं मया शयितम्, एवं मया क्रीडितमित्येवमादिप्रीतिविशेषं प्रति स्मृतिसमन्वाहारः। एते सनिदानाः अस्मात्तपसो दुश्चरात् जन्मान्तरे इन्द्रश्चक्रवर्ती धरणेन्द्रो वा स्यामहमित्येवमाद्यनागताभ्युदयाकांक्षा। एते पञ्च सल्लेखनाहानये स्युः सल्लेखनायाः हीनत्वाय भवेयुः ॥९०३॥ सल्लेखनाराधनायाः फलमाह—आराध्येति—इत्थं रत्नत्रयम् आराध्य भावयित्वा। गणिने निर्यापकाचार्याय। समर्पितात्मा समर्पितः दत्तः आत्मा येन सः तदधीनो भूत्वा तदाज्ञामनुसृत्य प्रवर्तमानः। अर्थी सल्लेखनाकामः यथावत् समाधिभावेन विधिमनुसृत्य धर्मध्यानपरिणत्या कृतात्मकार्यः कृतम् आत्मकार्यं सल्लेखनाख्यं येन सः कृती पुण्यवान् धन्यः जगन्मान्यपदप्रभुः स्यात्। जगतां मान्यं पूज्यं यत्पदं स्थानं तीर्थकरत्वं तस्य प्रभुः स्यात् भवेत् ॥९०४॥

इत्युपासकाध्ययने सल्लेखनाविधिर्नाम पञ्चचत्वारिंशः कल्पः ॥४५॥

## ४६. प्रकीर्णकविधिर्नाम षट्चत्वारिंशत्तमः कल्पः।

[ पृष्ठ ३२५-३२८ ] विप्रकीर्णेति—विशेषेण प्रकीर्णानाम् इतस्ततः विस्तृतानां वाक्यानाम् अथवा अवशिष्टानाम् अनुक्तानाम् अर्थवाक्यानां प्रयोजनभूतवाक्यानाम् उक्तिः प्रतिपादनं प्रकीर्णकम् उक्तम्। कैः प्रकीर्णकं उक्तम् इति प्रश्ने आह—उक्तेति—उक्ताः कथिताः अनुक्ताः अकथिताः उपदिष्टानुपदिष्टा इति। ये अमृतस्यन्दबिन्दवः अमृतवत् आनन्दजनकत्वात् उक्तानुक्तार्थवाक्यानि अमृतमेव तस्य गलतां बिन्दूनां आस्वादे कोविदैः प्रकीर्णकस्य लक्षणम् उक्तम् ॥९०५॥ कीदृग्गुणो नरः धर्मकथापरो भवतीत्याह—अदुर्जनत्वमिति—दुर्दुष्टो जनः दुर्जनः तस्य भावः दुर्जनत्वं कृतघ्नत्वम् न दुर्जनत्वम् अदुर्जनत्वं कृतोपकारस्मरणाख्यो गुणः अदुर्जनत्वम्। विनयः गुणिजनेषु आदरः। विवेकः हिताहितविमर्शशक्तिः। परीक्षणं पूर्वापरालोचनम्। तत्त्वविनिश्चयश्च जीवादितत्त्वानां यथागमं स्वरूपनिर्णयः। एते पञ्चगुणाः यस्य भवन्ति स आत्मवान् विकारावशः पुरुषः धर्मकथापरः धर्मोपदेशने तत्परो भवेत् ॥९०६॥ के दोषास्तत्त्वावबोधे प्रतिबन्धकाः आह—असूयकत्वमिति—गुणेषु मत्सरोऽसूयकत्वम्। शठता पुरः प्रियं भाषणं पश्चात् विप्रियोत्पादनम्। अविचारः अविवेकः, दुराग्रहः दुष्टाभिप्रायः, सूक्तविमानना सूक्तस्य सतां भाषितस्य विमानना अवहेलना अवज्ञा, अमी पञ्चदोषाः तत्त्वावबोधप्रतिबन्धनाय भवन्ति। यथार्थवस्तुस्वरूपज्ञानबाधाहेतवे भवन्ति ॥९०७॥ संशयितमूढयोः प्रवृत्तेः असाफल्यं दर्शयति। पुंस इति—यथा संशयिताशयस्य चलितप्रतिपत्तिमतः पुंसो नरस्य काचित् प्रवृत्तिः किमपि कार्यं सफलं न भवेत्। तथा धर्मस्वरूपेऽपि विमूढबुद्धेः विमूढा बुद्धिर्यस्य सः विमूढबुद्धिः तस्य धर्मस्वरूपानभिज्ञस्य जडमतेरित्यर्थः तथाभूतस्य पुरुषस्य काचित् प्रवृत्तिः सफला न भवेत् विपरीतकार्यकरणात् ॥९०८॥ अष्टमदानाह—जातिपूजेति—जातिः मातृकुलम्। पूजा लोकादरः। कुलं पितृवंशः। ज्ञानं शास्त्रावबोधः। रूपं सौन्दर्यम्। संपत् ऐश्वर्यम्। तपः व्रताद्याचरणम्, बलं शरीरपराक्रमः। एतस्मिन्वस्तुनि अहंयुतोद्रेकम् अभिमानस्य उत्कटतां मदं गर्वं वदन्ति। के अस्मयमानसाः गर्वरहितचेतसः

॥९०९॥ सगर्वो नरो धर्मघातकः—य इति—यः नरः मदात् गर्वात् जात्याद्यभिमानवशो भूत्वेति भावः, समयस्थानां जिनधर्मे स्थितानां तत्पराणां नृणां अवह्लादेन अवज्ञया मोदते तुष्यति । स पुरुषः नूनं सत्यं धर्महा जिनधर्मघातकः भवति । यस्मात् धर्मः धार्मिकैः विना न भवति । धार्मिकाणाम् अवमाननात् धर्मो नष्टो भवति ॥९१०॥ श्रावकाणां षट्कर्माणि—देवसेवेति—देवस्य जिनेन्द्रस्य सेवा स्नपनं पूजनं स्तोत्रं जपो ध्यानं श्रुतस्तवः इति षड्विधा भवति । गुरूपास्तिः गुरोः निर्ग्रन्थाचार्यस्य उपास्तिः पूजा । स्वाध्यायः श्रुतस्य धर्मशास्त्रस्य पठनम् ज्ञानभावनालस्यत्यागः स्वाध्यायः स च वाचनादिभेदात्पञ्चधा । संयमः व्रतधारणम् तपः अनशनादिकं दानं त्रिविधपात्रेषु आहारौषधशास्त्राभयवितरणम् । इति गृहस्थानां श्रावकाणां षट्कर्माणि दिने दिने प्रतिदिवसम् आचरणीयानि कार्याणि ॥९११॥ श्रावकाणां षट्क्रिया आह—स्नपनम्—जिनेन्द्रस्य आह्वानस्थापनसंनिधीकरणपूर्वकं पञ्चामृतैर्यथागमम् अभिषेचनम् । पूजनं जलाद्यष्टद्रव्यैः जिनेश्वरस्य यजनम् । स्तोत्रं भगवतो गुणाना गद्यपद्याभ्यां पठनम् । जपः मनसा वाचा वा जिननामावर्तनम् । ध्यानं जिनगुणेषु कस्मिंश्चिद्गुणे मनसः एकाग्रचिन्तानिरोधो ध्यानम् । श्रुतस्तवः जिनमुखोद्भूतायाः श्रुतदेवताया गुणवर्णनं श्रुतस्तवः । इति षोढा क्रियाः देवसेवासु गेहिनां गृहिणाम् उदिता उक्ताः ॥९१२॥ कः श्रेयःप्राप्तिकरो गणः इत्याह—आचार्योपासनमिति—धर्माराधने प्रयोक्तृणां गुरूणाम् उपासनम् आदरः पूजनम् । श्रद्धा आप्तागमतपोभृतां परमार्थानां रुचिः । शास्त्रार्थस्य विवेचनम् जिनागमप्रोक्तानां जीवादितत्त्वानां बालावबोधिन्या सरलया भाषया अविरोधेन स्वरूपप्रतिपादनम् । तत्क्रियाणा देवसेवादीनां षण्णां क्रियाणाम् अनुष्ठानम् आचरणम् । श्रेयःप्राप्तिकरः मुक्तिप्राप्तिकरः गणः ज्ञातव्यः ॥९१३॥ गुरुसंनिधौ कथंभूतः श्रावकोऽधीते इत्याह—शुचिरिति—स्नानशुद्धः। विनयसम्पन्नः प्रश्रयतत्परः । तनुचापलवर्जितः शरीरचञ्चलत्वेन रहितः गुरुसंनिधौ हस्तपादं न प्रसारयेत्, करेण करताडनम्, गात्रभञ्जनम् इत्यादिकं चाञ्चल्यं परिहरेत् । अष्टदोषविनिर्मुक्तम् अष्टभिर्दोषैः रहितं यथा स्यात्तथा अधीतम् अध्ययनं कर्तव्यम् । अध्ययनस्य केऽष्टविधा दोषा उच्यन्ते ज्ञानाचारस्वरूपवर्णनसमये तस्य अष्टौ भेदाः प्रतिपादिता आगमे । तेषां सम्यक् पालन भवति न यदा तदा तावन्तो दोषा जायन्ते । तेषां नामानि—१ अकालपठनम्, २ अविनयः, ३ अवग्रहविशेषं विना पठनम्, ४ अबहुमानः, ५ निह्नवनम् ६ व्यञ्जनाशुद्धिः, ७ अर्थाशुद्धिः ७ उभयाशुद्धिश्च ॥९१४॥ स्वाध्यायस्वरूपमाह—अनुयोगेति—अनुयोगाश्चत्वारो वक्ष्यमाणाः । गुणस्थानानि चतुर्दश । मार्गणाश्चतुर्दश । स्थानानि जीवसमासाश्चतुर्दश । कर्मसु एतेषु विषयेषु पाठः स्वाध्यायः उच्यते । तथा अध्यात्मतत्त्वविद्यायाः अध्यात्मविद्या निश्चयनयेन जीवस्य यत् शुद्धावस्थावर्णनम् तस्याः, तत्त्वविद्यायाः जीवादिसप्ततत्त्वानां च यज्ज्ञानं सा तत्त्वविद्या अनयोर्विद्ययोः पाठः हितरूपम् अध्ययनं स स्वाध्याय उच्यते ॥९१५॥ प्रथमानुयोगस्वरूपमाह—गृह्णाति—धर्मधीः धर्मे क्षमादिदशलक्षणे धीः यस्य सः । गृह्णी यतः यस्मात् स्वसिद्धान्तं जिनधर्मसिद्धान्तं साधु सम्यक् बुध्येत जानीयात् सः अनुयोगः प्रथमाभिख्यः प्रथमानुयोगः । (प्रश्नोत्तरम् अनुयोगं वदन्ति) कथंभूतः प्रथमानुयोगः पुराणचरिताश्रयः पुराणं पुराभवम् अष्टाभिधेयं त्रिषष्टिशलाकापुरुषकथाशास्त्रम् । लोकदेशपुरराज्यतीर्थदानैः सह तपोद्वयस्य प्रतिपादकत्वात् अष्टाभिधेयम् । चरितम् एकपुरुषाश्रिता कथा । पुराणचरितानाम् आश्रयः आधारभूतः ॥९१६॥ करणानुयोगमाह—अधोमध्योर्ध्वलोकेष्विति—अधोलोके रत्नप्रभादयः सप्त पृथिव्यः सन्ति । मध्यलोकः असंख्यातद्वीपसमुद्राश्रयः । ऊर्ध्वलोकः स्वर्गलोकः सिद्धलोकोपेतः । एषु त्रिषु लोकेषु चतुर्गतिविचारणं चतसृणां गतीनां नारकतिर्यग्नरदेवाभिधानानां विचारणं सविस्तरप्रतिपादनम्, करणं शास्त्रम् इत्याहुः करणानुयोगमाहुरित्यर्थः । अनुयोगः परीक्षणं प्रश्नोत्तरपरीक्षणम् ॥९१७॥ चरणानुयोगस्वरूपमाह—ममेदमिति—मम इदम् अनुष्ठानम् अणुव्रतात्मकं महाव्रतात्मकं वा आचरणम् । तस्य अयं रक्षणक्रमः अतिचारादिभ्योऽवनं भावनाभिश्च संवर्धनम् इत्थम् एवंविधम् आत्मा स्वरूपं यस्य स चरित्रार्थः अनुयोगः चरित्रम् अर्थः प्रयोजनं यस्य स चरणानुयोगः । चरणाश्रितो चारित्राधारोऽवबोद्धव्यः ॥९१८॥ द्रव्यानुयोगमाह—जीवाजीवेति—द्रव्यानुयोगतः द्रव्यानुयोगशास्त्रात् किं फलं लभ्यते श्रावकेणेति आह—जीवाजीवपरिज्ञानं जीवस्य अजीवस्य च धर्माधर्माकाशकालपुद्गलानां च परिज्ञानं बोधो भवति । धर्माधर्मविबोधनं पुण्यापुण्ययोः ज्ञानम् । बन्धमोक्षज्ञता आत्मकर्मणोरन्योन्यसंश्लेषलक्षणो बन्धः । बन्ध-

हेत्वभावनिर्जराभ्यां कृत्स्नकर्मविप्रमोक्षो मोक्षः इति बन्धमोक्षयोः ज्ञातृत्वं फलं जायते ॥९१९॥

[ पृष्ठ ३२६–३३२ ] जीवस्थानादिकानां बोध्यत्वमाह—जीवस्थानेति—जीवस्थानमिति जीवसमासानामियं संज्ञा ज्ञेया। तानि च चतुर्दश यथा एकेन्द्रियसूक्ष्मपर्याप्तः। एकेन्द्रियसूक्ष्म अपर्याप्तः। एकेन्द्रियबादरपर्याप्तः। एकेन्द्रियबादरापर्याप्तः। इति चत्वार एकेन्द्रियजीवेषु समासाः अत्र चतुर्षु एते जीवाः सम्यगासते। द्वीन्द्रियेषु द्वौ जीवसमासौ—द्वीन्द्रियबादरपर्याप्तः। द्वीन्द्रियबादरापर्याप्तः। त्रीन्द्रियबादरपर्याप्तः त्रीन्द्रियबादरापर्याप्तः। इति त्रीन्द्रियजीवानां द्वौ। चतुरिन्द्रियबादरपर्याप्तः। चतुरिन्द्रियबादरापर्याप्तः। इति चतुरिन्द्रियात्मनां द्वौ। पञ्चेन्द्रियाणां चत्वारो जीवसमासा एवम् – पञ्चेन्द्रियसंज्ञिपर्याप्तः। पञ्चेन्द्रियसंज्ञ्यपर्याप्तः। पञ्चेन्द्रियासंज्ञिपर्याप्तः। पञ्चेन्द्रियासंज्ञ्यपर्याप्तः, एवं जीवसमासाश्चतुर्दश। गुणस्थानानि च चतुर्दश–तानि यथा—मिथ्यात्वम्, सासादनम्, मिश्रम्, अविरतसम्यग्दृष्टिः, संयतासंयतम्, प्रमत्तविरतम्, अप्रमत्तविरतम्, अपूर्वकरणम्, अनिवृत्तिकरणम्, सूक्ष्मसाम्परायम्, उपशान्तमोहम्, क्षीणमोहम्, सयोगकेवलि, अयोगकेवल्याख्यमिति। मार्गणाश्चतुर्दश, ता यथा—गतिः, इन्द्रियाणि, कायः, योगाः, वेदाः, कषायाः, ज्ञानानि, संयमाः, दर्शनानि, लेश्याः, भव्यः, सम्यक्त्वम्, संज्ञिनः, आहारः इति। जीवस्थानगुणस्थानमार्गणास्थानानि गच्छतीति जीवस्थानगुणस्थानमार्गणास्थानगः विधिः प्रत्येकं चतुर्दश प्रकारः ज्ञातव्यः। यथागमम् आगमानतिक्रमेण ॥९२०॥ चतसृषु गतिषु गुणस्थानान्याह—आदिम इति—आदिगुणस्थानं मिथ्यात्वमारभ्येति। तिर्यक्षु पशुषु पञ्च। मिथ्यात्वं, सासादनं, मिश्रम्, अविरतसम्यग्दृष्ट्याख्यं, संयतासंयतं चेति। श्वभ्रनाकिनोः नारकदेवयोः आद्यानि चत्वारि ज्ञेयानि। नृषु चैव चतुर्दश मनुष्येषु चतुर्दश मिथ्यात्वमारभ्य अयोगकेवलिपर्यन्तानि भवन्तीति मन्यन्ते ॥९२१॥ ततो वर्णयति–पद्याभ्याम्—अनिगूहितेति—अनिगूहितम् अनिह्नुतं वीर्यम् आत्मसामर्थ्यं येन स तस्य अनिगूहितवीर्यस्य पुरुषस्य यतेः श्रावकादेश्च कायक्लेशः तपः स्मृतं प्रोक्तम्। तच्च मार्गो रत्नत्रयं तस्य अविरोधेन विरोधमकृत्वा रत्नत्रयमनुसृत्येति भावः। गुणाय आत्मिकगुणोत्कर्षाय, जिनैर्गदितम्। अथवा—अन्तरिति—तत्तपः अन्तर्बहिर्मलप्लोषात् अन्तर्मलो रागादयः बहिर्मलः रसरक्तादयः। उभयोर्मलयोः प्लोषात् दाहात् आत्मनः शुद्धिकारणं जीवस्य। नैर्मल्यहेतुर्यत् शारीरं मानसं कर्म अनशनादिकरणं शारीरं कर्म। प्रायश्चित्तादिकरणं मानसं कर्म। तथाभूतं द्विविधं कर्म तपोधनाः तपः प्राहुः तपांसि एव धनं येषां ते तपस्विनः महातपस्विनः इत्यर्थः ॥९२२-९२३॥ संयममाह—कषायेति—कषायाणां क्रोधमानमायालोभानां विजयः स्ववशीकरणम्। इन्द्रियाणां विजयो विनिग्रहः, इन्द्रियविषयेभ्यो इन्द्रियाणां मनसश्च व्यावर्तनं कृत्वा चैतन्यात्मनि प्रवर्तनं विजयः। दण्डानां च विजयः दण्डा इव दण्डाः अशुभमनोवाक्कायाः परपीडाकरत्वात्, तेषां विजयः अशुभमनोवाक्कायप्रवृत्तिभ्य आत्मनो निवारणम्। व्रतपालनम् पञ्चानाम् हिंसासत्यचौर्यमैथुनपरिग्रहेभ्यो विरतिः, तत्तद्व्रतभावनानां च व्रतस्थैर्यार्थं पालनम् एतत्सर्वमाचरणं संयमः संयमाख्यं षट्कर्मसु पञ्चमं कर्म। अयं संयमः संयतैः मुनिभिः श्रेयः श्रयितुमिच्छतां प्रोक्तः मोक्षमाश्रयितुम् इच्छतां प्रोक्तः कथितः ॥९२४॥ अधुना कषायस्य निरुक्तिपूर्वकं वर्णनं क्रियते—कषन्तीति—कषन्ति सन्तापयन्ति दुर्गतिसंगसंपादनेनात्मानमिति कषायाः क्रोधादयः। कषायेभ्यः दुर्गतयः प्राप्यन्ते। तत्र च आमरणं जीवानां संतापो भवति। अथवा यथा विशुद्धस्य वस्तुनः नैयग्रोधादयः कषायाः कालुष्यकारिणः तथा निर्मलस्यात्मनो मलिनत्वहेतुत्वात्कषाया इव कषायाः। न्यग्रोधस्य वटस्य कषायो रसः नैयग्रोधः स आदौ येषां ते रसाः नैयग्रोधादय उच्यन्ते। वटप्लक्षोदुम्बरादीनां कषायाः वस्त्रे लग्नाः तस्य निर्मलता विलोपयन्ति। तथा निर्मलस्यात्मनः कषाया रागादीञ्जनयन्तो मालिन्यमुत्पादयन्ति। क्रोधलक्षणम्—स्वपरापराधाभ्याम् आत्मेतरयोः अपायोपायानुष्ठानम् अशुभपरिणामजननं वा क्रोधः। स्वस्य अपराधेन अपरस्य वा अपराधेन स्वस्य इतरस्य वा अपायस्य विनाशस्य उपायानुष्ठानम् उपायविधानम् अशुभपरिणामोत्पादनं वा क्रोधः। विद्याविज्ञानैश्वर्यादिपूजाव्यतिक्रमहेतुरहंकारो युक्तिदर्शनेऽपि दुराग्रहापरित्यागो वा मानः। विद्या मन्त्रादिज्ञानम्। विज्ञानं शिल्पादिज्ञानम्। ऐश्वर्यं विपुला धनधान्यादिका संपत्। आदिशब्देन कुलजातितपःशरीरसौन्दर्यबलानां ग्रहणम्। विद्याविज्ञानादिभिः पूज्यानां ज्ञानवयस्तपोभिर्वृद्धानां श्रेष्ठानां पूजायाः व्यतिक्रमे हेतुः कारणं या चित्तसमुन्नतिः अहंकारः। अथवा युक्तेः

परिज्ञानेऽपि दुराग्रहस्यापरित्यागः अपरिहरणं वा मानः । मनोवाक्कायक्रियाणाम् अयाथातथ्यात् परवञ्चनाभिप्रायेण प्रवृत्तिः माया । मनसः वाचः कायस्य चित्तस्य भाषणस्य शरीरस्य च याः क्रियाः कार्याणि तासाम् अयाथातथ्यात् यथार्थरूपत्वाभावात्, असरलरूपत्वात् परेषां लोकानां वञ्चनाभिप्रायेण प्रतारणेच्छया प्रवृत्तिः प्रवर्तनं माया कपटमित्यर्थः । अथवा ख्यातिः प्रशंसा, पूजा लोकादरः, लाभः धनधान्यादिप्राप्तिः एतेषाम् अभिवेशेन अभिप्रायेण या परप्रतारणप्रवृत्तिः सा मायेति । चेतनाचेतनेषु वस्तुषु स्त्रीदासीदासाश्वगज-गो-महिषादिषु चेतनपरिग्रहेषु, अचेतनेषु गृहवस्त्रमौक्तिकादिषु चित्तस्थः महान् ममेदं भावः ममत्वपरिणामः लोभः । अथवा तदभिवृद्ध्याशयो महानसन्तोषः क्षोभो वा लोभः । तेषां चेतनाचेतनवस्तूनाम् अभिवृद्ध्याशयः अभि समन्तात् वृद्धिः प्रवर्धनं तस्याः आशयः अभिप्रायः लोभः, अथवा महान् असन्तोषः अतीव मनसि तीव्रा गृद्धिः लोभः क्षोभो वा मनसि परिग्रहवृद्धिश्चिन्तनं लोभः । कषायाणां गुणघातित्वमाह—**सम्यक्त्वेति**—ये अनन्तानुबन्धिनः अनन्तसंसारकारणत्वान्मिथ्यादर्शनमनन्तं तदनुबन्धिनोऽनन्तानुबन्धिनः क्रोधमानमायालोभाः ते कषायकाः कुत्सिताः कषायाः कषायकाः । सम्यक्त्वम् आप्तागमपदार्थानां श्रद्धानं घ्नन्ति । अप्रत्याख्यानरूपाश्च कषायकाः यदुदयाद्देशविरतिं संयमासंयमाख्याम् अल्पामपि कर्तुं न शक्नोति अर्थात् ये कषाया देशप्रत्याख्यानं देशव्रतानि घ्नन्ति ते अप्रत्याख्यानरूपाः क्रोधमानमायालोभा विज्ञेयाः । प्रत्याख्यानस्वभावाः स्युः संयमस्य विनाशकाः । प्रत्याख्यानं कृत्स्नां संयमाख्यां विरतिं यदुदयेन जीवो न कर्तुं शक्नोति ते कषायाः प्रत्याख्यानस्वभावाः ते संयमस्य विनाशकाः स्युः भवेयुः । यथाख्याते चारित्रे संज्वलनाः क्षितिं कुर्युः स एकीभावे वर्तते संयमेन सहावस्थानात् एकीभूय ज्वलन्ति संयमो वा ज्वलत्येषु सत्स्वपि संज्वलनाः क्रोधमानमायालोभाः यथाख्याते चारित्रे क्षतिं विघातं कुर्युः विदध्युः ॥९२५-९२६॥ अनन्तानुबन्ध्यादयः क्रोधाश्चतुर्गतीर्जीवान् प्रापयन्तीत्याह—**पाषाणेति**—पाषाणलेखा, भूलेखा, रजोलेखा, वारिलेखा च तद्वत् ये क्रोधास्ते पाषाणलेखाप्रख्याः, भूलेखाप्रख्याः, रजोलेखाप्रख्या; वारिलेखाप्रख्याः, शिला-पृथ्वीधूली-जलरेखातुल्यत्वात् क्रोधश्चतुर्विधः । एते चत्वारो भेदाः अनन्तानुबन्ध्यादिषु चतुर्षु प्रत्येकं संभवन्ति । सर्वोत्कृष्टहीनहीनतरहीनतमोदयरूपाभिरनन्तानुबन्ध्यादिशक्तिभिः । एतत्क्रोधचतुष्टयं यथाक्रमं श्वभ्रतिर्यङ्नृनाकिनाम् गत्यै भवति । पाषाणरेखातुल्यः अनन्तानुबन्ध्यादिक्रोधः श्वभ्रगत्यै नारकगत्यै भवति । भूलेखाप्रख्यः अनन्तानुबन्ध्यादिक्रोधः तिर्यग्गतिप्राप्त्यै भवति । रजोरेखाप्रख्यः अनन्तानुबन्ध्यादिक्रोधः नरगतिप्राप्त्यै भवति । जलरेखासदृशः अनन्तानुबन्ध्यादिक्रोधः नाकिनां देवानां गत्यै भवेत् ॥९२७॥

[ पृष्ठ ३३३-३३६ ] चतुर्विधो मानश्चतुर्विधगतिप्रापकोऽस्तीति कथयति—**शिलास्तम्भेति**—शिलास्तम्भवृत्तिः चतुर्विधो मानः अधोगतिसंगतिकारणं भवति नरकगतिसमागमहेतुर्जायते । अस्थिवृत्तिः हीनोदयरूपः मानः पशुगतिसंगतिहेतुर्जायते । सार्द्रध्मवृत्ति जलमध्यकाष्ठसम अनन्तानुबन्ध्यादिमानः नरगतिसंगतिकारणं भवति । वेत्रवृत्तिर्मानः अनन्तानुबन्ध्यादिः स्वर्गगतिसंगतिकारणं भवति ॥९२८॥ मायाचातुर्विध्यमपि चतुर्गतिप्रापकं भवति इति भाषते । **वेणुमूलैरिति**—वंशमूलैः समाः अनन्तानुबन्ध्यादयो मायाः नरकगत्यै भवन्ति । अजाशृङ्गैः उरभ्रकविषाणैः समाः मायाः पशुगत्यै भवन्ति । गोमूत्रसमाः मायाः नरगतिकारणं भवन्ति । चामरैः समाः मायाः देवगतिप्रापिका भवन्ति ॥९२९॥ लोभचतुष्टयं चतुर्गतिलम्भकं जायते इति वदति—**क्रिमिनीलीति**—क्रिमिरागतुल्यः लोभः श्वभ्रगतिसंसारनिदानं भवति । नीलीरागसदृशः लोभः तिर्यग्गतिसंसारकारणं जायते । वपुर्लेपो देहमलः तत्तुल्यो लोभः नरगतिसंसारदायको भवति । हरिद्रारागसदृशो लोभः देवसंसारकारणं भवति ॥९३०॥ किं च क्रोधान्धस्य समाध्याद्यभावं निगदति—यथा अपथ्यसेविनः रोगानुकूलाम्लतैलादिभक्षिणः रोगिणः नरस्य औषधक्रिया अगदसेवनं रिक्ता विफला भवति तथा क्रोधनस्य कोपप्रकृतेर्नरस्य समाधिश्रुतसंयमाः ध्यानशास्त्राभ्यासव्रतपालनानि विफला भवेयुः ॥९३१॥ **मानेति**—मानः मदः एव दावाग्निः वनानलः तेन दग्धेषु । मदोपरकषायिषु इन्द्रियाणाम् उन्माथा वृत्तिर्मदः स ऊषरं क्षारत्वं तेन कषायिणः तुवररसोपेताः तेषु, नृद्रुमेषु नरवृक्षेषु सच्छायोचिताङ्कुरा सती प्रशस्ता या छाया कान्तिः तस्या उचिता योग्या ये अङ्कुराः अभिनवोद्भेदाः ते न प्ररोहन्ति । नोत्पद्यन्ते यथा क्षारभूमौ उप्तं बीजं नश्यति । कदाचित् ततोऽङ्कुरे जातेऽपि तस्य कान्तिर्म्लाना भवति तथा ये नरा

मदेन मानेन चाश्माना वर्तन्ते तेषां सच्छाया धर्मस्य प्रभावना न जायते ॥९३२॥ मायया हानिं दर्शयति—यावदिति—यावत् यावत्कालम् आत्माम्बुषु जीवजलेषु मायानिशालेशोऽपि माया कपटं सैव निशा रात्रिः तस्या लेशोऽपि अल्पांशोऽपि कृतास्पदः विहितवसतिर्वर्तते । तावत् तावत्कालं चित्ताम्बुजाकरः मनःकमलसमूहः प्रबोधश्रियं विकाशलक्ष्मीं न धत्ते न धारयति ॥९३३॥ लोभाद् गुणहानिं निगदति—लोभेति—धन्याः पुण्यवन्तो गुणाः लोभकीकसचिह्नानि लोभ एव वर्तमानकाले अर्थप्राप्तिगृद्धिः एव कीकसम् अस्थि तदेव चिह्नम् अभिज्ञानं येषां तानि चेतःस्रोतांसि मनोजलप्रवाहाः तानि दूरतः त्यजन्ति परिहरन्ति । कामिव चाण्डालसरसीमिव चाण्डालानां मातङ्गानां सरसीमिव तडागमिव ॥९३४॥ क्रोधादिशल्यानां त्यजनविधिमाह—तस्मात् इति—तस्मात् ततः । अस्मिन्मनोनिकेते अस्मिन्चित्तगेहे । इदं शल्यचतुष्टयम् । आत्मज्ञः स्वस्वरूपज्ञः मुनिर्गृहस्थश्च । क्षेमाय कल्याणाय । शमकीलकैः क्रोधादिचतुष्टयाभावकीलकैः शङ्कुभिः उद्धर्तुं यतेत निष्कासयितुं यत्नं कुर्यात् । क्षमाकीलकेन क्रोधशल्यम् । मार्दवशङ्कुना मानशल्यम् । आर्जवशङ्कुना मायाशल्यम् । शौचकीलकेन लोभशल्यं निष्कासयेत् ॥ ९३५॥ बुधैर्विषयेभ्यो मनसा सहेन्द्रियाणि व्यावर्त्यानीत्युपदिशति—षट्स्विति—षट् इन्द्रियाणि स्पर्शन-रसन-घ्राण-नयन-श्रोत्र-मनांसि तानि स्वभावादेव षट्सु अर्थेषु, विषयेषु स्पर्शेषु अष्टसु । मधुराम्लादिषु पञ्चसु रसेषु । द्वयोर्गन्धयोः । पञ्चविधेषु रक्तपीतादिवर्णेषु । सप्तसु स्वरेषु । मनस्तु एतेषु सर्वविषयेषु आसक्तिं जनयत्यतः सर्वेऽपि स्पर्शादयो विषया मनसो भवन्ति इति । तत्स्वरूपेति—तेषां विषयाणां स्वरूपाणां परिज्ञानात् बोधात् सर्वदा प्रत्यावर्तेत मुनिर्गृहस्थश्च व्यावर्तेत ॥९३६॥ विषयेभ्यो नात्मनः कुशलमिति निवेदयति—आपाते इति—तत्काले भुक्तिसमये सुन्दरारम्भैः सुन्दरो मनोहर आरम्भः आदिर्येषां ते तथाभूतैः । विपाके फलकाले विरसक्रियैः विरसा अमनोज्ञा दुःखदा क्रिया येषां तैः तथाभूतैः अन्ते दुर्गतिदानशीलैः विषैर्वा गरलैरिव विषयैः ग्रस्ते व्याकुले आत्मनि कुतः कुशलं भद्रं स्यात् ॥९३७॥ व्रतविशुद्धये व्रतिकः किं त्यजेत्, आह—दुश्चिन्तनमिति—व्रतो व्रतानि अहिंसादीनि सन्ति अस्येति व्रती । व्रतविशुद्ध्यर्थं व्रतानां विशुद्ध्यर्थम् उत्कर्षप्रापणार्थं । मनोवाक्कायसंश्रयं मनः चित्तं, वाक् भाषणं, कायः शरीरम् एषां संश्रयः अवलम्बनं यस्य तथाभूतं । दुश्चिन्तनं हिंसाद्यध्यवसायः तत् मनःसंश्रयं नाचरेत् त्यजेदित्यर्थः । दुरालापं वाक्संश्रयम् असत्यनिन्दाकलहादिदोषयुक्तं दुर्भाषणं नाचरेत् । दुर्व्यापारं च कायसंश्रयं देहाधारं परस्त्रीसंभोगादिकं नाचरेत् ॥९३८॥ किं नाम व्रतपालनमित्याह—अभङ्गेति—अभङ्गः व्रतस्य अविकलं प्रतिपालनम् । अतिचारः व्रतस्य देशभङ्गात् कियतोंऽशस्य रक्षणाच्च अतिचारो भवति । न अतिचारोऽनतिचारः व्रतस्य बाह्याभ्यन्तराभ्याम् अङ्गाभ्यां रक्षणम् अनतिचारः । यथा अहिंसाव्रतसंरक्षणे कोपं न करोति, प्राणिवधबन्धनं न करोति, दयाहीनश्च न भवति । गृहीतेषु व्रतेषु भङ्गम् अकृत्वा, अतिचारपरिहारं च कृत्वा शश्वत् आजन्म तेषु व्रतेषु रक्षणं पालनं क्रियते तत् व्रतपालनं भवेत् ॥९३९॥ यमनियमेषु यत्नकर्तव्यतामुपदिशति—वैराग्येति—यमेषु इति यमेषु अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः । यच्छति नियच्छति इन्द्रियग्राममनेनेति यमः । नियमेषु बाह्याभ्यन्तरशौचतपःस्वाध्यायप्रणिधानानि नियमाः । एतेषु नित्यं यत्नः कर्तव्यः । एतेषां पालनं सदा कर्तव्यमिति भावः । नित्यं वैराग्यभावना कर्तव्या । ये विषयाः दृष्टाः ये च श्रुताः ये चानुभूतास्तेभ्यो निवृत्ततृष्णस्य व्रतिनः मनसो वशीकरणं तस्यैव संज्ञा नाम वैराग्यमिति । तस्य नित्यं भावना अभ्यासः करणीयः । नित्यं तत्त्वविचिन्तनं कर्तव्यम् । किं नाम तत्त्वविचिन्तनम् । प्रत्यक्षेण इन्द्रियानिन्द्रियप्रत्यक्षेण, अनुमानेन, आगमेन च जिनकथितेन ये अनुभूताः ज्ञाताः जीवादिपदार्थसार्थाः ते विषया यस्याः एतादृशी या असंप्रमोषस्वभावा दृढधारणासंस्कारजाता स्मृतिः स्मरणं तत्त्वानुचिन्तनं तस्मिन्नित्यं यत्नः कर्तव्यः । एतैः कारणैर्व्रतपालनं निर्दोषं भवति ॥९४०॥

इत्युपासकाध्ययने प्रकीर्णकविधिर्नाम षट्चत्वारिंशत्तमः कल्पः ॥४६॥

[पृष्ठ ३३६] इत्येष इति—हे क्षितिपतीश्वर, क्षित्याः पृथ्व्याः पतयः स्वामिनः क्षितिपतयः भूपाः तेषाम् ईश्वरः राजराजः तत्संबोधनं हे क्षितिपतीश्वर, इति पूर्वोक्तप्रकारेण गृहिणां धर्मः प्रोक्तः (सुदत्तसूरिणा) हे क्षितिपतीश्वर, मूलोत्तरगुणाश्रयः मूलगुणाः अष्टाविंशतिः आचेलक्यादयः । उत्तरगुणाश्च चतुरशीतिलक्षणास्ते आश्रयः

आधारो यस्य स यतीनां धर्मः श्रुतात् आचाराङ्गाज्ज्ञेयः ज्ञातव्यः ॥९४१॥ इत्थमिति—एवं पूर्वोक्तरीत्या। तदर्भकयुगाचरणप्रचारं तौ च तौ अर्भकौ बालकौ च तदर्भकौ। तयोर्युगं युगलं तस्य आचरणस्य देशयत्याचारस्य क्षुल्लकक्षुल्लिकाचारस्य प्रचारो यत्र। एतादृशं मुनेः सुदत्ताचार्यात् द्वितयधर्मकथावतारं द्वितययोर्धर्मयोः कथाया अवतारो यत्र तं श्रुत्वा, सा देवता चण्डमारीनामा। स नृपतिः मारिदत्तः। स च पौरलोकः मारिदत्तनृपतिप्रजाजनः। भवभाववृत्तेः भवो देवभवो मनुष्यभवश्च, भावः तत्तद्गतियोग्यभावाः परिणामाः तेषां वृत्तिः प्रवृत्तिः तस्या उचितं योग्यं धर्मं जग्राह ग्रहणं चकार ॥९४२॥ मुनिकुमारयुगलमिति—अभयरुचिनामा क्षुल्लकः अभयमति-नाम्नी क्षुल्लिकेति मुनिकुमारयुगलं प्रोक्तम्। तत्क्रमेण व्यतिक्रान्तबालकालं यापितकुमारकालं सत् चारित्रम् आचर्य प्रतिपाल्य, कथंभूतं तत्। सुधेति—सुधाशना देवाः तेषां वेश्म स्वर्गः स अधिरुह्यते येन तत् चारित्रं सुधाशनवेश्माधिरोहणम्। पुनः कथंभूतम् यतिविरतीत्यादि यतिर्मुनिः विरतिरार्या तयोर्वेषौ नग्नता, एकशाटक-धारित्वं च। भाषितं भाषासमितिपालनम्। एतयोरनल्पा बहवो ये विकल्पा भेदाः स एव प्रासादः सौधः तदुपरि कलशारोपणमिव चारित्रम् अतिचिरं दीर्घकालम् आचर्य प्रतिपाल्य। ऐशानस्वर्गम् अवापदिति निवेदयति ग्रन्थकारः। तद्यथा—अभयरुचिरिति—स मुनिकुमारोऽभयरुचिः सानुजः अनुजा लघुभगिनी अभयमतिः तया सहितः। तत्र देवीवनरहसि देव्या वनं देवीवनं तन्नामकम् अरण्यं तस्य रहः विजनप्रदेशस्तत्र। प्रायम् उपवासं कृत्वा। ऐशानकल्पं द्वितीयस्वर्गम् अवापत् प्राप्तः। मारदत्तोऽपि भूपः राजा धृतेति—धृतं पालितं यतिपति-वृत्तं मुनीन्द्रचरणं येन स तथाभूतः सन् तथैव अभयरुचिरिव स्वर्गलक्ष्मीविलासं सुरलोकरमासुखम् अभजत् प्राप्तः ॥९४३॥ रत्नद्वयेनेति—रत्नयोर्द्वयं सम्यग्दर्शनसम्यग्ज्ञानयुगलमिति भावः तेन समलंकृतेति समलंकृता विभूषिता चित्तवृत्तिः मनोव्यापारो यस्याः। सा चण्डमारीति देवताऽपि गणिनो महं सुदत्ताचार्यस्य पूजाम् आरचय्य प्रविधाय। द्वीपान्तरेति—अन्ये द्वीपाः द्वीपान्तराणि धातकीपुष्करार्धनन्दीश्वरादयः। द्युनगाश्च दिवो नाकस्य स्वर्गस्य नगाः पर्वताः पञ्चमेरवश्च तेषां जातं समूहः तस्य यानि जिनेन्द्रसद्मानि जिनालयाः तान् वन्दते इति वन्दारुर्वन्दनशीला तस्या भावः वन्दनशीलता तया अनुमतः मान्यः युक्तः यः कामः अभिलाषः तत्र परायणा तत्परा अभूत् अभवत् ॥९४४॥ ध्यानेति—सिद्धगिरौ तन्नामके पर्वते रेवानद्यास्तीरे पश्चिमभागे सिद्धवरकूट-पर्वते स मुनिः मुनिभिर्यतिभिः सह वर्तते इति समुनिः सुदत्ताह्वयः सुदत्ताभिधानः सूरिः सम्यक् देवत्वाद्यभिलाष-रहितं निर्दोषं ध्यानं विधाय लान्तवनाम्नि सप्तमे कल्पे स्वर्गे सर्वेति—सर्वेषाम् अमराणाम् ग्रामणीः अग्रणीः सुरो देवः अजायत। ये च अन्ये यशोमतिप्रभृतयः यशोमतिनृपादयः तेऽपि प्रक्लृप्तव्रताः समाचरितचरिताः। सुकृतिभिः पुण्यवद्भिर्जनैः सुरैश्च संकीर्त्यमानश्रियः वर्ण्यमानविभवाः त्रिदशेश्वराः सुरपतयः संजाताः समभवन् ॥९४५॥ कृतग्रन्थनिर्वाहः सोमदेवसूरिरन्त्यमङ्गलमाह—जयत्विति—जिनोक्तिसुधारसः जिनवचनामृतरसः यः जगदानन्दस्यन्दो जगतः आनन्दस्य स्यन्दः स्रवणं यत्र अस्ति तथाभूतः जयति सर्वोत्कर्षेण वर्तते। तदनु तदनन्तरं सतां सज्जनानां कामारामः अभिलाषोद्यानं फलसंगमैः स्वर्गादिफललाभैः जयतात् उत्कर्षं समृद्धिं प्राप्नुयात्। ततश्च तदनन्तरं कवितादेवी सरस्वती, कविताशक्तिर्वा शश्वत् सततं जयतात्। यदाश्रयात् यस्याः कवितादेव्याः साहाय्यमवलम्ब्य मम इयं कृतिमतिः कृतिकरणसमर्था मतिः बुद्धिः कृती कविः तस्य मतिर्बुद्धिः वा जगत्त्रयभूषणां सूक्तिं सूते त्रिलोकालङ्कारां सूक्तिं सुभाषितं सूते जनयति ॥९४६॥ अभिधानेति—अभिधा-नानां शब्दानां निधाने अक्षयनिधिभूते। यशोधरमहाराजचरिते कथंभूते यशस्तिलकनामनि यशस्तिलकाख्ये। सतां मतिः सत्पुरुषाणां मतिः बुद्धिः स्तात् सततं प्रवर्तताम्। एतद्यशोधरमहाराजचरितं सन्तः निजकर्णातिथिं सन्ततम् कुर्वन्त्विति भावः ॥९४७॥ एतच्चरितस्य पठनं कुर्वतः यशः प्रसरतु कवितारहस्यमुद्रां च लभतामिति कविराशास्ते—एतामिति—अनुपूर्वशः आचार्यपरम्पराम् अनुसृत्य एताम् अष्टसहस्रीम् अष्टसहस्रीति अपरनाम-धेयां कृतिं विमृशन् कृती धन्यः कविकवितारहस्यमुद्रां कविता एव स्त्री तस्याः रहस्यं भोगः तस्य मुद्राम् अनुज्ञां तथा च कवितायाः गूढतत्त्वस्य मुद्रां प्रत्ययम् अवाप्नुयात्। आसमुद्रं च यशः लभेत ॥९४८॥ ग्रन्थसमाप्तौ निजगुरुपरम्परां कथयति कविः—श्रीमानिति—सदैव सततं श्रीमान् आगमचातुर्यशोभा एव श्रीः सा यस्यास्ति स श्रीमान् संघतिलकः देवसंघस्य भूषणम् यशःपूर्वकः देवः अस्ति। यशोदेवाभिधः सूरिः देवसंघस्य भूषणं अस्तीति भावः। तस्य यशोदेवसूरेः सद्गुणनिधिः सन्तश्च ते गुणाः तेषां निधिः निधानभूतः श्रीनेमिदेवाह्वयः

श्रीनेमिदेवाभिधः शिष्यः बभूव । तस्य नेमिदेवस्य शिष्यः सोमदेवः अभूत् । कथंभूतस्य नेमिदेवस्य आश्चर्य-तपःस्थितेः आश्चर्यकारिणी तपःस्थितिस्तपोमर्यादा यस्य । पुनः कथंभूतस्य महावादिनां त्रिनवतेर्जेतुः महान्तो वादिनः अन्यदर्शनमहापण्डिताः । तेषां त्रिनवतेः जेतुः सोमदेव इति यः शिष्यः इह गङ्गधारायाम् अभूत् । तस्य एष यशस्तिलकचम्पूर्नाम काव्यक्रमः अस्ति ॥९४९॥ अस्य यशस्तिलकस्य काव्यस्य पुस्तकलेखनं रच्छुकेन लेखकेन कृतमिति स्वयं लेखक एव निवेदयति—**विद्याविनोदेति**—विद्याया विनोदः लीला स एव वनं तेन वासितं सुगन्धीकृतं हृत् हृदयमेव शुको यस्य तेन रच्छुकेन तन्नामवता रच्छुकेन यशोधरस्य यशोधरचरितस्य पुस्तं पुस्तकम् कथंभूतम् विलसल्लिपि विलसन्ती शोभमाना सुन्दरा लिपिः अक्षरविन्यासो यस्मिन् तत् । कथंभूतस्य यशोधरस्य श्रीसोमदेवरचितस्य, पुनः कथंभूतस्य । **सल्लोकमान्येति**—सन्तश्च ते लोकाश्च सज्जनाः तेषां मान्यः । आदृता या गुणरत्नानां मही तस्या धरस्य पर्वतस्य ॥९५०॥ अपि च । रच्छुकलेखकस्य प्रशंसापरोऽयं श्लोकः **यस्येति**—यस्य रच्छुकस्य अक्षरावलिः अक्षरपङ्क्तिः अधीरविलोचनाभिः चञ्चलनयनाभिः रामाभिः मदन-शासनलेखनेषु आकाङ्क्ष्यते अभिलष्यते । विवेकिषु जनेषु तस्मै रच्छकाय कः नाम सज्जनः लेखकशिखामणिना-मधेयं लेखकचूडारत्नेति पदं न यच्छति अपि तु यच्छत्येव । अयं रच्छको लेखकः कविसमकालमेवाभवदिति विज्ञायते श्लोकेनानेन ॥९५१॥ **शकनृपेति**—शकनृपः सातवाहनस्तस्य यः कालः उत्पत्तिसमयः, तस्य अतीतानि यानि संवत्सराणां वर्षाणां शतानि, कति । अष्टौ तेषु गतेषु पुनः कथंभूतेषु एकाशीत्यधिकेषु गतेषु यातेषु ( अङ्कतः ८८१ ) इदं काव्यं निर्मापितमिति । कस्मिन् संवत्सरे मासे तिथाविति कथयति, सिद्धार्थसंवत्सरान्तर्गत-चैत्रमासमदनत्रयोदश्याम् । गङ्गधरायां नगर्याम् इदं काव्यं विनिर्मापितम् । कथंभूतायां श्रीमद्वागराजप्रवर्धमान-वसुधारायां श्रीमतो राज्यलक्ष्मीवतो वागराजस्य नृपस्य प्रवर्धमाना वसुधारा धनधारा यस्याम् । अयं वागराजः कस्य पुत्र इति कथ्यते । कृष्णराजस्य सामन्तचूडामणेः अरिकेसरिणः प्रथमपुत्रः आसीत् । कृष्णराजेन पाण्ड्य-सिंहल-चोलचेरमप्रभृतयो महीपतयः जिताः, मेल्याटयां च तस्य राज्यप्रभावः प्रवर्धमान आसीत् । अयं अरि-केसरी चालुक्यवंशजन्माभूत् । संप्राप्तपञ्चमहाशब्दानां महासामन्तानाम् अधिपतिरभवत् ।

इति सकलतार्किकलोकचूडामणेः श्रीमन्नेमिदेवभगवतः शिष्येण सद्योऽनवद्यगद्यपद्यविद्याधरचक्रवर्ति-
शिखण्डमण्डनीभवच्चरणकमलेन श्रीसोमदेवसूरिणा विरचिते यशोधरमहाराजचरिते
यशस्तिलकापरनाम्नि महाकाव्ये धर्मामृतवर्षमहोत्सवो
नाम अष्टमः आश्वासः ॥८॥

**वर्णः पदमिति**—वर्णः ककाराद्यक्षरम्, पदं शब्दः, वाक्यविधिः सुप्तिङन्तचयो वाक्यं तस्य विधिः विधानं रचना, समासः समसनं समासः पदयोः पदानां वा एकपदीकरणं समासः । लिङ्गं स्त्रीपुंनपुंसकं लिङ्गम् । क्रिया क्रियापदम् । कारकं कर्मकरणादि । अन्यतन्त्रम् अन्यशास्त्राणां विषयाः प्रसंगेन समागताः । छन्दः वृत्तानि । रसः शृङ्गारादयः, अलंक्रिया उपमानरूपकादयः । अर्थः काव्यकथाविषयः । नायकचरित्रम् । लोकस्थितिः लोकानाम् आचारः इति अत्र चतुर्दश विषयाः स्युः ॥९५२॥ **अब्दे इति**—अस्य श्लोकस्य विमर्शे कृते सति कविना यः काव्यरचनाकालः शकनृपकालातीतादिवाक्ये दर्शितः तेन सह विरोधः प्रतिभाति अतः अयं श्लोकः कवेर्नास्ति इति मे मतिः । तथा चापरोऽत्र विमर्शः काव्ये पूर्णतां नीते पुनः वर्णः पदं वाक्यमिति श्लोकलेखनम् अब्दे इति श्लोकलेखनं च सयुक्तिकं न प्रतिभाति । अतः अन्येन केनापि एतच्छ्लोकयुग्मं रचितं स्यादिति मनसि विकल्प उत्पद्यते । तथा च सटिप्पणपुस्तकेषु अब्दे इतिश्लोकोऽपि न वर्तते । अतोऽस्य श्लोकस्याभिप्रायो न व्यक्तीकृतः इति ज्ञेयम् । श्रुतसागराचार्यैरकृतटीकस्य अस्य यशस्तिलकाख्यकाव्यांशस्य यथामति टीका विहिता । अत्र टीकायां व्याकरणाद्यनभिज्ञतया मत्तो बहवो दोषाः जाता इति मन्ये तान् संशोध्य पाठकास्तं काव्यांशं पठन्तु इति निवेद्यते ॥

जिनदासेन पार्श्वनाथतनूजेन फडकुलेत्युपाह्वयेन ।

# उपासकाध्ययनस्थश्लोकानुक्रमः

म



य

## ह

## २. उद्धृतपद्यानामकाराद्यनुक्रमणी



## ३. विशिष्ट शब्दसूची

अ

## ह



## ४. व्यक्तिनामसूची

## ५. भौगोलिकनामसूची परिचयसहिता

**अंग** ( पृष्ठ ५३ ) – वर्तमान बिहारप्रदेशके भागलपुर, मुंगेर आदि जिले।

**अमरावती** पृ० ७२, ८६ –

**अयोध्या** ( पृ० ५६, १७८, १७९, १८८ ) – उपासकाध्ययनके आठवें कल्पमें अयोध्याको कोशल देशके मध्यमें बतलाया है ( कोशलदेशमध्यायाममयोध्यायां पुरि )। श्रुतसागरसूरिकी टीकामें कोशलको विनीतापुर तथा अयोध्याको विनीता बतलाया है। वर्तमानमें उत्तरप्रदेशके फैजाबाद जिलेके निकट अयोध्या नामकी नगरी है।

**अवन्ती मण्डल** ( पृ० १४२, १५५ ) – इस देशकी राजधानी उज्जयिनी नगरी थी।

**अहिच्छत्र** ( पृ० ८४ ) – सोमदेवने इसे पंचालदेशमें बतलाया है तथा उसे पार्श्वनाथ भगवान्‌के यशसे प्रकाशित लिखा है। अहिच्छत्रमें ही भगवान् पार्श्वनाथ पर कमठने घोर उपसर्ग किया था और उन्हें केवलज्ञानकी प्राप्ति हुई थी। वर्तमानमें उत्तरप्रदेशके बरेली जिलेमें रामनगर नामक गाँव ही पुराना अहिच्छत्र नगर था।

**इन्द्रकच्छदेश** ( पृ० ५९ ) उपासकाध्ययनके नौवें कल्पके अनुसार रोरुकपुर नगर, जिसे मायापुरी भी कहते थे, इन्द्रकच्छदेशमें था। रोरुकपुर बौद्धग्रन्थोंका रोरुक जान पड़ता है जो सौवीर देशकी राजधानी था और कच्छकी खाड़ीमें व्यापारका प्रमुख केन्द्र था।

**उज्जयिनी** ( पृ० ९५ ) – वर्तमान मध्यप्रदेशमें भोपाल और इन्दौरके मध्यमें स्थित नगरी।

**उत्तर मथुरा** ( पृ० ६२, ६३ ) – दक्षिण मथुरा या मदुरासे भेद दिखलानेके लिए ही उत्तरप्रदेशमें स्थित मथुराको उत्तरमथुरा कहा है। उपासकाध्ययनके १७-१८वें कल्पोंमें सोमदेवने मथुराके प्रसिद्ध जैन स्तूपकी स्थापनाकी कथा दी है और लिखा है कि आज भी इस स्तूपको देव-निर्मित कहा जाता है। सन् १८८९-९०में मथुराके बाहर गोवर्धन रोडके पासमें स्थित कंकाली टीलेसे उक्त प्राचीन जैन स्तूपके अवशेष प्राप्त हुए थे। चौदहवीं शताब्दीके जिनप्रभ सूरिरचित तीर्थकल्पमें भी उक्त जैन स्तूपका वर्णन है। किन्तु सोमदेवने उसकी स्थापनाकी जो कथा दी है वह तीर्थकल्पसे बिलकुल भिन्न है। जिनप्रभ सूरिसे सोमदेव लगभग चार शताब्दी पूर्व हुए हैं और इसलिए उन्होंने सम्भवतया स्तूपके स्थापनाकी प्राचीनतम कथा दी है। ईसाकी दूसरी शताब्दीमें भी उस स्तूपको देवनिर्मित कहा जाता था; क्योंकि कंकाली टीलेसे प्राप्त तीर्थंकर अरनाथकी एक खड्गासन मूर्तिके नीचे अंकित शिलालेखमें भी 'स्तूपे देव-निर्मिते' अंकित है। इस शिलालेखपर अंकित ७९ संवत् कुशान वंशी राजा वासुदेवके कालका सूचक है अतः ७९ + ७८ = १५७ ई०में भी यह स्तूप इतना प्राचीन माना जाता था कि उसे देवनिर्मित कहा जाता था। सोमदेवके अनुसार इसकी स्थापना वज्रकुमारने की थी। सोमदेवके उल्लेखसे ऐसा प्रतीत होता है कि सोमदेवके समयमें यह स्तूप वर्तमान था। कंकाली टीलेसे प्राप्त पार्श्वनाथकी एक प्रतिमापर संवत् १०३६ ( ९८० ई० ) अंकित है। अतः उस प्रतिमाकी स्थापना सोमदेवके समयमें हुई थी।

**एकचक्रपुर** पृ० १३०

**एकानसीपुर** ( पृ० १४२ ) – सोमदेवने इसे अवन्तिमण्डलमें बतलाया है। टीका–टिप्पणकारने इसका अर्थ उज्जयिनी नगरी किया है।

**करहाटदेश** ( पृ० ४४ ) – महाराष्ट्र प्रदेशके सतारा जिलेमें कोइना और कृष्णा नदीके संगमपर स्थित है। सोमदेवने करहाटको एक सौभाग्यशाली देश बतलाया है और उसमें स्थित एक विशाल गोशालाका सुन्दर वर्णन किया है।

**काकन्दीपुरी** ( पृ० १४०,२०८,२०९ ) – सोमदेवने काकन्दीको एक बहुत बड़ा व्यापारी केन्द्र बतलाया है और उसे नौवें तीर्थंकर पुष्पदन्तके जन्मकल्याणकसे पवित्र बतलाया है। वर्तमानमें गोरखपुर ( उ० प्र० ) से ३९ मीलपर एन० ई० रेल्वेके नोनखार स्टेशनसे तीन मील जो खुखुन्दू गांव है उसे पुष्पदन्तका जन्म-स्थान माना जाता है।

**काम्पिल्य** ( पृ० २०५ ) – इसे पंचालदेशमें बतलाया है। गंगा और यमुनाके बीचके प्रदेशको पंचालदेश कहते थे। वर्तमानमें उत्तरप्रदेशके फर्रुखाबाद जिलेमें काम्पिल्य नामक गाँव है।

**कालीदासकानन** ( पृ० ८४ ) – सोमदेवने अहिच्छत्रमें जलवाहिनी नदीके तटके निकट कालीदास नामक वनका उल्लेख किया है।

**काशीदेश** ( पृ० १९४ ) – वाराणसी नगरीके आसपासका प्रदेश

**किन्नरगीतनगर** पृ० ५५

**कुरुजांगल** ( पृ० ३९,९८,१७७ ) – यह कुरु देशका एक भाग था। उसीमें हस्तिनापुर नामका नगर था।

**कुशाग्रपुर** ( पृ० ४६,५० ) – चीनी यात्री युवानच्वांगके अनुसार कुशाग्रपुर मगधका केन्द्र तथा पुरानी राजधानी थी। वहाँ एक प्रकारकी सुगन्धित घास होती थी उसीके कारण उसका नाम कुशाग्रपुर पड़ा था। सोमदेवने भी कुशाग्रपुरको मगध देशमें बतलाया है। हेमचन्द्राचार्यके त्रिषष्टिशलाका पुरुष चरितमें सुरक्षित परम्पराके अनुसार प्रसेनजित कुशाग्रपुरका राजा था। कुशाग्रपुरमें लगातार आग लगनेके कारण प्रसेनजितने यह आज्ञा दी थी कि जिसके घरमें आग पायी जायेगी वह नगरसे निकाल दिया जायेगा। एक दिन राजमहलमें आग पायी जानेसे प्रसेनजितने कुशाग्रपुरको त्याग दिया।

**कैलास** ( पर्वत ) पृ० ५२।

**कोसलदेश** ( पृ० ५६ ) इसकी राजधानी अयोध्या थी।

**कौशाम्बीदेश** ( पृ० १५८,१६४ ) – अलाहाबादसे लगभग तीस मी० यमुनाके तटपर कोसम नामक गांव है उसे ही प्राचीन कौशाम्बी माना जाता है। कौशाम्बी वत्सदेशकी राजधानी थी। श्रुतसागर सूरिने अपनी टीकामें लिखा है कि वत्सदेशमें कौशाम्बी नगरी गोपाचल ( ग्वालियर ) से ४४ गव्यूतिपर है। यदि गव्यूतिसे दो कोस या चार मील लिया जाता है तो कौशाम्बी ग्वालियरसे १७६ मीलके लगभग होती है। दीघ निकायके महासुदस्सन सुत्तंतमें कौशाम्बीको महानगरोंमें गिनाया है।

**गिरिकूटपत्तन** – पृ० १८१

**गौणमण्डल** ( पृ० ७२ ) – पूर्वदेशमें बतलाया है। यह बंगालमें था।

**चम्पापुरी** ( पृ० ५३ ) – अंग देशकी प्राचीन राजधानी, बिहार प्रदेशमें भागलपुरके पास है।

**जनपद** ( पृ० ३९ ) – जनपद देशकी राजधानी भूमितिलकपुर थी। सम्भवतया जनपद देश कुरुदेशके निकट था, क्योंकि कथामें बतलाया है कि दो मित्र भूमितिलकपुरसे हस्तिनागपुर आते हैं।

**जम्बूद्वीप** – पृ० ३९।

अलकवाहिनी नदी ( पृ० ८४ ) – यह अहिच्छत्रके निकट बहती थी। इसीके तटपर कालीदास नामक महावन था।

इहाला ( पृ० १८१ ) – इहलामण्डलमें स्वस्तिपुरी नामक नगरी थी।

ताम्रलिप्ति ( पृ० ७२ ) – इसे पूर्वदेशमें गौणमण्डलमें बतलाया है। बंगालके मिदनापुर जिलेमें आधुनिक तमलुक नामक स्थान प्राचीन ताम्रलिप्ति था।

दक्षिणमथुरा ( पृ० ६२,७० ) – दक्षिणकी मदुरा नगरीको दक्षिण मथुरा कहते थे। मथुराका ही अपभ्रंश मदुरा प्रतीत होता है।

दण्डकारण्य ( पृ० ४४ ) – सोमदेवने दण्डकारण्यको करहाट देशके पश्चिमी भागमें बतलाया है। और करहाट देश महाराष्ट्र प्रदेशके सतारा जिलेमें कृष्णा और कोइना नदियोंके संगमपर था।

नन्दीश्वरद्वीप पृ० ४३।

नाभिगिरि ( पृ० ८५ ) – मगधदेशके सोपारपुर नगरके पास यह पर्वत बतलाया है।

पञ्चशैलपुर ( पृ० ७६,८० ) मगधदेशकी राजगृही नगरीका अपरनाम था। पाँच पर्वतोंसे घिरा होनेके कारण उसे पञ्चशैलपुर कहते थे। आज भी उसे पंचपहाड़ी कहते हैं।

पञ्चालदेश – गंगा और यमुनाके बीचका प्रदेश पंचाल था। मोटे तौरपर उत्तरप्रदेशके बरेली, बदायूँ, फर्रुखाबाद और इनसे सम्बद्ध जिले पंचाल देश कहलाते थे।

पद्मावतीपुर ( पृ० १६४ ) – टिप्पणके अनुसार उज्जयिनीका अपर नाम।

पद्मिनीखेट ( पृ० १६८ ) – एक नगरका नाम था।

पाटलीपुत्र ( पृ० ६४,७२ ) – सोमदेवने इसे सुराष्ट्रदेशमें बतलाया है।

पाण्ड्यमण्डल ( पृ० ६२ ) – दक्षिणके तमिल प्रदेशका भाग। इसकी राजधानी मदुरा थी।

पोदनपुर ( पृ० १७७ ) – यह अश्मक देशकी राजधानी थी। पुराने हैदराबाद राज्यके निजामाबाद जिलेमें गोदावरीकी सहायक नदीपर स्थित आधुनिक बोधन ही प्राचीन पोदनपुर था। सोमदेवने पोदनपुरको रम्यक देशमें बतलाया है।

प्रयागदेश ( पृ० १६७ ) – वर्तमान इलाहाबादके पासका प्रदेश सम्भवतया प्रयाग देश कहा जाता था। जैसे वाराणसीके पासके प्रदेशको काशी देश कहते थे।

फेनमालिनी ( पृ० ८८ ) – एक नदी।

बलवाहनपुर पृ० ८६।

भावपुर पृ० ८७।

भीमवन ( पृ० ५७ ) – शखपुरके निकट भीमवन नामक महावन था।

भूमितिलकपुर ( पृ० ३९ ) – सोमदेवने इसे जनपददेशमें बतलाया है।

मगधदेश ( पृ० ४६,४७,७६,८५,१७८ ) – इसकी राजधानी राजगृही थी जो वर्तमानमें बिहार प्रदेशमें है।

मथुरा ( पृ० ८९,९१ ) – देखो उत्तर मथुरा।

मलयाचल पृ० ५५

मिथिलापुरी ( पृ० ४७,१०० ) – सोमदेवने मिथिलापुरीको मगधदेशमें बतलाया है। वर्तमानमें बिहार प्रदेशमें दरभंगाके पास मिथिला नामक नगरी है।

# BHĀRATĪYA JÑĀNAPĪṬHA

## MŪRTIDEVĪ JAINA GRANTHAMĀLĀ

*General Editors* :

Dr. H. L. JAIN, Jabalpur : Dr. A. N. UPADHYE, Kolhapur.

The Bhāratīya Jñānapīṭha, is an Academy of Letters for the advancement of Indological Learning. In pursuance of one of its objects to bring out the forgotten, rare unpublished works of knowledge, the following works are critically or authentically edited by learned scholars who have, in most of the cases, equipped them with learned Introductions etc. and published by the Jñānapīṭha.

**Mahābandha** or the **Mahādhavalā** :

This is the 6th Khaṇḍa of the great Siddhānta work *Ṣaṭkhaṇḍāgama* of Bhūtabali : The subject matter of this work is of a highly technical nature which could be interesting only to those adepts in Jaina Philosophy who desire to probe into the minutest details of the Karma Siddhānta. The entire work is published in 7 volumes. The Prākrit Text which is based on a single Ms. is edited along with the Hindī Translation. Vol. I is edited by Pt. S. C. DIWAKAR and Vols. 2 to 7 by Pt. PHOOLACHANDRA. Jñānapīṭha Mūrtidevī Jaina Granthamālā, Prākrit Grantha Nos. 1, 4 to 9. Super Royal Vol. I : pp. 20 + 80 + 350 ; Vol. II : pp. 4+40+440 ; Vol. III : pp. 10+496 ; Vol. IV : pp. 16+428 ; Vol. V : pp. 4+460 ; Vol. VI : pp. 22+370 ; Vol. VII : pp. 8+320. Bhāratīya Jñānapīṭha Kashi, 1947 to 1958. Price Rs. 11/- for each vol.

**Karalakkhaṇa** :

This is a small Prākrit Grantha dealing with palmistry just in 61 gāthās. The Text is edited along with a Sanskrit Chāyā and Hindī Translation by Prof. P. K. MODI. Jñānapīṭha Mūrtidevī Jaina Granthamālā, Prākrit Grantha No. 2. Third edition, Crown pp. 48 Bhāratīya Jnānapīṭha Kashi, 1964. Price 75 nP.

**Madanaparājaya :**

An allegorical Sanskrit Campū by Nāgadeva (of the Saṁvat 14th century or so) depicting the subjugation of Cupid. Edited critically by Pt. RAJKUMAR JAIN with a Hindī Introduction, Translation etc., Jñānapīṭha Mūrtidevī Jaina Granthamālā, Sanskrit Grantha No. 1. Second edition. Super Royal pp. 14 + 58 + 144. Bhāratīya Jñānapīṭha Kashi, 1964. Price Rs. 8/-.

**Kannaḍa Prāntīya Tāḍapatrīya Grantha-sūcī :**

A descriptive catalogue of Palmleaf Mss. in the Jaina Bhaṇḍāras of Moodbidri, Karkal, Aliyoor etc. Edited with a Hindī Introduction etc. by Pt. K. BHUJABALI SHASTRI. Jñānapīṭha Mūrtidevī Jaina Granthamālā, Sanskrit Grantha No. 2. Super Royal pp. 32 + 324. Bhāratīya Jñānapīṭha Kashi, 1948. Price Rs. 13/-.

**Tattvārtha-vṛtti :**

This is a critical edition of the exhaustive Sanskrit commentary of Śrutasāgara (c. 16th century Vikrama Saṁvat) on the Tattvārthasūtra of Umāsvāti which is a systematic exposition in Sūtras of the fundamentals of Jainism. The Sanskrit commentary is based on earlier commentaries and is quite elaborate and thorough. Edited by Pts. MAHENDRAKUMAR and UDAYACHANDRA JAIN. Prof. MAHENDRAKUMAR has added a learned Hindi Introduction on the exposition of the important topics of Jainism. The edition contains a Hindī Translation and important Appendices of referential value. Jñānapīṭha Mūrtidevī Jaina Granthamālā, Sanskrit Grantha No. 4. Super Royal pp. 108 + 548. Bhāratīya Jñānapīṭha Kashi, 1949, Price Rs. 16/-.

**Ratna-Mañjūṣā with Bhāṣya :**

An anonymous treatise on Sanskrit prosody. Edited with a critical Introduction and Notes by Prof. H. D. VELANKAR. Jñānapīṭha Mūrtidevī Jaina Granthamālā, Sanskrit Grantha No. 5. Super Royal pp. 8 + 4 + 72. Bhāratīya Jñānapīṭha Kashi, 1949. Price Rs. 2/-.

**Nyāyaviniścaya-vivaraṇa :**

The Nyāyaviniścaya of Akalaṅka (about 8th century A. D.) with an elaborate Sanskrit commentary of Vādirāja (c. 11th century A. D.) is a repository of traditional knowledge of Indian Nyāya in general and of Jaina Nyāya in particular. Edited with Appendices etc. by Pt. MAHENDRAKUMAR JAIN. Jñānapīṭha Mūrtidevī Jaina Granthamālā, Sanskrit Grantha Nos. 3 and 12. Super Royal Vol. I : pp. 68 + 546 ; Vol. II : pp. 66 + 468. Bhāratīya Jñānapīṭha Kashi, 1949 and 1954, Price Rs. 15/- each.

**Kevalajñāna-praśna-cūḍāmaṇi :**

A treatise on astrology etc. Edited with Hindī Translation, Introduction, Appendices, Comparative Notes etc. by Pt. NEMICHANDRA JAIN. Jñānapīṭha Mūrtidevī Jaina Granthamālā, Sanskrit Grantha No. 7. Super Royal pp. 16+128. Bhāratīya Jñānapīṭha Kashi, 1950. Price Rs. 4/-.

**Nāmamālā :**

This is an authentic edition of the Nāmamālā, a concise Sanskrit Lexicon of Dhanaṁjaya (*c.* 8th century A. D.) with an unpublished Sanskrit commentary of Amarakīrti (*c.* 15th century A.D). The Editor has added almost a critical Sanskrit commentary in the form of his learned and intelligent foot-notes. Edited by Pt. SHAMBHUNATH TRIPATHI, with a Foreword by Dr. P. L. VAIDYA and a Hindī *Prastāvanā* by Pt. MAHENDRAKUMAR. The Appendix gives Anekārtha nighaṇṭu and Ekākṣarī-kośa. Jñānapīṭha Mūrtidevī Jaina Granthamālā, Sanskrit Grantha No. 6. Super Royal pp. 16+140. Bhāratīya Jñānapīṭha Kashi, 1950. Price Rs. 3.50 nP.

**Samayasāra :**

An authoritative work of Kundakunda on Jaina spiritualism. Prākrit Text, Sanskrit Chāyā. Edited with an Introduction, Translation and Commentary in English by Prof. A. CHAKRAVARTI. The Introduction is a masterly dissertation and brings out the essential features of the Indian and Western thought on the all-important topic of the Self. Jñānapīṭha Mūrtidevī Jaina Granthamālā, English Grantha No. 1. Super Royal pp. 10+162+244. Bhāratīya Jñānapīṭha Kashi, 1950. Price Rs. 8/-.

**Jātakaṭṭhakathā :**

This is the first Devanāgarī edition of the Pāli Jātaka Tales which are a store-house of information on the cultural and social aspects of ancient India. Edited by Bhikshu DHARMARAKSHITA. Jñānapīṭha Mūrtidevī Pāli Granthamālā No. 1, Vol. 1. Super Royal pp. 16+384. Bhāratīya Jñānapīṭha Kashi, 1951. Price Rs. 9/-.

**Kural** or **Thirukkuraḷ :**

An ancient Tamil Poem of Thevar. It preaches the principles of Truth and Non-violence. The Tamil Text and the commentary of Kavirājapaṇḍita. Edited by Prof. A. CHAKRAVARTI with a learned Introduction in English. Bhāratīya Jñānapīṭha Tamil Series No. 1. Demy pp. 8+36+440. Bhāratīya Jñānapīṭha Kashi, 1951. Price Rs. 5/-.

**Mahāpurāṇa :**

It is an important Sanskrit work of Jinasena-Guṇabhadra, full of encyclopædic information about the 63 great personalities of Jainism and about Jain lore in general and composed in a literary style. Jinasena (837 A. D.) is an outstanding scholar, poet and teacher; and he occupies a unique place in Sanskrit Literature. This work was completed by his pupil Guṇabhadra. *Critically edited with Hindī* Translation, Introduction, Verse Index etc. by Pt. PANNALAL JAIN. Jñānapīṭha Mūrtidevī Jaina Granthamālā, Sanskrit Grantha Nos. 8, 9 and 14. Super Royal Vol. I: Second edition, pp. 8+68+746 Varanasi 1963; Vol. II: pp. 8+556; Vol. III: pp. 8+16+640; Bhāratīya Jñānapīṭha Kashi, 1951 to 1954. Price Rs. 10/- each.

**Vasunandi Śrāvakācāra :**

A Prākrit Text of Vasunandi (c. Saṁvat first half of 12th century) in 546 gāthās dealing with the duties of a householder, critically edited along with a Hindī Translation by Pt. HIRALAL JAIN. The Introduction deals with a number of important topics about the author and the pattern and the sources of the contents of this Śrāvakācāra. There is a table of contents. There are some Appendices giving important explanations, extracts about Pratiṣṭhāvidhāna, Sallekhanā and Vratas. There are 2 Indices giving the Prākrit roots and words with their Sanskrit equivalents and an Index of the gāthās as well. Jñānapīṭha Mūrtidevī Jaina Granthamālā, Prākrit Grantha No. 3. Super Royal pp. 230. Bhāratīya Jñānapīṭha Kashi, 1952. Price Rs. 5/-.

**Tattvārthavārttikam** or **Rājavārttikam :**

This is an important commentary composed by the great logician Akalaṅka on the Tattvārthasūtra of Umāsvāti. The text of the commentary is critically edited giving variant readings from different Mss. by Prof. MAHENDRAKUMAR JAIN. Jñānapīṭha Mūrtidevī Granthamālā, Sanskrit Grantha Nos. 10 and 20. Super Royal Vol. I: pp. 16+430; Vol. II: pp. 18+436. Bhāratīya Jñānapīṭha Kashi, 1953 and 1957. Price Rs. 12/- for each Vol.

**Jinasahasranāma :**

It has the Svopajña commentary of Paṇḍita Āśādhara (V. S. 13th century). In this edition brought out by Pt. HIRALAL a number of texts of the type of Jinasahasranāma composed by Āśādhara, Jinasena, Sakalakīrti and Hemacandra are given. Āśādhara's text is accompanied by Hindī Translation. Śrutasāgara's commentary of the same is also given here. There is a Hindī Introduction giving information about Āśādhara etc. *There are some useful Indices.* Jñānapīṭha Mūrtidevī Jaina Granthamālā, Sanskrit Grantha No. 11. Super Royal pp. 288. Bhāratīya Jñānapīṭha Kashi, 1954. Price Rs. 4/-.

**Purāṇasāra-Saṁgraha :**

This is a Purāṇa in Sanskrit by Dāmanandi giving in a nutshell the lives of Tīrthaṁkaras and other great persons. The Sanskrit text is edited with a Hindī Translation and a short Introduction by G.C. JAIN. Jñānapīṭha Mūrtidevī Jaina Granthamālā, Sanskrit Grantha Nos. 15 and 16. Crown Part I : pp. 20+198 ; Part II : pp. 16+206. Bhāratīya Jñānapīṭha Kashi, 1954, 1955. Price Rs. 2/- each.

**Sarvārtha-Siddhi :**

The Sarvārtha-Siddhi of Pūjyapāda is a lucid commentary on the Tattvārthasūtra of Umāsvāti called here by the name Gṛdhrapiccha. It is edited here by Pt. PHOOLACHANDRA with a Hindī Translation, Introduction, a table of contents and three Appendices giving the Sūtras, quotations in the commentary and a list of technical terms. Jñānapīṭha Mūrtidevī Jaina Granthamālā, Sanskrit Grantha No. 13. Double Crown pp. 116+506. Bhāratīya Jñānapīṭha Kashi, 1955. Price Rs. 12/-.

**Jainendra Mahāvṛtti :**

This is an exhaustive commentary of Abhayanandi on the *Jainendra Vyākaraṇa*, a Sanskrit Grammar of Devanandi alias Pūjyapāda of circa 5th-6th century A. D. Edited by Pts. S. N. TRIPATHI and M. CHATURVEDI. There are a Bhūmikā by Dr. V. S. AGRAWALA, *Devanandikā Jainendra Vyākaraṇa* by PREMI and *Khilapāṭha* by MIMĀNSAKA and some useful Indices at the end. Jñānapītha Mūrtidevī Jaina Granthamālā, Sanskrit Grantha No. 17. Super Royal pp. 56+506. Bhāratīya Jñānapīṭha Kashi, 1956. Price Rs. 15/-.

**Vratatithi Nirṇaya :**

The Sanskrit Text of Sinhanandi edited with a Hindī Translation and detailed exposition and also an exhaustive Introduction dealing with various Vratas and rituals by Pt. NEMICHANDRA SHASTRI. Jñānapīṭha Mūrtidevī Jaina Granthamālā, Sanskrit Grantha No. 19. Crown pp. 80+200. Bhāratīya Jñānapīṭha Kashi, 1956. Price Rs. 3/-.

**Pauma-cariü :**

An Apabhraṁśa work of the great poet Svayambhū (677 A. D.). It deals with the story of Rāma. The Apabhraṁśa text up to 56th Sandhi with Hindi Translation and Introduction of Dr. DEVENDRAKUMAR JAIN, is published in 3 Volumes. Jñānapītha Mūrtidevī Jaina Granthamālā, Apabhraṁśa Grantha Nos. 1, 2 & 3. Crown size, Vol. I : pp. 28+333 ; Vol. II : pp. 12+377 ; Vol. III : pp. 6+253. Bhāratīya Jñānapītha Kashi, 1957, 1958. Price Rs. 3/- for each Vol.

**Jīvaṁdhara-Campū :**

This is an elaborate prose Romance by Haricandra written in Kāvya style dealing with the story of Jīvaṁdhara and his romantic adventures. It has both the features of a folk-tale and a religious romance and is intended to serve also as a medium of preaching the doctrines of Jainism. The Sanskrit Text is edited by Pt. PANNALAL JAIN along with his Sanskrit Commentary, Hindī Translation and Prastāvanā. There is a Foreword by Prof. K. K. HANDIQUI and a detailed English Introduction covering important aspects of Jīvaṁdhara tale by Drs. A. N. UPADHYE and H. L. JAIN. Jñānapīṭha Mūrtidevī Jaina Granthamālā, Sanskrit Grantha No. 18. Super Royal pp. 4+24 +20+344. Bhāratīya Jñānapīṭha Kashi, 1958. Price Rs. 8/-.

**Padma-purāṇa :**

This is an elaborate Purāṇa composed by Raviṣeṇa (V. S. 734) in stylistic Sanskrit dealing with the Rāma tale. It is edited by Pt. PANNALAL JAIN with Hindī Translation, Table of contents, Index of verses and Introduction in Hindī dealing with the author and some aspects of this Purāṇa. Jñānapīṭha Mūrtidevī Jaina Granthamālā, Sanskrit Grantha Nos. 21, 24, 26. Super Royal Vol. I : pp. 44+548 ; Vol. II : pp. 16+460 ; Vol. III : pp. 16+472. Bhāratīya Jñānapīṭha Kashī, 1958-59. Price Rs. 10/- each.

**Siddhi-viniścaya :**

This work of Akalaṅkadeva with Svopajñavṛtti along with the commentary of Anantavīrya is edited by Dr. MAHENDRAKUMAR JAIN. This is a new find and has great importance in the history of Indian Nyāya literature. It is a feat of editorial ingenuity and scholarship. The edition is equipped with exhaustive, learned Introductions both in English and in Hindi, and they shed abundant light on doctrinal and chronological problems connected with this work and its author. There are some 12 useful Indices. Jñānapīṭha Mūrtidevī Jaina Granthamālā, Sanskrit Grantha Nos. 22, 23. Super Royal Vol. I : pp. 16+174+370 ; Vol. II : pp. 8+808. Bhāratīya Jñānapīṭha Kashi, 1959. Price Rs. 18/- and Rs. 12/-.

**Bhadrabāhu-Saṁhitā :**

A Sanskrit text by Bhadrabāhu dealing with astrology, omens, portents etc. Edited with a Hindī Translation and occasional Vivecana by Pt. NEMICHANDRA SHASTRI. There is an exhaustive Introduction in Hindī dealing with Jain Jyotiṣa and the contents, authorship and age of the present work. Jñānapīṭha Mūrtidevī Jaina Granthamālā, Sanskrit Grantha No. 25. Super Royal pp. 72+416. Bhāratīya Jñānapīṭha Kashi, 1959. Price Rs. 8/-.

**Pañcasaṁgraha :**

This is a collective name of 5 Treatises in Prākrit dealing with the Karma doctrine the topics of discussion being quite alike with those in the Gōmmaṭasāra etc. The Text is edited with a Sanskrit commentary, Prākrit Vṛtti by Pt. HIRALAL who has added a Hindī Translation as well. A Sanskrit Text of the same name by one Śrīpāla is included in this volume. There are a Hindī Introduction discussing some aspects of this work, a Table of contents and some useful Indices. Jñānapīṭha Mūrtidevī Jaina Granthamālā, Prākrit Grantha No. 10. Super Royal pp. 64+804. Bhāratīya Jñānapīṭha Kashi, 1960. Price Rs. 15/-.

**Mayaṇa-parājaya-cariü :**

This Apabhraṁśa Text of Harideva is critically edited along with a Hindī Translation by Prof. Dr. HIRALAL JAIN. It is an allegorical poem dealing with the defeat of the god of love by Jina. This edition is equipped with a learned Introduction both in English and Hindī. The Appendices give important passages from Vedic, Pāli and Sanskrit Texts. There are a few explanatory Notes, and there is an Index of difficult words. Jñānapīṭha Mūrtidevī Jaina Granthamālā, Apabhraṁśa Grantha No. 5. Super Royal pp. 88+90. Bhāratīya Jñānapīṭha Kashi, 1962. Price Rs. 8/-.

**Harivaṁśa Purāṇa :**

This is an elaborate Purāṇa by Jinasena (Śaka 705) in stylistic Sanskrit dealing with the Harivaṁśa in which are included the cycle of legends about Kṛṣṇa and Pāṇḍavas. The text is edited along with the Hindī Translation and Introduction giving information about the author and this work, a detailed Table of contents and Appendices giving the verse Index and an Index of significant words by Pt. PANNALAL JAIN. Jñānapīṭha Mūrtidevī Jaina Granthamālā, Sanskrit Grantha No. 27. Super Royal pp., 12+16+812+160. Bhāratīya Jñānapīṭha Kashi, 1962. Price Rs. 16/-.

**Karmaprakṛti :**

A Prākrit text by Nemicandra dealing with Karma doctrine, its contents being allied with those of Gommaṭasāra. Edited by Pt. HIRALAL JAIN with the Sanskrit commentary of Sumatikīrti and Hindī Ṭīkā of Paṇḍita Hemarāja, as well as translation into Hindī with Viśeṣārtha. Jñānapīṭha Mūrtidevī Jaina Granthamālā, Prākrit Grantha No. 11. Super Royal pp. 32+160. Bhāratīya Jñānapīṭha Kashi, 1964. Price Rs. 6/-.

**Upāsakādhyayana :**

It is a portion of the Yaśastilaka-campū of Somadeva Sūri. It deals with the duties of a householder. Edited with Hindi Translation, Introduction and Appendices etc. by Pt. KAILASHCHANDRA SHASTRI Jñānapītha Mūrtidevī Jaina Granthamālā, Sanskrit Grantha No. 28. Super Royal pp. 116 + 539, Bhāratīya Jñānapītha, Kashi, 1964. Price Rs. 12/-.

**Bhojacaritra :**

A Sanskrit work presenting the traditional biography of the Paramāra Bhoja by Rājavallabha (15th century A. D.). Critically edited by Dr. B. Ch. CHHABRA, Jt. Director General of Archæology in India and S. SANKARANARAYANA with a Historical Introduction and Explanatory Notes in English and Indices of Proper names. Jñānapīṭha Mūrtidevī Jaina Granthamālā, Sanskrit Grantha No. 29. Super Royal pp. 24 + 192. Bhāratīya Jñānapīṭha Kashi, 1964. Price Rs. 8/-.

**Satyaśāsana-parīkṣā**

A Sanskrit text on Jain logic by Ācārya Vidyānandi, critically edited for the first time by GOKULCHANDRA JAIN. It is a critique of selected issues upheld by a number of philosophical schools of Indian Philosophy. There is an English compendium of the text, by Dr. NATHMAL TATIA. Jñānapītha Mūrtidevī Jain Granthamālā, Sanskrit Grantha No. 30. Super Royal pp. 56 + 34 + 62. Bhāratīya Jñānapītha, Kashi, 1964. Price Rs 5/-.

**Karakaṇḍa-cariu**

An Apabhraṁśa text dealing with the life story of king Karakaṇḍa, famous as 'Pratyeka Buddha' in Jaina & Buddhist literature. Critically edited with Hindi & English Translations, Introductions, Explanatory Notes and Appendices etc. by Dr. HIRALAL JAIN. Jñānapītha Mūrtidevī Jaina Granthamālā, Apabhraṁśa Grantha No. 4. Super Royal pp. 64 + 278. Bhāratīya Jñānapītha Kashi, 1964. Price Rs. 10/-.

*For Copies Please write to –*

BHARATIYA JNANPITH,
3620/21 Netaji Subhas Marg, Dariyaganj,
Delhi (India).

or

BHARATIYA JNANPITH,
Durgakund road, Varanasi (India).